ष्ठि-देवचन्द्र-लालभाइ-जैनपुस्तकोद्धारे ग्रन्थाङ्कः ६७

श्रीउमास्वातिवाचकमुख्यसन्दृब्धं

॥ तत्त्वार्थाधिगमसूत्रम् ॥

स्वोपज्ञभाष्यसम्बन्धकारिकासमेतं

श्रीदेवगुप्तसूरि-श्रीसिद्धसेनगणिकृतसम्बन्धकारिकावृत्तिविभूषितं

श्रीसिद्धसेनगणिकृतभाष्यानुसारिटीकासमलङ्कृतं च।

तस्य चार्यं

पञ्चाध्यायीमयः प्रथमो विभागः

संशोधकः

श्रीयुतरसिकदासतनयो हीरालालः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रेष्ठि-देवचन्द्र-लालभाइ-जैनपुस्तकोद्धारे ग्रन्थाङ्कः ६७

श्रीउमास्वातिवाचकप्रवरप्रणीतम्

॥ तत्त्वार्थाधिगमसूत्रम् ॥

स्वोपज्ञसम्बन्धकारिका-श्रीदेवगुप्तसूरि-श्रीसिद्धसेनगणिरचित-
तद्वृत्तिद्वयविभूषितं
स्वोपज्ञभाष्यश्रीसिद्धसेनगणिकृतटीकासमलङ्कृतं च ।

तस्य चायं पञ्चाध्यायीमयः

प्रथमो विभागः ।

संशोधकः—
गुर्जरदेशान्तर्गतसूर्यपुरवास्तव्यश्रीयुतरसिकदासतनुजो हीरालाल
एम्. ए. इत्युपपदविभूषितो न्यायकुसुमाञ्जल्यादिग्रन्थानां
विवेचनात्मकभाषान्तरकर्ता ।

प्रसिद्धिकारकः—
जव्हेरीत्युपाह्वः साकरचन्द्रात्मजो जीवनचन्द्रः ।
अस्य कोशस्यैकः कार्यवाहकः ।

प्रथमसंस्करणे प्रतयः १२५०

वीरात् २४५२] [विक्रमात् १९८२

पण्यं रूप्यकषट्कम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्य पुनर्मुद्रणाद्याः सर्वेऽधिकारा एतत्संस्था-
कार्यवाहकानामायत्ताः स्थापिताः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Sheth Devchand Lalbhai Jain Pustakoddhar Fund Series No. 67.

TATTVĀRTHĀDHIGAMASŪTRA

(A Treatise on the Fundamental Principles of Jainism)

Part I—Chapters I—V.

BY

HIS HOLINESS S'RĪ UMĀSVĀTI VĀCHAKA

TOGETHER WITH

His connective verses commented upon by

S'RĪ DEVAGUPTASŪRI & S'RĪ SIDDHASENAGAṆI

AND

His own gloss elucidated by

S'RĪ SIDDHASENAGAṆI

EDITED WITH

INTRODUCTION IN ENGLISH & SANSKRIT

BY

HIRALAL RASIKDAS KAPADIA, M. A.,

Translator of Nyāyakusumāñjali, S'ringāravairāgyataraṅgiṇī, etc.

PUBLISHED BY

JIVANCHAND SAKERCHAND JAVERI,

A Trustee of Sheth Devchand Lalbhai Jain Pustakoddhar Fund.

All rights reserved.

First Edition.] A. D. 1926 [1250 Copies.

Price Rs. 6-0-0.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Printed by M. N. Kulkarni, at the Karnatak Printing Press,
318/A, Thakurdwar, Bombay

AND

Published by Jivanchand Sakerchand Javeri, Trustee, Sheth Devchand
Lalbhai Jain Pustakoddhar Fund,
114/116 Javeri Bazar, Bombay.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रशान्त तपस्वी तपोगच्छाचार्य श्रीमद् १००८

विजयासिद्धिसूरीश्वर.

जन्म वि. सं. १९११ श्रावणशुक्ल १५ राजनगरे. दीक्षा वि. सं. १९३४ ज्येष्ठकृष्ण २. राजनगरे.

पंन्यासपदं वि. सं. १९५७ आषाढशुक्ल ११ सूर्यपुरे. सूरिपदं वि. सं. १९७५ माघशुक्ल ५ महेशानपुरे.

Lakshmi Art, Bombay 8.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समर्पणपत्रम् ।

अयि प्रशमपीयूषपयोनिधि-शान्त—तपोमूर्त्ति-सूरिमन्त्राराधक-तपागच्छाधिपति-प्रातःस्मरणीय—आचार्य्यवर्य-श्री १००८ **विजयसिद्धिसूरीश्वरपादाः** !

समाकृष्टमस्ति मच्चेतो भगवत्पादानामप्रतिमैः शमदमादिगुणगणैः । सुविहितनामधेयानां भवतां गभीरता, " मुधादायी मुधाजीवी " इत्यादिशास्त्रीयवचनानुसारिण्युपदेशप्रवृत्तिश्चापूर्वा वर्तत इति तु सर्वजनाऽविगानमेव । " सा मम समग्रस्य कुटुम्बस्य सधर्मजीवनं निर्मातुमतीवोपयोगिन्यभूत् " इत्येतत् सूचयति खलु मां प्रति निरतिशयं वात्सल्यं सदा संस्मरणीयानां श्रीमताम् । समग्रप्राणिगणहितपरायणानां भगवत्पादानां प्राग् दर्शिताया एतस्याः स्तुत्योपकृतेस्तथा 'अस्मदीयसंस्थायै श्रीमद्भिर्वितीर्यमाणायाऽनर्घ्यानुमतेर्विश्वोपकारकसर्वोत्तमसाहित्यसंशोधनप्रचारकर्मणि स्वकीयस्वहस्तसंशोधितानेकशास्त्रप्रतिप्रदानादिना मम परोपकारैकनिष्ठैर्मुनिपुङ्गवैर्भवद्भिर्विहितं भूरि भूरि साहाय्यं' तस्य च चिरस्मरणाय महनीयेभ्योऽपि महनीये भवतां कराम्भोजे समर्प्यतेऽयमपूर्वग्रन्थो-मया भवदभिलाषादतेऽपि ।

सकलवस्तुतत्त्वप्रज्ञापके **श्रीमहावीरदेव**शासने द्रव्यानुयोगाद्यनेकभेदभिन्नं ज्ञानादिरत्नत्रयप्रापकमत एव सकलशास्त्रेभ्योऽतिशयितं त्रिभुवनाश्चर्यकरं साहित्यनिधानं वरिवर्ति, तस्य प्रचारकर्मणि चतुस्त्रिंशदतिशयशालि-सकलसुरासुरसंसेवित-सकलोपमातीत-देवाधिदेव-**श्रीमहावीरदेव**ाज्ञापरिपालनपरैः **श्रीवीरशासन**-वियत्प्रकाशनहिमांशुभिर्महर्षिभिः शासनरसिक—श्राद्धरत्नैश्च कामं कामं व्यवसितं तस्याग्रे मम प्रयत्नास्तु सर्वथाऽकिंचित्करा एव, तथापि ते फलेग्रहिणोऽभूवन् तत् कृपावतां भवादृशां कृपाफलमित्येव मन्येऽहम् । साहित्यप्रचारकस्य मम स्वल्पा अपि यत्नाः फल-वैपुल्यभाजो भवन्त्विति मनोऽभिलाषं विरमाम्यहम् ।

मोहमयीनगर्याम्
वि. सं. १९८२
द्वितीयचैत्रशुक्ल-
त्रयोदश्यां रविवासरे
(महावीरजन्मजयन्तीदिने)

भवदीयचरणसेवासमुत्सुकः

साकरचन्द्रात्मजो जीवनचन्द्रः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Dedication

TO

THE CALM, HOLY & AUSTERE

ĀCHĀRYA S'RĪ 1008 VIJAYASIDDHISŪRIS'VARA

THE HEAD OF THE TAPĀ-GACHCHHA.

Your great and incomparable merits such as control over senses etc., have captivated my heart. Your selflessness and the subjects you select for delivering sermons are indescribable. My entire family owes a deep debt of gratitude to your Holy self for the fatherly tenderness and care with which you have drawn us to the path of religion.

I beg leave to dedicate this invaluable work to you as an humble tribute and holy offering in recognition of the in comparable services you have rendered to the spread of *Jaina* literature by placing at my disposal rare manuscripts that you were careful to go through and correct yourself and by giving me on all occasions and at all times your invaluable sympathy, help, advice and guidance in every matter of difficulty, thus rendering my task of publication as easy and smooth as it could become.

I am paying this tribute as a spontaneous and heart-felt offering in spite of your wishes to the contrary.

Compared with the efforts that the *Jaina* scholars—the ascetics and laymen as well, have made in the past to spread the sacred literature of Jainism far and wide, out of mere love of learning and knowledge and as a matter of pious duty owed by them to Lord *Mahāvīra* of holy and imperishable memory, my publishing work is like a mere drop in the ocean. But I do feel that what little I have been able to do so far is the fruit of your Holiness's blessing and encouragement. With the prayer and wish that my work may grow and prosper by your grace and favour,

I beg to remain,
Your most obedient servant,
JIVANCHAND SAKERCHAND JAVERI.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

THE LATE
SHETH DEVCHAND LALBHAI JAVERI.

BORN 1853 A. D. SURAT. DIED 13TH JANUARY 1906 A. D., BOMBAY.

श्रेष्ठी देवचन्द लालभाई जहवेरी.

जन्म १९०९ वैक्रमाब्दे
कार्तिकशुक्लैकादश्यां (देवदीपावलीदिने)
सूर्यपूरे.

निर्याणम् १९६२ वैक्रमाब्दे
पौषकृष्णतृतीयायाम् (मकरसंक्रान्ततिथौ)
मोहमयीनगर्याम्.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

FOREWORD.

———:0:———

Jain literature, comprising as it does almost all the branches that are characteristic of ancient Indian literature, holds no insignificant niche in the gallery of that literature. It is considerable even as it is at present, and was more so in former times. This is not the proper place to enumerate the great writers and their works that consitute the glory of that literature. The fact that the Jain writers had flourished in great abundance in times gone by, is evident from the vast stock of literature that has survived to this day, though it is yet in an unexplored state. Their eminence in subject-matter as well as language is manifest to those who are conversant with it.

Along with Indian literature at large, Jain literature too has been a participator in the unhappy fate it met with at the hands partly of alien bigotry, and partly of mutual religious jealousy and from the peculiarities of the climate. There was a time when there was no other alternative to secure the very existence of such literature but that of burying it in subterranean archives. The very method employed for the safety of the works became later on instrumental in further diminishing the stock, and that at a time when there was not the least chance of its being further enriched. Those upon whom had fallen the task of being the hereditary custodians of such collections, had inherited the traditions of their forefathers, viz., those of not suffering any part of such collection to see the rays of the sun, lest they might be deprived of them, and the works most dear to them be destroyed by the assailants. It is very strange indeed that these traditions are alive even at this day when there is peace all round, and when the time is most propitious for the development of literature. Fire even has contributed its quota to the destruction of the records. Add to these the all-round degeneration among the followers of the faith, when far from the prospects of further expansion, the faith was in imminent danger of being extinct. It was during this time that more attention was paid to the performance of external rites and ceremonies, and practically nothing was done in the direction of education and literature and the stirring up of the inner spirit of faith. It is only very recently that a practical revival of a salutary character is visible. Owing to circumstances above mentioned, the literary results of the

Jain Education International For Private & Personal Use Only www.jainelibrary.org

arduous labour and the great learning of the *Āchāryas* and the *Sādhus* of the faith, could not be made accessible.

The author of this *Tattvārthādhigamasūtra*, the priceless work fit to be recommended as a text-book of Jaina philosophy even to students of different Universities, is the well-known *Vāchakamukhya Śrī Umāsvāti*, who is equally revered both by the *Śvetāmbaras* and the *Digambaras*. It is a matter of rejoicing that he has written a commentary (*Bhāshya*) on it which has been ably expounded by many a learned saint out of whom *Śrī Siddha-senagaṇi* deserves special mention in this connection.

We need not dilate upon the life of the author as this subject is treated by Prof. *Hiralal Rasikdas Kapadia* M. A. in the introduction. He is the eldest son of the late Mr. *Rasikdas Varajdas Kapadia* who was a staunch follower of Jainism, the religion of his predecessors, as could be distinctly seen even from the *Jaina* temple he had at his residence in Surat.

We shall be failing in our duty if we did not record our thanks to those who have helped us in one way or the other. At the very outset, we have to thank Prof. *Kapadia* for having undertaken to edit this work. To his further credit it may be mentioned that in spite of his being engaged in editing and translating several works undertaken by him on behalf of *Śrī Āgamodaya Samiti* he complied with our request to write introductions both in English and Sanskrit. Our special thanks are due to *Āgamoddhāraka Jaināchārya Śrī Ānandasāgarasūri* who has so willingly placed all his knowledge of the subject at the disposal of the editor. We have also to thank *Jaināchārya Śrī Vijayasiddhisūri*, who lent to us a manuscript of this work. We are indebted to *Jaina-Śilpa-jyotisha-vidyā-mahodadhi Jainācharya Srī Jayasūri* who supplied the editor with a copy of *Tattvārthādhigamasūtra* formerly published at Ahmedabad by the late *Sheth Mansukhbhai Bhagubhai*, and his learned disciple *Pratāpamunijī* as well, who procured for the editor a manuscript from the *Mohanlāljī Jain Central Library* (Bombay). We offer our thanks to the trustees of this Library. We have also to thank the managers of the *Jainānanda-pustakālaya* Surat, for a manuscript of this work which they supplied to us with great pleasure.

Furthermore, we are grateful to *Nyāyatīrtha Nyāyaviśārada Upādhyāya Śrī Maṅgalavijaya*, one of the learned disciples of the late *Śāstraviśārada Jaināchārya Śri Vijayadharmasūri*, who was held in high esteem by scholars oriental and occidental as well, for the errata he

Jain Education International For Private & Personal Use Only www.jainelibrary.org

prepared for us. It seems he has intermixed therein at times different readings and a few words added as a matter of explanation. We were late in respectfully drawing the attention of *Upādhyāyaji* to have given these separately. Nevertheless, we fully appreciate his zeal for making this work intelligible even to the laymen.

It may perhaps not be out of place to give in short a history of the fund that has led to the publication of the Series. The late *Sheth Devchand Lalbhai Javeri*, in whose memory this fund has been inaugurated, left by his will a sum of Rs. 45,000 along with other sums to be spent in various other matters, to be devoted to some benevolent purposes. This amount was further enhanced by a sum of Rs. 25,000 set apart by Mr. *Gulabchand Devchand* to be spent in some good purpose in the memory of the said *Sheth Devchand Lalbhai*. It was at the advice of Punnyāsa Śrī Ānandasâgara (Āgamoddhāraka Jaināchārya Ānanda-sāgarasūri) that these sums which made the original funds in Trust, were amalgamated, and the present Trust was inaugurated. At present the funds of this Trust amount to about Rs. 100,000, the original being further enhanced by the property of *Bai Vijkore* the deceased daughter of the said *Sheth Devchand Lalbhai* which was directed to be made over to this Trust by her. Recently a sum of Rs. 2,000 has been added to this fund as suggested in his will by the late *Sheth Naginbhai Ghelabhai*, the nephew of the late *Sheth Devchand Lalbhai* and the managing trustee of this fund, who died at an early age of 45. The object of this Trust is to devote the interest on the funds for the preservation and the development of "the Jaina Svetāmbara Mūrti-Pūjaka Religious Literature."

The first 56 volumes of this Series were issued during the period when *Sheth Naginbhai* was alive. But, after his premature death in Bombay on the 20th of November 1921 (the *Kartaka* month of the *Vikrama era* 1978) the responsibility of publication has fallen on us. This is the '*Sixty-seventh Volume*' of the Series that is being published by this Trust.

Bombay,
JAVERI BAZAR,
1st August 1926.

JIVANCHAND SAKERCHAND JAVERI,
A Trustee, for himself and Co-Trustees.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषयसूचीपत्रम्—TABLE OF CONTENTS

	पृष्ठाङ्कः
समर्पणपत्रम्	५
Dedication (अर्पणपत्रिका)	७
Foreword (अग्रवचनम्)	९–११
किञ्चिद् विज्ञापनम्	१३–१४
प्रस्तावना	१५–३१
Preface (आमुखम्)	1–3
Introduction (उपोद्घातः)	4–10
स्वोपज्ञाः सम्बन्धकारिकाः (टीकाद्वयसमलङ्कृताः)	१–२४
तत्त्वार्थाधिगममूत्रं (स्वोपज्ञभाष्यसमेतं श्रीसिद्धसेनगणिकृतटीकाविभूषितम्)	२५–४४१
प्रथमोऽध्यायः	२५–१३५
द्वितीयोऽध्यायः	१३६–२२७
तृतीयोऽध्यायः	२२८–२७०
चतुर्थोऽध्यायः	२७१–३१४
पञ्चमोऽध्यायः	३१५–४४१
सूत्रक्रमेणान्तराधिकारसूचा	४४३–४६७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्चिद् विज्ञापनम्

श्रीविक्रमादित्यात् १९७४ तमेऽब्दे 'एम्. ए.' परीक्षोत्तीर्णानन्तरं 'विल्सन' पाठशालायां मया गणिताध्यापकपदेऽङ्गीकृते जैनधर्मसिद्धान्तपरिशीलनाय समासादि कथमप्यवसरः । तत्पूर्वं केवलं जैनसिद्धान्तस्य स्थूलस्वरूपं परमपूज्यतातपादेभ्यो मयाऽधिगतमासीत् । तत आरभ्यैव तस्य जिज्ञासाङ्कुरः प्ररूढ आसीत्, स चेदानीमवसरलाभादतीवानुरागेण ववृधे । नानाविधग्रन्थालोचने सूक्ष्मदृशा व्यासङ्गे च सम्पन्ने मन्मनस्येवं बभूव राद्धान्तो यथाऽस्मिन् दर्शने प्राधान्येन वरीवर्ति स्याद्वादशैली तथा नान्यत्रेति । परं चैतदीयस्य विषयस्यात्यन्तदुरूहत्वात् को वाऽस्य शास्त्रस्य पारीणो मार्गदर्शकश्च लभ्येतेति चिरमहर्दिवं विचार्यमाणेऽस्मिन्नेव काले सौभाग्येन विद्वद्वर्यशिष्यवृन्दसहितैः पूज्यपादसाहित्यप्रचारक-शास्त्रविशारद-जैनाचार्यश्रीविजयधर्मसूरिभिरियं मोहमयीनगरी यदृच्छयाऽलङ्कृता । तेषां दर्शनलाभेन तृषार्तस्य नीरलाभ इवात्यन्तं प्रमोदः समजनि ।

अथ सूरिमहाशयैः सहायातानां सर्वेषां परिचयोत्तरं मम विज्ञप्त्यनुसारेण तदन्तेवासिन्यायविशारदन्यायतीर्थश्रीमङ्गलविजयैर्जैनसिद्धान्तपठनार्थं मह्यं यथाभिलषितं दत्तोऽवसरः । क्रमशश्च तेभ्यः सकाशान्मयाऽन्यान्यजैनधर्मसंबन्धिनोऽनेके विषया अधीताः, सभाष्यं **तत्त्वार्थाधिगमसूत्रं** चाध्येतुमारब्धम् । पठ्यमाने चास्मिन्नवगतं मयाऽस्य बह्वयष्टीका वर्तन्ते। तासु श्रीसिद्धसेनगणिप्रणीता टीका पञ्चाध्यायान्ता मुद्रिताऽस्तीति । तस्याः प्राप्तयेऽतीव प्रयासोऽकारि, परन्तु स निष्फलो बभूव ।

कालान्तरे जैनशासनप्रभावकश्रीमोहनलालजीप्रशिष्यरत्नजैनशिल्पज्योतिषविद्यामहोदधिश्रीजयसूरयोऽत्रागतास्तैरात्मीयसङ्ग्रहस्थं मुद्रितपुस्तकमेकं पठनार्थं मां प्रति दत्तम् । अनन्तरं पठनक्रमे संशोधनपद्धतिर्दृष्टिपथमवतीर्णा । तदैवं चेतसि मनीषा बभूव यदस्य सर्वाभ्यर्हितनिबन्धस्य विषयोल्लेखादिपूर्वकं पुनर्मुद्रणं करणीयं येनास्य दौर्लभ्यं छात्रपरिश्रमश्च दूरीकृतः स्यादिति । एतत् श्रीयुतजीवनचन्द्राय सहेतुकं निवेदितम् । तत्क्षणमूरीकृतं च मुद्रापणं तेन श्रेष्ठिवरेण । पुनरपि महती चिन्ताऽऽपतिता, सा चेत्थम्—कायं स्वपरसमयाभिज्ञश्रीसिद्धसेनगणिप्रणीतव्याख्यालङ्कृतोऽनेकानेकग्रन्थग्रथननिष्णातवाचकवर्यसंदब्धस्तत्त्वार्थाधिगमः क्व चागमाल्पप्रवेशिनी मे मतिरिति शोधनकर्म मया पूर्वं नाङ्गीकृतं, परन्तु आगमोद्धारकजैनाचार्यश्रीआनन्दसागरसूरीश्वरा मुद्राप्यमाणपुस्तिकावलोकनसंस्करणादौ साहाय्यं दास्यन्तीति श्रेष्ठिवरेणाश्वासने दत्ते शोधनकार्यमङ्गीकृतं मया ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ कार्यारम्भे 'श्रीमोहनलालजीजैनसेन्ट्रललाइब्रेरी'तः **तत्त्वार्थाधिगमसूत्रस्य** श्रीसिद्धसेनगणिकृतटीकायाः प्रतिः श्रीजयसूरिप्रधानशिष्यश्रीमत्प्रतापमुनिद्वारा समासादिता। प्रत्यन्तरं च लब्धं श्रीजीवनचन्द्रात्। तदनन्तरं मुद्रणालयपुस्तिका समारब्धा। पाठान्तरार्थं श्रीजयसूरिदत्तमुद्रितपुस्तकस्य 'बॅङ्गालएशियाटिकसोसायटी' प्रकाशितस्य पुस्तकस्य चोपयोगः कृतः। एषामादर्शपुस्तकानां क-ख-ग-घेति संज्ञा निर्धारिता। सन्दिग्धस्थलेषु साधनीभूतायाः सूर्यपुरस्थजैनानन्दपुस्तकालयप्रतेस्तु साक्षादुल्लेखः।

पञ्चाध्यायपर्यन्तमुद्रणालयपुस्तिकायाः प्रायः समाप्तौ सत्यां विषयसूचकानां पार्श्वनिर्दिष्टटिप्पनिकानां मयोल्लेखोऽकारि येन सुलभतया सर्वेषां विषयाकलनं स्यादिति। अनन्तरं मुद्रणालयपुस्तिका जैनसिद्धान्तपारङ्गतश्रीआनन्दसागरसूरिसविधे प्रहिता। मय्यनुकम्पार्द्रहृदयैस्तैर्मदभ्यर्थनया प्रायः सर्वत्र आगमोद्धृतपाठस्थलच्छायाभिः पञ्चमाध्याये टिप्पनीभिश्च सा विभूषिता। संशोधनकार्ये चातीव साहाय्यमकारीति तेषां परोपकृतिसौजन्यं वर्णयितुं न पारये।

ग्रन्थार्धस्य परिसमाप्तौ प्रकाशकाय मया सूचितं यदस्य शुद्धिपत्रं सार्वसिद्धान्ततत्त्ववेदिना मुनिवरेण तज्ज्ञगृहस्थेन वा यदि क्रियेत तर्हि महान् लाभो भविष्यति ग्रन्थोऽपि विशेषत आदरणीयः स्यादिति। तदूरीकृत्य तेन विज्ञप्तैर्जैनशासनसेवाहेवाकैः उपाध्यायश्रीमङ्गलविजयैर्मत्प्रोत्साहनगर्भितमेतत् कार्यं स्वीकृतम्। 'उग्रसेन'(आग्रा)पुरस्थश्रीविजयधर्मलक्ष्मीज्ञानमन्दिरस्य ३२६ पत्रात्मिकां श्रीविक्रमात् १७२२ तमे वर्षे ज्येष्ठकृष्णद्वितीयायां लिखितां नात्यशुद्धां प्रतिं समादाय शुद्धिपत्रं पाठान्तरसमेतं स्वानुभवगम्यपाठकलितं तैरकारीति तेषां कियान् परिश्रमो बभूवेति विद्वांस एव जानीयुः।

अन्ते यैर्यैर्महानुभावैर्वर्येन केनापि साहाय्यदानेनाहमृणीकृतः तेषां सौजन्यं संस्मरन् पठनपाठनप्रवणपण्डितवर्येभ्यः स्खलितस्थलसम्बन्धिनीं क्षमां याचमानोऽस्माद् विज्ञापनप्रस्तावाद् विरमामि—

रसिकनन्दनः कापडियेत्युपाह्वो

हीरालालः।

---

१ पत्रस्योभयपार्श्वे त्रिंशत् त्रिंशत् पङ्क्तयः, प्रत्येकपङ्क्तौ च एकषष्टिरक्षराणि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रस्तावना.

" यस्य निखिलाश्च दोषा न सन्ति सर्वे गुणाश्च विद्यन्ते ।
ब्रह्मा वा विष्णुर्वा हरो जिनो वा नमस्तस्मै ॥ १ ॥"

मनीषिमनोमानसमरालानां तमस्तिरस्कारतत्परतरणिविधानवेधसां पञ्चशतीप्रकरणप्रणेतृणां वाचकवर्यविरुदविख्यातानां मुनिमूर्धमुकुटमणीनां श्रीउमास्वातीनां विषये वक्तुं कः क्षमः ? । तथापि स्याद्वादशैलीसमलङ्कृतस्य लोकालोकाकलनैककुशलसर्वज्ञसूत्रितस्य रागारातिपराजयपारीणस्य च जैनदर्शनस्यानुरागेण 'शुभे यथाशक्ति यतनीय'मिति च न्यायेन क्रियतेऽयं प्रयासो मया मन्दमतिना । तत्र प्रथमं प्रस्तूयते ग्रन्थविचारः—

तत्त्वार्थाधिगमसूत्रेतिनामधेयस्यास्य महानिबन्धस्य भवति नाम्नैव विषयव्यक्तीकरणम् । जीवाजीवादिस्वरूपतत्त्वार्थविवरणादेवैतन्नामसार्थक्यम् । जैनसाहित्यस्य द्रव्यानुयोगादिचतुरनुयोगादिषु प्रधानतया प्रथमे द्रव्यानुयोगेऽस्य समावेशः ।

ग्रन्थादौ भाष्यभूमिकायां प्रस्तावरूपाः ३१ सम्बन्धकारिकाः सङ्गृहीताः । तदनन्तरं प्रथमेऽध्याये सम्यक्त्व-निक्षेप-निर्देश-ज्ञान-नयादीनां स्वरूपाणि व्याख्यातानि; द्वितीये जीवलक्षणम्, औपशमिकादिभावानां ५३ भेदाः, जीवभेदाः, इन्द्रियाणि, आयुषः स्थितिः; लोकप्रज्ञप्तिनामके तृतीये नरक-नारकाणां विचारः, मनुष्यक्षेत्रवर्णनं, तिरश्चामधिकारः; देवगतिप्रदर्शननाम्नि चतुर्थे देवविचारः, तदादीनामायुषो जघन्योत्कृष्टता; पञ्चमे धर्मास्तिकायादिकाजीवव्याख्या, द्रव्यलक्षणं च; षष्ठे आस्रवप्रस्तावः; अनगारागारिधर्मप्ररूपके सप्तमे देशविरतिसर्वविरतिविचारः; अष्टमे बन्धविचारः, नवमे संवरनिर्जराविचारः; दशमे मोक्षतत्त्वाधिकारविचारः; तदन्ते उपसंहाररूपेण मोक्षमार्गः स्पष्टतया प्रतिपादितः संक्षेपेण ॥

अध्याय-विचारः

सूत्रपरिमाणं प्रायः १९८ श्लोकाः । भाष्यप्रमाणं २२०० श्लोकाः, तत्र प्रारम्भे ३१, प्रथमाध्यायान्तिमसूत्रभाष्ये ९ (४+५), षष्ठाध्यायनवमसूत्रभाष्ये १, अन्ते ३२ कारिकाः प्रणीताः । श्रीसिद्धसेनीयटीकापरिमाणं १८२८२ । अत्रैतट्टीकाप्रान्तस्थप्रशस्तिगतनिम्नलिखितश्लोकौ प्रमाणम्—

सूत्रादि-परिमाणम्

"अष्टादश सहस्राणि, द्वे शते च तथा परे ।
अशीतिरधिका द्वाभ्यां, टीकायाः श्लोकसङ्ग्रहः ॥ १ ॥
मूलसूत्रप्रमाणं हि, द्विशतं किञ्चिदूनकम् ।
भाष्यश्लोकस्य मानं च, द्वाविंशतिः शतानि वै ॥ २ ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतेषु दशाध्यायेषु विभक्तानां सूत्राणां संख्या ३४४ इति श्वेताम्बराणां मान्यता, दिगम्बरास्तु तत्संख्या ३५७ मन्यन्ते। यत उभयोरपि सम्प्रदाययोर्माननीयस्यास्य ग्रन्थस्य सूत्रेषु सङ्ख्याभिन्नता पाठान्तराणि च सन्ति। दिगम्बरेष्वस्य ग्रन्थस्य मोक्षशास्त्ररूपेणापि प्रसिद्धिः। एकशः पाठकरणेन एकोपवासोपार्जितपुण्यं च भवतीति गरीयसीयं समादृतिः।

उक्तं च—

ग्रन्थस्य महत्त्वम्

"दशाध्यायपरिच्छिन्ने, तत्त्वार्थे पठिते सति।
फलं स्यादुपवासस्य, भाषितं मुनिपुङ्गवैः॥ १॥"

अस्य सार्वसिद्धान्तसारभूतस्य ग्रन्थस्य यद् महत्त्वं तदनुमीयते तदुपरि संस्कृत-हिंदी-गुजराती-कर्णाटकीय-आङ्ग्ल-जर्मन-भाषासु लिखितानां उपलब्धविवरणानां दर्शनात्। एतेषां किञ्चित् स्वरूपं विचार्यते। तत्र श्वेताम्बरसम्प्रदाये—

१ तत्त्वार्थसूत्रभाष्यं २२०० श्लोकप्रमाणकं वाचकवर्यश्रीउमास्वातिविरचितम्।

२ श्रीसिद्धसेनदिवाकरगुम्फितं गन्धहस्तिमहाभाष्यम् (१)।

३ श्रीदिन्नगणिशिष्यसिंहसूरिप्रशिष्यसिद्धसेनगणिकृता भाष्यानुसारिणी १८२८२ श्लोकपरिमिता[३] टीका।

श्रीहरिभद्रसूरिप्रणीता भाष्यानुसारिणी ११००० श्लोकपरिमिता टीका[४]।

५ न्यायविशारदन्यायाचार्यमहामहोपाध्यायश्रीयशोविजयविरचिता टीका[५] भाष्यतर्कानुसारिणी।

६ श्रीमलयगिरिसूरिसंदब्धा टीका[६]।

७ श्रीतत्त्वार्थटिप्पणकं चिरन्तनमुनिवर्यप्रणीतम्[७]।

---

१ इदं भाष्यं पञ्चाध्यायपर्यन्तं ग्रन्थेऽस्मिन् मुद्रितमस्ति। २ अधुनेदं नोपलभ्यते।

३ इयं टीका पञ्चाध्यायपर्यन्ताऽस्मिन् ग्रन्थे मुद्रिता, शेषभागस्तु भविष्यति मुद्रितः।

४ "तत्त्वार्थमूलटीकायां हरिभद्रसूरि"रित्युल्लेखः **प्रवचनसारोद्धार**टीकायां ३३७तमे पत्रे। परम्परानुसारेण सार्धपञ्चाध्यायपर्यन्ता टीका श्रीहरिभद्रसूरिकृता, अवशिष्टा तु तच्छिष्यवर्यश्रीयशोभद्रसूरिभी रचिता।

५ प्रथमाध्यायपर्यन्ता मुद्रापिता अमदावादस्थश्रेष्ठिवर्यमनसुखभाईतनुजनुर्माणेकलालभाईश्रेष्ठिप्रवरेण। ततः परमनुपलब्धेः।

६ अस्याः सम्भवे श्रीमलयगिरिसूरिभिः **प्रज्ञापना**वृत्तौ निम्नलिखितोल्लेखो हेतुः—

"यथा च प्रमाणबाधितत्वं तथा तत्त्वार्थटीकायां भावितमिति ततोऽवधार्यम्।"

७ इदं अमदावादस्थमाणेकलालभाईश्रेष्ठिवर्येण मुद्रापितम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

८ श्रीतत्त्वार्थाधिगमसूत्रस्य गुर्जरभाषायां [1]विवेचनम् ।

९ सभाष्यतत्त्वार्थाधिगमसूत्रस्य व्याकरणाचार्यपण्डितठाकुरप्रसादशर्मप्रणीतो हिन्दी[2] भाषानुवादः ।

१० श्रीतत्त्वार्थाधिगमसूत्रस्य डॉ० याकोबीमहाशयकृतो जर्मनभाषानिबद्धानुवादः ।

दिगम्बरसम्प्रदाये [3]विवरणानि यथा—

११ आप्तमीमांसाप्रणयितृश्रीसमन्तभद्रस्वामिकृतं ८४००० श्लोकप्रमाणकं गन्धहस्तिमहाभाष्यम् ।

१२ श्रीपूज्यपादस्वामिविरचिता सर्वार्थसिद्धिटीका ५५०० श्लोकपरिमिता (मुद्रिता)।

१३ श्रीमद्भट्टाकलङ्कदेवरचितं तत्त्वार्थराजवार्तिकम् श्लो० सं० १६००० (मुद्रितम्)।

१४ श्रीमद्विद्यानन्दिस्वामिप्रणीतं तत्त्वार्थश्लोकवार्तिकम् श्लो०सं० १८००० (")।

१५ श्रीश्रुतसागरसूरिविरचिता श्रुतसागरीटीका श्लो० सं० ८०००।

१६ श्रीश्रुतसागरसूरिप्रणीता तत्त्वार्थस्य सुखबोधिनीटीका ।

१७ श्रीविबुधसेनाचार्यकृता तत्त्वार्थटीका ३२५० ।

१८ श्रीयोगीन्द्रदेवकृता तत्त्वप्रकाशटीका ।

१९ श्रीयोगदेवगृहस्थाचार्यसन्दब्धा तत्त्वार्थवृत्तिः ।

२० श्रीलक्ष्मीदेवगृहस्थाचार्यकृता तत्त्वार्थटीका ।

---

१ अस्य द्वितीयावृत्तेः प्रसिद्धिकर्ता—मास्तर पुरुषोत्तमदास जयमल, सुरत। प्रथमावृत्तेस्तु म्हेशानास्थश्रीश्रेयस्करमण्डलं प्रसेधकम् ।

२ मुम्बापुरीस्थश्रीपरमश्रुतप्रभावकमण्डलस्वत्वाधिकारिभिः प्राकाश्यं नीतः । अस्मिन्ननुवादे बहूव्यः स्खलना इत्युल्लेखः अष्टमाङ्के विवेचने ।

३ सभाष्यतत्त्वार्थाधिगमसूत्रेतिनामकस्य नवमाङ्कग्रन्थस्योत्थानिकाधारेणात्रोल्लेखः क्रियते, **जैनग्रन्थावल्यां** (पृ० ८८-८९) तु क्वचित् क्वचिद् भिन्नता दृश्यते ।

४ एतेषां जीवनरेखाऽऽलेखिताऽऽराधनाकोशे ।

५ अधुना नोपलभ्यते इदं भाष्यं, किन्तु शताब्दीतः पूर्वं तदभूदिति विदुषामुल्लेखात् प्रतिभाति ।

६ नन्दिसंघाचार्याः देवनन्दि–जिनेन्द्रबुद्धि–चन्द्रगोमि इत्यपराह्वयाः जैनाभिषेक-समाधिशतक–चिकित्साशास्त्र–जैनेन्द्रव्याकरणादिग्रन्थविधातार इमे पूज्यपादाः ।

७ शकषष्ठीशताब्दीजन्मपवित्रितखेटनगरा हिमशीतलनृपसभातारादेवीजेतारः अष्टशती–बृहत्त्रयी–लघुत्रयी-रचयितारः ।

८ अष्टसहस्रीप्रणेतारः ६८१तमे शकसंवत्सरे जाताः ।

९ शकसंवत्सरे १५५०तमे जाता यशस्तिलकनामचम्पूकथाया यशस्तिलकचन्द्रिकाटीकाकाराः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२१ श्रीअभयनन्दिसूरिप्रणीता तात्पर्यतत्त्वार्थटीका।

२२ तत्त्वार्थसूत्रव्याख्यानं कर्णाटकीयभाषायाम्।

२३ श्रीतत्त्वार्थाधिगमसूत्रस्य महाशयजगमन्दरलालजैनीकृतं आङ्ग्लभाषायां विवरणम्।

अपरं च हिन्दीभाषायां पञ्चदश टीका वर्तन्ते। तेषां नामाद्युल्लेखाय उपर्युक्तो नवमाङ्को ग्रन्थो द्रष्टव्यः॥

ग्रन्थकारपरिचयः—

ग्रन्थकारनामादिषु श्वेतपटानां दिक्पटानां च नैकता। तस्मात् प्रथमतः श्वेताम्बरानुसारी वृत्तान्तो दर्श्यते। तत्र उपर्युक्त ३४४ सूत्राणां तदुपरिकृतभाष्यस्य तत्पूर्वप्रणीतसम्बन्धकारिकाणां च प्रणेतार उच्चैर्नागरशाखीयभगवत्पादश्रीउमास्वातिसूरयः। एतैर्जन्मना 'न्यग्रोधिका' पावनीकृता। 'वात्सी'गोत्रीया उमा माता 'कौभीषणी 'गोत्राख्यः स्वातिः पिता चैषां जन्मदाता। अनयोर्नामधेययोः[3] संयोजनेन तेषां नामनिष्पत्तिर्यथा बप्पभट्टिसूरीश्वराभिधाने।

इमे सूरयः जन्मतो द्विजाः शिवादौ रक्ता आसन्, किन्तु जिनमूर्तिदर्शनात् जैनव्रतधारिणोऽभूवन्, क्रमेण पूर्वविदो भूत्वा वाचकेतिपदवीं प्राप्तवन्त इत्यवगम्यते श्रीगुणाकरसूरिकृतनिम्नोल्लेखदर्शनात्—

"....अन्यत्र देवान्तरे न तोषं-चित्तानन्दमुपयाति-उपैति उमास्वातिवाचकवत्। सोऽदृष्टपूर्वां जिनमूर्तिं दृष्ट्वा स्तुतिं पठितवान्—

पुनरेव तवाचष्टे, भगवन्! वीतरागताम्।
न हि कोटरसंस्थेऽग्नौ, तरुर्भवति शाड्वलः॥ १॥

ततोऽन्यत्र शिवादौ विरक्तो जिनधर्मदर्शनासक्तोऽभूदुमास्वातिर्द्विजसूनुरात्तव्रतः सूरिपदमाप। क्रमात् पूर्वगतवेत्ता वाचकोऽभूत्।"

—**भक्तामरस्तोत्रवृत्तौ** (पृ० २९)

वाचकमुख्यस्य शिवश्रियः प्रशिष्याः, घोषनन्दिश्रमणस्य शिष्याः, वाचनया तु महावाचकश्रमणमुण्डपादस्य प्रशिष्याः वाचकपदवीसमलङ्कृता इमे उमास्वातयः।

---

१ जैनेन्द्रव्याकरणस्य बृहद्वृत्तिकाराः ७७५तमे शकसंवत्सरे जाताः।

२ श्रीलक्ष्मीसेनभट्टारकसत्कम्।

३ जम्बूद्वीपसमासटीकायां श्रीविजयसिंहमुनीश्वरैरप्युक्तम्—
" अस्य सङ्ग्रहकारस्य उमा माता स्वातिः पिता, तत्सम्बन्धादुमास्वातिः।"

४ बप्पनामा पिता, भट्टिनाम्नी मातेति विशेषः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विहरमाणैश्च तैः 'कुसुमपुरे' पाटलीपुत्रनामधेयेऽयं ग्रन्थः सन्दब्धः । अत्र च भाष्यान्ते दत्ता निम्नलिखिता प्रशस्तिः प्रमाणम् ।

" वाचकमुख्यस्य शिवःश्रियः प्रकाशयशसः प्रशिष्येण ।
शिष्येण घोषनन्दिक्षमणस्यैकादशाङ्गविदः ॥ १ ॥—आर्या
वाचनया च महावाचकक्षमणमुण्डपादशिष्यस्य ।
शिष्येण वाचकाचार्यमूलनाम्नः प्रथितकीर्तेः ॥ २ ॥
न्यग्रोधिकाप्रसूतेन विहरता पुरवरे कुसुमनाम्नि ।
कौभीषणिना स्वातितनयेन वात्सीसुतेनार्ह्यम् ॥ ३ ॥
अर्हद्वचनं सम्यग् गुरुक्रमेणागतं समुपधार्य ।
दुःखार्तं च दुरागमविहतमतिं लोकमवलोक्य ॥ ४ ॥
इदमुच्चैर्नागरवाचकेन सत्त्वानुकम्पया दब्धम् ।
तत्त्वार्थाधिगमाख्यं स्पष्टमुमास्वातिना शास्त्रम् ॥ ५ ॥"

वाचकवर्यश्रीउमास्वातीनां कृतयः—

१ श्रीतत्त्वार्थाधिगमसूत्रम् ।
२ श्रीतत्त्वार्थाधिगमभाष्यम् ।
३ प्रशमरतिः[1] ।
४ जम्बूद्वीपसमासप्रकरणम् ।
५ पूजाप्रकरणम्[2] (एकोनविंशतिश्लोकात्मकम्) ।
६ श्रावकप्रज्ञप्तिः[3] ।
७ क्षेत्रविचारः[4] ।[5]

---

१ धर्मरत्नप्रकरणप्रणेतृश्रीशान्तिसूरिभिरपि तत्प्रकरण (गा० १०३) स्वोपज्ञवृत्तावुक्तम्—
" पूर्वगतवेदिना चोमास्वातिवाचकेन प्रणीतप्रवचनोन्नतिहेतुप्रशमरतितत्त्वार्थाद्यनेकमहाशास्त्रेण । "

२ प्रसिद्धयनुसारेण ।

३ धर्मबिन्दोः श्रीमुनिचन्द्रसूरिकृतटीकायां निम्नलिखितोल्लेखात्—
" उमास्वातिविरचितश्रावकप्रज्ञप्तौ तु अतिथिशब्देन साध्वादयश्चत्वारो गृहीताः, ततस्तेषां संविभागः कार्य इत्युक्तम् । तथा च तत्पाठः—अतिथिसंविभागो नाम अतिथयः साधवः साध्व्यः श्रावकाः श्राविकाश्चैतेषु गृहमुपागतेषु भक्त्याऽभ्युत्थानासनदानपादप्रमार्जननमस्कारादिभिरर्चयित्वा यथाविभवशक्ति अन्न-पान-वस्त्रौषधालयादिप्रदानेन संवि. भागः कार्य इति । "

४ श्रीहरिभद्रसूरिकृतटीकासमलङ्कृतोऽयं ग्रन्थो वाचकवर्यस्य कृतिरिति प्रतिभाति ।

५ नवमाङ्कग्रन्थोत्थानिकायां यशोभद्रचरित्रं वाचकवर्याणां कृतिरित्युल्लेखः, परन्तु प्रमाणानुपलब्धेः स विचारणीयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीउमास्वातिमहर्षिभिः प्रकरणपञ्चशती प्रणीता इत्युल्लेखः श्रीजिनप्रभसूरिकृत-तीर्थकल्पे प्रशमरतेः श्रीहरिभद्रकृतटीकायां च। अनेन एतेषां पञ्चशतप्रकरणप्रणेतृरूपेण प्रसिद्धिः श्वेताम्बरसम्प्रदाये। स्थानाङ्गवृत्ति-पञ्चाशकवृत्ति-श्रीउत्तराध्ययनवृत्त्यन्तर्गत-निम्नलिखितपाठा वाचकवर्यकृतोपलब्धग्रन्थेषु न दृष्टिपथेऽवतरन्ति, अतोऽपि संभवति तेषाम-न्यग्रन्थप्रणेतृत्वम्।

"उक्तं च वाचकमुख्यैरुमास्वातिपादैः—

कृपणेऽनाथदरिद्रे व्यसनप्राप्ते च रोगशोकहते।
यद् दीयते कृपार्थादनुकम्पा तद् भवेद् दानम् ॥ १ ॥
अभ्युदये व्यसने वा यत् किञ्चिद् दीयते सहायार्थम्।
तत्सङ्ग्रहतोऽभिमतं मुनिभिर्दानं न मोक्षाय ॥ २ ॥
राजारक्षपुरोहितमधुमुखमावल्लदण्डपाशिषु च।
यद् दीयतेऽभयार्थं तदभयदानं बुधैर्ज्ञेयम् ॥ ३ ॥
अभ्यर्थितः परेण तु यद् दानं जनसमूहमध्यगतः।
परचित्तरक्षणार्थं लज्जायास्तद् भवेद् दानम् ॥ ४ ॥
नटनर्तमुष्टिकेभ्यो दानं सम्बन्धिबन्धुमित्रेभ्यः।
यद् दीयते यशोऽर्थं गर्वेण तु तद् भवेद् दानम् ॥ ५ ॥
हिंसानृतचौर्योद्यतपरदारपरिग्रहप्रसक्तेभ्यः।
यद् दीयते हि तेषां तज्ज्ञानीयादधर्माय ॥ ६ ॥
समतृणमणिमुक्तेभ्यो यद् दानं दीयते सुपात्रेभ्यः।
अक्षयमतुलमनन्तं तद् दानं भवति धर्माय ॥ ७ ॥
शतशः कृतोपकारो दत्तं च सहस्रशो ममानेन।
अहमपि ददामि किञ्चित् प्रत्युपकाराय तद् दानम् ॥ ८ ॥"

—स्थानाङ्गस्य श्रीअभयदेवसूरिकृतवृत्तौ

"उमास्वातिवाचकेनाप्यस्य समर्थितत्वात्। तथाहि तेनोक्तम्—
सम्यग्दर्शनसम्पन्नः षड्विधावश्यकनिरतश्च श्रावको भवति इति ॥"

—पञ्चाशकस्य श्रीअभयदेवसूरिकृतवृत्तौ

"उक्तं वाचकमुख्यैः—

परिभवसि किमिति लोकं, जरसा परिजर्जरितशरीरम्।
अचिरात् त्वमपि भविष्यसि, यौवनगर्वं किमुद्वहसि? ॥ १ ॥"

—श्रीउत्तराध्ययनसूत्र(अ० १०, पत्रा० २४४)स्य श्रीभावविजयकृतवृत्तौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

" सम्यक्त्वज्ञानशीलानि, तपश्चेतीह सिद्धये ।
तेषामुपग्रहार्थाय, स्मृतं चीवरधारणम् ॥ १ ॥
जटी कूर्ची शिखी मुण्डी, चीवरी नग्न एव च ।
तप्यन्नपि तपः कष्टं, मौढ्याद्विस्रो न सिद्धयति ॥ २ ॥
सम्यग्ज्ञानी दयावांस्तु, ध्यानी यस्तप्यते तपः ।
नग्नश्चीवरधारी वा, स सिद्धयति महामुनिः ॥ ३ ॥"

इति वाचकवचनं श्रीउत्तराध्ययनस्य श्रीशान्त्याचार्यकृत(अ० २, पत्रा० ९३)वृत्तौ

" उक्तं च वाचकैः—

शीतवातातपैर्दंशै—र्मशकैश्चापि खेदितः ।
मा सम्यक्त्वादिषु ध्यानं, न सम्यक् संविधास्यति ॥ १ ॥"

—श्रीशान्त्याचार्यकृतश्रीउत्तराध्ययनसूत्र(अ० २, पत्रा० ९५)वृत्तौ

" सूरिभिरुक्तम्—

धर्मोपकरणमेवैतत्, न तु परिग्रहस्तथा ॥
जन्तवो बहवः सन्ति, दुर्दर्शा मांसचक्षुषाम् ।
तेभ्यः स्मृतं दयार्थं तु, रजोहरणधारणम् ॥ १ ॥
आसने शयने स्थाने, निक्षेपे ग्रहणे तथा ।
गात्रसंको(कु)चने चेष्टं, तेन पूर्वं प्रमार्जनम् ॥ २ ॥

तथा—

सन्ति सम्पातिमाः सत्त्वाः, सूक्ष्माश्च व्यापिनोऽपरे ।
तेषां रक्षानिमित्तं च, विज्ञेया मुखवस्त्रिका ॥ ३ ॥

किञ्च—

भवन्ति जन्तवो यस्मा—दन्नपानेषु केषुचित् ।
तस्मात् तेषां परीक्षार्थं, पात्रग्रहणमिष्यते ॥ ४ ॥

अपरञ्च—

सम्यक्त्वज्ञानशीलानि, तपश्चेतीह सिद्धये ।
तेषामुपग्रहार्थाय, स्मृतं चीवरधारणम् ॥ ५ ॥
शीतवातातपैर्दंशै—र्मशकैश्चापि खेदितः ।
मा सम्यक्त्वादिषु ध्यानं, न सम्यक् संविधास्यति ॥ ६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य त्वग्रहणे यत् स्यात्, क्षुद्रप्राणिविनाशनम् ।
ज्ञानध्यानोपघातो वा, महान् दोषस्तदैव तु ॥ ७ ॥"

—श्रीशान्त्याचार्यकृतश्रीउत्तराध्ययनसूत्र(अ० ३, पत्रा० १८०)वृत्तौ

"आह वाचकः—

यावत् परगुणदोषपरिकीर्तने व्यापृतं मनो भवति ।
तावद् वरं विशुद्धे ध्याने व्यग्रं मनः कर्तुम् ॥ १ ॥"

—श्रीशान्त्याचार्यकृतश्रीउत्तराध्ययनसूत्र(अ० ४, पत्रा० १९०–१९१)वृत्तौ

"आह च वाचकः—'इह चेन्द्रियप्रसक्ता निधनमुपजग्मुः' तद्यथा—गार्ग्यः सत्य किर्नैकर्द्धिगुणं प्राप्तोऽनेकशास्त्रकुशलोऽनेकविद्याबलसम्पन्नोऽपि ।"

—श्रीशान्त्याचार्यकृतश्रीउत्तराध्ययनवृत्तौ(अ० ४, पत्रा० १९१)वृत्तौ

"उक्तं च वाचकैः—

मङ्गलैः कौतुकैर्योगै—र्विद्यामन्त्रस्तथाषधः ।
न शक्ता मरणात् त्रातुं, सेन्द्रा देवगणा अपि ॥ १ ॥"

—श्रीशान्त्याचार्यकृतश्रीउत्तराध्ययनसूत्र(अ० ४, पत्रा० १९१)वृत्तौ

"वाचकेनाप्युक्तम्—

यद् रागदोषवद् वाक्यं, तत्त्वादन्यत्र वर्तते ।
सावद्यं वाऽपि यत् सत्यं, तत् सर्वमनृतं विदुः ॥ १ ॥"

—तत्त्वार्थाधिगमसत्रस्य(अ० ७, सू० ९)श्रीसैद्धसेनीयटीकायाः

श्रीउमास्वातिवाचकानां समयः—

जन्ममरणशृङ्खलाखिद्यमानभव्यानां मोक्षमार्गोपदेष्टारः संङ्गृहीतृष्वनन्यतमा इमे सूरय कदेदं भूमण्डलं भूषयामासुरिति प्रश्नोऽधुना विचार्यते । सूरिवर्यकृतभाष्यान्तदत्तप्रशस्तित इ स्पष्टं भवति यदिमे सूरय उच्चनागरशाखीयाः । अस्याः शाखाया उत्पत्तिस्तु श्रीआर्यदिन्न शिष्यश्रीआर्यशान्तिश्रेणिकसमये । आर्यदिन्नाः श्रीवीरात् ४२१तमेऽब्दे जातानां आर्ये न्द्रदिन्नानां शिष्याः । अनेन श्रीउमास्वातयः श्रीवीरात् पञ्चमशताब्दीपूर्वकालीना नेत्य नुमीयते । श्रीधर्मसागरगणिविरचितायां श्रीतपागच्छपट्टावलीसूत्रवृत्तौ तु उल्लेखो यथा—

"श्रीआर्यमहागिरिसुशिष्यौ बहुलबलिस्सहौ यमलभ्रातरौ । तत्र बलिस्सहस्य शिष्यः स्वातिः, तत्त्वार्थादयो ग्रन्थास्तु तत्कृता एव संभाव्यन्ते । तच्छिष्यः श्यामा

---

१ कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यकृतसिद्धहेमवृत्तौ (अ० २, पा० २, सू० ३९)—
"उपोमास्वातिं सङ्गृहीतारः, उपजिनभद्रक्षमाश्रमणं व्याख्यातारः, तस्मादन्ये हीना इत्यर्थः"
२ इदं च प्रज्ञापनानन्दीपट्टावल्योः अनुगामि । ३ संभावना तु नामसादृश्यश्रमेण ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चार्यः 'प्रज्ञापना'कृत् श्रीवीरात् षट्सप्तत्यधिकशतत्रये (३७६) स्वर्गभाक् । प्रो० पिटर्सन-कृते रिपोर्टसंज्ञके पुस्तके उमास्वातिसमयः श्रीवीरात् न शतत्रयीपूर्विक इत्युल्लेखः ।" अतोऽनुमीयते श्रीउमास्वातयः श्रीवीरात् द्विशताब्दीपूर्वकालीना न, श्रीवीरात् प्रायः ७२०-तमे वर्षे तेषां प्रादुर्भाव इति युगप्रधानावल्याधारेणानुमीयते ।

दिगम्बरसम्प्रदायानुसारेण श्रीवीरात् ७१४—७९८ पर्यन्तो जीवनकालः श्रीउमास्वातीनाम् ।

यद्यपि श्रीउमास्वातीनां समयमीमांसने एतादृशी भिन्नता वर्तते, तथापीदं सुनिश्चितं सम्भाव्यते यदेतेषां प्रादुर्भावः श्रीवीरात् द्विशताब्दीत उत्तरकालीनः, नवमशताब्दीतः पूर्वकालीन इति ॥

अथ दिक्पटानुसारी वृत्तान्तो लिख्यते । तत्रास्मिन् ग्रन्थे दत्तानां क्वचित् पाठसंख्याभिन्नानां सूत्राणां रचयितारः प्राप्तचरणर्द्धयः पद्मनन्दापराभिधाना उमास्वातयः ।

नामान्तरम्

एकदा जैनसिद्धान्तविषयिणीं स्वशङ्कां दूरीकर्तुं ते विदेहक्षेत्रवर्तिश्रीमन्धरतीर्थकरमुपाजग्मुः । चारणार्द्धिबलात् गगनपथा गच्छतां तेषां हस्तन्यस्ता मयूरपिच्छिकाऽधः पतिता । तदानीं विष्णुचरणविहारिणः कस्यचिद् गृध्रस्य पिच्छिकां गृहीत्वा निजकर्म निर्वाह्य पुरः प्रचेलुः । अतस्तेषां गृध्रपिच्छ इत्यपरा आह्वा आसीत् । उक्तं च—

"तत्त्वार्थसूत्रकर्तारं, गृध्रपिच्छोपलक्षितम् ।
वन्दे गणीन्द्रसंजात–मुमास्वामिमुनीश्वरम् ॥"

एतैर्महाशयैः का भूमिः स्वजन्मनाऽलङ्कृतेति न ज्ञायते । परन्तु यदि चरमतीर्थंकर-श्रीमहावीरनिर्वाणसमयः खिस्तशकात् ५२७ वर्षपूर्वको निश्चीयते तर्हि उमास्वातीनां इ० स० १३५–२३९ जीवनकालः । जन्मन एकोनविंशतिवर्षेषु व्यतीतेषु सहसोद्विग्नैः एभिर्महाशयैः श्रीकुन्दकुन्दाचार्यसमीपे दीक्षा कक्षीकृता। ततः पञ्चविंशतिवर्षान्ते च सूरिपदं प्राप्तम् । अनेनाधारेणैषां जीवनकालस्य स्थूलरूपरेखाऽनुमीयते, सा यथा—

जीवनरेखा

	वीरात्	खिस्तात्
जन्म	७१४तमेऽब्दे	१३५तमेऽब्दे
दीक्षा	७३३ ,,	१५४ ,,
सूरिपदम्	७५८ ,,	१७९ ,,
स्वर्गगमनम्	७९८ ,,	२१९ ,,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रन्थकारसम्प्रदायः—

श्वेताम्बरदिगम्बरसम्प्रदायानुसारि वृत्तान्तद्वयं विचारितम् । अधुना सूत्रकाराः श्वेताम्बरीया दिगम्बरीया वा इत्यन्वेषणा क्रियते । उभयपक्षे ग्रन्थस्य प्रामाण्यरूपेण स्वीकृतिस्तस्मात् तद्गतसूत्रगवेषणेनैव ग्रन्थकारसम्प्रदायो निश्चेतव्य इति युक्तियुक्तो मार्गः । अतोऽन्ययुक्तीनामत्रोपेक्षा क्रियते ।

तत्र चतुर्थाध्याये 'दशाष्टपञ्चद्वादशविकल्पाः कल्पोपपन्नपर्यन्ताः' इति तृतीये सूत्रे सूत्रकारैर्भवनवासिनां दश व्यन्तराणामष्टौ ज्योतिष्काणां पञ्च कल्पोपपन्नवैमानिकानां च द्वादश भेदा इति देवभेदप्रदर्शकमुद्देशसूत्रमुक्तम् । दिगम्बरानुयायिटीकाकारमहाशयैरपि **सर्वार्थसिद्धिटीकायां** (पृ० १३५) **तत्त्वार्थराजवार्तिके** (पृ० १५०) **तत्त्वार्थश्लोकवार्तिके** (पृ० ३७२) चेदं सूत्रं मौलिकरूपेण कक्षीकृतम् । परन्तु सूत्रसंगृहीतभेदप्रदर्शनसमये भवनवासिनां व्यन्तराणां ज्योतिष्काणां तु यथार्थभेदान् प्रदर्शयित्वा वैमानिकानां भेदप्रदर्शनसमये सूत्रकाराभिमतान् द्वादश भेदान् परित्यज्य षोडशभेदानां प्रदर्शनं दिगम्बरैः कृतं, तस्मात् किं उद्देशभङ्गदोषारोपणं न भवति[1]? । यदि कल्पोपपन्नवैमानिकानां षोडशभेदप्रदर्शनं सूत्रकाराभिमतं स्यात्, तर्हि 'दशाष्टपञ्चषोडशविकल्पाः कल्पोपपन्नपर्यन्ताः' इति उद्देशसूत्रं विदध्यात् । न च व्यधात् । तेनादनौमास्वातिकमेतदित्यनुमीयते । विचार्यतामुभयपक्षीयसूत्रम् । तत्र दिगम्बरसम्प्रदाये यथा—

"सौधर्मैशानसानत्कुमारमाहेन्द्रब्रह्मब्रह्मोत्तरलान्तवकापिष्ठशुक्रमहाशुक्रशतारसहस्रारेष्वानतप्राणतयोरारणाच्युतयोर्नवसु ग्रैवेयकेषु विजयवैजयन्तजयन्तापराजितेषु सर्वार्थसिद्धौ च।"

—**तत्त्वार्थराजवार्तिके** अ० ४, सू० १९

श्वेताम्बरसम्प्रदाये तु—

"सौधर्मैशानसानत्कुमारमाहेन्द्रब्रह्मलोकलान्तकमहाशुक्रसहस्रारेष्वानतप्राणतयोरारणाच्युतयोर्नवसु ग्रैवेयकेषु विजयवैजयन्तजयन्तापराजितेषु सर्वार्थसिद्धौ च।"

—(अ० ४, सू० २०)

सूत्रकाराणां श्वेताम्बरत्वेऽन्या युक्तिरपि । तथाहि—पञ्चमाध्याये द्रव्याणामवगाहनिरूपणसमये यथा 'धर्माधर्मयोः कृत्स्ने' (लोकाकाशे), 'एकप्रदेशादिषु भाज्यः पुद्गलानां', 'असङ्ख्येयभागादिषु जीवानां' इति सूत्राणि रचितानि, तथैव यदि मुख्यकालरूपाः समग्रलोकगताः कालाणवः सत्याः स्युस्तर्हि तेषामप्यवगाहक्षेत्रं साक्षात् प्रदर्शितं भवेत् । न च केनापि प्रकारेण सूत्रकारैर्दर्शितं, तस्मात् कालाणूनां मुख्यकालरूपेण सत्ता तेषां मतेऽपि

---

१ वैमानिकानां लेश्यास्थित्यधिकारे दिगम्बरमान्यताया दुर्घटनाऽपि विचारणीया ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नेति प्रतिभाति । अस्मिन्नभावे सिद्धे सूत्रकाराः श्वेताम्बरमतानुसारिण इति सण्टङ्कते । भगवतीप्रज्ञापनादिष्वागमेषु कालाणूनां प्रतिपादनं न कृतम्, एवं सति सूत्रकारैरपि आगमविरुद्धं सूत्रं न व्यरचि ।

ननु कालाणून् दिगम्बरा अपि नैव मन्यन्ते इति चेत्, तन्न, तत्त्वार्थराजवार्तिके (पृ० २२८) 'वर्तना परिणामक्रिया परत्वापरत्वे च कालस्य' (अ० ५, सू० २२) इति सूत्रस्य व्याख्याने निम्नलिखितोल्लेखात् ।

"द्विविधः कालः—परमार्थकालः व्यवहाररूपश्चेति । तत्र परमार्थकालः वर्तनालिङ्गः गत्यादीनां धर्मादिवत् वर्तनाया उपकारकः । स किंस्वरूप इति चेत्, उच्यते—यावन्तो लोकाकाशे प्रदेशास्तावन्तः कालाणवः परस्परं प्रत्यबन्धाः एकैकस्मिन्नाकाशप्रदेशे एकैकवृत्त्या लोकव्यापिनः ।"

सूत्रकाराभिप्रायेण निश्चयकालस्यास्वीकारात् तत्स्वरूपाः कालाणवोऽपि न भवेयुः, अत एव तैस्तेषामवगाहक्षेत्रं न प्रदर्शितं, 'मूलं नास्ति कुतः शाखा' इति न्यायात् ।

किञ्च यदि कालो मुख्यद्रव्यं स्यात् तर्हि 'अजीवकाया धर्माधर्माकाशपुद्गलाः' (अ० ५, सू० १) इत्यत्राजीवरूपेण तस्याप्युल्लेखः करणीयो भवेत् । ततोऽनन्तरसूत्रे 'द्रव्याणि[1] जीवाश्च' इत्यत्र कालस्यापि मुख्यद्रव्यरूपेण गणना स्यात् । न च कृता सूत्रकारैः, तस्मान्न मुख्यद्रव्यरूपः कालः । न च 'गुणपर्यायवद् द्रव्यं' (अ० ५, सू० ३८) इति द्रव्यस्य लक्षणकथनानन्तरं 'कालश्च[3]' (अ० ५, सू० ३९) इति सूत्रेण कालस्यापि मुख्यद्रव्यत्वरूपेण सिद्धिर्भवतीति वाच्यम् । यदि तत्रोल्लेखकरणेऽपि सा सिद्धिर्भवेत्, तर्हि सर्वेषामपि द्रव्याणां मुख्यद्रव्यत्वसिद्ध्यर्थं तत्रैवोल्लेखः करणीयो भवेत्, न तु प्रथमतः । अपरञ्च तत्रत्यं 'द्रव्याणी'ति सूत्रमपि निष्फलं स्यात् ॥

क्षुत्-पिपासा-शीतोष्ण-दंशमशक-चर्या-शय्या-वध-रोग-तृणस्पर्श-मला इति परीषहव्याख्याने सूत्रकारैः किञ्च 'एकादश जिने' (अ० ९, सू० ११) इति सूत्रेण स्पष्टतयैव केवलिन्याहारपरीषहं व्याख्यायमानैः केवलिनामाहारसद्भाव आख्यायि । दिक्पटास्तु केवलिषु पात्राद्युपकरणाकवलाहारासम्भवमध्यास्यमाना नैवं मन्वते, स्वस्वव्याख्यासु च निषेधाय नञध्याहारादि कुर्वन्ति, परीषहाणां गुणस्थानावतारप्रसङ्गे निषेधाध्याहारादि विहाय असङ्गतं किमपि व्याख्यायते तैः । अत्र चायं विवेकः—दिक्पटाः केवलिषु कवलाहारं नैवाभिमन्यन्ते, श्वेताम्बरास्तु स्वीकुर्वन्ति । यदि दिक्पटीयाभिप्रायेण मोहोदयसहायीकृतक्षुद्वेदनाया अभावाद् भगवति केवलिनि क्षुत्पिपासाप्रसङ्गाभावः, ततः

---

१ 'द्रव्याणि' 'जीवाश्च' इति पृथक् पृथक् सूत्रं दिक्पटमते । २ श्वेताम्बरमते सप्तत्रिंशत्तमं सूत्रमिदम् ।
३ 'कालश्चेत्येके' (अ० ५, सू० ३०) इति श्वेताम्बरमतसूत्रपाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथं केवलिन्येकादश परीषहाः कथिताः ? न च क्षुत्पिपासयोः मोहोदयसहायीकृतक्षुधादिवेदनीयजन्यत्वं सत्यमस्तीति वाच्यं, मोहोदयसहायीकृतक्षुधादिवेदनीयजन्यत्वस्य क्षुत्पिपासादिषु 'वेदनीये शेषाः' (अ० ९, सू० १६) इति सूत्रेण निराकृतत्वात् केवलवेदनीयजन्यत्वस्य प्रतिपादनाच्च । अन्यच्च क्षुत्पिपासयोः मोहोदयसहायीकृतवेदनीयजन्यत्वं नास्तीति सयुक्तिकं प्रतिपादितं न्यायाचार्यन्यायविशारदमहामहोपाध्यायश्रीयशोविजयपादैः अध्यात्ममतपरीक्षाग्रन्थे चतुस्त्रिंशदतिशयानां सिद्धिप्रसङ्गे ।

अपरञ्च यथा मोहाभावात् अदर्शनलाभनाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कारपुरस्कारा इति एकादश परीषहाः केवलिषु न स्वीक्रियन्ते दिक्पटैरपि, तथैव क्षुत्पिपासे अपि मोहोदयसहायकाभावात् न स्वीक्रियेतां तैः, स्वीकारश्च तैः कृत इति विचारणीयं स्थलं विद्वद्भिः ।

'पुलाकबकुशकुशीलनिर्ग्रन्थस्नातका निर्ग्रन्थाः' (अ० ९, सू० ४६) इति सूत्रस्य व्याख्यानावसरे पुलाकादीनां विशेषप्रतिपत्त्यर्थमुक्तं श्रीमद्भट्टाकलङ्कदेवैः—

"पुलाकबकुशप्रतिसेवनाकुशीलाः द्वयोः संयमयोः सामायिकच्छेदोपस्थापनयोर्भवन्ति ।..... बकुशो द्विविधः—उपकरणबकुशः शरीरबकुशश्चेति । तत्र उपकरणाभिष्वक्तचित्तो विविधविचित्रपरिग्रहयुक्तः, बहुविशेषयुक्तोपकरणकाङ्क्षी तत्संस्कारप्रतीकारसेवी भिक्षुरुपकरणबकुशो भवति । शरीरसंस्कारसेवी शरीरबकुशः ।"[1]

—तत्त्वार्थराजवार्तिके (पृ० ३५९)

एवं सति केवलकमण्डलु-पिच्छिकायुक्तनग्न एव साधुः, न तु विशेषोपकरणयुक्तपरिग्रहधारी इति मन्यमानान् दिगम्बरीयान् प्रति प्रश्नोऽयम्—

यदि भवतां मते पिच्छिकाकमण्डलू विनाऽन्यस्योपकरणस्यास्वीकार एव, तर्हि उपर्युक्तलक्षणानां बकुशनिर्ग्रन्थानां निर्ग्रन्थत्वस्याभावः, तेषां उपकरणेषु सक्तचित्तत्वात्, विविधविचित्रपरिग्रहयुक्तत्वात्, बहुविशेषयुक्तोपकरणकाङ्क्षित्वात्, तत्संस्कारप्रतीकारसेवित्वात् । यद्येषामपि निर्ग्रन्थत्वं स्वीक्रियते भवद्भिः, तर्हि किं न धर्मोपकरणानां मुक्तेरबाधकता स्वीक्रियते ? ।

'मूर्च्छा परिग्रहः' (अ० ७, सू० १२) इति परिग्रहलक्षणस्वीकारात् बकुशनिर्ग्रन्थेषु धर्मसाधनोपकरणसद्भावेऽपि मूर्च्छाया अभावात् निर्ग्रन्थत्वं समस्ति इत्यभिप्रायेणेदं सूत्रमुपन्यस्तं सूत्रकारैः इति विरोधपरिहारकरणं दिक्पटानां स्वमतव्याघातभीतेः दुःशकम् ।

अपरञ्च दिगम्बरस्वरूपलिङ्गिन एव निर्ग्रन्थाः इति मन्यमानैर्दिगम्बरैर्विचारणीयः तत्त्वार्थराजवार्तिककाराणामयं मुद्रालेखः—

---

१ सर्वार्थसिद्धिटीकायामप्येवंविध उल्लेखः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"[1]लिङ्गं द्विविधं–द्रव्यलिङ्गं भावलिङ्गं च। भावलिङ्गं प्रतीत्य सर्वे पञ्च निर्ग्रन्था लिङ्गिनो भवन्तीति। द्रव्यलिङ्गं प्रतीत्य भाज्याः।"

अपरञ्च श्रीतत्त्वार्थटिप्पणकस्य प्रान्तभागे सूत्रविषयकपाठभिन्नतान्यूनाधिकताया विचारणे अनौमास्वातिकानि एतत्स्थलानि इति निर्दिष्टं वर्तते, परन्तु तदुपरि यथायोग्यविचारकरणाय समयाभावात् न किमपि विवृणोमि। तत् तत एवावलोकयन्तु आलोकवन्तः।

एवं सूत्रकाराणां श्वेतपटत्वसमर्थनसमर्थानां युक्तीनां सद्भावेऽपि दिगम्बरमान्यताऽस्मिन् समानविषयके ग्रन्थे नासम्भविनी, यतः कल्याणमन्दिर-भक्तामर-सिन्दूरप्रकरादयो ग्रन्थाः श्वेतपटीया अपि मान्यन्त एव दिक्पटीयैः।

अन्ते सौहार्दहृदयेभ्यो दिगम्बरमहाशयेभ्यो विज्ञप्तिरियं मम–यदा उपरितनयुक्तिषु स्खलनाः सम्भवेयुः, सूत्रकाराणां दिक्पटत्वसिद्धौ भवत्सकाशे च सूत्रगवेषणपूर्विका युक्तयो वर्तेरन्, तर्हि तत्तन्निवेदनेन कृपां कुर्वन्तु भवन्त इति॥

टीकाविचारः—

अस्मिन् ग्रन्थे तत्त्वार्थाधिगमसूत्रस्य सम्बन्धकारिकोपरि टीकाद्वयं वर्तते। तत्र प्रथमा वीरं प्रणम्येत्याद्येकपद्यपूर्विका श्रीदेवगुप्तसूरिप्रणीता। द्वितीया तु श्रीसिद्धसेनसूरिप्रणीता जैनेन्द्रशासनेतिपञ्चपद्यात्मिकाऽवतरणकलिता पूर्वापेक्षया संक्षिप्ततरा। भाष्यानुसारिणी टीका तु श्रीसिद्धसेनसूरिभिरेव सन्दब्धेति श्रीदेवगुप्तसूरिकृतटीकाया अदर्शनादनुमीयते। परन्तु श्रीदेवगुप्तसूरिकृतायाः सम्बन्धकारिकाटीकायाः प्रान्ते—

"इतीयं कारिकाटीका, शास्त्रटीकां चिकीर्षुणा।
सन्दब्धा देवगुप्तेन, प्रीतिधर्मार्थिना सता॥ १॥"

इत्युल्लेखे विलसति कस्मात् तैः सूत्रटीका न व्यरचीति प्रश्नो विचारणीयः॥ किं यथा श्रीमलयगिरिसूरय आवश्यकस्य बृहत्कल्पस्य वृत्तिं रचयन्त एव कालं चक्रुस्तथैतेऽपि?।

टीकाकारपरिचितिः

श्रीदेवगुप्तसूरयः—

श्रीदेवगुप्तनामानौ द्वौ सूरी इति स्पष्टमवगम्यते नवपदनवतत्त्वप्रकरणयोर्विवरणविन्यस्तनिम्नलिखितप्रशस्तितः—

"तत्रासीदतिशायिबुद्धिविभवश्चारित्रिणामग्रणीः
सिद्धान्तार्णवपारगः स भगवान् श्रीदेवगुप्ताभिधः।
सूरिर्भूरिगुणान्वितो जिनमतादुद्धृत्य येन स्वयं
श्रोतॄणां हितकाम्यया विरचिता भव्याः प्रबन्धा नवाः॥४॥—शार्दूल०

---

१ अयमेवोल्लेखः सर्वार्थसिद्धिटीकायां (पृ० २७०)।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेनैव स्वपदप्रतिष्ठिततनुः श्रीकक्कसूरिप्रभु-
नानाशास्त्रसुबोधबन्धुरमतिर्जज्ञे स विद्वानिह ।
मीमांसां जिनचैत्यवन्दनविधिं पञ्चप्रमाणीं तथा
बुद्ध्वा यस्य कृतिं भवन्ति कृतिनः सद्बोधशुद्धाशयाः ॥ ५ ॥–शार्दूल०

तत्पादपद्मद्वयचञ्चरीकः
शिष्यस्तदीयोऽजनि सिद्धसूरिः ।
तस्माद् बभूवोज्ज्वलशीलशाली
त्रिगुप्तिगुप्तः खलु देवगुप्तः ॥ ६ ॥"—उपजातिः

द्वितीयदेवगुप्तसूरयः पूर्वावस्थायां जिनचन्द्रगणीति नाम्ना प्रथिता नवतत्त्वप्रकरणप्रणेतार इति समाप्ति(पञ्चदशम)गाथाविवरणात् स्फुटमेवावगम्यते । सा गाथा चेयम्—

"इय[1] एए नवतत्ता, सभेयभिन्ना उ संगहनिमित्तं ।
गणिणा जिणचंदेणं, सरणत्थं अप्पणो रइया ॥ १ ॥"

श्रीयशोदेवोपाध्यायनिर्मितं तद्विवरणं तु यथा—

" गणिना षाण्मासिकभगवत्यङ्गोपधानोद्वहनावाप्तगणिनाम्ना जिनचन्द्रेण पूर्वावस्थानामैतत्, तस्योत्तरावस्थायां तु श्रीदेवगुप्ताचार्येणेत्यर्थः । "

इमे जिनचन्द्रापराभिधानाः सूरयः श्रीकक्कसूरीणां शिष्याः न तु प्रशिष्या इति प्रतिभाति नवपदप्रकरणप्रान्तगाथादर्शनात् । सा चैवम्—

"ईइ[2] नवपयं तु एवं, रइयं सीसेण ककसूरिस्स ।
गणिणा जिणचंदेणं, सरणत्थमणुग्गहत्थं च ॥ १ ॥"

एतत् समर्थ्यते नवपदलघुवृत्तिप्रशस्त्याऽपि । सा चेत्थम्—

"नवपदटीका प्रोक्ता, श्रावकानन्दकारिणी ।
श्रीदेवगुप्तसूरिभि–र्भावयितव्या प्रयत्नेन ॥ १ ॥
त्रिसप्त्यधिकसहस्रे (१०७३), मासे कार्तिकसंज्ञिते ।
श्रीपार्श्वनाथचैत्ये तु, दुर्गमाय च(त १)पत्तने ॥ २ ॥

---

१ छाया—

एवमेतानि नवतत्त्वानि सभेदभिन्नानि तु सङ्ग्रहनिमित्तम् ।
गणिना जिनचन्द्रेण स्मरणार्थमात्मनो रचितानि ॥

२ जिनचन्द्रसूरीणामन्तेवासी धनदेवेत्याद्यनामा ।

३ छाया—

एवं नवपदं त्वेतद् रचितं शिष्येण कक्कसूरेः ।
गणिना जिनचन्द्रेण स्मरणार्थमनुग्रहार्थं च ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रावकानन्दटीकेयं, नवपदस्य प्रकीर्तिता ।
जिनचन्द्रगणिनाम्ना, तु गच्छे 'ऊकेश' संज्ञके ॥ ३ ॥
कत्कदाचार्यशिष्येण, कुलचन्द्रसंज्ञितेन च ।
तेनैषा सूत्रिता टीका, निर्जरार्थं तु कर्मणाम् ॥ ४ ॥ "

अपरञ्च प्राचीनगुर्जरकाव्यसङ्ग्रहे नवमे परिशिष्टेऽयमुल्लेखोऽपि हेतुः—

"संवत् १४१४ (?) वर्षे वैशाषसु १० गुरौ संघपतिदेसलसुत सा० समरसमरश्री-युग्मं सा० सालिगसा० सज्जनसिंहाभ्यां कारितं । प्रतिष्ठितं श्रीककसूरिशिष्यैः श्रीदेवगुससू-रिभिः । शुभं भवतु ॥ "

एवं विरोधापत्तौ सत्यां सम्भवेदेतत्—गुर्वावलीकारेणाल्पकालीनाचार्यपदावस्थादिका-रणात् सिद्धसूरयो न प्रकाशिता भवेयुः । यद्वा श्रीककसूरीणां श्रीसिद्धसूरिदेवगुसाचार्यौ इति द्वौ शिष्यौ वर्तेताम् ।

देवगुससूरिविषये एवं विचारितेऽपि एकनामधारिणोरनयोर्विक्रमार्कीयैकादशशताब्द्यां विद्यमानयोरूकेशगच्छालङ्कारसूरिवर्ययोः कः सम्बन्धकारिकायाः विवरणनिर्माता इति नावधार्यते । अन्यः कोऽपि सद्दशनामधारी मुनिवर्योऽपि व्याख्याता सम्भवेत् । निश्चयस्तु साधनाभावाद् दुःशकः ।

श्रीसिद्धसेनगणयः—

इमां टीकां विहाय श्रीसिद्धसेनगणिभिः कोऽप्यन्यो ग्रन्थो निरमायीति न श्रुतिपथ-मवतीर्णः, परन्तु आचाराङ्ग-विवाहप्रज्ञप्ति-प्रज्ञापना-नन्दीसूत्र-दशाश्रुतस्कन्ध-दशवै-कालिक-विशेषावश्यका-ऽऽवश्यकनिर्युक्ति-निशीथभाष्या-ऽनुयोगद्वार-प्रशमरति-परिभाषेन्दुशेखर-पाणिनीयव्याकरणप्रमुखान्यान्यग्रन्थावतरणसमलङ्कृतटीकावलोकनेनापि निश्चीयते तेषां विद्वत्त्वम् । इमे सुगृहीतनामधेया महर्षयः स्वजन्मना कदा कां भूमिं भूषयामासुरिति नावगम्यते साधनाभावात्, परन्तु तत्सत्तासमयविचारोपयोगिनिम्न-लिखितप्रशस्तितः स्फुटीभवति एतावद् यदिमे श्रीमद्दिन्नगणिक्षमाश्रमणशिष्यश्रीसिंह-सूरीणां प्रशिष्याः श्रीभास्वामिनां तु शिष्याः ।

आसीद् दिन्नगणिः क्षमाश्रमणतां प्रापत् क्रमेणैव यो
विद्वत्सु प्रतिभागुणेन जयिना प्रख्यातकीर्तिर्भृशम् ।

---

१ अनेन संभाव्यते जिनचन्द्रगणेः कुलचन्द्रेत्यपरं नामधेयम् ।
२ अवतरणसूचीं द्वितीये विभागे दास्यामि ।
३ श्रीसिद्धसेनगणिसमयविचारं करिष्ये द्वितीये विभागे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वोढा शीलभरस्य सच्छ्रुतनिधिर्मोक्षार्थिनामग्रणी–
र्जज्वालामलमुच्चकैर्निजतपस्तेजोभिरव्याहतम् ॥ १ ॥—शार्दूल०
यत्र स्थितं प्रवचनं, पुस्तकनिरपेक्षमक्षतं विमलम् ।
शिष्यगणसम्प्रदेयं, जिनेन्द्रवक्त्राद् विनिष्क्रान्तम् ॥ २ ॥—आर्या०
तस्याभूत् परवादिनिर्जयपटुः सैंहीं दधच्छूरतां
नाम्ना व्यज्यत सिंहसूर इति च ज्ञाताखिलार्थागमः ।
शिष्यः शिष्टजनप्रियः प्रियहितव्याहारचेष्टाश्रयाद्
भव्यानां शरणं भवौघपतनक्लेशार्दितानां भुवि ॥ ३ ॥—शार्दूल०
निर्धूततमःसंहतिरखण्डमण्डलशशाङ्कसच्छाया ।
अद्यापि यस्य कीर्तिर्भ्रमति दिगन्ताऽनविश्रान्ता ॥ ४ ॥—आर्या०
शिष्यस्तस्य बभूव राजिकशिरोरत्नप्रभाजालक-
व्यासङ्गच्छुरितस्फुरन्नखमणिप्रोद्भासिपादद्वयः ।
भास्वामीति विजित्य ना(मा?)म जगृहे यस्तेजसां सम्पदा
भास्वन्तं भवनिर्जयोद्यतमतिर्विद्वज्जनाग्रेसरः ॥ ५ ॥—शार्दूल०
क्षमया युक्तोऽतुलया, समस्तशास्त्रार्थविन्महाश्रमणः ।
गच्छाधिपगुणयोगाद्, गुणाधिपत्यं चकाराऽर्थम् ॥ ६ ॥—आर्या०
तत्पादरजोऽवयवः, स्वल्पागमशेमुषीकबहुजाड्यः ।
तत्त्वार्थशास्त्रटीका–मिमां व्यधात् सिद्धसेनगणिः ॥ ७ ॥—आर्या०

यद्यपि भाष्यानुसारिटीकाकाराणां श्रीसिद्धसेनगणीनां परिचयः तत्कृतप्रशस्तितः स्फुटीभवति, तथापि सिद्धसेनेतिनामधेयानां विविधसूरीणां विषये किञ्चिदपि वक्तुं नानावश्यकम् ।

१ श्रीसम्मतितर्कादिप्रौढग्रन्थप्रणेतारः तार्किकचूडामणयः कुमुदचन्द्रेत्यपरनामधेयाः कल्याणमन्दिरस्तोत्रकर्तारः श्रीसिद्धसेनदिवाकराः वृद्धवादिसूरिशिष्याः ।

२ वादिकुञ्जरकेसरीत्यादिबिरुदधारिश्रीबप्पभट्टिसूरिगुरवः श्रीसिद्धसेनसूरयः ।

३ श्रीबप्पभट्टिसूरिसन्तानीययशोभद्रसूरिगच्छालङ्कारयशोदेवसूरिशिष्याः विलासवईकहासूत्रधाराः साहारणेत्यपरनामकाः श्रीसिद्धसेनसूरयः ।

४ प्रवचनसारोद्धारस्य सं० ११४२तमे वर्षे वृत्तिनिर्मातारः चन्द्रगच्छीयप्रद्युम्नसूरिपरम्परागतदेवभद्रशिष्याः सिद्धसेनसूरयः श्रीयशोदेवस्य गुरवः ।

५ बृहत्क्षेत्रसमासस्य सं० ११९२तमे वर्षे टीकाकाराः उपकेशगच्छीयदेवगुप्तसूरिशिष्याः श्रीसिद्धसेनसूरयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

६ श्रीनाणकीयगच्छभूषणाः श्रीसिद्धसेनसूरयः सं० १४३३ ।

७ श्रीसिद्धिसागरसूरिसन्तानीयाः श्रीसिद्धसेनसूरयः सं० १२९४ ।

८ श्रीसरस्वतीनदीतटे सिद्धपुरपत्तने सिद्धचक्रमाहात्म्यप्रणेतारः श्रीसिद्धसेनसूरयः ।

एवमन्यान्यपुस्तकाधारेण संशोध्य पाठान्तरच्छायाटिप्पनादिना विशदीकृत्य शुद्धिपत्रेण च संकलय्य सम्पादितेऽस्मिन् मनोमोहके ग्रन्थे सततं समभ्यस्यन्तां तत्त्वार्थान्वेषिणश्छात्राः, साद्यन्तमवलोकयन्तामालोचकाः, तर्कयन्तां तार्किकाः, फलेग्रहितां नयतां मामकीनं परिश्रमम्, संशोधयन्तु सूचयन्तु च सदयाः सहृदया मतिमान्द्यप्रभवा दृष्टिदोषनिबद्धा वा स्खलना इति प्रार्थयमानः सततमध्ययनाध्यापनकार्यदक्षशेमुषीशेखरश्रमणादिभ्यः मदङ्गीकृतकार्यसर्वाङ्गतासाधकानि कष्टसाध्यानि सूत्रकारसम्प्रदायसमयादिविषयकानि साधनानि याचमानः श्वेताम्बरदिगम्बराम्नायसूत्रपाठभेदसूची-वर्णानुसारिसूत्रानुक्रमणिका-सूत्रकारसम्प्रदाय-तत्समयनिर्णय-श्रीसैद्धसेनीयटीकाऽन्तर्गतसाक्षीभूतपाठप्रदर्शककोष्टकादिसमन्वितं द्वितीयं विभागं यथामति संशोध्य धीधनकरकमले समर्पयिष्यामीति च निवेदयमानो विरमामि ।

मोहमयीनगर्यां, भूलेश्वरवीथ्याम्.
आषाढकृष्णैकादश्यां
१९८२तमे वैक्रमीयाब्दे.

सुज्ञसेवासमुत्सुको
हीरालालः ।

---

१ श्रीमज्जिनविजयमुनिसम्पादिते प्राचीनलेखसंग्रहद्वितीयविभागे ५३०-५३१तमौ लेखाङ्कौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

PREFACE

It was after the year 1918, the year in which I passed the M. A. examination from the Elphinstone College and joined the Wilson College as Assistant Professor of Mathematics that I could sincerely devote some time to the study of Jainism, whose rudimentary principles I had learnt from my father (who unfortunately breathed his last in 1922 at the age of 50).

The more I became conversant with *Jaina* philosophy, the more I desired to study it at the feet of a *Jaina* saint well-versed in the subject. Fortunately, I secured the required help from *Nyāya-tīrtha Nyāyaviśārada Upādhyāya Śrī Maṅgalavijaya*, one of the learned disciples of the late world-renowned *Śāstra-viśārada Jainācharya Śrī Vijaya-dharma-sūri.*

Among the various books that he taught me during his stay of two years in this city, *Tattvārthādhigama-sūtra* along with the *Bhāshya* deserves special mention.

While studying this book I came to know that there was a Sanskrit commentary on it composed by *Śrī Siddhasenagaṇi* and a part of it elucidating the first five chapters of this important work was already published by the late *Mr. Mansukhbhai Bhagubhai* of Ahmedabad (the second part remains unpublished till the present day).

In this connection I may mention the two reports current amongst the *Jainas* about it. The first of them refers to the fact that this book is not available to the public as it is neither sold nor given as a present except to the selected few. The second embodies the suggestion that many errors have crept into this book.

From my personal experience I may say that the latter is not so much well-based as the former. Of course, there are two or three instances where even words are missing. But, on the whole, when judged from the manuscripts I got for editing this book, I may say that the editor ought not to be blamed so much ; because, even, in this book there are some dubious points left unsolved.

As already partly suggested I failed to get a copy of this book from the publisher. My desire of procuring it was not gratified until I got a copy of it from *Śrī Jayasūri* (the famous disciple of the late *Jaina saint Śrī Mohanalālajī*).

Jain Education International For Private & Personal Use Only www.jainelibrary.org

During my leisure-hours I read this book and experienced mingled feelings of pleasure and pain—pleasure in coming across such a valuable commentary and pain to see that the book was not within the reach of even those who deserved and desired to read it.

I, therefore, thought it necessary to select a publisher who might undertake to publish the complete commentary and thus supply the long-standing demand for it. It was a great pleasure to me to come in contact with *Mr. Jivanchand Sakerchand Javeri* (one of the secretaries of Sheth Devchand Lalbhai Jain Pustkoddhār Fund), who willingly agreed to publish it and sell it at half the cost price according to the regulations of the trust.

He suggested to me that I should edit this work. I was rather reluctant to do so as I was aware of the fact that there were some difficult passages which I had not properly grasped and that there were quotations from the sacred books of the *Jainas* written in their typical language. I, however, undertook this work, when the publisher assured me that I would get the necessary help from *Āgamoddhāraka Jaināchārya Śrī Ānandasāgarasūri.*

On the publisher's supplying me with a manuscript belonging to *Śrī Vijayasiddhisūri* I commenced to prepare the press-copy, as I too, had procured by that time a manuscript from the Mohanlalji Jain Central Library (Bombay), through *Pratāpamunijī* (a learned disciple of *Jayasūrijī*). Side by side, I made use of the book lent to me by *Jayasūrijī* and also of the work published by the Royal Asiatic Society of Bengal. I have designated the manuscripts and the works here referred to as *ka*, *kha*, *ga* and *gha* respectively.

When the press-copy was about to be completed, it struck me that I should add marginal notes indicating the subjects treated in the commentary, render a Sanskrit translation of the *Māgadhi* quotations and supply the names of the works referred to by the commentator.

I must admit that I would have hardly succeeded in this attempt had it not been for the willing co-operation of *Ānandasāgarasūrijī*, who rendered me valuable assistance by going through the press-copy and furnishing me with information I much needed. To his further credit I must mention that he used to correct the galley-proofs, a copy of which I used to correct and send to the press before I received the second copy from him, as the publisher desired to expedite the work owing to the demand of the public. However, before I sent the final proof to the press

Jain Education International For Private & Personal Use Only www.jainelibrary.org

for printing, I mostly tried to carry out his suggestions and correct it accordingly. In doing so, at times I required one more reliable manuscript which I could get from the *Jainānanda Pustakālaya*, Surat. This arrangement lasted almost until this whole book was printed.

When about half the book was printed, I suggested to the publisher that it would be much better if an erudite scholar of Jainism was willing to prepare the errata by comparing the book with some other reliable manuscript. Accordingly, he wrote a letter to *Upādhyāya Maṅgalavijayajī*, who most willingly complied with his request as he wanted to encourage me in my attempt of editing works like this. True to his word he took great trouble in preparing the errata given at the end of this book.

I may mention in this connection that I have made no omission or alteration in the errata, even though at times, different readings and a few letters or words (added from the pure and noble motive of elucidation) seemed to be intermixed therein. But it is true that I have made some additions to this errata, some of which refer to the signs of punctuation.

I should be wanting in duty if I omitted to record my thanks and my gratitude to those who helped me in one way or the other. My special thanks are due to *Ānandasāgarasūrijī*. I gratefully recall, too, many pleasant hours spent with *Upādhyāya Maṅgalavijayajī* to whom I must pay the highest tribute of respect. I avail myself of the present opportunity to acknowledge my indebtedness to him for the suggestions he made to me while going through the proofs of Sanskrit introduction.

I may express my desire of furnishing the reader in the second part with the index of technical words, the list of the works from which the passages are quoted by the learned commentator and such other materials as are considered necessary to make this work complete. Furthermore, I invite cordial suggestions from different scholars that will help me in the arduous task intended to be undertaken by me *viz.* of giving the passages referring to our author or this important work of his.

In fine, I crave for the indulgence of the learned readers for the imperfections and errors which may have crept into this book. However, I shall be highly pleased to receive valuable criticisms from all quarters.

BHULESHWAR, BOMBAY.
18th May 1926.

H. R. KAPADIA.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

INTRODUCTION.

Significance of Tattvārthādhigama Sūtra and its place in Jaina Literature—

Tattvārthādhigama Sūtra, as its very name suggests, deals with the fundamental principles of Jainism. Broadly speaking, it refers to the substances existing in and comprising the *universe*, and explains their relations and reactions. In other words, the pure soul, the defiled soul and the non-soul are the main topics of this book. Hence it may be looked upon as primarily coming under the class of *Dravyānuyoga*, one of the four [1]*Anuyogas* under which the *Jaina*s arrange their literature.

Importance of Tattvārthādhigama Sūtra—

Tattvārthādhigama Sūtra consists of 344 *Sūtras* or aphorisms divided under 10 short [2]chapters, its value varying inversely with its size. For, it is considered as a priceless jewel by the *Śvetāmbaras* and the *Digambaras* as well (the two main sections of the *Jaina* community). The latter even believe that one reading of this book leads to as much merit as a fast observed for a day and that it is descended from the 6th *Aṅga* known as *Jñātādharmakathā* and the 2nd *Pūrva Āgrayiṇī*. The value of this work is enhanced by the fact that it deals with various subjects such as Anthropology, Embryology, Geology, Mineralogy, Physiology, Psychology, Theology, Zoology, Anatomy, Botany, Ethics, Metaphysics, Physics and Logic. Hence it is no wonder when it turns out to be one of the most-commented-upon work of the *Jainas*; for, the number of commentaries available even at present comes to about thirty.[3]

The importance of this work can be further realized from the following extract of the speech delivered by the late *Mahāmahopādhyāya Dr. Satiś-chandra Vidyābhūshaṇa* at the *Syādvāda Jaina* festival at Benares :—

---

1. *Anuyoga* means the exposition of the principles of Jainism. The four *Anuyogas*, here referred to, are :—

(1) *Charaṇānuyoga* or the exposition of the rules of conduct, (2) *Ganitānuyoga* or the exposition of the principles of Mathematics, (3) *Kathānuyoga* or the exposition of allegories, fables, stories, etc., and (4) *Dravyānuyoga* or the exposition of philosophy and metaphysics in special.

2. The first chapter consists of 35 aphorisms, the second 52, the third 18, the fourth 53, the fifth 44, the sixth 26, the seventh 34, the eighth 26, the ninth 49 and the tenth 7.

3. For the information about these commentaries see Sanskrit Introduction pp. 16–18.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"In the departments of logic and metaphysics it (the *Jaina* literature) attained the very highest development and method. There are not many metaphysicians in India like *Umāsvamī*, who flourished in the 1st century A. D....."

Analysis of Tattvārthādhigama Sūtra—

The contents of the 10 chapters as related to aphorisms may be roughly summarized as under :—

The first deals with the path leading to liberation, the definitions and divisions of Right Faith and its subject-matter, the seven *Tattvas*, the four connotative *Nikshepas* or the aspects of considering an object, the various kinds of knowledge and the mode of knowing and seven fundamental stand-points known as the *Nayas*.

The second gives an account of the characteristics of *Ātman* or the soul, the 53 types of *Aupaśamika Bhāva*, the classification of *Saṁsārins* or the embodied souls, their organs, bodies and life-periods.

The third deals with the seven hells, the troubles and turmoils experienced by their denizens, the description of the human world and the classifications of the *Tiryachs* or the sub-human souls.

The 4th furnishes us with an information about the types of gods or the celestials and their functions, and the maximum and minimum limits of a life-period or *Āyushya* of living beings.

The 5th has for its subject-matter *Ajīva* or the non-soul along with its divisions, and the definitions of *Dravya* or substance.

The 6th deals at length with the activities of the embodied soul giving rise to the channels through which the *Kārmika* particles flow into the embodied soul.

The 7th deals with vows, their kinds and partial transgressions.

The 8th gives an account of the binding of the soul or the amalgamation of the *Kārmika* matter with the imperfect soul.

The 9th discusses the ways and the modes of stopping the flow of the *Kārmika* particles either partially or entirely and of shedding of such particles previously amalgamated.

The 10th treats of *Moksha* or salvation and the liberated and perfect souls.

From this it appears that the pure soul is dealt with in the 10th, the non-soul in the 5th and the embodied soul in the rest of the chapters which may be looked upon as auxiliary to the 5th and the last.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Furthermore, it may be remarked that these aphorisms deal with different branches of science in its widest sense as can be seen from the following rough* sketch arranged in the tabular form :—

Chapter.	*Aphorism.*	*Subject.*	
I	4—8	Categories and predicables	Logic.
	10—12	Proofs and their classifications	
I	34—35	Theory of stand-points	
I	13—33	Knowledge and its different aspects	Psychology.
II	11	Mind	
II	15—25	Organs of sense	
VI		Connection between mind and matter.	
VII		Ethics in the light of Psychology	
IX		Asceticism in the light of Psychology and Physico-psychology.	
II	1—10		
V	1, 4, 5, 7, 10, 11, 12		Metaphysics.
V	29, 30, 31, 37, 40, 41	Substance	
	1, 6, 9, 10, 14, 18	Space	
V	22, 38, 39	Time	
III	15—18	Anthropology.	
II	25—31	Transmigration	Theology.
II	32—35	Embryology	
III	2—6	Hellish Beings	
IV	1—12	Celestial Beings	
X		Perfect souls or Gods	
IV	13	Planets	Astronomy.
IV	14	Their motions	
IV	15	Their locations	
III	7	Continents and oceans	Geography.
	8	Their shape and size	
	9	Mountains	
	10	Divisions of Land	
	11	Mountains	
	12	Number of mountains, etc.	
II	37—41	Electric body.	Physics.
V	24	Heat and Light.	
V	24	Sound	
V	1, 4, 6, 10, 11, 14, 19, 20, 23, 24—28.	Matter	
V	1, 3, 6, 7, 13, 17.	Media of motion and rest	
V	25—28	Electrons and molecules	Chemistry.
	32—36	Structure and characteristic of molecules.	
III	1	Strata of earth	Geology.
II	24		Zoology.

*This is based upon *Mr. J. L. Jaini's* introduction (p. XVII) to *Tattvārthādhigamasūtra*.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Life of the Author—

As already pointed out *Tattvārthādhigama Sūtra* with some minor differences here and there is held in high estimation by the two main sections of the *Jainas*. Hence it is not surprising, if each section gives a different account of the life of the author of this great work. So, first of all, I shall give an account of it as accepted by the *Śvetāmbaras*.

Umāsvāti was born in the city of *Nyagrodhikā*. The name of his father was *Svāti*, while that of his mother *Umā*. From this it appears that his name is a combination of the names of his parents, a fact inversely reflected in the case of *Śrī Bappabhaṭṭisūri*, the author of *Chaturviṁśatikā*, who was so named after his father's and mother's name *Bappa* and *Bhaṭṭi*. The *Gotra* or the lineage of his father and consequently of the author was *Kaubhishaṇī*, while that of his mother, *Vātsī*.

As very little is known even about the exact period of his life, it is but natural that one cannot precisely say when he entered the order of the saints by cutting asunder the ties that bound him to the world. It is, however, suggested in the colophon given at the end of the *Bhāshya* that our author composed this great work dealing with almost every doctrine or dogma of the *Jainas* either explicitly expressed or implied in the city of *Kusumapura* (modern Patna in Bihar and Orissa), after he had renounced the world. He was a pupil of *Śrī Ghoshanandi* who was the grand disciple (*Praśishya*) of *Śivaśrī* the *Vāchakamukhya*.[1]

Our author, too, has this appellation of *Vāchaka* added to his name. This is corroborated even by *Mādhavāchārya* the author of *Sarvadarśana-saṅgraha*, who calls him *Umāsvāti Vāchakāchārya*.

Our author has composed 32 [2]*Sambandha-Kārikās* or the connective verses as an introduction to the *Sūtras* he composed. Over and above this he has elucidated these *Sūtras* by composing the [3]*Bhāshya* or the gloss therein.

Furthermore, he is the author of *Praśamarati*, [4]*Śrāvakaprajñapti* etc., the number of these works known as *Prakaraṇas* being 500.

---

[1] *Vāchaka* means one conversant with the *Pūrvas*, that constitute one of the main divisions of the 12th *Aṅga* forming a twelfth part of the *Jaina āgama* (canon).

[2] These verses have been commented upon by several saints out of whom *Śrī Devaguptasūri* and *Śrī Siddhasenagaṇi* deserve special mention in this connection.

[3] This *Bhāshya* is very exquisitely elucidated by *Śrī Siddhasenagaṇi*.

[4] *Śrāvaka-prajñapti*, a *Māgadhi* work commented upon by *Śrī Haribhadrasūri*, is a work of *Śrī Umāsvāti* or no is a question still undecided, since another work in Sanskrit bearing the same name is reported to be attributed to our author, though it is not available at present.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

This is borne out by the fact that certain passages given in the Sanskrit introduction on pp. 20-22 and attributed to our author are not found in the extant works.

According to the *Digambara* tradition our author's name is *Umāsvāmī* and he is the most famous disciple of the revered saint *Srī Kundakundāchārya.* He is known as *Gridhrapichchha* in consequence of his preceptor being so designated. This is borne out by a verse found in one of the manuscripts of *Tattvārthādhigamasūtra* (vide Sanskrit introduction, p. 23). He renounced the world at the age of 19, led the life of an ascetic for 25 years and subsequently became the head of the ascetics and discharged his duties in that capacity for about 40 years.

Different stories are told about the composition of *Tattvārthādhigama Sūtra* : one of these is given as follows in the introduction to its commentary composed in *Karnāṭakīya* language :—

There lived in Kathiawar a pious *Jaina* layman named *Dvaipāyana.* As he was proficient in the *Jaina* sacred literature, he desired to compile a great work, but his attempts were not being crowned with success owing to some worldly troubles. Therefore he took a vow not to take his meals until he had composed at least one *Sūtra.* He did not wait to practise his vow, so on that very day he composed the first *Sūtra,* selecting salvation as the subject of his work. In order that he might not forget it he transcribed it on a side of a pillar in his house.

Next day he happened to go out on some business. In his absence a saint visited his house who was warmly received and entertained by his wife. By chance his eyes fell upon this *Sūtra.* He pondered over it and left the place after adding the word *Samyag* before it.

When *Dvaipāyana* returned home he saw the aphorism so proverbially corrected and consequently questioned his wife, who suggested that the saint must have done this. He ran at once to find out the saint who had obliged him by making such an invaluable and fundamental correction. On the outskirts of the city he came across an order of monks in the midst of whom he found the head of the order seated in the peaceful posture befitting him. He guessed that this must be the very saint he had run after and so he fell at his feet and requested him to complete the work undertaken by him as it was far above his ordinary ability. The saint was moved by the compassion and entreaty, so he finished the work. This saint was no other than our revered author *Umāsvāmī* and the book completed, *Tattvārthādhigama sūtra,* it being an expansion of the various

Jain Education International For Private & Personal Use Only www.jainelibrary.org

aspects, details and developments of the foremost, fundamental and all-embracing *Sūtra* of Jainism.

Date of Umāsvāti—

I have already taken up this question in the Sanskrit introduction (pp. 22-23), where I have referred to the materials that throw light upon it. But I need not dilate upon it now. For, I hope to be favoured by the *Digambara* scholars with arguments that may prove that this is a work of *their* school of religion, and that the *Bhāshya* is not composed by the author *himself.* Besides, I harbour scruples with regard to hastening the process of analysis and examination of facts and jumping to a definite conclusion, so that this task and all other subtler matters are left for the present to the discretion of abler and more critical treatment of wiser and more comprehensive intellects. Hence there is no necessity of assuring the learned reader that I do not intend to open the controversy but at the same time I am really eager to know definitely whether this work which holds a unique place in the old Sanskrit *Jaina* literature and which therefore commands universal acceptance and reverence seems to support to a greater extent the *Śvetāmbara* doctrines or those of the *Digambaras.* This being settled, there will be less trouble in fixing the date of our venerable author.

The Bhāshya and the Tīkās—

According to the *Śvetāmbara* tradition the *Bhāshya* is composed by *Śrī Umāsvāti* himself. There seems no valid reason to disbelieve it. The *Bhāshya* appears to be older than any of the *Digambara* commentaries that have come to light. It resembles in language and style the old works of the *Bauddha* and *Vedika* schools of thought. It elucidates the *Sūtras* in the natural way and agrees with the *Śvetāmbara* doctrines to which even the *Sūtras* seem to refer to.

Tattvārthādhigama Sūtra is as already suggested a work commented upon by various scholars. Out of them we are here directly concerned with two commentators *Śrī Devaguptasūri* and *Śrī Siddhasenagaṇi.* The former has written a commentary only on the connective verses, while the latter has not only composed a concise commentary on them but has even elucidated the *Sūtras* and the *Bhāshya* as well. It may be worth noticing that in each and every manuscript of *Tattvārthādhigama Sūtra* I have come across, the former's commentary precedes that of the latter. From this it may be inferred that the former may have been a predecessor or an older contemporary of the latter.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Judging from the commentary ably composed by *Śrī Devaguptasūri*, it may be adduced that his commentary on the work itself would have been certainly approved of by scholars; for, even at the very outset he discusses grammatical questions and supports his statement by quoting a *Sūtra* from the *Ashṭādhyāyī* of *Pāṇini*, the grammarian of world-wide reputation. It cannot be definitely said whether such a commentary not available at present was at all composed by him or unfortunately he did not survive to complete the work undertaken by him.

As already observed in the Sanskrit introduction there are two saints bearing the name of *Devagupta*. Both of them have commented upon *Navapada-prakaraṇa*; but one of them is a grand-pupil or a great-grand pupil of the other, who seems to have composed the original work. Owing to the want of materials it is rather difficult to ascertain whether any one of them can be identified with the commentator of the *Sambandha-Kārikās* or there is altogether a different saint resembling these two only in name.

Before concluding, I may mention that I reserve for the second part the topics pertaining to *Śrī Siddhasenagaṇi*, the profound scholar of Jainism.

And now in closing I once more crave for the leniency of the learned readers for any faults of omission or commission and express my desire that this noble and ennobling work of *Śrī Umāsvāti* may be assigned its due place in the corresponding literature of the world.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीपरमात्मने नमः ।

श्रेष्ठि-देवचन्द्रलालभाई-जैनपुस्तकोद्धार-ग्रन्थाङ्के

श्रीउमास्वातिवाचकवर्यविरचितम्

तत्त्वार्थाधिगमसूत्रम्

स्वोपज्ञाः सम्बन्धकारिकाः

(श्रीदेवगुप्तसूरि-श्रीसिद्धसेनगणिप्रणीतटीकाद्वययुताः)

सम्यग्दर्शनशुद्धं, यो ज्ञानं विरतिमेव चाप्नोति ।
दुःखनिमित्तमपीदं, तेन सुलब्धं भवति जन्म ॥ १ ॥ आर्या

श्रीदेवगुप्तसूरिकृताटीका—

वीरं प्रणम्य सर्वज्ञं, तत्त्वार्थस्य विधीयते ।
टीका संक्षेपतः स्पष्टा, मन्दबुद्धिविबोधिनी ॥ अनुष्टुप्

व्याख्या—सम्यगर्हत्प्रवचनमधिगम्य कालसंहननश्रद्धायुरादेः परिहाणिमवलोक्य सत्त्वानुकम्पया समासतो मोक्षमार्गमुपदेष्टुकाम आचार्य इदमाह—**सम्यग्दर्शनशुद्धं यो ज्ञानं विरतिमेव चाप्नोति** ।—अत्र सम्यग्दर्शनशुद्धमिति कतरो विग्रह आस्थीयते ? यदि तावत् सम्यग्दर्शनेन शुद्धमिति करोति करणे तृतीया, परश्वादीनामिव प्राङ् निर्वृत्तिर्वक्तव्या; उत कर्तरि, तदा दर्शनज्ञानयोरभेदाद् आत्मनो, य आप्नोतीत्ययुक्तम् । अथ सम्यग्दर्शनायेति तादर्थ्ये चतुर्थी, दार्विव यूपाय, प्रागेव दर्शनात् शुद्धं ज्ञानम्, अवाप्तज्ञानस्य च केवलिन इव किं दर्शनेन ? उत सम्यग्दर्शनात् हेतौ पञ्चमी, स्वयंसम्बुद्धादिषु विरुध्यते, तेषां हि झगित्येव ज्ञानं न हेतुक्रममपेक्षते । अथ सम्यग्दर्शने शुद्धमिति निमित्तसप्तमी, चतुर्थीपक्षदोषः । तस्माद् वक्तव्योऽत्र समाधिः । यथेच्छसि तथाऽस्तु । ननूक्तं दोषभूयस्त्वम् । नैते दोषाः । करणे तावद्

---

१ आर्या-लक्षणम्—

यस्याः पादे प्रथमे, द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये, चतुर्थके पञ्चदश साऽऽर्या ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्ष्यमाणा निर्वृत्तिः "तन्निसर्गादधिगमाद् वा" (अ० १, सू० ३) इति। कर्तर्यपि, अत एव आप्नोतीति युक्तम्, आत्मा हि सम्यग्दर्शनी सलिलमिव स्वच्छतामन्यां ज्ञानावस्थामाप्नोतीति वक्ष्यते। अवश्यं च य इति कर्तुर्निर्देशः कर्तव्यः, स ह्युपायैरात्मानं शोधयतीति। चतुर्थ्यामप्यधिगमाभिप्रायः, नैसर्गिकाद् अवाप्तश्रद्धोऽध्ययनादिभिराधिगमिकमाप्नोति, तदर्थमिति, शुद्धिकारणं तु शुद्धमध्ययनादिकाले। पञ्चम्यामपि, स्वयंसम्बुद्धादिषु निसर्गसम्यग्दर्शनहेतुकमेव तत्, वक्ष्यति हि "अपरोपदेशो निसर्गः" इति, तेषां हि परोपदेशमन्तरेण क्षयोपशमादिलब्धिभ्यः समीहमानानामुत्तरकालं प्रागिव द्राग् उत्पद्यते ज्ञानम्। सप्तम्यामपि सत्सप्तमी, सति हि सम्यग्दर्शने शुद्धं ज्ञानमन्यथा सर्वशुद्धप्रसङ्ग इति। अधिकरणे वा, यथा आकरे शुद्धानि भाण्डानीति। एवमन्येऽप्याक्षेपपरिहारमार्गाः सन्ति, प्रसङ्गभयात् तु नाद्रियन्ते। तृतीयापक्षः पुनरत्र ज्यायान्। सम्यग्दर्शनेन शुद्धमिति "कर्तृकरणे कृता" (पाणिनिः २।१।३२) इति समासः। तत्पूर्वकमित्यर्थः, दर्शनमूलत्वाच्च श्रेयसस्तेन शुद्धमित्युच्यते। उक्तञ्चायमर्थः प्रवचने—

"भ्रष्टेनापि च चारि-त्राद् दर्शनमिह दृढतरं ग्रहीतव्यम्।
सिध्यन्ति चरणरहिता, दर्शनरहिता न सिध्यन्ति॥" आर्या

न च श्रुतमधीयानस्याध्ययनादिभ्योऽधिगमसम्यग्दर्शनावाप्तिरिति कृत्वा ज्ञानशुद्धं दर्शनमाशङ्कितव्यम्, प्राग् दर्शनाद्ज्ञानमेव। तदुक्तं च प्रवचने—"द्वादशाङ्गमपि श्रुतं विदर्शनस्य मिथ्ये"ति। न चाशुद्धाशये भैषजमिव श्रुतमात्मलाभं लभते। एतेनाशय शुद्धौ तस्यैव सम्यक्त्वेन विपरिणामो जायत इति व्याख्यातमेव। श्रुतमेवाशयशोधनमिति चेत्, न, अभव्यानामध्ययनादिक्रियासम्भवेऽपि दर्शनासम्भवात्, वक्ष्यति[1] हि, सम्यग्दर्शनपरिगृहीतं मत्यादि ज्ञानमन्यथा त्वज्ञानमेवेति। भवति चान्यथापि पदार्थाध्ययनमात्रं, न तु रुचिं विरहय्य दर्शनम्, अवश्यं प्रागाशयविशुद्धिरेष्टव्या। य इति जन्मवतः कर्तुरुद्देशः। ज्ञानं पञ्चप्रकारं वक्ष्यमाणम्। तत्राद्यत्रयं व्यभिचारित्वादिष्यते तस्य विशेषणं, उत्तरं तु द्वयं शुद्धत्वादेव न, दैवरक्ता हि किंशुकाः। विरमणं विरतिर्व्रतं संयमश्चारित्रमित्यर्थः। साऽपि सम्यक्पूर्विकैव पञ्चतया वक्ष्यते। अत्र किं सम्यग्दर्शनशुद्धा विरतिरिष्यते, उत ज्ञानशुद्धा? उभयथाऽप्यदोषः, कारणकारणत्वेन दर्शनशुद्धा कारणत्वेन ज्ञानशुद्धा। वक्ष्यति हि, "विरतिर्नाम ज्ञात्वाऽभ्युपेत्याकरणम्" (अ०७, सू०१, भाष्यम्) इति। इत्थं चेयं विरतिर्यदुत दर्शनज्ञानशुद्धाशयस्वामिनी, इतरथा तु मार्जारसंयमकल्पा स्यात्, एतच्च सच्चरित्रमधिकृत्य वक्ष्यति "उत्तरलाभे तु नियतः पूर्वलाभः" (अ० १, सू० १, भा०) इति। तस्मात् त्रितयमप्येतत् सम्यक्पूर्वकं निःश्रेयसाय कल्पत इति साधूपदेशः। एवकारोऽवधारणे, दर्शनज्ञानविरतय एव जन्मनः सुलब्धत्वे कारणं, नोनम्, अधिकमप्यतो नास्त्येवेति। एकतमवत् तु जन्मान्यजन्मापेक्षया सुलब्धमिव सुलब्धं, वक्ष्यति चैषां मोक्षहेतुत्वम्। तच्चावधारयति, त्रयमेवैतत् नोनमधिकं वा मोक्षायेति। तच्च सप्रयोजनं सूत्रेऽभिधास्यते,

१ मतिश्रुतावधयो विपर्ययश्च (अ० १, सू० ३२) इति सूत्रस्य भाष्ये। २ 'ज्ञानं भवत्यन्यथाऽज्ञानमेवेति' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चशब्दो ज्ञानमिति भिन्नवाक्यत्वाद् विरतिं चेति सम्बन्धाय, एकैकस्य वा निर्जराहेतोः प्राप्तौ जन्म सुलब्धमिति विकल्पार्थः । तच्च सुलब्धमिवेत्युक्तं, आप्नोतीत्यवस्थितं स्वतन्त्रं कर्तारं दर्शयति, दर्शनादित्रयमाप्नोति–लभतेऽधिगच्छतीत्यर्थः ॥ **दुःखनिमित्तमपीदं तेन सुलब्धं भवति जन्म** ॥—दुःखयतीति दुःखं परितापयतीत्यर्थः, तच्च शारीरं मानसं च वक्ष्यमाणं, द्वन्द्वभूयिष्ठत्वात् संसारो वा दुःखं, निमित्तं हेतुः प्रसूतिराधारः । दुःखानां निमित्तं, दुःखं चास्य निमित्तम्, तत्र दुःखानां निमित्तमिति जन्मनि सति शरीरमनसी तद्भवं च दुःखम्, अत एवोक्तमन्यत्रापि–"नह्यशरीरं प्रतपन्त्युपद्रवाः" इति । उत्तरेषामपि निमित्तं जन्म, तद्वान् दुःखितः सन्नुपप्लुतचेताः क्लीबोऽसम्यग्विषहमाणः संसारस्वभावमजानन् तदितरप्रतिकारान् अभीप्सुरशुभमारभते, ततः कर्मपाशावपाशितः पुनरपि दुःखभागी भवति । संसारपक्षेऽपि दुःखस्य-संसारस्य निमित्तम्, मूढो ह्येकजन्मनि बहूनि जन्मान्तरबीजान्युपचिनोति । एतेन दुःखं चास्य निमित्तमिति स्थितम् । अपिशब्दो दुःखानां दुःखस्य वा निमित्तमित्यस्मिन् पक्षेऽपि [न] दुःखनिमित्तमिति विकल्पयति, कथम्? षट् पुरुषप्रकृतीर्वक्ष्यति । तत्र यदा संसारो दुःखं तदाऽऽद्यचतुष्टयस्य मूढत्वात् तन्निबन्धनम्, उत्तरयोस्तु अवाप्तदर्शनादित्रयीकयोरेतदेव परमार्थसाधनं चरमं चेति न दुःखनिमित्तम्, यदा तु शारीरादिदुःखपक्षो[1] दुःखं चास्य निमित्तमित्ययं वाच्योऽर्थस्तदा सर्वेषामेव जन्मवतां दुःखनिमित्तमित्ययं विकल्पः । इदमिति जन्मबहुत्वेऽपि मानुषं जन्म प्रत्यक्षं प्रदर्शयति, नह्यन्यत्र विरतिलाभोऽस्ति । कथम्? नरकेषु तावद् भूयसा दुःखेनाजस्रमनुतप्तदेहमनसामशरणानामत्यन्तोपहतसंक्लिष्टपरिणामानां हितश्रवणमपि नास्ति, कुतस्तदुपदेशकारणम्? तिरश्चामप्यत्यन्तमूढमनसामकरुणपराधीनाशरणजीवितानां सर्वाभिभूतजन्मनामाभियोग्यादिदुःखानुबद्धदेहमनसां हितोपदेशश्रवणश्रद्धाविरती कुतः? तथा देवानामपि कृच्छ्रावाप्तविषयसुखलवास्वादापहतचेतसामनवाप्तहितश्रवणानां केषांचिच्च कथंचिद्धितश्रवणसंभवेऽप्यवश्यभोगकर्माधीनत्वात् अकर्मभूमित्वाच्च विरत्यभाव एव । मानुष्येऽपि देवकुर्वाद्यकर्मभूमिषु भोगपरत्वात्, कर्मभूमिषु चान्त्यावसायिम्लेच्छादिष्वत्यन्तनिर्घृणत्वात्, आर्येष्वपि चोपदेशकश्रद्धाद्यभावात् कुतो विरतिः? विकलं चेदं त्रिकमसाधनमित्यतः सर्वापवादशुद्धं त्रितयलाभोपायक्षममिदमित्याचार्यः स्वजन्मनिदर्शनेन प्रत्यक्षमाह–**तेनेति** । यत्तदोर्नित्यसम्बन्धाद् यच्छब्दोद्दिष्टमेव कर्तारं निर्दिशति । सुलब्धमनिन्द्यं श्लाघ्यं ज्यायः । सति हि संसारेऽवश्यम्भावि जन्म, तच्च दर्शनादित्रयसहितत्वात् मोक्षसाधनं यदि भवति, ततः सुलब्धम्; अन्यथा हि क्षुद्रजन्तूनामिव मरणायैवेति दर्शयति । भवतीति स्फुटार्थम्, जायतेऽस्मिन्निति जन्म, तच्च मानुषमित्युक्तम् । अथवा भवति जन्मेति संसारास्तित्वं दर्शयति । आत्मा हि स्वकृतकर्मसन्तानानुस्यूतः सन् धावति भवाद् भवान्तरं, तस्य पर्यटतो भवति जन्म । एतेनैकान्तनित्यादीनां

---

१ 'शरीरादिदुःखं चास्य' इति ख–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संसाराभावात् सर्वा प्रक्रिया दुरुपपादा इति व्याख्यातम्, पुनश्च वक्ष्यति विस्तरेण शास्त्र एव । इति प्रथमकारिकार्थः ॥ १ ॥

एवं सति संसारोऽस्तीति ज्ञापिते तस्यानादित्वख्यापनार्थमाह—

जन्मनि कर्मक्लेशै-रनुबद्धेऽस्मिंस्तथा प्रयतितव्यम् ।
कर्मक्लेशाभावो, यथा भवत्येष परमार्थः ॥ २ ॥ आर्या

व्या०—जन्मनि कर्मेत्यादि । अथवा उक्तं दुःखनिमित्तं जन्म ततः कथमित्यार्ययैवाह—**जन्मनि कर्मक्लेशैरनुबद्धेऽस्मिंस्तथा प्रयतितव्यम्** ।—जन्मोक्तवक्ष्यमाणलक्षणम् । क्रियत इति कर्म ज्ञानावरणाद्यष्टधा वक्ष्यते । क्लिश्नन्ति क्लेशयन्ति वा स्वामिनं, क्लिश्यते वैभिरिति क्लेशाः, तेऽपि मोहनीयभेदाः क्रोधादयः कषाया वक्ष्यन्ते । अनुबद्धे सन्ततवेष्टिते, कथम् ? सति हि जन्मनि कायवाङ्मनोहेतुकं कर्म भवतीत्युक्तं, ततः प्रवृद्धकर्माशयस्यौदयिकभावानुवर्तिनोऽस्ववशस्य संसारहेतवः क्रोधलोभादयोऽनेकजन्मान्तरक्लेशनाय क्लेशा आविर्भवन्ति, ततो रागद्वेषादिहेतुकं तीव्रं कर्मानुबद्धं, पुनरपि जन्मनि सति कर्म भवति, कर्मभ्यः क्लेशाः, क्लेशेभ्यः पुनरपि जन्मेत्येवमनुबद्धमित्युच्यते । एतेन संसारस्यानादित्वं दुःखभूयस्त्वं च व्याख्यातम् । अत्र च सत्यप्यनादित्वे परस्परहेतुत्वे च त्रयाणां जन्मानुबद्धमित्युक्तं प्रत्यक्षत्वादाधारत्वात् पूर्वोक्तत्वाच्च । एवं च कृत्वा अन्यत्राप्युक्तम् " विविधबाधनयोगाद् दुःखमेव जन्मोत्पत्ति"रिति । **अस्मिन्निति**, तदेव मानुषं जन्माग्रेऽयति, प्रत्यक्षमेव क्लेशानुबद्धं दृश्यत इति, केषाञ्चिद् देवजन्मन एवोत्तरोपपत्तिप्रतिलम्भः किल, तदाशङ्कानिषेधाय चास्मिन्नित्याह, दूरगानामपि पुनरागत्यास्मिन्नेव कर्मभूमित्वात् प्रयत्नपूर्वकः कर्मक्लेशाभाव इति । **तथा प्रयतितव्यम्** । तथेति प्रकारार्थे, तेन प्रकारेण दर्शनादित्रयलाभोपायपूर्वकमित्यर्थः । प्रयतितव्यम् प्रघटितव्यं; सर्वजन्मिनां[1]ऽऽत्मना कर्मक्लेशसन्ततत्वमवगम्य संसारोद्विग्नेन विरागमार्गानुवर्तिना प्रकर्षेण सर्वात्मना तपःसंयमादिषु वर्तितव्यमित्यर्थः । आद्यर्थे वा प्रशब्दः, सम्यग्दर्शनादिलाभानन्तरमादावेव यतितव्यम्, न पुनर्विश्वसितव्यम्, पापा हि कर्मक्लेशाः प्रवृद्धाः सन्तः पुनरपि दर्शनादि प्रतिपातयन्तीति । न चेयं स्वमनीषिका, वक्ष्यति ह्याचार्यः शास्त्रे[2] "अनन्तानुबन्ध्युदयात् पूर्वोत्पन्नमपि सम्यग्दर्शनं प्रतिपतती"ति । किमर्थं प्रयतितव्यमित्याह—**कर्मक्लेशाभावो यथा भवति** । कर्मणां क्लेशानां चाभावः क्षयस्तैर्वियोग इत्यर्थः । कथं च स भवति ? शङ्काद्यतिचारवियुक्तावाप्तदर्शनो हि शुद्धाशयस्त्रिभुवनमप्युपहितमोहमहेन्धनज्वलितकर्मदहनकाथ्यमानमशरणममलज्ञानागमचक्षुषाऽवलोक्य गर्भवासादिभयोद्विग्नः प्राणातिपातादिविरतिप्रतिज्ञामारुह्य तद्दृढीकरणार्थं च पञ्चविंशतिभावनाभावितान्त-

१ ' सर्वजन्मिनामात्मना ' इति क-पाठः । २ अष्टमेऽध्याये दशमस्य सूत्रस्य भाष्ये । ३ ' गर्भवासाद् विग्नः ' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रात्मा द्वादशानुप्रेक्षास्थिरीकृताध्यवसायः संवृताश्रवत्वादनभिनवकर्मागमः तपःसंयमादिभिश्च पूर्वोपात्तक्षयशुद्धाशयो मोहादिमलप्रक्षयादवाप्तकेवलपरमैश्वर्यः फलबन्धनशेषचतुष्प्रकृतिक्षये कर्मक्लेशाभावावस्थामाप्नोतीति, पुनरपि विस्तरतः शास्त्रे वक्ष्यामः। अत्र च जन्मकर्मक्लेशत्रयाभावेऽप्यष्टकर्मक्लेशाभाव इत्युक्तं, ते ह्यवश्यं जन्मकारणं, जन्मत्वेतत्कारणमपीत्युपदिष्टं, अतस्तदभावे प्रागेव जन्माभाव इत्यभिप्रायः। क्लेशानां च कर्मभेदत्वेऽपि पृथग्ग्रहणं प्राधान्यार्थम्, एतद्भावाभावे हि बन्धमोक्षौ, वक्ष्यते—"सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते। स बन्धः" (अ० ८,सू०२–३)। मोहादिक्षयात् केवलं ततश्च मोक्ष इति। एवं तर्हि कर्मग्रहणं माभूत्। नैवं शङ्क्यम्। व्यवहार एव न प्रवर्तते, प्रधाना हि कर्मसंज्ञा वक्ष्यमाणा, तदेकदेशाश्च क्लेशा इति ज्ञापितं भवति। **एष परमार्थः**। एष इति वक्ष्यमाणविस्तरमपि समासतोऽवधार्य प्रदर्शयति, बहुविचित्रग्रन्थोपहितोऽप्येतावानेवैष परमार्थो यदुत कर्मक्लेशाभावो नोनो[1] नाभ्यधिको वेति। परम उत्कृष्टो ज्यायान्, अर्थः प्रयोजनं फलं परमार्थः, अत्यन्तशुद्धत्वात् पूज्यमानो वाऽर्थः, दर्शनादिलाभफलं मोक्ष इत्यार्याद्वितीयार्थः॥ २॥

यदि पुनरेकभवेन परमार्थः शक्यतेऽवगन्तुं न च क्लेशग्रहाणं, ततः क उपाय इत्याह—

परमार्थालाभे वा दोषेष्वारम्भकस्वभावेषु।
कुशलानुबन्धमेव स्यादनवद्यं यथा कर्म॥ ३॥ आर्या

व्या०—परमार्थालाभे वेत्यादि। परमार्थ उक्तवक्ष्यमाणनिर्वचनः, तं यदा कालसंहननपरिहाणेन[2] लभते तदा, दोषेषु, दूषयन्त्याशयमिति दोषाः कषायास्तेषामेव गौणपर्यायज्ञापनार्थं प्रयोजनार्थं च दोषा इत्याह—**आरम्भकस्वभावेषु**। आरम्भयतीत्यारम्भकः अशुभे प्रवर्तयतीत्यर्थः, आरम्भकः स्वभावो येषां ते इमे आरम्भकस्वभावाः। नह्यदुष्टाशयोऽशुभे प्रवर्तते इति प्रतीतम्, क्लेशास्तु अप्रवर्तमानमपि[3] प्रवर्तयन्तीति। एवं सङ्ख्यां[4]व्यापाराणां विशेषसंज्ञा गौणी दोषा इति, दोषेष्विति सत्सप्तमी। आरम्भकस्वभावेषु सत्सु किं कर्तव्यम्? तथा प्रवर्तितव्यमिति वर्तते, तथा किं भवतीत्याह—**कुशलानुबन्धमेवेत्यादि**। कुशलं क्षेममनपायं शिवमित्यर्थः। तच्च कुशलकारणत्वात् तदनुबध्नाति, तस्मिन् वाऽनुबन्धोऽस्येति, कुशलप्रयोजनमित्यर्थः। एवावधारणे, कुशलानुबन्धमेव, नाकुशलानुबन्धम्, न वा कुशलाकुशलानुबन्धम्। स्यादित्यधीष्टे लिङ्, एवमधीच्छति कुशलं मे स्यादिति। किं तत् कुशलानुबन्धमिति वक्ष्यमाणमपि समासेनाह—**अनवद्यं** नावद्यमनवद्यमगर्ह्यं कर्म कुशलानुबन्धं भवतीत्यर्थः। यथेति तथापेक्षः, तथा प्रवर्तितव्यम् यथा कुशलानुबन्धं कर्म भवति, कर्मेति विशेष्यं तच्च व्याख्यातमिति तृतीयार्थः॥ ३॥

---

१ 'नो जनोऽभ्यधिकश्चेति' इति क–पाठः। २ 'संहननपरिहाणेन परिहाणेन' इति क–पाठः। ३ 'प्रवर्तमानमपि' इति विशेषः क–पुस्तके। ४ 'सव्यापाराणां' इति क–पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तमपिशब्दविकल्पे षट् पुरुषप्रकृतय इति, काः पुनस्ता इति, एताः अधमतमः[1] अधमः विमध्यमः मध्यमः उत्तम उत्तमोत्तम इति, आसामाचार्यो निरूपणार्थमाह—

कर्माहितमिह चामुत्र, चाधमतमो नरः समारभते ।
इहफलमेव त्वधमो, विमध्यमस्तूभयफलार्थम् ॥ ४ ॥ आर्या

व्या०—**कर्माहितमित्यादि** । अथवा किमन्यदपि कर्मास्ति यतो विशेष्यते कुशलानुबन्धमिति, ओमित्याह चतुर्विधम्, कथमिति, षट् पुरुषाः तेषामाद्यत्रयस्याकुशलानुबन्धं, चतुर्थस्य कुशलाकुशलानुबन्धं, पञ्चमस्य कुशलानुबन्धं, षष्ठस्य तु निरनुबन्धमिति । एषां स्वामी विकल्पमाह—**कर्माहितमित्यादि** । **कर्माहितमिह चामुत्र चाधमतमो नरः समारभते** । अहितमकुशलमित्यर्थः, काहितम् ? इह चामुत्र च, इहलोकपरलोकयोः, इह चेति एवार्थे चशब्दः । आस्तां तावत्परलोके, इहैव तावदिदं जिजीविषुभिरिव विषपानमारभ्यमाणमहितायेति । उत्तरः समुच्चये, इह चामुत्र चेति, अधमतमो जघन्यतमः-पापिष्ठः नरो मनुष्यः । त्रयाणामपि सम्भवे व्यवहारप्रधानत्वादारम्भसमर्थत्वाच्च प्रायः पुरुषनिर्देशः । **समारभते** । समेकीभावे, क्रियायोगाभिविध्योराङ्, सर्वार्पितकरणोपकरणो ह्यहितमारभते, संरम्भसमारम्भारम्भभावस्थाश्च वक्ष्यति, तासामाद्यद्वितीययोस्तावदयमहितानुबन्धी किं पुनस्तृतीयस्यामिति दर्शयति । निदर्शनं त्वस्य मार्गिकमत्स्यबन्धादयः, ते हि सर्वकुत्सितवृत्तयोऽन्त्यावसायिनो विशिष्टजनधिक्कृतजन्मानो रूक्षस्फुटितविकृतशरीराः कृच्छ्रेणापि जिजीविषवः सलिलारण्यपर्वतादिषु परोपघाताय पर्यटन्तः क्षुत्पिपासाशीतोष्णवर्षवातदंशादिसन्निपातदुःखप्रत्यपायमिहैवाप्नुवन्ति, आयुर्भोगानन्तरं चाकुशलकर्मप्रेरिता नरकेषूत्कटदुःखभाविनो भवन्तीत्येवमुभयलोकाहितानुबन्ध्यधमतमः । **इहफलमेव त्वधमः**, इह फलमस्येति इहफलं कर्म, एवावधारणे, इहफलमेव च कर्म नोर्ध्वमिति, तुशब्दो विशेषोपप्रदर्शननिवृत्त्योः, न तदिहफलमेव, अधमस्त्वेवमुपात्तबुद्धिः सन् समारभत इति । परलोकमनोरथं निवर्त्य विशिष्योपदर्शयति । अधमो जघन्यः पापः । निदर्शनं परलोकापवादिप्रभृतयः, ते हि कृच्छ्रावाप्तविषयामिषानुषक्तचेतसो मोहपटलाकुलान्तरात्मानो भोगलवत्यागासहिष्णवो निर्बीजा अपलापित्वादेकाकिनो मा[2] भूष्यन् निष्कुत्सिता इति च सहायान् जिघृक्षवः, कः पुनः परलोकादागतो मूढप्रवादोऽयमेतावदेवेदमिन्द्रियगोचरान्तर्वर्ति वस्तु नोर्ध्वमित्येवमादिभिर्बालिशजनविप्रलम्भनोपायैः परलोकमपोह्यैव ऐहलौकिकेषु पूर्वेभ्यो न्यूनेषु कर्मसु प्रवर्तन्ते । **विमध्यमस्तूभयफलार्थम्**, अप्राप्तो मध्यमावस्थां विमध्यमः । उभयस्मिन् फलं उभयफलं तदस्यार्थो निबन्धनमित्युभयफलार्थं कर्म, उभयफलाय उभयफलार्थं कर्म, समारभते इति करोति । कथमुभयत्रापि फलं भुंजीयेति तुशब्दो विवेचयति । निदर्शनं महाभोगिकृषीवलवणिगा-

१ 'अधमाधमः' इति क-पाठः । २ 'मा भूष्यन् नः कुत्सिता' इति ख-पाठः, 'माभूष्यन् निःकुत्सिता' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दयः । ते हि पुत्रदाराद्यवियोगमिच्छन्तः पूर्वोपात्तविषयापरित्यागेन शेषोपार्जनपरा निसर्गभद्रमनसोऽर्थिजनमनःप्रीणनकृतप्रयत्नाः परलोकफलार्थिनः प्रसिद्धपुण्यद्वारेषु यथाशक्ति स्वमुपयुञ्जते । तदेतत् त्रिविधस्वामिकमपि कर्म संसारबीजोपचयात् सामान्यतोऽकुशलानुबन्धमित्युच्यते ॥ ४ ॥

इदानीं कुशलाकुशलानुबन्धस्वामी—

परलोकहितायैव, प्रवर्तते मध्यमः क्रियासु सदा ।
मोक्षायैव तु घटते, विशिष्टमतिरुत्तमः पुरुषः ॥ ५ ॥ आर्या

व्या०—**परलोकेत्यादि** । परलोकजन्मनः परलोकजन्मने वा हितं परलोकहितं तदर्थं परलोकहिताय, इहलोकाप्रतिबन्धं परलोकैकार्पितमनस्त्वं चैवकारोऽवधारयति । **प्रवर्तते** प्रयतते, समारभत इति वर्तमानेऽपि कर्तृनिर्देशे पुनर्ग्रहणम् । स हि द्वितीयावस्थाप्राप्तः सर्वार्पितकरणोपकरण इत्युक्तम्, अस्य तु तिसृष्वप्यवस्थासु सामान्यतः प्रवर्तत इति व्यपदेश इत्ययं विशेषः । पूर्वोत्तरावस्थामध्ये भवो **मध्यमः क्रियासु सदा,** अयं क्रियाशब्दोऽस्ति भाववचनः—कदाऽस्य क्रिया, अस्ति स्पन्दने-निष्क्रियमाकाशं, अस्ति चिकित्सने,-चतुष्पदी क्रिया, अस्ति न्याय्ये-क्रियावान् ब्राह्मणः इह न्याय्यवचनः न्याय्येषु प्रवर्तत इत्यर्थः । तच्च न्याय्यमिव, सदा सर्वकालं यावज्जीवम् । निदर्शनं तापसादयः, ते हि ग्रामगृहवासभोगान् परित्यज्य वनवासाभिरतयः परलोकार्थिनः शीर्णपर्णमूलकन्दफलाद्याहारिणः अभिषेचनहवनादिषु क्रियासु प्रवर्तन्ते, एतदपि पूर्वोत्तरोत्कृष्टहीनत्वान्मिश्रानुबन्धमित्युच्यते कुशलाकुशलानुबन्धस्वामी । **मोक्षायैव तु घटते विशिष्टमतिरुत्तमः पुरुषः** । मोक्षोऽशेषकर्मवियोगलक्षणो वक्ष्यते तदर्थं मोक्षाय । संसारभोगेष्वेकान्तनिःस्पृहत्वम्, एवकारोऽवधारयति, निवृत्तिविशेषणयोस्तुशब्दः चतुःस्वामिकमप्येतद्ध्रुवानुबन्धं कर्म निवर्तयति, दर्शनमात्रलाभेऽपि मोक्षायैव तु घटत इति विशेषयति । अत एवोक्तं परमार्थालाभेऽपि कुशलानुबन्धायानवद्यकर्मणे यतितव्यमिति, प्रवर्तत इति व्यावृत्तत्वाद्विशेषाच्च घटत इत्युक्तम्, दर्शनमात्रमपि लब्ध्वाऽवाप्तपरमार्थबीजोऽहमवश्यममुक्तमार्गोऽधिगमिष्यामि क्षेममिति शनैः शनैरपि घटत इति विशेषः, चतुष्पुरुषीतो विशिष्टा मतिरस्येति विशिष्टमतिः, उत्तमः प्रधानो विद्वान्नर इति वर्तमानेऽपि पुरुषग्रहणात् पूर्वैरेकान्तभेदविशेषमाह । पुण्यवत्त्वं चास्य दर्शयति, यावदयं न मुच्यते तावत् प्रायो विशिष्टपुरुषवेदादिपुण्यराशिभागी । वक्ष्यति पुरुषवेदादयः पुण्यमिति, निदर्शनं यतिश्रावकादयः, ते हि दर्शनादिलाभानन्तरमेवोदधिसलिलान्तर्वर्तिन इव नौलाभपरितुष्टाः दुष्टपरिचितव्यालाकुलभीमगुहानुशायिन इवावश्यंभावि भयं संसारेऽनुपश्यन्तः सर्वथा शक्तितो वा प्राणातिपातादिविरताः संसारभोगलवनिरभिवाञ्छा यतन्ते,

१ 'व्यसेकप्रयोगानुषङ्ग...'इति क-पाठः, ख-पाठोऽपि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदपि कलमकेदारावसेकप्रायानुषङ्गाभिवर्धितोत्पलवन्निःश्रेयसप्राप्त्यन्तरालदेवादिभवसुखं तदप्यवगणय्यासक्ता मोक्षायैव घटन्त इत्येतत् कुशलानुबन्धमनवद्यं कर्म, अन्यथा निरनुबन्धतुल्य एव स्यात् ततश्च पञ्चैव स्युः, अन्त्यस्य तु चरमत्वान्निरनुबन्धं चरमेष्वपि वक्तृत्वात् तद्विशेषपरिग्रहः ॥ ५ ॥

निरनुबन्धस्वामी, स चायम्—

यस्तु कृतार्थोऽप्युत्तम मवाप्य धर्मं परेभ्य उपदिशति ।
नित्यं स उत्तमेभ्यो-ऽप्युत्तम इति पूज्यतम एव ॥ ६ ॥ आर्या

व्या०—यस्तु कृतार्थ इत्यादि । यः पुरुष इति वर्तते,पुनरर्थे तुशब्दः,यः पुनरिति, कृतोऽर्थोऽनेनेति कृतार्थोऽवाप्तेष्टार्थः । आम्रेडनेऽपिशब्दः, आस्तां तावदस्मदादिरकृतार्थः, कृतार्थोऽपि सन्नित्याचार्यो दर्शयति, उत्तमं प्रधानं मोक्षफलमवाप्याधिगम्य ज्ञात्वा, स चोत्तमः क्षमादिदशलक्षणो वक्ष्यते । सुतलाभादिषु कृतार्थशब्दं व्यभिचरन्तं दृष्ट्वा विशेषणमाह—उत्तममवाप्य, किमुत्तममवाप्य उत्तममर्थ इति वर्तते, अर्थवशाच्च विभक्तिपरिणामः, उच्चैर्गृहाणि देवदत्तस्यामन्त्रयस्वैनमिति, यथा स चोत्तमोऽर्थः सर्वप्रयत्नप्रयोजनं केवलज्ञानं तदवाप्य कृतार्थो भवतीति दर्शयति,एतेनैव धर्मस्योत्तमत्वं व्याख्यातम् । नहि सर्वज्ञोऽन्यथा प्रणयति। **परेभ्य उपदिशति** कृतार्थत्वेऽपि चतुर्थी,वक्ष्यमाणनामकर्मचोदितःतदुपयोगार्थमुपदेशदानकर्मणा परानभिप्रैतीति दर्शयति—**नित्यं स उत्तमेभ्योऽप्युत्तम इति पूज्यतम एव,** नित्यं प्रतिदिनमुपदिशत्याकर्मक्षयात्, अयं ह्यागमः—तीर्थकरः प्रतिदिवसमाद्यां चरमां च पौरुषीं धर्मकथां करोति । नियोगपदादिषु चापेक्षिकमुत्तमत्वं पूज्यतमत्वं च तन्निषेधार्थमाह—नित्यमेवासावुत्तमोत्तमो नित्यं च पूज्यतमो न पर्वकालादिष्विति । स इति यदपेक्षो निर्देशः, उत्तमेभ्योऽनन्तरनिर्दिष्टेभ्योऽन्येभ्यश्च प्रसिद्धेभ्यः उत्तमेभ्योऽपि तावदयमुत्तमः किमुतेतरेभ्यः इत्यपिशब्दो दर्शयति । इति एवमर्थे, एवं च कृत्वाऽयं पूज्यतम एव । एवकारश्चार्थे, उत्तमोत्तमश्चायं पूज्यतमश्चेति, आदरं चावधारयति, सर्वादरेणायं पूज्यतमः ॥ ६ ॥

पञ्चभिरेव गतेऽर्थेऽस्योपन्यासः प्रवचनप्रणेतृत्वादाचार्यश्चोपदेष्टुकामः कृतार्थोऽप्युपदिशति किं पुनरस्मद्विध इत्यसूयाद्वारा उपदेशगौरवं दर्शयति । कः पुनरसाविति प्रयोजनमेवोदाहरणेनाह—

तस्मादर्हति पूजामर्हन्नेवोत्तमोत्तमो लोके ।
देवर्षिनरेन्द्रेभ्यः, पूज्येभ्योऽप्यन्यसत्त्वानाम् ॥ ७ ॥ आर्या

व्या०—तस्मादर्हतीत्यादि । यथा(स्मात्) कृतार्थोऽप्युपदिशति तस्मात् कारणादिति कारणे पञ्चमी, अर्हति भागी योग्यतमः, पूजामर्चनमभीष्टवादिभिरभिगमनं, कोऽसाविति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्दिशति—**अर्हन्नेव**, नान्नः प्रयोजनमुक्तं निरुक्तद्वारेण पूजामर्हतीति, एवावधारणे अयमेवासावुत्तमोत्तमो नान्य इति। लोके, कृत्स्नेऽपि जगति नैकदेशे। कुतः पुनः पूजामर्हतीत्याह—**देवर्षिनरेन्द्रेभ्यः पूज्येभ्योऽप्यन्यसत्त्वानाम्**। देवेभ्य ऋषिभ्यो नरेन्द्रेभ्यः प्रत्येकमिन्द्रशब्दः। पूज्येभ्योऽप्यन्यसत्त्वानामिति माहात्म्यख्यापनमेव, अन्यसत्त्वानां देवादयः पूज्यास्तेभ्योऽप्यर्हति पूजामर्हन्निति। एवं चान्येभ्योऽपि पूजामर्हतीति व्याख्यातमेव, नहि राजनि समुत्तिष्ठति पर्षदुत्थानं प्रति वितर्कः। स तावदर्हतु पूजां, अथ पूजकानां तु कृतार्थमकोपप्रसादमर्चयतां का गुणावाप्तिः? नैवं शङ्क्यम्, दृश्यते हि अग्निरकोपप्रसादोऽपि सेवकानामीप्सितनिर्वृत्तिहेतुः स्यात्। अग्नेरिव दाहाद्यनीप्सितमपि तस्माद् भविष्यतीति, तच्चैवं, दुष्टबुद्धयो ह्यरागद्वेषमप्यग्निमिवान्यायेन सेवमानाः स्वाशयदोषादेव शशिनीव लोष्टुक्षेपमात्मोपघाताय कर्मोपचिन्वन्ति, स्वपरिणामो हि नः प्रवचने प्रधानं कर्मोपचयहेतुरित्युपदेशः, वक्ष्यति च शास्त्रे "प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा" (अ० ७, सू० ८) इत्येवमादिषु ॥ ७ ॥

ननु चात एव ते सुतरामर्चार्हा यदुत निराकृतरागद्वेषमलाः। नहि कलुषमुदकं मलविशुद्धये, यद्येवमुच्यतां तर्हि तदर्चनात् किं हितमवाप्यत इत्याह—

अभ्यर्चनादर्हतां, मनःप्रसादस्ततः समाधिश्च।
तस्मादपि निःश्रेयस-मतो हि तत्पूजनं न्याय्यम् ॥ ८ ॥ आर्या

व्या०—**अभ्यर्चनादर्हतामिति**। अभ्यर्चनात् पूजनात्, अभिगमनस्तुतिवन्दनपर्युपासनादेः, केषाम् अर्हतां, कर्मणि षष्ठी, अर्हन्तोऽभ्यर्च्या इत्यर्थः। किं भवतीत्याह—मनःप्रसादः मनसः प्रसादः, प्रसीदति मनः। न चैतदाशङ्क्यम्, प्राक् पूजनादप्रसन्ने मनसि पूजनप्रवृत्त्यभाव एवेति, भवति हीश्वरानुवृत्त्यादिभिरपि प्रवृत्तिः, सा च लौकान्तिकविधौ वक्ष्यते। पूजनात् ऊर्ध्वं प्रायेण मनसि प्रसादाभिप्रायः, लोकेऽपि ह्यप्रसन्नमनसामपीष्टजनादिसमागमानन्तरं मनःप्रसाद इति प्रतीतम्। ततः किमित्याह—**ततः समाधिश्च**, तस्मान् मनःप्रसादात् समाधिरेकाग्रता निर्विप्लवमनस्त्वं निर्वृतिर्भवति। चशब्दः समुच्चये, समाहितस्य सतः शुश्रूषा, ततः श्रवणं, श्रवणाद् ग्रहणधारणोहापोहाः, ततः संसारतत्त्वाधिगमः, तस्माद्धिताहितप्राप्तिपरिहारावित्येवमादयश्चेति, **तस्मादपि निःश्रेयसं**, तस्मादपि समाध्यादिगुणावाप्तितारतम्यान्निःश्रेयसमधिगम्यत इति। **अतो हि तत्पूजनं न्याय्यम्**, यत इयं कल्याणपरम्परा निःश्रेयसनिष्ठा निर्वर्तते, तत एव तेषां कृतार्थानामपि सतामर्हतां पूजनं न्यायादनपेतमिति सिद्धम्। एवं च कृतार्थत्वेऽपि सुतरामर्हत्पूजनं न्याय्यमिति दर्शितं भवति। अधुना हि सत्त्वाः प्रायोऽलसाः क्लेशादिभीरवः प्रमादिनश्च तेषां शान्ताकारप्रतिमादि दृष्ट्वा द्रव्याद्यपेक्षकर्मोपशमादिलब्धमोहनीयविवरप्रसन्नमनसां प्रायेण तद्वचनश्रवणश्रद्धोपजायते, ततो दर्शनादिलाभ इति। केषांचिच्चाधिगतदर्श-

१ 'अलं शुद्धये' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नानामपि प्रमादिनां प्रतिमादिदर्शनेन तद्वन्दनगुणानुस्मरणात् संवेगादि भवतीति साधूक्तं तत्पूजनं न्याय्यमिति ॥ ८ ॥

गृहीतमेतत्[2], यत् पुनरुक्तं कृतार्थोऽप्युपदिशतीति तद्विरुद्धं, कृतार्थश्चोपदिशति चेति, नहि कश्चिन्निरभिवाञ्छः श्रममादियमाणो दृष्ट इति चोदितः कारणमाह—

तीर्थप्रवर्तनफलं, यत् प्रोक्तं कर्म तीर्थकरनाम ।
तस्योदयात् कृतार्थोऽप्यर्हंस्तीर्थं प्रवर्तयति ॥ ९ ॥ आर्या

व्या०—तीर्थप्रवर्तनेत्यादि । भवसमुद्रं तरन्ति तेन तद्धाऽधिगम्येति तीर्थं, प्रवचनमित्यर्थः, तस्य प्रवर्तनं प्रणयनं, तदस्य कर्मणः फलम्, उपभोगो विपाकः प्रयोजनमिति तीर्थप्रवर्तनफलं, **यत् प्रोक्तं** उपदिष्टं कर्म, कोक्तं, प्रवचने, तत्प्रामाण्याच्च शास्त्रे (अ० ६, सू०२३) वक्ष्यते दर्शनविशुद्ध्यादिहेतुकं कर्माष्टके । कतरत् पुनस्तदित्याह—**तीर्थकरनाम**, तीर्थं करोतीति तीर्थकरः । 'कृञो हेत्वादिषु'(पाणिनिः अ० ३, पा० २, सू० २०) इति हेतौ टः, तीर्थकरस्तीर्थहेतुरित्यर्थः, तस्य नाम, कारणे कार्योपचारः, तीर्थकरनाम कारणं तीर्थकरनाम, यस्मिन्नुपात्ते तीर्थकरोऽयमित्येवं व्यपदिश्यते, **तस्योदयात् कृतार्थोऽप्यर्हंस्तीर्थं प्रवर्तयति**, यत् प्रोक्तं तस्योदयात् तद्विपाकात् कृतार्थोऽप्यर्हंस्तीर्थमित्येतदुक्तनिर्वचनं, प्रवर्तयति प्रणयति उपदिशति करोतीति, तस्य चैतदेव फलमित्युक्तं, न चोपभुञ्जानः पुनरपि वेद्यते इत्याशङ्कितव्यम्, उक्तं हि षष्ठस्य निरनुबन्धं कर्मेति, किंपुनरित्थं दृष्टमित्याह—न किञ्चिदसाधारणोऽयमतिशयः तथापि निदर्शनमात्रमिदम् ॥ ९ ॥

तत्स्वाभाव्यादेव, प्रकाशयति भास्करो यथा लोकम् ।
तीर्थप्रवर्तनाय, प्रवर्तते तीर्थकर एवम् ॥ १० ॥ आर्या

व्या०—तत्स्वाभाव्यादेवेति । तदेव प्रकाशनं स्वभावस्तत्स्वभावः तद्भावस्तत्स्वाभाव्यं प्रकाशमयमित्यर्थः । तस्मादेव कारणात् **प्रकाशयति** अवभासयति, तन्मयत्वमेवास्य प्रकाशने कारणं नान्यदित्येवकारोऽवधारयति । भासः करोतीति भास्करः । यथा, धर्मप्रत्यासत्तौ, लोकं भुवनम् । अत्र च भास्करग्रहणेन तद्विमानसम्प्रत्ययस्तदुपदेशस्तु प्रतीतत्वात् । **तीर्थप्रवर्तनाय प्रवर्तते**, तीर्थकर एव तीर्थमुक्तं तत्प्रवर्तनार्थं, प्रवर्तते प्रभवति तीर्थकर एवं, यथा भास्करः, उभयोरपि स्वभावानुगृहीता निराकाङ्क्षा तन्मात्रफला प्रवृत्तिरित्यर्थः, तदेवं सर्वतीर्थकरोपदेशप्रयोजने[3] व्याख्याते ॥ १० ॥

अधुना यस्य तीर्थे प्रवर्तमाने आचार्यः शास्त्रं प्रकर्तुमिच्छति तं जन्मनः प्रभृति कथयितुकाम इदमाह—

---

१ 'तद्वचनगुणा' इति क-पाठः । २ 'गृहीतं तत्' इति क-पाठः । ३ 'देशप्रयोजन व्याख्यातम्' इति क-पाठः ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

यः शुभकर्मासेवन-भावितभावो भवेष्वनेकेषु ।
जज्ञे ज्ञातेक्ष्वाकुषु-सिद्धार्थनरेन्द्रकुलदीपः ॥ ११ ॥ आर्या

व्या०—यः शुभकर्मेत्यादि । य इत्युद्देशोऽस्मादेकादश्यामार्यायां तस्मै इति निर्देशापेक्षः । शुभं कर्म भूतव्रत्यनुकम्पादानादिहेतुकं दर्शनविशुद्ध्यादिहेतुकं च वक्ष्यते (अ० ६, सू० १३,२३)। तस्यासेवनमभ्यासस्तेन भावितो भावोऽन्तरात्माऽस्येति शुभकर्मासेवनभावितभावः । कियत्कालं, भवेष्वनेकेषु, नैकस्मिन्न द्वयोर्बहुषु । आगमो ह्ययं कान्तारप्रनष्टसाधुमार्गाप्रदर्शनात् सम्यग्दर्शनप्रथमलाभो वर्धमानस्वामिन इति । अन्ते किमित्याह—जज्ञे ज्ञातेत्यादि । जज्ञे जातवान्, क, ज्ञाता नाम क्षत्रियविशेषाः, तेषामपि विशेषसंज्ञा इक्ष्वाकवः, केषु, ज्ञातेष्विक्ष्वाकुषु, तेषामपि बहुत्वात् पितुरस्य विशेषणं सिद्धार्थः, स एव नरेन्द्रः, तस्य कुलं गृहं, तदुपचारात् सन्तानो वा, तस्मिन् दीपनं दीपः, प्रकाशोऽद्भुतं ललामेत्यर्थः । वर्धते हीदं कोशाद्यभिवृद्ध्या वर्धमान इत्यतो दीप इत्युक्तम् ॥ ११ ॥

किंगुणो जातवानित्याह—

ज्ञानैः पूर्वाधिगतै-रप्रतिपतितैर्मतिश्रुताविधिभिः ।
त्रिभिरपि शुद्धैर्युक्तः, शैत्यद्युतिकान्तिभिरिवेन्दुः ॥ १२ ॥ आर्या

व्या०—ज्ञानैरित्यादि । पूर्वमेवाधिगतान्यवाप्तानि पूर्वाधिगतानि ज्ञानानि, तैरप्रतिपतितैरनावृतैः । अप्रतिपतितग्रहणाच्च ज्ञापयति पूर्वतमभवेष्वपि शुभकर्मासेवनादवाप्तान्येवासन्, प्रमादात् तु पुनरावृत्तान्यनन्तरैः पुनरप्रतिपतितैरिति । अत एव प्रागुक्तमस्माभिः कर्मक्लेशेषु न विश्वसितव्यमिति । ज्ञानपञ्चकत्वादाह—मतिश्रुताविधिभिः, तेषामप्येकैकशः शुद्धितारतम्यसङ्ख्यावादाह—त्रिभिरपि शुद्धैर्युक्तः त्रिभिरपीति, विशुद्धिमेव विशेषयति, त्रीण्यपि शुद्धानि नैकं द्वे वेति, अन्यथा त्रिकं कण्ठोक्तमेव । युक्तः, सहितः, सम्पन्नः, युक्तग्रहणात् तु नान्यत् ज्ञानमाशङ्कितव्यम्, उक्तसलिलस्वच्छता(भा)वाप्तिवत्, वक्ष्यते च समाधिः शास्त्रे, किं पुनरित्थमित्याह—शैत्यद्युतिकान्तिभिरिवेन्दुः, युक्त इति वर्तते, यथा हीन्दुः शैत्यादिभिरविरहितः क्षेत्रात् क्षेत्रान्तरं यात्येवमसावपि अप्रतिपतितज्ञानत्रयो देवभवादिहागत इति ॥ १२ ॥

तस्य जातस्य किं स्वरूपमित्याह—

शुभसारसत्त्वसंहन-नवीर्यमाहात्म्यरूपगुणयुक्तः ।
जगति महावीर इति, त्रिदशैर्गुणतः कृताभिख्यः ॥ १३ ॥ आर्या

'सार'शब्दस्यार्थविविधता

व्या०—शुभसारेत्यादि । अयं सारशब्दोऽस्ति तावद् बाहुल्ये, त्वक्सारो वेतसः, अस्ति 'सार'शब्दस्य अर्थविविधता द्रढिम्नि सारकाष्ठः खदिरः, अस्ति परिविस्तरे एतत्सारोऽयं मनुष्यः, अस्ति क्षेपे वाक्सारो भवान्, अस्ति प्राधान्ये सारोऽयमत्र गृहे, अस्ति सुखे अत्रैव वक्ष्यति निःसारः संसार इति, इह तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राधान्ये, सारं प्रधानमिति यावत्, प्राधान्य एव चायं मुख्यः, विविधं प्रयुज्यते तूपचारतः, सत्त्वमवैक्लव्यं, संहननं शरीरदृढिमा, वीर्यमुत्साहः, माहात्म्यं महिमा कलादिप्रावीण्यं, रूपं चावयवसन्निवेशः, गुणा दाक्षिण्यादयः, लोके चाशुभनिबन्धनानामप्येषां प्रायो दर्शनात् प्रत्येकं शुभविशेषणम्, एभिः शुभैर्निर्वृत्तैः हितप्रयोजनैर्युक्तः सम्पन्नः, किन्नामेत्याह—जगतीत्यादि। वीरो विक्रान्तः शूरः महान् वीरः महावीरः, इति एवमर्थे, कृत्स्नेऽपि जगति अयमेको महावीर इति। एवं च कृताभिख्यः। अन्तर्मुहूर्तमात्रेण बाल्यकौमारदशे अभ्यतीत्य[1] अवाप्तयौवनतृतीयदशास्त्रिदशा देवाः, तैर्गुणेभ्यो गुणतो, निमित्ते पञ्चमी, अभिख्यातिरभिख्या कीर्तिर्गौणं[2]नाम कृताभिख्या यस्येति कृताभिख्यः प्रतिष्ठितकीर्तिरिति यावत्, कथं, गुणतः। तदुक्तं हि प्रवचने—पूर्ववैरसङ्गमसुरोपहितकालचक्रादिसन्निपाताग्रधृष्यत्वादिन्द्रादयो वीरनामानमुच्चैरुच्चैरुरिति, गृहनामापि चास्य गौणं तत्कुलदीप इति गतत्वान्न कण्ठोक्तम् ॥ १३ ॥

अथ किं प्राकृतवद्गृहमध्युषितवान्, नेत्याह—

स्वयमेव बुद्धतत्त्वः, सत्त्वहिताभ्युद्यताचलितसत्त्वः।
अभिनन्दितशुभसत्त्वः, सेन्द्रैर्लोकान्तिकैर्देवैः ॥ १४ ॥ आर्या

व्या०—स्वयमेवेत्यादि। स्वयमेवानुपदेशात् अनाचार्यो बुद्धतत्त्वोऽवगतपरमार्थः। उक्तं हि, पूर्वाधिगतज्ञानत्रय इति, बुद्ध्वा तत्त्वं किमवस्थः—सत्त्वहितेत्यादि, सत्त्वहितार्थमभ्युद्यतमचलितं सत्त्वमस्येति सत्त्वहिताभ्युद्यताचलितसत्त्वः बुद्धतत्त्वो ह्येवममन्यत 'अलमनेनानेककटुदुःखसन्निपातप्रतिभयबहुलेन संसारवासेन, मोहदौरात्म्यं हीदं यदिमेऽन्धतमसेऽपि वर्तमानाः सत्त्वा नोद्विजन्ते तदेषां प्रतिबोधनं न्याय्य'मिति, एवमभिध्याय अभिनन्दितशुभसत्त्वः अभिनन्दितमनुमोदितमभिष्टुतमनुबृंहितं सत्त्वमस्याभिनन्दितशुभसत्त्वः, केनाभिनन्दितं, सेन्द्रैर्लोकान्तिकैर्देवैः, सलोकान्तिकैरिन्द्रैरिति प्राप्ते सेन्द्रैरित्युक्तं, लोकान्तिकानामत्र प्राधान्यात्, ते ह्यत्यन्तसम्यग्दृष्टय एतच्छीलाश्च, वक्ष्यति हि लोकान्तिकास्तु सर्व एव सम्यग्दृष्टय इति ॥ १४ ॥

एवमभिसम्बुद्धेन किमनुष्ठितमित्याह—

जन्मजरामरणार्तं, जगदशरणमभिसमीक्ष्य निःसारम्।
स्फीतमपहाय राज्यं, शमाय धीमान् प्रवव्राज ॥ १५ ॥ आर्या

व्या०—जन्मजरेत्यादि। जन्मना जरया मरणेन च आर्तमभिद्रुतमभिभूतमभिग्रस्तं जगत् त्रिभुवनमप्यत्राशरणं अपरित्राणं अभिसमीक्ष्य ज्ञानचक्षुषाऽवलोक्य, निःसारं निस्सुखम-

---

१ 'व्यतीत्य' इति क-पाठः। २ 'गौणं नाम' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रमणीयम् । चतस्रोऽपि हि नरकतिर्यङ्मनुष्यदेवगतयो दाहक्षुदामयाभियोग्यादिदुःखमय्यः, काऽत्र सारवत्तेति अभिसमीक्ष्य किं कृतमित्याह—स्फीतमित्यादि, स्फीतं समृद्धमकण्टकं, अपहाय त्यक्त्वा, राज्यं जनपदं, शमाय धीमान् प्रवव्राज, शमाय मोक्षाय, न परलोकार्थं, उक्तमस्य निरनुबन्धं कर्मेति । धीमानिति, निष्क्रमणानन्तरमेवास्य चतुर्थं मनःपर्यायज्ञानमाविर्बभूव, अन्यथा तूक्तमेव धीमत्त्वं, न चेयं स्वमनीषा । उक्तं हि प्रवचने—चारित्रप्रतिपत्त्यनन्तरमेव प्राक्केवलोत्पत्तेश्चतुर्ज्ञानिनस्तीर्थकराः प्रवव्रजुः ॥ १५ ॥

अतः प्रव्रज्याबहुत्वे कतरामभ्युपेतवान् इत्याह—

प्रतिपद्याशुभशमनं, निःश्रेयससाधनं श्रमणलिङ्गम् ।
कृतसामायिककर्मा, व्रतानि विधिना समारोप्य ॥ १६ ॥ आर्या

व्या०—प्रतिपद्येत्यादि । प्रतिपद्य गृहीत्वा, अशुभकर्मक्षपणोपायभूतं अशुभशमनं, न च पुण्योपादानमन्यभवानाकाङ्क्षत्वात्, अतो निःश्रेयससाधकं मोक्षप्रापकं, किं तत्, श्रमणलिङ्गं श्रमणचिह्नं प्रायः श्रमणत्वगमकं, तच्च स्वकरपञ्चमुष्टयवतारितनिःशेषकेशं अष्टादशशीलाङ्गसहस्रानुष्ठानाभ्युपगतप्रतिज्ञममरोपहितसितैकदुकूलकृतवैकक्ष्यं अत्यन्तसर्वसत्त्वानुद्वेजनमसङ्गपदप्रापकं प्रतिपद्य । अन्येष्वपि च श्रमणलिङ्गोपचाराद्विशेषमार्ययैवाह—**कृतसामायिककर्मा** कृतं सामायिकं कर्मानेन कृतसामायिककर्मा, करोमि भदन्त ! सामायिकं सर्वान् सावद्यान् योगान् प्रत्याचक्षे इत्येवं, न चास्यान्यो भदन्तोऽन्यत्र सिद्धेभ्यः आचार्यं त्वनेन सिद्धान् वा प्रयुक्तम् । व्रतानि विधिना समारोप्य । अयं व्रतशब्दोऽस्ति भोजने पयोव्रत इति, अस्ति निवृत्तौ वृषलान्नं व्रतयति, अस्त्याचारे इदं वः कुलव्रतम्, अस्ति प्रतिज्ञायां स्थण्डिलशायिव्रतो यतिः, इह तु निवृत्तिप्रतिज्ञयोः, हिंसादिनिवृत्तिमातापनादिप्रतिज्ञां चाभ्युपगम्य, तानि व्रतान्यहिंसादीनि वक्ष्यन्ते । विधिना वक्ष्यमाणानुपूर्व्या, आचारव्यवस्थार्थमत एव व्रतानीत्युक्तं, इतरथा हि वक्ष्यमाणसूत्रीनिर्देशाद् व्रतमिति ब्रूयात् । चातुर्यामिकनिवृत्त्यर्थं च व्रतग्रहणम्, आगमो ह्ययमाद्यन्तयोस्तीर्थकरयोः सत्त्वाशयापेक्षया पञ्चमहाव्रतो धर्म इति । समारोप्यात्मस्थानि कृत्वा, किं प्रवव्राजेति वर्तते । यथा हि नाम राजा हस्त्यादिबलयुक्तोऽरीन् निहत्य राज्यं प्राप्नुयादेवमस्य मुख्या प्रवृत्तिरिति ॥ १६ ॥

'व्रत'शब्दस्यार्थवैविध्यम्

सम्यक्त्वज्ञानचारि–त्रसंवरतपः समाधिबलयुक्तः ।
मोहादीनि निहत्या–शुभानि चत्वारि कर्माणि ॥ १७ ॥ आर्या

व्या०—सम्यक्त्वेत्यादि । सर्वे इमे धर्माः सकलशास्त्रार्थनिबन्धना वक्ष्यमाणास्तथापि तस्य विशेष उच्यते, सम्यक्त्वं क्षायिकं, ज्ञानं केवलादृते, चारित्रं छेदोपस्थाप्यपरिहारविशुद्धि-

१—मुद्वेगजननसङ्ग—' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्जं, एते ह्यतिचारवशेन भवतः, निरतिचारश्चायं शेषत्रयं त्ववस्थाविशेषवशेन सम्भवेत्। संवरो निरुद्धसर्वाश्रवत्वात् कृत्स्नः । तपो बाह्यं षड्विधमपि, अन्तस्तपस्तु विनयव्युत्सर्गे यथासम्भवम् । ध्यानं तु प्रधानकर्मक्षयकारणत्वात् समाधिरिति कण्ठोक्तमेव । अनेन बलेन युक्तः । मोहादीत्यादि, मोहज्ञानदर्शनावरणान्तरायान्निहत्य प्रक्षपय्य, अशुभानि, गतार्थत्वेऽप्यशुभग्रहणमन्यकर्मभ्योऽशुभतरतमख्यापनार्थं, चत्वारि कर्माणीतिव्युत्क्रान्त्यानुपूर्व्या केवलोत्पत्तिसूत्रसम्बन्धसङ्ख्याख्याज्ञापनार्थमुक्तम्, ते हि चत्वारोऽपि संसारदुःखप्रतिभयप्रदाः शत्रवः ॥ १७ ॥

किं फलमित्याह—

केवलमधिगम्य विभुः, स्वयमेव ज्ञानदर्शनमनन्तम् ।
लोकहिताय कृतार्थो–ऽपि देशयामास तीर्थमिदम् ॥ १८ ॥ आर्या

व्या०—केवलमित्यादि । केवलममिश्रमसाधारणमधिगम्य प्राप्य, विभवीति विभुः सर्वगतज्ञानात्मेत्यर्थः । स्वयमेव स्वशक्त्यैव, न राजेव सामन्तादिमिश्रः । किं तत्, केवलं ज्ञानं दर्शनं च वक्ष्यमाणम्, अनन्तं न क्वचित्प्रतिहतं सर्वत्रगमत एव विभुरित्युक्तम्। अधिगम्य किं कृतमित्याह—लोकहितायेत्यादि, सर्वमेतद्गतार्थम्, इदमिति यदेवेदमधुना प्रवर्तते ॥१८॥

कियत् पुनस्तदित्याह—

द्विविधमनेकद्वादश–विधमहाविषयममितगमयुक्तम् ।
संसारार्णवपारग–मनाय दुःखक्षयायालम् ॥ १९ ॥ आर्या

व्या०—द्विविधमित्यादि । वक्ष्यमाणमेतन्महाविषयं सर्वद्रव्याण्यसर्वपर्यायाणि त्रैकाल्यमस्येति । अमितगमयुक्तं, गमाः पन्थानो नयाः वक्ष्यमाणास्तैरसङ्ख्येयैर्युक्तमभिसन्ततम् । कियद्गुणमित्याह–संसारेत्यादि, संसृतिः संसारः, संसरणं वा संसारः, स नामादिश्चतुर्विधो वक्ष्यते, स एव अर्णवः संसारार्णवः । कथं चासावर्णवः, नरकतिर्यग्मनुष्यामरगतिचतुष्टयदुस्तरविपुलपात्रः । प्रियाप्रियविरहसम्प्रयोगक्षुदभिघातादिसन्निपातप्रतिभयानेकदुःखागाधसलिलः परोपघातिक्रूरानार्यजनानेकमकरविचरितविषमः मोहमहानिलप्रेरणाध्मायमानगम्भीरभीषणप्रमादपातालः नरकादिविकृतभीमवडवामुखग्रस्यमानानेकपापकर्मसत्त्वः रागद्वेषप्रबलानिलोद्धतसंजायमानवीचीप्रसृताशयवेलः तदेवमस्य भगवन्तो यतयो द्वादशाङ्गविपुलशरीरं सम्यग्दर्शनायोपबद्धसन्धिः प्राणिदयादिव्रतसम्पन्नकनिरुद्धाश्रवद्वारं सन्तोषमितस्वादूदकाद्युपहितपावनं विशुद्धज्ञानसन्निहितनिर्यामकं सकलचारित्रविधानानुकूलपवनप्रेरितं विशुद्धध्यानबलोपहितसर्वमङ्गलरक्षं प्रवचनयानपात्रमारुह्य संसारार्णवस्य पारप्राप्तिफलं शिवमक्षयमनामयं मोक्षमवाप्नुवन्तीत्येवमेतत् अलं पर्याप्तं संसारार्णवपारगमनायेत्युच्यते. अत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एव तरन्त्यनेन तद्वाधिगम्येति तीर्थमित्युक्तं, अन्येऽपि पृथिवीकायिकादयः सत्त्वाः संसारस्य लोकस्य कर्मप्रेरिताः पारं गच्छन्तीति ज्ञापनार्थं दुःखक्षयायालमिति विशेषितम् ॥ १९ ॥

किमस्य माहात्म्यमित्याह—

ग्रन्थार्थवचनपटुभिः, प्रयत्नवद्भिरपि वादिभिर्निपुणैः।
अनभिभवनीयमन्यै-र्भास्कर इव सर्वतेजोभिः ॥ २० ॥ आर्या

व्या०—ग्रन्थार्थेत्यादि। प्रत्येकं पटुशब्दः, सन्ति हि केचित् यथाऽधीतग्रन्थपटवो नार्थपटवः, केचिच्चानधीतग्रन्था अप्यर्थपटवः, केचिदप्यनधिगतग्रन्थार्था अपि स्वविकल्पितवचनपटव इत्यतो विशेषयति त्रिष्वपि ये पटवः। एवंविधा अपि केचिदुदासीना भवन्तीत्याह। प्रयत्नवद्भिरपि विजगीषोद्यतैः, वादिभिर्निपुणैः न्यायकुशलैः, अनभिभवनीयमन्यैरधृष्यमन्यैर्वादिभिरन्यैस्तीर्थिकैः। किमिव, भास्कर इव सर्वतेजोभिः। भास्कर इव मणिप्रदीपादिभिः सर्वतेजोभिरनभिभवनीयः इदं तीर्थं देशयामास ॥ २० ॥

'पटु'शब्दस्यार्थनानात्वम्

किमर्थं पुनरयमुपन्यास इत्याह—

कृत्वा त्रिकरणशुद्धं, तस्मै परमर्षये नमस्कारम्।
पूज्यतमाय भगवते, वीराय विलीनमोहाय ॥ २१ ॥ आर्या
तत्त्वार्थाधिगमाख्यं, बह्वर्थं सङ्ग्रहं लघुग्रन्थम्।
वक्ष्यामि शिष्यहितमिम—मर्हद्वचनैकदेशस्य ॥ २२ ॥"—युग्मम्[1]

व्या०—कृत्वेत्यादि। कायवाङ्मनांसि त्रीणि करणानि, तैः शुद्धं अकलङ्कं, शुद्धानि वा त्रीणि करणान्यस्मिन्निति त्रिकरणशुद्धम्। शारङ्गजग्ध्यादिज्ञापकात् तु निष्ठापरनिपातः। तस्मै इति यः शुभकर्मासेवन इत्युक्तं सम्बध्यते परमर्षये नमस्कारं कृत्वेति वर्तते, पूज्येत्यादि, पूज्यतमाय भगवते, गतमभिदेवादिभ्योऽपि नमस्कारमर्हति किमुत मत्त इति स्मारयति। भजनं भजन्ते वा तमिति भगः श्रीरित्यर्थः, सा च सर्वातिशयमयी वर्णिता वक्ष्यति च, सोऽस्यास्तीति भगवान् तस्मै भगवते। **वीराय विलीनमोहाय**, गतमप्याचार्यः परमभक्त्याविर्भावितचेताः पुनः पुनः कण्ठोक्तं नाम करोति, अथवा स्वयमेव बुद्धतत्त्व इत्यतः प्रभृति सामान्यतीर्थकरलक्षणसद्भावात् तद्वचनसञ्जिघृक्षुर्विशिष्य वीरायेत्याह। न च मन्तव्यमिदमिति वर्तमानतीर्थप्रणेतृत्वाद्विशेषितमिति, तदपि हि सामान्यार्थमेवातीता अपि इदमेव द्वादशाङ्गं देशयामासुः तथा अनागता देशयिष्यन्ति अवस्थितत्वादर्थानां अन्यथा केवलज्ञानहीनोक्त-

1 युग्मस्य लक्षणम्—

"द्वाभ्यां युग्ममिति प्रोक्तं, त्रिभिः श्लोकैर्विशेषकम्।
कलापकं चतुर्भिः स्यात्, तदूर्ध्वं कुलकं स्मृतम्॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ष्टताप्रसङ्गः स्यात्। न चेयं स्वमनीषिका। उक्तं हि प्रवचने, इत्येतद् द्वादशाङ्गं गणिपिटकं न कदाचिन्नासीन्न कदाचिन्न भवति न कदाचिन्न भविष्यति बभूव भवति भविष्यति चेति। विलीनमोहाय ध्वस्तसंसारबीजायेत्यर्थः ॥ २१ ॥ कृत्वोत्तरकालं किमाह—

व्या०—तत्त्वार्थेत्यादि। तत्त्वार्थोऽधिगम्यतेऽनेनास्मिन् वेति तत्त्वार्थाधिगमः इयमेवास्य गौण्याख्या नामेति तत्त्वार्थाधिगमाख्यस्तं, बह्वर्थं स च बह्वर्थः बहुर्विपुलोऽर्थोऽस्येति बह्वर्थः सप्तपदार्थनिर्णय एतावांश्च ज्ञेयविषयः। सङ्ग्रहं समासं, लघुग्रन्थं श्लोकशतद्वयमात्रं, वक्ष्यामीति वचोरूपं, अन्यथा हि ब्रूतेः क्रियाफललक्षणमात्मनेपदं स्यात्। शिष्यहितमल्पग्रन्थं ह्यलसा अप्यधीयन्ते, अधुना हि कालपरिहाणेरलसत्वात् सत्त्वानामशक्यः सकलप्रवचनाधिगमस्तदनधिगमे च दीर्घः संसारः तस्मादिममल्पग्रन्थं सङ्ग्रहमधीत्य बीजमात्रमपि तावल्लभन्तां शिष्या इत्यतः शिष्यहितं वक्ष्यामीति अभिप्रायः। इममिति, अनन्तरमेव वक्ष्यामीति। कस्य सङ्ग्रहमित्याह—**अर्हद्वचनैकदेशस्य**, अर्हतामर्हद्भ्यो वा वचनं द्वादशाङ्गं गणिपिटकं तस्याप्येकदेशस्य सङ्ग्रहं वक्ष्यामि न सर्वस्य महत्त्वादित्यर्थः ॥ २२ ॥

एवं तीर्थमहिमाक्षिप्तबुद्धिराचार्यशक्तिमसम्भावयन्नाचार्यदेशीयः प्राह—

महतोऽतिमहाविषय-स्य दुर्गमग्रन्थभाष्यपारस्य।
कः शक्तः प्रत्यासं-जिनवचनमहोदधेः कर्तुम् ॥ २३ ॥ आर्या

व्या०—**महत** इत्यादि। अयं महच्छब्दोऽस्ति प्रायः प्रांशुत्वे महावृक्षः, अस्ति वैपुल्ये महोदधिः, अस्ति पूजने महापुरुषः, अस्ति भूयस्त्वे महौजा आदित्यः, अस्ति प्राधान्ये महादेवः, अस्ति संज्ञायां महाजनः, अस्ति प्रशस्ये महोदयो भूयाः, इह तु भूयस्त्वे, बहुग्रन्थविषयस्येति, प्राधान्यपूजितत्वे तूक्ते, एवं वैपुल्यमपि महोदधेरेव वक्ष्यति। दुर्गमग्रन्थभाष्यपारस्य, दुर्गमो ग्रन्थभाष्ययोः पारो निष्ठाऽस्येति दुर्गमग्रन्थभाष्यपारः। तत्रानुपूर्व्या पदवाक्यसन्निवेशो ग्रन्थः, तस्य महत्त्वादध्ययनमात्रेणापि दुर्गमः पारः, तस्यैवार्थविवरणं भाष्यं, तस्यापि नयवादानुगमत्वादलब्धपारः, अयं ह्यागमः सर्वशक्त्यन्वितेन महतापि पुरुषेण सकलप्रवचनार्थः अशक्यो व्यावर्णयितुमिति। तदित्थमस्य कः शक्त इत्यादि, अयं किंशब्दोऽस्ति क्षेपे किंसखा योऽभिद्रुह्यति, अस्ति प्रश्ने किं ते प्रियं, अस्ति निवारणे किं ते रुदितेन, अस्त्यपलापे किं तेऽहं धारयामि, अस्त्यनुनये किं तेऽहं करोमि, अस्त्यवज्ञाने कस्त्वामुल्लापयते, इह त्वपलापे, नास्त्यसौ योऽस्य जिनवचनमहोदधेः प्रत्यासं कर्तुं समर्थ इत्यभिप्रायः ॥ २३ ॥

'महत्'शब्दस्यानेकार्थाः

'किं'शब्दस्य विविधार्थाः

यश्चैतत्प्रधारयेदसाविदमप्यध्यवस्येदित्याह—

शिरसा गिरिं बिभित्से-दुच्चिप्सेच्च स क्षितिं दोर्भ्याम्।
प्रतितीर्षेच्च समुद्रं, मित्सेच्च पुनः कुशाग्रेण ॥ २४ ॥ आर्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्योम्नीन्दुं चिक्रमिषेन्, मेरुगिरिं पाणिना चिकम्पयिषेत् ।
गत्याऽनिलं जिगीषे-च्चरमसमुद्रं पिपासेच्च ॥ २५ ॥ आर्या

किञ्च,

खद्योतकप्रभाभिः, सोऽभिबुभूषेच्च भास्करं मोहात् ।
योऽतिमहाग्रन्थार्थं, जिनवचनं संजिघृक्षेत ॥२६॥ "—विशेषकम्

व्या०—शिरसेत्यादि । भेत्तुमिच्छेत्, उच्चिक्षिप्सेच्च स क्षितिं दोर्भ्यां, तमेव गिरिं सह क्षित्योत्क्षेप्तुमिच्छेत्, दोर्भ्यां बाहुभ्यां, प्रतितीर्षेच्च समुद्रम् तरीतुमिच्छेत्, दोर्भ्यामिति वर्तते, मित्सेच्च पुनः कुशाग्रेण, तमेव समुद्रमुदबिन्दुपरिमाणाधिगमाय कुशाग्रेण मातुमिच्छेत् ॥२४॥

व्या०—खद्योतकेत्यादि । खद्योतकैर्भास्करमभिभवामीति भास्करोऽहमित्येवमिच्छेत्, मोहात् मूढो निरर्थकमुन्मत्तोऽनात्मज्ञः, मोहादिति च गिरिभेदादिषु सर्वत्र सम्बध्यते, योऽतीत्यादि, अतिमहाग्रन्थार्थं जिनवचनं यः संग्रहीतुमिच्छति स इदं प्रक्रान्तं सर्वमध्यवस्येदित्यर्थः ॥ २६ ॥

एवं चोदित आचार्यः सर्वमेतदेवमित्यनुज्ञापवादमाह—

एकमपि तु जिनवचनाद्, यस्मान् निर्वाहकं पदं भवति ।
श्रूयन्ते चानन्ताः, सामायिकमात्रपदसिद्धाः ॥ २७ ॥ आर्या

व्या०—एकमपीत्यादि । एकमपि पदं, किं पुनरियान् सप्तपदार्थसंग्रह इति तुशब्दो विशेषयति, जिनवचनादित्यवच्छेदे पञ्चमी, यथा समूहाच्छुक्लं प्रकाशते । यस्मादिति कारणे पञ्चमी । यस्मात् कारणान्निर्वाहकं सुगृहीतमप्यभ्यस्यमानमुत्तरोत्तरज्ञानकारणत्वाद् भवोत्तारकमित्यर्थः । न चेयं स्वमनीषिका इत्याह, श्रूयन्ते इत्यादि, श्रूयन्ते चानन्ता इति चशब्दः समुच्चये, बीजलाभात् तदविनाशादुत्तरोत्तरवृद्धिसम्भवोऽवसीयते । श्रूयन्ते चेत्यभिप्रायमात्राऽवधारणे, एवं श्रूयन्ते प्रवचने-'करोमि भदन्त ! सामायिकमित्येतावतैव पदेन भावतः सुगृहीतेनानन्तकालेन अनन्ताः सिद्धा' इत्युक्तं प्रवचने, उदाहरणमात्रं तुषमाषैः स्वाध्याय इति ॥२७॥

यस्माच्चैवमागमो निर्वाहकमिति चावसीयते—

तस्मात् तत्प्रामाण्यात्, समासतो व्यासतश्च जिनवचनम् ।
श्रेय इति निर्विचारं, ग्राह्यं धार्यं च वाच्यं च ॥ २८ ॥ आर्या

व्या०—तस्मादित्यादि । तस्मादागमप्रामाण्यात्, समासतः संक्षेपेण, व्यासतो विस्तरेण, यथाशक्त्याऽध्येयं जिनवचनं, न पुनरवमन्तव्यमिति दर्शयति, श्रेय इति, इदमेव हि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रेयो नान्यदिति, निर्गतविचारं निःशङ्कमित्यर्थः । ग्राह्यमध्ययनश्रवणाभ्यां, धार्यमनुप्रेक्षणादिभिः, वाच्यमर्थविचारणादिभिः । ग्रहणधारणे तावदात्मोपकारिणी ॥ २८ ॥

किं पुनर्वाचनयेति चोदितेऽध्यापनस्यैव गौरवख्यापनार्थं आत्मप्रयत्नदृढीकरणार्थं चाह—

न भवति धर्मः श्रोतुः, सर्वस्यैकान्ततो हितश्रवणात् ।
ब्रुवतोऽनुग्रहबुद्धया, वक्तुस्त्वेकान्ततो भवति ॥ २९ ॥ आर्या

व्या०—**न भवतीत्यादि** । श्रोता हि कदाचिदन्यमनस्को दुष्टान्तरात्मा वा शृणुयाद्, एवंविधस्य श्रोतुर्न हितश्रवणमात्रादेवैकान्तेन धर्मोऽस्तीति दर्शयति । हितग्रहणमात्रेडनार्थं, हितमपि तावत् शृण्वतां न सर्वेषां धर्मः किं पुनरहितमिति । ब्रुवत इत्यादि, वक्ता हि यदा स्तुतिमानलाभादिनिरीहः कथमभी श्रोतारोऽनुगृहीताः प्रतिबुध्येरन्नित्यवाप्तबुद्धिर्हितमुपदिशति तदाऽस्यैकान्ततो भवति धर्मः । एवं च कृत्वा स्वपरिणामो नः प्रवचनेषु शुभाशुभोपचयं प्रति परं प्रमाणमिति दर्शितम् । न चात्रात्मनेपदाशङ्का, निराकृतं हि स्तुत्यादिक्रियाफलं, निरनुबन्धाभिप्रायात्, न च धर्मोऽप्यभिप्रेतः, अवश्यंभावी त्वसावित्युक्तः ॥ २९ ॥

एवं निश्चित्याह—

श्रममविचिन्त्यात्मगतं, तस्माच्छ्रेयः सदोपदेष्टव्यम् ।
आत्मानं च परं च (हि), हितोपदेष्टाऽनुगृह्णाति ॥ ३० ॥ आर्या

व्या०—**श्रममित्यादि** । यो हृदयशोषादिरात्मगतः श्रमस्तमविगणय्य-नैतन्मम दुःखमिहैव चैतत्सुपयुक्तं शरीरमिति परिचिन्त्योपदेष्टव्यं, तस्मादिति प्रक्रान्तप्रयोजनमुपसंहृत्य निश्चिनोति, अयं विनिश्चयो यदुत श्रेयो मोक्षमार्गः सर्वकालमुपदेष्टव्यः, न पुनरश्रेयः सावद्यमिथ्याश्रुतमात्मपरोपघातीति । इदं च पुनः श्रेयस उपदेशप्रयोजनं निर्धार्य आह, आत्मानमित्यादि, यदयं श्रुत्वा पापेभ्यो निवृत्त्य हितेषु प्रवर्तमानः कल्याणभागी भवति स तत्रोपदेष्टा हेतुरित्युभावपि हितोपदेशेनानुगृह्येते इति ॥ ३० ॥

विद्याशिल्पकलाद्युपदेशेष्वपि हितबुद्धिस्तदर्थिनामित्यादिनिराकरणार्थमाह—

नर्ते च मोक्षमार्गाद्, हितोपदेशोऽस्ति जगति कृत्स्नेऽस्मिन् ।
तस्मात् परमिदमेवे-ति मोक्षमार्गं प्रवक्ष्यामि ॥ ३१ ॥ आर्या

व्या०—**नर्ते चेत्यादि** । विगतद्वन्द्वसन्निपाताव्ययपदप्रापणहेतोर्मोक्षमार्गादृते नान्यो हितोपदेशः कृत्स्नेऽप्यस्मिन् जगति विद्यते । ये त्वन्ये रागबुद्धिविकल्पवशेन हितोपदेशत्वेन गृहीतास्ते भवबीजानुबन्धित्वाद्धितोपदेशाभासा अपि न भवन्ति, कुतो हितोपदेशाः ? । यतश्चैवं, तस्मादित्यादि, तस्मादित्युपसंहरति । परमुत्कृष्टं इदमेव हि हितोपदेशम्, अनन्तरं मोक्षमार्गः, इति एवमर्थे, एवं निर्धार्य वक्ष्यामि, समाप्तौ वा, अलमतिप्रसङ्गेन ॥ अधुनोपन्यासप्रयोजनं-मोक्षस्य मार्गं आदौ वक्ष्यामि प्रवक्ष्यामीति । एतावत्य एता आर्याश्चात्र नामि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लिखिताः तासु न श्रमोऽभिशङ्क्यः, प्रसङ्गभयात् प्रायो निगदोक्तार्थत्वाच्च न विमर्दः । अतः परं शास्त्रं भवतीति ॥ ३१ ॥

इतीयं कारिकाटीका, शास्त्रटीकां चिकीर्षुणा ।
सन्दब्धा देवगुप्तेन, प्रीतिधर्मार्थिना सता ॥ अनुष्टुप्

श्रीवर्द्धमानस्वामिने नमः ।

अथ श्रीसिद्धसेनगणिप्रणीता द्वितीया टीका प्रारभ्यते ।

अवतरणम्—

जैनेन्द्रशासनसमुद्रमनन्तरत्न–मालोडय भव्यजनतोषविधायि येन ।
रत्नत्रयं गुरु समुद्धृतमिद्धबुद्ध्या, तत्त्वार्थसङ्ग्रहकृते प्रणमामि तस्मै ॥१॥ वसन्ततिलका[1]
स एव धीपो[2] विधुरां धियं मे, नयप्रमाणादिविचारनीतौ ।
पटुं विधत्तां व्यसनावमग्ने, कुर्वन्ति सन्तः करुणामवश्यम् ॥ २ ॥ उपजाति[3]ः
सङ्क्षिप्तविस्तीर्णरुचिप्रबोधैः, पूर्वैर्मुनीशैर्विवृतेऽपि शास्त्रे ।
यातुं पथा वाञ्छति मध्यमेन, बुद्धिर्मदीया परिपेलवापि ॥ ३ ॥ इन्द्रवज्रा
उक्तं जिनेन्द्रैर्जगदेकनाथैः, सर्वं नयद्वैतमतानुसारि ।
ज्ञेयस्वरूपं प्रविभज्य सम्यक्, संयोजनं केवलमेव चिन्त्यम् ॥ ४ ॥"
विमुक्तिमार्गे मुनिनाथदेशिते, व्यधायि मौढ्याद् यदसाम्प्रतं मया ।
तितिक्षतां तत् सुजनः समाधिना, विलोक्य रन्ध्रैषितया विना कृतः ॥ ५ ॥ उपेन्द्रवज्रा

मोक्षमार्गोपदेशः श्रेयान् परिनिर्वाणस्य पुरुषार्थप्राधान्यात्, दुःखोद्वेगाद्धि जीवलोकः सुखप्रेप्सया च क्लेशार्तिहेतून् परिजिहीर्षन् सुखानन्दनिमित्तोपादित्सया च सर्वक्रियासु प्रवर्तते । सुखदुःखप्राप्त्यभावश्च लोके तन्त्रान्तरेषु च सन्निकृष्टकारणभावोऽभीप्स्यते धर्मस्यार्थकामयोश्च । सुखं हि द्विविधं वैषयिकभेदान्निर्वाणप्राप्तिलब्धात्मस्थसुखभेदाच्च, तत्र यन्मौक्षं सुखं तदात्यन्तिकमैकान्तिकमनतिशयमनाबाधकं केवलं निराबाधं स्वाधीनं च, शश्वदप्रतिपातादात्यन्तिकं, व्यतिकीर्णसुखदुःखहेतुभावार्थान्तरानपेक्षत्वादैकान्तिकम्, प्रकर्षकाष्ठावस्थानादनुत्तरत्वादनतिशयम्, प्राण्युपमर्दनजलौकिकसौख्यवैपरी-

---

१ वसन्ततिलका–लक्षणम्—
" उक्ता **वसन्ततिलका** तभजा जगौ गः" ।

२ 'धीरो विकलां' इति क-पाठः ।

३ उपजाति–लक्षणम्—
" स्यादिन्द्रवज्रा यदि तौ जगौ गः, **उपेन्द्रवज्रा** जतजास्ततो गौ ।
अनन्तरोदीरितलक्ष्मभाजौ, पादौ यदीयावुपजातयस्ताः " ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यादनाबाधकम्, सर्वद्वन्द्वस्पर्शविषयातिक्रमाद् दुःखलेशाकलङ्कितं केवलम्, निष्प्रतिद्वन्द्वमिति निराबाधम्, आत्मतादात्म्याविर्भावान्मनोज्ञविषयसंसर्गायत्ता नोत्पत्तिरस्येति स्वाधीनमिति । तच्चैतच्चैतन्यवीर्यप्रशमादिगुणतत्त्वस्यात्मनः संसर्गप्रतिबन्धोपरागविगमात् पुनर्भवप्रबन्धोच्छेदात् दुःखानामत्यन्तनिवृत्तेः ज्ञानादिस्वतत्त्वावस्थाननिःश्रेयसावाप्तेरधिगम्यत इति तत्साधनशासनमुख्यप्रयोजनः कृत्स्न उपदेशः परमर्षेः, तदनुषङ्गतः शेषव्याख्यानात्, अतश्च मुख्यपुरुषार्थसाधनसाध्याव्यभिचारशासनाच्छास्त्रमेतत्, विषयर्द्धिसंयोगसमुत्थस्य तु सुखस्यात्यन्तिकादिविपरीतविशेषणानुगतत्वात् दुःखोत्तरत्वात् दुःखप्रतिकारमात्रत्वाच्च, तदर्थं शास्त्रमशास्त्रं स्यात्, तदुपायोपदेशविधिमन्तरेणापि तत्सिद्ध्युपपत्तेश्चेति, अभ्युदयप्राप्त्युत्सवफलो धर्मः प्रतिषेध्यपक्षक्षिप्तः प्रतिमन्तव्यः, अर्थकामौ च, यस्माच्चैते दुःखाभावार्थिनां नात्यन्ताभावहेतवः तस्माद्भ्युदयफलधर्मार्थकामोपदेशो न हितोपदेश इति सर्वेणापि तदर्थः प्रयासो नास्थेय इत्यर्थः । सर्वस्यास्य विषयसुखर्द्धिफलत्वात् तद्दोषदुष्टत्वादिति, परमर्षेः प्रवक्तुर्निसर्गादेव लोकानुग्रहकारितायां प्राणिनां च हिताहितविभागोपदेशविशिष्टानुग्रहहेत्वभावान्निःश्रेयसावाप्तिहेतूपदेशप्रवृत्त्युपपत्तेः, सदाचार्ययुक्तितो हिताहितप्राप्तिपरिहारार्थिनां च कामादिषु दोषदर्शनान्निःश्रेयसार्थित्वान्निःश्रेयसमार्गोपदेशः शास्त्रे प्रवर्तते इत्ययं शास्त्रप्रवृत्तिहेतुकृतः शास्त्रसम्बन्धः । स चायं भाष्यकारिकाभिः प्रकाश्यते—पुरुषार्थसिद्धिं प्रत्यागूर्णानां हिताहितप्राप्तिपरिहारार्थिनां विधेयप्रतिषेध्यविवेकप्रदर्शनार्थं हि कारिकाद्वयमाद्यम्। परमकार्यमभीप्सद्भिः प्रधानपुरुषार्थप्राप्तिकाङ्क्षिभिः परहितप्रेप्सुभिर्निःश्रेयसार्थिभिरित्यर्थः । परमनिर्वृतेरग्र्यत्वात् तत्सिद्धियोग्यताऽप्रतिघसामर्थ्यादेवंप्रकारसाधनगुणसमग्रैर्भाव्यम्, अर्थापास्ततद्विपरीतार्थतत्साधनपरिहारिभिश्चेति अतो विधेयोऽर्थः । कर्मक्लेशानामत्यन्ताभावादनवरताप्रतिपाति मुक्तिसुखं, सम्यग्दर्शनादीनि तत्साधनानि च, अर्थाद् व्युदसनीयः संसारसुखाभिलाषः तत्सुखसाधनानि च, तस्मान्निःश्रेयसावाप्तये यतितव्यम्, तत्सिद्धिसमर्थं च साधनमारोग्यस्येव चिकित्सा सम्यक्श्रद्धानज्ञानसंवरतपांसीति, नृसुरैश्वर्यसुखतत्साधनार्थं च न यतितव्यमिति । यतश्चैवं सम्यग्दर्शनज्ञानतपोगुणसामग्रीयोगयुक्तस्य द्रव्यक्षेत्रकालभावप्रभेदसंसारमहादुःखप्रपञ्चापातमहाभयहेतूनां कात्स्न्र्येन प्रक्षयादात्यन्तिकी दुःखनिवृत्तिर्निष्प्रतिद्वन्द्वाप्रतिपातिपरमसुखलाभश्चोपपद्यते, तस्मादुक्तं "**तेन सुलब्धं भवति जन्म**" (१) इति । कर्मक्लेशा इति च, दुःखानां नैमित्तिकत्वाद् भवेन्निवृत्तिरिति, अनपेक्षपरिणामत्वात् स्वभावत्वे हि नापव्रज्येरन् क्लेशाः, प्राक्तनं तु कर्मक्लेशविशेषणं, न प्रधानेश्वरादिकृताः कर्मक्लेशा इति । एवं क्रियान्तरप्रसिद्धिप्रवृत्तिः क्रियान्तरप्रसिद्धिनिवृत्तिश्च कृता, तस्मादित्थमुक्तं भगवता, " सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः " (१, १) इति (१, २)। नन्वेवमप्रश्वासः कश्चित्, इह हि सम्यग्दर्शनादियुक्तो मुमुक्षुस्तदर्थं सम्यगीहमानोऽपि निःश्रेयसमनवाप्योपरमेत स इदानीं नृसुरसुखप्रतिषेधाद् विफलप्रयासः स्यात्, दृश्यते हि प्रश्वासः

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

प्रधानकार्यसिद्धिश्च, यथा इतोऽष्टयोजन्यामुज्जयिनी वर्तते तामेकेनाह्ना गच्छ परेण निवर्तेथाः यदि चैकेनाह्ना न प्राप्नुयास्ततोऽमुकस्मिन् ग्रामे सुखमुषित्वा श्वः प्रवेष्टासि[1] तूर्णं चागच्छेरित्येतस्माद् वाक्याद् गन्ता प्रश्वस्तः सन् न गमने विरसीभवति, पूर्वस्मात् तु व्याहन्यते, एवं नृसुरैश्वर्यर्द्धिनिरपेक्ष उपदेशोऽप्रश्वासाय स्यादिति, ततः प्रश्वासार्थमुच्यते "**परमार्थालाभे वा**" (३) इत्यादि । जन्मान्तरसञ्चितानां हि कर्मणां बन्धनिकाचनाद्यवस्थावैचित्र्यात् तद्धेतुकरागादिदोषाणां च कर्मावाहित्वताच्छील्यात् कश्चित् तद्भवेनैव निःश्रेयसं नाधिगच्छेत्, तथापि तस्य शुद्धप्रयोगहेतुकं कल्याणप्राप्तिकारणं पुण्यं कर्म स्यादिति । स्यान्मतम्, नन्वेवमभ्युदयाशंसा कृता स्यात् इष्टशरीरेन्द्रियादिनृसुरविशेषप्रादुर्भावफलत्वात् पुण्यस्य, निषिद्धाभ्युपगमे चाभ्युपेतबाधा[2] स्यादिति । उच्यते, नैष दोषः । नृसुरैश्वर्यसुखप्रतिषेधात् । नृसुरैश्वर्यसुखप्रतिषेधपरं हि मुनेः कृत्स्नं वचनम् ॥ "सल्लं कामा[3]" इत्यादि । स्वर्गलोकगमनसुकुलप्रत्यापत्त्यादिवचनं तु प्रधानार्थनिश्चयदार्ढ्यापादनार्थम् । यथाऽनुच्छिन्नारिशेषोऽपि विजिगीषुर्भोगेषु न व्यासज्येतेति, तदुच्छेदाद् भोगेषु व्यासङ्गोऽपि स्वनुबन्ध इति तत्प्राधान्यप्रतीतेरितरसुखस्याप्यसुखत्वमुपदिष्टं स्यात्, तन्मात्राभिष्वङ्गपरिहारार्थमित्थं, सर्वत्र प्रियहितनिश्चयसिद्धेः

" सिद्धे वा भवति सासए, देवे वा अप्परए महिड्ढिए" ॥[6]

—दशवैकालिके अ० ९, उ० ४, गा० ७.

" उँउप्पसन्ने[7] विमलेव चंदिमा, सिद्धिं विमाणाणि वयंति ताइणो"[8] ॥

—दश० अ० ६, उ० २, गा० ६८.

" दुक्कराइं करित्ताणं, दुस्सहाइं सहित्तु य ।
केइत्थ देवलोएसु, केवि सिज्झंति नीरया" ॥[9]—दश० अ० ३, गा० १४.

इत्यादि ॥ नृसुरैश्वर्यनिःश्रेयसविषयाणां सर्ववाक्यानां सिद्धिः । ततश्च नेदं यथोक्तप्रश्वासवाक्यतुल्यम्, न ह्यत्र कालाध्वपरिमाणगन्तृशक्तिवन्निवृत्तिकालपरिच्छेद इति । यथा वा सर्वमुपक्लृप्तं भोजनविधानमुपचर्य ब्रूयात् किन्त्वपथ्यमिति । एवं च तत्प्रसङ्गप्रतिषेधो गम्यते तस्मात्

१ 'प्रवेष्टास्मि' इति ग-टी-पाठः । २ 'स्यान्मन्ता' इति ख-ग-पाठः । ३ 'बाधी' इति क-पाठः ।

४ सल्लं कामा विसं कामा कामा आसीविसोवमा ।
कामे पत्थयमाणा अकामा जंति दुग्गतिं ॥ (उत्तराध्ययने अ० ९, गा० ५३.)
[शल्यं कामा विषं कामाः कामा आशीविषोपमाः ।
कामान् प्रार्थयमाना अकामा यान्ति दुर्गतिम् ॥]

५ 'पदार्थोपदानार्थं' इति ग-टी-पाठः ।

६ सिद्धो वा भवति शाश्वतः देवो वा अल्परजाः (अल्परतः) महार्द्धिकः ।

७ 'उप्पसन्ने' इति ख-पाठः ।

८ ऋतु (शरत्) (काले) प्रसन्नः विमलश्च चन्द्रमा इव तायिनः (प्रसन्ना विमलाश्च) विमानानि सिद्धिं (च) व्रजन्ति.

९ दुष्कराणि कृत्वा दुःसहानि सहित्वा च । केचिदत्र देवलोकेषु (उत्पद्यन्ते) केचित् सिध्यन्ति नीरजसः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स तस्योपसर्जनमर्थोऽनभिसंहितानुषक्त इति। नैव चात्र नृसुरैश्वर्यसुखानुज्ञा, निःश्रेयसावाप्तिहेतुत्वेनानवद्यकर्माभ्यनुज्ञानात् पुनर्भवप्रबन्धकरं न भवति मोक्षकरमेव तु भवतीत्यनवद्यं हि कर्म तत्, सर्वत्र हि भगवता निर्निदानत्वमभिप्रशस्तम्, उक्तं हि "भुज्जो निदानकरणं मुक्खमग्गस्स पलिमंथू, सव्वत्थविणं भगवया अणिदाणदा पसत्था[2] (दशाश्रुतस्कंधे)" इति॥ ततो यद्यप्याशु न लभते तथापि तत्सम्यग्दर्शनादिकृत एव स तस्य मोक्ष इति। इदानीं विचित्रप्रस्थानत्वादधमादिषट्पुरुषविशेषनिर्धारणेन मङ्गलपूर्वकत्वाच्छास्त्रप्रवृत्तेर्मङ्गलपूर्वकमिदं शास्त्रम्, तच्चात्रैकान्तिकादिफलयोगात् प्रकृष्टत्वाच्च नमस्कारो भावमङ्गलं प्रवचनसद्धर्मतीर्थप्रणायिने महावीरायेति भगवत एव पूज्यानुत्तरत्वप्रतिपादनार्थम्, तदनुषङ्गतः शास्त्रोपोद्घातार्थं[3] प्रवक्तृशुद्धेः प्रवचने शुद्धिराख्याता स्यादिति भगवति जातप्रसादबहुमानो गुणज्ञः सङ्ग्रहकारः श्रोतॄणां शास्त्रे गौरवोत्पादनार्थं चाह-"**कर्माहितं**" (४) इत्यादि। पुरुषार्थानां चतुर्णामुभयस्मिन्नपि लोके यो विपरीतानुष्ठायी अत्यन्तमुभयलोकगर्हितपरदारचौर्याद्यासेवमानः सोऽधमाधमः॥ १॥ ऐहलौकिकसुखप्रार्थनापरः परलोकसुखविमुखः ऐहिकप्रत्यपायभयादत्यन्तनिन्द्यचौर्यपरदारादि परिहरन् विषयसुखासक्तः पुरुषोऽधम इत्यनुमीयते॥ २॥ स्वप्रस्थानात् य उभयलोकार्थं प्रयतते दानाध्ययनाद्यासेवमानः सत्कारलाभयशोमित्राद्यैहिकं फलं परलोकेऽपि नृसुरैश्वर्यप्राप्तिमभिकाङ्क्षन् स विमध्यमोऽनुमीयते॥ ३॥ यः पुनरिहसुखनिरपेक्षोऽभिषेचनोपवासब्रह्मचर्यगुरुकुलवासभैक्ष्याद्यासेवमानः परतीर्थिको लोकोत्तरमार्गप्रतिपन्नो वा देवेन्द्रचक्रवर्तिमहामाण्डलिकाद्यैश्वर्यसमाकृष्टमानसः सौभाग्यादि वा प्रार्थयमानो निदानपरस्तपोविक्रयेण परलोकसुखमेव प्रधानीकुर्वन् मध्यम इत्यनुमीयते॥ ४॥ दृष्टानुश्राविकेष्वर्थेषु शुद्ध्यतिशयदर्शनादपरितुष्यन् संसारभयोद्वेगात् सर्वसङ्गत्यागो लोकद्वयनिःश्रेयससुखावह इति मत्वा न पुनर्विषयाभिष्वङ्गे मन आधेयमिति निःश्रेयसावाप्तिप्रधानः सर्वथा पुनर्भवप्रबन्धोच्छित्तये प्रयतितव्यम् इत्येवंपरानुष्ठानः "**कर्मक्लेशाभावो यथा भवत्येष परमार्थः**" (२) इति तत्प्राप्तियोग्यानि[6] साधनानि सम्यग्दर्शनज्ञानचारित्राणि सर्वातिचारविशुद्ध्या समाचरन् उत्तमोऽनुमीयते, ऐकान्तिकात्यन्तिकनिरतिशयानाबाधनिःश्रेयसफलप्रधानकृतार्थत्वप्रार्थनात्॥ ५॥ यः पुनः प्रार्थनीयात्यन्तविशुद्धफलप्राप्तावत्यन्तकृतार्थोऽपि प्रार्थनीयफलाभावात् परनिमित्तोपकारफलनिरपेक्षः सत्त्वानामनुपयाचितनिष्कारणवत्सलः अत्यन्तहितपरः परोपदेशे वर्तते निसर्गत एव सोऽत्यन्तशुभतीर्थकरनामकर्मोदयप्रभावात् वक्तव्य एवोपदेश इति तीर्थकृत्त्वस्वाभाव्यात् प्रयतते, भास्करे प्रकाशनप्रवृत्तिवत्प्रकृष्टतमत्वात् सर्वलोकोत्तमः ततश्च पूज्यानामपि पूज्यतमत्वाद् देवाधिदेव इत्यभिलषितार्थप्रेप्साकृता-

१ 'मर्थानभि' इति क-पाठः।
२ भूयो निदानकरणं मोक्षमार्गस्य परिमन्थः (विघ्नः),
सर्वत्रापि च भगवता अनिदानता प्रशंसिता।
३ 'शास्त्रेप्याद्यान्तार्थं' इति क-ख-पाठः। ४ 'श्राविकेष्टार्थेषु' इति ग-पाठः। ५ 'शुद्ध्यत्न इति शुद्धयत्ना वा' इति क-पाठः। ६ 'योग्यानि सम्यक्' इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दरैः स एवातिशयादर्चनीयः ॥ ६ ॥ (३-६) स कः, अर्हन्निति सामान्योक्तं विशेषे व्यवस्थाप्यते यावत् "**तस्मादर्हति पूजामर्हन्नेवोत्तमोत्तमो लोके**" (७) इति ॥ स किमर्थं कृपाप्रसादयोरभावादर्थ्यनुग्रहाऽप्रवणः सर्वजगता सेव्यत इति चेत्, प्रक्षीणाशेषरागादिदोषव्रातस्य प्रसादद्रविणाभावेऽपि तत्सेवातो निःश्रेयसलाभस्य ध्रुवत्वात्, तदाह—"**अभ्यर्चनादर्हतां**" (८) इत्यादि ॥ कृतकृत्यस्य प्रयोजनोद्देशाभावादप्रेक्षितकार्यचेष्टानाप्तत्वात् परानुग्रहप्रवृत्तिरेव तर्हि न स्यादिति चेत्, न, तीर्थकृन्नामकर्मानुभावाज्जगद्धितकारित्वशैल्युपपत्तेः, अनपेक्षितप्रयोजनभास्करप्रकाशनादिवदित्याह—"**तीर्थप्रवर्तनफलं**" (९) इत्यादि ॥ अथवाऽनुत्तरपारमर्षज्ञानबुद्धातिशयाद्यप्रमेयार्द्धिनिःश्रेयसाभ्युदयार्थगमनमपेक्ष्य कृतार्थत्वविशेषणात् अवश्यवेद्यतीर्थकरनामकर्मवेदनाद्यायुष्कतन्तुबन्धादिक्षपणमात्रकार्यशेषापेक्षमकृतार्थतापि स्याद्वादिनो न दोषायेति (१०) ॥ अत्राह-संसारान्तर्वर्तिजनसामान्यात् तस्येयं कुतोऽनुत्तरगुणसम्पत्, कृतार्थत्वं वा?, नहीष्टः सः स्वयम्भूरिति, उच्यते, अनुभावविशेषजनिततारतम्यकुशलाकुशलप्रपञ्चैः कर्मभिरेवापादितप्रकर्षनिकर्षभेदवैश्वरूप्यो जीवलोको दृष्टो, नहि कर्मणामलङ्घ्यमस्तीति, अतोऽनेकजन्मान्तराभ्यासात् तीर्थकृत्त्वाभिनिर्वर्तिकाभिः दर्शनतपोयोगाद्युत्तमविशुद्धाभिर्भावनाभिरुपचितस्फातीकृतपरमप्रकृष्टपुण्यसम्भारातिशयाद्दोषाणामत्यन्तव्यावृत्तेः अनर्घ्यगुणरत्नमहानिधीनां (१) परमेश्वरत्वमुपपन्नं भगवत इत्याह—"**यः शुभकर्मासेवन**" (११) इत्यादि यावत् "**कृत्वा त्रिकरणशुद्धं तस्मै परमर्षये नमस्कारम् । पूज्यतमाय भगवते वीराय विलीनमोहाय**" (२१) इति ॥ अतोऽपरिमेयानुत्तरानन्तगुणस्वार्थसम्पद्युक्तः सद्धर्मतीर्थस्यास्य प्रणायको भगवान् जगत्परमेश्वरः प्रत्यासन्नोऽस्मत्परमबान्धवो महावीरोऽभिप्रणम्य इत्यस्यैव नमस्कारः इत्येवं नमस्कारभावमङ्गलपुरस्सरत्वं तत्त्वार्थाधिगमसङ्ग्रहस्याविष्कृतम् । शुद्धिश्च यथोक्तमौनीन्द्रप्रवचनानपेतत्वादिति (११-२१) ॥ इदानीं सङ्ग्रहविवक्षाप्रयोजनमाह—"**वक्ष्यामि शिष्यहितमिमं**" इति । कथं "**बह्वर्थसङ्ग्रहं लघुग्रन्थं**" (२२) इति वचनात्, कालानुभावादल्पसामर्थ्या भव्याः कथं नामाऽल्पीयसा वाक्प्रबन्धेन महतोऽर्थराशेरधिगन्तारः स्युरिति । स्यान्मतं किमयं कृत्स्नस्य प्रवचनस्य सङ्ग्रह उत तदेकदेशस्येति, एकदेशसङ्ग्रहोऽयमित्याह—"**अर्हद्वचनैकदेशस्य**" (२३) इति ऐदंयुगीनभव्यलोकानुग्रहमभिसन्धाय किमर्थं पुनः समस्तश्रुतसङ्ग्रहादर एव न कृत इति चेत् कृत्स्नश्रुतार्णवसङ्ग्रहकरणाशक्यत्वादर्थ्यमपि हि नैवाशक्यमारभ्यते इत्यशक्यताप्रतिपादनार्थमाह—"**शिरसा**" (२४-२६) इत्यादि । स्याद्बुद्धिर्जिनवचनैकदेशसङ्ग्रहत्वात् शिष्यहितप्रतिज्ञा वितथा स्यात्, सर्वजगत्स्वभावनिर्णयात् हिताहितप्राप्तिपरिहारार्थिनामनुग्रहः स्यात्, सकलजगत्तत्त्वं च समस्तश्रुतौघप्रतिपाद्यमिति । उच्यते, नायं नियमः श्रुतार्णवस्य पारं गतवत एव श्रेयःप्राप्तिरिति, किन्त्वेतदपि दृष्टं प्रव-

---

१ 'स्वातीकृत' इति क-पाठः । २ 'पुण्यपुण्य' इति क-पाठः । ३ 'स्यान्मन्ता' इति ख-ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चने धर्मस्यैकस्यापि पदस्योपयोगः संसारनिर्वाहकः किमङ्ग पुनरेवंविधार्थविस्तारविषयस्येति, तस्मात् सङ्क्षेपाद् विस्तराच्च जिनवचनं श्रेयस्करमिति। तदाह–" एकमपि तु जिनवचनाद् " इत्यादि यावत् "धार्यं च वाच्यं च" (२७-२८) इति ॥ किञ्च जिनमतानभिज्ञस्य परस्येदं चोद्यं-लोकानुग्रहासम्पादनाद्व्यर्थ[1] एकदेशसङ्ग्रह इति, कथं ?, संसारदुःखार्तसत्त्वाऽनुकम्पाद्रवीकृतात्मा परानुग्रहप्रवणो विधिप्रवृत्तोऽसपरोपकारोऽपि तत्प्रयोगशुद्धित एव स्वयं तावन्निःश्रेयसभाग् भवतीति नियमादस्माकं यतिधर्मो देशनीयः सद्धर्म इति हेतोः। प्रोक्तं हि भगवद्भिः–

"उट्ठिएसु वा अणुट्ठिएसु वा सुस्सूसमाणेसु पवेअएय अज्जवयं[2]" इत्यादि यावत्
"बुज्झमाणाणं जहा से दीवे असंदीणे एवं सरणं भवइ महामुणी"।[3]

—आचाराङ्गे, श्रु० १ अ० ६ उ० प.

तथा।

"भवसयसहस्समहणो, विबोहओ भविय पुंडरीयाणं।
धम्मो जिणपन्नत्तो, पकप्पजइणा कहेयव्वो" ॥[4]—आर्या

इति, तदाह–" न भवति धर्म " इत्यादि (२९-३१)।

इति स्वोपज्ञसम्बन्धकारिकाः टीकाद्वयसमेताः समाप्ताः ॥



---

१ 'द्व्यर्थं' इति ख–पाठः।

२ उत्थितेषु (उपस्थितेषु) अनुपस्थितेषु प्रवेदयेत्—आर्जवितां।

३ उह्यमानानां यथा स द्वीपः अस्यन्दनः एवं शरणं भवति महामुनिः।

४ भवशतसहस्रमथनो विबोधनो भव्यपुण्डरीकाणाम्।
धर्मो जिनप्रज्ञप्तः *प्रकल्पयतिना कथयितव्यः ॥

* प्रकल्पः—आचारप्रकल्पः निशीथसूत्रमित्यर्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्त्वार्थाधिगमसूत्रम्

श्री'उमास्वाति'वाचकवर्यविरचितं स्वोपज्ञभाष्यालङ्कृतम्

श्री'सिद्धसेन'गणिप्रणीतटीकायुतम्।



प्रथमोऽध्यायः १

हितोपदेशे च कर्तव्ये निःश्रेयसावाप्त्युपायोपदेशान् नान्यः कश्चिद्धितोपदेश इत्युक्तम्—

सूत्रम्—सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥ १—१ ॥

टीका—इदमाद्यमनवद्यं मुक्तिपथोपदेशसूत्रं सकलतत्त्वार्थशास्त्राभिधेयमुररीकृत्य प्रावृतत्, द्वादशाङ्गप्रवचनार्थसङ्ग्राहिसामायिकसूत्रवत्। यत इह हि शास्त्रे प्रसङ्गानुप्रसङ्गतस्त्रय एव पदार्थाः सम्यग्दर्शनादयो विमुक्तेः कारणत्वेन निरूप्यन्ते। अथ कस्मात् हेतव एव मोक्षस्य कथ्यन्ते? न पुनः स एव प्रधानत्वादादौ प्रदर्श्यत इति। उच्यते—कारणायत्तजन्मत्वात् कार्याणां कारणमेवोपाददते प्राक् प्रेक्षापूर्वकारिणः। अथवा सत्यमसौ प्रधानः तथापि तु तत्र प्रायो वादिनां नास्ति विप्रतिपत्तिः। यद्यपि भावाभावादिरूपेणास्ति विगानं, तथाऽप्यस्ति तावन् मोक्ष इत्यनादृत्य भावादिरूपतां तद्धेतुषु प्रायो विसंवाद इति मन्यमानः परपरिकल्पितांश्चाहेतूनेव मुक्तेः पश्यन् सम्यग्दर्शनादित्रयमेवोपन्यस्तवान्। अत्र चावधारणमवश्यं द्रष्टव्यं, सम्यग्दर्शनादीन्येव मोक्षमार्ग इति। अनवधारणे हि सति अन्यस्यापि मुक्तिपथस्य सद्भावादनर्थकमेवोपदेशदानं स्यात्, तेनैव सिद्धत्वादिति। सम्यक्शब्दश्च दर्शनशब्दसन्निधौ श्रूयते अतस्तेनैव सहास्याभिसम्बन्धो न ज्ञानचारित्राभ्यामिति कश्चिदाशङ्कते,अतस्तन्निवारणायाह भाष्यकारः—

भाष्यम्—सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चारित्रमित्येष त्रिविधो मोक्षमार्गः। तं पुरस्ताल्लक्षणतो विधानतश्च विस्तरेणोपदेक्ष्यामः। शास्त्रानुपूर्वीविन्यासार्थं तूद्देशमात्रमिदमुच्यते। एतानि च समस्तानि मोक्षसाधनानि। एकतराभावेऽप्यसाधनानीत्यतस्त्रयाणां ग्रहणम्। एषां च पूर्वस्य लाभे भजनीयमुत्तरम्। उत्तरलाभे तु नियतः पूर्वलाभः। तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यगिति प्रशंसार्थो निपातः, समञ्चतेर्वा भावः । दर्शनमिति दृशेरव्यभिचारिणी सर्वेन्द्रियानिन्द्रियार्थप्राप्तिः, एतत् सम्यग्दर्शनम् । प्रशस्तं दर्शनं सम्यग्दर्शनम् । सङ्गतं वा दर्शनं सम्यग्दर्शनम् । एवं ज्ञानचारित्रयोरपि ॥ १ ॥

टी०—अर्हदभिहिताशेषद्रव्यपर्यायप्रपञ्चविषया तदुपघातिमिथ्यादर्शनाद्यनन्तानुबन्धिकषायक्षयादिप्रादुर्भूता रुचिर्जीवस्यैव **सम्यग्दर्शनमुच्यते, सम्यग्ज्ञानं** तु लक्ष्यलक्षणव्यवहाराव्यभिचारात्मकं ज्ञानावरणकर्मक्षयक्षयोपशमसमुत्थं मत्यादिभेदं, **सम्यक्चारित्रं** तु ज्ञानपूर्वकं चारित्रावृतिकर्मक्षयक्षयोपशमोपशमसमुत्थं सामायिकादिभेदं सदसत्क्रियाप्रवृत्तिनिवृत्तिलक्षणं मूलोत्तरगुणशाखाप्रशाखम् ॥ अत्र भाष्ये चोदयति—अथ किमर्थं प्रत्येकं सम्यक्शब्दः प्रयुज्यते? यावता सम्यग्दर्शने सति यज् ज्ञानं चरणं वा तत्सम्यगेव भवतीत्यतो न सम्यक्शब्दोऽनयोर्विशेषणतयोपादेयः । उच्यते—सत्यमेतत्, किन्तु न ज्ञानमात्रमत्र विवक्षितं, चारित्रमात्रं वा, किन्तु विशेषरूपे उभे अपि, इतरथा हि सम्यग्दर्शनसम्पन्ने विद्येते सम्यग्ज्ञानसम्यक्चारित्रे न तु ते साक्षान्मोक्षमार्गतां बिभृत इति एतत्, नैव तत्र सम्यक्चारित्रसम्भव इति । तच्च न, यतो देशरूपेऽपि चारित्रे चारित्रशब्दो वर्तत एव-तच्चाज्ञाभिमतचारित्रात् सम्यक्शब्दविशेषणेन व्यावर्त्यत इति । स्यादेवं तत्राशङ्का—किं ते भवतो मोक्षकारणे उत मा भूतां? तदाशङ्कानिरासार्थं सम्यगिति ज्ञानचरणयोरुपाधित्वेनोपादायि सूरिणा । अथवा दर्शनज्ञानचारित्राणां त्रयाणामपि व्यभिचार उपलभ्यते, यतो मिथ्यादर्शनपुद्गलोदये जीवस्य मिथ्यादर्शनं मिथ्याज्ञानं मिथ्याचारित्रमिति मुक्तेरसाधकत्वान् मिथ्याशब्देन विशेष्यन्ते, तान्येव सम्यग्दृष्टेर्मुक्तिसाधनत्वाद् यथार्थग्राहित्वाच्च सम्यक्शब्देन विशेष्यन्ते, दर्शनं च ज्ञानं च चारित्रं च दर्शनज्ञानचारित्राणि सम्यक् च तानि दर्शनादीनि चेति सम्यग्दर्शनज्ञानचारित्राणीति, अतो व्यभिचाराद् युक्तं यत् सम्यक्शब्देन सर्वाणि दर्शनादीनि विशेषयति । **चारित्रमिति**, योऽयमितिशब्दः स इयत्तां दर्शयति, एतावन्त्येव मुक्तेर्मार्गो नातोऽन्योऽस्ति । एष इत्यनेन तु इतिना इयत्ताऽवधृतस्वभावमन्तर्विपरिवर्तमानं स्वप्रत्यक्षं परस्मै वा सामान्येन प्रतिपादितं परप्रत्यक्षं निर्दिशति । तिस्रो विधाः-प्रकारा अनन्तरप्रदर्शिता यस्य स त्रिविधः, कोऽसौ?, उच्यते-सूत्रोपन्यस्तो मोक्षमार्ग इति । **मोक्ष** इति च ज्ञानावरणाद्यष्टविधकर्मक्षयलक्षणः केवलात्मस्वभावः कथ्यते स्वात्मावस्थानरूपो, न स्थानम्, यतो मोक्षस्य मार्गः, शुद्धिरुच्यते, न पुनर्धात्रः शुद्धिर्विवक्षिता, या त्वसौ कर्मणां मुच्यमानावस्था तच्छोधनायैतानि प्रवर्तन्ते,

सम्यक्शब्द-फलम्

१ ज्ञानचारित्रयोरपि सम्यक्त्वयोपादानमित्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथवेषत्प्राग्भारधरणी मोक्षशब्देनाभिधातुमिष्टा, यस्मात् तदुपलक्षितोपरियोजनक्रोशषड्भागो भगवतामाकाशदेशः प्रादेशि दिव्यदृश्वभिराधारः, तस्यायं सूत्रोपन्यासफलम् **मार्गः**—पन्थाः, समस्तप्रत्यपायवियुतः पाटलिपुत्रगामिमार्गवन्मोक्षमार्ग इत्यस्य एष त्रिविध इत्येतद्विवरणम्, एवं सामान्येन सूत्रप्रकाशः प्रत्यपादि ॥ अधुना परः प्रश्नयति—किमेतावदेव मोक्षमार्गोपदेशनमुत विस्तरेणाप्यस्ति किञ्चिदिति? अस्तीत्याह। यद्यस्ति किमिति नोच्यते? आह—**तं पुरस्ताल्लक्षणतो विधानतश्च** इत्यादि। **तमिति** मोक्षमार्गमनन्तरश्रुतं निर्दिशति, **पुरस्तादिति** अस्मात् सूत्रादुपरितनसूत्रेषु, **लक्षणत** इति, लक्ष्यतेऽनेनेति लक्षणं, तद् द्विधा आन्तरबहिर्भेदेन, रुचिपरिच्छेदानुष्ठानाख्याः पौरुषेय्यः शक्तयो जीवस्य याः समासाद्य व्यपदिश्यते सम्यग्दर्शनीत्याद्यान्तरम्। बाह्यं तु तत्प्ररूपणप्रवणसूत्रशब्दराशिः अन्तर्लक्षणोपकारितया प्रवर्तमानः "तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् (१-२)" इत्यादि। **विधानत** इति भेदतः। **ननु** च सर्वद्रव्यभावविषया रुचिरेकैव कुतस्तस्याः प्रभेदसम्भवः?। उच्यते—सत्यमेका रुचिः, सा तु निमित्तभेदाद् भेदमश्नुते, क्षयक्षयोपशमोपशमलक्षणं सास्वादनवेदकलक्षणं च। तथा चैवोत्पत्तिकारणवशादेकरूपाया अप्युपरिष्टाद् भेदो निदर्शयिष्यते। यतः कस्याश्चित् स्वभाव एव निमित्तम् उत्पद्यमानायाः, कस्याश्चिच्चोपदेशो निमित्तम्, इत्यमुं च पाश्चात्यभेदमाश्रित्य भेदद्वयं विधानतो वक्ष्यति। **चकारः** समुच्चये। **विस्तरेण** इति सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चारित्रमित्येष त्रिविधो मोक्षमार्ग इत्यमुं समासव्याख्याभेदमङ्गीकृत्य इहैव सूत्रे वक्ष्यमाणं, तत्र सम्यगिति प्रशंसार्थो निपात इत्यादिकं सङ्क्षेपमाश्रित्य वक्ष्यमाणो विस्तीर्णोऽभिमतस्तत्त्वार्थश्रद्धानं सम्यग्दर्शनं इत्यादिरतो विस्तरेणेत्याह। **उपदेक्ष्याम** इति भणिष्यामः स्वपरानुग्रहार्थम्। यदि तं हि लक्षणविधानाभ्यामुत्तरत्रोपदेक्ष्यसि ततस्तमेव ब्रूहि किमनेनाद्यसूत्रोपन्यासेन सङ्क्षेपार्थाभिधायिनाऽनर्थकेनेति चोदितः प्रत्याह-**शास्त्रानुपूर्वीविन्यासार्थमित्यादि**। मुख्यपुरुषार्थसाधनसाध्याव्यभिचारशासनात् शास्त्रमिष्टं प्रमाणप्रमेयसिद्धिनिरूपणं च, तस्यानुपूर्वी—क्रमः—परिपाटी, तस्या विन्यासो रचना, तत्प्रयोजनार्थम्, तुशब्दाल्लाभक्रमप्रदर्शनार्थं च। शुश्रूषूणां चादरप्रतिपादनार्थमिदमुच्यते। अविशिष्टपदार्थाभिधानं उद्देशः, तन्मात्रमिदं सम्यग्दर्शनादिसूत्रमभिधीयते सङ्ग्रहप्रतिज्ञानात्, एतत् कथयत्यादौ सम्यग्दर्शनं लक्षणविधानाभ्यां निर्धारयिष्यामि, ततो ज्ञानं, ततश्चारित्रमित्येषा वक्ष्यमाणरचनेति प्रतिपद्यस्व। अयं च लाभक्रमः सम्यग्दर्शनादीनां, पूर्वं सम्यग्दर्शनज्ञाने, ततश्चारित्रमुत्पत्ताविति। शिष्याणां चात्र ग्रहणादिषु प्रवर्तमानानां न शक्यं वचनमन्तरेणादराधानमित्यतः सकलशास्त्रसङ्ग्राहीदमादावुच्यते सूत्रम्। आह परः, उच्यतां नाम तथा, किं तूच्यमानेऽस्मिन्नन्वेवं भवितव्यम्—सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गा इति, अभिधानस्याप्यभिधेयमाश्रित्य वचनं प्रवर्तते, मोक्षमार्गशब्दस्य सम्यग्दर्शनादीन्यभिधेयानि तेषां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च बहुत्वात् बहुवचनेनैव भवितव्यमिति। उच्यते—प्रेक्षापूर्वकारितानुमीयते सूत्रकारस्यैवमभिदधतः, यतो मोक्षमार्गो इत्युक्ते एकैकस्यैतत्परनिरपेक्षस्य मोक्षं प्रति साधनभावो गम्येत, न चैतदिष्टम्, यतः समुदितैरेव दर्शनादिभिः साध्या मुक्तिः न व्यस्तैरिति, एतदाह—**एतानि च समस्तानि मोक्षसाधनानीत्यादि**, । **एतानि** प्राक् प्रत्यक्षीकृतानि सम्यग्दर्शनादीनि व्यपदिश्यन्ते, **चशब्दो** हिशब्दार्थे निपातानामनेकार्थत्वात् हिशब्दश्च यस्मादर्थः । **समस्तानि** इति सर्वाणि, सम्यग्दर्शने सत्यपि यदि ज्ञानं न भवति तयोश्च सतोर्यदि क्रिया न विद्यते तत इष्टमर्थं न साधयति, रोगापनयनलक्षणमारोग्यमिव रोगिणः । यथा ह्यारोग्यार्थिरोगिणः भेषजे रुचिस्तद्विषयं च परिज्ञानमिदमेवौषधमस्य व्याधेरपनयनकारि, सति चैतस्मिन् द्वये यदि सम्यग्ज्ञानपूर्विकायां पथ्याद्यभ्यवहरणक्रियायां विशेषेण[3] वा प्रवर्तते ततोऽस्य रोगाः प्रणश्यन्ति नान्यथा, एवमिहापि त्रितयं समुदितं त्रिफलाद्युपदेशवत्सिद्धेः सकलकर्मक्षयलक्षणायाः साधनभावं बिभर्ति ॥ अर्थापत्त्या सिद्धेऽप्याह वचसा स्पष्टं अर्थापत्तिलभ्यफलप्रदर्शनाय । यथा—**एकतराभावेऽप्यसाधनानीत्यतस्त्रयाणामित्यादि** । सम्यग्दर्शनादीनां त्रयाणां **एकतरस्याप्यभावेऽलाभे, असाधनानि**—अनिर्वर्तकानि, अस्मात् कारणात् त्रीण्यपि मोक्षमार्गशब्दः समुदितान्यभिधेयीकृत्य प्रवृत्त इत्येकत्वात् तस्य समुदायस्यैकवचनमेव न्याय्यमिति, **अतस्त्रयाणां** सम्यग्दर्शनादीनां **ग्रहणमाश्रयणं** मोक्षार्थिना कार्यमिति । एकतराभावेऽप्यसाधनानीत्यमुं ग्रन्थमपुनरुक्तं मन्यमाना गुरवः कथयन्त्येवं—उपात्तं साध्यं मोक्षं न साधयन्ति व्यस्तानि, यत्पुनः प्रत्येकमेषां साध्यम् तत्साधयन्त्येव, यथा सम्यग्दर्शनस्य देवलोकप्रापणसामर्थ्यं, ज्ञानस्य ज्ञेयपरिच्छेदः, क्रियायाः शुभाशुभकर्मादानं देशक्षयो वा कर्मणामिति । अथवा विवरणग्रन्थेषु न गुरुलाघवं प्रत्याद्रियन्ते सूरयः, अर्थापत्त्यनभिज्ञानामप्युपदेशप्रवृत्तेः । अथवा एतानि चेत्यन्यथा ख्याप्यते, य एवं चोदयन्ति किमर्थमिति बहु मोक्षकारणतयाऽभ्युपेयन्ते सम्यग्दर्शनादीनि, न पुनर्यथा साङ्ख्यादिभिर्ज्ञानमेव केवलं मुक्तिकारणमभ्युपगम्यते, यतः "पञ्चविंशतितत्त्वज्ञ" इत्यादि कथयन्ति । उच्यते—न केवलं ज्ञानं मुक्तेः कारणं पर्याप्तं, क्रियारहितत्वात् पङ्गुवत्, न च क्रियामात्रम्, विशिष्टज्ञानरहितत्वात् अन्धवत्, अतोऽभ्युपेहि समस्तानि सम्यग्दर्शनादीनि मोक्षकारणान्येकतराभावेऽप्यसाधनानि अतः कारणात् त्रयाणां ग्रहणं कृतम् ॥ अथ यदा दर्शनादीनामेकं प्राप्तं भवति तदा परस्यावस्थानमस्ति ? नास्तीत्याह—भजना कार्या । अत्र तां दर्शयति—**एषां च पूर्वस्य लाभे भजनीयमुत्तरं, उत्तरलाभे तु नियतः पूर्वलाभ** इत्यादि । **एषामिति**, दर्शनादीनां सूत्रोक्तानाम्, **चशब्दः** समुच्चये । कथमिति चेत्, यथैव समस्तानां मुक्तिहेतुता प्रतिपन्ना एवमिदमपि

मार्ग इति एकवचने फलम्

बहूनां कारणता

१ 'एकैकस्येतरनि०' इति ख-पाठः । 'एकैकस्यैतस्य तत्परनि०' इति ग-पाठः । २ 'साधयन्ति' इति ग-पाठः । ३ 'विशेषणे' इति ग-टी-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च प्रतिपत्तव्यम् । किं तदिति चेत्, उच्यते-लाभनियम इति । पूर्वस्य लाभ इति सूत्रक्रममङ्गीकृत्य पूर्वस्य-सम्यग्दर्शनस्य लाभे-प्राप्तौ भजनीयं-विकल्पनीयं स्यात् वा न वेति, उत्तरं, ज्ञानं चारित्रं च, यतः देवनारकतिरश्चां मनुष्याणां च केषाञ्चिदाविर्भूतेऽपि सम्यग्दर्शने न भवत्याचारादिकमङ्गप्रविष्टं ज्ञानम्, न वा देशसर्वचारित्रमिति । तथा प्राप्तेऽपि ज्ञाने केनचित् न चारित्रं नियमत एव प्राप्तव्यम्, तदावरणीयकर्मोदयादिति,

सम्यग्दर्शनात् सम्यग्ज्ञानस्य भिन्नता

अतः कैश्चिदेवं भाष्यमेतद् व्याख्यायि-परमार्थतो यस्मात् त्रीण्यपि सम्यग्दर्शनादीनि भिन्नानीति । कथं हि भेदः सम्यग्दर्शनस्य ज्ञानादिति चेत्, त एवं वर्णयन्ति पृष्टाः[1], कारणभेदात् स्वभावभेदादित्यादिना, कारणभेदस्तावदयम्, यतः सम्यग्दर्शनस्य त्रितयं कारणं समुत्पत्तौ, क्षयोपशमः क्षयः उपशमश्चेति । ज्ञानस्य तु क्षयः क्षयोपशमो वा, यदि च न तयोर्भेदः किमिति दर्शनस्य त्रिविधं कारणम् इतरस्य द्विविधम् ? । तथा स्वभावभेदोऽप्यस्ति, यज्जैनेषु पदार्थेषु स्वतः परतो वा रुचिमात्रमुपपादि 'तदेव सत्यं निःशङ्कं यज्जिनैः प्रवेदितमुपलब्धं चे'ति । तथा विषयभेदोऽप्यस्ति, सर्वद्रव्यभावविषया रुचिः सम्यक्त्वं "सव्वगयं सम्मत्तं[2]" इति वचनात्, श्रुतज्ञानं तु सकलद्रव्यगोचरं कतिपयपर्यायावलम्बि चेत्येवं किल पारमार्थिकं भेदं पश्यद्भिर्भाष्यं व्याख्यातम् । अपरे तु, ज्ञानदर्शनयोः समीचोर्भेदमप्रेक्षमाणाः प्रभाषन्ते, एषां च पूर्वस्य द्वयस्य सम्यग्दर्शनस्य सम्यग्ज्ञानस्य च लाभे-प्राप्तौ, भजनीयं स्याद् वा न वेति, उत्तरं चारित्रम्, उत्तरस्य तु सूत्रक्रमोपन्यस्तस्य सम्यक्चारित्रस्य लाभे नियतो निश्चितः पूर्वलाभ इति-पूर्वयोः सूत्रक्रमव्यवस्थितयोः सम्यग्दर्शनसम्यग्ज्ञानयोर्लाभः-प्राप्तिरिति, अन्यथा तत् सम्यक्चारित्रमेव न स्याद् यदि ताभ्यामनुगतं न स्यादिति ॥ ननु कथं कारणादिकं भेदं न पश्यन्ति ? । उच्यते-मतिज्ञानस्यैव रुचिरूपो योऽपायांशस्तत् सम्यग्दर्शनम्, ज्ञानादतेऽन्यत् सम्यग्दर्शनं न समस्ति । कारणादिभेदस्त्वन्यथा व्याख्यायते[3], योऽसावुपशमोऽनन्तानुबन्ध्यादीनां स तस्य सम्यग्दर्शनस्योत्पत्तौ निमित्तं भवति, यथा केवलज्ञानस्योत्पत्तौ मोहनीयक्षयः, न पुनस्तदेव मोहनीयं केवलस्यावरणमिति शक्यमभ्युपगन्तुं, निमित्तं तु मोहनीयक्षयः तेनाक्षीणेन केवलस्यानुत्पत्तेः, एवमिहापि यावदसावनन्तानुबन्ध्यादीनामुपशमो न भवति न तावत् सम्यग्दर्शनपर्यायस्याविर्भावः, न पुनस्तदेवानन्तानुबन्ध्याद्यावरणं सम्यग्दर्शनस्य । किं पुनरावरणमिति चेत्, ज्ञानावरणमेव, तावच्चेदं क्षयोपशमं न प्रतिपद्यते यावदनन्तानुबन्ध्यादीनां नोपशमः समजनीति । अनन्तानुबन्ध्याद्युपशमे सति तदुपजायत इत्युपशमसम्यग्दर्शनं भण्यते, स्वावरणक्षयोपशममङ्गीकृत्य क्षयोपशमजमेतदुच्यते, तस्मात् परत उपशमव्यपदेशो न स्वावरणापेक्षया इति । तथा स्वभावभेदः पूर्वपक्षवादिना योऽभ्यधायि तत्राप्येवं पर्यनुयोगः कर्तव्यः-कोऽयमभिलाषो

---

१ 'श्रेष्ठाः' इति क-ख-पाठः । २ सर्वगतं सम्यक्त्वं (आव० नि०)। ३ 'प्रकाश्यते' इति क-ख -पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रुचितत्त्वलक्षणोऽन्यो मत्याद्यपायांश विरहय्येति । एवं विषयभेदोऽपि निराकार्य इति । तस्मात् ज्ञानस्यैव विशिष्टावस्थाऽन्यमतपरिकल्पिततत्त्वनिरासतो जिनवचनोन्नीतपदार्थश्रद्धानलक्षणा सम्यग्दर्शनव्यपदेशं प्रतिलभत इति न्याय्यम् । इदानीं सूत्रोपन्यस्तसम्यग्दर्शनाद्यवयवानां प्रतिविभागतः करोत्यर्थप्रतिपादनम्–**तत्र सम्यगिति प्रशंसार्थो निपात** इत्यादिना । तत्रेत्यनेन सम्यग्दर्शनशब्दे ज्ञानादिषु च यः सम्यक्शब्दः स किमर्थान्तरमुररीकृत्य प्रवृत्तः ? नामाख्यातादीनां किमेतत् पदमिति पर्यनुयोगे सत्याह–**सम्यगिति** । इतिशब्दोऽर्थाद्यद्यदस्य स्वरूपे स्थापयति, सम्यक्शब्द इत्यर्थः । प्रशंसा, अविपरीतता यथावस्थितपदार्थपरिच्छेदिता, साऽभिधेया वाच्याऽस्येति **प्रशंसार्थः**, निपात्यतेऽर्थावद्योतकतया **निपातः** । इदं च किल निसर्गसम्यग्दर्शनाङ्गीकरणाद् व्याख्यानमव्युत्पत्तिपक्षाश्रयं परिगृह्यते, यतस्तत्पूजिततरं स्वत एवोपजायमानत्वात्, तदितरत् तु यद्यपि तथैवाविपरीतार्थतया विषयमवच्छिनत्ति तथापि तत्र परसाहायिकमस्ति तदस्मिन् पक्षे नावश्यतया श्रितम् ।एवं तावत् प्रकृतिप्रत्ययमनालोच्य सम्यक्शब्दार्थो निरूपितः, व्युत्पत्तिपक्षेऽप्यर्थप्रदर्शनायाह—**समञ्चतेर्वा** । सम्पूर्वादञ्चतेः साध्यमेतद्रूपमिति, अर्थः पुनः गतिः पूजा वाश्रयणीयेति, तत्र पूजा पूर्वव्याख्यानेन दर्शिता, इह तु गत्यर्थो वर्ण्यते, समञ्चति गच्छति व्याप्नोति सर्वान् द्रव्यभावानिति सम्यक्। कः कर्त्रर्थ इति चेत् यदेतद् दर्शनं रुचिरूपं तत् समञ्चति व्याप्नोति एवमेते जीवादयोऽर्थाः यथा नयसामग्र्या जैनैराख्यायन्ते, न पुनरेकनयावलम्बिसाङ्ख्यवत् प्रतिपद्यन्ते, नित्या एवैते, अनित्या इति वा शाकलिकचीवरकवत्, न सन्ति वा लौकायतिकवदिति, कथञ्चित्सन्ति (कथञ्चिन् न सन्ति) कथञ्चिन्नित्याः कथञ्चिदेवानित्याः द्रव्यपर्यायनयद्वयप्रपञ्चापेक्षयेत्याविष्करिष्यामः पञ्चमाध्याये । एवं च तत्र यदा दृष्टिः प्रवर्तते तदा सम्यगिति कथ्यते । **वा**शब्दो विकल्पप्रदर्शनाय । एतस्मिंश्च पक्षे किलाधिगमसम्यग्दर्शनं कथितम्, यतस्तदेव प्रायोवृत्त्या द्रव्यपर्यायनयसमालोचनेन गुरूपदेशपूर्वकमितिकृत्वा यथावदवगच्छति शास्त्राद्यभ्यासादिति । एवं सम्यक्शब्दं निरूप्य सम्प्रति दर्शनशब्दार्थकथना, यतः अनेकस्मिन् कारके च ल्युट् सम्भाव्यते करणादिके पश्यति स तेन तस्मिंस्तस्मादित्यादि, अतो विशिष्ट एव कारके भावाख्ये दृश्यत इत्यादि—**भावो दर्शनमिति** । दृष्टिर्या अविपरीतार्थग्राहिणी जीवादिकं विषयमुल्लिखन्तीव प्रवृत्ता सा सम्यग्दर्शनम्। अथ किमर्थमन्यानि कारकाणि निरस्य भावकारकमादिदेश भाष्यकारः ? उच्यते–ज्ञानमेव तत् तादृशं मुख्यया वृत्त्या तथाऽवस्थितं, ये तु तत्र करणादिव्यपदेशास्त उपचरिता इति कृत्वा न तेष्वादर इति भावं दर्शितवान् । **दृशेरिति** । एतत्पूर्वेण वा सम्बन्धमुपयाति दृशेर्यदेतद्दर्शनमिति रूपमेतत् भावे भावाभिधायि प्रतिपत्तव्यम्, अथवा परेण दृशेः प्राप्तिरुपलब्धिर्वाच्या सा चैवंरूपा, **अव्यभिचारिणीत्यादि** । व्यभिचरत्यवश्यमिति—

सप्रत्ययसम्यक्शब्दार्थः

---

१ धनुश्चिह्नितः अयं **ख**—पाठः । २ 'नयप्रपञ्चा' इति **क-ख**-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यभिचारिणी, सा च एकनयमतावलम्बिनी, सामान्यमेवास्ति न विशेषाः सन्ति, विशेषमात्रं वा समस्ति न सामान्यमित्यादिका, यतः सा नयान्तरेणापक्षिप्यते असत्यत्वात्, अतो व्यभिचारिणी, न व्यभिचारिणी अव्यभिचारिणी, का, या सर्वान्नयवादान् साकल्येन परिगृह्य प्रवृत्ता कथञ्चित् सामान्यं द्रव्यास्तिकाज्ञाच्छन्दतः सत्यं विशेषाश्च पर्यायावलम्बनमात्रसत्या इत्यादिप्रपञ्चेनाव्यभिचारिणी, तां कथयति—**सर्वेन्द्रियानिन्द्रियार्थप्राप्तिरिति** ।

इन्द्रियानिन्द्रिय-प्राप्तिस्वरूपम्

सर्वाणि निरवशेषाणि, **इन्द्रियानिन्द्रियाणि**, इन्द्रस्याजीवस्य लिङ्गानि श्रोत्रादीनि पञ्च, अनिन्द्रियं, मनोवृत्तिरोधज्ञानं चेति । श्रोत्रादीनां पञ्चानां द्वयोश्चानिन्द्रिययोरर्थो विषयः शब्दादिः परिच्छेद्यः, श्रोत्रादिपरिच्छिन्नार्थानुसन्धायि च मनोविज्ञानमनुप्रवृत्तेः । ओघज्ञानमनिन्द्रियजमेवेन्द्रियानुसारिविज्ञाननिरपेक्षं, 'पृष्ठत उपसर्पन्तं सर्पं बुद्धचैव पश्यन्ती'ति वचनात्, वल्ल्यादीनां नीत्राद्यभिसर्पणज्ञानं क्वचिन्मनोनिरपेक्षमिति, अतस्तेषामिन्द्रियानिन्द्रियार्थानामुपलब्धिः—प्राप्तिः स्वतः परतो वा तदर्थप्रकाशनोत्तरकालभाविनी ग्राह्या, न तु तेषां सर्वेन्द्रियाद्यर्थानां सन्निकर्षमात्रप्राप्तिरभिप्रेता, न च सर्वेन्द्रियाणां स्वेन विषयेण सहाश्लेषः समस्ति, यतश्चक्षुः स्वदेशस्थं योग्यदेशव्यवस्थितं रूपमारूपयति, नास्य गमने सामर्थ्यमस्ति, अप्राप्यकारित्वात् । श्रोत्रादीनि तु प्राप्तार्थग्राहीणि, प्राप्यकारित्वात् चत्वारि, मनोविज्ञानं तु तत्पृष्टानुसारिविकल्पकम्, अतोऽव्यभिचारिणी सर्वेन्द्रियाद्युपलब्धिः, इदमेव तत्त्वं परमार्थः शेषः परमार्थो न भवति । **एतत्सम्यग्दर्शनम्** । सम्प्रति निपाते सम्यक्शब्दे गृहीते योऽर्थस्तं भावार्थं च दर्शयति—**प्रशस्तं दर्शनं सम्यग्दर्शनमिति** । अविपरीतानां द्रव्यभावानां जगन्नाथाभिहितानामालम्बिका प्रवृत्तिः रुचिलक्षणा सा प्रशस्तं दर्शनमिति, प्रशस्तमुक्तिसुखहेतुत्वात् । तथा व्युत्पत्तिपक्षाश्रितो योऽर्थस्तं कथयति—**सङ्गतं वा दर्शनं सम्यग्दर्शनमिति** । नित्यानित्यसदसत्सामान्यविशेषेषु जैनप्रवचनानुसारात् तस्यैव विज्ञानस्य नयद्वयसमारोपणेन च प्रवृत्तिः सा सङ्गतमिति व्यपदिष्टा । **एवं** सम्यग्दर्शनशब्दावयवान्व्याख्यानं कुर्वता भाष्यकृता सम्यग्ज्ञानचारित्रयोरपि काक्वा कृतम् । सम्यग्ज्ञानशब्देऽपि सम्यक्शब्दः प्रशंसार्थो निपातः समञ्चतेर्वा, ज्ञानमिति च भाव एव, एवं चारित्रमपि, स्वस्थाने च विशेषमाविष्करिष्याम इति ॥ १ ॥

सम्प्रति सम्यग्दर्शनादीनां यथाक्रमसन्निविष्टानामाद्यस्यैव लक्षणं **यथोद्देशस्तथा निर्देश** इत्यभिधातुकाम आह—"तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्" (१-२)। **'पदाक्षरवचनवाक्यानामभिप्रायविवरणं व्याख्ये'ति** वचनात् । प्रागवाचि वाचकमुख्येन "लक्षणतो विधानतश्चोपदेक्ष्यामः" (१-१) इति, सत्यपि प्रमाणनयनिर्देशसदसदाद्यनेकानुयोगद्वारव्याख्याविकल्पे पुनः पुनस्तत्र तत्रैतदेव द्वयमुपन्यस्यन् भाष्याभिप्रायमाविष्करोति सूरिः लक्षणविधाने एवास्मिन् शास्त्रे च प्रधानाधिकारिके इत्यतो लक्षणमुपन्यस्यति। अत्र पर्यायनि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेदप्रभेदादिभिः पदाद्यभिप्रायः प्रकाशनीयः, तत्र प्रधानशब्दस्य तदर्थशब्दान्तराणि पर्यायाः, प्रकृतिप्रत्ययादिनिर्भेदेन तथा गृहीतान्वर्थशब्दविवरणं निर्भेदः, तथा वाक्यान्तरेण निरूपणं प्रभेदः, तत्रेदं सूत्रं वाक्यान्तरनिरूपणद्वारेण प्राणायि सूरिणा। अथवा समुदायो मुक्तेः कारणतया निरूपित इति, न च समुदायिष्वपरिज्ञातेषु तत् परिज्ञानमस्तीत्याद्यस्य लक्षणप्रचिकासयिषया सूत्रं पपाठ ॥

सूत्रम्—तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् ॥ १-२ ॥

टी०—तत्त्वार्थेत्यादि। अनेकसमासकल्पनासम्भवे यत्र सुखेन बुद्धिराधातुं शक्यते प्रतिपिपादयिषितार्थप्रवणा तां कल्पनामुपन्यस्यति ॥

भा०—तत्त्वानामर्थानां श्रद्धानं, तत्त्वेन वा अर्थानां श्रद्धानं तत्त्वार्थश्रद्धानं, तत् सम्यग्दर्शनम्। तत्त्वेन भावतो निश्चितमित्यर्थः। तत्त्वानि जीवादीनि वक्ष्यन्ते (१-४)। त एव चार्थाः, तेषां श्रद्धानं तेषु प्रत्ययावधारणम्। तदेवं प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं तत्त्वार्थश्रद्धानं सम्यग्दर्शनमिति ॥ २ ॥

टी०—तत्त्वानामर्थानामिति। तत्त्वानाम् अविपरीतानां, के वा अविपरीताः ? ये स्याद्वादकेसरिगोचरमनतिक्रम्य स्थिताः, ये त्वेकनयकल्पकविलोकितास्ते विपरीताः। अर्थानामिति, अर्यमाणानां स्वैः स्वैर्ज्ञानविशेषैः परिच्छिद्यमानानां, श्रद्धानं रुचिरभिप्रीतिः सम्यग्दर्शनं, यथाऽर्हता विगतरागद्वेषप्रपञ्चेन जगदे जगदेकबन्धुना तथेदं सत्यं जीवादिवस्तु।

तत्त्वार्थस्यार्थः

ननु च व्यभिचारे सति विशेषणविशेष्यकल्पना न्याय्या यथा नीलोत्पलादिषु, इह तु यत् तत्त्वं तन्नार्थं विहायान्यद् भवितुमर्हति अर्थो वा तत्त्वमन्तरेणेति यदेव तत्त्वं स एवार्थो य एव चार्थस्तदेव तत्त्वमिति पुनरुक्तारेका। उच्यते। परमतापेक्षं विशेषणमित्यर्थस्य तत्त्वमुपात्तं, यतः काणभुजमतनिरूपितो बुद्धकपिलाद्युक्तश्चार्थो व्यभिचारी, सत्ताद्रव्यत्वादिसामान्यविशेषरूपं परित्यक्तपरस्परस्वात्मा खपुष्पवदसन्नेवेष्यते, नहि विशेषाः सम्भावयितुं शक्याः अन्वयिनैकेन शून्याः, न चास्ति सामान्यं, निर्विशेषत्वात् इत्यादिदोषसंस्पर्शपरिजिहीर्षया विशेषणमाश्रीयते, तस्यानर्थत्वादेकनयाभिप्रायमात्रत्वादिति, अतो व्यभिचाराद् युक्तं तत्त्वशब्दोपादानम्, स्वमतमप्यङ्गीकृत्यैकनयावलम्बनमनर्थ एव तत्त्वशब्देन व्युदस्यते ॥ अथवा किमस्माकं परमतेनैकनयावलम्बनेन च यदेव निःशङ्कं तदेवाश्रयाम इति विग्रहान्तरं दर्शयन्नाह—तत्त्वेन वाऽर्थानां श्रद्धानमिति। इदमप्यर्थकथनं न तु त्रिपदस्तृतीयातत्पुरुषः सम्भवति, एवं च द्रष्टव्यम्-अर्थानां श्रद्धानमर्थश्रद्धानं तत्त्वेनार्थश्रद्धानं तत्त्वार्थश्रद्धानमिति, वाशब्दः पक्षान्तरप्रदर्शनार्थः, अयं वा पक्ष आस्थेय इति। तत् इति पूर्वसूत्रोक्तं निर्दिशति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यग्दर्शनमिति लक्ष्यं लक्षति, **तत्त्वेनेति** कोऽर्थ इत्यत आह—**तत्त्वेन भावतो निश्चितमित्यर्थ** इति। तत्त्वेनेत्यस्य विवरणं, **भावेनेति** चोपयुक्तस्य निश्चयनयमताल्लभ्यत इति कथयति। अथवा भावेनेति स्वप्रतिपत्त्या, नो मातापित्रादिदाक्षिण्यानुरोधात् न वा धनादिलाभापेक्षकृतकमात्रश्रद्धानं निश्चितपरिज्ञानं तदेव तथ्यं यज्जिनैर्भाषितमुपलब्धं वा, इत्येवं समासकल्पनाद्वयं निर्दिश्यावयवार्थं दर्शयन्नाह—**तत्त्वानीत्यादि**। **तत्त्वानि** इत्यविपरीतभावव्यवस्थानि नियतानि **जीवादीनि** इति। जीवा उपयोगलक्षणा (२-८) आदिर्येषां सूत्रक्रममाश्रित्य तानि जीवादीनि। तत्त्वार्थशब्दयोर्विशेष्यकल्पनामाश्रित्याह—**त एव चार्था** इति। त एव चेति अर्थापेक्षया पुंल्लिङ्गनिर्देशः, **त एव** जीवादयः, **अर्था** अर्यमाणत्वाद् अनादिसादिपारिणामिकादिना भावेन जीवपुद्गला अनादिपारिणामिकेन च जीवत्वेनोपयोगस्वरूपेण सादिपारिणामिकेन च मनुष्यनारकतिर्यग्देवादिना, पुद्गला अप्यजीवत्वेनानुपयोगस्वरूपेणानादिपारिणामिकेन च सादिपारिणामिकेन कृष्णनीलादिना परिच्छिद्यमानत्वात् अर्था इत्युच्यन्ते। धर्माधर्माकाशास्तु अनादिपारिणामिकेनैव गतिस्थित्यवगाहस्वभावेन परिच्छिद्यन्ते, यतो न कदाचित् तामवस्थामत्याक्षुस्त्यजन्ति त्यक्ष्यन्ति वा। परतस्तु सादिपारिणामिकेनापि परिच्छिद्यन्त एव, यथोक्तमाकाशादीनां त्रयाणां परप्रत्ययो नियमत इत्यतः परिच्छिद्यमानत्वादर्था इत्युच्यन्ते॥ श्रद्धानमित्यस्यार्थं निरूपयति—**श्रद्धानं तेषु प्रत्ययावधारणमिति**। अनेन श्रद्धानमित्येतल्लक्षणं तेषु प्रत्ययावधारणमिति कथयति। तेषु इति जीवादिषु॥ ननु च षष्ठ्यर्थं प्राक् प्रदर्श्य सप्तम्यर्थकथनमिदानीमसाम्प्रतमिति। उच्यते—एतत् कथयति, प्रायः षष्ठीसप्तम्योरभेद एव दृश्यते, यथा गिरेस्तरवः गिरौ तरव इति, ये हि तस्यावयवास्ते तस्मिन् भवन्ति, एवमत्रापि यज्जीवादीनां श्रद्धानं तज्जीवादिषु विषयेषु भवतीति न दोषः। **प्रत्ययावधारणमिति**, प्रत्ययेन प्रत्ययात् प्रत्यये प्रत्ययस्यावधारणमिति। यदा तावत् प्रत्ययेनावधारणं, तदा आलोचनाज्ञानेन श्रुताद्यालोच्य एवमेतत् तत्त्वमवस्थितमित्यवधारयति। अवधारणमिति च कर्तरि भावे वा, जीवोऽवधारयति, तस्य चावधारणं रुचिरिति। अथवा प्रत्ययेनेति कारणेन निमित्तेनावधारणम्। किं निमित्तमिति चेत्, तदावरणीयकर्मणां क्षयः क्षयोपशमो वा, तेन निमित्तेनावधारयति एतदेव तत्त्वम्। अथवा उत्पत्तिकारणं प्रत्ययः, स्वभावोऽधिगमो वा, तेन प्रत्ययेन कारणेनेति, एवं तत्त्वमवस्थितमित्यवधारयति। तस्माद् वा क्षयादिकादवधारणम्। सति वा तस्मिन्नवधारयति। षष्ठीपक्षेऽपि प्रत्ययस्य—विज्ञानस्यावधारणं अन्यमतपरिकल्पिततत्त्वादपास्य तद्विज्ञानं जैन एव तत्त्वेऽवधारयति, एतदेव तत्त्वं शेषोऽपरमार्थ इति। एवं तत्त्वार्थश्रद्धानमिति विवृतं पदं, सम्यग्दर्शनमिति तु पूर्वयोग एव विवृतं न तद् विवृणोति। एतत् पुनः सम्यग्दर्शनं कथमुत्पन्नं सत् परेण ज्ञायते किं चिह्नमस्योत्पन्नस्येति? चिह्नं दर्शयति—**तदेवमित्यादि**। तद् इति तत्त्वार्थश्रद्धानं निर्दिशति। एवमित्यवय-

षष्ठीसप्तम्योः कथंचिदभेदः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वप्रतिभागेन निर्धारितं प्रशमादिचिह्नमवबुध्यस्व । सुपरीक्षितप्रवक्तृप्रवाच्यप्रवचनतत्त्वाभिनिवेशाद् दोषाणामुपशमात् **प्रशम** इत्युच्यते, इन्द्रियार्थपरिभोगव्यावृत्तिर्वा प्रशमः, तस्य प्रशमस्याभिव्यक्तिः—आविर्भावश्चिह्नं लक्षणं भवति सम्यग्दर्शनस्य । यो ह्यतत्त्वं विहायात्मतातत्त्वं प्रतिपन्नः स लक्ष्यते सम्यग्दर्शनसम्पन्न इति । **संवेगः**—सम्भीतिः जैनप्रवचनानुसाराद् यस्य भयं नरकादिगत्यवलोकनाद् भवति, त एव जीवाः स्वकृतकर्मोदयान्नरकेषु तिर्यक्षु मनुजेषु महद् दुःखं शारीरमानसशीतोष्णादिद्वन्द्वापातजनितं भारारोपणाद्यनेकविधं दारिद्र्यदौर्भाग्यादि चानुभवति तद् यथैतन् न भविष्यति तथा यत्नं करोमीत्यनेनापि संवेगेन लक्ष्यते, समस्त्यस्य सम्यग्दर्शनमिति । **निर्वेदो**—विषयेष्वनभिषङ्गोऽर्हदुपदेशानुसारितया यस्य भवति, यथेहलोक एव प्राणिनां दुरन्तकामभोगाध्यवसायोऽनेकोपद्रवफलः परलोकेऽप्यतिकटुकनरकतिर्यग्मनुष्यजन्मफलप्रद इत्यतो न किञ्चिदनेन उज्झितव्य एवायमतिप्रयत्नेनेत्येवंविधनिर्वेदाभिलक्ष्यं सम्यग्दर्शनमिति । **अनुकम्पा**—घृणा कारुण्यं सत्त्वानामुपरि, यथा सर्व एव सत्त्वाः सुखार्थिनो दुःखप्रहाणार्थिनश्च, नैतेषामल्पाऽपि पीडा मया कार्येति निश्चित्य चेतसाऽर्द्रेण प्रवर्तते स्वहितमभिवाञ्छन्नित्यनेनापि चिह्नयते रुचिस्तत्त्वप्रवणा । **आस्तिक्यमिति** अस्त्यात्मादिपदार्थकदम्बकमित्येषा मतिर्यस्य स आस्तिकः तस्य भावः तथापरिणामवृत्तिता आस्तिक्यम्, सन्ति खलु जैनेन्द्रप्रवचनोपदिष्टा जीवपरलोकादयः सर्वेऽर्था अतीन्द्रिया इति, एवंरूपेणाप्यास्तिक्येन ज्ञायते सम्यग्दर्शनयुक्तोऽयमिति । अत एवैषां प्रशमसंवेगनिर्वेदानुकम्पास्तिक्यानां **अभिव्यक्तिः**—उद्भवो—जन्म सैव लक्षणं—चिह्नमस्योत्पन्नस्येति। मौनीन्द्रप्रवचनानुसाराच्च, यदा प्रशमादय आश्रीयन्ते तदा यदपरे चोदयन्ति मिथ्यादृष्टेरप्येवं सम्यग्दर्शनं चिन्हयेतेति तद् दूरापास्तं[2] भवति। नहि तेषामर्हदुपदेशानुसारात् प्रशमादयो जायन्ते, तद्विपरीतमिथ्याज्ञानसमन्वयात् तु यथाकथञ्चिदविदितपरमार्थाः प्रवर्तमानाः प्रशमादिवातेन पीड्यन्ते । सम्प्रति व्याख्याय रुचेर्लक्षणं निगमयति—**तत्त्वार्थश्रद्धानं सम्यग्दर्शनमिति** । सामानाधिकरण्यं चातः कृतवान्, न यतोऽस्त्यनयोरन्यत्वरूपो भेद इति यथाग्नेर्भिन्नरूपो धूमः, यथाऽग्निरुष्ण इत्येवं तत्त्वार्थश्रद्धानं सम्यग्दर्शनमिति ॥ २ ॥

प्रशमादिव्याख्या

एवं निर्धारिते सम्यग्दर्शनस्वरूपे आह—सर्वं ह्युत्पद्यमानं वस्तु हेतुमपेक्ष्योत्पद्यते घटादय इव मृदादिना, एवमिदं प्रागवस्थायां मिथ्यादृष्टेरप्रकटीभूतमुत्तरकालमुपजायमानं प्रशमादिना लक्ष्यते, तस्य पुनरुत्पत्तौ को हेतुरित्युच्यते—

सूत्रम्—तन्निसर्गादधिगमाद् वा ॥ १—३ ॥

टी०—तच्छब्द एतच्छब्दार्थे मत्वेत्याह—

---

१ ' सर्वेषामतीन्द्रियाः ' इति ख-पाठः । २ ' दूरादपास्तं ' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निसर्गाधिगम-वर्णनम्

भा०—तद् एतत् सम्यग्दर्शनं द्विविधं भवति। निसर्गसम्यग्दर्शनम् अधिगमसम्यग्दर्शनं च। निसर्गादधिगमाद् वोत्पद्यत इति द्विहेतुकं द्विविधम्। निसर्गः परिणामः स्वभावः अपरोपदेश इत्यनर्थान्तरम्। ज्ञानदर्शनोपयोगलक्षणो जीव इति वक्ष्यते (२-८)। तस्यानादौ संसारे परिभ्रमतः कर्मत एव कर्मणः स्वकृतस्य बन्धनिकाचनोदयनिर्जरापेक्षं नारकतिर्यग्योनिमनुष्यामरभवग्रहणेषु विविधं पुण्यपापफलमनुभवतो ज्ञानदर्शनोपयोगस्वाभाव्यात् तानि तानि परिणामाध्यवसायस्थानान्तराणि गच्छतोऽनादिमिथ्यादृष्टेरपि सतः परिणामविशेषादपूर्वकरणं तादृग् भवति येनास्यानुपदेशात् सम्यग्दर्शनमुत्पद्यत इत्येतत् निसर्गसम्यग्दर्शनम्॥ अधिगमः अभिगम आगमो निमित्तं श्रवणं शिक्षा उपदेश इत्यनर्थान्तरम्। तदेवं परोपदेशाद् यत् तत्त्वार्थश्रद्धानं भवति तदधिगमसम्यग्दर्शनमिति॥

टी०—तदेतदिति। एतदित्युक्तेऽप्यनेकस्य विषयस्य प्रत्यक्षस्य एतच्छब्दवाच्यस्य सम्भवात् प्रकृतेन व्यवच्छेदं करोति—**सम्यग्दर्शनमिति**। निमित्तद्वयेनोपजायमानत्वाद् **द्विविधमित्याह**, न पुनरत्र मुख्यया वृत्त्या भेदः प्रतिपादयितुमिष्टः, कारणस्य पृष्टत्वादिति, तेनैव निमित्तद्वयेन व्यपदिशन्नाह—**निसर्गसम्यग्दर्शनं अधिगमसम्यग्दर्शनं** चेति। आत्मनस्तीर्थकराद्युपदेशदानमन्तरेण स्वत एव जन्तोर्यत् कर्मोपशमादिभ्यो जायते तत् **निसर्गसम्यग्दर्शनम्**, यत् पुनस्तीर्थकराद्युपदेशे सति बाह्यनिमित्तसव्यपेक्षमुपशमादिभ्यो जायते तत् **अधिगमसम्यग्दर्शनमिति**, च शब्दो भिन्ननिमित्तप्रदर्शनपरो निसर्गसम्यग्दर्शनस्य निसर्ग एव प्रयोजनमितरस्य त्वधिगम एव, न पुनरेकस्यैव सम्यग्दर्शनोत्पत्तौ द्वयं निमित्तं भवतीति एतदेव वाऽ(चा?) समासकरणे प्रयोजनं चशब्देन द्योतितमिति, इतरथा ह्येवं वक्तव्यं स्यात् निसर्गाधिगमाभ्यामिति, वाशब्दोऽपि च न कर्तव्यो भवति एकस्यैवोभयरूपस्य निमित्तस्याश्रितत्वादिति। तदेवं लघुनोपायेन सिद्धेऽर्थे यद् भिन्नविभक्तितां शास्ति तत् कथयति—भिन्ने खल्वेते[1] कारणे। अथ कथं तदेवं व्यपदिश्यते निसर्गसम्यग्दर्शनं कथं वाऽधिगमव्यपदेशं प्रतिपद्यत इत्यत आह—**निसर्गादधिगमाद् वोत्पद्यत** इति। **इति** तस्मादित्यस्यार्थे, यच्छब्दस्तु यत्तदोर्नित्यसम्बन्धादेव नीयते, यस्मान्निसर्गादधिगमाच्च कारणादुपजायते तस्मात् तेनैव व्यपदिश्यते यवाङ्कुरवत्, यत्तदपूर्वकरणानन्तरभाव्यनिवृत्तिकरणं तत् निसर्ग इति भण्यते। तस्मात् कारणात् निसर्गाख्यादुत्पद्यते याऽसौ रुचिः सा कार्याख्या[2]। तथा योऽसौ बाह्य उपदेशः स त(य?)त्र हेतुर्भवति तत उत्पद्यते या रुचिः सा तत्कार्या भवतीत्येवं कार्या रुचिः कारणं

---

१ 'खल्वेव' इति क-ख-पाठः। २ 'सा तत्कार्याख्या' इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निसर्गोऽधिगमो वेति । एवं च कार्यकारणभावे दर्शिते चोदक आह–यदि मुख्यया वृत्त्या हेतुः प्रतिपाद्यते सूत्रेण तथा सति किमेवं पुरस्ताद् व्यपादेशि[1] भवता तदेतत् सम्यग्दर्शनं द्विविधमिति ? एवं तु वाच्यमासीत्–तस्य सम्यग्दर्शनस्य द्वौ हेतू इति, तावेव सूत्रप्रतिपाद्यौ हेतू प्रदर्शनीयौ, न पुनः सूत्रेणानभिसमीक्षितं द्विविधत्वमित्येवं पर्यनुयुक्तः स्माह–**द्विहेतुकं द्विविधमिति** । द्वौ निसर्गाधिगमाख्यौ प्रत्येकं असमासकरणज्ञापितौ हेतू यस्य तद् द्विहेतुकम्, स तु द्विविधमिति मया व्यपदिष्टं, एतत् कथयति कारणद्वैरूप्यात् कार्यद्वित्वं न पुनर्मुख्यभेदप्रतिपादनं प्रेप्सितं, इह तु सूत्रे निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानत इति (१-७) । विधानग्रहणात् क्षयसम्यग्दर्शनादिविधानं प्रतिपादयिष्यते । यदि तर्ह्युत्पत्तौ निसर्गः कारणमभ्युपेयते तथा सति वाच्यो निसर्गः किमात्मकोऽसाविति ? उच्यते–**निसर्गः परिणामः स्वभावः अपरोपदेश इत्यनर्थान्तरमित्यादि** । निसृज्यते–त्यज्यतेऽसौ कार्यनिर्वृत्तौ सत्यामिति **निसर्गः**, नहि कार्ये उत्पन्ने कारणेनापेक्षितेन किञ्चित् प्रयोजनमस्ति, उत्पन्ने हि सम्यग्दर्शने अनिवृत्तिकरणं त्यज्यते, प्रयोजनाभावात्, न चात्यन्तं तस्य त्यागमभ्युपगच्छामो, यतस्तदेव कारणं तेनाकारेण परिणतमिति, उत्फणविफणप्रसारिताकुण्डलितभुजङ्गवत्,(उत्–) फणपरिणामेन योऽहिरजिह्म स एव विगतफणो मुकुलमाधाय सन्तिष्ठते, उत्थितासीनशयितनिकुटितपुरुषवद्, वा उत्थितोऽपि पुरुषः पुरुष एव निषण्णः शयितो वा,

परिणामभेदः

नावस्थामात्रभेदादवस्थावतो भेदः शक्योऽभ्युपेतुम्, परिशटितपत्राङ्गारकितपुष्पितपलाशवत् परिणामस्यानेकरूपत्वात् । परिणामिनोऽन्वयिद्रव्यस्य न सर्वथा भेदस्तत्त्वात् । एवमिहाप्यनिवृत्तिरूपो निसर्गः **परिणामः** सम्यग्दर्शनाकारेण वर्तते, पूर्वावस्थां विहाय परिणामः, अन्वयि जीवद्रव्यं तु ध्रुवं परिणामि चोक्तम्, सृजेः परिणामेऽप्रतीतत्वात् स्वभाव इत्याह । यतः परिणामो हि प्रयोगेण घटादीनां विस्रसा चाभ्रेन्द्रधनुरादीनां दृष्ट इत्यतः वैस्रसिकपरिणामं कथयत्यनेन, नासावन्येन प्राणिना तस्य क्रियतेऽनिवृत्तिरूपपरिणाम इति, स्वेनैवात्मनाऽसौ भावो जनित इति **स्वभाव** इत्युच्यते, नार्थान्तरवृत्तित्वमस्ति व्यवहारात्, निश्चयात् तु सर्वशब्दानां भिन्नार्थत्वम् । स पुनरनिवृत्तिस्वरूपपरिणामः कस्य भवति कथं वा प्राप्यते ? इत्युक्ते उत्तरं भाष्यमाह–**ज्ञानदर्शनेत्यादि** । येनास्यानुपदेशात् सम्यग्दर्शनमुत्पद्यते इत्येतत्पर्यन्तं यदुक्तं कस्येति ? जीवस्येति ब्रूमः । किंलक्षणो जीव इति ?। नह्यपरिज्ञाते जीवे तस्यैष इति शक्यं प्रतिपत्तुमिति । उच्यते–ज्ञानाद्युपयोगलक्षण इति ।

उपयोगरूपो जीवः

ज्ञानं च दर्शनं च तावेवोपयोगौ लक्षणमस्य स ज्ञानदर्शनोपयोगलक्षण इति, ज्ञानं नाम यज्जीवादीनां पदार्थानां विशेषपरिच्छेदितया प्रवर्तते तद् ज्ञानम्, यत् पुनस्तेषामेव सामान्यपरिच्छेदप्रवृत्तं स्कन्धावारोपयोगवत् तद् दर्शनमभिधीयते । न च कश्चिदेवमात्मकः प्राणी विद्यते य आभ्यां रहित इति,

---

१ 'व्यपादिशि' इति क–ख–पाठः । २ 'युक्तमाह' इति क–ख–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

येऽपि हि प्रकृष्टावरणकर्मपटलाच्छादिता निगोदादयः पञ्चैकेन्द्रिया जीवनिकायास्तेऽपि साकारानाकारोपयोगयुक्ता इति । यतः स्पर्शनेन्द्रियं हि तेषामस्ति, तच्च साकारानाकारोपयोगस्वरूपमतो व्यापिलक्षणम् । ज्ञानदर्शनोपयोगौ लक्षणमस्येतत् सूक्तमिति । इतिशब्दः एवकारार्थे, जीव एवोपयोगलक्षणो न परमाण्वादय इति । वक्ष्यते—अभिधास्यते, उपयोगलक्षणो जीव इत्यस्मिन् द्वितीयाध्यायवर्तिनि सूत्रे, अतो निर्ज्ञातस्वरूपस्य जीवस्य स निसर्गरूपः परिणाम इति । यदप्युक्तं कथं प्राप्यत इति, तत् कथयति—**तस्यानादावित्यादिना** ।

निसर्गप्राप्तिरीतिः

तस्येति निर्धारितस्वरूपं जीवमाह । तस्य जीवस्यानुभवत इत्यनेन सहाभिसम्बन्धः । तथा स्थानान्तराणि गच्छतोऽनादिमिथ्यादृष्टेरपि सत एतानि सर्वाणि जीवविशेषणानि । अनादौ संसार इत्यस्य तु नरकादिभवग्रहणेष्वित्येतद् विशेषणम्, कर्मत एव कर्मणः स्वकृतस्येति त्रयाणां विशेषणविशेष्यता, बन्धनिकाचनोदयनिर्जरापेक्षं विविधं इत्येतद् द्वयं पुण्यपापफलमित्यस्य विशेषणम्, अनुभवत इत्यस्य तु हेतुग्रन्थोऽयं ज्ञानदर्शनोपयोगस्वाभाव्यादिति, तानि तानीत्यादिपदद्वयं गच्छत इत्यस्य व्याप्यं कर्म, एवं सम्बन्धे कथिते विवृणोति—अविद्यमान आदिरस्य सोऽयम् **अनादिः**, न खलु संसारस्यादिर्दृष्टः केवलज्योतिषाऽपि प्रकाशिते समस्तज्ञेयराशौ, अतस्तस्याभावादनुपलब्धिः, न तु ज्ञानस्याशक्तिर्ग्रहणं प्रतीति । सन्धावन्ति यत्र स्वकर्मभिः प्रेर्यमाणा जन्तवः स संसार इति, उत्पत्तिस्थानानि नरकादीनि, निश्चयनयस्य तु सर्वं स्वप्रतिष्ठं वस्त्विति आत्मैव, त एव वा प्राणिनः सन्धावन्तस्तांस्तान् परिणामान्नारकादीन् संसार इति कथ्यते, अनादौ संसार इति च सृष्टिं निरस्यति । नहि कश्चिज्जगतः स्रष्टा

जगत्कर्तृत्ववाद-निरासः

कर्ता समस्ति पुरुषः, यथैव हि तेन केनचित् सृष्टाः प्राण्यादि (?)-मन्तस्तथाऽन्येऽपि प्राणिनः । कर्त्रन्तराभ्युपगमे चानवस्था । सति चोपकरणकलापे दलिकद्रव्ये च निपुणाः कुम्भकारादयः कार्योत्पादाय यतमानाः फलेन युज्यन्ते नान्यथा, न चाकाशादीनां कारणमुपलभ्यते किञ्चित्, नापि किञ्चित् सर्गे जगतः स्रष्टुः प्रयोजनमस्ति प्रेक्षापूर्वकारिणः । क्रीडाद्यर्थमिति चेत्, कुतः सर्गशक्तिः ? प्राक्कृतत्वात् । सुखितदुःखितदेवनारकसत्त्वोत्पादने चाकस्मिकः पक्षपातो द्वेषिता चेति । एवं कार्यकारणसम्बन्धः समवायपरिणामनिमित्तनिर्वर्तकादिरूपः **सिद्धिविनिश्चय-सृष्टिपरीक्षातो** योजनीयो विशेषार्थिना दूषणद्वारेणेति । **कर्मत** इति पञ्चमी, ज्ञानावरणादिकाष्टविधादुदयप्राप्तात् क्रोधाद्याकारपरिणामहेतुकात् यद्यदन्यत् कर्मोपचितज्ञानावरणादि तस्य **कर्मणः स्वकृतस्येति** । तच्च कर्मतो यदुपादायि कर्म तत् स्वेनात्मना कृतं न पुनः प्रजापतिप्रभृतिना तत् कर्म संश्लेषितमात्मसामर्थ्यात्, एतत् स्याद् यदाऽऽदिकर्म प्रजापतिरकरोत् सर्वप्राणिनां ततोऽन्या कर्मसन्ततिः स्वकृतेतीष्टमेव प्रसाधितमिति, उच्यते—एवमर्थमेवैवकारः प्रयुज्यते, कर्मत एव सर्वं कर्म बध्यते, अनादित्वात्, संसृतेरादिकर्मैव नास्ति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिषिद्धश्च कर्ता। तदपि वा कर्मत एव बध्यते कर्मत्वादिदानीन्तनकर्मवत्। एवंविधस्यास्योपात्तस्य कर्मणः फलमनुभवत इति। किमपेक्षं पुनस्तत्फलमाह—**बन्धनिकाचनोदयनिर्जरापेक्षम्**इति। बन्धो नाम यदाऽऽत्मा रागद्वेषस्नेहलेशावलीढः सकलात्मप्रदेशो भवति तदा येष्वेवाकाशदेशेष्ववगाढस्तेष्वेवावस्थितान् कार्मणविग्रहयोग्याननेकरूपान् पुद्गलान् स्कन्धीभूतानाहारवदात्मनि परिणामयति सम्बन्धयतीति[1] स्वात्मा ततस्तानध्यवसायविशेषाज्ज्ञानादीनां गुणानामावरणतया विभजते हंसः क्षीरोदके यथा, यथा वा आहारकाले परिणतिविशेषक्रमवशादाहर्ता रसखलतया परिणतिमानयत्यनाभोगवीर्यसामर्थ्यात्, एवमिहाप्यध्यवसायविशेषात् किञ्चिद् ज्ञानावरणीयतया किञ्चिद् दर्शनाच्छादकत्वेनापरं सुखदुःखानुभवयोग्यतया परं च दर्शन[2]चरणव्यामोहकारितयाऽन्यन्नारकतिर्यङ्मनुष्यामरायुष्केनान्यद् गतिशरीराद्याकारेणाऽपरमुच्चनीचगोत्रानुभावेनाऽन्यद् दानाद्यन्तरायकारितया व्यवस्थापयति। एष **प्रकृतिबन्धः**। स्थितिबन्धस्तु, तस्यैवं प्रविभक्तस्य अध्यवसायविशेषादेव जघन्यमध्यमोत्कृष्टां स्थितिं निर्वर्तयति ज्ञानावरणादिकस्यैष **स्थितिबन्धः**। अनुभावबन्धस्तु, कृतस्थितिकस्य स्वस्मिन् काले परिपाकमितस्य याऽनुभूयमानावस्था शुभाशुभाकारेण घृतक्षीरकोशातकीरसोदाहृतिसाम्यात्सोऽनुभावबन्धः। प्रदेशबन्धस्तु, अनन्तानन्तप्रदेशान् स्कन्धानादायैकैकस्मिन् प्रदेशे एकैकस्य कर्मणो ज्ञानावरणादिकस्य व्यवस्थापयतीत्येष **प्रदेशबन्ध** इति। **निकाचना** तु स्पृष्टानन्तरभाविनी, स्पृष्टता तु नोक्ता भाष्यकारेण पृथग् निकाचनाभेद एवेतिकृत्वा। कथमिति चेत्, भावयामः, बद्धं नामात्मप्रदेशैः सह श्लिष्टं, यथा सूचयः कलापीकृताः परस्परेण बद्धाः कथ्यन्ते, ता एवाग्नौ प्रतिक्षिप्तास्ताडिताः समभिव्यै[3]ज्यमानान्तराः स्पृष्टा इति व्यपदिश्यन्ते,ता एव यदा पुनः पुनः प्रताप्य घनं घनेन ताडिताः प्रनष्टस्वविभागा एकपिण्डतामितास्तदा निकाचिता इति व्यपदेशमश्नुवते, एवं कर्माप्यात्मप्रदेशेषु योजनीयम्। तस्यैवं निकाचितस्य प्रकृत्यादिबन्धरूपेणावस्थितस्य उदयावलिकाप्रविष्टस्य प्रतिक्षणमुदयमादर्शयतो याऽवस्था शुभाशुभानुभावलक्षणा स उदयो विपाक इति। उदयानुभावसमनन्तरमेवापेतस्नेहलेशं परिशटत् प्रतिसमयं कर्म निर्जराव्यपदेशमङ्गीकरोतीति। बन्धादयः कृतद्वन्द्वास्ता अपेक्षत इति कर्मण्यण्। बन्धनिकाचनोदयनिर्जरापेक्षं, किं तत् फलं, कथं पुनस्तत्फलं बन्धाद्यपेक्षते? उच्यते—यतो बन्धादिष्वसत्सु न तत्सम्भव इति। क? अनुभवतो, नन्वभिहितमनादौ संसार इति, स पुनः किंभेद इति एतत् कथयति—**नारकेत्यादि**। नारकतिरश्चोर्योनिः—उत्पत्तिस्थानम्, तच्च द्वितीये वक्ष्यत इति। मनुष्याश्चामराश्च तेषां भवः—प्रादुर्भावस्ते भवन्ति यत्र। **ग्रहणानि**—आदानानि तच्छरीरग्रहणानि इत्यर्थः। तेषु च तेषु भवेषु अनादिसंसारात्मसु, **विविधमित्यनेकविधम्**,

---

१ 'तीति ततः' इति **ग**–पाठः। २ 'दर्शनावरण' इति **ख**–टी–पाठः। ३ 'समभिपद्यमानान्तरा' इति **ख**–टी–पाठः। ४ 'क्वानुभवो' इति **क**–**ख**–पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतः सातसम्यक्त्वहास्यादिकाः प्रकृतयो विविधास्तासां फलमपि विविधमेवेति । तथा ज्ञानावरणाद्या अपि विविधास्तत्फलमपि विविधमुच्यते, पुण्यमनुग्रहकारि सातादि, पापमुपघातकारि ज्ञानादिगुणानाम्, तयोः पुण्यपापयोः **फलं**-स्वरसविपाकरूपं पुण्यपापफलम्, तदनुभवतो जीवस्योपभुञ्जानस्य, अनु पश्चादर्थे, पूर्वं ग्रहणं पश्चात् फलोपभोग इति । कथमनुभवत इत्याह-**ज्ञानदर्शनोपयोगस्वाभाव्यात्**, ज्ञानदर्शने व्याख्याते तयोः स्वाभाव्यं तस्मात् ज्ञानदर्शनोपयोगस्वाभाव्यादिति । एतदुक्तं भवति—यदा यदोपभुङ्क्ते तदा तदा चेतयते सुख्यहं दुःखितोऽहमित्यादि, साकारानाकारोपयोगद्वयसमन्वितत्वादवश्यतया चेतयत इति, उत्तरग्रन्थेनापि सम्बन्धोऽस्य । **तानि तानीत्यादि** । ज्ञानदर्शनोपयोगस्वाभाव्यादेव तानि तानि परिणामान्तराणि याति न तु ताभ्यां रहित इति । तानि तानीति मुहूर्ताभ्यन्तरेऽपि मनसश्चलत्वाद् बहूनि गच्छति, तानि चेह शुभानि ग्राह्याणि, यतो दर्शनं सम्प्राप्नोति शुभाज्ञा(?)मास्कन्दन्निति, तेषां बहुत्वाद् वीप्सया निर्दिशति। अथवा यान्येव पूर्वाण्यध्यवसायान्तराणि तान्येव पराध्यवसायतया वर्तन्त इत्यन्वयं दर्शयति—**परिणामश्चानेकरूपो** विज्ञानादिस्वभावः चेतनाचेतनद्रव्यगतः, तत्राचेतनः परमाण्वादीनां शुक्लादिः, चेतनस्य तु विज्ञानदर्शनादिर्विषयस्वरूपपरिच्छेदात्मकः । तथा देवाद्यवस्थाऽपुद्गलात्मिका अविवक्षितचेतनाभावाऽचेतनास्वभावा वेति । अतः परिणामस्य व्यभिचारे विशेषणोपादानमर्थवत्पश्यन्नुवाचेदं परिणामोऽध्यवसायरूप इति । तस्य **स्थानान्तराणि** मलीमसमध्यतीव्राणि, शुभे जघन्ये वर्तित्वात् ततो विशुद्धतरं स्थानमन्यदारोहति, ततोऽपि विशुद्धतममपरमधिगच्छतः प्राप्नुवतो वर्धमानशुभपरिणतेरित्यर्थः, अनेन च गच्छत इति समस्तमिदं चतुर्विधसामायिकोत्पादकाण्डं सूचितं भवति ॥

"सत्तण्हं पयडीणं अब्भिन्तरओ उ कोडिकोडीए ।
काऊण :सागराणं जइ लहइ चउण्णमेगयरं ॥"[1]

—**विशेषावश्यके** गा० ११९३

अत्र बहु वक्तव्यमित्यतः प्रकृतोपयोगि केवलमुच्यते । स खलु जीवस्तानि शुभान्यध्यवसायान्तराण्यास्कन्दन्ननाभोगनिर्वर्तितेन यथाप्रवृत्तिकरणेन तामुत्कृष्टां कर्मस्थितिमवाप्तास्य कोटीकोट्याः सागरोपमानामन्तः क्षपयंस्तावत् प्रापयति यावत् तस्या अपि पल्योपमासङ्ख्येयभागः क्षपितो भवति तस्मिन् स्थाने प्राप्तस्यातिप्रकृष्टघनरागद्वेषपरिणामजनितः वज्राश्मवद् दुर्भेदकठिनरूढगूढग्रन्थिर्जायते, तत्र कश्चिद् भव्यसत्त्वस्तं भित्त्वाऽपूर्वकरणबलेन प्राप्तानिवृत्तिकरणस्तत्त्वार्थश्रद्धानलक्षणं सम्यग्दर्शनमासादयति, कश्चिद् ग्रन्थिस्थानादधो निवर्तते, कश्चित् तत्रैवावतिष्ठते, न परतो नाधः प्रसर्पतीति । अत्र चोपदेष्टारमन्तरेण यत् सम्यक्त्वं तन्नैसर्गिकमाचक्षते प्रवचनवृद्धाः ।

निसर्गाध्यवसायप्राप्तिः

१ सप्तानां प्रकृतीनां आभ्यन्तरं तु कोटिकोट्याः ।
कृत्वा सागरोपमाणां यदा लभते चतुर्णामेकतरत् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एनमेव च विप्रकीर्णमर्थमाख्यातवान् तानि तानीत्यादिना भाष्यग्रन्थेनोत्पद्यत इत्येवमन्तेन । **अनादिमिथ्यादृष्टेरपि** [इति]। नास्यादिरस्तीत्यनादिः अनादिर्मिथ्यादृष्टिरस्येत्यनादिमिथ्यादृष्टिः—अप्राप्तपूर्वसम्यक्त्वलाभः, न चास्ति कश्चित् तादृक् कालो यस्मिन्नुपदिश्येतायं मिथ्यादर्शनं प्रतिपन्नवानिति । तथा चागमः "अत्थि अणन्ता जीवा जेहिं न पत्तो तसाइपरिणामो"[1] । तस्यानादिमिथ्यादृष्टेः, **अपि**शब्दात् सादिमिथ्यादृष्टेरपि, यो हि भव्यः सम्यक्त्वं प्रतिपद्य प्राक् पश्चादनन्तानुबन्धिकषायोदयाज्जातव्यलीको मनोज्ञपरमान्नबद्धमतिर्जघन्येनान्तर्मुहूर्तं स्थित्वोत्कर्षेणापार्धपुद्गलपरावर्तं पुनः प्रतिपद्यमानः सादिमिथ्यादृष्टिर्भवति, तस्यापि **सतो**—भवतः **परिणामविशेषात्**, परिणामोऽध्यवसायश्चित्तं तस्य विशेषः स एव वा पूर्वं जघन्यमङ्गीकृत्य परः **परः** शुभो विशेष इत्युच्यते, परिणामविशेषश्चेह यथाप्रवृत्तिकरणमभिमतं, ततः परं **अपूर्वकरणं**, अप्राप्तपूर्वं **तादृशं** अध्यवसायान्तरं जीवेनेत्यपूर्वकरणमुच्यते ग्रन्थिं विदारयतः, ततश्च ग्रन्थिभेदोत्तरकालभाव्यनिवृत्तिकरणमासादयति, यतस्तावन्न निवर्तते यावत् सम्यक्त्वं न लब्धमित्यतोऽनिवृत्तिकरणं, ग्रन्थान्तरे प्रसिद्धत्वात् भाष्यकारेणानिवृत्तिकरणं नोपात्तम् । अवश्यतया वा सम्यग्दर्शनं लभमानस्तल्लभत इति काक्काऽभ्युपेतमेव, तदभावेऽभावात्, अतो न कश्चिद् विरोध इति । सम्प्रति निगमयति—**यदेवमुपजातमेतन्निसर्गसम्यग्दर्शनमिति**[2] । जीवस्य उपयोगस्वाभाव्यात् तदधिगमात् प्राप्यते । कोऽधिगम इति चेत् तदुच्यते—**अधिगमोऽभिगम** इत्यादि । गमेर्गत्यर्थत्वाज्ज्ञानार्थता, गमो ज्ञानं रुचिरिति, अधिको गमोऽधिकं ज्ञानम्, कथं वाधिक्यम्? यस्मात् परतो निमित्ताद् भवति तदाधिक्यादधिकमुच्यते, **अभिगमस्तु** गुरुमाभिमुख्येनालम्ब्य यज्ज्ञानं सोऽभिगमः । **आगमस्त्वागच्छत्यव्यवच्छित्त्या**[3] वर्णपदवाक्यराशिरासप्तप्रणीतः पूर्वापरविरोधशङ्कारहितस्तदालोचनात्तत्त्वरुचिरागम उच्यते, कारणे कार्योपचारात्, नड्वलोदकं पादरोग इति । **निमित्तं** तु यद् यद् बाह्यं वस्तूत्पद्यमानस्य सम्यग्दर्शनस्य प्रतिमादि तत् तत् सर्वमागृहीतं, ततो निमित्तात् प्रतिमादिकात् सम्यक्त्वं निमित्तसम्यग्दर्शनमुच्यते । **श्रवणं** श्रुतिराकर्णनं ततो यज्जायते । **शिक्षा**—पुनः पुनरभ्यासः, आप्तप्रणीतग्रन्थानुसारी ततो यद् भवति । उपदिशतीत्युपदेशो—गुरुरेव देववच्छब्दसंस्कारस्ततो यत् प्रादुरस्ति । एवमेते किञ्चिद् भेदं प्रतिपद्यमाना अनर्थान्तरमिति व्यपदिश्यन्ते । एवं पर्यायकथनं कृत्वा सम्पिण्डय कथयति—**तदेवमित्यादिना** ॥ तदधिगमसम्यग्दर्शनम्, एवमित्यनेनोक्तेन भेदनिरूपणेन यद् भवति । परोपदेशादित्यनेन तु निमित्तमात्रमाक्षिप्तं ग्राह्यम्, अन्यथोपदेशाच्छब्दादिति [न] व्याप्तिराख्याता स्यात्, यतो न केवलं शब्दादेव भवति, किन्तु कस्यचिद् भव्यस्य प्रतिमाद्या-

---

१ सन्ति अनन्ता जीवा यैः न प्राप्तः त्रसादिपरिणामः ।

२ 'यथेवमुपजातमेव । तन्नि०' इति क-ख-पाठः । ३ 'व्यवस्थित्या' इति ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोक्य भवत्येव । **परोपदेशात्** परोपष्टम्भेन यदुदेति तत्त्वार्थेषु—जीवादिषु श्रद्धानं—रुचिस्तदधिगमसम्यग्दर्शनमिति ॥ ३ ॥

सम्प्रत्युत्तरसूत्रसम्बन्धं स्वयमेव लगयन्नाह—

भा०—अत्राह तत्त्वार्थश्रद्धानं सम्यग्दर्शनमित्युक्तम् । तत्र किं तत्त्वमिति? । अत्रोच्यते ॥ ३ ॥

टी०—अत्राहेत्यादि । अत्र—एतस्मिंस्तत्त्वार्थश्रद्धानलक्षणे सम्यग्दर्शने विषयस्वरूपोपरक्ते व्याख्याते विषयविवेकमज्ञानंश्चोदकोऽनुनुदत्—भवता तत्त्वार्थश्रद्धानं सम्यग्दर्शनमित्येतदुक्तं, तत्र किं तत्त्वमिति, तत्रेत्यनेन तत्त्वार्थश्रद्धानशब्दे यस्तत्त्वशब्दस्तत्र किं तत्त्वं किं तस्याभिधेयमिति ॥ ननु चायुक्तोऽयं प्रश्नो, भाष्ये तत्त्वस्य पुरस्तान्निर्णयः कृत इति, तत्त्वानि जीवादीनि वक्ष्यन्ते त एवार्था इत्यस्मिन्, अतो निर्ज्ञाते तत्त्वे प्रश्नयतो जाड्यमवसीयते, उच्यते—न जाड्यात् प्रश्नः, सत्यमुक्तं तत्त्वानि जीवादीनि, आदिशब्देन तु अनेकस्याक्षेप इति नास्तीयत्ता, तस्माद् भाष्याद् न निर्णयोऽतः इयत्तापरिज्ञानाय प्रश्नः । सूरिराह—अत्रोच्यते । अत्र भवत्प्रदर्शिते तत्त्वशब्दे यदभिधेयं तदियत्तया निवृत्तस्वरूपमुच्यते—

सूत्रम्—जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम् ॥ १—४ ॥

टी०—**जीवाजीवास्रव** इत्यादिना । समासपदं चैतत्, समासपदे च विग्रहमन्तरेण न सुखेन प्रतिपत्तिः परस्मै शक्या कर्तुं इत्यतो विग्रहयति ।

भा०—**जीवा अजीवा आस्रवा[1] बन्धः संवरो निर्जरा मोक्ष इत्येष सप्तविधोऽर्थस्तत्त्वम् । एते वा सप्त पदार्थास्तत्त्वानि । तान् लक्षणतो विधानतश्च पुरस्ताद् विस्तरेणोपदेक्ष्यामः** ॥ ४ ॥

जीवादितत्त्वसप्तकस्य स्वरूपम् ।

टी०—**जीवा अजीवा** इत्यादि । **जीवा** औपशमिकादिभावान्विताः साकारानाकारप्रत्ययलाञ्छनाः शब्दादिविषयपरिच्छेदिनोऽतीतानागतवर्तमानेषु समानकर्तृकक्रियाः तत्फलभुजः अमूर्तस्वभावाः । एभिरेव धर्मैर्वियुता **अजीवाः** धर्मादयश्चत्वारोऽस्तिकायाः । आस्रवते यैर्गृह्यते कर्म त **आस्रवाः** शुभाशुभकर्मादानहेतव इत्यर्थः । **बन्धो नाम,** तैरास्रवैर्हेतुभिरात्तस्य कर्मणः आत्मना सह संयोगः प्रकृत्यादिविशेषितः । तेषामेवास्रवाणां यो निरोधः—स्थगनं गुप्त्यादिभिः स **संवरः** । कर्मणां तु विपाकात् तपसा वा यः शाटः सा **निर्जरा** । ज्ञानशमवीर्यदर्शनात्यन्तिकैकान्तिकाबाधनिरुपमसुखात्मन आत्मनः स्वात्मन्यवस्थानं **मोक्षः** । इतिशब्द इयत्तायाम्, एतावानेव । एष इति भवतः प्रत्यक्षीकृतो वचनेन । सप्त

१ 'आस्रवः' इति क-ख-घ-टी-पाठः । २ 'उपशमिकादि' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विधाः सप्त प्रकारा यस्य स सप्तविधः, अर्थोऽर्थ्यमाणत्वात्, एष **सप्तविधोऽर्थ** इति पदत्रयं

तत्त्वमित्येकवचने हेतुः

तत्त्वमित्यस्य विवरणम्, तत्त्वमिति वाऽव्युत्पत्तौ[1] तथ्यं सद्भूतं परमार्थ इत्यर्थः । व्युत्पत्तौ तु जीवादीनामर्थानां या स्वसत्ता सोच्यते, तस्याश्च सत्तायाः प्रतिभेदं प्रतिवस्तु यो भेदस्तमनादृत्यैकत्वमेकत्वाच्चैकवचनमुपात्तवान् ॥ अथैवं कश्चित् चोदयेत्—याऽसौ जीवादीनां सत्ता, सा न वैशेषिकैरिवास्माभिर्भिन्ना जीवादिभ्योऽभ्युपेयते—यतोऽभिहितम्—"घडसत्ता घडधम्मो तत्तोऽणन्नो पडाइओ भिन्नो[2] (विशे० १७२२)"। तस्मात् प्रतिवस्तु सा भेत्तव्या, प्रतिवस्तु च भिद्यमाना बहुत्वं प्रतिपद्यत इति बहुत्वाद् बहुवचनेन भवितव्यम् तत्त्वानीति, उच्यते—सामान्येन विवक्षिता सती सैकत्वमिव बिभर्ति, मुख्यया तु कल्पनया वस्तुधर्मत्वात् प्रतिवस्तु भेत्तव्या भवति, तदा च बहुवचनेनैव भवितव्यमेवेति, एतदाह—**एते वा सप्त पदार्थास्तत्त्वानीति** । एते प्राक् प्रत्यक्षीकृताः । **वा**शब्दो हि प्रतिवस्तु भिद्यमानं तत्त्वं बहुत्वं प्रतिपद्यत इत्यस्य पक्षस्य सूचकः । सप्त च ते पदार्थाश्च **सप्तपदार्थाः** जीवादयः । **तत्त्वानि** दृश्यानि, पुण्यपापयोश्च बन्धेऽन्तर्भावान्न भेदेनोपादानम् । यद्येवमास्रवादयोऽपि पञ्च तर्हि न जीवाजीवाभ्यां

आस्रवादीनां तत्त्वानां जीवाजीवयोरन्तर्भावः

भिद्यन्ते । कथमिति चेत्, उच्यते—आस्रवो हि मिथ्यादर्शनादिरूपः परिणामो जीवस्य । स च कः आत्मानं पुद्गलांश्च विरहय्य ?। बन्धस्तु कर्म पुद्गलात्मकमात्मप्रदेशसंश्लिष्टम् । संवरोऽप्यास्रवनिरोधलक्षणो देशसर्वभेद आत्मनः परिणामो निवृत्तिरूपः । निर्जरा तु कर्मपरिशाटः, जीवः कर्मणां पार्थक्यमापादयति स्वशक्त्या। मोक्षोऽप्ययमात्मा समस्तकर्मविरहित इति । तस्मात् जीवाजीवास्तत्त्वमिति वाच्यम् । उच्यते—सत्यमेतदेवम्, किंतु इह शास्त्रे शिष्यः प्रवृत्तिं कारितोऽस्मात् कारणात् ज्ञानादिकात् सेव्यमानाद् भवतो मोक्षावाप्तिर्भविष्यत्यन्यथा संसार इति, तस्य च यदि मुक्तिसंसारकारणे न भेदेनाख्यायेते ततोऽस्य सम्यक्प्रवृत्तिरेव न स्यात् । यदा त्वेवं कथ्यते, आस्रवो बन्धश्चैतद्द्वयमपि मुख्यं तत्त्वं संसारकारणम्, संवरनिर्जरे च मुख्यं तत्त्वं मोक्षकारणमिति, तदाऽनायासात् संसारकारणानां हेयतया यतिष्यते मुक्तिकारणानां चादेयतयेति, तस्माच्छिष्यस्य हेयादेयप्रदर्शनायाऽऽस्रवादिचतुष्टयमुपात्तम् । यत् तु मुख्यं साध्यं मोक्षः यदर्था प्रवृत्तिस्तत् कथमिव न प्रदर्श्येतेति, तस्माद् युक्तं यत् पञ्चाप्युपादीयन्त इति । किं पुनरेषां जीवादीनां लक्षणमग्नेरिवौष्ण्यम् ? के वा भेदा जीवादीनां यथा तस्यैवाग्नेस्तार्णपार्ण्यादय इत्युक्ते **तान् लक्षणत** इत्याह । **तान्** जीवादीन् **लक्षणतः**—स्वचिह्नेन, **विधानतो**-भेदेन, चशब्दाद् भेदानपि सप्तभेदान् वक्ष्यामि, **पुरस्तात्**—उपरिष्टात्, किं सङ्क्षेपेणोत विस्तरेण ? **विस्तरेणेत्याह** । कथमिति चेत्, उच्यते—जीवस्य लक्षणमिदमुपयोगलक्षणो जीव इति (२-८), तदेव लक्षणं विधानतः कथयिष्यति, स द्विविधः, साकारोऽनाकारश्च, पुनस्तावष्टचतुर्भेदाविति (२-९), तथा संसारिणो मुक्ताश्च

१ 'चाव्युत्पत्तौ' इति क-ख-पाठः ।

२ घटसत्ता घटधर्मः तस्मादनन्यः पटादितो भिन्नः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(२-१०), पुनर्विस्तरः संसारिणस्त्रसाः स्थावराश्चेत्यादिना (२-१२)। तथा अजीवादीनां धर्मादीनां लक्षणं गतिस्थित्यादि (५-१७), धर्माधर्माकाशानां त्वेकत्वान्नास्ति विधानम् (५-५), प्रदेशान् वाऽङ्गीकृत्यासङ्ख्येयाः प्रदेशाः धर्माधर्मयोः (५-७), जीवस्य च (५-८), आकाशस्यानन्ताः (५-९) इति स्यादेव विधानम्। आस्रवं लक्षणेन भणिष्यति, कायवाङ्मनःकर्म योगः (६-१) स आस्रवः (६-२) इति, पुनस्तस्य भेदं शुभः पुण्यस्येत्यादि (६-३,४)। बन्धस्य लक्षणं भणिष्यति, सकषायत्वात् जीव इत्यादिकम् (८-२), पुनस्तस्य विधानं प्रकृतिस्थित्यादिकम् (८-४)। तथा संवरलक्षणं आस्रवनिरोधः संवर इति (९-१), पुनस्तस्यैव विधानं स गुप्तिसमितिधर्मादिकम् (९-२)। निर्जराया लक्षणं वक्ष्यति, तपसा निर्जरा चेति (९-३), पुनस्तद्भेदा अनशनादयः (९-१९)। मोक्षः कृत्स्नकर्मक्षयलक्षणः (१०-३), प्रथमसमयसिद्धादि विधानम् ॥ ४ ॥

अत्राह—कथं पुनरमी जीवादयोऽधिगन्तव्या इति ? उच्यते—नामादिभिरनुयोगद्वारैस्तथा प्रत्यक्षानुमानाभ्यां (प्रमाणाभ्यां) नैगमादिभिश्च वस्त्वंशपरिच्छेदिभिर्नयैस्तथा निर्देशस्वामित्वादिभिः सत्सङ्ख्याक्षेत्रादिभिश्च। तत्र कतिभेदा जीवा इति पृष्टे चतुर्भेदताख्यानायाह—

सूत्रम्—नामस्थापनाद्रव्यभावतस्तन्न्यासः ॥ १—५ ॥

टी०—इति। अथवाऽभिधास्यति भवान् उपयोगलक्षणो जीवः(२-८),तत्र किं सर्वो जीव उपयोगलक्षणः ? । नेत्याह—भावजीव एवोपयोगलक्षण इति। अथ किमन्योऽप्यस्ति यतो भावजीव इति विशेष्यते ? अस्तीत्याह । कतिविधश्चेत्, उच्यते—नामेत्यादि,·तृतीयार्थे तसिः, सूत्रार्थं च कथयन्नाह—

भा०—एभिर्नामादिभिश्चतुर्भिरनुयोगद्वारैस्तेषां जीवादीनां तत्त्वानां न्यासो भवति। विस्तरेण लक्षणतो विधानतश्च अधिगमार्थं[1] न्यासो निक्षेप इत्यर्थः। तद्यथा—नामजीवः स्थापनाजीवो द्रव्यजीवो भावजीव इति। नाम संज्ञाकर्म इत्यनर्थान्तरम्। चेतनावतोऽचेतनस्य वा द्रव्यस्य जीव इति नाम[2] क्रियते स नामजीवः। यः काष्ठपुस्तचित्रकर्माक्षनिक्षेपादिषु स्थाप्यते जीव इति स स्थापनाजीवो देवताप्रतिकृतिवदिन्द्रो रुद्रः स्कन्दो विष्णुरिति। द्रव्यजीव[3] इति गुणपर्यायवियुक्तः प्रज्ञास्थापितोऽनादिपारिणामिकभावयुक्तो जीव उच्यते। अथवा शून्योऽयं भङ्गः। यस्य ह्यजीवस्य सतो भव्यं जीवत्वं स्यात् स द्रव्यजीवः स्यात्, अनिष्टं चैतत्। भावतो जीवा औपशमिकक्षायिकक्षायोपश-

---

१ ' अधिगमाय ' इति क-ख-घ-टी-पाठः। २ ' यस्य नाम' इति घ-टी-पाठः। ३ ' द्रव्यजीव ' इति घ-टी-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिकौदयिकपारिणामिकभावयुक्ता उपयोगलक्षणाः संसारिणो मुक्ताश्च द्विविधा वक्ष्यन्ते (२-१०)। एवमजीवादिषु सर्वेष्वनुगन्तव्यम् ॥

पर्यायान्तरेणापि नामद्रव्यं, स्थापनाद्रव्यं, द्रव्यद्रव्यं, भावतो द्रव्यमिति। यस्य जीवस्याजीवस्य वा नाम क्रियते द्रव्यमिति तन्नामद्रव्यम्। यत् काष्ठपुस्तचित्रकर्माक्षनिक्षेपादिषु स्थाप्यते द्रव्यमिति तत् स्थापनाद्रव्यम्, देवताप्रतिकृतिवादिन्द्रो रुद्रः स्कन्दो विष्णुरिति। द्रव्यद्रव्यं नाम गुणपर्यायवियुक्तं प्रज्ञास्थापितं धर्मादीनामन्यतमत्। केचिदप्याहुः—यद् द्रव्यतो द्रव्यं भवति तच्च पुद्गलद्रव्यमेवेति प्रत्येतव्यम्। अणवः स्कन्धाश्च, सङ्घातभेदेभ्य उत्पद्यन्त इति वक्ष्यामः (५-२५,२६)। भावतो द्रव्याणि धर्मादीनि सगुणपर्यायाणि प्राप्तिलक्षणानि वक्ष्यन्ते (५-३७)। आगमतश्च प्राभृतज्ञो द्रव्यमिति भव्यमाह। द्रव्यं च भव्ये। भव्यमिति प्राप्यमाह। भू प्राप्तावात्मनेपदी। तदेवं प्राप्यन्ते प्राप्नुवन्ति वा द्रव्याणि। एवं सर्वेषामनादीनामादिमतां च जीवादीनां भावानां मोक्षान्तानां तत्त्वाधिगमार्थं न्यासः कार्य इति ॥ ५ ॥

टी०—एभिरित्यादि। एभिरिति सूत्रोक्तैः, कैः? नामादिभिः, नाम आदिर्येषां ते नामादयस्तैर्नामादिभिरिति, आदिशब्देन च नेयत्ताऽवधृतेत्यतश्चतुर्भिरित्याह। अत एव विग्रहमपि न कृतवान्, चतुर्भिरित्यनेनैव समासाऽव्यक्ताभिधानस्य व्यक्तीकृतत्वादिति। अनुयोगः—सकलगणिपिटकार्थोऽभिधीयते तस्य द्वाराणि—तस्यार्थस्याधिगमोपाया इत्यर्थः। अतस्तैर्नामादिभिर्विरचना कार्या। विरचना विरच्यमानविषयेत्यतस्तन्न्यास इत्याह। अस्य च विवरणं, तेषां इति अनन्तरसूत्रोक्तानाम्। तानेव स्पष्टयति—जीवादीनां तत्त्वानां न्यासो भवति—विरचना कार्येति। स किमर्थं न्यासः क्रियत इत्याह—विस्तरेणेत्यादि। पुरस्तात् त्विदमुक्तं 'तान् जीवादीन् विस्तरेण लक्षणतो विधानतश्चोपदेक्ष्याम' इति (१-१)। तेषु च लक्षणविधानेषु वक्ष्यमाणेषु सर्वत्रैषा नामादिका व्याख्याऽवतारणीया, किमर्थम्? अधिगमार्थं—प्रतिविशिष्टज्ञानोत्पत्त्यर्थमिति। कथं नाम लक्षणादिवाक्येषु सर्वत्रैवंविधां प्रतिपत्तिं कुर्यात् जिज्ञासुः? 'उपयोगश्चतुर्भेदः, जीवश्च' इत्यादि, अतोऽधिगमार्थं न्यासः। न्यास इत्यस्य च प्रसिद्धतरेण शब्देन पर्यायेणार्थमाचष्टे—निक्षेप इत्यर्थः। तन्नामादिचतुष्टयं यथा लक्ष्येऽवतरति तथा कथयति—तद्यथा, नामजीव इत्यादि।

जीवपदार्थे नामादिन्यासः

नामैव जीवो नामजीवः, योऽयं जीव इति ध्वनिः, अयं च यस्य कस्यचिद् वस्तुनो वाचकः स नामजीवोऽभिधीयते, वस्तुस्वरूपप्रतीतिहेतुत्वाच्च, वस्तुस्वरूपं शब्दः, तदनर्थात्मकत्वे वस्तुव्यवहारविच्छेदः, तदात्मकत्वाच्च स्तुतौ रागः स्तुत्यस्य, द्वेषश्च निन्दायां द्वेष्यस्य। स्थापना(त्या अ)पि वस्त्वात्मतां

१ 'दिष्वपि' इति घ-टी-पाठः। २ 'सर्वगुण' इति घ-टी-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्शयति—**स्थापनाजीवो** नाम जीवाकारः, प्रतिकृतिसद्भावेऽन्यथाऽसद्भावे, तन्निमित्तकश्रेयोभ्युपगमात्, गन्धपुष्पादिनिमित्तार्थत्यागश्च, तद्भक्तिप्रवृत्तेः, कुम्भवदाकारोऽर्थो वस्तुत्वात्, तथा "जावंति चेइयाइं ति[1]"। **द्रव्यजीवो** नाम, योऽयमस्मिन् शरीरक आत्मा स यदा भावैर्ज्ञानादिभिर्वियुतो विवक्ष्यते स द्रव्यजीवः, अनागतराजत्वराजपुत्रसेवनं हि दृष्टं, तत्र द्रव्यत्वात् (सिद्धि-) शिलातलाद्युज्झितातीतयतिशरीरनमस्करणं च, उपयोगक्रिययोरपि ज्ञेयो, येषामर्थानां न च तदुपयोगे वर्तते स तेन भावेनाभावादतीतानागततद्भावापेक्षया तद्भावाप्रवृत्तोऽपि स एवासावध्यवसीयते सुप्तचित्रकरधृतकुम्भादिवत्, तथा च "जं होहिसि तित्थयरो[2]" "वंदामि जिणे चउव्वीसं[3]" इत्यादि। एष एव हि तैर्ज्ञानादिभिर्युक्त आश्रीयमाणो **भावजीव** इति, भावः प्रमत्तदोषमर्षणादेः, त(य)था—

"अन्नत्थ वंजणे निवडियंमि जो खलु मणोगओ भावो।
तत्थ उ मणं पमाणं न पमाणं वंजणच्छलणा॥"[4]—विशे० २५४५

इत्यादि। अत्र चाद्या नामादयस्त्रयो विकल्पाः द्रव्यास्तिकस्य, तथा तथा सर्वार्थत्वात्, पाश्चात्यः पर्यायनयस्य, तथापरिणतिविज्ञानाभ्यामिति। अथवाऽस्मिन्नेव शरीरे य आत्मा तत्रैव ते नामादयश्चत्वारो नियुज्यन्ते, योऽयमस्मिन्नात्मनि जीव इति ध्वनिः प्रवर्तते एष नामजीवः, तस्यैव य आकारो हस्ताद्यवयवसन्निवेशादिः स स्थापनाजीवस्तदेकपरिणामात्, तस्यैव जन्तोः सकलगुणकलापरहितत्वविवक्षा बौद्धव्यवहारानुसारिणी[5] द्रव्यजीवः, स एव ज्ञानादिगुणपरिणतिभाक्त्वेन विवक्षितो भावजीव इति, एतत् कथयति नामजीव इत्यादिना॥

सम्प्रति नामस्थापनाद्रव्यभावानां जीवविशेषणतयोपात्तानां स्वार्थं लक्ष्ये प्रदर्शयन्नाह—**नाम संज्ञाकर्मेत्यनर्थान्तरमित्यादिना**। नामेति किमुक्तं भवति? उच्यते—संज्ञाकर्मेत्यनर्थान्तरम्, संज्ञायाः क्रिया संज्ञाक्रिया संज्ञाकर्म नामकरणं इत्यर्थः, अनेन ध्वनिना वस्त्विदं प्रतिपाद्यत इतियावत्। तत् पुनः प्रतिपाद्यं वस्तु तस्य ध्वनेर्वाच्येनार्थेन युक्तं भवतु मा वा भूदित्येतत् कथयति—**चेतनावत** इत्यादिना। **चेतना**—ज्ञानं सा यस्यास्ति तच्चेतनावत्, तद्विपरीतमचेतनम्। **द्रव्यस्येति** प्रदर्शनमिदं, गुणक्रिययोरपि नामादिचतुष्टयप्रवृत्तेः। अथवा द्रव्यस्य प्राधान्यमाविष्करोति, यतस्तदेव द्रव्यं गुणक्रियाकारेण वर्तते, कोऽन्यो गुणः क्रिया वा द्रव्यमन्तरेण? वर्णकविरचनामात्रक्रमप्राप्तनानात्वनटवद् द्रव्यमेव तथा तथा विवर्तते अतो न स्तः केचिद् गुणक्रिये द्रव्यास्तिकनयावलम्बने सतीति। अतस्तस्य द्रव्यस्य[6] यस्य कस्यचिन् **नाम क्रियते** व्यवहारार्थं संज्ञासंकेतः क्रियते। कीदृगित्यत आह—**जीव** इति।

---

१ 'यावन्ति चैत्यानि' इति। २ 'यद् भविष्यति तीर्थंकरः' (आवश्यक-निर्युक्तौ)। ३ 'वन्दे जिनान् चतुर्विंशतिं' (आव-चतुर्विंशतिस्तवः)।

४ 'अन्यत्र निपतिते व्यञ्जने यः खला मनोगतो भावः।
तत्र तु मनः प्रमाणं न प्रमाणं व्यञ्जनं छलना॥

५ 'बौधव्यवहारा' इति क-ख-पाठः। ६ द्रव्यस्य इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतिना स्वरूपे जीवशब्दः स्थाप्यते, जीव इत्ययं ध्वनिः, नत्वेतद्वाच्यार्थो नामतया नियुज्यते। **स नामजीव** इति, स इत्यनेन तत्र चेतनावत्यचेतने वा यदृच्छया यो जीवशब्दो नियुक्तस्तं व्यपदिशति, स शब्दो नामजीव इति। एतदुक्तं भवति—स एव शब्दो जीव इत्युच्यते तद्वस्तूपाधिक इति, अर्थाभिधानप्रत्ययास्तुल्यनामधेया इति न्यायात् ॥

संप्रति स्थापनाजीवं कथयति—**यः काष्ठपुस्त** इत्यादिना। **यः** स्थाप्यते जीव इति सम्बन्धः, **क्व** स्थाप्यते ? **काष्ठपुस्तादिष्वित्याह**। **काष्ठं**—दारु, **पुस्तं**—दुहितृकादिसूत्रचीवरादिविरचितं, **चित्रं**—चित्रकराद्यालिखितम्, **कर्मशब्दः** क्रियावचनः प्रत्येकमभिसम्बध्यते, काष्ठक्रियेत्यादि। **अक्षनिक्षेप इति** सामयिकी संज्ञा चन्दनकानां निक्षेपो रचना विन्यास इति। एते काष्ठपुस्तचित्रकर्माक्षनिक्षेपा आदिर्येषां रच्यमानानां ते काष्ठपुस्तचित्रकर्माक्षनिक्षेपादयः, आदिशब्द उभाभ्यां सम्बन्धनीयः, काष्ठपुस्तचित्रकर्मादयो ये सद्भावस्थापनारूपास्तथाऽक्षनिक्षेपादयोऽसद्भावस्थापनारूपा ये, **तेषु बहुषु स्थाप्यते**—य उच्यते तेषु काष्ठादिषु बहुष्वाधारेषु य एको रच्यते जीवाकारेण, एतदाह—**जीव इति**। **स** जीवाकारो रचितः सन् **स्थापनाजीवो**ऽभिधीयते। एतदुक्तं भवति—शरीरानुगतस्यात्मनो य आकारो दृष्टः स तत्रापि हस्तादिको दृश्यते इतिकृत्वा स्थापनाजीवोऽभिधीयते॥ ननु चाक्षनिक्षेपे नास्त्यसावाकार इति, उच्यते—यद्यपि बहीरूपतया नास्त्यक्षे निक्षिप्यमाणेऽसावाकारः, तथापि बुद्ध्या स रचयिता तत्र विरचयति तमाकारम्, अत एव स्थापना नामद्रव्याभ्यां सुदूरं भिन्ना, यतो निक्षिप्यमाणं वस्तु न शब्दो भवति, नापि तद्भावावियुतं विवक्ष्यते, किन्त्वाकारमात्रं यत् तत्र तद् विवक्षितमिति। स्थापनाजीवं दृष्टान्तेन भावयति—**देवताप्रतिकृतिवदित्यादिना**। देव एव **देवता** तस्याः **प्रतिकृतिः**—बिम्बं, सा च न सैव सहस्राक्षवज्रपाणिश्वेतवासोधारिरूपा, नापि ततोऽत्यन्तं भिन्नस्वभावा, अत्यन्तभिन्नस्वभावाभ्युपगमे हि सा प्रतिकृतिरेव न स्यात् कुड्यवत्, अतोऽवश्यं कथञ्चिदसौ ततो भिद्यत इति प्रतिपत्तव्यम्, ये तस्यां मुख्यदेवतायां सहस्रलोचनाद्यवयवा यथा संनिविष्टा दृष्टास्तेऽस्यां काष्ठमय्यां दृश्यन्त इत्येतावता सैव मुख्या देवता इयमिति निगद्यते। ये तु तत्र ज्ञानदर्शनैश्वर्यादयो धर्मा दृष्टास्तेऽस्यां काष्ठमय्यां न दृश्यन्त इति एतावता प्रतिबिम्बमित्यभिधीयते। अतो यथेह कस्यचित् इन्द्रादेः प्रतिकृतिः स्थापिता सती इन्द्र इति व्यपदिश्यते, एवमिह जीवाकृतिः प्रतिमादिषु स्थापिता स्थापनाजीवो व्यपदिश्यते। **रुद्र** उमापतिः, **स्कन्द इति** स्कन्दकुमारः, उत्तरपदलोपात् सत्यभामा सत्येति यथा, **विष्णुरिति** वासुदेवः। एषां च न शास्त्रे देवताख्या समस्ति, लोकानुवृत्त्या भाष्यकृदुवाच। अत एषां रुद्रादीनां प्रतिकृती रचिता रुद्र इत्यादिव्यपदेशं लभते। एवं जीवस्य काष्ठादिषु प्रतिकृतिः कृता स्थापनाजीव इत्यभिधीयते।

द्रव्यजीव इति। इतिः प्रकारार्थः। योऽयं प्रकारः प्रागुपादायि द्रव्यजीव इति तं प्रदर्शयामि। योऽयमात्मा स उज्झिताशेषज्ञानादिगुणसमुदायो द्रव्यजीवोऽभिधीयते। एतदेवाह—**गुणपर्यायवियुक्त** इति। **गुणाः**—सहभुवो ज्ञानदर्शनसुखादयः, **पर्यायाः**—क्रमभुवो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनुष्यादयः, गुणाश्च पर्यायाश्च गुणपर्यायास्तैः **वियुक्तो** रहित इत्यर्थः ॥ ननु चैवंविधोऽर्थो नास्त्येव, समस्तधर्मकदम्बकरहितत्वात् मण्डूकजटाभारवदित्युक्ते आह—**प्रज्ञास्थापितः** । **प्रज्ञा**—बुद्धिस्तया **स्थापितो**—वियत्यालिखितः कल्पित इतियावत् । एतदुक्तं भवति—न ते गुणपर्यायास्ततो द्रव्याद् विष्वग् भवन्ति, किं तर्हि ? बुद्ध्या तत्स्था एव विभज्यन्ते, ततश्च द्रव्यमात्रं केवलमवतिष्ठते बुद्धिपरिकल्पनागोचरतामितम्, एतदाह—**अनादिपारिणामिकभावयुक्त** इति । भावशब्दो हि औदयिकादिषु वर्तमानः पारिणामिक इत्यनेन विशेषे स्थापितः । पारिणामिकभावोऽपि सादिरस्त्यभ्रेन्द्रधनुरादीनाम्, किं तादृशोऽयं ? नेत्याह—अनादिपारिणामिकभाव इति । अनादिश्चासौ पारिणामिकभावश्चानादिपारिणामिकभावस्तेन युक्तोऽनादिपारिणामिकभावयुक्त इति । एतदुक्तं भवति—यत्तदनादिकालसन्ततिपतितं द्रव्यं तावन्मात्रं तदिति मैवं मंस्थाः अनादिपारिणामिकभावयुक्त इति, अत्र भावशब्दः श्रूयते इतिकृत्वाऽस्ति द्रव्ये कोऽपि भावांश इति । न खलु कश्चित् तत्र गुणः पर्यायो वाऽस्तीति द्रव्यमात्रं निरस्ताशेषगुणपर्यायव्रातं द्रव्यजीव इत्येवं शब्द्यते ॥ ननु च सतां गुणपर्यायाणां बुद्ध्या नापनयः शक्यः कर्तुं, यतो न ज्ञानायत्ताऽर्थपरिणतिः, अर्थो यथा यथा विपरिणमते तथा तथा ज्ञानं प्रादुरस्तीत्यत आह—**शून्योऽयं भङ्गः** । **शून्य** इति न सम्भवति, **अयं** इति द्रव्यजीवविकल्प इति । यतो द्रव्यदेवः कः ?। उच्यते—यो भव्यो देवत्वपर्यायस्य योग्यो न तावद् भवति स मनुष्य एव सन् द्रव्यदेवोऽभिधीयते भविष्यति इतिकृत्वा, एवमिहापि यद्ययमवधीकृतो जीवः स इदानीमजीवः सन्नायत्यां जीवोऽजनिष्यत्[1] ततोऽयं विकल्पः समभविष्यत्, न चैतदस्तीत्येतदाह—**यस्य ह्यजीवस्येत्यादि** । **यस्य** इति वस्तुनः, **हि**शब्दो यस्मादर्थे, **अजीवस्य** चेतनारहितस्य **सतो** विद्यमानस्य अचेतनावस्थायां सम्प्रति **भव्यं** भविष्यच्चेतनावत्त्वं भवेत् इदानीमचेतनत्वेन वर्तमानः **द्रव्यजीव** इति कारणजीवः, आगामिन्या जीवतायाः कारणमित्यर्थः, एतत् **स्यात्**, इष्यत एवायमर्थः । क्वचिद् वस्तुन्यभूतमिदानीं जीवत्वं भविष्यतीति, तन्न, अनिष्टत्वात्, यथैव ह्यसन्नसौ विशेषो जीवत्वेन सम्प्रति आगामिकाले जीवत्वं प्रतिपत्स्यत इत्यभ्युपगम्येत, एवं योऽयमिदानीं जीवतया वर्तते अयमेवायत्यामजीवत्वं यास्यतीत्यभ्युपगम्यताम्, एवं च सति सिद्धान्तविरोधः, यतो जीवत्वमनाद्यनिधनपारिणामिको भावः समय इष्यते । एतदेवाह—**अनिष्टं चैतत्** इति । चशब्द एवकारार्थे, अनिष्टमेव सिद्धान्तविरोध्येवैतदभ्युपगमान्तरमिति ॥ ननु चैवं सति नामादिचतुष्टयस्याव्यापिता प्राप्ता, द्रव्यजीवविकल्पाभावात्, अभ्युपगतं च सिद्धान्ते व्यापित्वेन नामादिचतुष्टयम्, यत एवमाह—

" जत्थ उ जं जाणिज्जा निक्खेवं निक्खिवे निरवसेसम् ।
जत्थवि नय जाणेज्जा चउक्कयं निक्खिवे तत्थ ॥"—अनुयोगद्वारे

---

१ 'अजनिष्यत' इति **क-ख**-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र चतुष्टयं निक्षिपेदिति भणता व्यापिताऽभ्युपगता ?। उच्यते—प्रायः सर्वपदार्थेष्वन्येषु सम्भवन्ति, यद्यत्रैकस्मिन्न सम्भवति नैतावता भवत्यव्यापिता, तत्र निर्युक्तिकारेण **भद्रबाहुस्वामिना** अविशेषेण प्राणायि नामादीति। अपरे त्वेतद्दोषभयादेवं वर्णयन्ति—अहमेव मनुष्यजीवो द्रव्यजीवोऽभिधातव्यः उत्तरं देवजीवमप्रादुर्भूतमाश्रित्य, अहं हि तस्योत्पित्सोर्देवजीवस्य कारणं भवामि, यतश्चाहमेव तेन देवजीवभावेन भविष्यामि, अतोऽहमधुना द्रव्यजीव इति। एतत् कथितं तैर्भवति पूर्वः पूर्वो जीवः परस्य परस्योत्पित्सोः कारणमिति ? अस्मिंश्च पक्षे सिद्ध एव भावजीवो नान्य इति, तस्मादिदमपि परिफल्गु विज्ञायते, एतत्पक्षसमाश्रयणेन च नाव्यापिता नामादिचतुष्टयस्येति । अथवा जीवशब्दार्थज्ञस्तत्रानुपयुक्तो द्रव्यजीव इति । एवं ह्युक्तं " आगमतो जाणए अणुवउत्तो[1] " जीवशब्दार्थज्ञस्य वा यच्छरीरकं जीवरहितं स द्रव्यजीवः ॥

इदानीं चतुर्थं विकल्पं दर्शयति—**भावजीव** इति। **यः उक्तः** ॥ ननु च भावजीव इत्येकवचनेन पूर्वं विन्यस्य व्याख्यावसरे बहुवचनान्तताप्रदर्शनमयुक्तं **भावतो जीवा** इति । उच्यते—मैवं कश्चित् ज्ञासीद् यथा एक एव भावजीवो न भूयांस इति । यथा पुरुषकारणिन आहुः—"पुरुष एवेद"मित्यादि, एतन्निरासाय बहुवचनमुपात्तवान्, बहव एते जीवा इत्यस्य प्रदर्शनार्थम् । **भावत** इति च तृतीयार्थे तसिः, भावैः सह वर्तन्ते इति ते भावजीवाः । के पुनस्ते भावाः यैः सह वर्तन्ते इति ? उच्यते—**औपशमिकादीत्यादि** । तत्रोपशमः पुद्गलानां सम्यक्त्वचारित्रविघातिनां करणविशेषादनुदयो भस्मपटलाच्छादिताग्निवत्, तेन निर्वृत्तः **औपशमिकः** परिणामोऽध्यवसाय इत्युच्यते । तथा ज्ञानादिघातिनां पुद्गलानां य आत्यन्तिकोऽत्ययः स क्षयः तेन निर्वृत्तोऽध्यवसायः **क्षायिक** उच्यते । तथा ज्ञानादिघातिनां पुद्गलानां क्षयोपशमौ, केचित् क्षपिताः केचिदुपशान्ता इति क्षयोपशमावुच्येते, ताभ्यां निर्वृतोऽध्यवसायः **क्षायोपशमिक** इति । ये पुनः पुद्गला गतिकषायादिपरिणामकारिणः तेषामुदयः—अनुभूयमानता या स उदयस्तेन निर्वृत्तोऽध्यवसाय **औदयिक** इति । परिणमनं परिणामो जीवत्वाद्याकारेण यद्भवनं स **पारिणामिकः**, स्वार्थ एव प्रत्ययः। एत एव **भावा**—अध्यवसायास्तैर्युक्तः **औपशमिकादिभावयुक्तः**। यथा कश्चिन्मनुष्यः पञ्चभिरपि संयुक्तो भवति। तत्कथमिति चेत् ? उच्यते—कस्यचित् संयतादेरुपशान्तकोपादिकषायस्य औपशमिकः, तस्यैव क्षपितानन्तानुबन्धिमिथ्यादर्शनादेः क्षायिको भावः, तस्यैव क्षीणोपशान्तमतिश्रुताद्यावरणस्य क्षायोपशमिको भावः, तस्यैव मनुष्यगतिपरिणामकारिपुद्गलोदये औदयिको भावः, तस्यैव जीवत्वभव्यत्वादिपरिणामः पारिणामिक इति, एवं देवादीनां यथासम्भवं बोध्याः। **उपयोगलक्षणा** इति साकारानाकारसंविल्लक्षणा इत्यर्थः। ते च नैकरूपाः, किन्तु **संसारिण** इत्यादि। संसारश्चतुर्विध उक्तः (१–३) स येषामस्ति संसारिणो—मनु-

---

१ आगमतो ज्ञायकः अनुपयुक्तः (अनुयोग०) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ष्यादयः । मुक्तास्तु ज्ञानावरणादिकर्मभिः समस्तैर्मुक्ता एकसमयसिद्धादयः । चशब्दात् सप्रभेदा द्विधा वक्ष्यन्ते द्वितीयेऽध्याये (२–१०) ॥

एवं जीवपदार्थे नामादिन्यासमुपदर्श्य एकत्र दर्शितोऽन्यत्र सुज्ञान एव भवतीत्यतिदिशति—**एवमजीवादिष्वित्यादि** । **अजीवादिषु** इति चोक्तेऽपि पुनः **सर्वेषु** इत्यभिदधद् व्याप्तिं नामादिन्यासस्य दर्शयति, **अनुगन्तव्यं**–नामादिचतुष्टयं दर्शनीयमित्यर्थः । अजीव इति नाम यस्य चेतनस्याचेतनस्य वा क्रियते स नामाजीवः । स्थापनाजीवः काष्ठादिन्यस्तः । द्रव्याजीवो गुणादिवियुतो बुद्धिस्थापितः । भावाजीवो धर्मादिर्गत्याद्युपग्रहकारीति । नामास्रवो यस्यास्रव इति नाम कृतं स नामास्रवः । स्थापनास्रवः काष्ठादिरचितः । द्रव्यास्रवस्तु आत्मसमवेताः[1] पुद्गलाः अनुदिता रागादिपरिणामेन । भावास्रवास्तु त एवोदिताः । द्रव्यबन्धो निगडादिः, भावबन्धः प्रकृत्यादिः । द्रव्यसंवरोऽपिधानं, भावसंवरो गुप्त्यादिपरिणामापन्नो जीवः । द्रव्यनिर्जरा मोक्षाधिकारशून्या व्रीह्यादीनां, भावनिर्जरा कर्मपरिशाटः[2] सम्यग्ज्ञानाद्युपदेशानुष्ठानपूर्वकः । द्रव्यमोक्षो निगडादिविप्रयोगः, भावमोक्षः समस्तकर्मक्षयैर्[3]लाञ्छनः । तथा द्रव्यसम्यग्दर्शनं ये मिथ्यादर्शनपुद्गला भव्यस्य सम्यग्दर्शनतया शुद्धिं प्रतिपत्स्यन्ते तद् द्रव्यसम्यग्दर्शनं, एत एव विशुद्धा आत्मपरिणामापन्ना भावसम्यग्दर्शनं । तथा द्रव्यज्ञानमनुपयुक्तावस्था, भावज्ञानमुपयोगपरिणतिविशेषावस्था । द्रव्यचारित्रमभव्यस्य भव्यस्य वाऽनुपयुक्तस्य, उपयुक्तस्य क्रियानुष्ठानमागमपूर्वकं भावचारित्रमिति ॥

येऽपि येषां जीवादीनां सामान्यशब्दास्तेष्वप्यस्य नामादिचतुष्टयस्यावतार इति कथयन्नाह–**पर्यायान्तरेणापीत्यादि** । प्रधानशब्दस्य तदर्थशब्दान्तराणि पर्यायाः, पर्यायादन्यः पर्यायः पर्यायान्तरं, तेनाप्यस्य चतुष्टयस्य न्यासः कार्यः, तदाह–**नामद्रव्यं** इत्यादि । एतद् भाष्यं नामादिजीवव्याख्यानेन भावितमेव यावत् केचिदप्याहुरिति । तथाप्यशून्यार्थमुच्यते–**नामद्रव्यं** यस्य चेतनावतोऽचेतनस्य वा द्रव्यमिति नाम क्रियते, यत् पुनः स्थाप्यते काष्ठादिषु तत् **स्थापनाद्रव्यं** विशिष्टाकारमिति । **द्रव्यद्रव्यमिति** उभाभ्यां[4] द्रव्यशब्दाभ्यां गुणादिभ्यो निष्कृष्य द्रव्यमात्रे स्थाप्यते । एतदेवाह–**गुणपर्यायवियुक्तं** इत्यादिना, तैर्विरहितं, न च परमार्थतः शक्यन्ते तेऽपनेतुं, तत्स्वभावत्वाद्, अतः प्रज्ञास्थापितमित्याह । तच्चान्यस्याभावात् षष्ठस्य प्रसिद्धमेव तदेव कथयति—**धर्मादीनामन्यतमत्** इति । यद्यदेव विवक्षितुं इष्यते तत् तदेषां मध्ये ग्राह्यं नात्र नियम इत्येतत् कथयति-शून्योऽयं विकल्प इति। पूर्ववत् प्रयोगतो भावना कार्या, एष तावत् तृतीयविकल्पे ग्रन्थकाराभिप्रायः । अपरे तु कथयन्ति विकल्पं तृतीयमन्यथा,

नामद्रव्यादिविचारः

१ शुभाशुभात्मपरिणामकारणभूतपुद्गलापेक्षया । २ सकामनिर्जरामपेक्ष्य । ३ स्वरूपावस्थानस्य तत्त्वात् निश्शेषकर्मक्षयस्य तु तपःसंयमद्वारत्वात् । ४ द्रव्यशब्दद्वयेनेत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदाह–**केचिदप्याहुः** इत्यादि। केचित् पुनर्ब्रुवते यदित्यणुकादि **द्रव्यतो द्रव्यं** इति, तृतीयार्थे पञ्चम्यर्थे वा तसिरुत्पाद्यः, द्रव्यैः सम्भूय यत् क्रियते, यथा बहुभिः परमाणुभिः सम्भूय स्कन्धस्त्रिप्रदेशिकादिरारभ्यते तद् द्रव्यद्रव्यम्। अथवा यद् द्रव्यात् तस्मादेव स्कन्धात् त्रिप्रदेशिकादेर्यदैकैः परमाणुः पृथग्भूतो भवति तदा तस्माद् भिद्यमानात् त्रिप्रदेशिकात् स्कन्धात् परमाणुश्च निष्पद्यते द्विप्रदेशिकश्च स्कन्ध इति, स परमाणुरपि द्रव्यद्रव्यं द्विप्रदेशिकोऽपि द्रव्यद्रव्यं भवतीति। तच्चैतद् द्रव्यद्रव्यं **पुद्गलमेव भवतीति प्रत्येतव्यम्**। नहि जीवादिद्रव्यमन्यैः सम्भूयारभ्यते, न चान्यस्मात् भिद्यमानात् तन्निष्पद्यत इति, परमाणवस्तु सम्भूयान्यदारभन्ते ततश्च निष्पद्यन्त इति, यतः पञ्चमेऽध्याये ऽभिधास्यते **अणवः स्कन्धाः** (५-२५) इत्यादि, **अणवः**–परमाणवः, **स्कन्धाः**–द्विप्रदेशिकादयः, सङ्घातात् स्कन्धा भेदादणवो निष्पद्यन्त इति॥ भावद्रव्यमिति चैकं विन्यस्य **भावतो द्रव्याणि** बहून्युपक्षिपतोऽयमभिप्रायः,–अन्याभिमतं यदेकं विश्वस्य जगतः कारणं ब्रह्मादि तदपास्यते, बहून्येतानि स्वत एव सत्तां दधतीति प्रतिपादयति, कानि च तानि? **धर्मादीनि पञ्च, सगुणपर्यायाणि** इति, गत्याद्यगुरुलघुप्रभृतिपर्यायभाञ्जीति, एतत् स्याद् यद्येन धर्मेण समन्वितं तं धर्मं न कदाचित् तद् जहाति तेन सदान्वितमास्ते इति, एतच्च न, **प्राप्तिलक्षणानि**—परिणामलक्षणानीतियावत्, अन्यानन्यांश्च धर्मान् प्रतिपद्यन्त इति, जीवास्तावद् देवमनुजादीन् पुद्गलाः कृष्णादीन् धर्मादयः पुनस्त्रयः परतोऽन्यानन्यांश्च प्राप्नुवन्ति, यतोऽन्यस्मिन् गच्छति तिष्ठति अवगाहमाने वा जीवे पुद्गले वा गमनादिपरिणामस्तेषामुपचर्यते, अतो हि प्राप्तिलक्षणानि वक्ष्यन्ते। अथवा भावद्रव्यमिति, द्रव्यार्थ उपयुक्तो जीवो भावद्रव्यमुच्यते, एतद् वा कथयत्यनेन भाष्येण आगमतश्चेत्यादिना, अथवा प्राप्तिलक्षणानीति यदुक्तं सा न स्वमनीषिका, यत आगमे आप्त एवमुपदिदेश–प्राप्तिलक्षणान्येतानि, कथमिति चेत्? तदाह–**आगमतश्चेत्यादि**। तसिः सप्तम्यर्थे, **आगमत** आगमे, पूर्वाख्ये कथ्यमाने, **प्राभृतज्ञ** इति, शब्दप्राभृतं, तच्च पूर्वेऽस्ति, यत इदं व्याकरणमायातं, ततः शब्दप्राभृतं यो जानाति स प्राभृतज्ञो गुरुरेवं ब्रवीति द्रव्यमिति। अस्यार्थं तीर्थकृत् किमाहेति चेत्, तदुच्यते–**भव्यमाह**। भव्यमिति च न ज्ञायते तत् स्पष्टयति–**द्रव्यं च भव्य** इति। अस्यायमर्थः–द्रव्यमिति निपात्यते भव्यं चेद् भवति। **भव्यमिति** सन्देहास्पदमेव केषाञ्चिदिति स्पष्टयति–**प्राप्यमाह**। प्राप्तव्यं तैः स्वगतैः परिणतिविशेषैर्गत्यादिभिः व्याप्यत इत्यर्थः। अतो न स्वमनीषिका प्राप्तिलक्षणानीत्येषाम्॥ ननु चायं भवतिरकर्मकः सत्ताभिधायी कथं प्राप्यमित्यनेन कर्माभिधायिना कृत्येन भव्यमित्यस्यार्थो विव्रियते?। उच्यते–नैवायं सत्ताभिधायकः, तर्हि? प्राप्त्यभिधायी चुरादावात्मनेपदी, भू प्राप्तावात्मनेपदी। तदाह प्राप्त्यभिधायिना कथ्यते तेन, तदेवं इति

द्रव्याणां प्राप्तिलक्षणता

१ 'यद् द्व्यणुकादि' इति ग–पाठः। २ 'कादेर्युक्तः' इति ग–पाठः। ३ 'कानिचित् तानि' इति क–ख–पाठः। ४ 'कदाचिद् न जहाति' इति क–ख–पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राप्त्यभिधायित्वे सत्ययमर्थो भव्यशब्दस्य, कर्मसाधनपक्षे प्राप्यन्ते स्वधर्मे यानि तानि भव्यान्युच्यन्ते, कर्तृसाधनपक्षे तु प्राप्नुवन्ति तान्येव धर्मादीनीति भव्यानि द्रव्याण्युच्यन्ते इति । एतदाह–**प्राप्यन्ते प्राप्नुवन्तीति वा द्रव्याणि** । सम्प्रति जीवादीनां न्यासं प्रदर्श्य तेषां च पर्यायस्य द्रव्यशब्दस्य अन्येषामप्येवमेव कार्य इत्यतिदिशन्नाह–**एवं सर्वेषामि**-त्यादि । एवं यथा जीवादीनां द्रव्यशब्दस्य च तथा **सर्वेषां** गुणक्रियादिशब्दानाम्, **अना-दीनां** इति भव्याभव्यादीनाम्, **आदिमतां** च मनुष्यादीनां पर्यायाणां, **जीवादीनां भावानां** जीवादिभ्योऽनन्यवृत्तीनाम्, **तत्त्वाधिगमार्थमिति** तत्त्वस्य–परमार्थस्य भावस्य अधिगमः स सर्वत्र, न तु नामस्थापनाद्रव्याणामिति, हेयत्वादेषां, तत्त्वाधिगमप्रयोजनं **न्यासो** निक्षेपो रचना कार्या बुद्धिमता मुमुक्षुणेति ॥ ५ ॥

शिष्य आह–कथं भगवता तत्त्वानां जीवादीनामधिगमः कृतः ? । यदि च केनाप्युपाये-नाधिगतानि भवन्ति ततो युक्तं कथनमन्यन्यायेतानि तत्त्वानीति ? उच्यते–

सूत्रम्—प्रमाणनयैरधिगमः ॥ १-६ ॥

टी०—प्रमाणनयैरिति च करणे तृतीया न कर्तरि, यतस्तत्र षष्ठ्या भवितव्यम् 'कर्तृकर्मणोः कृती' (पाणिनिः अ० २, पा० ३, सू० ६५) इति । प्रमाणे प्रत्यक्षपरोक्षे द्वे, अवधिमनःपर्यायकेवलानि मतिश्रुते च, नैगमादयो नयाः पञ्च, प्रमाणे च नयाश्च प्रमाण-नयास्तैः प्रमाणनयैः साधकतमैः ।

भा०—एषां च जीवादीनां तत्त्वानां यथोद्दिष्टानां नामादिभिर्न्यस्तानां प्रमाणनयैर्विस्तराधिगमो भवति । तत्र प्रमाणं द्विविधं-प्रत्यक्षं परोक्षं च वक्ष्यते (१-१०,११) । चतुर्विधमित्येके नयवादान्तरेण । नयाश्च नैगमादयो वक्ष्यन्ते (१-३४) ॥ किञ्चान्यत् ॥ ६ ॥

टी०—एषां चेत्यादि । एषाम् इति भवतः प्रकटीकृतानाम्, चशब्द एवकारार्थे, एषामेवान्यस्याभावात्, अथवा समुच्चये, एषां **जीवादीनां**, च-
अधिगम-साधनम् शब्दान्नामादीनां च, **तत्त्वानामिति** चानेनोभयं सम्बध्यते, जीवा-दीनां तत्त्वानां नामादीनां च तत्त्वानाम् । **यथोद्दिष्टानामिति** । यथा परिपाट्या जीवाजीवादिकया सामान्येनाभिहितानामुद्दिष्टानामिति । सामान्येन च जीवाजीवास्रव (१-४) इत्यस्मिन् सूत्रेऽभिधाय पुनर्नामस्थापनादिसूत्रे **नामादिभिर्भेदै-र्न्यस्तानां**, किमर्थं पुनर्जीवाजीवास्रवादिसूत्रे उद्घाट्य ततो नामादिसूत्रे न्यस्ता[3]नि ? । उच्यते–परिज्ञानार्थमनेको जीवशब्दवाच्योऽर्थ इत्यस्य । एतदेवाह–**न्यस्तानामिति** । अधिगमोपायार्थ-

---

१ 'मन्यस्यायत्तानि' इति ख–पाठः । २ 'यथोपदिष्टानां' इति ख–घ–टी–पाठः । ३ 'न्यस्तानामित्यधिगमो-पायार्थमुपक्षिप्तानामित्यर्थः' इति ख–घ–टी–पाठः । ४ 'नयाश्च पञ्च' इति ख–घ–टी–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुपक्षिप्तानामित्यर्थः, अतः पूर्वमुद्घट्टितानां न्यस्तानां च इह **प्रमाणनयैर्विस्तरा**धिगमो भवति। **विस्तराधिगम** इति। एकैकस्य तत उद्घट्टनादपकृष्टस्य विस्तरेण लक्षणविधानाख्येन वक्ष्यमाणेन (१-१०, १-३५)प्रमाणनयरूपेणाधिगमः—परिच्छेदो भवति। एतत् कथितं—यदा यदाधिगमस्तदा तदा न प्रमाणनयान् विरहय्येति। न चायं पर्यनुयोगः कार्यः—प्रमाणनयैः कथं भवत्यधिगम इति ?। यस्माज्ज्ञानविशेषाः प्रमाणनयाः, अतः प्रकाशस्वभावत्वात् प्रदीपवदधिगमशक्तिता। अथ कतिविधं प्रमाणमिति सङ्ख्यानियमाय प्रश्नयति। आह—**तत्र प्रमाणं द्विविधम्**। तत्रेति सिद्धान्तं **नन्द्यादिकं** व्यपदिशति। **प्रमाण**मिति च प्रमीयतेऽनेन तत्त्वमिति प्रमाणम्, अस्मिन् पक्षे आत्मा सुखादिगुणकलापोपेतस्तेनावबुध्यते साधकतमेन मत्यादिना विषयमिति प्रतिपत्तव्यम्। यदा तु 'कृत्यल्युटो बहुलम्' (पाणिनिः अ० ३, पा० ३, सू० ११३) इति कर्तरि प्रमाणमित्येतत् तदात्मनोऽविभक्तं मत्यादिज्ञानपञ्चकम्, प्रमिणोत्यवगच्छतीति प्रमाणम्, यदा त्वधिकरणे प्रमाणमित्येतत् तदा प्रमीयतेऽस्मिन् बहिरङ्गोऽर्थ इति प्रमाणम्, आत्मन्येव बहिरङ्गार्थप्रतिबिम्बनात्, नहि विषयाकारानारूषितं[1] तज्ज्ञानं तस्य परिच्छेदे वर्तते, यदा तु तेन विषयाकारेण तज्ज्ञानं परिणतं भवति तदा तस्य वस्तुनः परिच्छेदोऽन्यथा नेति। **द्विविधमित्यनेन** सङ्ख्यानियम इति द्विविधमेव न पुनस्त्रिविधादि। कथं द्वैविध्यमिति चेत् ? उच्यते—इहैवाध्याये प्रत्यक्षं परोक्षं चेति वक्ष्यते (१-११, १२) उपरिष्टात्। पराणि च निर्माणाङ्गोपाङ्गोदयनिवृत्त्युपकरणरूपाणीन्द्रियाणि २-१७) मनश्च मनोवर्गणापरिणतिरूपं द्रव्येन्द्रियं परं तेभ्यो यदुपजायते ज्ञानं तन्निमित्तजं तत् परोक्षमुच्यते धूमादग्निज्ञानवत्, प्रत्यक्षं पुनरश्नाति अश्नुते वाऽर्थानित्यक्षः—आत्मा तस्याक्षस्येन्द्रियमनांस्यनपेक्ष्य यत् स्वत एवोपजायते तत् प्रत्यक्षम्। यदि तर्हि **नन्द्यां द्विविधमुपदिष्टं कथमनुयोगद्वारग्रन्थे** चतुर्विधमुपन्यस्तम् ?। यतः केचिन् नैगमादयो नयाः। **चतुर्विधमित्येके नयवादान्तरेण**। एके सूरयश्चतुर्विधं प्रमाणमुपदिशन्ति[2] नयभेदेन प्रत्यक्षानुमानोपमानागमाख्यम्, एतच्च यथा दुःस्थितं चातुर्विध्यं तथा भाष्यकार एवोत्तरत्र दर्शयिष्यति (१—१२)। एवं प्रमाणावयवं निर्भिद्य व्युत्पत्त्यादिद्वारेण नयावयवं विभजन्नाह—**नयाश्चेत्यादि**। नयन्तीति नयाः कारकाः व्यञ्जका इति यतः सूत्रार्थं[3] (यतस्तवार्थं) दर्शयिष्यति भाष्यकारः, ये ह्यनेकधर्मात्मकं वस्त्वेकेन धर्मेण निरूपयन्ति एतावदेवेदं नित्यमनित्यं वेत्यादिविकल्पयुक्तं ते **नया नैगमादयो वक्ष्यन्ते** (१-३४)॥ ननु च प्रमाणमपि सामान्यविशेषात्मकवस्तुपरिच्छेद्येव, नया अपि चैवंविधविषयोपनिपातिन एवेति नास्ति कश्चिद् विशेषः, ज्ञानात्मकत्वाद्धि नया न भेदेनोपादेयाः प्रमाणादिति, असत्या एव नया इति [चेदतो] हेयतया न्याय्यमुपादानमित्येतदपि न, यतो वक्ष्यति—" न विप्रतिपत्तयोऽर्थाध्यवसाया[5] " इति [१—३५], तथा " नियय-

प्रमाण-द्वैविध्यम्

प्रमाणनयानां भिन्नता

१ 'अपरिणतं' इति ख—टी—पाठः। २ 'मुशन्ति' इति ग—पाठः ३ 'कर्त्रार्थं' इति 'कर्त्रर्थं' इति वा ग—टी—पाठः। ४ 'परिच्छेदे च,' 'परिच्छेदे व' इति क—ख—पाठौ। ५ 'सायात्' इति क—ख—पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वयणिज्जसव्वा[1]" इत्यादि । उच्यते–प्रमाणनयानामयं भेदः, प्रमाणं समस्तवस्तुस्वरूपपरिच्छेदात्मकं मत्यादि नयास्तु एकांशावलम्बिन इत्यतो भिन्नविषयता, प्रत्यक्षपरोक्षवत् । एतदुक्तं भवति–सर्वनयांशावलम्बि ज्ञानं प्रमाणम्, यत् तु ज्ञानमनेकधर्मात्मकं सद्वस्तु एकधर्मावधारणेनावच्छिनत्त्येवमात्मकमेवैतदिति तन्नया इति कथ्यन्ते, अतश्च प्रमाणं सम्यग्ज्ञानं, नयास्तु मिथ्याज्ञानम्, यत आह–" एवं सव्वेवि नया मिच्छादिट्ठी[2] " इत्यादि । एवं च कृत्वा प्रमाणशब्दस्याभ्यर्हितत्वात् सूत्रे पूर्वनिपात इति न चोद्यावकाशः ॥ अपरे वर्णयन्ति–परस्परापेक्षा नैगमादयो नया इति व्यपदिश्यन्ते अध्यवसायाः, तैः परस्परापेक्षैर्यज्ज्ञानं समस्तवस्तुस्वरूपावलम्बनं जन्यते तदनवगतवस्तुपरिच्छेदाभ्युपायत्वात् प्रमाणम् । ये पुनर्नैगमादयो निरपेक्षाः परस्परेण ते नयाभासा इति ॥ ६ ॥

किञ्चान्यदित्यनेनोत्तरसूत्रं सम्बन्धयति, नैतावतैव विस्तराधिगमस्तत्त्वानां, यतोऽन्यदपि विस्तराधिगतौ कारणमस्ति, किं तत् ? निर्देशादि । के पुनः निर्देशादय इत्यत आह–

सूत्रम्–निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः ॥ १–७ ॥

टी०—निर्देशस्वामित्वेत्यादि । न तावन्निर्देशादीन् व्याचष्टे सम्बन्धवाक्यमेव समर्थयते—

भा०—एभिश्च निर्देशादिभिः षड्भिरनुयोगद्वारैः सर्वेषां भावानां जीवादीनां तत्त्वानां विकल्पशो विस्तरेणाधिगमो भवति ॥

टी०—एभिश्चेत्यादिना । एभिः, चशब्दात् प्रमाणनयसदादिभिश्च । एभिश्चेति सामान्यशब्दनिर्देशेन विशेषावगतिरस्ति, अतो विशेषार्थमाह–**निर्देशादिभिः** । आदिशब्देन निर्देशे सति नेयत्तापरिज्ञानमस्तीति समासे चाव्यक्ताभिधानं प्रसिद्धं न सूत्रादपीयत्ता सम्भाव्येत अतः **षड्भिरिति** । अस्मिन् किमेतानि व्याख्याद्वाराणि नेति या शङ्का तन्निरसनायाह–**अनुयोगद्वारैः**, व्याख्याङ्गैरित्यर्थः । एषां च व्यापिता अस्ति नास्ति इत्याशङ्काव्युदासायाह–**सर्वेषामिति** । उक्तेऽपि चैतस्मिन्नभावोऽपि सर्वशब्देनोपात्तः तन्निराचिकीर्षयाऽऽह–**भावानामिति** । अभावे हि व्यर्थत्वात् प्रयासस्य न तद्विषयमेतदिति कथयति । भावा अप्यन्यमताभिमताः सन्त्यतत्त्वरूपा इत्यतो द्वयमुपादत्ते–**जीवादीनां तत्त्वानामित्येतत्** । ते च जीवादयः किमेभिः समासेन निरूप्यन्ते उत व्यासेनेत्यत आह–**विकल्पश इति** । शसश्च कारकसामान्याद् विधानमिति तृतीयार्थ एष इत्येतत् कथयति **विस्तरेणेत्यनेन** । उक्तेऽपि चैतस्मिन्नसम्पूर्णमेव वाक्यं स्याद् यदि पूर्वसूत्रादधिगम इत्येतन्नानुवर्तेत, अतोऽनुवर्तत इति कथयति–**अधिगम इति** । सत्तां च पदार्थो न व्यभिचरति यद्यपि तथाप्यन्यस्याः

निर्देशादीनां व्याख्या

---

१ 'निजकवक्तव्यतासत्याः' (सम्मति–तर्के) । २ 'एवं सर्वेपि नया मिथ्यादृष्टयः' (सम्मति०) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रियाया नाध्याहारः कर्तव्यः, ततश्च भवतीत्याह । एवं सम्बन्धं लगयित्वा सूत्रं व्याख्यानयन्नाह—

भा०—तद्यथा । निर्देशः । को जीवः ? । औपशमिकादिभावयुक्तो द्रव्यं जीवः ॥

टी०—तद्यथेत्यादि । यथैते भाव्यन्ते निर्देशादयः तथा कथ्यन्ते, **निर्देश** इति चोपन्यस्य उद्देशवाक्यमुच्चारयति—**को जीव** इति । न चाप्रस्तुतोपन्यासः, कथमिति चेत् ? उच्यते—उद्देशवाक्यमन्तरेण निर्देशस्य ख्यापनमशक्यं कर्तुम्, यदि हि पूर्वं सामान्यरूपोद्देशचोदना न स्यान्निर्देशवाक्यमप्यसम्बद्धत्वादुन्मत्तवचोवदसङ्गतार्थं स्यात्, सामान्यार्थाभिधानमुद्देशः, तद्विशेषप्रतिपिपादयिषया वचनं निर्देशः । पूर्वं प्रश्नवाक्यमुच्चारयति—निर्दिश्यमानार्थोपकारि, कीदृशः खलु मया जीवः प्रतिपत्तव्यः ? किं द्रव्यरूपो गुणरूपः क्रियास्वभाव इति ?। नामादीनां वा अन्यतम इति पृष्टे निर्देश इति,—निश्चयेन उपयुज्यते प्रस्तुते वस्तुनि स निर्देशः । **औपशमिकादिभावेत्यादि** । औपशमिकादयोऽभिहितास्त एव भावास्तथाभवनादात्मनः तैर्युक्तः औपशमिकादिभावयुक्तः । द्रव्यं जीव इति, गुणक्रिया[1]व्युदासद्वारेण निश्चयेन तदादिष्टं द्रव्यं जीव इति । द्रव्यं जीवः स चाप्यौपशमिकादिभावयुक्त इति । ततश्च न केवलं *द्रव्यं नापि केवला भावाः किन्तु उभयात्मकं जीववस्तु प्रतिपन्नं भवति । अथवा द्रव्यमेव प्रधानं* यतस्तेन तेनौपशमिकादिभावेन द्रव्यमेव तथा तथा विपरिवर्तते १ ॥ स्वामित्वादयो जीवेऽभ्यूह्या अनया दिशेति न दर्शितवान्, वयं तु दर्शयामः—स्वामी-प्रभुः तद्भावः स्वामित्वं, जीवो हि कस्य प्रभुः ? जीवस्य वा के स्वामिनः ? इति, उच्यते—जीव एकोऽवधीकृतः धर्मादीनामस्तिकायानां स्वामी, यतः सर्वेषु मूर्च्छां यात्युपलभते परिभुङ्क्ते शरीरतया वाऽऽदत्तेऽतः सर्वेषां जीवः स्वामी, जीवस्यापि जीवा अन्ये तन्मूर्च्छादिकारिणः स्वामिनो भवन्ति २॥ साध्यते येन तत् साधनम्, केन चात्मा साध्यते ? उच्यते—नान्येनासौ सततं समवस्थितत्वाद् बाह्यान् वा पुद्गलान् अपेक्ष्य देवादिजीवः साध्यत इति तैस्तत्तत्स्थानं नीयत इति यावत् ३ ॥ अधिकरणमाधारः, [2]कस्मिन्नात्मा निश्चयस्य स्वात्मप्रतिष्ठत्वात् स्वात्मनि, व्यवहारस्य शरीराकाशादौ ४॥ स्थितिरात्मरूपादनपगमः । कियन्तं कालमेष जीवभावेनावतिष्ठते ? । भवाननङ्गीकृत्य सर्वस्मिन् काले, देवादींस्तु भवानङ्गीकृत्य यावती यत्र स्थितिस्तावन्तं कालं तत्रावतिष्ठत इति ५॥ विधानं प्रकारः, कतिप्रकारा जीवाः ? त्रसस्थावरादिभेदाः ६॥ एवं शेषा अपि सिद्धान्तानुसारिण्या धियाऽवलोक्य पारमर्ष प्रवचनं वाच्याः, ग्रन्थगौरवभयात् तु नाद्रद्रे भाष्यकारः । तथा यदर्थं शास्त्रप्रवृत्तिस्तत्रापि योजनां निर्देशादीनां कुर्वन्नाह—

भा०—सम्यग्दर्शनपरीक्षायाम् । किं सम्यग्दर्शनं द्रव्यम् ? । सम्यग्दृष्टिर्जीवोऽरूपी नोस्कन्धो नोग्रामः ॥

---

१ 'गुण्यक्रिया' इति क-ख-पाठः । २ 'प्राधान्यं' इति क-ख-पाठः । ३ 'कस्मिन् वा' इति ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—सम्यग्दर्शनपरीक्षायामित्यादि । यदा सम्यग्दर्शनं परीक्ष्यते तदापि सम्यग्दर्शनं किं गुणः क्रिया द्रव्यमिति पृष्टे निर्देशो भवति, उच्यते—द्रव्यम्, ये जीवेन शुभाध्यवसायविशेषेण विशोध्य पुद्गलाः प्रतिसमयमुपभुज्यन्ते अतस्ते सम्यग्दर्शनस्य निमित्तम्, तदुपष्टम्भजन्यत्वात् श्रद्धानपरिणामस्य, ततश्च कारणे कार्योपचाराद् द्रव्यं सम्यग्दर्शनम् । मुख्यया तु वृत्त्या रुचिरात्मपरिणामो ज्ञानलक्षणः श्रद्धासंवेगादिरूपः सम्यग्दर्शनं तदप्यात्मद्रव्यमेव द्रव्यनयस्य, पर्यायनयस्य तु गुणमात्रमवसेयमिति । यदि तर्हि पुद्गला द्रव्यस्वभावा रुचिमापादयन्तः सम्यग्दर्शनमिति भण्यन्ते, न तर्हि क्षीणदर्शनमोहनीयस्य छद्मस्थकेवलिसिद्धजीवस्य सम्यग्दर्शनं प्राप्नोतीत्युक्ते आह—**सम्यग्दृष्टिजीव** इति । सम्यक् शोभना दृष्टिर्या सत्पदार्थावलोकिनी सा सम्यग्दृष्टिर्यस्य क्षीणदर्शनमोहनीयस्य स सम्यग्दृष्टिजीवः । एतत्कथयति, क्षीणे दर्शनमोहनीये नैवासौ सम्यग्दर्शनी भण्यते, कस्तर्हि ? सम्यग्दृष्टिरेवासौ भण्यते, ततः सिद्धसाध्यता, स पुनः क्षीणदर्शनमोहः किं रूपी ? नेत्याह—**अरूपी** । अविद्यमानं रूपमस्येत्यरूपी, सर्वधर्मादिषु क्षेपः । नासौ रूपादिधर्मसमन्वितः अमूर्त आत्मेति । छद्मस्थकेवलिनोर्यद्यपि कर्मपटलोपरागः तथाप्यात्मा न स्वभावमुपजहाति, आगन्तुकं हि कर्मरजो मलिनयत्यात्मानमभ्रादीव चन्द्रमसम् । सिद्धः सर्वथाप्यरूप एव । सम्यग्दृष्टिरिदानीमाशङ्क्यते—किं स्कन्धो ग्राम इति, तन्निरासायाह—**नोस्कन्धः** । अरूपत्वादेव न स्कन्धः, पुद्गलादिरूपस्वप्रदेशाङ्गीकरणात् स्यात् स्कन्धः, अथवा पञ्चास्तिकायसमुदितिः स्कन्धः, नोशब्दस्य तदेशवाचित्वान्नोस्कन्धः सम्यग्दृष्टिः । एवं **नोग्रामो**ऽपि वक्तव्यः । एवं सम्यग्दर्शनिनः सम्यग्दर्शनकारणत्वात् पुद्गलानपादिक्षत् सम्यग्दर्शनं, तैर्वियुतैः[1] पुद्गलैः सम्यग्दृष्टिरिति ॥

सम्यक्त्वरूप निर्देशः

भा०—स्वामित्वम् । कस्य सम्यग्दर्शनमिति ? एतदात्मसंयोगेन परसंयोगेन उभयसंयोगेन चेति वाच्यम् । आत्मसंयोगेन जीवस्य सम्यग्दर्शनम् । परसंयोगेन जीवस्याजीवस्य जीवयोरजीवयोर्जीवानामजीवानामिति विकल्पाः । उभयसंयोगेन जीवस्य नोजीवस्य जीवयोरजीवयोर्जीवानामजीवानामिति विकल्पा न सन्ति, शेषाः सन्ति ॥

आत्मपरोभयसंगमेन सम्यक्त्वम्

टी०—सम्प्रति स्वामित्वशब्दोच्चारणे **स्वामित्वम्** इत्यनेन कस्य स्वामिनः सम्यग्दर्शनमित्युद्देशवाक्यमेवं कृत्वा प्रवृत्तम् । किं यत् समवाय्येतत् तस्यैवैतत्, उत तदुत्पत्तिनिमित्तभूतस्यान्यस्यापि व्यवहारार्थमाश्रीयत इति ? । उच्यते—मुख्येन तावत् कल्पेन यद्यत्र समवेतं तत् तस्यैवेति, व्यवहारार्थं तु निमित्तभूतमप्याश्रीयते । एतदाह—**आत्मसंयोगेनेत्यादि** । **आत्मसंयोगेनात्मसम्बन्धेन** । यदा हि उत्पद्यमानस्य सम्यग्दर्शनस्य परतोऽपि निमित्तात् प्रतिमादि-

---

१ 'वियुतैः' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कान्नापेक्षा क्रियते प्रतिमादेः तदाऽसौ परिणाम आत्मनि समवेत इतिकृत्वा स एवात्मा तेन परिणामेन तानि तत्त्वान्येवमभिमन्यते, अतः आत्मसंयोगेन जीवस्य सम्यग्दर्शनम्, **जीवस्य** स्वामिनः **सम्यग्दर्शनं** रुचिरिति । **परसंयोगेनेति** । परं साधुप्रतिमादिवस्तु तन्निमित्तीकृत्य श्रद्धानपरिणाम उपजायते अतः स परिणामस्तत्कर्तृक इति तस्य व्यपदिश्यते । अत्र च परसंयोगे षड् विकल्पा भवन्ति जीवस्येत्यादयः । यदाऽस्य जन्तोः परमेकं मुनिमालम्ब्य क्रियानुष्ठानयुक्तं सा रुचिरुपजायते, क्षयोपशमो हि द्रव्यादिपञ्चकमुररीकृत्य प्रादुरस्ति, अतो बहिरवस्थितस्य साधोरुत्पादयितुः सा रुचिः, स्वं कुम्भ इव कुम्भकारस्येति । एवमेकमजीवाख्यं पदार्थं प्रतिमादिकं प्रतीत्य यदा क्षयोपशमः समुपाजनि तदा तस्यैवाजीवस्य सम्यग्दर्शनं नात्मन इति । यदा पुनर्द्वौ साधू निमित्तं क्षयोपशमस्य विवक्षितौ नात्मा तदा जीवयोः सम्यग्दर्शनम् । यदा पुनरजीवौ प्रतिमाख्यावुभौ निमित्तीकृतौ तदा तयोः स्वामित्वविवक्षायां तत् सम्यग्दर्शनमिति । यदा पुनर्बहवो जीवाः साधवस्तस्योत्पत्तौ निमित्तं भवन्ति तदा जीवानां सम्यग्दर्शनं नतु यत्र समवेतमिति । यदा पुनर्बह्वीः प्रतिमा भगवतां दृष्ट्वा तत्त्वार्थश्रद्धानमाविर्भवति तदा च तासामेव तत्कर्तृत्वान्नात्मन इति ॥ **उभयसंयोगेनेति** । यदात्मनोऽन्तरङ्गस्य बहिरङ्गस्य च साध्वादेस्तद् विवक्ष्यते तदा उभौ तस्य सम्यग्दर्शनस्य स्वामिनौ भवत इत्युभयसंयोगोऽभिधीयते । अत्र च लाघविक आचार्यो हेयान् विकल्पान् दर्शयति । आदेयाः पुनरुपात्तव्यतिरिक्ताः । अयं तावदत्र विकल्पो न सम्भवति जीवस्य सम्यग्दर्शनमिति, यतोऽनेन षष्ठ्यन्तेन सम्यग्दर्शनस्य यः समवाय्यात्मा स वा भण्यते बाह्यो वा तीर्थकरादिर्यमवलोक्य स तादृशः परिणतिविशेषः समुदभूदिति, तत्र यद्यात्मा समवायी सम्बध्यते, नास्ति तदा परस्य सम्बन्धः, उभयसंयोगेन चैतच्चिन्त्यते, अथ बाह्यस्तीर्थकरादिभिरभिसम्बध्यते तदा नात्मादिसम्बन्धः अतस्त्याज्य एवायं विकल्पः । एवं **नोजीवस्येति**। अजीवस्येत्यर्थः । एकस्याः प्रतिमाया विवक्षितत्वादुभयसंयोगाभाव इति हेयो विकल्पः । तथा **जीवयोः** सम्यग्दर्शनमिति न सम्भवति यस्माद् द्वावत्र समवायिनौ पुरुषौ स्वामितया विवक्षितौ मम च सम्यग्दर्शनमस्य च सम्यग्दर्शनमुत्पन्नमिति, यतस्तु तदालम्ब्योत्पन्नं विवक्षैव स्वामितया उत्पादकनिमित्तयोश्चोभयसंयोगो विवक्षितः अतस्त्यज्यते । तथा **अजीवयोः** सम्यग्दर्शनमिति द्वयोः प्रतिमयोरालम्बनीकृतयोर्भेदेन तद् विवक्षितम्, यत्र तु समवेतं तत्राविवक्षातस्त्यज्यते अयमपि विकल्पः । तथा पञ्चमोऽपि त्याज्यः । **जीवानामिति**। अत्र हि बहव एव सम्यग्दर्शनसमवायिनो विवक्षिता जीवा मम अस्य चास्य चेति न तु येनालम्बनेन तेषामुत्पन्नं तस्यालम्ब्यस्य तत् सम्यग्दर्शनं विवक्षितम्, तस्मादयमपि त्याज्यः। षष्ठोऽपि **अजीवानामिति** त्यज्यते, आलम्ब्यानां बहूनां प्रतिमानामेतत् सम्यग्दर्शनमिति विवक्षितं, यत्र तूत्पन्नं तत्राविवक्षितं यत्र नोत्पन्नं तत्र विवक्षितमिति त्याज्य एव षष्ठो विकल्पः। एवमेते उभयसंयोगविवक्षायां षडपि त्यक्ताः ॥ आदेया अपि षडेव, यथा जीवस्य च जीवस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च, यस्य तदुत्पन्नं तस्य तत्परिणन्तुः यं च निमित्तीकृत्य साधुमुपजायते दर्शनं तस्य च तदिति उभयोर्विवक्षितत्वेन जीवस्य च जीवस्य च विकल्पः सम्भाव्यते।१। तथा यस्य तदुत्पन्नं तस्य च विवक्षितम्, याभ्यां च दृश्यमानाभ्यां साधुभ्यां तदुत्पादितं तयोश्च साधुजीवयोस्तत् सम्यग्दर्शनमुभयत्रापि स्वत्वेन विवक्षितत्वात् जीवस्य जीवयोश्च द्वितीयविकल्पः । २ । तथा यस्य तदुत्पन्नं तस्य विवक्षितं यैश्च दृश्यमानैः साधुभिरुत्पादितं तेषां च तत् सम्यग्दर्शनं सम्भवीति विकल्पो जीवस्य जीवानां चेति । ३ । तथा यस्य जीवस्य तदुत्पन्नं तस्य च विवक्षितं यया च दृश्यमानया प्रतिमया अजीवरूपयोत्पादितं तस्याश्च तदिति तदा जीवस्य च तत् तस्याश्च प्रतिमायास्तदिति सम्भाव्यते विकल्पः जीवस्याजीवस्य चेति । ४ । तथा जीवस्य त(य)स्य तदुत्पन्नं याभ्यां च प्रतिमाभ्यां दृश्यमानाभ्यां तदुत्पादितमुभयत्र विवक्षितत्वात् सम्भाव्ययं विकल्पो जीवस्याजीवयोश्चेति।५। तथा त(य)स्य तदुत्पन्नं याभिश्च प्रतिमाभिः दृश्यमानाभिरुत्पादितं सर्वत्र विवक्षितत्वात् जीवस्याजीवानां चेति भङ्गकः सम्भाव्यते । ६ । एतदाह—**शेषाः सन्ति**, षडित्यर्थः । सम्प्रति तृतीयद्वारं परामृशन्नाह—**साधनम्** इति । साध्यते—निर्वर्त्यते येन तत् साधनम् । अत्र पृच्छ्यमानं, तदाह—

क्षयोपशमादीनां साधनता

भा०—साधनम् । सम्यग्दर्शनं केन भवति ?। निसर्गादधिगमाद् वा भवतीत्युक्तम् (१-३) । तत्र निसर्गः पूर्वोक्तः । अधिगमस्तु सम्यग्व्यायामः । उभयमपि तदावरणीयस्य कर्मणः क्षयेणोपशमेन क्षयोपशमाभ्यामिति ॥

टी०—सम्यग्दर्शनं केन भवति—याऽसौ रुचिः सुविशुद्धसम्यक्त्वदलिकोपेता सा केन भवतीत्यर्थः । इतर आह—**निसर्गादधिगमाद् वा भवतीत्युक्तम्**, एतत् कथयति—न तावेव निसर्गाधिगमौ तादृशीं रुचिं जनयतः, किन्तु निसर्गाधिगमाभ्यां क्षयोपशमादयः कर्मणां[2] जन्यन्ते, ततः क्षयोपशमादेः सम्यग्दर्शनं सम्भवति, तावपि च निसर्गाधिगमौ कर्मणां क्षयोपशमादेरेव भवतः, ततस्ताभ्यामुत्तरोत्तरक्षयोपशमं विशुद्धं विशुद्धतरमापादयमानाभ्यां यदा प्रतिविशिष्टः क्षयोपशम आपादितो भवति तदा तस्मात् प्रतिविशिष्टात् क्षयोपशमात् सम्यग्दर्शनं भवति इति कथयति । तत्र निसर्गे बहु वक्तव्यमिति प्राक् तद् दर्शितमेव, एकेन च वाक्येन न शक्यं तत् समस्तं दर्शयितुमित्यतिदिशति—**तत्र निसर्गः पूर्वोक्तः** । अधिगमोऽल्पविचारत्वादेकेनैव वाक्येन, समस्ताधिगमोपसंहारभावादाह—**अधिगमस्तु सम्यग्व्यायाम**[3] इति । गुर्वादिसमीपाध्यासिनः शुभा या क्रिया सम्यग्दर्शनोत्पादनशक्ता सा सम्यग्व्यायाम इत्युच्यते । **उभयमपीत्यादि** । **उभयमपीति** निसर्गसम्यग्दर्शनमधिगमसम्यग्दर्शनं च, तौ च निसर्गाधिगमावुभावपि कथं भवतः ?। आह—**तदावरणीयेत्यादि**। तस्य रुचिलक्षणस्य ज्ञानस्य यदावरणीयकं तत् तदावरणीयं, आवरणीयशब्दाच्च निश्चीयते

१ 'व्याख्यायाम' इति क-ख-पाठः । २ 'कर्मणां' इत्यधिकः क-ख-पाठः । ३ 'व्याख्यायाम' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानम्, तदन्यत्र हि ज्ञानदर्शनावरणीयवर्जिते कर्मणि नावरणीयव्यवहारः प्राय इति। किं पुनस्तदावरणीयम्? मतिज्ञानाद्यावरणीयम्, अनन्तानुबन्ध्यादि च निमित्ततया आवरणीयम्, यतस्तस्मिन्नुपशान्तेऽनन्तानुबन्ध्यादिकर्मणि तत् मतिज्ञानावरणीयं क्षयोपशमावस्थां भजते एतावता तदावरणीयं भण्यते। एतच्च पुरस्ताद् भावितमेव, अतः **तदावरणीयस्य कर्मणः क्षयेण**-उक्तलक्षणेन **उपशमेन** च **क्षयोपशमाभ्यामिति** च प्राप्यत इति॥ ननु च ज्ञानावरणीयस्योपशमो नास्ति, त्वया चैतन्निरूपितं ज्ञानावरणमस्यावरणमिति, तत् कथमेतत्?। उच्यते-सत्यमेतदेवं, किन्तु मोहनीयोपशमादस्य ज्ञानावरणस्य क्षयः क्षयोपशमो वा भवति, ततः क्षयात् क्षयोपशमाच्च सम्यग्दर्शनमिति भावितमेव किं भवता विस्मार्यते?॥ सम्प्रत्यधिकरणद्वारं स्पृशति—

आत्मपरोभयेषु सम्यक्त्ववृत्तिः

भा०—अधिकरणं त्रिविधमात्मसन्निधानेन परसन्निधानेनोभयसन्निधानेनेति वाच्यम्। आत्मसन्निधानमभ्यन्तरसन्निधानमित्यर्थः। परसन्निधानं बाह्यसन्निधानमित्यर्थः। उभयसन्निधानं अभ्यन्तरबाह्ययोः[2] सन्निधानमित्यर्थः। कस्मिन् सम्यग्दर्शनम्?। आत्मसन्निधाने परसन्निधाने उभयसन्निधाने इति। आत्मसन्निधाने तावत् जीवे सम्यग्दर्शनं जीवे ज्ञानं जीवे चारित्रमित्येतदादि। बाह्यसन्निधाने जीवे सम्यग्दर्शनं नोजीवे सम्यग्दर्शनमिति यथोक्ता विकल्पाः। उभयसन्निधाने चाप्यभूताः सद्भूताश्च यथोक्ता भङ्गविकल्पा इति॥

टी०—अधिकरणमिति। अधिक्रियते यत्र तदधिकरणम्-आधार आश्रय इति। स चाधारस्त्रिविधः-आत्मा वा यत्समवेतं दर्शनं मुख्यतः, उपचारात् परत्रापि भवति, यद् वस्तु समालम्ब्य तदुपजातं तस्मिन्नपि, तदुभयविवक्षायां चोभयत्र तद् आत्मनि परत्र च। एतदेव त्रैविध्यं दर्शयन्नाह—**आत्मसन्निधानेनात्मन्येव** स्थितमित्यर्थः, **परसन्निधानेन** परत्र स्थितमिति, आत्मस्थमपि सदस्मिन् पक्षे न विवक्ष्यते, **उभयसन्निधानेनात्मनि परत्र चेति वाच्यम्**—व्याख्येयमिति। आत्मसन्निधानमिति चास्यार्थं सुहृद् भूत्वा कथयति-**आत्मसन्निधानमभ्यन्तरसन्निधानमित्यर्थः**। आत्मैवाधार आत्मसन्निधानम्, प्रसिद्धतरेण शब्देनाभ्यन्तरसन्निधानमिति व्यपदिष्टः, आन्तर आसन्नस्तस्य सम्यग्दर्शनस्येति। **परसन्निधानमिति** चास्यार्थं विवृणोति-**बाह्यसन्निधानं**, बाह्यं[3]-प्रतिमादि कल्पितरूपम् इति। एवमुभयभावना कार्या। अधुनाऽऽधारे त्रिविधे कथिते परस्यैतदेव सन्देहकारणं जातम्। क तर्हि सम्यग्दर्शनमिति पृच्छति—**कस्मिन् सम्यग्दर्शनम्?** अथवा अन्यथा प्रश्नः-सम्यग्दर्शनमित्येष गुणः, गुणस्य चावश्यमाश्रयेण भवितव्यम्, स पुनराश्रयः

---

१ 'अस्य सम्यग्दर्शनस्य' इति क-टी-पाठः। २ 'बाह्याभ्यन्तरसंनिधानं' इति ग-घ-पाठः। ३ 'बाह्यप्रतिमादिः कल्पितरूप' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किमभ्यन्तरमात्मा उत बाह्यं प्रतिमादिवस्तु यदुपष्टम्भेनोपजातमुतोभयमिति प्रश्नित आह—**आत्मसन्निधाने तावदित्यादि** । आत्माधारविवक्षायां **जीवे सम्यग्दर्शनं**, तस्यान्यत्रादर्शनात्, यथा रुचिः, एवं ज्ञानचारित्रे अपीति, एतदाह—**जीवे ज्ञानं जीवे चारित्रमिति** । न च ज्ञानदर्शनचारित्राणि विरहव्यान्यो जीवोऽस्तीति काल्पनिकमपदिशति । कथम् ? यदा तावज्जीवे सम्यग्दर्शनं तदा ज्ञानचारित्रे आधारभावं प्रतिपद्येते, ज्ञानचारित्रात्मनि जीवे सम्यग्दर्शनम् । यदा जीवे ज्ञानं तदा दर्शनचरणयोराधारता, यदा जीवे चारित्रं तदा ज्ञानदर्शनयोराधारता, चारित्रमाधेयमिति । **एतदादि** इति । एतानि ज्ञानादीनि आदिर्यस्य गुणान्तरस्य तदेतदादि, तदपि जीवे आधारे द्रष्टव्यम्, भव्याभव्यत्वादि । **बाह्यसन्निधाने जीवे सम्यग्दर्शनमित्यादि** ॥ ननु चात्मन्येवोपलभ्यत इत्युक्तं कथमिदानीं परस्मिन्नपि व्यपदिशति ?। उच्यते—न यदेव यत्राविभागेनावस्थितं तदेव तत्रेत्युच्यते, किन्तु अन्यत्राप्यवस्थितमन्यत्र अपदिश्यते, देवदत्ते धनमिति गेहस्थमेव तत्रेत्युच्यते । जीवे सम्यग्दर्शनमित्यादयो विकल्पाः पूर्वं भाविता एव, इहाप्याधारभेदं केवलमुच्चारयता सर्वं तथैव भावनीयम् । **उभयसन्निधाने चाभूताः सद्भूताश्च** षडेव यथोक्ता भङ्गा एव विकल्पाः भङ्गेषु वा विकल्पा इति ॥ **स्थितिद्वारम्, स्थितिरित्येतद् विवृणोति**—

सम्यग्दर्शनस्य सम्यग्दृष्टेश्च द्विधा स्थितिः

भा०—स्थितिः । सम्यग्दर्शनं कियन्तं कालम् ? । सम्यग्दृष्टिर्द्विविधा । सादिः सपर्यवसाना सादिरपर्यवसाना च । सादिसपर्यवसानमेव सम्यग्दर्शनम् । तज्जघन्येनान्तर्मुहूर्तम्, उत्कृष्टेन षट्षष्टिः सागरोपमाणि(णि) साधिकानि । सम्यग्दृष्टिः सादिरपर्यवसाना । सयोगः शैलेशीप्राप्तश्च केवली सिद्धश्चेति ॥

टी०—सम्यग्दर्शनं कियन्तं कालं सम्पन्नं सदवतिष्ठते ? "कालाध्वनोः" (पाणिनिः अ० २, पा० ३, सू० ५) इति द्वितीया । प्रश्नयितुरयमभिप्रायः—प्रागभूत्वा [illegible]ध्यादृष्टेर्दर्शनमाविश्चकास्ति, यच्चोत्पत्तिमत् त(त्किञ्चि)त् सादि सपर्यवसानं दृष्टं मनुष्यत्वादिवत्, किञ्चित् सादि अपर्यवसानं सिद्धत्वादिवत्, आचार्योऽपि प्रश्नाभिप्रायानुरूपमेवोत्तरमाह—**सम्यग्दृष्टिर्द्विविधेत्यादि** । द्विविधेति सादिः सपर्यवसाना सादिरपर्यवसाना चेत्येवं द्विविधा शोभना दृष्टिः । का च शोभना ? या शुद्धदलिककृता, या च दर्शनमोहनीयक्षयात् त्रयाणां भवति छद्मस्थस्य श्रेणिकादेरिव, अपरा भवस्थस्यापायसद्द्रव्यपरिक्षये केवलिनः, अपरा सिद्धस्येति । तत्र याऽपायसद्द्रव्यवर्तिनी श्रेणिकादीनां सद्द्रव्यापगमे च भवति अपायसहचारिणी सा सादिसपर्यवसाना, यस्मिन् काले श्रेणिकादिभिर्दर्शनमोहसप्तकं क्षपयित्वा रुचिरात्मा स आदिस्तस्याः, यदा त्वपायः—आभिनिबोधिकमपगतं भविष्यति केवलज्ञाने उत्पन्ने सोऽन्तोऽस्याः सम्यग्दृष्टेः, एतदाह—**सादिः सपर्यव-**

---

१ 'अन्यथा' इति पाठान्तरम् । २ 'मन्यत्वं' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सानेति। या तु भवस्थकेवलिनो द्विविधस्य सयोगाऽयोगभेदस्य सिद्धस्य वा दर्शनमोहनीयसप्तकक्षयादपायसद्द्रव्यक्षयाच्चोदपादि सा **सादिरपर्यवसानेति**। यस्मिन् काले दर्शनमोहनीयं क्षपयित्वा प्राप्ता स आदिः तस्याः। एवमेतत् तत्त्वमित्येवंविधा या रुचिः सा न कदाचित् तस्या-पैष्यतीति। एवं यथाक्रममुपन्यस्य स्वयं व्याख्यानयति—सादिसपर्यवसानेति यदुक्तं तस्येदं व्याख्यानम्-**सादिसपर्यवसानमेव सम्यग्दर्शनम्**। यच्चापायसद्द्रव्यवर्ति तच्च सम्य-ग्दर्शनमितीह भणति। यच्च सद्द्रव्यविगमे अपायसम्भवे **श्रेणिकादीनां** तच्च भणति। कथं च सादीति? सहादिना वर्तत इति सादि, यस्मिन् काले मिथ्यादर्शनपुद्गलान् विशोध्य स्थाप-यति सम्यग्दर्शनतया तदा सादि, यदा त्वनन्तानुबन्ध्युदयात् पुनर्मिथ्यादर्शनतया परिणाम-मानेष्यति क्षपयित्वा वा तान् सम्यग्दर्शनपुद्गलान् केवली भविष्यति तदा सपर्यवसानम्। सह पर्यवसानेन यद् वर्तते तत् सपर्यवसानमेव सम्यग्दर्शनम्। यदा च दर्शनसप्तकं क्षपयित्वा प्राप्नोति **श्रेणिकादिः** स आदिस्तस्य केवलप्राप्तावन्त इति। तत् पुनः सम्यग्दर्शनं सादिसपर्यव-सानम्। शुद्धदलिकसहवर्तिनी रुचिः कियन्तं कालं भवतीति यत् पुरस्ताच्चोदितं तद् भावयन्नाह —**तज्जघन्येनेत्यादि**। **तत्**—सम्यग्दर्शनं **जघन्येन अन्तर्मुहूर्तम्, मुहूर्तो घटिकाद्वयं,** मुहूर्तस्य मध्यं अन्तर्मुहूर्तम्। तदवतिष्ठते जघन्येनेति। 'सुप्सुपे'ति समासो भवति। अत्यन्त-संयोगे कालस्य द्वितीया। एतद् भवति तथा कश्चिज्जन्तुः सम्यग्दर्शनं द्विघटिकान्तस्त-त्परिणाममनुभूय मिथ्यादर्शनी भवति केवली वा परतः, एवं च जघन्यां स्थितिमाख्यायो-त्कृष्टां निरूपयन्नाह—**उत्कृष्टेनेत्यादि**। उत्कर्षेण कियन्तं कालमास्ते? **षट्षष्टिः सागरो-पमाणि साधिकानि**, तद्भावना—**इहाष्टवर्षः** सम्यग्दर्शनमधिगम्य समासादितदीक्षः पूर्वकोटीं विहृत्याष्टवर्षोनाम् अपरिच्युतसम्यग्दर्शनो विजयादीनां चतुर्णामन्यतमस्मिन् विमाने उदपादि स्थितावुत्कृष्टायां, त्रयस्त्रिंशत्सागरोपमस्थितिः, तत्क्षयाच्च प्रच्युत्य मनुजेषु सहदर्शनः समजनि, पुनस्तेनैव प्रकारेण संयममनुष्ठाय तदेव विमानं तावत्स्थितिमनुप्रापत्, पुनः स्थितौ क्षीणायामक्षीणतत्त्वार्थश्रद्धानः (नरत्वमनुगतः)संयमं प्राप्यावश्यन्तया सिद्धयति। एवं द्वे त्रयस्त्रिंशतौ षट्षष्टिः पूर्वकोटीत्रयातिरिक्ता, अच्युतकल्पे वा द्वाविंशतिसागरोपमस्थितिस्तिस्रो वाराः समुत्पद्यते, अतः परमवश्यम्भाविनी तस्य सिद्धिरिति। यदुक्तं पुरस्तात्—सम्यग्द-ष्टिर्द्विविधा सादिः सपर्यवसानेति सोऽंशो भावितः। स्थितिरेव सादिरपर्यवसानेति योंऽशस्तं भावयत्यनेन—**सम्यग्दृष्टिः सादिरपर्यवसाना सयोग** इत्यादिना। सह योगैर्मनोवाक्-कायलक्षणैः सयोगकेवली, उत्पन्ने केवलज्ञाने यावच्छैलेशीं नो प्रतिपद्यते तावत् सयोगकेवली, शैलेशीप्रतिपत्तौ तु निरुद्धयोगत्वादयोगः। एतदेवाह—**शैलेशीप्राप्त** इति। शिलानां समूहाः शैलाः तेषामीशो मेरुस्तस्य भावः शैलेशी अचलतेतियावत् तां प्राप्तः। स चेयान् कालो ज्ञेयः—मध्यमया वृत्त्या पञ्च ह्रस्वाक्षराण्युच्चार्यन्ते यावत्, ततः परं सिद्धयत्येव। एष द्विविधोऽपि केवली सयोगायोगाख्यो भवस्थः साद्यपर्यवसानः सम्यग्दृष्टिरुच्यते। सिद्धश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वकर्मवियुत इति । यतः सादिरप्यसौ रुचिर्न कदाचिदपैष्यतीति । सम्यग्दृष्टिः सादिरपर्यवसानैवेत्ययं स्त्रीलिङ्गनिर्देशः भवस्थकेवलिनः सयोगायोगस्य च सिद्धस्य च तस्या रुचेरनन्यत्वख्यापनार्थो, नासौ ततोऽन्य इति । अथवा सम्यग्दृष्टिः सादिरपर्यवसाना याऽभिहिता तामनुभवति सयोगादिरिति नेयम् ॥ सम्प्रति विधानद्वारं परामृशन्नाह—

भा०—विधानम्। हेतुत्रैविध्यात् क्षयादि त्रिविधं सम्यग्दर्शनम्। तदावरणीयस्य कर्मणो दर्शनमोहनीयस्य च क्षयादिभ्यः। तद्यथा—क्षयसम्यग्दर्शनं, उपशमसम्यग्दर्शनं, क्षयोपशमसम्यग्दर्शनमिति। अत्र चौपशमिकक्षायोपशमिकक्षायिकाणां परतः परतो विशुद्धिप्रकर्षः ॥ ७॥ किं चान्यत् ॥

टी०—विधानमिति। विधीयते तदिति विधानं भेदः प्रकार इति॥ ननु च साधनद्वारेऽभिहित एव भेदो निसर्गसम्यग्दर्शनम्, अधिगमसम्यग्दर्शनमिति च, किं पुनर्भेद आख्यायते ?। उच्यते—तत्र न सम्यग्दर्शनस्य भेदः प्रतिपिपादयिषितः, किन्तु निमित्तम्, तत्र क्षयादि यदुत्पत्तौ कारणतां प्रतिपद्यते तद्भेदो विवक्षितः, इह तु तेन निमित्तेन यत् कार्यमुपजनितं तस्य भेदः प्रतिपाद्यत इति, एवं च कृत्वा वक्ष्यमाणस्य सङ्ख्याद्वारस्यास्य च विधानद्वारस्य स्पष्ट एव भेदो निदर्शितः स्यात्। विधानं सम्यग्दर्शनस्य भेदकं, क्षयसम्यग्दर्शनम् उपशमसम्यग्दर्शनं क्षयोपशमसम्यग्दर्शनमिति। सङ्ख्याद्वारेषु तद्वतो भेदः प्रतिपाद्यते, कियत् सम्यग्दर्शनम् ? कियन्तः सम्यग्दर्शनिन इत्यर्थः । निर्णयवाक्येऽपि चासङ्ख्येयानि सम्यग्दर्शनानीत्यस्मिन्नसंख्येयाः सम्यग्दर्शनिन इत्यर्थः,मतुब्लोपादभेदोपचारात् अर्शआदिपाठाद् वा,तस्माद्युक्तं त्रयाणां साधनविधानसङ्ख्याद्वाराणां परस्परेण भेद इति। सम्प्रति भेदकथने प्रवर्तमान एकस्याश्च भेदरूपता रुचेरयुक्तरूपेति मन्यमानः कारणोपाधिकं भेदं दर्शयन्नाह—**हेतुत्रैविध्यात् क्षयादि त्रिविधमित्यादि**। तिस्रो विधा यस्य स त्रिविधो हेतुः अन्यपदार्थः, त्रिविधस्य भावस्त्रैविध्यम्, हेतोस्त्रैविध्यं हेतुत्रैविध्यम्, तस्माद्धेतुत्रैविध्याद् वर्तमानसामीप्यादिवत् समासः। हेतुत्रैविध्यप्रदर्शनायाह—**क्षयादि त्रिविधं सम्यग्दर्शनम् इति**। कार्यनिर्देश एषः, न च त्रिभिः सम्भूयैकं जन्यते मृदुदकगोमयैरिवोपवेशनकं, किन्तु क्षयेणान्यैव रुचिरात्यन्तिकी सकलदोषरहिताऽविर्भाव्यते, क्षयोपशमेनापि चान्यादृश्येव, तथोपशमेनेति, अतस्त्रिविधं सम्यग्दर्शनम्। यत्कार्यं क्षयादिहेतुभिः। के पुनस्ते हेतव इति ?। उच्यते—क्षयादयः, कस्य ते क्षयादयोऽत आह—**तदावरणीयस्येत्यादि**। तस्य—सम्यग्दर्शनस्य, **आवरणीयम्**—आच्छादकं शशलाञ्छनस्येवाभ्रादि, तस्य चावरणीयं कर्म ज्ञानावरणीयं, मत्याद्यावरणीयमित्यर्थः। तस्य तदावरणीयस्य कर्मणः। तथा दर्शनमोहनीयस्य च इति, कस्येति चेत् ? उच्यते—अनन्तानुबन्ध्यादिदर्शनमोहनीयस्य चेति, अनन्तानुबन्ध्यादिदर्शनसप्तकस्य क्षयादिभ्य इति च—क्षयउपशमक्षयोपशमेभ्यो हेतुभ्यस्तदुपजायते, सम्यग्दर्शनावरणीयस्येति च ब्रुवता ज्ञानावरणीयम-

साधन-विधान-संख्यानां परस्परेण भेदः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ्युपगतम्, तदभ्युपगमे च ज्ञानत्वं सम्यग्दर्शनस्य सुप्रतिपाद्यम्। तथा दर्शनमोहनीयस्येति ब्रुवता इदमभ्युपगतम्–दर्शनमोहनीयस्य क्षयादिषु सत्सु तत्प्रादुर्भावो न पुनर्दर्शनमोहस्तदावरणमित्येतद् भावितमेव पुरस्तात्। ग्रन्थकारस्याप्ययमेवाभिप्रायः पुनरुद्घट्टित इति। **तत्र यथा इति**। एभ्यो हेतुभ्यो यत् कार्यमुपजातं तत् प्रदर्श्यते–**क्षयसम्यग्दर्शनमिति**। मत्याद्यावरणीयदर्शनमोहसप्तकक्षयादुपजातं क्षयसम्यग्दर्शनमभिधीयते, तेषामेवोपशमाज्जातं उपशमसम्यग्दर्शनमुच्यते, तेषामेव क्षयोपशमाभ्यां जातं क्षयोपशमसम्यग्दर्शनमभिदधति प्रवचनाभिज्ञाः। एषां च क्षयादीनां प्राग्भावना कृतैव, इह केवलं तदावरणीयेषु लगनीया इति। एवं क्षयादिहेतुकं यत् कार्यमुपाजनि तत् प्रदर्श्याधुना एतत् पृच्छ्यते–किमेकरूपाण्येवैतानि उतास्ति कश्चित् प्रकर्ष एषामिति ?। उच्यते—

अत्र चेत्यादि। **अत्रेति** एषु क्षयादिसम्यग्दर्शनेषु, यथा कार्यभेदोऽभ्युपगतः एवं प्रकर्षभेदोऽभ्युपगन्तव्य इति कथयत्येतच्छब्दः। तं च प्रकर्षं दर्शयन्नाह–**औपशमिकेत्यादि**। पूर्वं च क्षयसम्यग्दर्शनं प्रधानत्वादुपन्यस्येदानीं प्रकर्षस्य निदर्श्यत्वादन्ते तदुपन्यस्यति। उपशमेन–उदयविघातरूपेण निर्वृत्तमौपशमिकं, क्षयेण–उपरिशाटरूपेणोपशमेन च निर्वृत्तं क्षायोपशमिकम्, क्षयेण निर्वृत्तं क्षायिकम्, अत एषामौपशमिकादीनामिमां रचनामाश्रित्य परस्य परस्य विशुद्धिप्रकर्षो निर्मलता स्वच्छता तत्त्वपरिच्छेदितेत्यर्थः। औपशमिकं हि सम्यग्दर्शनं सर्वमलीमसम्, अल्पकालत्वात्, भूयश्च मिथ्यात्वगमनात्, यतोऽन्तर्मुहूर्तमात्रं भवेत्, यदि च कालं तत्रस्थो न करोति एवं सति मिथ्यादर्शनमेव प्रतिपद्यत इत्यागमः। तस्माच्चौपशमिकतः क्षायोपशमिकसम्यग्दर्शनं विशुद्धतरम्, बहुकालावस्थायित्वात्, यत उत्कृष्टेन षट्षष्टिः सागरोपमाणि साधिकानि तदुक्तम्, अत एव च तस्य वस्तुपरिच्छेदे स्पष्टं ग्रहणसामर्थ्यमनुमातव्यमागमाच्चास्मात्, ततश्च क्षायिकं विशुद्धतमम्, सर्वकालावस्थायित्वात् स्पष्टवस्तुपरिच्छेदाच्चेति ॥७॥

किं चान्यदित्युत्तरसूत्रसम्बन्धवाक्यं, न केवलमेभिरेवैभिश्च निश्चयः कार्य इति, कैरिति चेदित्यत आह—

सूत्रम्–सत्सङ्ख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वैश्च ॥१–८॥

टी०—सत्सङ्ख्येत्यादि। सच्छब्दं च सङ्ख्यादिविशेषणं कश्चिदाश्रयेदित्यतो निराकरणार्थं विविच्य दर्शयति—

भा०—सत्, सङ्ख्या, क्षेत्रं, स्पर्शनं, कालः, अन्तरं, भावः, अल्पबहुत्वमित्येतैश्च सद्भूतपदप्ररूपणादिभिरष्टाभिरनुयोगद्वारैः सर्वभावानां विकल्पशो विस्तराधिगमो भवति। कथमिति चेत्, उच्यते–सत्, सम्यग्दर्शनं किमस्ति नास्ति? अस्तीत्युच्यते। क्वास्तीति चेत्, उच्यते–अजीवेषु तावन्नास्ति, जीवेषु

१ 'तत्त्वानां' इत्यधिकः क–ख–पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तु भाज्यम् । तद्यथा-गतीन्द्रियकाययोगकषायवेदलेश्यासम्यक्त्वज्ञानदर्शनचारित्राहारोपयोगेषु त्रयोदशस्वनुयोगद्वारेषु यथासंभवं सद्भूतप्ररूपणा कर्तव्या ॥

टी०—सत् सङ्ख्या क्षेत्रमित्यादि युक्तमेवैतद् द्वारमिति । इतिशब्द इयत्तायाम् । इयद्भिरेव येऽन्ये तेऽत्रैवान्तर्भवन्ति, एतैश्च सूत्रोक्तैः । एतदेव विशेषयति—सद्भूतपदप्ररूपणादिभिः, सद्भूतस्य—विद्यमानार्थस्य सम्यग्दर्शनपदस्य प्ररूपणा—तत्त्वकथनं सा आदिर्येषां तानि सद्भूतपदप्ररूपणादीनि तैरिति विवेकेन फलं दर्शयति—अष्टाभिरिति । तेषां च व्याख्यानाङ्गतां कथयति—अनुयोगद्वारैरिति । सर्वभावानाम् इत्यनेनैषां व्यापितां कथयति—सदादीनां विकल्पश्च इत्यादि व्याख्यातमेव । कथमिति चेदित्यनेन पराभिप्रायमाशङ्कते—केन प्रकारेण एभिर्विस्तरेणाधिगमः क्रियत इत्येवं मन्येथाः ? उच्यते—यथा क्रियते विस्तराधिगम इति, सदित्यनेनाद्यद्वारं परामृशति, कथं चैतस्य द्वारस्योत्थानं ? यथा शङ्कते परः—किमस्ति नास्तीत्येवम्, अन्यथा सत्त्वे निर्ज्ञाते अयुक्तमेवैतत् कथनमिति, अत आशङ्कावाक्यं दर्शयति—सम्यग्दर्शनं किमस्ति नास्तीति । अस्माच्चायं संशयः, यतः शब्दोऽसत्यपि बाह्येऽर्थे शशविषाणादिकः प्रवर्तमानो दृष्टः, सति च बहिरङ्गेऽर्थे घटादौ दृष्टो घटादिः, अतः किं सत्यर्थे उतासति सम्यग्दर्शनशब्दः प्रवृत्तो बहिरर्थ इति प्रश्नयति । सूरिराह—अस्तीत्युच्यते । विद्यते सम्यग्दर्शनशब्दवाच्योऽर्थो घटादिशब्दवाच्यवत् । कथं चानेन निरचायि, आप्तोपदेशात् प्रशमसंवेगनिर्वेदाद्यनुमानाच्च । इतरेणाव्यक्ताभिधानवत् प्रतिपद्य पुनश्चोद्यते—क्व चैतदिति । गुणो ह्ययं तेन च परतन्त्रत्वात् साधिकरणेन भवितव्यम् रसेनेवाणुव्यापिनेत्येतदाशङ्क्य पराभिप्रायमाचार्य आह—क्वास्तीति चेत् मन्यसे, उच्यते—द्वये पदार्थाः—जीवा अजीवाश्च । तत्राजीवेषु तावन्नास्ति, निश्चयावलम्बनेन धर्माधर्माकाशपुद्गलेषु, यतो ज्ञानाख्यश्चेतनावत्सु समवेतो गुणः स कथमन्यधर्मः सन्नन्यत्र वर्तते । यच्चोक्तं कस्येति स्वामित्वचिन्तायां अजीवस्य प्रतिमादेः सम्यग्दर्शनमिति तदुपचारात्, नत्वसौ मुख्यः कल्पः । इह तु मुख्यां वृत्तिमशिश्रियद् वाचकमुख्यः, अजीवेषु तावदुक्तक्रमेण नास्तीति । अथ जीवेषु का वार्तेत्यत आह—जीवेषु तु भाज्यम् । तुशब्द एवकारार्थे भाज्यमेव, नावश्यम्भावि । सर्वेषु भजनां च कथयन्ति—

तद्यथा-गतीन्द्रियेत्यादिना । गत्यादीनि चान्यत्रावश्यकादौ प्रपञ्चेनोक्तानि, अशून्यार्थं तु किञ्चिद् दर्श्यते—गत्यादिषु पूर्वं प्रतिपन्नाः प्रतिपद्यमानाश्च सम्यक्त्वं चिन्त्यन्ते । तत्र नारकप्रभृतिषु गतिषु चतसृष्वपि पूर्वं प्रतिपन्नाः प्रतिपद्यमानाश्च जीवाः सन्ति, नरकगतौ क्षायिकक्षायोपशमिके स्यातां, तिर्यग्गतावप्येते, मनुष्यगतौ त्रीण्यपि क्षायिकादीनि सन्ति, देवगतौ

---

१ 'प्ररूपणादीनि' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षायिकक्षायोपशमिके भवेताम्। इन्द्रियाणि सामान्येनाङ्गीकृत्य सन्ति पूर्वप्रतिपन्नाः प्रतिपद्यमानकाश्च विकल्पशः, एकेन्द्रियेषु न पूर्वप्रतिपन्नाः न प्रतिपद्यमानकाः। द्वित्रिचतुरिन्द्रियेष्वसंज्ञिपञ्चेन्द्रियेषु च पूर्वप्रतिपन्ना भाज्याः सास्वादनसम्यक्त्वं प्रति प्रतिपद्यमानास्तु न सन्त्येव, संज्ञिपञ्चेन्द्रियेषु द्वयमप्यस्ति। कायान् पृथिव्यादीनाश्रित्य सामान्येन द्वयमप्यस्ति, विशेषेण धरणिजलानलानिलतरुषु द्वयं न सम्भवत्येव, द्वित्रिचतुरसंज्ञिपञ्चेन्द्रियेषु पूर्वप्रतिपन्नाः स्युः नाधुना प्रतिपद्यन्ते, संज्ञिपञ्चेन्द्रियत्रसकाये द्वयमपि स्यात्। योगे मनोवाक्काययेषु सामान्येन द्वयमपि, काययोगभाजां पृथिव्यादीनां तरुपर्यन्तानां न द्वयं, कायवाग्योगयुजां द्वित्रिचतुरसंज्ञिपञ्चेन्द्रियाणां पूर्वप्रतिपन्नाः स्युः न प्रतिपद्यन्त इति। मनोवाकाययोगानां द्वयम्। अनन्तानुबन्धिनामुदये न द्वयं, शेषकषायोदये द्वयम्। वेदत्रयसमन्वितानां द्वयमस्ति सामान्येन; विशेषेणापि स्त्रीवेदे द्वयं पुरुषवेदे द्वयं, नपुंसकवेद एकेन्द्रियाणां न द्वयं, विकलेन्द्रियाणामसंज्ञिपञ्चेन्द्रियपर्यवसानानां पूर्वप्रतिपन्नाः केचित् सन्ति, न प्रतिपद्यमानकाः, संज्ञिपञ्चेन्द्रियनपुंसकेषु द्वयं, नारकतिर्यङ्मनुष्यामरेषु लेश्यासु उपरितनीषु द्वयम्, आद्यासु प्रतिपन्नाः स्युः न तु प्रतिपद्यन्ते। किं सम्यग्दृष्टिः प्रतिपद्यते मिथ्यादृष्टिर्वा ?। अत्र निश्चयनयस्य सम्यग्दृष्टिः प्रतिपद्यते, अभूतं नोत्पद्यत इति शशविषाणादिवत्। व्यवहारस्य मिथ्यादृष्टिः प्रतिपद्यते, प्रतिपत्तेरभूतभावविषयत्वात्, असत् कारणे कार्यमिति दर्शनात्। एवं ज्ञानी निश्चयस्याज्ञानी व्यवहारनयस्य। चक्षुर्दर्शनिषु द्वयम् एका(चतुर)क्षाद्यसंज्ञिषु पूर्वप्रतिपन्नाः स्युर्न तु प्रतिपद्यमानकाः, संज्ञिपञ्चेन्द्रियचक्षुर्दर्शनिषु द्वयम्, (अचक्षुर्दर्शनिषु द्वयम्), अचक्षुर्दर्शनिषु पृथिव्यादिषु पञ्चसु द्वयं नास्ति, शेषेषु द्वित्रिचतुरसंज्ञिष्वचक्षुर्दर्शनिषु पूर्वप्रतिपन्नाः स्युर्न तु प्रतिपद्यन्ते, संज्ञिपञ्चेन्द्रियाचक्षुर्दर्शनिषु द्वयम्। चारित्री पूर्वप्रतिपन्न एव, अचारित्रः पूर्वप्रतिपन्नः प्रतिपद्यमानकश्च स्यात्। आहारकेषु द्वयम्, अनाहारकः पूर्वप्रतिपन्नः न तु प्रतिपद्यमानकोऽन्तरगतौ सम्भविता। **उपयोग** इति, साकारोपयुक्तः प्रतिपद्यते उत अनाकारोपयुक्त इति, उच्यते–साकारोपयुक्तः प्रतिपद्यते पूर्वप्रतिपन्नश्च, अनाकारोपयुक्तस्तु पूर्वप्रतिपन्नः स्यात् नतु प्रतिपद्यमानकः, यतः " सर्वाः किल लब्धयः साकारोपयोगोपयुक्तस्य भवन्ति" (**प्रज्ञापनासूत्रे** उपयोगपदे) पारमर्षवचनप्रामाण्यात्। **एतेषु त्रयोदशस्वनुयोगद्वारेषु** व्याख्यानाङ्गेषु **यथासम्भवमिति** यत्र सम्भवति यत्र न सम्भवति यथा वा क्षायिकादि सम्यग्दर्शनं यत्र सम्भवति तथा वाच्यं, सद्भूतपदार्थस्य सम्यग्दर्शनपदस्य प्ररूपणा व्याख्या कर्तव्या उन्नेया। भाषकपरित्तादयस्तु नादृता भाष्यकारेण, प्रायस्तेषामुपात्तानुयोगद्वारान्तर्गतेरिति, यतो भाषकः पञ्चेन्द्रियेष्ववतरति, परित्तोऽपि कायेषु पर्याप्तस्तेष्वेव, सूक्ष्मसंज्ञिभवचरमाश्च तेष्वेव, अतो नादृता इति॥ द्वितीयद्वारमुपन्यस्यन्नाह—

---

१ धनुश्चिह्नगतो भागः ग–पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—सङ्ख्या। कियत् सम्यग्दर्शनम्?। किं सङ्ख्येयमसङ्ख्येयमनन्तमिति?। उच्यते—असङ्ख्येयानि सम्यग्दर्शनानि, सम्यग्दृष्टयस्त्वनन्ताः॥

टी०—सङ्ख्येति। सङ्ख्या इयत्ता, सा चैका गणितव्यवहारानुवर्तिनी द्व्यादिका शीर्षप्रहेलिकान्ता गणितविषयातीता च, असंख्येया जघन्यमध्यमोत्कृष्टसंज्ञिता, अपरा तदतिक्रमेण व्यवस्थिता अनन्ता, साऽपि जघन्यादिभेदत्रयानुगता **अनुयोगद्वाराद्**(सू० १४९)विस्तरार्थिनाऽधिगमनीया।

सङ्ख्येयादि-सङ्ख्या-स्वरूपम्।

य एते सम्यग्दर्शनसमन्विताः सत्त्वा गत्यादिषु ते कियन्त इति तद्वन्त इह पृच्छ्यन्ते। उक्तं चेदं पुरस्तात्, ततः पृच्छति—**कियत् सम्यग्दर्शनं**—किंपरिमाणास्ते सम्यग्दर्शनिन इत्यर्थः, स्वयमेवोद्घट्टयति सङ्ख्याभिज्ञः सन्—किं सङ्ख्येयं सम्यग्दर्शनराशिमभ्युपगच्छामः, उतासङ्ख्येयं, उतानन्तमिति?। एवं पृष्टे आह—**उच्यते—असङ्ख्येयानि सम्यग्दर्शनानि**, न सङ्ख्येया नाप्यनन्ताः, किं तर्हि? असङ्ख्येयाः सम्यग्दर्शनिन इति। क्षयसम्यग्दृष्टीन् सिद्धान् केवलिनश्च विरहय्य शेषाः संसारवर्तिनो यावन्तः क्षयादिसम्यग्दर्शनिनस्ते निर्दिश्यन्ते असंख्येयानि सम्यग्दर्शनानीत्यनेन। ये तर्हि केवलिनः सिद्धाश्च ते सर्वे कियन्त इत्याह—**सम्यग्दृष्टयस्त्वनन्ताः**। भवस्थकेवलिनः सिद्धांश्चाङ्गीकृत्योक्तं सम्यग्दृष्टयस्त्वनन्ता इति॥ द्वारान्तरस्पर्शनेनाह—

भा०—क्षेत्रम्। सम्यग्दर्शनं कियति क्षेत्रे?। लोकस्यासङ्ख्येयभागे॥

टी०—क्षेत्रम्। क्षियन्ति—निवसन्ति यत्र जीवादिद्रव्याणि तत् क्षेत्रम्—आकाशम्, यत एतेऽसङ्ख्येयतया निर्धारिता अनन्ततया च, एभिः पुनः कियदाकाशं व्याप्तमिति संशये सति पृच्छति—**सम्यग्दर्शनं कियति क्षेत्रे?**॥ ननु च सम्यग्दर्शनमेतेन पृच्छ्यते निर्णयोऽपि तस्यैव, सम्यग्दृष्टयस्तु न चोद्यन्ते न निर्णीयन्त इति। उच्यते—इहायं सम्यग्दर्शनशब्दो भावसाधनः सम्यग्दृष्टिसम्यग्दर्शनसमवायी उभयोर्वाचकोऽभ्युपगन्तव्यः, अपायसद्द्रव्यसम्यग्दर्शनिनस्तद्वियुतस्य च सिद्धभवस्थकेवल्याख्यस्य, निर्णयवाक्येऽप्येवमेव दृश्यम्, अथवा सम्यग्दर्शनिषु निर्ज्ञातेषु सम्यग्दृष्टयोऽप्यनेनैव रूपेण ग्रहीष्यन्त इति सम्यग्दर्शनिनः प्रश्नयति, अथवा एकं जीवमुद्दिश्यायं प्रावृतत् प्रश्नः, एकत्रावधृते क्षेत्रेऽन्यत्राप्यनुमानात् तत् तथा प्रतिपत्स्येऽहमिति पृच्छति—**सम्यग्दर्शनं कियति क्षेत्रे** इति। एकस्मिँश्च पृच्छ्यमाने सम्यग्दर्शने कियति क्षेत्रे इत्येकवचनमपि सुघटं भवति। सूरिराह—**लोकस्यासङ्ख्येयभागे** इति। यदैकः पृष्टः एकस्यैवोत्तरं तदा कोऽर्थः? योऽहं सम्यग्दर्शनी सोऽहं कियति क्षेत्रे—आधारे स्थितः? पृष्टे उत्तरं—लोकस्यासङ्ख्येयभागे, धर्माधर्मद्रव्यद्वयपरिच्छिन्नः आकाशदेशो जीवाजीवाधारक्षेत्रं लोकः, तस्यासङ्ख्येयभागे त्वं स्थितः, यतः असङ्ख्येयप्रदेशो जीवः अतोऽसङ्ख्येयभाग एवावगाहते सर्वस्य लोकस्य, बुद्ध्या असङ्ख्येयभागखण्डकल्पितस्य य एकोऽसङ्ख्येयभागस्तत्र स्थित इति। अथापि सर्वानेवाङ्गीकृत्य प्रश्नः तथाप्यसङ्ख्येयभागे पूर्वस्मादधिकतरे लोकस्य सर्वे वर्तन्त इति युक्तमुत्तरम्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—स्पर्शनम्। सम्यग्दर्शनेन किं स्पृष्टम्?। लोकस्यासङ्ख्येयभागः, अष्टौ चतुर्दशभागा देशोनाः, सम्यग्दृष्टिना तु सर्वलोक इति॥ अत्राह—सम्यग्दृष्टिसम्यग्दर्शनयोः कः प्रतिविशेष इति?। उच्यते—अपायसद्द्रव्यतया सम्यग्दर्शनम्, अपायः—आभिनिबोधिकम्, तद्योगात् सम्यग्दर्शनम्। तत् केवलिनो नास्ति। तस्मात् न केवली सम्यग्दर्शनी, सम्यग्दृष्टिस्तु भवति॥

टी०—स्पर्शनम्। आकाशप्रदेशैः पर्यन्तवर्तिभिः सह यः स्पर्शस्तत् स्पर्शनम्, अस्मिन् द्वारे पृच्छ्यते—**सम्यग्दर्शनेन किं स्पृष्टम्** इत्यनेन। अत्रापि सम्यग्दर्शनशब्दः सामान्यवाची दृश्यः, एकं चाङ्गीकृत्य प्रवृत्त इति मन्तव्यम्, उत्तरम्—**लोकस्यासङ्ख्येयभागः**; स्पृष्ट इत्येकानेकप्रश्नानुरोधेन नेयम्। यः पुनः समुद्घातप्रतिपन्नः चतुर्थसमयवर्ती भवस्थकेवली तेन किं स्पृष्टं लोकस्येति?। उच्यते—**सम्यग्दृष्टिना तु सर्वलोक इति**। यतोऽभिहितं "लोकव्यापी चतुर्थे तु" (**प्रशम-रतौ**)। तुशब्दोऽवधारणे, सम्यग्दृष्टिनैव समुद्घातगतेनैव समस्तलोकः छुप्यत इति। एतस्मिन् व्याख्याने चोदकोऽचूचुदत्—सम्यग्दृष्टिसम्यग्दर्शनशब्दयोर्व्युत्पत्तौ क्रियमाणायां भावे कारके नास्त्यर्थभेद इति, भवांश्चाह सम्यग्दर्शनेन लोकासंख्येयभागः स्पृष्टः, सम्यग्दृष्टिना तु सर्वलोक इति, तन्नूनं भवता कश्चिदर्थभेदः परिकल्पित इति, अतः प्रश्नेनोपक्रमते—सम्यग्दृष्टिसम्यग्दर्शनयोः को विशेष इति?। सूरिराह—अत्रोच्यते—**अपायसद्द्रव्येत्यादि**। **अपायो**—निश्चयज्ञानं मतिज्ञानांशः, **सद्द्रव्याणि** पुनः शोभनानि प्रशस्तत्वात् विद्यमानानि वा द्रव्याणि मिथ्यादर्शनदलिकानि अध्यवसायविशोधितानि सम्यग्दर्शनतया आपादितपरिणामानि, अपायश्च सद्द्रव्याणि च अपायसद्द्रव्याणि तेषां भावः अपायसद्द्रव्यता, इत्थंभूतलक्षणा तृतीया, यावत् सोऽपायः सम्भवति यावद् वा तानि सम्भवन्तीत्येषाऽपायसद्द्रव्यता तया **सम्यग्दर्शनम्**। अपाययुक्तानि सद्द्रव्याणीति विनाशाशङ्कानिराचिकीर्षया सुहृद् भूत्वा सूरिराचष्टे—**अपायः—आभिनिबोधिकम्**, तृतीयो भेदः आभिनिबोधिकस्य निश्चयात्मकः प्रसिद्धः तेन योगस्तद्योगः तस्मात् तेनापायेन योग इति वोच्यते, यतः सम्यग्दर्शनपुद्गलेषु सत्सु चापगतेषु च भवतीति, व्यापी स इत्यर्थः, **तद्योगात् सम्यग्दर्शनम्**, एतेनापायेन यावदस्ति सम्बन्ध इति, तेन च सम्बन्धः(धे) सत्सु च सद्द्रव्येष्वक्षीणदर्शनसप्तकस्यासत्सु च सद्द्रव्येषु क्षीणदर्शनसप्तकस्य, उभय्यामप्यवस्थायां सम्यग्दर्शनं द्रष्टव्यम्। उभय्यामप्यवस्थायां सम्यग्दृष्टिव्यपदेशो नास्ति। **तत् केवलिनो नास्ती**त्यादि। **तदिति** सम्यग्दर्शनं सद्द्रव्यापाययोगजनितव्यपदेशं **केवलिनो**ऽतीन्द्रियदर्शित्वात् न समस्ति। अतो न सम्यग्दर्शनी केवली। कस्तर्हि? आह—**सम्यग्दृष्टिस्तु केवली**ति। तानि च बुद्ध्या आदाय अपायसद्द्रव्याणि तत्र केवलिनि सम्यग्दर्शनिव्यपदेशो निषिध्यते। तैस्तु विना यदि सम्यग्दर्शनिव्यपदेशः कल्प्यते भावसाधनोऽर्थोऽविशिष्ट इतिकृत्वा तदा नास्ति निषेध इति। तुशब्दोऽमुमेवार्थमवद्योतयति। एवं च कृत्वा पूर्वप्रश्नेष्वपि सुघटं भाष्यं भवति॥ द्वारान्तरं छुपति—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—कालः। सम्यग्दर्शनं कियन्तं कालमिति?। अत्रोच्यते—तदेकजीवेन नानाजीवैश्च परीक्ष्यम्। तद्यथा—एकजीवं प्रति जघन्येनान्तर्मुहूर्तम्, उत्कृष्टेन षट्षष्टिः सागरोपमाणि साधिकानि, नानाजीवान् प्रति सर्वाद्धा॥

टी०—काल इति। यदेतत् पूर्वकैर्द्वारैर्निरूपितं तत् सम्यग्दर्शनं कियन्तं कालं भवतीति प्रश्नयति॥ ननु च स्थितिद्वारेऽप्येतदेव पृष्टमुक्तं च, किमर्थं च पुनः पिष्टपेषणं क्रियते इति?। उच्यते—न कालः स्थितिमन्तरेण कश्चिदस्तीत्यस्यार्थस्य ख्यापनार्थं, तथा च वर्तमानादीन्येव काललिङ्गानि पठन्ति। अथवा एकजीवाश्रयणेन नानाजीवसमाश्रयणेन चास्ति स्थितिद्वारे साक्षाद् विधानमिति, अतो युज्यते प्रश्नः। तथा च "पुव्वभणियं तु जं भण्णए[2]" (**निशीथ-भाष्ये**) इत्यादि। अतस्तत् सम्यग्दर्शनमेकजीवाङ्गीकरणेन सर्वजीवाङ्गीकरणेन च परीक्ष्यम्। एतदुक्तं भवति—एकेन प्राप्तं तत् कियन्तं कालमनुपाल्यत इति, नानाजीवैश्च कियन्तं कालं धार्यत इति परीक्ष्यम्। **एकजीवं प्रतीत्यादि**, पूर्वभावित एव ग्रन्थ इति, स्थितिद्वारे **नानाजीवान् प्रति सर्वाद्धा**—सर्वकालं, महाविदेहादिक्षेत्रमाश्रित्याव्यवच्छेदात्[3]। इयं तु स्थितिः क्षायोपशमिकस्य चिन्तिता, औपशमिकस्य तु यथासम्भवं अन्तर्मुहूर्तप्रमाणेति, क्षायिकस्य तु सर्वदावस्थानम्॥ अतोऽनन्तरमन्तरद्वारं स्पृशति—

भा०—अन्तरम्। सम्यग्दर्शनस्य को विरहकालः?। एकजीवं प्रति जघन्येनान्तर्मुहूर्तम्, उत्कृष्टेन उपार्धपुद्गलपरिवर्तः। नानाजीवान् प्रति नास्त्यन्तरम्॥

टी०—अन्तरमित्यनेन सम्यग्दर्शनं प्राप्य पुनश्चोज्झित्वा मिथ्यात्वदलिकोदयात् पुनः कियता कालेन लप्स्यत इति पृच्छति—**सम्यग्दर्शनस्य को विरहकाल** इति?। सम्यग्दर्शनं प्राप्य पुनश्चोज्झित्वा पुनर्यावन्न सम्यग्दर्शनमासादयति स विरहकालः—सम्यग्दर्शनेन शून्यः कालः कियानिति, औपशमिकक्षायोपशमिके निश्चित्य निर्णयवाक्यं प्रवृत्तम्। **एकजीवं प्रतीत्यादि**। एको जन्तुरौपशमिकं क्षायोपशमिकं वा प्राप्य उज्झित्वा पुनः कश्चिन् मुहूर्तस्यान्तर(रेव) लभते, कश्चित् तु अनन्तेन कालेन लभते, स[4] चान्तरकाल एवमाख्यायते, उत्कृष्टेनोपार्धपुद्गलपरावर्तः, पुद्गलपरावर्तो नाम यदा जगति यावन्तः परमाणवस्ते औदारिकादितया सर्वे परिभुक्ता भवन्ति, स पुद्गलपरावर्तः औदारिकवैक्रियतैजसभाषाप्राणापानमनःकर्मभेदात् सप्तधा, एतत्समुदायस्यार्धं गृह्यते किञ्चिदूनम्। एतत् कथं प्रतिपादयितुं शक्यत इति चेत्, उपार्धपुद्गलपरावर्त इत्यनेनोच्यते **'समुदायेषु हि शब्दाः प्रवृत्ता अवयवेष्वपि वर्तन्त'** इति न्यायात्। अयं चार्ध-

पुद्गलपरावर्तस्यार्थः।

---

१ 'परीक्ष्यन्ते' इति क-ख-पाठः।

२ पूर्वभणितं तु यद् भण्यते।

३ 'व्यवच्छेदास्ता यत्' इति ख-ग-पाठः। ४ 'स चानन्तरं काल' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दः समग्रविभागवचनः किञ्चिन्न्यूनाभिधायित्वात् स पुँल्लिङ्गः, उपगतोऽर्धः उपार्धः, किञ्चिन्न्यून इति प्रादिसमासः । **नानाजीवानिति** । सर्वजीवानाश्रित्य **नास्त्यन्तरं**, विदेहादिषु सर्वकालं समवस्थानादिति । क्षायिकस्य त्वनपगमान्नास्त्यन्तरम् । गतमन्तरद्वारम् ॥ द्वारान्तराभिधित्सयाऽऽह—

भा०—भावः । सम्यग्दर्शनमौपशमिकादीनां कतमो भावः ? । उच्यते—औदयिकपारिणामिकवर्जं त्रिषु भावेषु भवति ॥

टी०—भाव इति । येयं रुचिः जीवस्य जिनवचनश्रद्धायिनी सा कस्मिन् भावे औपशमिकादीनां समवतरतीति प्रश्नयति—**सम्यग्दर्शनमित्यादिना** । सम्यग्दर्शनमित्यविशिष्टां रुचिं क्षयादिरूपां त्रिविधामपि जिज्ञासते—क्व कैते इति,(कैतदिति ?) तथा प्रतिवचनमपि भविष्यति—**त्रिषु भावेष्विति**। औपशमिकादीनामुक्तलक्षणादीनां **कतमो भावः**—कतमावस्थेति यावत्, सूरिस्तु हेयभावनिरसिसिषया आदेयं त्रिष्वित्यनेन कथयति, औदयिकं—गतिकषायादिरूपं पारिणामिकं च भव्यत्वादिलक्षणं विहाय येऽन्ये त्रयः क्षायिकादयस्तेषु भावेषु भवति, औदयिकपारिणामिकयोर्गत्यादिभव्यत्वाद्यवधारणान्नानयोः समस्ति, अनादित्वाच्च, एष इति सूच्यते त्रिषु भवति, नौदयिकपारिणामिकयोरिति ॥ द्वारान्तरं स्पृशति—

भा०—अल्पबहुत्वम् । अत्राह—सम्यग्दर्शनानां त्रिषु भावेषु वर्तमानानां किं तुल्यसंख्यात्वमाहोस्विदल्पबहुत्वमस्तीति ? । उच्यते—

टी०—अल्पबहुत्वमित्यनेन । अत्रैतस्मिन्त्रिषु भावेष्विति व्याख्याते । आहान्यः—एषां क्षायिकादीनां सम्यग्दर्शनानां त्रिषु क्षायिकादिषु परिणामेषु वर्तमानानां किं तुल्यसङ्ख्यत्वमुत नेति, आश्रयभेदेन चाल्पबहुत्वचिन्तेहाश्रिता, **अल्पबहुत्वमिति**[1] अल्पबहुभावः । किञ्चिदल्पमत्रास्ति किञ्चित् तु बहिति कथं भावनीयम् ? । उच्यते—

भा०—सर्वस्तोकमौपशमिकम् । ततः क्षायिकमसङ्ख्येयगुणम् । ततोऽपि क्षायोपशमिकमसङ्ख्येयगुणम् । सम्यग्दृष्टयस्त्वनन्तगुणा इति । एवं सर्वभावानां नामादिभिर्न्यासं कृत्वा प्रमाणादिभिरभिगमः कार्यः । उक्तं सम्यग्दर्शनम् । ज्ञानं वक्ष्यामः ॥ ८ ॥

टी०—सर्वस्तोकमौपशमिकम्, यत ईदृशीं परिणतिं श्रेण्यारोहादिस्वभावां न बहवः सम्प्राप्नुवन्तीत्यागमात्, **ततः क्षायिकमसंख्येयगुणम्**, ततः औपशमिकात् क्षायिकमिति च । अत्रायं विशेषः प्रेक्ष्यः—छद्मस्थानां श्रेणिकादीनां यत् क्षायिकं तद् गृह्यते, अपायसद्भावात्, छद्मस्थवर्तिनश्च औपशमिकस्यावधितयोपात्तत्वात् तत इत्यनेनावधिमतापि तादृशेन भवितव्यम् । तत औपशमिकात् क्षायिकं छद्मस्थस्वामिकमसङ्ख्येयगुणमिति, योऽसावौपशमिको राशिः सोऽसङ्ख्येयेन राशिना गुण्यते, औपशमिकाद् बहुतरमितियावत् । ततोऽपि क्षायिकात् क्षायोपशमिकं भवत्यसङ्ख्येयगुणं, सर्वगतिषु बहुस्वाम्याधारत्वात् । असङ्ख्येय-

१ 'भावानां' इत्यधिको घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणमिति च योऽसौ क्षायिकराशिः सोऽसङ्ख्येन गुण्यते, अतः क्षायिकाद् बहुतरमास्त[1] इतियावत्। यत् तर्हि क्षायिकं कैवल्याधारं तत् कियत्?। उच्यते—सर्वकेवलिनामानन्त्यादनन्तगुणं, कैवल्याधारमेतद् दृश्यमिति, अतः **सम्यग्दृष्टयस्त्वनन्ता** इति। केवलिनोऽनन्ता इत्यर्थः। ततस्तद्वर्त्यप्यनन्तमेव। **इति** द्वारपरिसमाप्तिसूचकः। अथ किं सम्यग्दर्शनस्यैव निर्देशादिसदादिभिर्द्वारैरधिगमः क्रियते उत ज्ञानादीनामपीति?। उच्यते—ज्ञानादीनामपि, किन्तु एकत्र सम्यग्दर्शने योजना कृताऽन्यत्राप्येवं दृश्येत्यतिदिशति—**एवं सर्वभावानाम्**। **एवमिति** यथा सम्यग्दर्शनस्य तथा सर्वभावानां ज्ञानादीनां नामस्थापनादिभी रचनां कृत्वा प्रमाणनयनिर्देशादिसदादिभिः परीक्ष्याभिगमः कार्य इति। यत् प्रस्तुतं सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः (१-१) इति तत्र यत् सम्यग्दर्शने विचार्यं तदभिहितम्, तदभिधानाच्च परिसमापितं सम्यग्दर्शनमित्येतदाह—**उक्तं सम्यग्दर्शनम्**। द्वितीयावयवव्याचिख्यासाप्रस्तावप्रदर्शनायाह—**ज्ञानं वक्ष्यामः** ॥ ८ ॥

कीदृक् तदिति चेदुच्यते—

सूत्रम्—मतिश्रुतावधिमनःपर्यायकेवलानि ज्ञानम् ॥ १-९ ॥

टी०—मतिश्च श्रुतं चावधिश्च मनःपर्यायश्च केवलं च मतिश्रुतावधिमनःपर्यायकेवलानि, ज्ञानमिति चानेन पञ्चाप्येतानि एकज्ञानमिति नैवं ग्राह्यम् यथा सम्यग्दर्शनादीनि त्रीण्यपि एको मोक्षमार्ग इति, किन्तु ऐकैकमत्र ज्ञानमिति। यद्येवं ज्ञानानीतिभवितव्यम्, ज्ञानबहुत्वात् उच्यते,—सत्यमेव, **प्रतिज्ञारूपं तु प्रतिवचनं भवतीतिकृत्वा** एकवचनं कृतं, प्रतिज्ञातं चानेन ज्ञानं वक्ष्याम इति, अतस्तदनुरोधेनैकवचनं चकार आचार्यः। एकैकस्य ज्ञानतां प्रख्यापयन्नाह—

ज्ञानमित्येकवचने फलम्

भा०—मतिज्ञानं श्रुतज्ञानं अवधिज्ञानं मनःपर्यायज्ञानं केवलज्ञानमित्येतत् मूलविधानतः पञ्चविधं ज्ञानम्। प्रभेदास्त्वस्य पुरस्ताद् वक्ष्यन्ते ॥ ९ ॥

टी०—मतिज्ञानं श्रुतज्ञानमित्यादि। मननं मतिः परिच्छेद इत्यर्थः। शेषकारकेष्वपि यथासम्भवं ज्ञेया, ज्ञप्तिर्ज्ञानं[2] वस्तुस्वरूपावधारणमित्यर्थः। **मतिज्ञानं**, मतेर्ज्ञानमिति समासो नैव कार्यः, मतेर्ज्ञानं किं? येन सा गृह्यते, सा च गृह्यते केवलादिना, ततश्चोत्तरपदार्थप्राधान्यात् तत्पुरुषस्य तन्मात्रग्रहणं स्यात्, नत्विन्द्रियानिन्द्रियनिमित्तमिति, तस्मात् ज्ञानशब्दो व्यभिचारी सामान्यज्ञानवाचकः सन्निन्द्रियानिन्द्रियनिमित्तोपजातया मत्या समानाधिकरणतया विशेष्यते, मतिश्च सा ज्ञानं च **मतिज्ञानम्**। तच्च श्रोत्रेन्द्रियव्यतिरिक्तं चक्षुरादीन्द्रियानक्षरोपलब्धिर्यां तन्मतिज्ञानम्। **श्रुतज्ञानमिति**। श्रूयते तदिति, अस्मिन् पक्षे शब्दमात्रं गृह्यते, श्रुतिः श्रवणमित्यस्मिन् पक्षे ज्ञानविशेष उच्यते, स एव च ग्राह्यः श्रुतमित्यनेन। कीदृशः स इति चेत्?

मतिज्ञानादीनां व्याख्या

---

१ 'बहुतममास्त' इति क-ख-पाठः। २ 'ज्ञायते ज्ञानं' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्यते—शब्दमाकर्णयतो भाषमाणस्य पुस्तकादिन्यस्तं वा चक्षुषा पश्यतः घ्राणादिभिर्वा अक्षराणि उपलभमानस्य यद् विज्ञानं तत् श्रुतमुच्यते, तेन ज्ञानं विशेष्यते, श्रुतं च तज्ज्ञानं चेति श्रुतज्ञानम् । **अवधिज्ञानमिति** । अवशब्दोऽधःशब्दार्थः, अवधानादवधिः, ज्ञानं-परिच्छेदः । एतदुक्तं भवति–अधोविस्तृतविषयमनुत्तरोपपादिकादीनां ज्ञानमवधिज्ञानम्, यतो बहुत्वं च विषयस्योररीकृत्यैवं व्युत्पत्तिः, अन्यथा तिर्यगूर्ध्वं वा विषयं परिच्छिन्दानस्यावधिव्यपदेशो न स्यात् । अथवा अवधिः–मर्यादा, अमूर्तद्रव्यपरिहारेण मूर्तिनिबन्धनत्वादेव तस्यावधिज्ञानत्वम् । तच्च चतसृष्वपि गतिषु जन्तूनां वर्तमानानामिन्द्रियनिरपेक्षं मनः-प्रणिधानवीर्यकं प्रति विशिष्टक्षयोपशमनिमित्तं पुद्गलपरिच्छेदि देवमनुष्यतिर्यङ्नारकस्वामिकमवधिज्ञानमिति। अवधिश्च स तज्ज्ञानं च तदित्यवधिज्ञानम्। **मनःपर्यायज्ञानमिति** । मनो द्विविधं–द्रव्यमनो भावमनश्च, तत्र द्रव्यमनो मनोवर्गणा, भावमनस्तु ता एव वर्गणा जीवेन गृहीताः सत्यो मन्यमानाश्चिन्त्यमाना भावमनोऽभिधीयते । तत्रेह भावमनः परिगृह्यते, तस्य भावमनसः पर्यायास्ते चैवंविधाः–यदा कश्चिदेवं चिन्तयेत् किंस्वभाव आत्मा ? ज्ञानस्वभावोऽमूर्तः कर्ता सुखादीनामनुभविता इत्यादयो ज्ञेयविषयाध्यवसायाः परगतास्तेषु यज्ज्ञानं तेषां वा यज्ज्ञानं तन्मनःपर्यायज्ञानम् । तानेव मनःपर्यायान् परमार्थतः समवबुध्यते, बाह्यांस्त्वनुमानादेवेत्यसौ तन्मनःपर्यायज्ञानम् । **केवलज्ञानमिति** । केवलं–सम्पूर्णज्ञेयं तस्य तस्मिन् वा सकलज्ञेये यज्ज्ञानं तत् केवलज्ञानम्, सर्वद्रव्यभावपरिच्छेदीतियावत्। अथवा केवलं एकं मत्यादिज्ञानरहितमात्यन्तिकज्ञानावरणक्षयप्रभवं केवलज्ञानं अविद्यमानस्वप्रभेदम् । विशुद्धिप्रकर्षापेक्षा चैषामानुपूर्वीविन्यासविरचनेति, इतिरियत्तायां, एतावदेव नान्यदस्तीति। **एतत्** इत्यवयवप्रविभागेन यदाख्यातं, **मूलम्**–आद्यं विधानं-भेदः, मूलं च तद्विधानं च **मूलविधानं**, मूलविधानेन–मूलविधानतः, पञ्चविधं मत्यादिज्ञेयपरिच्छेदि **ज्ञानम्** । एतदुक्तं भवति–मौलान् भेदानङ्गीकृत्य पञ्चविधमेव भवति । अथ किमन्ये एषां पञ्चानां प्रभेदाः सन्ति उत नेति ? । सन्तीत्युच्यते–**प्रभेदास्त्वस्येत्यादि**। प्रभेदाः–अंशा अवयवाः **अस्य**–पञ्चविधस्योपरिष्टाद् वक्ष्यन्ते, मूलभेदास्तु न, कथितत्वादिति । मतिज्ञानस्यावग्रहादयः श्रुतस्याङ्गानङ्गप्रविष्टादयः, अवधिज्ञानस्य भवप्रत्ययादयः, मनःपर्यायज्ञानस्य ऋजुमत्यादयः, केवलज्ञानस्य तु न सन्त्येव ॥ ९ ॥

अथ पुरस्तात् प्रमाणनयैरधिगम इत्युक्तं, तत्र न ज्ञायते किं प्रमाणमित्यत आह—

सूत्रम्—तत् प्रमाणे ॥ १–१० ॥

टी०—**तत् प्रमाणे** इति। अथवाऽन्यैरनेकधा प्रमाणमभ्युपेतं, कापिलैस्त्रिधा प्रत्यक्षानुमानागमभेदात्, अक्षपादेन चत्वारि सहोपमानेन, मीमांसकैः षडर्थापत्त्यभावाभ्यां सह, मायासूनवीयैर्द्वे प्रत्यक्षानुमाने, काणभुजैश्च द्वे त्रीणि वा दर्शनभेदात्, भवतां कथमित्यत आह—

प्रमाण-संख्या

भा०—**तदेतत् पञ्चविधमपि ज्ञानं द्वे प्रमाणे भवतः परोक्षं प्रत्यक्षं च ॥१०॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—तच्छब्द एतदित्यस्यार्थे, पञ्चविधमपि मत्यादिज्ञानं द्वे प्रमाणे भवत इत्येतदत्र विधीयमानं, द्वे एव प्रमाणे भवतः, नान्यत् प्रमाणमस्ति॥ ननु चान्यैरनेकधा कल्पितं, कथं पुनरवधिर्यते द्वे एवेति?। उच्यते—अन्येषामत्रैवान्तर्भावात् प्रमाणान्तरत्वं निवार्यते, न प्रमाणत्वम्। कानिचिच्च नैव प्रमाणानि, एतच्च द्वयमुत्तरत्र भाष्यकार एव दर्शयिष्यति। अथ द्वे प्रत्यक्षानुमाने इत्येवं द्वयं ग्राह्यमुतान्यथेत्याह—एवं चान्यथेति च दर्शयति, 'परोक्षं प्रत्यक्षं चे'ति प्रत्यक्षमित्येवं परोक्षमिति च अन्यथा, परोक्षं चासाद् अनुमानमिति नोक्तं, सिद्धान्ते परोक्षमित्युपन्यासात्। "तं समासओ दुविहं पन्नत्तं, तंजहा—पच्चक्खं परोक्खं च[1] (नन्दीसूत्रे सू० २)"इति। परैः इन्द्रियैरुक्षा—सम्बन्धो यस्य ज्ञानस्य तत् परोक्षं ज्ञानम्। एतदुक्तं भवति—इन्द्रियैर्निमित्तैः सद्भिर्यज्ज्ञानमात्मनि सम्बन्धमनुयाति तत् परोक्षं—मतिश्रुतरूपम्। यत् पुनरिन्द्रियादिनिरपेक्षमात्मन एवोपजायते तत् प्रत्यक्षम्, द्विविधेऽपि प्रत्यक्षपरोक्षे ज्ञाने यः साकारांशः स प्रमाणव्यपदेशमश्नुते, यथाभिहितम्—

"साकारः प्रत्ययः सर्वो, विमुक्तः संशयादिना।
साकारार्थपरिच्छेदात्, प्रमाणं तन्मनीषिणाम्॥"

इति, साकारांशस्य प्रमाणताऽवसेयेति। प्रमीयतेऽनेनेति प्रमाणम्, मीयतेऽनेनेति मानं, परिनिष्पन्नेन मानशब्देन सह प्रशब्दस्योपपदसमासः, प्रगतं प्रकृष्टं मानं प्रमाणम्, प्रमेयपरिच्छेदार्थिनः प्रमातुस्तत्परिच्छेदसिद्धिप्रधानाङ्गमतिशयोपकारित्वात् प्रकृष्टं मानं प्रमाणम्। वाक्यज्ञानद्वैविध्यात् द्विविधं, प्रत्यक्षपरोक्षभेदाद् वा। अथवा सर्वमेव ज्ञानं प्रत्यक्षं मनइन्द्रियजीवेष्वक्षशब्दस्य रूढत्वात्, सावरणानावरणविशेषात् तु भिद्यते। सावरणानां तावत् त्रितयाभिमुख्येनास्मदादीनां प्रत्यक्षमेव ज्ञानम्, तद्यथा—आत्माभिमुख्येन स्वप्ने भयहर्षरोगगमनराज्यलाभादि, मनआभिमुख्येन स्मरणप्रत्यभिज्ञानवितर्कविपर्ययनिर्धारणादि, इन्द्रियाभिमुख्याच्चक्षुरादिविषयं रूपादिवत्, निरावरणानामात्माभिमुख्येनैव, अभ्यात्मं तु स्वयंदृशां प्रत्यक्षज्ञानिनां, विशुद्धशब्दनयाभिप्रायेण चेदमेकमेव प्रत्यक्षं प्रमाणमिति॥ आचार्यसिद्धसेनोऽप्याह—

प्रमाणस्य शब्दार्थः

"अभित्रि मादृशां भाज्यमभ्यात्मं तु स्वयंदृशाम्।
एकं प्रमाणमर्थैक्या—दैक्यं तल्लक्षणैक्यतः॥" प्रमाण-द्वात्रिंशिकायाम्

अर्थैक्यं कुतः?। तल्लक्षणैकत्वात् अर्यते—गम्यते परिच्छिद्यत इति। अथवा प्रमातव्यं प्रमेयं प्रमातुमीप्सिततमं प्रमाणार्हं वा कर्मसाधनत्वानतिक्रमादेकलक्षणत्वम्॥ १०॥

अयमिदानीं विवेको नावधृतः पञ्चविधस्य मध्ये—किं परोक्षं किं वा प्रत्यक्षमिति, तद्विवेकावधारणाय आह—

---

१ तत् समासतो द्विविधं प्रज्ञप्तं, तद्यथा—प्रत्यक्षं च परोक्षं च।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रम्—आद्ये परोक्षम् ॥ १–११ ॥

भा०—आदौ भवमाद्यम् । सूत्रक्रमप्रामाण्यात् प्रथमद्वितीये शास्ति, तदेवमाद्ये—मतिज्ञानश्रुतज्ञाने परोक्षं प्रमाणं भवतः । कुतः ? । निमित्तापेक्षत्वात् अपायसद्द्रव्यतया मतिज्ञानम् । तदिन्द्रियानिन्द्रियनिमित्तमिति वक्ष्यते । तत्पूर्वकत्वात् परोपदेशजत्वाच्च श्रुतज्ञानम् ॥ ११ ॥

टी०—सूत्रोपात्ताद्यशब्दार्थोऽन्यथाऽवगमयितुं न शक्यते परस्मायित्यतो व्युत्पत्त्याह—**आदौ भवमाद्यम्**, यस्मात् परमस्ति न पूर्वमादिः सः विवक्षावशात्, तत्र भवं, दिगादित्वाद्यत्, आद्यं चाद्यं चेत्याद्ये इति, प्रतिविशिष्टेन च क्रमेण व्यवस्थितानां आद्यव्यपदेशो दृश्यते, तद्यथा—अयं यतिरेषां विशिष्टक्रमभाजामाद्य इति । एवमत्रामूर्तानां ज्ञानानां क्रमसन्निवेशो दुरुपपाद इति मत्वा ब्रवीति—**आद्ये** इति, **सूत्रक्रमप्रामाण्यात्**, सूत्रं चासन्नमप्यनन्तरं त्यज्यते, तत् प्रमाणे (१–१०) इति सन्निवेशाभावात्, तस्मात् परमेव मतिश्रुतादि ग्राह्यम्, तत्र **क्रमः**—परिपाटी, सूत्रे क्रमः **सूत्रक्रमः**, तस्य **प्रामाण्यम्**—आश्रयणं तस्मात् । **प्रथमद्वितीये** मतिश्रुते, **शास्ती**ति च ग्रन्थकार एव द्विधा आत्मानं विभज्य सूत्रकारभाष्यकाराकारेणैवमाह—**शास्तीति**, सूत्रकार इति शेषः[1] । अथवा पर्यायभेदात् पर्यायिणो भेद इत्यन्यः सूत्रकारपर्यायोऽन्यश्च भाष्यकारपर्याय इत्यतः सूत्रकारपर्यायः शास्तीति । **तदेवमाद्यव्यपदेशे** सिद्धे सुखेन वक्तुं शक्यते, किमिति चेत्, उच्यते—**मतिज्ञानश्रुतज्ञाने** द्वे अपि **परोक्षं प्रमाणं भवतः**, शेषमनूद्य परोक्षप्रमाणता विधीयते । **कुत** इति च प्रश्नयितुरयमभिप्रायः—यमयं हेतुमुपन्यसिष्यति वक्ष्यमाणं तत्रास्य व्यभिचारं दर्शयिष्यामीति, इतरोऽपि सविशेषणं हेतुं बुद्धौ न्यस्याह—**निमित्तापेक्षत्वादि**ति । धूमादग्निज्ञानं परोक्षमुपजायते निमित्तापेक्षं, तद्वन्मतिश्रुते, इन्द्रियानिन्द्रियनिमित्तभावः स्पष्टो मतेः, श्रुतस्य च । न च निमित्तापेक्षिता अनैकान्तिकी, कथं तर्ह्यवधिज्ञानादित्रयं निमित्तमपेक्षते ? यतोऽवधिरान्तरनिमित्तं क्षयोपशममालम्ब्य बहिरङ्गं च विषयमुत्पद्यते, तथा मनःपर्यायज्ञानमपि, केवलज्ञानमपि कर्मणां ज्ञानावृतां समस्तक्षयमाश्रित्य विषयं चोत्पद्यत इति ? । उच्यते—इतरः सविशेषणोऽयं हेतुरित्याह—**अपायसद्द्रव्येत्यादि** । अनेन च प्रतिज्ञार्थं[2] विशिष्यापायसद्द्रव्येत्यादिना ततो हेतुं सविशेषणं करिष्यति **तदिन्द्रियानी**त्यादिना । यन्मतिज्ञानं धर्मितयोपात्तं तत् कीदृशं, परोक्षं प्रमाणं वा[3] साध्यते ? । उच्यते—**अपायसद्द्रव्यतया मतिज्ञानं** धर्मित्वेनोपन्यस्तम्, अपायो निश्चय ईहानन्तरवर्ती । **सद्द्रव्यमिति**, शोभनानि द्रव्याणि—सम्यक्त्वदलिकानि, अपायश्च सद्द्रव्याणि च तेषां भावः—स्वरूपादप्रच्युतिः, तयेत्थंभूतया मतिज्ञानं धर्मि । एतदुक्तं भवति—मतिज्ञानस्यावग्रहादिभेदस्य मध्ये योऽपायोंऽशस्तन्मतिज्ञानं परोक्षं प्रमाणमिति ।

परोक्षप्रमाणम्

१ 'शेषः' इति क–पाठः । २ 'प्रतिज्ञानार्थं' इति ख–पाठः । ३ 'वा' इति ख–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवग्रहेहयोरनिश्चितत्वान्न समस्ति प्रमाणम्। स चापायः सद्द्रव्यानुगतो यदि न भवति तन्मिथ्यादृष्टेरिवाशुद्धदलिककलुषितः, अतो योऽपायः सद्द्रव्यानुवर्ती स प्रमाणं मतिभेदः। यदा तर्हि दर्शनसप्तकं क्षीणं भवति तदा सद्द्रव्याभावे कथं प्रमाणता श्रेणिकाद्यपायांशस्य? उच्यते-सद्द्रव्यतयेत्यनेनार्थत इदं कथ्यते-सम्यग्दृष्टेर्योऽपायांश इति। भवति चासौ सम्यग्दृष्टेरपायः। अथवा एकशेषोऽत्र द्रष्टव्यः, अपायश्चापायश्चापायौ सद्द्रव्यं च सद्द्रव्यं च सद्द्रव्ये अपायौ च सद्द्रव्ये चापायसद्द्रव्याणि तेषां भावस्तयेति। इदमुक्तं भवति-अपायसद्द्रव्यानुगतो यः अक्षीणदर्शनसप्तकस्य स परिगृहीतः, एकेन अपायसद्द्रव्यशब्देन, तथा द्वितीयेनापायो यः सद्द्रव्यं शोभनं द्रव्यं, कश्चापायः सद्द्रव्यम्? यः क्षीणदर्शनसप्तकस्य भवति। एतेनैतदुक्तं भवति-सम्यग्दर्शनिनः क्षीणाक्षीणदर्शनसप्तकस्य योऽपायो मतिज्ञानं तत् परोक्षं प्रमाणम्। सविकल्पमिति निमित्तापेक्षत्वाद् धूमादग्निज्ञानवदिति, एवं श्रुतज्ञानस्याप्यपायांशः प्रमाणयितव्यः। सम्प्रति निमित्तापेक्षत्वादित्यस्य यो व्यभिचारः पुनः पुरस्तादवाचि तत्परिजिहीर्षयेदमाह-**तदिन्द्रियानिन्द्रियनिमित्तमिति वक्ष्यते** इत्यनेन। तदिति मतिज्ञानम्, इन्द्रियाणि-श्रोत्रादीनि अनिन्द्रियं-मनः ओघज्ञानं च तानि निमित्तं-कारणं यस्य ज्ञानस्य तदिन्द्रियानिन्द्रियनिमित्तम्, न हीन्द्रियाण्यनिन्द्रियं च विरहय्य तस्य ज्ञानस्य सम्भवोऽस्तीति, ततश्च हेतुरेवंविधो ज्ञा(जा)तः-इन्द्रियानिन्द्रियनिमित्तत्वादिति। विशिष्टमेव निमित्तमिन्द्रियानिन्द्रियाख्यमुररीकृत्य निमित्तापेक्षत्वादिति मया प्रागभ्यधायि, नास्त्यतो व्यभिचारः। श्रुतज्ञानस्यापीन्द्रियानिन्द्रियनिमित्ततैव, किंतु अन्यथापि निमित्तं कथ्यते, तदाह-**तत्पूर्वकत्वात्**। तदिति मतिज्ञानं पूर्वं-पूरकं पालकं यस्य तत् तत्पूर्वकं तद्भावस्तत्पूर्वकत्वं तस्मात् तत्पूर्वकत्वात्, यावन्मतिस्तावत् तद् भवति, न त्वीदृश्यवस्थाऽस्ति यत्र तन्मतिज्ञानेन विना प्रादुःष्यात्, अतस्तन्मतिज्ञानं श्रुतज्ञानस्य पालकं भवतीतिकृत्वा मतिज्ञानमेव तस्यात्मलाभनिमित्तं भवति, तस्मिन् सति तस्य भवनात्, अतः श्रुतं[1] मतिं निमित्तीकृत्य प्रवर्तमानमिन्द्रियानिन्द्रियनिमित्तं सत् कथं प्रत्यक्षव्यपदेशं लभेत? तथा **परोपदेशजत्वाच्च**। श्रुतज्ञानं परोक्षं, परः-तीर्थकरादिस्तस्योपदेशः, उपदिश्यते उच्चार्यते इत्युपदेशः-शब्दस्तस्मात् परोपदेशात्-तीर्थकरादिशब्दश्रवणादुपजायते यत् तदिन्द्रियानिन्द्रियनिमित्तं श्रुतज्ञानं, तत्पूर्वकत्वात् परोपदेशादिति च, अनेन निमित्तभूयस्त्वं ख्यापितम्। यतः श्रुतज्ञानमुपजायमानं स्वतः प्रत्येकबुद्धादीनां मनसि सति मतिज्ञाने च सति समस्ति, अतो निमित्तद्वयमाश्रितं[2] भवति। तथा यस्यापूर्वमेवेदानीं प्रादुरस्ति तस्य सति परोपदेशे सत्यां मतौ सत्सु चेन्द्रियानिन्द्रियेषूदेति, अतो निमि-

प्रामाण्यम्

अपायसद्द्रव्ये परोक्षता

श्रुतस्य परोक्षता

---

१ 'श्रुतमतिं' इति क-ख-पाठः। २ 'श्रितं च' इति ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्तभूयस्त्वापेक्षत्वात् परोक्षं तद् भण्यते ॥ ननु चेन्द्रियोपष्टम्भेनोपजायमानस्य ज्ञानस्य प्रत्यक्षत्वं लोके प्रथितं, तदपाकरणप्रवृत्तस्य लोकविरोधः, तथा इदं रूपं प्रत्यक्षमिति योऽयं प्रत्ययो नायं परोक्षे दृष्टः । नहि धूमादग्निमवगच्छतोऽयमग्निरिति संप्रत्ययो भवति, ततश्च स्वप्रतीतेरपि विरोध इति । उच्यते–इदं रूपं प्रत्यक्षमिति न तत्र मुख्यया वृत्त्या रूपं प्रत्यक्षं, ज्ञानमेव तु प्रत्यक्षं, तेन प्रत्यक्षेण ज्ञानेनावच्छिन्नोऽर्थः प्रत्यक्ष इत्युच्यते, तस्य युक्ता प्रत्यक्षता । किंच–न सर्वथेन्द्रियनिमित्तस्य ज्ञानस्य प्रत्यक्षता, निषेधात्, यतः सर्वथा तं विषयं न परिच्छेत्तुमलं, चक्षू रूपं गृह्णात्याराद्भागवर्तिं, न परमध्यभागावस्थितम्, तथा श्रोत्रादि वाच्यम्, अवध्यादित्रयं पुनः सर्वात्मनाऽवगच्छति, अतस्तस्यैव युक्ता प्रत्यक्षता । किंच न सर्वथेन्द्रियनिमित्तस्य ज्ञानस्य प्रत्यक्षव्यपदेशो निषिध्यते[1], यतोऽयं निश्चयमङ्गीकृत्य भाष्यकृता प्रत्यक्षव्यपदेशो निषिध्यते, व्यवहाराच्विष्यत एव । यतोऽभिहितं नन्द्याम् (सू० २-३) "तं समासओ दुविहं पण्णत्तं, (तं० पच्चक्खं च परोक्खं च । से किं तं पच्चक्खं ? पच्चक्खं दुविहं पण्णत्तं) तं०–इन्दियपच्चक्खं नोइन्दियपच्चक्खं च[2]" इन्द्रियप्रत्यक्षमिति ब्रुवता व्यवहारप्रत्यक्षता भवति, भाष्यकारस्यापि योगविभागात् तस्येन्द्रियजस्य ज्ञानस्य सिद्धा प्रत्यक्षता, स चैवं योगो विभजनीयः–आद्ये परोक्षं निश्चयतः ततः प्रत्यक्षं, प्रत्यक्षं चाद्ये व्यवहारः, ततोऽन्यत् अवध्यादि एकान्तेनैव प्रत्यक्षमिति ॥ ११ ॥

एवं परोक्षं प्रदर्श्य प्राक् प्रतिज्ञातं प्रत्यक्षं प्रमाणं कथयन्नाह—

सूत्रम्—प्रत्यक्षमन्यत् ॥ १–१२ ॥

टी०—अन्यदिति चोक्ते जायते विचारणा–कुतोऽन्यदिति ? अवधीकृतमेव विच्छेदकारणं ख्यापयन् [a]ते—

भा०—मतिश्रुताभ्यां यदन्यत् त्रिविधं ज्ञानं तत् प्रत्यक्षं प्रमाणं भवति। कुतः ?। अतीन्द्रियत्वात् । प्रमीयन्तेऽर्थास्तैरिति प्रमाणानि । अत्राह–इह अवधारितं–द्वे एव प्रमाणे प्रत्यक्षपरोक्षे इति ॥

टी०—मतिश्रुताभ्यामिति। मतिज्ञानश्रुतज्ञानाभ्यां यदन्यत्, तस्य चैकैकस्य प्रत्यक्षतां प्रकाशयन्नाह–त्रिविधमिति। उक्तेऽपि चैतस्मिन् किं तत् त्रिविधमित्याह–ज्ञानं, प्रत्यक्षं प्रमाणं भवतीति। प्रत्यक्षं भवतीत्येतद् विधीयतेऽत्र, शेषस्यानुवाद इति। कुत इति च प्रश्नयितुरभिप्रायोऽयम्–यद्यान्तरनिमित्तं क्षयोपशमः प्रत्यक्षतायाः कारणभावं प्रतिपद्यते स सर्वेषां मत्यादीनां साधारणः क्षयोपशमः कारणमस्तीति सर्वप्रत्यक्षत्वप्रसङ्गः, अथ प्रत्यक्षतायाः पृथग् निमित्तं तदुच्यतामिति, इतरस्तु असाधारणं त्रयाणां प्रत्यक्षतायाः प्रकटीकुर्वन् निमित्तमाह–अतीन्द्रियत्वादिति। अतिक्रा-

अवध्यादेः प्रत्यक्षता

१ 'निषेध्यते' इति ख–पाठः । २ तत् समासतो द्विविधं प्रज्ञप्तं, (तद्यथा–प्रत्यक्षं च परोक्षं च । अथ किं तत् प्रत्यक्षम् ? प्रत्यक्षं द्विविधं प्रज्ञप्तम्) तद्यथा–इन्द्रियप्रत्यक्षं नोइन्द्रियप्रत्यक्षं च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्तमिन्द्रियाणि अतीन्द्रियं ज्ञानं तद्भावोऽतीन्द्रियत्वं तस्मादिति, यत् प्राणिनां ज्ञानदर्शनावरण-क्षयोपशमात् क्षयाच्च इन्द्रियानिन्द्रियद्वारनिरपेक्षमात्मानमेव केवलमभिमुखीकुर्वदुदेति तत् प्रत्यक्षं—अवध्यादि। एवं तत् प्रमाणे (१-१०) इति द्वित्वसङ्ख्यायाः परोक्षप्रत्यक्षाख्यो यो विषयस्तमुपदर्श्य प्रमाणशब्दार्थकथने प्रावृतद् भाष्यकारः—**प्रमीयन्तेऽर्थास्तैरिति प्रमाणानीति**। (**प्रमीयन्ते**)—परिच्छिद्यन्ते—यथावन्निश्चीयन्ते सदसन्नित्यानित्यादिभेदेनार्था—जीवाद्यस्तैरिति प्रमाणानि, करणे ल्युट्, करणं ज्ञानमात्मनः, आहितप्रधानकारणस्य स्वतन्त्रस्य कर्तुरनेककारकशक्तियुक्तस्य साधकतमत्वविवक्षावशादवच्छेदिका शक्तिरर्थस्य करणव्यपदेशमश्नुते, तया करणभूतया परिच्छिनत्ति—अवबुद्ध्यते ज्ञानपरिणतिरूपयाऽऽत्मैव। **तैरिति**। प्रमाणद्वयेऽभ्युपगते बहुवचनमयुक्तमिति चेत्, न, व्यक्तिपक्षसमाश्रयणादिति, यतो मत्यादिकाः पञ्च व्यक्तयः, तासां बहुत्वात् समीचीनमेव बहुवचनमिति। एवं द्वे परोक्षप्रत्यक्षे प्रमाणे भवत इति ख्यापिते चोदयति—इह शास्त्रे निर्धारितमेतद्—द्वे एव **प्रमाणे**, अन्यथा तत् प्रमाणे इत्यत्र या द्वित्वसङ्ख्या सा व्यर्थैव स्यात्, यद्यवधारणतया नाश्रीयेत, तस्मादवश्यंतया तद्वचनं नियमकारि प्रतिपत्तव्यम्—द्वे एव प्रमाणे, के च? **प्रत्यक्षपरोक्षे** इति, ततश्चान्येषामप्रमाणता आपन्ना, न च न सन्त्येवान्यानि, यतोऽनुमानादीनि प्रमाणानि मन्यन्ते, साङ्ख्याः प्रत्यक्षानुमानागमाख्यानि त्रीणि, नैयायिकाः प्रत्यक्षानुमानोपमानागमाख्यानि, प्रत्यक्षानुमानशाब्दोपमानार्थापत्त्यभावा इति जैमिनीयाः। एतदाह—

अनुमानादीनां प्रामाण्यविचारः

भा०—अनुमानोपमानागमार्थापत्तिसम्भवाभावान्यपि प्रमाणानि इति केचित् मन्यन्ते। तत् कथमेतदिति?। अत्रोच्यते—

टी०—अनुमानोपमानेत्यादि। तत्रानुमानं तावत् पक्षधर्मान्वयव्यतिरेकजनितं ज्ञानम्, प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानं, यथा गौस्तथा गवयः।

अनुमानादीनां व्याख्या

"प्रसिद्धेन हि साधर्म्यात्, साध्यसाधनमिष्यते।
उपमानं परैस्तच्च, यथा गौर्गवयस्तथा॥"

तथा आप्तोपदेश आगमस्तदनुसारि ज्ञानमागम उच्यते प्रमाणं वर्णपदवाक्यात्मकः। तथाऽर्थापत्तिर्द्विधा शब्दार्थापत्तिरर्थार्थापत्तिश्चेति। तत्र शब्दार्थापत्तिर्देवदत्तो दिवा न भुङ्क्तेऽनुपहतेन्द्रियशरीरश्चेति, रात्रौ तर्हि भुङ्क्ते इति। तथा अर्थार्थापत्तिरपि नीलं पश्यतो यदिन्द्रियानुमानं समस्ति तत् किमपीन्द्रियं येनैतन्नीलं परिच्छिन्नमिति। सम्भवोऽपि प्रमाणं—प्रस्थे कुडवः समस्ति, अस्मिन् प्रस्थाख्ये आधारे कुडव आधेयः सम्भवतीति एष सम्भवः। तथाऽभावोऽपि प्रमाणाभावविषयः, यत्र विषये प्रत्यक्षादिप्रमाणानामप्रवृत्तिरसावभावस्तद्विषयमपि ज्ञानमभाव इति व्यपदिश्यते। अत एव तान्यनुमानादीनि केचिदाचार्याः प्रमाणा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नीति मन्यन्ते, तत् कथमित्येवं मन्यन्ते, किमेषां तानि न सन्ति प्रमाणत्वेन ? उत प्रमाणान्तराणि न भवन्तीति ?। अत्रोच्यते मया—

भा०—सर्वाण्येतानि मतिश्रुतयोरन्तर्भूतानि, इन्द्रियार्थसन्निकर्षनिमित्तत्वात्। किञ्चान्यत्। अप्रमाणान्येव वा। कुतः ?। मिथ्यादर्शनपरिग्रहात्, विपरीतोपदेशाच्च ॥

टी०—सर्वाणि इत्यादि। **सर्वाणि**–समस्तानि **एतानि**–अनुमानादीनि मतिज्ञानश्रुतज्ञानयोरेव **अन्तर्भूतानि**–प्रविष्टानि। कयोपपत्त्येति चेत् तामुपपत्तिमाह–**इन्द्रियार्थेत्यादि**। **इन्द्रियाणि**–चक्षुरादीनि तेषामर्था–रूपादयः इन्द्रियाणि चार्थाश्च इन्द्रियार्थास्तेषां **सन्निकर्षः**–सम्बन्धः स इन्द्रियार्थसन्निकर्षो निमित्तं यस्य अनुमानादेस्तदिन्द्रियार्थसन्निकर्षनिमित्तम्–अनुमानादि। कथं पुनरिन्द्रियार्थसन्निकर्षः कारणमनुमानादेः ?। उच्यते–अनुमानं तावच्चक्षुरादीन्द्रियधूमाद्यर्थसन्निकर्षजम्, अन्यथा तस्यासम्भवात्, इन्द्रियनिमित्तत्वात् सपरार्थस्यानुमानस्येति। उपमानमपि चक्षुरादीन्द्रियगवाद्यर्थसन्निकर्षजम्। आगमाख्यमपि श्रोत्रेन्द्रियस्य अनिन्द्रियस्य वा आप्तवचनार्थस्य सन्निकर्षे सति प्रादुरस्ति। शब्दार्थापत्तिरप्येवमेव। अर्थार्थापत्तिस्तु चक्षुरादेरिन्द्रियस्य नीलादे रूपस्य च सन्निकर्ष एवोपजायते। सम्भवोऽपि प्रस्थमर्थं दृष्ट्वा श्रुत्वा वा प्रादुरस्ति, एवं चक्षुःश्रोत्रयोः प्रस्थार्थप्रस्थशब्दयोः सन्निकर्षे सति तदुदेति। अभावोऽपि प्रमाणं प्रमेयाभावविषयः, मनसा विकल्प्यार्थमुत्तरत्र स एव विषयीभवति विकल्पितोऽर्थो[1], नानुमानादसौ भिद्यत इति, एवमिन्द्रियार्थसन्निकर्षनिमित्तान्येतानि मतिश्रुतयोरन्तर्भावं यान्तीति ॥ **किंचान्यदिति** पक्षान्तरमाश्रयति। **अप्रमाणान्येव वा**। नैवानुमानादीनि प्रमाणानि, मिथ्यादर्शनसमन्वितत्वात्, अयथार्थोपदेशव्यापृतत्वात् उन्मत्तकवाक्यविज्ञानवत्, एतदेवाह–**मिथ्यादर्शनेत्यादि**। मिथ्यादर्शनम्–एकनयाश्रयणं तेन गृहीतं मिथ्यादर्शनपरिग्रहो भण्यते, यत एव च मिथ्यादर्शनपरिग्रहोऽत एव **विपरीतोपदेशादिति**। **विपरीतम्**–अन्यथावस्थितं नानाधर्मकं सद्वस्तु[2] एकधर्मकमाश्रितं विपरीतं भण्यते, तस्य **उपदेशः** कथनं विपरीतोपदेशस्तस्मात्, यत एतान्येकनयावलम्बीन्यनुमानादीनि विपरीतमेकान्तपक्षाश्रितं वस्तु विच्छिन्दन्ति तस्मादप्रमाणानि परिकल्पितानीति। न च मिथ्यादृष्टिगृहीतं कदाचिदपि ज्ञानं भण्यते, किन्त्वज्ञानमेव, संसारहेतुत्वात्, एतच्चोत्तरत्र निदर्शयिष्यत्येव। यत आह—

अनुमानादीनामिन्द्रियार्थसंबन्धहेतुता

अनुमानादीनामप्रामाण्ये हेतुः

भा०—मिथ्यादृष्टेर्हि मतिश्रुतावधयो नियतमज्ञानमेवेति वक्ष्यते (१–३२)। नयवादान्तरेण तु यथा मतिश्रुतविकल्पजानि भवन्ति तथा पुरस्ताद् (१–३५)

१ 'विकल्पिताऽर्थो' इति क–ग–पाठः। २ 'धर्मकदम्बकं सद्वस्तु' इति क–ग–पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्ष्यामः ॥१२॥ अत्राह—उक्तं भवता मत्यादीनि ज्ञानानि उद्दिश्य-तानि विधानतो लक्षणतश्च पुरस्ताद् विस्तरेण वक्ष्याम इति। तदुच्यतामिति। अत्रोच्यते—

टी०—मिथ्यादृष्टेर्हीत्यादि। यस्मान्मिथ्यादृष्टेर्जन्तोर्मतिश्रुतावधयस्त्रयोऽपि निश्चयेन कुत्सितमेव ज्ञानमज्ञानमिति भणिष्यते। यद्येवं कथं तर्हि मतिश्रुतयोरन्तर्भूतानीत्युक्तम्? उच्यते—नयवादमाश्रित्यैतदुक्तम्। केन तर्हि नयवादान्तरेण मतिश्रुतान्तर्गतानीत्याह—**नयवादान्तरेण तु इत्यादि। नया**-नैगमादयः तेषां वादः—स्वरुचितार्थप्रकाशनं नयवादः तस्य अन्तरं-भेदो नयवादान्तरं तेन नयवादभेदेनैव। **यथा** मतिश्च श्रुतं च मतिश्रुते तयोर्विकल्पा-भेदास्तेभ्यो जायन्त इति **मतिश्रुतविकल्पजानि भवन्ति यथा तथा पुरस्तात्** नयविचारणायां वक्ष्यामः (१-३५) इतिशब्देन यस्य हि मिथ्यादृष्टिरज्ञो वा नास्तीति वक्ष्यति तन्मतेन तु प्रमाणानीति ॥ १२ ॥

अत्रेति। एतस्मिन् ज्ञानपञ्चके कथिते सामान्येन प्रमाणद्वये च-प्रत्यक्षपरोक्षरूपे विहिते, परोऽवोचत्—**उक्तं**—प्रतिपादितं त्वया, किमिति चेत्—उच्यते—**मत्यादीनि पञ्च ज्ञानानि**—मतिश्रुतावधिमनःपर्यायकेवलान्येव **उद्दिश्य**, तत इदमभिहितं तदुच्यते **—तानि विधानतो लक्षणतश्च पुरस्ताद् विस्तरेण वक्ष्याम** इत्येतत्॥ ननु च नैवंविधं तत्र[1] सूत्रे भाष्यमस्ति-विधानतो लक्षणतश्चेति, कथमयमध्यारोपः क्रियते गुरोरिति?। उच्यते—सत्यमेवंविधं भाष्यं नास्तीति, एवं पुनः समस्ति-प्रभेदास्त्वस्य पुरस्ताद् वक्ष्यन्त इति (१-९)। अतः प्रभेदा-मतिज्ञाने विधानलक्षणरूपाः प्रतिपाद्यन्ते तत्र भाष्ये, अतो नाध्यारोप इति। विधानं-भेदः, मतिज्ञानं सभेदकं वक्ष्यामीति प्रतिज्ञातम्, तथा लक्षणम्—असाधारणं यच्चिह्नं मत्यादेस्तच्च वक्ष्यामीति प्रत्यज्ञायि, तदुच्यतां विधानं लक्षणं चेति, एवं पर्यनुयुक्त आह—**अत्रोच्यत** इति॥

अत्रैतास्मिंश्चोदिते उच्यते मया, लक्षणमल्पविचारत्वात्, अनेन सूत्रेण **मतिः स्मृत्यादिना**। अथवा नैव मतिज्ञानस्यानेन सूत्रेण लक्षणं कथयति, प्रतीतत्वात्, प्रतीतं हि लोके इन्द्रियानिन्द्रियजं ज्ञानं, यच्च प्रतीतं न तस्य लक्षणमाचक्षते विचक्षणाः, नहि हुताशनस्योष्णतालाञ्छनमत्यन्तप्रतीतत्वादभिदधते विद्वांसः, किं तर्हि सूत्रेण प्रतिपादयति? उच्यते—लक्षणं द्विविधं-तत्स्थमतत्स्थं चेति, तत्स्थमग्नेरौष्ण्यवत्, अतत्स्थं वारिणो बलाकादिवत्, मतिज्ञानस्य लक्षणं यत्तत्स्थं न पुनस्ततो ज्ञानाद् भिन्नमित्येतदादर्शयति सूत्रेण॥

सूत्रम्—मतिः स्मृतिः संज्ञा चिन्ताऽभिनिबोध इत्यनर्थान्तरम्॥ १-१३ ॥

टी०—मतिः स्मृतिः संज्ञेत्यादि। अत एव च ज्ञानशब्दं प्रत्येकं लगयति—

भा०—मतिज्ञानं स्मृतिज्ञानं संज्ञाज्ञानं चिन्ताज्ञानं आभिनिबोधिकज्ञानमित्यनर्थान्तरम्॥ १३ ॥

---

१ 'तत्र' इति क-ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—**मतिज्ञानं स्मृतिज्ञानमित्यादि** । येयं मतिः सैव ज्ञानमित्यस्य ख्यापनार्थं मननं मतिस्तदेव ज्ञानं मतिज्ञानमिति । मतिज्ञानं नाम यदिन्द्रियानिन्द्रियनिमित्तं वर्तमानकालविषयपरिच्छेदि । स्मरणं स्मृतिः सैव ज्ञानं स्मृतिज्ञानं, तैरेवेन्द्रियैर्यः परिच्छिन्नो विषयो रूपादिस्तं यत् कालान्तरेण विनष्टमपि स्मरति तत् स्मृतिज्ञानम्, अतीतवस्त्वालम्बनमेककर्तृकं चैतन्यपरिणतिस्वभावं मनोज्ञानमितियावत् । **संज्ञाज्ञानं** नाम यत्तैरेवेन्द्रियैरनुभूतमर्थं प्राक् पुनर्विलोक्य स एवायं यमहमद्राक्षं पूर्वाह्ण इति संज्ञाज्ञानमेतत् । **चिन्ताज्ञानमागामिनो** वस्तुन एवं निष्पत्तिर्भवति अन्यथा नेति, यथैवं ज्ञानादित्रयसमन्विते तत्रैव परमसुखावाप्तिरन्यथा नेत्येतच्चिन्ताज्ञानं मनोज्ञानमेव । **आभिनिबोधिकम्** अभिमुखो निश्चितो यो विषयपरिच्छेदः सर्वैरेवैभिः प्रकारैस्तदाभिनिबोधिकमिति । यदा चैतल्लक्षणसूत्रं तदा इतिशब्द एवमित्यस्यार्थे, एवंलक्षणमेभिः पर्यायैर्निरूपितं मतिज्ञानं ज्ञेयमिति । एवमेतत् कियताऽप्यंशेन भेदं प्रतिपद्यमानमनर्थान्तरमिति व्यपदिशति । नैषां मतिज्ञानविरहितोऽर्थो विकल्पनीय इति । अपरे तु सर्वे पर्यायशब्दा एवैते शतक्रतुशक्रादिशब्दवदिति मन्यन्ते, नात्र भेदेनार्थः कल्पनीय इति । तथा चास्य सूत्रस्य पूर्वपक्षमन्यथा रचयन्ति, एवं—लोके स्मृतिज्ञानं अतीतार्थपरिच्छेदि सिद्धम्, संज्ञाज्ञानं वर्तमानार्थग्राहि, चिन्ताज्ञानमागामिकालविषयमिति, इह तु सिद्धान्ते आभिनिबोधिकज्ञानमेवोच्यते, स्मृत्यादीनि तु नोच्यन्ते, तत्रानभिधाने प्रयोजनं वाच्यम् । उच्यते—आभिनिबोधिकज्ञानस्यैव त्रिकालविषयस्यैते पर्याया नार्थान्तरतेति मतिः स्मृतिः संज्ञा चिन्ताऽभिनिबोध इत्यस्यानर्थान्तरमेतदिति ॥ १३ ॥

इह हि प्रतिक्षणं प्राणिनां[1] मन्यदन्यच्च ज्ञानमुदेति, घटालम्बनज्ञानापगतौ पटालम्बनज्ञानाविर्भावः, यच्चोत्पद्यते तत्कारणायत्तजन्म वदन्ति सन्तः—यथा घटः पुरुषमृत्तिकादण्डाद्यपेक्ष्य कारणमाविरस्ति, एवमस्य ज्ञानस्य समुपजायमानस्य किं निमित्तमिति ?। उच्यते—

सूत्रम्—तदिन्द्रियानिन्द्रियनिमित्तम् ॥ १-१४ ॥

भा०—तदेतत् मतिज्ञानं द्विविधं भवति—इन्द्रियनिमित्तमनिन्द्रियनिमित्तं च।

टी०—तदेतदित्यनन्तरलक्षणोपेतं **मतिज्ञानं** किंनिमित्तमिति ?। उच्यते—हेतोर्द्वैविध्यात् **द्विविधं भवति**, तेनैव हेतुना द्विविधेन तत्कार्यमादर्शयति—**इन्द्रियनिमित्तमनिन्द्रियनिमित्तं च**। तत्रेन्द्रियाणि—स्पर्शनादीनि पञ्च निमित्तं यस्य तदिन्द्रियनिमित्तम्, नहि श्रोत्रेन्द्रियमन्तरेणायं प्रत्ययो भवति शब्दोऽयमिति, न च स्पर्शनमन्तरेणायं प्रत्ययः समुत्पद्यते—शीतोऽयमुष्णो वा, एवं शेषेष्वपि वाच्यम्। तथाऽनिन्द्रियनिमित्तमिति इन्द्रियादन्यदनिन्द्रियं—मनः ओघश्चेति तत्

मतेः पर्यायाः ।

मतेः कारणानि

---

१ 'प्राणिनामन्यच्च' इति ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निमित्तमस्य मतिज्ञानस्य तदनिन्द्रियनिमित्तमिति, स्मृतिज्ञानहेतुर्मनः। एवं चैतद् द्रष्टव्यम्–इन्द्रियनिमित्तमेकम्, अपरमनिन्द्रियनिमित्तम्, अन्यदिन्द्रियानिन्द्रियनिमित्तमिति त्रिधा, तत्रैकमिन्द्रियनिमित्तमेव ज्ञानं मत्याख्यम्, यथाऽग्निवारिदहनपवनवनस्पतीनामेकेन्द्रियाणां द्वित्रिचतुरिन्द्रियाणामसंज्ञिनां च पञ्चेन्द्रियाणां, मनसोऽभावात्, तथाऽनिन्द्रियनिमित्तं स्मृतिज्ञानम्, इतरेन्द्रियनिरपेक्षं चक्षुरादिव्यापाराभावात्,तथा इन्द्रियानिन्द्रियनिमित्तं जाग्रदवस्थायां, स्पर्शनेन मनसोपयुक्तः स्पृशत्युष्णमिदं शीतं चेति, इन्द्रियं मनश्चोभयं तस्योत्पत्तौ निमित्तं भवति इति। तदेतत् सर्वमेकशेषाल्लभ्यत इति, इन्द्रियं चानिन्द्रियं च इन्द्रियानिन्द्रिये इन्द्रियानिन्द्रियाणि च तानि निमित्तं यस्य तदिन्द्रियानिन्द्रियनिमित्तमिति। एतदेवाह–इन्द्रियनिमित्तमनिन्द्रियनिमित्तं च, चशब्दादुभयनिमित्तं चेति, अपेक्षाकारणं चाङ्गीकृत्य सूत्रं पपाठ आचार्यः तदिन्द्रियानिन्द्रियनिमित्तमिति। अपेक्षाकारणं चालोकविषयेन्द्रियाणि, सति प्रकाशे विषये च चक्षुरादिषु च सत्सु ज्ञानस्योद्भवो दृष्टः, तेषामपि मध्येऽन्तरङ्गमपेक्षाकारणमिन्द्रियानिन्द्रियाणि पठितम्, पारमार्थिकं तु कारणं क्षयोपशमो मतिज्ञानावरणपुद्गलानाम्, नहि तदावरणक्षयोपशममनपेक्ष्य ज्ञानस्योत्पत्तिरिष्यते। यदि तर्ह्यान्तरं निमित्तं क्षयोपशमः स एवोपादेयः किं बाह्येनेन्द्रियानिन्द्रियनिमित्तेनाधीतेनेति ?। उच्यते–स क्षयोपशमः सर्वसाधारण इतिकृत्वा न पठितः, चशब्देन वा गृहीतो द्रष्टव्यः, इन्द्रियनिमित्तमनिन्द्रियनिमित्तं च, चशब्दात् क्षयोपशमनिमित्तमिति, न वा, भावेन्द्रियस्य तद्रूपत्वात् इति॥ तत्रेन्द्रियनिमित्तं स्वयमेव भावयति—

भा०—तत्रेन्द्रियनिमित्तं स्पर्शनादीनां पञ्चानां स्पर्शादिषु पञ्चस्वेव स्वविषयेषु। अनिन्द्रियनिमित्तं मनोवृत्तिरोघज्ञानं च॥ १४॥

टी०—तत्रेन्द्रियेत्यादिना। तत्र तेषां त्रयाणां मध्ये इन्द्रियनिमित्तं तावद् भण्यते–

इन्द्रियानिन्द्रियनिमित्तता मतेः

स्पर्शनादीनामिति। स्पर्शनरसनघ्राणचक्षुःश्रोत्राणां **पञ्चानामेव पञ्चस्वेव** इत्यन्यस्याभावान्नियमयति, स्वे–आत्मीया विषया येषु प्राणिनः सार्द्धं भजन्ते तेषु **स्वेषु विषयेषु**, तद्यथा–स्पर्शनस्य स्पर्शे, रसनस्य रसे, घ्राणस्य गन्धे, चक्षुषो रूपे, श्रोत्रस्य शब्दे, अत एषां स्पर्शनादीनां स्वविषयेषु प्रवर्तमानानां ग्राहितया यदुपजायते ज्ञानं तत् तानीन्द्रियाण्यालम्ब्योत्पद्यमानमिन्द्रियनिमित्तमिति भण्यते। इदानीमनिन्द्रियनिमित्तमाचष्टे–अनिन्द्रियं–मनस्तन्निमित्तं यस्य तदनिन्द्रियनिमित्तम्। कीदृक् तदित्याह–**मनोवृत्तिर्मनोविज्ञानमिति**। मनसो भावाख्यस्य वर्तनं–विषयपरिच्छेदितया परिणतिर्मनोवृत्तिः, **ओघज्ञानं चेति**। ओघः–सामान्यं अप्रविभक्तरूपं यत्र न स्पर्शनादीनीन्द्रियाणि तानि मनोनिमित्तमाश्रीयन्ते, केवलं मत्यावरणीयक्षयोपशम एव तस्य ज्ञानस्योत्पत्तौ निमित्तम्, यथा वल्ल्यादीनां नीत्राद्यभिसर्पणज्ञानं न स्पर्शननिमित्तं न मनोनिमित्तमिति, तस्मात् तत्र मत्यज्ञानावरणक्षयोपशम एव केवलो निमित्तीक्रियते ओघज्ञानस्य॥१४॥

१ 'पठन्ति' इति ख–पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत् पुनरिन्द्रियनिमित्तमनिन्द्रियनिमित्तं वा ज्ञानं किमेकरूपमुतास्ति कश्चिद् भेदकलापः ? । अस्तीत्याह । यद्यस्ति ततो भण्यताम् । उच्यते—

सूत्रम्—अवग्रहेहापायधारणाः ॥ १—१५ ॥

भा०—तदेतत् मतिज्ञानमुभयनिमित्तमप्येकशश्चतुर्विधं भवति। तद्यथा —अवग्रह ईहा अपायो धारणा चेति ।

टी०—तदेतत् मतिज्ञानं लक्षणविधानाभ्यां यदुक्तम् **उभयनिमित्तमिन्द्रियनिमित्तमनिन्द्रियनिमित्तम् अपिशब्दादिन्द्रियानिन्द्रियनिमित्तमपि** ॥ अथेन्द्रियानिन्द्रियनिमित्तसमुदायरूपेण स्थितं चतुर्विधं किं ग्राह्यम् ? । नेत्याह—**एकशः**, एकैकं स्पर्शनेन्द्रियनिमित्तं चतुर्विधं, रसनेन्द्रियनिमित्तं चतुर्विधं, घ्राणेन्द्रियनिमित्तं चतुर्विधम्, चक्षुरिन्द्रियनिमित्तं चतुर्विधं, श्रोत्रेन्द्रियनिमित्तं चतुर्विधं, मनोनिमित्तं चतुर्विधमिति । चतस्रो विधा यस्य **तच्चतुर्विधम्** । कास्ताश्चतस्रो विधा इत्याह—**अवग्रह ईहा अपायो धारणेति**। स्पर्शनावग्रहः स्पर्शनेहा स्पर्शनापायः स्पर्शनधारणेति, एवं सर्वत्र दृश्यं यावन्मनोधारणेति । पर आह—निर्ज्ञातं चातुर्विध्यमेकैकस्य, इदं तु न विज्ञातं किंस्वरूपा अवग्रहादय इत्यतः स्वरूपमवग्रहादीनां ब्रूहि, एवमुक्ते सूरिः स्वरूपप्रचिकाशयिषयाऽऽह अवग्रहादीनाम्—

अवग्रहाद्या मतेर्भेदाः

भा०—तत्राव्यक्तं यथास्वमिन्द्रियैर्विषयाणामालोचनावधारणमवग्रहः । अवग्रहो ग्रहो ग्रहणमालोचनमवधारणमित्यनर्थान्तरम् ॥

टी०—तत्राव्यक्तमित्यादिना। तत्रेति चतुर्ष्ववग्रहादिषु प्रक्रान्तेषु अवग्रहोऽभिधीयते। अवग्रहणमवग्रहः सामान्यार्थपरिच्छेद इत्यर्थः। यद् विज्ञानं स्पर्शनादीन्द्रियजं व्यञ्जनावग्रहादनन्तरक्षणे सामान्यस्यानिर्देश्यस्य[1] स्वरूपकल्पनारहितस्य नामादिकल्पनारहितस्य च[2] वस्तुनः परिच्छेदकं सोऽवग्रहः अव्यक्तं ज्ञानमितियावत् । यदाह—अव्यक्तम्—अस्फुटम् अवधारणमित्यनेन सम्बन्धः। अव्यक्तं यदवधारणम्—अव्यक्तो यः परिच्छेद इत्यर्थः। कस्याव्यक्तं कैर्वा तदव्यक्तमिति ? । उच्यते—**यथास्वमित्यादि** । यथाशब्दो वीप्सायां, यो य इति, स्वशब्द आत्मीयवचनो, यो य आत्मीय इत्यर्थः । यथास्वं विषयोऽभिसम्बन्ध्यते, योऽयमात्मीयो **विषयस्तस्यात्मीयस्य विषयस्य इन्द्रियैः** स्पर्शनादिभिः करणभूतैर्ये विषयाः परिच्छेद्यन्ते तेषां **विषयाणां** स्पर्शादीनां अव्यक्तमवधारणम्, कीदृशमत आह—**आलोचनावधारणम्**, आङ्मर्यादायाम् आलोचनं-दर्शनं, परिच्छेदो मर्यादया यः स आलोचना । यथोक्तं पुरस्ताद् वस्तुसामान्यस्यानिर्देश्यस्य[3] स्वरूपनामजात्यादिकल्पनावियुतस्य यः परिच्छेदः सा आलोचना मर्यादया भवति । आलोचना च सा अवधारणं च तदालोचनावधारणम्। अत एतदुक्तं भवति—उक्तमालोचनावधारणं स्पर्शनादिभिरिन्द्रियैः स्पर्शनादीनामात्मीयानां विषयाणामात्मनो यद् भवति सोऽ-

अवग्रहस्वरूपम्

१ 'निर्देशस्य' इति ख-पाठः । २ 'च विमुक्तौ' इति ख-पाठः । ३ 'अनिर्देशस्य' इति ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वग्रहः, किं पुनः कारणमाद्ये क्षणे तं विषयं परिच्छेत्तुं यथावन्न शक्नोति परतश्च यथावच्छक्ष्यति ? । उच्यते—मतिज्ञानावरणीयकर्मणः स तादृशः क्षयोपशमो येनादौ तं विषयं सामान्येन परिच्छिनत्ति, ईहायां चान्यादृशः क्षयोपशमो यतस्तमेव स्फुटतरमीहिष्यते, अपाये चान्यादृशः क्षयोपशमो येन तमेव विषयं स्फुटतरमवच्छिनत्तीति, धारणायामप्यन्यादृशो येनावधारयिष्यतीति, तस्मान्मलीमसत्वात् क्षयोपशमस्यादावव्यक्तमवधारणं यत् सोऽवग्रह इत्युच्यते। एवं स्वचिह्नतोऽवग्रहं निरूप्य पर्यायशब्दैस्तमेव कथयति—अव(ग्रहो ग्रहो)ग्रहणमालोचनावग्रहोऽभिधीयते अवधारणं चेति, योऽसौ सामान्यपरिच्छेदः स एभिः शब्दैरर्थतो नानात्वमप्रतिपद्यमानैरभिधीयते । एवमवग्रहं कथयित्वा ईहायाः स्वरूपमाचिख्यासुराह—

भा०—अवगृहीतम्[1] । विषयार्थैकदेशाच्छेषानुगमनम् । निश्चयविशेषजिज्ञासा चेष्टा ईहा । ईहा ऊहा तर्कः परीक्षा विचारणा जिज्ञासेत्यनर्थान्तरम् ॥

टी०—अवगृहीतमित्यादि । अवगृहीतमित्यनेन क्रमं दर्शयति—सामान्येन गृहीते ईहा प्रवर्तते न पूर्वमेवेहेति, यदा हि सामान्येन स्पर्शनेन्द्रियेण स्पर्शसामान्यमागृहीतमनिर्देश्यादिरूपं तत उत्तरं स्पर्शभेदविचारणा ईहाभिधीयत इति । एतदाह—**विषयार्थैकेत्यादि** । विषयः—स्पर्शादिः स एव परिच्छेदकालेऽर्थमाणत्वात्-परिच्छिद्यमानत्वादर्थ इत्युच्यते, विषयश्चासावर्थश्च विषयार्थः तस्यैकदेशः सामान्यमनिर्देश्यादिरूपं तस्मात् **विषयार्थैकदेशात्** परिच्छिन्नादनन्तरं यत् **शेषानुगमनं** शेषस्य-भेदविशेषस्येत्यर्थः । **अनुगमनं** विचारणं, शेषस्यानुगमनं विशेषविचारणमित्यर्थः । किमयं मृणालीस्पर्शः उताहो सर्पस्पर्श इति । न चैतत् संशयविज्ञानमिति युज्यते वक्तुम्, यतः संशयविज्ञानमेवंरूपं भवति यदनेकार्थावलम्बनमूर्ध्वतासामान्यं पश्यतः किमयं स्थाणुरुत पुरुष इति नैकस्यापि परिच्छेदं शक्तं कर्तुमिति तत् संशयविज्ञानमभिधीयते । ईहा पुनरेवंविधलक्षणविपरीता, यतः स्पर्शसामान्य उपलब्धे तदुत्तरकालं मृणालस्पर्शे सद्भूतविशेषादानप्रवृत्ता, असद्भूतविशेषपरित्यागप्रवृत्ता चेहेत्यभिधीयते । अमी पूर्वं मृणालस्पर्शे मया सद्भूता विशेषा अनुभूता इत्यतस्तदभिमुखाऽसौ, अमी च नानुभूता इति तत्परित्यागाभिमुखा, अतो न संशयविज्ञानेनास्याः साम्यमस्तीत्येतदाह—**निश्चयविशेषजिज्ञासा ईहा** । निश्चीयतेऽसाविति निश्चयः । कोऽसौ ? विशेष इत्याह, विशिष्यते—भिद्यतेऽन्यस्मादिति विशेषः, निश्चयश्चासौ विशेषश्च निश्चयविशेषः, निश्चितो विशेष इत्यर्थः, तस्य ज्ञातुमिच्छा या सा जिज्ञासा, विद्यमानाविद्यमानविशेषादानपरित्यागाभिमुखेत्यर्थः । सैवंविधा ईहाऽभिधीयते । एवं स्वचिह्नेन ईहां निरूप्य पर्यायशब्दैरर्थतो नानात्वमप्रतिपद्यमानैरसम्मोहार्थं तामेवाचष्टे—**ईहा ऊहा** इत्यादि। यत्तद्विशेषविचारणं सा तदीहेत्येवात्राभिधीयते, **चेष्टा ऊहा तर्कः परीक्षा विचारणा जिज्ञासेत्येवं** नास्त्यर्थभेद एषां शब्दानाम्, सत्यपि चार्थभेदेऽन्यत्रेहा नार्थान्तरभूता एवैते, एकरूपत्वात् । ईहायाः स्वरूपमाख्याय अपायस्य तदनन्तरवर्तिनः स्वरूपं दिदर्शयिषुराह—

ईहायाः स्वरूपम्

1 'अवगृह्यते' इति घ-पाठः, समीचीनतरश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—अवगृहीते विषये सम्यगसम्यगिति गुणदोषविचारणा अध्यवसायापनोदोऽपायः । अपायोऽपगमः, अपनोदः अपव्याधः, अपेतमपगतमपविद्धमपनुत्तमित्यनर्थान्तरम् ॥

टी०—अवगृहीते इत्यादि । अनेनापि क्रममाचष्टे, सामान्येनावगृहीते स्पर्शसामान्यविषये अनिर्देश्यादिरूपे तत उत्तरकालमीहायां प्रवृत्तायां, कथमिति चेत्? उच्यते—**सम्यगसम्यगित्येवं** मृणालीस्पर्शः किमुताहिस्पर्श इति । मृणालीस्पर्श इत्येवमादानाभिमुखत्वात् सम्यक् न अहिस्पर्शोऽयमित्येवं परित्यागाभिमुखत्वादसम्यगिति, तत उत्तरकालं सम्यगित्यपायः प्रवर्तते, नत्वसत्येतस्मिन् द्वय इति। स पुनः किंरूपोऽपाय इति? उच्यते—**गुणदोषेत्यादि**। गुण इति यस्तस्मिन् साधारणो धर्मो मृणाले स गुणः, दोषस्तु यस्तत्र न सम्भवति धर्मः स दोषः, गुणश्च दोषश्च गुणदोषौ तयोर्विचारणा—मार्गणा गुणदोषविचारणा तया गुणदोषविचारणया यः प्रवर्ततेऽध्यवसायः—चित्तं, कीदृशम्? **अपनोद** इत्येवंरूपः, अपनुदतीत्यपनोदः सोऽध्यवसायोऽपनुदति तत्रासन्निहितधर्ममिति मृणालस्यैवायं स्पर्शः अत्यन्तशीतादिगुणसमन्वितत्वादिति अस्यैवायमिति यः प्रत्ययोऽन्यस्य न भवतीति सः **अपायः** । संप्रत्येवं लक्षणतो निर्धारितस्वरूपं पर्यायशब्दैस्तमेव व्यपदिशत्यनर्थान्तरभूतैः **अपायोऽपगम** इत्यादिभिः। अपैतीत्यपायः, निश्चयेन परिच्छिनत्तीत्यर्थः । अपगच्छत्यपनुदति अपविध्यतीत्यर्थः । पुनश्चापाय इत्यस्य भावार्थमुररीकृत्य भावाभिधायिभिरेव कथयति—**अपेतमपगतमित्यादिभिः**। मृणालस्यैवायं स्पर्श इति येयं फलरूपा परिच्छित्तिस्वभावता ज्ञानस्येति सा भावाभिधायिभिरेभिरुच्यते, **अपेतमपगतं** परिच्छिन्नमेतन्मया एवमेतन्नान्यथेत्यर्थः। एवं निश्चितस्यार्थस्योत्तरकालं यदविस्मरणम्, अधुना यदा चान्यत्रार्थे उपयुक्तो भवति तदाऽपि या वासना लब्धिरूपा यद् वाऽन्यस्मिन् कालान्तरेऽनुस्मरणमेतन्मया प्रागासेवितमित्येषा त्रिरूपा धारणाऽभिधीयते तां दर्शयति—

भा०—धारणा प्रतिपत्तिर्यथास्वं मत्यवस्थानमवधारणं च। धारणा प्रतिपत्तिरवधारणावस्थानं निश्चयः अवगमः अवबोध इत्यनर्थान्तरम् ॥ १५ ॥

टी०—धारणा प्रतिपत्तिरित्यादिना। धारणेति लक्ष्यम्, प्रतिपत्तिर्यथास्वमित्यनेनाद्यं भेदमादर्शयति, अस्मिन् काले निश्चितस्यार्थस्य यावदन्यत्र नोपयोगं याति तावत् अर्थस्य यद् दर्शनमप्रच्युतिः सा प्रतिपत्तिः यथास्वमित्युच्यते,प्रतिपत्तिः—अप्रच्युतिः यथास्वं—यथाविषयं यो यः स्पर्शादिर्विषय आगृहीतः तस्याऽनाश इत्यर्थः। मत्यवस्थानमित्यनेन द्वितीयां लब्धिरूपां धारणां कथयति, यदा अपायं स्पर्शादेर्विषयस्य कृत्वाऽन्यत्रोपयुक्तो भवति तदाऽप्यसौ लब्धिरूपा धारणा समस्ति, अतो मत्यवस्थानमिति ब्रूते। मतेः धारणाख्याया अवस्थानं शक्तिरूपं **मत्यवस्थानं** भण्यते। **अवधारणं** चेत्यनेन तृतीयभेदं कथयति। यदा कालान्तरे तमेव प्रागनुभूतं विषयमालम्ब्य ज्ञान-

अपायस्य स्वरूपम्

धारणायाः स्वरूपम्

१ 'विचारणया' इति ख-पाठः । २ '०मपनुत्त०' इति घ-पाठः । '०वधारणमव०' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुदेति तदा तदेवावधारणमिति भण्यते यस्मादवधारयति कालान्तरानुभूतमर्थमेवमेतन्मया सेवितमिति । सम्प्रति पर्यायशब्दैस्तामेव त्रिप्रकारामाचष्टे-धारयत्यर्थं त्रिभिरप्येभिः प्रकारैः सा धारणा । प्रतिपत्तिर्नाम परिच्छिन्नेऽर्थे यावदन्यत्रोपयोगं न याति तावदनाशस्तस्यार्थस्य तस्मिन् विज्ञान इति। अवधारणं पुनः कालान्तरानुस्मरणमागृहीतम्। अवस्थानमित्यनेन तु अन्यत्र पदार्थे उपयुक्तस्य या लब्धिरूपा धारणा सा गृहीता । पुनरेषामन्ये त्रयो यथासङ्ख्यकेन भेदा निदर्श्यन्ते— निश्चयोऽवगमोऽवबोध इति । निश्चय इत्ययं प्रतिपत्तिरित्यस्य पर्यायः, अवगम इत्ययं तु मत्यवस्थानस्य लब्धिरूपस्येति। अथवा अविशिष्टधारणायाः सर्व एते पर्याया इत्यनर्थान्तरमित्याह । भावना चैवं कार्या—अपवरकाद्यन्धकारस्थितेन पुंसा यदा स्पर्शनेन्द्रियेणोपलब्धमाद्यक्षणे सामान्यमनिर्देश्यमशेषकल्पनारहितं सोऽवग्रहः । यदा पुनस्तमेव विचारयति किमयं मृणालस्पर्श उताहिस्पर्श इति सेहा । यदाऽस्य निश्चितं भवति मृणालस्यैवायं नाहेरिति सोऽपायः । यदा तु निश्चितं सन्तमविच्युतिरूपेण धारयति लब्धिरूपेण वा कालान्तरानुस्मरणे वा सा धारणा । एवं रसनादिभिः रसादीनां योपलब्धिः सैकैका चतुर्विधा भावनीयेति ॥ १५ ॥

अत्राह—एते ह्यवग्रहादयो ज्ञानविशेषाः क्षयोपशमवैचित्र्यात् स्पर्शादिकमर्थमन्यथा वाऽन्यथा[1] निश्चिन्वन्तस्तथाव्यपदेशभाज इत्युक्तम् ॥ अथैषां स्वस्थाने क्षयोपशमवैचित्र्यमस्ति नास्तीति ? । उच्यते—अस्ति, यतोऽवग्रहः क्षयोपशमोत्कर्षापकर्षापेक्षोऽनेकधा बह्वादेरर्थस्य परिच्छेदकः, एवमीहादयोऽपीति, एतदनेन प्रतिपादयति सूत्रेण—

सूत्रम्—बहुबहुविधक्षिप्रानिश्रितासन्दिग्धध्रुवाणां सेतराणाम् ॥१-१६॥

टी०—बहुबहुविधेत्यादिना । श्रुतानुमितैश्च पदैः प्रायो व्याख्या सूत्राणाम्, इष्टेऽपि अनुमीयमानैरवग्रहादिभिर्बह्वादीनां सम्बन्धं लगयन्नाह—

भा०—अवग्रहादयश्चत्वारो मतिज्ञानविभागाः एषां बह्वादीनामर्थानां सेतराणां भवन्त्येकशः । सेतराणामिति-सप्रतिपक्षाणामित्यर्थः ॥

टी०—अवग्रहादयश्चत्वार इत्यादि। अवग्रहादयः प्रागत्र (१-१५) निरूपितस्वरूपाः मूलभेदतश्चत्वार इति, क्षयोपशमवैचित्र्यात् तु नानाभेदास्त एव भवन्तीति मत्वा चत्वार इत्याह । मतिज्ञानस्य च प्रकृतत्वात् तद्भेदा एत इति—मतिज्ञानविभागा इत्याह, अवग्रहादयः । एतेऽवग्रहादयः एषां सूत्रोपन्यस्तानां बह्वादीनां षण्णाम् अर्थानाम् अर्थ्यमानानामित्यर्थः । बह्वादीनां षण्णामर्थानां सेतराणां च तेऽवग्रहादयो ग्राहका इत्यर्थ इत्याह—सेतराणां भवन्तीति । एकश इति च । एकैकस्य बह्वादेरर्थकलापस्य सेतरस्य ग्राहका इति एकैकोऽवग्रहादिरेकशः । सेतर इत्यस्य चार्थो नैवं ग्राह्यः—बहोरर्थस्य क्षिप्रार्थ इतर इति शक्यं वक्तुम्, एवं बह्वादीनामनिश्रितादिरितर

अवग्रहादेर्बह्वादयो भेदाः

१ 'वाऽन्यथा' इति ख-ग-पाठः । २ '०श्रितानुक्तध्रुवा०' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति, एतन्निरासायाह-सेतराणाम्, सप्रतिपक्षाणामित्यर्थः। एतत् कथयति-इतरशब्दस्य विरोधी योऽर्थः स वाच्यो भवति, बहर्थस्य च स्तोकार्थो विरोधी प्रतिपक्षः, इत्येवं शेषाणां प्रतिपक्षता ज्ञेया, एवं सम्बन्धं लगयित्वाऽर्थं कथयति—

भा०-बहवगृह्णाति अल्पमवगृह्णाति। बहुविधमवगृह्णात एकविधमवगृह्णाति। क्षिप्रमवगृह्णाति चिरेणावगृह्णाति। निश्रितमवगृह्णाति अनिश्रितमवगृह्णाति। असन्दिग्धमवगृह्णाति सन्दिग्धमवगृह्णाति[1]। ध्रुवमवगृह्णाति अध्रुवमवगृह्णाति। इत्येवमीहादीनामपि विद्यात्[2] ॥ १६ ॥

अल्पावग्रहः

टी०-बहवगृह्णाति इत्यादिना ॥ ननु चावग्रहादयः प्रथमान्ताः श्रुताः पूर्वसूत्रे (१-१५), बह्वादयश्चेह षष्ठ्यन्ता इति तत्रैवमर्थकथनं युक्तं-बहोरर्थस्यावग्रहः अल्पस्यार्थस्यावग्रह इति?। उच्यते-नायं दोषः, यतोऽवग्रहादयः कर्तृसाधनाः तत्र[3] श्रुताः, अवगृह्णातीत्यवग्रहः, ईहत इति ईहा, अपैतीत्यपायः, धारयतीति धारणा, यश्चासौ ज्ञानांशोऽवगृह्णातीत्यादिरूपस्तस्यावश्यं कर्मणा भवितव्यम्, तच्चेह बह्वादिभेदं सूत्रेण विषयात्मकं भण्यते, अतो नास्त्यर्थभेदो बहोरवग्रहः बहुमवगृह्णातीति, अनयोः एक एवार्थः, केवलं तु शब्दभेद उच्यते। स्पर्शनावग्रहस्तावदेवं बहुमवगृह्णाति-शय्यायामुपविशन् पुमान् तत्स्थयोषित्पुष्पवस्त्रचन्दनादिस्पर्शं बहुं सन्तमेकैकं भेदेनावबुध्यते, अयं योषित्स्पर्शोऽयं च तल्पग्रपुष्पस्पर्शोऽयं च तद्गात्रानुलग्नचन्दनस्पर्शोऽयं चैतत्परिहितवस्त्रस्पर्शः अयमेतदावद्धरसनास्पर्श इति, अतो बहुलस्पर्शं[4] भिन्नजातीयमवगृह्णातीति ॥ ननु चावग्रह एकसामयिकः शास्त्रे निरूपितो न चैकस्मिन् समये चैवैकावग्रह एवंविधो युक्तोऽल्पकालत्वादिति। उच्यते-सत्यमेवमेतत्, किंतु अवग्रहो द्विधा-नैश्चयिको व्यावहारिकश्च ॥ तत्र नैश्चयिको नाम सामान्यपरिच्छेदः, स चैकसामयिकः शास्त्रेऽभिहितः, ततो नैश्चयिकादनन्तरमीहैवमात्मिका प्रवर्तते-किमेष स्पर्श उतास्पर्श इति, तस्याश्चानन्तरोऽपायः स्पर्शोऽयमिति, अयं चापायः अवग्रह इत्युपचर्यते, आगामिनो भेदानङ्गीकृत्य यस्मादेतेन सामान्यमवच्छिद्यते। यतः पुनरेतस्मादीहा प्रवर्तिष्यते कस्यायं स्पर्शः? पुनश्चापायो भविष्यत्यस्यायमिति, अयमपि चापायः पुनरवग्रह इत्युपचर्यते, अतोऽनन्तरवर्तिनीमीहामपायं चाश्रित्य, एवं यावदस्यान्ते निश्चय उपजातो भवति, यत्रापरं विशेषं नाकाङ्क्षतीत्यर्थः। अपाय एव भवति न तत्रोपचार इति। अतो य एष औपचारिकोऽवग्रहस्तमङ्गीकृत्य बहु अवगृह्णातीत्येतदुच्यते, नत्वेकसमयवर्तिनं नैश्चयिकमिति, एवं बहुविधादिषु सर्वत्रौपचारिकाश्रयणाद् व्याख्येयमिति। सम्प्रति बह्वित्यस्य प्रतिपक्षं कथयति-अल्पमवगृह्णातीत्यनेन, यदा तेषामेव योषिदा-

बह्ववग्रहस्य स्वरूपम्

१ 'अनुक्तमवगृह्णाति उक्तमवगृह्णाति' इति घ-पाठः। २ 'विन्द्यात्' इति क-पाठः। ३ 'तत्राश्रिताः' इति क-ख-पाठः। ४ 'बहुलस्पर्शे' इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिस्पर्शानां यं किञ्चिदेकं स्पर्शमवगृह्णाति अन्यान् सतोऽपि क्षयोपशमापकर्षात् न गृह्णाति तदाल्पम्–एकमवगृह्णातीत्युच्यते। **बहुविधमवगृह्णातीति**। बह्व्यो विधा यस्य स बहुविधः तमवगृह्णाति। बहुविधो नाम स एव योषिदादिस्पर्श एकैकः शीतस्निग्धमृदुकठिनादिरूपो यदाऽवगृह्यते तदा बहुविधं गुणैर्भिन्नं स्पर्शं परिच्छिन्दत् तज्ज्ञानं बहुविधमवगृह्णातीत्युच्यते। यदा तु योषिदादिस्पर्शमेवैकगुणसमन्वितं शीतोऽयमिति वा स्निग्धोऽयमिति वा मृदुरयमिति वेत्येवमवच्छिनत्ति तदा **एकविधमवगृह्णातीत्युच्यते**। तमेव भूयो योषिदादिस्पर्शमाशु स्वेनात्मना यदाऽवच्छिनत्ति तदा **क्षिप्रमवगृह्णातीति** भण्यते। यदा तु तमेव योषिदादिस्पर्शं स्वेनात्मनाऽवच्छिनत्ति बहुना कालेन तदा **चिरेणावगृह्णातीत्युच्यते**। **चिरेणेति** बहुना कालेन। **अनिश्रितमवगृह्णातीति** निश्रितो लिङ्गप्रमितोऽभिधीयते, यथा यूथिकाकुसुमानामत्यन्तशीतमृदुस्निग्धादिरूपः प्राक् स्पर्शोऽनुभूतस्तेनानुमानेन लिङ्गेन तं विषयं न यदा परिच्छिन्दत् तज्ज्ञानं प्रवर्तते तदा अनिश्रितं अलिङ्गमवगृह्णातीत्युच्यते। यदा त्वेतस्मादाख्याताल्लिङ्गात् परिच्छिनत्ति निश्रितं तदा स लिङ्गमवगृह्णातीति भण्यते। उक्तमवगृह्णातीत्ययं तु विकल्पः श्रोत्रावग्रहविषय एव न सर्वव्यापीति। यत उक्तमुच्यते शब्दः स चाप्यक्षरात्मकः तमवगृह्णातीति। अनुक्तस्तूक्तादन्यो "नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थ(गतिः)" (परिभाषेन्दुशेखरे प० ७४) इति अनया कल्पनया शब्द एवानक्षरात्मकोऽभिधीयते तमवगृह्णाति अनुक्तमवगृह्णातीति भण्यते। अव्याप्तिदोषभीत्या चापरैरिमं विकल्पं प्रोज्झ्य अयं विकल्प उपन्यस्तो निश्चितमवगृह्णातीति, निश्चितं सकलसंशयादिदोषरहितमिति, यथा तमेव योषिदादिस्पर्शमवगृह्णत् ज्ञानं योषित एव पुष्पाणामेव चन्दनस्यैवेत्येवं यदा प्रवर्तते तदा निश्चितमवगृह्णातीत्युपदिश्यते। अनिश्चितमवगृह्णातीति च कदा व्यपदिश्यते?। यदा तमेव स्पर्शं संशयापन्नः परिच्छिनत्ति स्पर्शोऽयं भवति एवं तु न निश्चिनोति–योषित एवायं, विलोमधर्मादेरपीदृशो भवति स्पर्श इति संशयप्रादुर्भावात्। **ध्रुवमवगृह्णातीति**। ध्रुवमत्यन्तं सर्वदेत्यर्थः। यदा यदा तस्य तेन स्पर्शेन योगो भवति योषिदादिना तदा तदा तमर्थमवच्छिनत्तीत्यर्थः। एतदुक्तं भवति–सति चोपयोगे यदाऽसौ विषयः स्पर्शाख्यः स्पृष्टो भवति तदा तमवगृह्णाति, एवम् **अध्रुवमवगृह्णातीति**। सतीन्द्रिये सति चोपयोगे सति च विषयसम्बन्धे कदाचित् तं विषयं तथा परिच्छिनत्ति कदाचिन्नेत्येतदध्रुवमवगृह्णातीत्युपदिश्यते। एवमित्यनेनैतत् कथयति–यथा विषयस्य बह्वादेर्भेदाद् द्वादशप्रकारोऽवग्रहोऽभिहितः क्षयोपशमोत्कर्षापकर्षाद् **एवम् ईहादीनामपि** ईहापायधारणानामपि जानीयाद्, बह्वीहते अल्पमीहते बहुविधमीहते एकविधमीहते क्षिप्रमीहते चिरेणेहते अनिश्रितमीहते निश्रितमीहते उक्तमीहते अनुक्तमीहते, द्वितीयविकल्पे निश्रितमीहते सन्दिग्धमीहते ध्रुवमीहते अध्रुवमीहते। एवमपायेऽपि बह्वपैतीत्यादयो द्वादश विकल्पाः, धारणायां च बहु धारयतीत्यादयो द्वादशैव, एवमवग्रहादीनां स्वस्थाने द्वादशविधत्वम् ॥ १६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्राह्यभेदाद् भेदं प्रतिपाद्येदानीमेषामेवावग्रहादीनां विषयं निर्धारयन्नाह—

सूत्रम्—अर्थस्य ॥ १–१७ ॥

भा०—अवग्रहादयो मतिज्ञानविकल्पा अर्थस्य भवन्ति ॥ १७ ॥

टी०—अर्थस्येति । कस्य विषयस्य ग्राहका अवग्रहादय इति मन्येथास्त्वम् ? । अर्थस्येति ब्रूमः । अर्थश्च स्पर्शरसगन्धवर्णशब्दात्मकः तस्य स्पर्शादेरर्थस्य अवग्रहादयोऽवच्छेदका **मतिज्ञानविकल्पाः** मतिज्ञानस्येन्द्रियादिभेदेनाविभक्तस्य **विकल्पाः** अंशा इत्यर्थः । तदेवं विभज्यमानमेभिर्भेदैरवतिष्ठत इति यदि तर्हि स्पर्शादेर्विषयस्य ग्राहकाः अवग्रहादयोऽभ्युपगम्यन्ते न तर्हि द्रव्यस्य ज्ञानं चक्षुरादिजं किञ्चिद् ग्राहकं समस्ति छाद्मस्थिकम् ? । उच्यते—स्पर्शादयो द्रव्यपर्यायाः, पर्यायग्रहणाच्च द्रव्यमवच्छिन्नमेवावसातव्यं, तेन रूपेण द्रव्यस्यैव भवनात्, यतो न द्रव्यवियुताः पर्यायाः, पर्यायविरहितं वा द्रव्यम्, अन्यतरानुपलब्धावन्यतरस्यानुपलब्धेः । प्रतीन्द्रियग्राह्या द्रव्यस्यैव रूपादिविशेषेणभाक्त्वात्, विवक्षावशाच्च प्रधानगुणभावाभ्युपगमः प्रतिपद्यते जैनैः, अतः स्पर्शादिग्रहणे द्रव्यग्रहणमवश्यंभावि द्रव्यग्रहणे वा स्पर्शादिग्रहणम्, अन्योन्यानुगमात् । अर्थस्य स्पर्शादेः सामान्यानिर्देश्यस्वरूपस्य नामादिकल्पनारहितस्य अवग्रहो ग्राहकः, तस्यैव स्पर्शादेः किमयं स्पर्श उतास्पर्श इत्येवं परिच्छेदिका ईहा, तस्यैव स्पर्शोऽयमित्येवं परिच्छेदकोऽपायः, तस्यैव स्पर्शादेरर्थस्य परिच्छिन्नस्योत्तरकालमविस्मृतिर्या सा धारणा । एवं रसादिष्वपि प्रत्येकमवग्रहादयो योज्याः । इदं च साधारणमवगम्यम्—अवग्रहादय एवार्थस्य मतिज्ञानविकल्पा ग्राहकाः नान्यो मतिज्ञानांश इति ॥ १७ ॥

अथ किमन्योऽप्यस्ति कश्चिन्मतिज्ञानांशो योऽर्थस्य ग्राहको न भवतीति नियमेनापास्यते? । उच्यते—अस्ति, यः सामान्यमात्रग्राहिणोऽप्यवग्रहादुक्तस्वरूपादत्यन्तमलीमसरूपोऽवग्रह इति । स तर्हि कस्य ग्राहक इति ? । उच्यते—

सूत्रम्—व्यञ्जनस्यावग्रहः ॥ १–१८ ॥

भा०—व्यञ्जनस्यावग्रह एव भवति नेहादयः । एवं द्विविधोऽवग्रहो व्यञ्जनस्यार्थस्य च । ईहादयस्त्वर्थस्यैव ॥ १८ ॥

टी०—व्यञ्जनस्यावग्रह इति । तत्र व्यज्यतेऽनेनार्थ इति व्यञ्जनं सन्तमसावस्थितघटरूपप्रदीपादिवत्, तत् पुनर्व्यञ्जनं संश्लेषरूपं यदिन्द्रियाणां स्पर्शनादीनामुपकरणाख्यानां स्पर्शाद्याकारेण परिणतानां पुद्गलद्रव्याणां च यः परस्परं संश्लेषस्तद्व्यञ्जनं, तस्य व्यञ्जनस्यावग्रह एवैको भवति ग्राहकः । का भावनेति चेत् ? उच्यते—यदोपकरणेन्द्रियस्य स्पर्शनादेः पुद्गलैः स्पर्शाद्याकारपरिणतैः सम्बन्ध उपजातो भवति न च किमप्येतदिति गृह्णाति किन्त्वव्यक्तविज्ञानोऽसौ सुप्तमत्तादिसूक्ष्मावबोधसहितपुरुषवदिति तदा तैः पुद्गलैः स्पर्शनाद्यु-

---

१ 'विशेषेण' इति क–ख–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पकरणेन्द्रियसंश्लिष्टैर्या च यावती च विज्ञानशक्तिराविरस्ति सैवंविधा विज्ञानशक्तिरवग्रहाख्या, तस्य स्पर्शनाद्युपकरणेन्द्रियसंश्लिष्टस्पर्शाद्याकारपरिणतपुद्गलराशेर्व्यञ्जनाख्यस्य ग्राहिकाऽवग्रह इति भण्यन्ते। तेनैतदुक्तं भवति–स्पर्शनाद्युपकरणेन्द्रियसंश्लिष्टाः स्पर्शनाद्याकारपरिणताः पुद्गलाः व्यञ्जनं भण्यन्ते, विशिष्टार्थावग्रहकारित्वात्, तस्य व्यञ्जनस्य परिच्छेदकोऽव्यक्तोऽवग्रहो भण्यते, अपरोऽपि तस्मान्मनाक् निश्चिततरः किमप्येतदित्येवंविधः सामान्यपरिच्छेदोऽवग्रहो भण्यते, ततः परमीहादयः प्रवर्तन्ते, अतः सूक्तं व्यञ्जनस्यावग्रह एव अत्यन्तमलीमसपरिच्छेदक इति, नेहादयः, ईहापायधारणास्तस्य व्यञ्जनस्य ग्राहिका न भवन्ति, स्वांशे–भेदमार्गणनिश्चयधारणाख्ये तासां नियतत्वात्। एवमुक्तेन प्रकारेण, सूत्रद्वयाभिहितेनेत्यर्थः। द्विविध इति च। विषयस्य द्विरूपत्वात् द्विविध इत्युक्तम्। एतदेवाह–व्यञ्जनस्यार्थस्य च परिच्छेदे प्रवर्तमानो द्विविध उच्यते, ईहादयस्त्वर्थस्य स्पर्शादेरेव विशेषका भवन्ति, नेहापायधारणास्त्ववग्रहस्य द्वैरूप्यमस्तीति ॥ १८ ॥

अथ किं स्पर्शनादीनामिन्द्रियाणां सर्वेषां व्यञ्जनावग्रहः समस्ति, उत कस्यचिन्नेति?। उच्यते–कस्यचिन्न सम्भवतीत्यपि। एतद् दर्शयति—

सूत्रम्–न चक्षुरनिन्द्रियाभ्याम् ॥ १–१९ ॥

भा०—चक्षुषा नोइन्द्रियेण च व्यञ्जनावग्रहो न भवति, चतुर्भिरिन्द्रियैः शेषैर्भवति। एवमेतत् मतिज्ञानं द्विविधं, चतुर्विधमष्टाविंशतिविधमष्टषष्ट्युत्तरशतविधं, षट्त्रिंशत्त्रिशतविधं च भवति ॥ १९ ॥

अत्राह—गृहीमस्तावन्मतिज्ञानम्। अथ श्रुतज्ञानं किमिति अत्रोच्यते ॥

टी०–करणे सहार्थे वैषा तृतीया, **चक्षुषा** उपकरणेन्द्रियाख्येन सह **नोइन्द्रियेण** वा मनओवज्ञानरूपेण सह ते रूपाकारपरिणताः पुद्गलाश्चिन्त्यमानाः वस्तुविशेषाः संश्लेषं न यान्ति, अतो व्यञ्जनम् चक्षुरुपकरणेन्द्रियनोइन्द्रिययो रूपाद्याकारपरिणतिपुद्गलानां च यत् संश्लेषरूपं तद्व्यञ्जनमेवंविधं नास्ति, तदभावाच्च तदवग्रहोऽपि नास्ति, एतदाह–**व्यञ्जनस्यावग्रहो न भवति**। एतदुक्तं भवति–ये ते दृश्यमानाश्चिन्त्यमानाश्च वस्तुविशेषाः म

नेत्रस्याप्राप्यकारित्वम्।

ते चक्षुरिन्द्रियेणोपकरणरूपेण नोइन्द्रियेण च सह संश्लेषमिताः परिच्छिद्यन्ते, यतो योग्यदेशावस्थितं वस्तु चक्षुः शरीरस्थमेव सत् परिच्छिनत्ति, न गत्वा विषयपरिच्छेदे व्याप्रियते, न वा विषयमागतं धान्यमसूरकाकृतिके इन्द्रियदेशेऽवगच्छति, अतश्च लोचनमप्राप्तविषयग्राहि, न खलु ग्राह्येण तस्यानुग्रहोपघातानुभवो दृष्टः, स्वान्तस्येव, नापि धान्यमसूराकृतीन्द्रियदेशवर्तिविषयपरिच्छेदि विलोचनं, यदि स्यात् ततस्तद्गतमञ्जनादि परिच्छिन्द्यात्, न च परिच्छिनत्ति, अतो निश्चीयतेऽनागतं विषयमवबुध्यते तत्, न वा गत्वा विषयदेशमित्यतो न व्यञ्जनावग्रहस्तस्य। मनसोऽप्येवमेव, न चिन्त्यमानं विषयं प्राप्य मनः चिन्तयति, न वा आगतं स्वात्मन्यवस्थितं विषयं मनः पर्यालोचयति, यदि च संश्लिष्य विषयं परिच्छिन्द्यात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनस्ततो ज्ञेयकृतमनुग्रहं विक्लेदादिरूपमनुभवेद् उपघातं वा दाहादिरूपमिति ॥ अथामूर्तत्वान्न दह्यत इति, तदप्ययुक्तम्, आर्हतस्य हि पुद्गलात्मकत्वात् मूर्तता मनस्यसिध्यत्, शरीरस्थं वा मनो विषयं निश्चिनोति, यथा हि स्पर्शनं करणमगत्वेति न वा शरीरात् तस्य निःसरणं, स्पर्शनं हि करणं सन्न निस्सरद्दृष्टम्, अतो मनश्चिन्त्यमानैर्वस्तुभिः सह न श्लिष्यतीति व्यञ्जनावग्रहाभाव आख्यायते । **चतुर्भिरिति** चक्षुर्मनोव्यतिरिक्तानि चत्वार्येवेति, अन्यानि सांख्याभिमतानि निरस्यति—चतुर्भिरेव नातो व्यतिरिक्तैरिन्द्रियैरिति, स्पर्शनरसनघ्राणश्रोत्रैः **शेषैरिति**, उपर्युक्तवर्जैः **भवति**, व्यञ्जनावग्रहः सम्भवतीति यावत् । किमिति यदि एतानि चत्वार्यप्युपकरणेन्द्रियेण सह श्लिष्टं स्पर्शादिकं विषयमवच्छिन्दते नान्यथेति अतः प्राप्तविषयग्राहित्वादेषां सम्भवति व्यञ्जनावग्रह इति । **एवमेतदिति** लक्षणविधानाभ्यां यन्निरूपितं **मतिज्ञानं** तस्य पुनः सम्पिण्ड्य भेदान् कथयति द्विविधमित्यादिना । **द्विविधमिति**, इन्द्रियनिमित्तमनिन्द्रियनिमित्तं च । **चतुर्विधमवग्रहादिभेदतः । अष्टाविंशतिविधमिति**, स्पर्शनादीनां मनःपर्यवसानानां षण्णामेकैकस्य चत्वारो भेदा अवग्रहादयस्ते समुदिताः सर्वेऽपि चतुर्विंशतिरुपजाताः, ततोऽन्यच्चक्षुर्मनोवर्जस्पर्शनादीनां यो व्यञ्जनावग्रहः चतुर्भेदः स प्रक्षिप्तः, ततोऽष्टाविंशतिविधं भवति । **अष्टषष्ट्युत्तरशतविधमिति**, तस्या एवाष्टाविंशतेरेकैको भेदः षड्विधो भवति बह्वादिभेदेन अत अष्टषष्ट्युत्तरशतविधं भवति । तस्या एवाष्टाविंशतेरेकैको भेदो द्वादशधा भवति सेतरबह्वादिद्वादशकेन, अतः **षट्त्रिंशत्त्रिशतभेद(विध)मिति** ॥ १९ ॥

मतिज्ञानस्य भेदविचारः

अत्र—अस्मिन्नवकाशे **चोदकः आह**—गृहीमो जानीमस्तावत् क्रमेण पूर्वमुद्घट्टितं लक्षणविधानरूपं **मतिज्ञानं**, तदनन्तरं तु यच्छ्रुतज्ञानमुक्तं तन्न विद्म इत्यतः पृच्छ्यते मया—**अथ श्रुतज्ञानं किंलक्षणमिति ?** । अस्मिन् चोदिते गुरुराह—**उच्यते** मयेति—

सूत्रम्—श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदम् ॥ १—२० ॥

टी०—श्रुतमिति लक्ष्यं, मतिपूर्वमिति लक्षणं, द्व्यादिविधानं, श्रुतमिति च श्रूयते स्म श्रुतम् । एवंविधायां च कल्पनायां शब्दोऽभिधीयते न श्रुतिः, श्रुतं श्रवणमिति भवासाधनतामभ्युपैति, प्रकृतेन ज्ञानग्रहणेन श्रुतमिति ज्ञानं ग्राह्यं, न शब्दः, ज्ञानविचारप्रस्तावात् । यदि तु श्रुतज्ञानस्यान्तर्वर्तिनः स शब्दो निमित्ततां प्रतिपद्यमानः श्रुतव्यपदेशमश्नुते न कश्चिद् दोषः, उपचारस्य व्यवहाराङ्गत्वात् । मुख्यया तु वृत्त्या श्रुतमित्यनेन ज्ञानमुच्यते, एतदाह—

श्रुतशब्दस्यार्थः

भा०—**श्रुतज्ञानं मतिज्ञानपूर्वकं भवति । श्रुतमाप्तवचनं आगमः उपदेश ऐतिह्यमाम्नायः प्रवचनं जिनवचनमित्यनर्थान्तरम् ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—श्रुतज्ञानमिति। मतिपूर्वमित्यस्यार्थं विवृणोति–**मतिज्ञानपूर्वकं** भवतीत्यनेन। मत्या कृतया ज्ञानं विशेषयति–**मतिज्ञानमिति**। तन्मतिज्ञानं पूर्वं यस्य तन्मतिपूर्वं भण्यते, अपेक्षाकारणं चेह पूर्वमित्यनेनोच्यते, यथा घटस्योत्पत्तावपेक्षाकारणं व्योमाद्यपेक्ष्यते, तेन विना तदभावात्, एवमिह सति मतिज्ञाने लब्धिरूपे ततः श्रुतज्ञानस्योत्पत्तिरिष्टा न मतिज्ञानाभावे, किं पुनः कारणं तदेव मतिज्ञानं न श्रुतज्ञानीभवतीति मृत्तिकावद् घटरूपेण? उच्यते–एवं सति श्रुतज्ञाने प्रादुर्भूते मतिज्ञानस्य नाशः स्यात्, न चैतदिष्यते। यत आह–"जत्थ मई तत्थ सुअं, जत्थ सुअं तत्थ मई (जत्थ आभिणिबोहियनाणं तत्थ सुयनाणं, जत्थ सुयनाणं तत्थाभिणिबोहियनाणं"[1] नन्दी०सू० २४)। तस्मादपेक्षाकारणमेव मतिज्ञानं तस्योत्पत्तौ लब्धिरूपं भवति, न पुनः समवायिकारणमिति। एतच्च लक्षणमुक्तमेव, यतो मतिज्ञानभावे लक्ष्यते श्रुतमिति। एतच्च श्रुतज्ञानमेवमात्मकमिन्द्रियमनोनिमित्तं ग्रन्थानुसारि विज्ञानं यदिति, तं च ग्रन्थं दर्शयति बहुभिः पर्यायशब्दैः–**श्रुतमाप्तवचनमित्यादिभिः**। श्रूयते तदिति श्रुतम्, अस्मिन् पक्षे शब्दोऽभिधीयते, तस्य शब्दस्य श्रुतज्ञानं–परिच्छेदकारि श्रुतज्ञानमिति गृह्यते। एवं सर्वेष्वाप्तवचनादिषु षष्ठीसमास आश्रयणीयः, आप्तवचनस्य ज्ञानं यत्परिच्छेदकारि इत्येवम्, आप्तो–रागादिवियुतः तस्य वचनमिति॥ ननु चार्थमेव कथयति तीर्थकृत्, न सूत्रं ग्रथ्नाति, गणधरास्तु सूत्रसन्दर्भेण व्याप्रियन्ते, कथं तर्हि इदमुच्यते–आप्तस्य–तीर्थकृतो वचनं द्वादशाङ्गं–गणिपिटकमिति?। उच्यते–गौणीकल्पनामाश्रित्योक्तमाप्तस्य वचनमित्येतत्। कथम्? यदा हि भगवान् जीवादिकमर्थं केवलज्ञानभास्वत्प्रभावप्रकाशितं गणधरेभ्य आचष्टे तदाऽसौ जीवादिरर्थस्तस्मिन् केवलज्ञानदर्शनात्मके तीर्थकृति समारूढ इव लक्ष्यते प्रतिबिम्बाकारेणोपजायमानत्वात् अतोऽसावप्यर्थ आप्तो भवति, तदध्यारोपात्, तस्याप्तस्यार्थस्य तद्गणधरवचनं प्रतिपादकमित्याप्तवचनं भण्यते। यद्वा गणधरवचनमेवाप्तवचनम्, निश्रयोपजायमानत्वात् आप्तवचनमुच्यते। एवमागमादिष्वपि घटमानमायोज्यमिति।

आगमादीनां व्युत्पत्त्यर्थः

आगच्छत्याचार्यपरम्परया वासनाद्वारेणेत्यागमः, उपदिश्यते–उच्चार्यते इत्युपदेशः, ऐतिह्यमेवमेतद् वृद्धाः स्मरन्तीति, आम्नायते–अभ्यस्यते निर्जरार्थिभिरित्याम्नायः, प्रकर्षेण नामादिनयप्रमाणनिर्देशादिभिश्च यत्र जीवादयो व्याख्यातास्तत् प्रवचनम्, जिना रागादिसन्तानविजि (वर्जि?) तास्तेषामिदं वचनमिति। एवमेभिरनर्थान्तरवर्तिभिः एकोऽर्थः प्रतिपाद्यते द्वादशाङ्गं गणिपिटकमितियावत्, स **चावश्यकादिराचारादिश्च**॥ एवं लक्षणतः पर्यायतश्चाभिधायाभिधानं दर्शयति—

---

१ यत्र मतिस्तत्र श्रुत, यत्र श्रुतं तत्र मतिः (यत्राभिनिबोधिकज्ञानं तत्र श्रुतज्ञानं, यत्र श्रुतज्ञानं तत्राभिनिबोधिकज्ञानम्)।

२ 'दकमपीत्याप्त' इति ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—तद् द्विविधमङ्गबाह्यमङ्गप्रविष्टं च। तत् पुनरनेकविधं द्वादशविधं च यथासङ्ख्यम्। अङ्गबाह्यमनेकविधम्। तद्यथा—सामायिकं, चतुर्विंशतिस्तवः, वन्दनं, प्रतिक्रमणं, कायव्युत्सर्गः, प्रत्याख्यानं, दशवैकालिकं, उत्तराध्यायाः, दशाः, कल्पव्यवहारौ, निशीथमृषिभाषितानीत्येवमादि ॥

श्रुतज्ञानस्य भेद-प्ररूपणा

टी०—तद् द्विविधमित्यादिना। द्वौ चानेकश्च द्वादश च द्व्यनेकद्वादश ते भेदा यस्य तद् द्व्यनेकद्वादशभेदम्, तच्छ्रुतं द्विविधमिति, परोपाधिकं द्विविधत्वमिति वक्ष्यति। अङ्गबाह्यमिति। अङ्गानि-अवयवा आचारादयस्तेभ्यो बाह्यमिति अङ्गबाह्यम्, अङ्गेष्वाचारादिषु प्रविष्टम्-अन्तर्गतम् अङ्गप्रविष्टम्, अङ्गबाह्यमङ्गप्रविष्टम् च पुनरनेन भेदेन भेद्यम्-अनेकविधम्-अनेकप्रकारम्, अङ्गबाह्यं, द्वादशविधं-द्वादशभेदम् अङ्गप्रविष्टमेवं यथासङ्ख्यं यथोपन्यस्तमितियावत्। अङ्गबाह्यमनेकविधं सामायिकादि। समभावो यत्राध्ययने वर्ण्यते तत्तेन वर्ण्यमानेनार्थेन निर्दिशति-सामायिकमिति। एवं सर्वेषु वक्ष्यमाणेष्वर्थसम्बन्धाद् व्यपदेशो द्रष्टव्यः। चतुर्विंशतीनां पूरणस्यारादुपकारिणो यत्र स्तवः शेषाणां च तीर्थकृतां वर्ण्यते स चतुर्विंशतिस्तव इति। वन्दनम्-प्रणामः स कस्मै कार्यः कस्मै च नेति यत्र वर्ण्यते तत् वन्दनम्। असंयमस्थानं प्राप्तस्य यतेस्तस्मात् प्रतिनिवर्तनं यत्र वर्ण्यते तत् प्रतिक्रमणम्। कृतस्य पापस्य यत्र कायपरित्यागेन क्रियमाणेन विशुद्धिराख्यायते स कायव्युत्सर्गः। प्रत्याख्यानं यत्र मूलगुणा उत्तरगुणाश्च धारणीया इत्ययमर्थः ख्याप्यते तत् प्रत्याख्यानम्। दशविकाले पुत्रहिताय स्थापितान्यध्ययनानि दशवैकालिकम्। आचारात् परतः पूर्वकाले यस्मादेतानि पठितवन्तो यतयस्तेन उत्तराध्ययनानि। पूर्वेभ्य आनीय सङ्घसन्ततिहिताय स्थापितान्यध्ययनानि दशा उच्यन्ते। दशा इति व्यवस्थावचनः शब्दः, काचित् प्रतिविशिष्टावस्था यतीनां यासु वर्ण्यते ता दशा इति। कल्पव्यवहारौ कल्प्यन्ते-भिद्यन्ते मूलादिगुणा यत्र स कल्पः, व्यवह्रियते प्रायश्चित्ताभवद्व्यवहारतयेति व्यवहारः। निशीथम् अप्रकाशं सूत्रार्थाभ्यां, यद् ऋषिभिर्भाषितानि प्रत्येकबुद्धादिभिः कापिलीयादीनि, एवमादि सर्वमङ्गबाह्यं द्रष्टव्यम् ॥

अङ्गबाह्यादीनां सामायिकादीनां व्याख्या

भा०—अङ्गप्रविष्टं द्वादशविधम्। तद्यथा—आचारः, सूत्रकृतं, स्थानं, समवायः, व्याख्याप्रज्ञप्तिः, ज्ञातधर्मकथाः, उपासकाध्ययनदशाः, अन्तकृद्दशाः, अनुत्तरोपपातिकदशाः, प्रश्नव्याकरणं, विपाकसूत्रं, दृष्टिपात इति ॥ अत्राह—मतिज्ञानश्रुतज्ञानयोः कः प्रतिविशेष इति ?। अत्रोच्यते—

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

टी०—अङ्गप्रविष्टं द्वादशविधं भण्यते। तद्यथा, आचारो ज्ञानादिर्यत्र कथ्यते स **आचारः**। सूत्रीकृता अज्ञानिकादयो यत्र वादिनस्तत् **सूत्रकृतम्**। यत्रैकादीनि पर्यायान्तराणि वर्ण्यन्ते तत् **स्थानम्**। सम्यगवायनं वर्षधर-नद्यादिपर्वतानां यत्र स **समवायः**। व्याख्यायन्ते जीवादिगतयो यत्र नयद्वारेण प्ररूपणाः क्रियन्ते सा **व्याख्याप्रज्ञप्तिः**। ज्ञाता-दृष्टान्तास्तानुपादाय धर्मो यत्र कथ्यते ताः **ज्ञातधर्मकथाः**। उपासकैः-श्रावकैरेवं स्थातव्यमिति येष्वध्ययनेषु दशसु वर्ण्यते ता **उपासकदशाः**। अन्तकृतः-सिद्धास्ते यत्र ख्यायन्ते **वर्धमान-स्वामिनस्तीर्थ** एतावन्त इत्येवं सर्वकृतान्ताः **अन्तकृद्दशाः**। अनुत्तरोपपादिका देवा येषु ख्याप्यन्ते ताः **अनुत्तरोपपादिकदशाः**। प्रश्नितस्य जीवादेर्यत्र प्रतिवचनं भगवता दत्तं तत् **प्रश्नव्याकरणम्**। विपाकः-कर्मणामनुभवस्तं सूत्रयति-दर्शयति तद् **विपाकसूत्रम्**। दृष्टीनाम् अज्ञानिकादीनां यत्र प्ररूपणा कृता स **दृष्टिवादः**, तासां वा तत्र पातः। अत्रावसरे चोदक आह-उक्तं लक्षणं विधानं च श्रुतस्य, किन्तु यथाऽयं विषयं निरूपयिष्यते तथा न कश्चिद् भेदोऽस्तीति पृच्छति मतिश्रुतयोः को भेद इति ?। भण्यते—

अङ्गप्रविष्टानां आचारादीनां व्याख्या

भा०—**उत्पन्नाविनष्टार्थग्राहकं साम्प्रतकालविषयं मतिज्ञानम्, श्रुतज्ञानं तु त्रिकालविषयम्, उत्पन्नविनष्टानुत्पन्नार्थग्राहकमिति॥ अत्राह-गृह्णीमो मतिश्रुतयोर्नानात्वम्॥ अथ श्रुतज्ञानस्य द्विविधमनेकं द्वादशविधमिति किंकृतः प्रतिविशेष इति ?। अत्रोच्यते—**

मतिश्रुतयोः प्रतिविशेषः

टी०— **उत्पन्नेत्यादिना**। उत्पन्नः--स्वेन रूपेण जातः स्पर्शादिरर्थो घटादिगतः, स चोत्पन्नो यदि तेन रूपेण सन्तिष्ठते न तु कपालाद्यवस्थां प्राप्तस्तदा स्पर्शनमतिज्ञानमेवं परिच्छिनत्ति--घटस्यायं स्पर्श इति, स चाप्युत्पन्नाविनष्टो यदि योग्यदेशस्थो भवति तदा परिच्छिनत्ति, न तु विप्रकृष्टदेशस्थमित्येतदाह-**साम्प्रतकालविषयमिति**। अनेन वर्तमानकालविषयतां मतिज्ञानस्यावेदयते। **श्रुतज्ञानं तु**, तुशब्दः भेदप्रदर्शनपर इति। तं भेदमाह—**त्रिकालविषयम्**। पुनश्चैदमैदम्पर्यं[1] व्याख्यानयति-**उत्पन्नेत्यादिना**। उत्पन्नो--वर्तमानस्तमपि नोइन्द्रियं मनआख्यं परिचिन्तयति-कीदृशोऽयं कर्करस्पर्श इति, **विनष्टमप्यन्यत्र लग्नं** शर्करास्पर्शमतीतं चिन्तयति-अस्याः प्राक् शर्करायाः मया स्पर्शोऽनुभूत इति। **अनुत्पन्नम्**-आगामिनमेवंविध एषां क्षीरगुडादीनां प्रतिविशिष्टात् संस्कारात् स्पर्श उपयास्यतीति, अत उत्पन्नादिग्राहकम्। पुनश्चोदयति-अवगतो विशेष एतयोः, अथ श्रुतज्ञानस्य द्विविधादिभेदः किंकृत इति ? सर्वं तद्द्रव्यश्रुतं भावश्रुतस्य निमित्तमिति शक्यं वक्तुम्। एवमुक्ते सूरिराह—

भा०—**वक्तृविशेषाद् द्वैविध्यम्। यद् भगवद्भिः सर्वज्ञैः सर्वदर्शिभिः परमर्षिभिरर्हद्भिस्तत्स्वाभाव्यात् परमशुभस्य च प्रवचनप्रतिष्ठापनफलस्य तीर्थकरनामकर्मणोऽनुभावादुक्तं भगवच्छिष्यैरतिशयवद्भिरुत्तमातिशयवाग्बु-**

१ 'श्चैदमेव पदं' इति ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्धिसम्पन्नैर्गणधरैर्दृब्धं तदङ्गप्रविष्टम् । गणधरानन्तर्यादिभिस्त्वत्यन्तविशुद्धागमैः परमप्रकृष्टवाङ्मतिबुद्धिशक्तिभिराचार्यैः कालसंहननायुर्दोषादल्पशक्तीनां शिष्याणामनुग्रहाय यत् प्रोक्तं तदङ्गबाह्यमिति ॥

टी०—वक्तृविशेषादित्यादिना । वक्तारः तस्य ग्रन्थराशेर्निबन्धकास्तेषां विशेषो—भेदस्तस्माद् द्वैविध्यं—द्विविधत्वं—द्विभेदताऽनुमातव्या । यद्भगवद्भिरित्यादि । अयं पिण्डार्थः—तीर्थकृद्भिरर्थः कथितः स गणधरैर्गणधरशिष्यादिभिश्च रचित इति गणधरास्तद्वंशवर्तिनश्च द्वये वक्तारस्तद्भेदाद् द्विविधमिति । एतदाह—यद् उक्तं तैर्भगवद्भिरैश्वर्यादिगुणान्वितैः, सर्वद्रव्यपर्यायान् जानाति(नद्भिः) विशेषतः सर्वज्ञैः, तानेव सामान्यतः पश्यद्भिः सर्वदर्शिभिरिति । सामान्यकेवलिनो हि प्रधानभावं बिभ्रति ऋषयः, प्रधानतरास्तीर्थकराः परमर्षिभिः इत्याह, पूजां त्रिदशादीनामर्हद्भिरित्यतोऽर्हद्भिः (सम्बन्ध—का० ७) ।

तीर्थकरोपदेशे कारणम्

किमर्थं कृतकृत्या अर्हन्तो गणधरेभ्यः कथयन्त्यर्थमिति ? । उच्यते—तत्स्वाभाव्यादिति । तेषामेष एव स्वभावस्तीर्थकृतां यतः उत्पन्नदिव्यज्ञानैर्गणधरादिभ्यः प्रकाशनीयः सोऽर्थ इति, न च स्वभावेऽस्ति पर्यनुयोगो, भास्करप्रकाशवत्, किमर्थमयमंशुमाली जगत् प्रकाशयतीति न कश्चित् प्रश्नयति । अथवा अकृतार्थ एव तदा भगवान्, किमिति ? कर्मोदयभाक्त्वात् । कस्य कर्मण इति चेत् ? उच्यते—तीर्थकरनामाख्यस्य । तद्द्वयविशेषणमुपक्षिपति—परमशुभस्येत्यादि । परमं च तच्छुभं च परमशुभं तस्य । कथं परमशुभतेति चेद् यतस्तस्मिन्नुदितेऽन्या असातादिकाः प्रकृतय उदिता अपि न स्वविपाकं प्रकटं दर्शयितुं शक्ताः, क्षीरद्रव्यापूरितकुम्भे पिचुमन्दरसबिन्दुवदिति । एवं परमशुभस्य, प्रवचनं द्वादशाङ्गं ततोऽनन्यवृत्तिर्वा संघस्तस्य प्रवचनस्य प्रतिष्ठापनं—निर्वर्तनं प्रयोजनमस्य तत्प्रवचनप्रतिष्ठापनफलं तस्य, तीर्थं तदेव गणिपिटकं सङ्घः, सम्यग्दर्शनादित्रयं वा तत् कुर्वन्ति—उपदेशयन्ति ये ते तीर्थकराः, तान् नामयति—करोति यत् तत् तीर्थकरनाम । तस्य तदेवार्हदादिपूजाकरणाद्धेतोः क्रियमाणं कर्मेत्यभिधीयते तस्यानुभावात्, पश्चाद् विपाकादित्यर्थः। अतस्तस्मादनुभावाद् यदुक्तं—प्रतिपादितं तीर्थकृद्भिः तदेव तीर्थकरप्रतिपादितमर्थजातम्—उत्पन्नमिति वा विनष्टमिति वा ध्रुवमिति वा इत्येवं तद् गृहीत्वा गणधरैः, तेषां त्रितयं विशेषणमुपक्षिपति—

भगवच्छिष्यैरित्यादिना स्वयं गृहीतलिङ्गतां निरस्यति । पुनश्च सामान्यपुरुषा न भवन्तीति दर्शयति—अतिशयवद्भिरिति । अतिशयाः—विशिष्टाः शक्तयः । यथा—"पहू णं चउद्दसपुव्वी घडाओ(ओ ?) घडसहस्सं पडाओ पडसहस्सं[1]" इत्येवमादयः, ते येषां सन्ति तेऽतिशयवन्तस्तैरिति । तथा उत्तमातिशयेत्यादिना कुण्ठतां निरस्यति, यत उत्तमा अतिशयाः (बीज-

गणधरविशेषणानां सार्थकता

१ प्रभुः चतुर्दशपूर्वी घटात् घटसहस्रं पटात् पटसहस्रम् (भगवत्यां सू० १९९) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोष्ठादिबुद्धयः) प्रसादादयः वाग्विवक्षितार्थप्रतिपादिका बुद्धिः बीजकोष्ठकादि, यावद् भण्यते तत् सर्वमसौ गृह्णाति न किञ्चित् न पश्यति तिलतुषमात्रमपीत्यर्थः। आभिरुत्तमाः अतिशयवाग्बुद्धिभिः सम्पन्ना—अन्विताः तैः साधुवृन्दोपदेशनप्रवृत्तैर्गणधारिभिर्यत् दृब्धं—रचितं तदङ्गप्रविष्टमाचारादि भण्यते, अङ्गबाह्यं सम्प्रतितनैः कृतमिति तदुच्यते। गणधरा इन्द्रभूत्यादयः तेषामनन्तरे ये साधवस्तेऽनन्तर्याः शिष्या इत्यर्थः ते गणधरानन्तर्याः जम्बूनामादयः आदिर्येषां प्रभवादीनां ते गणधरानन्तर्यादयः, तैरत्यन्तनिर्मलागमैः परमप्रकृष्टा वाङ्मतिबुद्धिशक्तयो येषां तैरिति, वाग्-भाषा स्पष्टवर्णा सकलदोषरहिता मतिः, बुद्धिश्चतुर्विधा, शक्तिः वादलब्ध्यादि । एवंविधैरपि नोज्झितचारित्रैरित्येतदाह—आचार्यैः ज्ञानाद्याचारानुष्ठायिभिरिति। किमर्थं तैस्तत एव प्रवचनादुद्धृत्य दशवैकालिकादि रचितम्? उच्यते—अल्पशक्तीनामनुग्रहार्थम्। कस्मादल्पशक्तय इति चेत्? उच्यते—कालसंहननेत्यादि। कालदोषात् कालस्य दुःख[ष]माभिधानस्य स्वभावात् पुरुषा अल्पशक्तयो भवन्ति, संहननच्छेदवर्ति स एव दोषस्तद्वाऽल्पसामर्थ्यम्, आयुः-जीवितं तदल्पं यः सर्वचिरं जीवेत् स वर्षशतमिति, अत एतस्मात् कालादिदोषादल्पशक्तयः पुमांसो भविष्यन्तीत्येवं मन्यमानैर्गणधरैर्वंशजैः सूरिभिः शिष्याणां अनुग्रहाय—उपकारायाल्पेनैव ग्रन्थेन सुबहुमर्थमूहिष्यन्त इति मन्यमानैर्यत् प्रोक्तं दशवैकालिकादि तदङ्गबाह्यमिति। अत एव द्विविधकारणात् मतेः सकाशात् महाविषयता सिद्धा, एतदाह—

श्रुतज्ञानस्य महाविषयत्वात् अङ्गादिभेदः।

भा०—सर्वज्ञप्रणीतत्वादानन्त्याच्च ज्ञेयस्य श्रुतज्ञानं मतिज्ञानान्महाविषयम्। तस्य महाविषयत्वात् तांस्तानर्थानधिकृत्य प्रकरणसमाप्त्यपेक्षमङ्गोपाङ्गनानात्वम्। किंचान्यत्। सुखग्रहणविज्ञानापोहप्रयोगार्थं च।

टी०—सर्वज्ञप्रणीतत्वादित्यादि। सर्वज्ञैस्तीर्थकृद्भिः प्रणीतत्वादुपदिष्टत्वात् महाविषयं श्रुतम्, यतः सङ्ख्यामतिक्रान्तानपि भावानाख्यातुं शक्तोऽनन्तान् श्रुतज्ञानानुसारेण पदार्थान्, किंच आनन्त्याज्ज्ञेयस्य, अनन्तं हि ज्ञेयमनेन निरूपयितुं शक्यते सामान्यतः, मन्तुर्मत्या सम्प्रतितनार्थग्राहिकया, श्रुतज्ञानं—ग्रन्थानुसारि मतिज्ञानादिन्द्रियसमुत्थात् महाविषयमनेकार्थपरिच्छेदीत्यर्थः। तस्य श्रुतज्ञानस्य महाविषयत्वाद्—बह्वर्थविषयत्वात् ताँस्तान् जीवादीनर्थमाणानाश्रित्य। एतदुक्तं भवति—तत्र ग्रन्थे गणिपिटके ये विप्रकीर्णा अर्थास्तान् संकुलतया स्थितान् पश्यद्भिस्तैर्गणधरैस्तच्छिष्यादिभिश्च कथन्त्विदमेतावति ग्रन्थे परिसमाप्यत इति मन्यमानैरिदमङ्गमाचारादीदं च तदुपाङ्गमिति स्थापितम्, एतदाह—प्रकरणेत्यादि। प्रकरणं यत्र विवक्षित आचार इत्यादिरूपोऽर्थो निष्ठां याति तद् भण्यते तस्य समाप्तिः तामपेक्षते यत् तत् प्रकरणपरिसमाप्त्यपेक्षम्, किं तद्? अङ्गोपाङ्गनानात्वमिति। किञ्चान्यत्-इतश्च कारणादङ्गोपाङ्गनानात्वमिति। सुखग्रहणेत्यादि। सुखेन—अनायासेनापूर्वस्य ग्रहणं करिष्यन्ति अङ्गा-

१ चिह्नितोऽयं ख-पाठः। २ ' ०पदेशेन ' इति ख-पाठः। ३ ' गणधरादिभिः ' इति ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नङ्गानां, सुखेन च गृहीतं[1] धारयिष्यन्ति बुद्धया, सुखेन विज्ञानं तस्मिन्नर्थे शृण्वत उत्पादयिष्यन्तीति, सुखेन अपोहं–निश्चयं करिष्यन्ति इति एवमेषोऽर्थः स्थित इति, सुखेन च प्रयोगव्यापारं करिष्यन्ति प्रत्यवेक्षणादिकाले तेन विदितेनेति ॥

भा०–अन्यथा ह्यनिबद्धमङ्गोपाङ्गशः समुद्रप्रतरणवद् दुरध्यवसानं[2] स्यात्। एतेन पूर्वाणि वस्तूनि प्राभृतानि प्राभृतप्राभृतानि अध्ययनान्युद्देशाश्च व्याख्याताः॥

टी०–अन्यथेत्यादि। अन्यथेति भेदेन रचनाया अभावे हि यस्मादनिबद्धमरचितं, कथमिति चेत्, अङ्गोपाङ्गशः, अङ्गानि आचाराङ्गादीनि, उपाङ्गानि राजप्रसेनकीयौपपातिकादीनि, ताभ्यामङ्गोपाङ्गाभ्यां परिमितविशिष्टार्थाभिधायिभ्यामङ्गोपाङ्गशः, अल्पार्थाच्छस्। समुद्रस्य प्रतरणम्–उत्तरणं तेन समुद्रप्रतरणेन तुल्यं वर्तते समुद्रप्रतरणवत्, दुरध्यवसानं स्यादिति। दुःखेनाध्यवसीयते दुरध्यवसानम्। यावदेतदुक्तं भवति–यद्येतच्छ्रुतज्ञानमङ्गोपाङ्गादिभेदेन न रच्येत एवं सत्यर्थानन्त्याद् ग्रन्थस्य[3] चातिबहुत्वाद् दुःखेन शिष्यस्तत्र रतिं बध्नीयात्। यथा महार्णवं पश्यतः पुंसो न भवति चेतोवृत्तिर्बाहुभ्यां प्रतरामीति, प्रतरणप्रवृत्तोऽपि चान्तराल एव रसभङ्गं प्रतिपद्यते, एवमिहापि यदा पुनरङ्गोपाङ्गादिकल्पनया रचनया प्रविभक्तो भवति स महान् ग्रन्थराशिस्तदाऽदभ्रनदीतडागतरणवत् सुगमो भविष्यतीत्यतोऽङ्गोपाङ्गनानात्वमिति ॥ अथ पूर्वादिरचना किमर्था इत्येवमाशङ्क्येत ?। उच्यते–तत्रापि नान्यत् करणे प्रयोजनमस्ति, किन्त्वेतदेव, तदाह–एतेनेत्यादि। एतेनाङ्गोपाङ्गभेदप्रयोजनेन सुखग्रहणादिना पूर्वाणि दृष्टिपातान्तःपातीनि पूर्वं प्रणयनात्, वस्तूनि पूर्वस्यैवांशोऽल्पः वस्तुनः प्राभृतमल्पतरं, प्राभृतात् प्राभृतप्राभृतमल्पतरं, ततोऽध्ययनं ग्रन्थतोऽल्पतरं, तत उद्देशकोऽल्पतर इति। व्याख्यातानि[4]ति। सुखग्रहणादि यदेवाङ्गोपाङ्गादिकरणे फलं तदेवात्रापीति ॥

भा०––अत्राह–मतिश्रुतयोस्तुल्यविषयत्वं, वक्ष्यति द्रव्येष्वसर्वपर्यायेषु (१–२७) इति। तस्मादेकत्वमेवास्त्विति। अत्रोच्यते––

टी०––सम्प्रत्येवं मन्यते परः–श्रुतज्ञानस्य द्विविधादिकरणे सूक्तमनेन प्रयोजनं, यदुक्तं मया–कः पुनर्मतिज्ञानश्रुतज्ञानयोर्विशेष इति, तत्रानेन सांप्रतार्थग्राहि मतिज्ञानं त्रिकालविषयं तु श्रुतज्ञानमित्ययं विशेषो दर्शितः, तत्रैतावताऽप्यपरितुष्यन् विषयकृतं च साम्यमुभयोरस्तीति मन्यमानः अत्रावसरे ब्रवीति–**मतिश्रुतयो**रुक्तस्वरूपयोस्तुल्यविषयत्वमभिजग्राह, नासावाचक्ष्यते[5] इहैवोत्तरत्र तस्य वक्ष्यमाणस्य सूत्रस्यैकदेशमुपन्यस्यति–**द्रव्येष्वसर्वपर्यायेषु** इति ॥ सर्वेषु धर्मादिद्रव्येष्वसर्वपर्यायेषु मतिश्रुतयोः प्रवृत्तिर्निबन्ध इति। **तस्माद्**–विषयादेकरूपात् **एकत्वमेव** मतिश्रुतयोर्भवतु, न भेद इति, **अत्रोच्यते––**

---

१ 'गृहीत्वा' इति ख–पाठः। २ 'दुरध्यवसेयं' इति ख–पाठः। ३ 'रूपस्य' इति ख–पाठः। ४ 'व्याख्याता इति' इति प्रतिभाति। ५ 'तत्रैवापरितुष्यन्' इति क–ख–पाठः। ६ 'वाचष्टे' इति प्रतिभाति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—उक्तमेतत् साम्प्रतकालविषयं मतिज्ञानं, श्रुतज्ञानं तु त्रिकालविषयं, विशुद्धतरं च। किंचान्यत्। मतिज्ञानमिन्द्रियानिन्द्रियनिमित्तम्, आत्मने ज्ञस्वाभाव्यात् पारिणामिकं, श्रुतज्ञानं तु तत्पूर्वकमाप्तोपदेशाद् भवतीति ॥ २० ॥

श्रुतस्य शुद्धता, अपारिणामिकता च।

अत्राह—उक्तं श्रुतज्ञानम्। अथावधिज्ञानं किमिति। अत्रोच्यते—

टी०—उक्तमेतदिति भदन्तप्रयोजनं पुरस्तात्, तदेवोद्घटयति—वर्तमानकालविषयं—वर्तमानमर्थमालम्बते **मतिज्ञानम्**, श्रुतज्ञानं पुनस्त्रिकालविषयं—त्रैकालिकमर्थमालम्बते, **विशुद्धतरं च**, व्यवहि विप्रकृष्टानेकसूक्ष्माद्यर्थग्राहित्वाद् विशुद्धतरमित्युच्यते, **किंचान्यदिति**। तथा अयमपरस्तयोरवशेषः—**मतिज्ञानमिन्द्रियाणि**—स्पर्शनादीनि, **अनिन्द्रियं**—मन ओघज्ञानं च **निमित्तमुररीकृत्य** प्रवर्तते, **आत्मनो**—जीवस्य **ज्ञस्वाभाव्यादिति**। जानातीति ज्ञः, ज्ञत्वमेव स्वाभाव्यं ज्ञस्वाभाव्यमात्मरूपता, तस्मात् ज्ञस्वाभाव्यादिति। **पारिणामिकमिति** सर्वकालवर्ति, न कदाचित् संसारे पर्यटत एतद् भ्रष्टम्, यतो निगोदजीवानामपि 'अक्षरस्यानन्तभागो नित्योद्घाट' इत्यागमः अतः पारिणामिकम्। **श्रुतज्ञानं पुनर्नैवं** सर्वदा जीवस्य भवति, यतस्तत्पूर्वकम्, मतिज्ञाने सति भवति नासतीत्यर्थः। तत्पूर्वकस्वेऽपि च सत्युपदेशमपेक्षते, यत **आप्तोपदेशाद् भवतीति**, आप्ताः—रागादिविवर्जिताः अर्हदादयः तेभ्य **उपदेशो**—वचनं (तस्मात्), तद्वचनमपेक्ष्य ग्रन्थानुसारि श्रुतज्ञानमुदेतीत्यर्थः। तस्मादेकं नित्यमपरं चानित्यमिति स्थापितम् ॥ २० ॥

अत्रावसरे चोदक आह—प्रतिपादितं श्रुतज्ञानं भवद्भिः, अस्मादनन्तरं यदवधिज्ञानं पुरस्ताच्चिरदिक्षद् भवान् (**किमिति**) किंलक्षणं किंस्वरूपं तदित्याह—

सूत्रम्—द्विविधोऽवधिः ॥ १—२१ ॥

टी०—द्विविधोऽवधिः द्वे विधे—द्वौ भेदौ यस्य स द्विविधः। तावेव द्वौ भेदौ दर्शयति—

अवधेर्भेदौ

भा०—**भवप्रत्ययः, क्षयोपशमनिमित्तश्च** ॥ २१ ॥

टी०—**भवप्रत्यय** इत्यादिना ॥ ननु च लक्षणे पृष्टे भेदकथनमन्याय्यम्, आम्रप्रश्ने कोविदारकथनवदप्रस्तावापास्तमिति?। उच्यते—तदेव लक्षणं भेदद्वयकथनेन निरूप्यते इति न किञ्चिद् दुष्यति, भवेन—देवनारकाख्येन तल्लक्ष्यतेऽतो भवो लक्षणं ज्ञानं पुनर्लक्ष्यं भवतीति, तथा क्षयोपशमो लक्षणं ज्ञानं तु लक्ष्यम्। एतदुक्तं भवति—भवक्षयोपशमाभ्यां लक्ष्यमाणो द्विविधोऽवधिरिति नान्यत् किंचन कथ्यते, भवन्ति—वर्तन्ते कर्म(वश)वर्तिनो जन्तव इत्यस्मिन् भवो देवात्मतया यत्र स्थाने शरीरमाददते जीवाः स भवः नारकात्मतया च, प्रत्ययो निमित्तं कारणमिति, भवः प्रत्ययो यस्य स **भवप्रत्ययः**। अवश्यं ह्युत्पन्नमात्रस्यैव देवस्य नारकस्य वा सोऽवधिरुद्भवति, एतावता स भवप्रत्यय इत्यभिधीयते, तद्भावे भावात् तद-

१ 'कियदस्यानन्तरमुद्दिष्टमिति' इति **क-ख**-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावे चाभावादिति । मुख्यं तु कारणं तस्याप्यवधेः क्षयोपशम एव, न ह्यवधिज्ञानदर्शनावरणीयस्य कर्मणः क्षयोपशममपहाय देवनारकाणामवधेरुत्पत्तिरस्तीति, तस्यैव तु क्षयोपशमस्य स भवो निमित्ततां बिभर्ति, कारणत्वात्, देवनारकावधिर्निमित्तं, तस्य कारणं क्षयोपशमः, क्षयोपशमस्य कारणं भव इति । अशुद्धनयमतेन च कारणकारणमपि कारणं भण्यते । एवं भवस्य प्रत्ययता क्षयोपशमनिमित्तता[1] चेति, यदा अवधिज्ञानदर्शनावरणीयकर्मणां क्षयः-परिशाटः संजातो भवत्युदितानामनुदितानां चोपशमः-उदयविघातलक्षणः संवृत्तो भवति स उपशमस्ताभ्यां क्षयोपशमाभ्यां कारणभूताभ्यां य उदेति स **क्षयोपशमनिमित्त** इति मनुष्याणां तिरश्चां चेति ॥ २१ ॥

सूत्रम्-तत्र भवप्रत्ययो नारकदेवानाम् ॥ १-२२ ॥

टी०—तत्रेति तयोरुद्घट्टितयोर्द्वयोराद्यस्तावदुच्यते, तमाह-**भवप्रत्ययोऽवधिः नारकदेवानाम्** । नारकदेवानामित्यनुभवयवं विवृणोति—

भा०-नारकाणां देवानां च यथास्वं भवप्रत्ययमवधिज्ञानं भवति । भवप्रत्ययं भवहेतुकं भवनिमित्तमित्यर्थः । तेषां हि भवोत्पत्तिरेव तस्य हेतुर्भवति, पक्षिणामाकाशगमनवत्, न शिक्षा न तप इति ॥ २२ ॥

देवनारकयोरवधिः भवहेतुकः

टी०—**नारकाणामित्यादिना** । नारकाः शर्करासन्निविष्टोष्ट्रिकाकृतयः तेषु भवाः अतिप्रकृष्टदुःखोपेताः प्राणिनो नारकाः, देवा भवनपत्यादयः शुभकर्मभुजः तेषाम् । **यथास्वमिति** । यस्य यस्यात्मीयं यद्यदित्यर्थः । तद् यथा-रत्नप्रभापृथिवीनरकनिवासिनां ये सर्वोपरि तेषां अन्याद्दशम्, ये तु तेभ्योऽधस्तात् तेषां तस्यामेवावनावन्याद्दक् प्रस्तरापेक्षयेति । एवं सर्वपृथिवीनारकाणां यथास्वमित्येतन्नेयम् । देवानामपि यद् यस्य सम्भवति तच्च यथास्वमिति विज्ञेयम्, **भवप्रत्ययं**-भवकारणं अधोऽधो विस्तृतविषयमवधिज्ञानं भवति । प्रत्ययशब्दश्च विज्ञाने प्रसिद्ध इत्यतोऽर्थान्तरवृत्तितां दर्शयति-**भवप्रत्ययं भवहेतुकं** भवति । **भवनिमित्तमिति**, भवः प्रत्ययो-हेतुर्निमित्तमस्य तद्भवप्रत्ययमिति ॥ ननु च क्षयोपशमनिमित्ततां ज्ञानाज्ञानादिसूत्रे कथयिष्यति, भवावधेः कथमौदयिको भवोऽस्य निमित्तमिति ? । उच्यते-तस्मिन्नेव क्षयोपशमलब्धेरवश्यंभावादित्युक्तं किं विस्मार्यते भवता ?, एतदाह-**तेषामित्यादिना** । तेषां-नारकदेवानां यस्मान्नारकदेवभवोत्पत्तिलाभ एवं तस्य अवधिज्ञानस्य हेतुः-कारणं भवतीति । भवोत्पत्तिरेवेति च नियम एव दृश्यो विद्यमानमपि क्षयोपशममनङ्गीकृत्य यदेव क्षयोपशमस्य कारणमसाधारणं तत्रैवादरमादधान एवमुक्तवान्-भवोत्पत्तिरेवेति, न पुनर्भव एवास्य निमित्तमिति, क्षयोपशमस्याप्याश्रितत्वादिति । यथा वाऽन्यत्रापि भव एव केवलो निमित्तं भवति कस्यचित् कार्यविशेषस्य तथा दर्शयति-**पक्षिणामित्यादिना** । **पक्षिणां**-मयूरशुकसारिकादीनां यथा **आकाशगमनशक्तिः** प्रादुर्भवति

---

१ 'क्षयोपशमनिमित्तताश्चेति' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिक्षां अन्योपदेशरूपां **तपश्च** अनशनादिरूपमन्तरेण तद्वन्नारकदेवानां शिक्षां तपश्चान्तरेण तदवधिज्ञानं प्रादुरस्तीति ॥ २२ ॥

द्विविधोऽवधिरित्युक्तम्, तत्रैकं भेदं प्रतिपाद्य द्वितीयभेदं दर्शयन्नाह-**यथोक्तमित्यादि**। अथवा यथा देवनारकावधिर्भवं क्षयोपशमं चोभयमपेक्षते एवं किं क्षयोपशमोऽपि अवश्यं मनुष्यादिभवे प्राप्ते भवत्येव उत नेति ?। उच्यते-न तत्र भवः सन्नपि कारणतयाऽभ्युपेयते, तद्भावेऽप्यभावादवधेः, किंतु क्षयोपशम एव प्राधान्येन निरूप्यते—

सूत्रम्—यथोक्तनिमित्तः षड्विकल्पः शेषाणाम् ॥ १-२३ ॥

नरतिरश्चां षड्विधोऽवधिः

टी०—यथोक्तनिमित्त इत्यादिना। यथा-येन प्रकारेण **उक्तं**-उदितं **निमित्तं**-हेतुरस्य स **यथोक्तनिमित्तः** ॥ ननु भवोऽपि उदितं निमित्तं तस्येत्याशङ्क्य स्वयमेनं यथोक्तं निमित्तशब्दमुच्चार्यार्थं कथयति—

भा०—यथोक्तनिमित्तः, क्षयोपशमनिमित्त इत्यर्थः। तदेतदवधिज्ञानं क्षयोपशमनिमित्तं षड्विधं भवति। शेषाणामिति नारकदेवेभ्यः शेषाणां तिर्यग्योनिजानां मनुष्याणां च। अवधिज्ञानावरणीयस्य कर्मणः क्षयोपशमाभ्यां भवति षड्विधम्। तद् यथा—

टी०—यथोक्तनिमित्त इति। क उक्त एवं बुद्धिर्भवेत् ?। उच्यते-एवं क्षयोपशमनिमित्त इत्यर्थः, क्षयश्चोपशमश्च क्षयोपशमौ तौ निमित्तमस्य अत एवमभिधीयते क्षयोपशमनिमित्त इति, यथा सम्यग्दर्शनादि क्षयोपशमनिमित्तं तद्वदेष इति। **षडिति** सङ्ख्येयप्रधानसङ्ख्याभिधायी, **विकल्प** इत्यनेकरूपं यत् कल्पनं यावत् स्थानै रूपैरित्यर्थः। षड् विकल्पा यस्य स षड्विकल्प इत्यवधिसम्बन्धे षड्विकल्पोऽवधिः पुल्लिङ्गः। यदा त्ववधिशब्दः प्रकृतस्य ज्ञानस्य विशेषणं भवति तदा नपुंसकलिङ्गता षड्विधमिति। एतदाह-**तदेतदित्यादि**। तदिति पुरस्ताद् यदुक्तं, एतदिति भवतः प्रत्यक्षं, हृदि विपरिवर्तमानत्वात्, **अवधिज्ञानं** क्षयोपशमजं, नेतरत्, **षड्विधं भवति**, षड्विधक्षयोपशमसद्भावादित्यर्थः। केषां षोढा ? अत आह-**शेषाणाम्**। अस्य चार्थं विवृणोति-**शेषाणामित्यादिना**। शेषाणामुपर्युक्तवर्जितानाम्, ते के चोपर्युक्ताः ? देवनारकाः, तेभ्यो देवनारकेभ्यः शेषाणाम्, तद्वर्जाश्च नान्ये तिर्यङ्मनुष्यान् अन्तरेण सन्तीत्यत आह-**तिर्यग्योनिजानां मनुष्याणां च**, तिरश्चां-गवादीनां योनिः-उत्पत्तिस्थानं गर्भादि तत्र जन्यन्त इति तिर्यग्योनिजाः पञ्चेन्द्रियाः पर्याप्ताः संज्ञिनो ग्राह्याः, तेषामेव तेन योगात्, असंज्ञिपञ्चेन्द्रियादीनां तु तदभावः, अतस्तेषां, मनुष्याणां च गर्भजादिविशिष्टानां, न तु संमूर्च्छजानामिति। कथं पुनरेकं सत् षड्विधमिति व्यपदिश्यते ?। आह-उपाधिभेदात्। स चोपाधिः क्षयोपशमोऽनेकरूपः ज्ञानावरणीयकर्मण इत्येतद् दर्शयति-**ज्ञानमवधिस्तस्यावरणीयम्**-आच्छादकं भास्करस्येवाभ्रादि तस्य ज्ञानावरणीयस्य कालान्तरकृतस्य **कर्मणः क्षयोपशमाभ्यां** उक्तस्वरूपाभ्यां **षड्विधं भवति,**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विवचनं चात्मात् क्षयोपशमाभ्यामित्येतत् क्रियते–यत उभावपि तस्य समुदितौ सन्तौ निमित्तं भवतः, नैकैक इति। यतो न क्षायिकं किञ्चिदवधिज्ञानं, नाप्यौपशमिकं सिद्धान्ते पठितं, निमित्तं तूक्तम्। तत् षड्विधं यैः प्रकारैर्व्यवस्थितं तथोपन्यस्यति—

भा०—अनानुगामिकं, आनुगामिकं, हीयमानकं, वर्धमानकं, अनवस्थितं, अवस्थितमिति। तत्रानानुगामिकं यत्र क्षेत्रे स्थितस्योत्पन्नं ततः प्रच्युतस्य प्रतिपतति, प्रश्नादेशपुरुषज्ञानवत्॥

अवधेरनानुगामिकादिका भेदाः

टी०—अनानुगामिकमित्यादिना। उपन्यस्य चार्थं कथयति–तत्र तेषु षट्सु अनानुगामिकं अनुगच्छत्यवश्यमनुगामि तदेवानुगामिकमाङ्पूर्वम्, अनुगमप्रयोजनं वा आनुगामिकं, तस्य प्रतिषेधोऽनानुगामिकमिति। अर्थमस्य भावयति–यत्रेत्यादिना। यत्र क्षेत्रे प्रतिश्रयस्थानादौ स्थितस्येति कायोत्सर्गक्रियादिपरिणतस्य उत्पन्नम्––उद्भूतं भवति तेन चोत्पन्नेन यावत् तस्मात् स्थानान्न निर्याति तावज्जानातीत्यर्थः। ततोऽपक्रान्तस्य स्थानान्तरवर्तिनः प्रतिपतति–नश्यति। कथमिव? उच्यते–प्रश्नादेशपुरुषज्ञानवत्। प्रश्नः-पृच्छनं जीवधातुमूलानां तं प्रश्नमादिशतीति प्रश्नादेशः, प्रश्नादेशश्चासौ पुरुषश्चेति प्रश्नादेश-पुरुषः, तस्य ज्ञानं तेन तुल्यमेतद् द्रष्टव्यम्, पुरुषप्रश्नादेशज्ञानवदित्येवं गमकत्वम्, अथवा प्रश्नादेशः—प्रधानपुरुषस्तन्निष्ठः—तत्परायणस्तस्य ज्ञानं तद्वदिति। का पुनर्भावना? यथा नैमित्तिकः कश्चिदादिशन् कस्मिंश्चिदेव स्थाने शक्नोति संवादयितुं न सर्वत्र पृच्छ्यमानमर्थम्, एवं तदप्यवधिज्ञानं यत्र स्थितस्योपजातं तत्रस्थ एवोपलभते तेन नान्यत्रेति॥

भा०—आनुगामिकं यत्र क्वचिदुत्पन्नं क्षेत्रान्तरगतस्यापि न प्रतिपतति, भास्करप्रकाशवत् घटरक्तभाववच्च॥

टी०–आनुगामिकमेतद् विपरीतमिति। यत्र क्वचिदाश्रयादावुत्पन्नं तस्मात् क्षेत्रान्तर-गतस्यापि न प्रच्यवते, भास्करप्रकाशवत्, यथाऽऽदित्यमण्डलभवः प्रकाशः प्राच्यां दिशि प्रकाशनीयं प्राचीकशत् तथा प्रतीचीमुखचुम्बिनोऽपि सवितुस्तावत् तमवकाशमुद्द्योतयति प्रकाशो, मनागपि न क्षीयते, कुम्भरक्ततावद् वा भावनीयम्, नहि घटस्यापाकादुद्धृतस्य तडाकादिना तस्य रक्तता भ्रंशमश्नुते तद्वदानुगामिकमवधिज्ञानमिति। पूर्वदृष्टान्ते च परोक्षः प्रकाशस्तावत्त्वेन क्षेत्रान्तरप्राप्तस्य सवितुः संदिग्धः अतः प्रत्यक्षं घटरक्तता-दृष्टान्तमुपादिताचार्यः॥

भा०—हीयमानकम्, असङ्ख्येयेषु द्वीपेषु समुद्रेषु पृथिवीषु विमानेषु तिर्यगूर्ध्वमधो वा यदुत्पन्नं क्रमशः संक्षिप्यमाणं प्रतिपतति आ अङ्गुलासङ्ख्येय-भागात्, प्रतिपतत्येव वा परिच्छिन्नेन्धनोपादानसन्तत्यग्निशिखावत्॥

टी०—हीयमानकं हीयते क्रमेणाल्पीभवति यत् तद्धीयमानकम्, असङ्ख्येयेषु अति-क्रान्तशीर्षप्रहेलिकागणितेष्वितियावत्। द्वीपा जम्बूद्वीपादयः समुद्रा लवणादयः तेषु पृथि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वीषु रत्नप्रभादिकासु, विमानेषु ज्योतिर्विमानादिषु, तिर्यग् द्वीपसमुद्रेषु, ऊर्ध्वं विमानेषु, अधः पृथिवीषु यदवधिज्ञानमुत्पन्नं भवति ततः क्रमशः परिसंक्षिप्यमाणं-हीयमानं प्रतिपतति। यस्माद् यद्वीपानपश्यत् तत् तेषामेकं क्रोशं पुनर्न प्रेक्षते शेषं पश्यति, पुनरर्धयोजनं न पश्यत्येवं हीयमानं तावद्धीयते यावदङ्गुलासङ्ख्येयभागः शेषः, एतदाह-आ अङ्गुलस्यासंख्येयभागात् अङ्गुलपरिमाणस्य क्षेत्रस्य असंख्येयानि खण्डानि कृतस्य एकस्मिन् असंख्येयभागे यावन्ति द्रव्याणि समवस्थितानि तानि[1] पश्यतीत्यर्थः। ततः कदाचिदवतिष्ठते कदाचित् प्रतिपतत्येव, तान्यपि न पश्यतीत्यर्थः। अङ्गुलशब्दश्च परिभाषितार्थो द्रष्टव्यः, अन्यथाऽङ्गुलासंख्येयभागादिति भवितव्यम्, अन्येषां त्वेवंविधमेव भाष्यमिति। कथं हीयत इति चेद्? दृष्टान्तमुपन्यस्यति—परिच्छिन्नेत्यादि। परितः—सर्वासु दिक्षु छिन्ना इन्धनपलालादि तस्योपादानं-प्रक्षेपः तस्य सन्ततिर्[2]निरन्तर्येण प्रक्षेपः, सा विशेष्यते परिच्छिन्नेति, नातः परमिन्धनप्रक्षेपः अतः परिच्छिन्ना इन्धनोपादानसन्ततिः, एतदुभयं पुनरपि शिखाया विशेषणम्, परिच्छिन्ना इन्धनोपादानसन्ततिर्यस्यामग्निशिखायां सा परिच्छिन्नेन्धनोपादानसन्ततिः, अग्नेः शिखा अग्निशिखा, परिच्छिन्नेन्धनोपादानसन्तत्यग्निशिखा तया तुल्यमेतद्धीयमानमवधिज्ञानं, यथाऽपनीतेन्धनाऽग्निज्वाला नाशमाशु प्रतिपद्यते तद्वदेतदपीति॥

भा०-वर्धमानकं यदङ्गुलस्यासंख्येयभागादिषूत्पन्नं वर्धते आसर्वलोकात्। अधरोत्तरारणिनिर्मथनोत्पन्नोपात्तशुष्कोपचीयमानाधीयमानेन्धनराश्यग्निवत्॥

टी०-वर्धमानकं यदङ्गुलासङ्ख्येयभागादिषु। अङ्गुलस्यासंख्येयभागमात्रे क्षेत्रे ततोऽङ्गुलमात्रे ततोऽरत्निमात्रे इत्यादिषूत्पन्नं तावद् वर्धते यावत् सर्वलोको धर्माधर्मद्रव्यद्वयपरिच्छिन्नो व्याप्तो भवति तदा आसर्वलोकात्, कथमिव वर्धते अत आह-अधरोत्तरेत्यादि। अधरः-अधोवर्ती उत्तरः-उपरिवर्ती तावेवारणी ताभ्यामधरोत्तरारणिभ्यां निर्मथनं-संघर्षणं तेन निष्पन्न-उद्भूतः, तदेवमुत्पन्नोऽवधिर्वृद्धिं गच्छति यथा तथाह—उपात्तेत्यादिना। उपात्तं प्रक्षिप्तं शुष्कमार्द्रं न भवति करीषादि तेनोपात्तेन शुष्केण उपचीयमानः वृद्धिं गच्छन्नित्यर्थः, आधीयमानः प्रक्षिप्यमाणोऽन्योऽपि पुनः पुनः इन्धनानां पलालादीनां राशिः-समूहो यत्राग्नौ सः अधरोत्तरारणिनिर्मथनोत्पन्नोपात्तशुष्कोपचीयमानाधीयमानेन्धनराश्यग्निः, तेन तुल्यमेतदिति, यथाऽग्निः प्रयत्नादुपजातः सन् पुनरिन्धनलाभाद् वृद्धिमुपगच्छत्येवं परमशुभाध्यवसायलाभादसौ पूर्वोत्पन्नो वर्धत इत्यर्थः॥

भा०—अनवस्थितं हीयते वर्धते वर्धते हीयते च। प्रतिपतति चोत्पद्यते चेति। पुनः पुनरूर्मिवत्॥

---

१ 'तानि तानि' इति ग-टी-पाठः। २ '० निर्मथनोत्पन्नोपात्त०' इति घ-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—अनवस्थितमिति । नावतिष्ठते क्वचिदेकस्मिन् वस्तुनि शुभाशुभानेकसंयमस्थानलाभात्, यत आह–हीयते योजनं दृष्ट्वा तस्यैवार्धमवगच्छति तस्याप्यर्धमेवादि, वर्धते चार्धक्रोशं दृष्ट्वा क्रोशमवैत्यर्धयोजनं योजनमेवमादि, कदाचिदुभयीमवस्थामनुभवति वर्धते हीयते च, तस्यैव क्रोशस्यैकस्यां दिश्यपरक्रोशो वृद्धिः अन्यस्यां तस्य क्रोशस्यार्धं हीनमिति । अथवा प्रतिपतति चोत्पद्यते चेति क्वचित् कालान्तर उदितं पुनर्नश्यति पुनश्चोदेति, क्षयोपशमवैचित्र्यात्, पुनः पुनर्नाशोत्पादस्वभावमूर्मिवत् यथा महति सरसि स्वच्छवारिभारिणि पूर्णे प्रबलानिलवेगविक्षिप्यमाणजलेऽदभ्रोर्मयः समुपजाताः समासादितरोधसः[1] शमं शनैः शनैर्भजन्ते, पुनश्चाभिघातविशेषात् प्रादुःष्यन्ति, अतो यथोर्मयोऽनवस्थिता एवमवधिज्ञानमपीति ॥

भा०—अवस्थितं यावति क्षेत्रे उत्पन्नं भवति ततो न प्रतिपतत्याकेवलप्राप्तेरवतिष्ठते, आभवक्षयाद् वा जात्यन्तरस्थायि भवति लिङ्गवत् ॥ २३ ॥

उक्तमवधिज्ञानम् । मनःपर्यायज्ञानं वक्ष्यामः ॥

टी०—अवस्थितमिति । अवतिष्ठते स्म अवस्थितं, यया मात्रयोत्पन्नं तां मात्रां न जहातीतियावत्, एतदाह–यावति क्षेत्र इत्यादि । यावति यत्परिमाणे क्षेत्रेऽङ्गुलासङ्ख्येयभागादावुत्पन्नमासर्वलोकात् तत इति तस्मात् क्षेत्रान्न प्रतिपतति–न नश्यति, सर्वकालमास्ते, कुतोऽवधेर्यावदास्त इति[2] उच्यते–आकेवलप्राप्तेः, आङ्मर्यादायाम् । केवलज्ञानं तस्य प्राप्तिः–लाभः आकेवलप्राप्तेर्यावत् केवलज्ञानं न प्राप्नोति, प्राप्ते तु केवले छाद्मस्थिकं ज्ञानं व्यावर्तते । अथवा मरणात् तदाह–आभवक्षयात्, भवो–मनुष्यादिजन्म यावत् तत्र जीवति तावद् भवति ततः परं न, तस्माद् भवक्षयात्, ततः परं नश्यति । अथवा जात्यन्तरमपि गच्छन्तं जीवं न मुञ्चति तदवधिज्ञानं, तेनान्वित एव गच्छति, लिङ्गवज्जात्यन्तरं (जात्यन्त)रावस्थायि वा भवतीत्येतदाह–जातेरन्या जातिः जात्यन्तरं तत्रावतिष्ठति तच्छीलं च, कथमिव तदादाय गच्छति ? आह–लिङ्गवत् पुरुषवेदादि लिङ्गं त्रिधा तेन तुल्यं वर्तत इति लिङ्गवत्, यथा इह जन्मन्युपादाय पुरुषवेदं जन्तुर्जात्यन्तरमाधावत्येवमवधिमपि ॥ ॥ १–२३ ॥

प्रस्तुतवस्तुपरिसमाप्तिं सूचयन्युक्तमवधिज्ञानमित्यनेन उक्तं लक्षणतो विधानतश्च अवधिज्ञानं न पुनर्वाच्यमिति, तदनन्तरानुसारि मनःपर्यायज्ञानं वक्ष्यामः—

सूत्रम्–ऋजुविपुलमती मनःपर्यायः ॥ १–२४ ॥

मनःपर्यायस्य भेदौ

भा०—मनःपर्यायज्ञानं द्विविधम्–ऋजुमतिमनःपर्यायज्ञानम्, विपुलमतिमनःपर्यायज्ञानं च ॥ २४ ॥

अत्राह–कोऽनयोः प्रतिविशेष इति ? । अत्रोच्यते—

---

१ ' रोधस्सु ' इति ख–पाठः । २ चिह्नितोऽयं ख–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—ऋजुविपुलेत्यादि । ऋजुश्च विपुला च ऋजुविपुले एते च मती ऋजुविपुलमती, ऋज्वी मतिर्विपुला च मतिरिति ॥ ननु च मतिरित्यनेन ज्ञानमभिधीयते, ज्ञानस्य च ऋजुत्वं विपुलत्वं चायुक्तं, 'निर्गुणा गुणा' (अ० ५, सू० ४०) इति वक्ष्यमाणत्वात्, मूर्तेषु चैष व्यवहारः, ऋज्वी विपुला चाङ्गुलिरिति, ज्ञाने त्वमूर्ते ऋजुत्वविपुलत्वकल्पना न साधीयसीति । उच्यते—ऋजुता विपुलता वा ग्राह्यविषया समस्ति, तया ज्ञानस्योपदेशो भविष्यति, या मतिः सामान्यं गृह्णाति सा ऋज्वीत्युपदिश्यते, या पुनर्विशेषग्राहिणी सा विपुलेत्युपदिश्यते, ऋजु सामान्यमेकरूपत्वात्, विशेषास्तु विविक्ता बहवः । यदि सामान्यग्राहिणी ऋजुमतिर्मनःपर्यायज्ञानं प्राप्तं तर्हि मनःपर्यायदर्शनमपि, यस्मात् सामान्यग्राहि दर्शनमिष्यते, न चाराधितराद्धान्तैर्मनःपर्यायदर्शनमध्यगायि, आह—यद्यप्येवमुच्यते सामान्यग्राहिणी ऋजुमतिरिति तथाऽप्यसौ सामान्यभेदरूपमेव परिच्छिनत्ति, यतो बहून् भेदान् न शक्नोति परिच्छेत्तुम्, अतः सामान्यग्राहिणी, परमार्थतस्त्वसौ विशेषमेकं द्वौ त्रीन् वा गृह्णन्ती प्रवर्तते, अतः स्तोकाभिधायी सामान्यशब्दोऽत्र, या तु विशेषान् बहून् गृह्णाति सा विपुलमतिः । केचित् तु मन्यन्ते प्रज्ञापनायां मनःपर्यायज्ञाने दर्शनता पठ्यते, तत्सम्भवे सामान्यग्राहिणी घटितपदा, अतः ऋजुमतिर्विपुलमतिश्च । किम् ? मनःपर्यायः, मन इति च मनोवर्गणा जीवेन मन्यमाना द्रव्यविशेषा उच्यन्ते, तस्य मनसः पर्यायाः—परिणामविशेषाः मनःपर्यायाः, मनसि वा पर्यायाः, तेषु मनःपर्यायेषु यज्ज्ञानं तन्मनःपर्यायज्ञानमिति । इह साधोः सकलप्रमादरहितस्य मनःपर्यायज्ञानावरणीयकर्मक्षयोपशमात् प्रतिविशिष्टं ज्ञानमुदयते, येन ज्ञानेन मनःपर्याप्तिभाजां प्राणिनां पञ्चेन्द्रियाणां मनुष्यलोकवर्तिनां मनसः पर्यायानालम्बते—जानाति मुख्यतः, ये तु चिन्त्यमानाः स्तम्भकुम्भादयस्ताननुमानेनावगच्छन्ति । कथम् ? उच्यते—अस्यैतानि मनोद्रव्याण्यनेनाकारेण परिणतानि लक्ष्यन्ते अतः स्तम्भादिश्चिन्तितः, तस्य परिणामस्य स्तम्भाद्यविनाभावात्, न पुनः साक्षाद् बहिर्द्रव्याणि जानीते इति, क्षयोपशमवैचित्र्यात्, कस्यचित् तदेवंविधं मनःपर्यायज्ञानं भवति येन सामान्यं घटमात्रं चिन्तितमवगच्छति तच्च ऋजुमतिर्मनःपर्यायज्ञानम् । अपरस्य तु तदावरणीयकर्मक्षयोपशमोत्कर्षापेक्षयैवंविधं भवति तद् विपुलमतिर्मनःपर्यायज्ञानम्, उभयमपीन्द्रियानिन्द्रियनिरपेक्षम्, घटमात्रावच्छेदि प्रथमम्, द्वितीयं तु पर्यायशतैर्मृण्मयरक्तशुक्लादिप्रमाणादिभिर्विचिन्तितं घटमवबुद्ध्यते, अत एव क्षयोपशमद्वैविध्यात्, प्रकृतेन च ज्ञानग्रहणेन मनःपर्यायं सम्बध्नन् भाष्यकृदाह—**मनःपर्यायज्ञानं द्विविधम्** । मनःपर्यायस्य तेषु वा ज्ञानं मनःपर्यायज्ञानं, द्वे विधे यस्य तद् द्विविधं, ते द्वे विधे दर्शयति—**ऋजुमतिर्मनःपर्यायज्ञानम्**, ऋजुमतिरेव मनःपर्यायज्ञानं, घटादिमात्रचिन्तितपरिज्ञानमिति, **विपुलमतिरेव मनःपर्यायज्ञानं**, प्रसङ्गतः पर्यायशतैः परिज्ञानमिति ॥ २४ ॥

ऋजुमति-विपुलमत्योः स्वरूपम्

एवं द्वैविध्ये दर्शिते चोदकोऽभिधत्ते—मनःपर्यायाणामुभयत्र दर्शनम् अतीन्द्रियत्वं चोभयोः ऋजुविपुलमत्योः समानम्, अतः किंकृतं नानात्वमिति प्रश्नयति—कोऽ-

१ 'सामान्यं' इति क-ख-ग-पाठः । २ 'शब्दार्थः' इति क-ख-ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नयोः प्रतिविशेषः ?। क इत्यसम्भावने, नैव कश्चित् सम्भाव्यते, अनयोरिति ऋजुविपुलमत्योः प्रतिविशेषः–स्वगतो भेद इति, उच्यते गुरुणा—

सूत्रम्—विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः ॥ १–२५ ॥

भा०—विशुद्धिकृतश्च अप्रतिपातकृतश्चानयोः प्रतिविशेषः । तद्यथा—

ऋजुविपुलमत्योर्विशेषः

ऋजुमतिमनःपर्यायज्ञानाद् विपुलमतिमनःपर्यायज्ञानं विशुद्धतरम् । किञ्चान्यत् ।

टी०–विशुद्ध्यप्रतीत्यादि । विशुद्धेः कारणात् तयोः ऋजुविपुलमत्योर्विशेषः अप्रतिपाताच्च,विशुद्ध्या–बहुतरपर्यायज्ञानरूपया कृतो-जनितः विशुद्धिकृतः,चशब्दः समुच्चये, अप्रतिपातेन–अच्यवनरूपेण कृतः अप्रतिपातकृतश्चानयोः–ऋजुविपुलमत्योः प्रतिविशेषो–नानात्वं बोद्धव्यम् । तत्र विशुद्धिकृतं तावद् भेदं दर्शयति–ऋजुमतिमनःपर्यायज्ञानात् सामान्यग्राहिणः विपुलमतिमनःपर्यायज्ञानं नानाविधविशेषग्राहि विशुद्धतरमिति,यद् द्रव्यं यावद्भिः पर्यायैरवच्छिनत्ति ऋजुमतिस्तदेव द्रव्यं बहुतरैः पर्यायैर्विपुलमतिरवगच्छति, यथा घटे चिन्तिते ऋजुमतिमनःपर्यायज्ञानेनैतावद् व्यज्ञायि–घटोऽनेन चिन्तितः, विपुलमतिमनःपर्यायज्ञानं पुनस्तमेव घटं पार्थिवत्वरक्तत्वप्रमाणादिभिर्बहुभिर्भेदैरवबुद्ध्यते, अतो विशुद्धतरमुच्यते । किञ्चान्यदिति भेदस्य उपपत्त्यन्तरसम्भावनाद्वारेण प्रयुज्यते, इहान्योऽपि नानात्वकार्यस्ति हेतुरिति, तमाह—

भा०—ऋजुमतिमनःपर्यायज्ञानं प्रतिपतत्यपि भूयः, विपुलमतिमनःपर्यायज्ञानं तु न प्रतिपततीति ॥ २५ ॥

अत्राह—अथावधिमनःपर्यायज्ञानयोः कः प्रतिविशेष इति?। अत्रोच्यते—

टी०—ऋजुमतिमनःपर्यायज्ञानं प्राप्तमप्यप्रमत्तसंयतेन प्रतिपतति–प्रच्यवते, अपिशब्दात् कदाचिन्न प्रतिपतत्यपि, भूयः–पुनः विपुलमतीत्यादि, यस्य पुनर्विपुलमतिमनःपर्यायज्ञानं समजनि तस्य नैव प्रतिपतत्या केवलप्राप्तेरिति ॥ २५ ॥

एवं भेदे ऋजुविपुलमत्योः प्रतिपादिते अवधेर्मनःपर्यायज्ञानस्य चातीन्द्रियत्वे समाने रूपिद्रव्यनिबन्धनत्वे च विशेषमपश्यन् ब्रूते–अथावधिमनःपर्यायज्ञानयोः कः प्रतिविशेष इति ?। स चैवं पूर्वपक्षवादी-चोदयति–कुतः प्रतिविशेष इति हेत्वभावं मन्यमानः, उत्तरपक्षवादी तु हेतून् विशुद्ध्यादीन् पश्यन्नेवमाह–अत्रोच्यते—

सूत्रम्–विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्याययोः ॥ १–२६ ॥

अवधिमनःपर्याययोर्विशेषः

भा०—विशुद्धिकृतः, क्षेत्रकृतः, स्वामिकृतः, विषयकृतश्चानयोर्विशेषो भवत्यवधिमनःपर्यायज्ञानयोः । तद्यथा—

टी०—विशुद्धीत्यादि । विशुद्धिः–बहुतरपर्यायपरिज्ञानकारणत्वं, क्षेत्रं–आकाशं दृश्यमानादृश्यमानरूप्यरूपिद्रव्याधारः, स्वामी-ज्ञानस्योत्पादयिता,विषयो-ज्ञानगम्यः पदार्थः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एभ्यो हेतुभ्योऽवधिमनःपर्यायज्ञानयोर्विशेषोऽवगन्तव्यः, पञ्चम्यर्थं च कृतशब्देनाचष्टे, विशुद्ध्या कृतो विशुद्धिकृतः क्षेत्रेण कृतः स्वामिना कृतः विषयेण कृतः विषयकृत इति। अनयोरिति अवधिमनःपर्यायज्ञानयोः प्रतिविशेषो-भेदोऽवधिमनःपर्यायज्ञानयोरिति, तद्यथा-एते यथा घटन्ते तथा कथ्यन्ते—

भा०-अवधिज्ञानात् मनःपर्यायज्ञानं विशुद्धतरम्। यावन्ति हि रूपीणि[1] द्रव्याण्यवधिज्ञानी जानीते तानि मनःपर्यायज्ञानी विशुद्धतराणि मनोगतानि जानीते। किंचान्यत्।

टी०—अवधिज्ञानादुक्तलक्षणात् मनःपर्यायज्ञानं विशुद्धतरम्, कथं? विशुद्धतरतां स्वयमेव भाष्यकृदाह-यावन्ति-यत्परिमाणानि नियमादनन्तानि, हिरेव इत्यस्यार्थे, यावन्त्येव, रूपमेषामस्ति रूपीणि, प्रदर्शनं चैतद्रूपरसगन्धस्पर्शशब्दवन्ति, द्रव्याणि गुणसङ्घातात्मकानि अवधिज्ञानी जानीते, पश्यति चेति द्रष्टव्यम्, तेषामवधिज्ञानेनोपलब्धानां रूपिद्रव्याणां यावन्ति मनःपर्यायज्ञानिनो विषयभूयमास्कन्दन्ति तान्यसौ मनःपर्यायज्ञानी विशुद्धतराणि-बहुतरपर्यायाणि जानीते इत्यर्थः। तान्यपि च मनोगतानीति-मनोव्यापारभाञ्जीत्यर्थः, असञ्चिन्त्यमानानि तु नैव जानीते साक्षात्। किञ्चान्यदिति, अयं चापरो भेदहेतुरिति॥

भा०—क्षेत्रकृतश्चानयोः प्रतिविशेषः। अवधिज्ञानमङ्गुलस्यासङ्ख्येयभागादिषूत्पन्नं भवत्यासर्वलोकात्, मनःपर्यायज्ञानं तु मानुषक्षेत्र[2] एव भवति, नान्यक्षेत्र इति॥ किंचान्यत्।

टी०—क्षेत्रकृतश्चानयोरवधिमनःपर्याययोः प्रतिविशेषो-भेदो द्रष्टव्यः, एतद् भावयति-अवधिज्ञानमङ्गुलेत्यादि। अङ्गुलस्यासङ्ख्येयानि खण्डानि कृतानि, तत्रैकस्मिन्नसङ्ख्येयभागमात्रे क्षेत्रे यावन्ति रूपिद्रव्याणि समवगाढानि सर्वस्तोकानि यः पश्यति, ततः स एव वर्धमानेन तेन बहूनि बहुतराणि च द्रव्याण्यवगच्छति यावत् सर्वलोकावस्थितानि रूपिद्रव्याणि पश्यति, शुभाध्यवसायविशेषादिति, एतदाह-अङ्गुलस्यासङ्ख्येयभागादिषूत्पन्नं भवत्यासर्वलोकादिति। मनःपर्यायज्ञानस्य तु नैतावत् क्षेत्रमस्ति, यतो मनःपर्यायज्ञानं मानुषेत्यादि, मानुषक्षेत्रे-अर्धतृतीयेषु द्वीपसमुद्रेष्वित्यर्थः, नान्यक्षेत्रे इति न वा शर्कराप्रभादिनरकेष्विति॥

भा०—स्वामिकृतश्चानयोः प्रतिविशेषः। अवधिज्ञानं संयतस्य, असंयतस्य, [संयतासंयतस्य च][4](वा) सर्वगतिषु भवति, मनःपर्यायज्ञानं तु मनुष्यसंयतस्यैव भवति, नान्यस्य॥ किंचान्यत्।

---

१ 'रूपाणि' इति घ-पाठः। २ 'मनोरहस्यगतानीव' इत्यपि ग-टी-पाठः। ३ 'मनुष्यक्षेत्रे' इति क-ख-पाठः। ४ 'वा' इति घ-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—स्वामिकृत इत्यादि । **अवधिज्ञानं संयतस्य**—साधोर्विरतस्येत्यर्थः । **असंयतस्य**—अविरतस्य, **वा**शब्दात् संयतासंयतस्य वा, **सर्वगतिषु** नारकादिकासु चतसृष्वपि भवेत्[1], यतो नारकादीनां सर्वेषामवधिज्ञानमुत्पद्यते, **मनःपर्यायज्ञानं पुनर्मनुष्यसंयतस्यैव भवति**, मनुष्यग्रहणात् नारकादिव्युदासः, संयतग्रहणात् मिथ्यादृष्ट्यादीनां प्रमत्तान्तानां षण्णां व्युदासः, एवकारेण नियमयति—मनुष्यसंयतस्यैव फलं नियमस्य दर्शयति—**नान्यस्येति**, देवादेर्नैतदुत्पद्यत इत्यर्थः ॥

भा०—विषयकृतश्चानयोः प्रतिविशेषः । रूपिद्रव्येष्वसर्वपर्यायेष्ववधेर्विषयनिबन्धो भवति । तदनन्तभागे मनःपर्यायस्येति ॥

टी०—विषयकृत इत्यादि। **रूपिषु** परमाणुद्रव्येषु, **असर्वपर्यायेष्विति** । सर्वे—सम्पूर्णाः पर्याया—उत्पादादयो येषां तानि सर्वपर्यायाणि न सर्वपर्यायाण्यसर्वपर्यायाणि तेषु, तानि हि रूपिद्रव्याण्यवधिज्ञानी सर्वाणि जानाति न तु तेषां सर्वान् पर्यायानिति, एकैकस्य तु परमाणोः कदाचिदसङ्ख्येयान् पर्यायान् जानाति कदाचित् सङ्ख्येयान्, जघन्येन चतुरो रूपरसगन्धस्पर्शानिति, न पुनरेकैकस्य परमाणोरनन्तान् ज्ञातुं प्रत्यलं स्यात् पर्यायानिति, यदि च सर्वानेव जानीयात् केवल्येवासौ स्यात्॥ "जे एगं जाणति से सव्वं जाणति"[3] इति [आचाराङ्गनामकात् (सू० १२२)] आगमात् ॥ अतोऽसर्वपर्यायेषु अवधेः—अवधिज्ञानस्य **विषयनिबन्धः**—विषयगोचर इति । मनःपर्यायज्ञानस्य तु रूपिद्रव्याणि न सर्वाणि विषयः, यतस्तेषामवधिज्ञानानां[4] द्रव्याणामनन्तभागीकृतानां य एकोऽनन्तभागस्तस्मिन् **मनःपर्यायज्ञानस्य** विषयनिबन्धः । तस्मादतीन्द्रियत्वे तुल्येऽपि विशुद्ध्यादेर्भेदोऽवधिमनःपर्याययोरिति ॥

केवलानभिधानकारणम्

भा०—अत्राह—उक्तं मनःपर्यायज्ञानम्। अथ केवलज्ञानं किमिति ?। अत्रोच्यते—केवलज्ञानं दशमेऽध्याये वक्ष्यते—मोहक्षयात् ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलमिति (१०-१) ॥ २६ ॥

अत्राह—एषां मतिज्ञानादीनां ज्ञानानां कः कस्य विषयनिबन्ध इति ?। अत्रोच्यते—

टी०—अत्रावकाशे ब्रवीति—प्रतिपादितं **मनःपर्यायज्ञानं**, तदनन्तरं केवलज्ञानमुद्दिष्टं, तत् किंस्वरूपमिति प्रश्नयति—**केवलज्ञानं किंस्वरूपमिति**। **उच्यते**—क्रमागतमपीह न भण्यते, यस्मात् केवलज्ञानस्योत्पत्तिः ज्ञानावरणीयादीनां घातिकर्मणामात्यन्तिकक्षयात्, स चात्यन्तिकक्षयः संवरेण प्राप्यते, संवरश्च नवमेऽध्याये वक्ष्यते, तत्समनन्तरं **केवलज्ञानं दशमेऽध्याये**ऽभिधास्यते, दशमाध्यायादिसूत्रं च तस्य प्रदेशकं[5] पठति—**मोहक्षयादित्यादि**। मोहनं-

---

१ 'भवति' इति ग-टी-पाठः । २ 'सूक्ष्मद्रव्याणि' इति ख-पाठः । ३ य एकं जानाति स सर्वं जानाति । ४ ' ० मवधिज्ञानज्ञातानां ' इति प्रतिभाति । ५ ' प्रदर्शकं ' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मोहः—मोहनीयं दर्शनमोहादिभेदमष्टाविंशतिविधं तस्य क्षयो—नाशस्तस्मात् मोहक्षयादात्यन्तिकात् **ज्ञानं**—मत्यादि, **दर्शनं**—चक्षुर्दर्शनादि, तयोर्ज्ञानदर्शनयोरावरणीयं—आच्छादकं, **अन्तरायं**—दानलब्ध्यादिविघाति, अत एषां च ज्ञानदर्शनावरणीयान्तरायाणां क्षयात्—शाटादात्यन्तिकात् केवलज्ञानं प्रादुरस्ति सकलद्रव्यभेदसंग्राहीति ॥ २६ ॥

एवं **मतिज्ञानादीनां** पञ्चानामपि ज्ञानानां स्वरूपेऽवधृते तस्य मत्यादेर्यो विषयस्तमजानन् पृच्छति-एषां पूर्वोदितानां मतिज्ञानादीनां **को विषयनिबन्धः** कस्य ज्ञानस्येति। **उच्यते**—

सूत्रम्—मतिश्रुतयोर्निबन्धः सर्वद्रव्येष्वसर्वपर्यायेषु ॥ १—२७ ॥

भा०—मतिज्ञानश्रुतज्ञानयोर्विषयनिबन्धो भवति सर्वद्रव्येष्वसर्वपर्यायेषु ।

मतिश्रुतयोर्निबन्धः

ताभ्यां हि सर्वाणि द्रव्याणि जानीते, न तु सर्वैः पर्यायैः ॥२७॥

टी०—मतिश्रुतयोर्निबन्ध इत्यादि। प्रकृतेन ज्ञानेन मतिश्रुते विशेषयन्नेवमुक्तवान्-**मतिज्ञानश्रुतज्ञानयोर्विषयनिबन्ध** इति। विषयव्यापारो—विषयगोचरो **भवती**ति, **सर्वद्रव्येषु** सर्वाणि च तानि द्रव्याणि च सर्वद्रव्याणि तेषु धर्माधर्माकाशपुद्गलजीवास्तिकायाख्येषु। **असर्वपर्यायेष्वि**ति सर्वे निरवशेषा उत्पादादयः पर्याया येषां तानि सर्वपर्यायाणि, न सर्वपर्यायाण्यसर्वपर्यायाणि तेषु। एतदेव भावयति—**ताभ्यां** हीत्यादि, **हि**—यस्मात् **ताभ्यां**—मतिश्रुताभ्यां **सर्वाणि द्रव्याणि**—धर्मादीनि जानाति, न तु तेषां सर्वान् पर्यायानुत्पादादीनिति। कथं पुनस्ताभ्यां सर्वद्रव्यविषयोऽवबोधः ?। मतिज्ञानी तावत् श्रुतज्ञानेनोपलब्धेष्वर्थेषु यदाऽक्षरपरिपाटीमन्तरेण स्वभ्यस्तविद्यो द्रव्याणि ध्यायति तदा मतिज्ञानविषयः सर्वद्रव्याणि, न तु सर्वान् पर्यायान्, अल्पकालत्वान्मनसश्चाशक्तेरिति, तथा श्रुतग्रन्थानुसारेण सर्वाणि धर्मादीनि जानाति, न तु तेषां सर्वपर्यायानिति ॥ २७ ॥

सम्प्रत्यवधिज्ञानस्य विषयनिबन्धनं कथयति—

सूत्रम्—रूपिष्ववधेः ॥ १—२८ ॥

भा०—रूपिष्वेव द्रव्येष्ववधिज्ञानस्य विषयनिबन्धो भवति, असर्वपर्यायेषु ।

अवधेर्विषयः

सुविशुद्धेनाप्यवधिज्ञानेन रूपीण्येव द्रव्याण्यवधिज्ञानी जानीते, तान्यपि न सर्वैः पर्यायैरिति ॥ २८ ॥

टी०—रूपिष्ववधेरिति। **रूपिष्वेव**—पुद्गलद्रव्येष्वेव **अवधेः** अतीन्द्रियस्य **विषयनिबन्धो भवति सर्वेषु असर्वपर्यायेषु**। किं योऽपि परमावधिरत्यन्तज्ञानविशुद्धस्तेनापि रूपीण्येव, नारूपीणि जानातीत्यारेकित आह—**सुविशुद्धेनापि**—परमप्रकर्षप्राप्तेनापि, यो ह्यलोके लोकप्रमाणान्यसंख्येयानि खण्डानि पश्यति तेनाप्यवधिना पुद्गलद्रव्याण्येवावसीयन्ते, न

१ 'अत्यन्तविशुद्ध' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मादीनि चत्वारि । किं सर्वपर्यायैः ? नेत्याह–तान्यपि न सर्वैरित्यादि । तान्यपि–रूपिद्रव्याणि न सर्वैः अतीतानागतवर्तमानैरुत्पादव्ययध्रौव्यादिभिरनन्तैः पर्यायैरिति ॥२८॥

मनःपर्यायज्ञानस्याधुना विषयनिबन्धनमाचिख्यासुराह[1]—

सूत्रम्–तदनन्तभागे मनःपर्यायस्य ॥ १–२९ ॥

भा०— यानि रूपीणि द्रव्याण्यवधिज्ञानी जानीते ततोऽनन्तभागे मनःपर्यायस्य विषयनिबन्धो भवति । अवधिज्ञानविषयस्यानन्तभागं मनःपर्यायज्ञानी जानीते, रूपिद्रव्याणि मनोरहस्यविचारगतानि च मानुषक्षेत्रपर्यापन्नानि विशुद्धतराणि चेति ॥ २९ ॥

मनःपर्यायस्य विषयः

टी०—तदनन्तभागे मनःपर्यायस्य । तेषामवधिज्ञानविषयीकृतरूपिद्रव्याणामनन्तभागस्तदनन्तभागस्तस्मिन् मनःपर्यायज्ञानस्य विषयनिबन्धः । एतद् विवृणोति–यानि शुक्लादिगुणोपेतानि रूपीणि द्रव्याणि जानात्यवधिज्ञानी तेषामवधिज्ञानदृष्टानामनन्तभागो यस्तस्मिन्ननन्तभागे एकस्मिन् मनःपर्यायस्य विषयनिबन्धो द्रष्टव्यः। तदित्यनेन अवधिज्ञानविषयोऽभिसंबध्यते । तस्यावधिज्ञानविषयस्य सर्वरूपिद्रव्यात्मकस्य योऽनन्तभागः एकस्तं मनःपर्यायज्ञानी जानीते । एतदाह–अवधिज्ञानविषयेत्यादिना । तान्यपि चावधिविषयानन्तभागवर्तीनि रूपीण्यवगच्छति–रूपरसाद्युपेतानि एवंगुणसम्प्राप्तात्मकानि द्रव्याणि, तान्यपि न कुड्याद्याकारव्यवस्थितानि जानाति, किन्तु मनोरहस्यविचारगतानि मनः–अनिन्द्रियं प्रतिविशिष्टपुद्गलप्रचितं चेतस्तदेव च रहस्यम्–अप्रकाशस्वरूपं अन्तर्वर्तमानं मनोरहस्ये विचारो–विचारणा अन्वेषणा, कथमयं पदार्थोऽवस्थित इत्येवंरूपा, तत्र मनोरहस्यविचारणायां गतानि–प्रविष्टानि चिन्त्यमानानि जीवेनेतियावत्, तान्यपि न सर्वलोकवर्तीनि, किन्तु मनुष्यक्षेत्रम् आमानुषोत्तरात् तस्मिन् मनुष्यक्षेत्रे पर्यापन्नानि व्यवस्थितानीतियावत्, अवधिज्ञानिनश्च सकाशाद् विशुद्धतराणि बहुतरपर्यायाणि जानीत इतियावत् ॥ २९ ॥

सम्प्रति केवलज्ञानस्य विषयमाचष्टे—

सूत्रम्—सर्वद्रव्यपर्यायेषु केवलस्य ॥ १–३० ॥

भा०—सर्वद्रव्येषु सर्वपर्यायेषु च केवलज्ञानस्य विषयनिबन्धो भवति । तद्धि सर्वभावग्राहकं समभिन्नलोकालोकविषयम् । नातः परं ज्ञानमस्ति । न च केवलज्ञानविषयात् परं किञ्चिदन्यज्ज्ञेयमस्ति ॥

केवलस्य विषयः

टी०—सर्वद्रव्येत्यादि । सर्वद्रव्येषु धर्मादिषु सर्वपर्यायेषु उत्पादादिषु, धर्मादीनां च त्रयाणां परत उत्पादविगमौ, पुद्गलानां जीवानां च स्वतः परतश्च,

---

१ 'पर्यायस्याधुना' इति ग–पाठः । २ 'मनुष्य०' इति घ–टी–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा शुक्लतया विगच्छन्नीलतयोपजायमानः पुद्गल इत्यवतिष्ठते, जीवोऽपि सुरतयोत्पद्यते मनुष्यतया विगच्छति जीवत्वेन च सदावस्थित इति, अतः सर्वेषु पर्यायेष्वेवमात्मकेषु केवलज्ञानस्य विषयनिबन्धो गोचरो भवति। कथं पुनः केवलस्य सर्वाणि द्रव्याणि सर्वे पर्यायाश्च गोचरीभवन्ति?। उच्यते-तत् केवलज्ञानं यस्मात् सर्वभावग्राहकं सर्वेषां भावानां ग्राहकं-द्रव्यक्षेत्रकालभावविशिष्टानां तत् परिच्छेदकम्-अवभासकम्, अत एव सम्भिन्नलोकालोकविषयं लोको-धर्माधर्मद्रव्यद्वयाविच्छिन्नमाकाशं, यत्र त्वाकाशे तौ धर्माधर्मौ न स्तः सोऽलोकः, लोकश्चालोकश्च लोकालोकौ सम्भिन्नौ च तौ लोकालोकौ च सम्भिन्नलोकालोकौ विषयो-गोचरो यस्य तत् सम्भिन्नलोकालोकविषयम्। एतदुक्तं भवति—यदिह लोके अलोके वाऽस्ति किञ्चिज्ज्ञेयं तद् यथा बहिः पश्यत्येवमन्तः, एवं सम्भिन्नलोकालोकविषयं, सम्भिन्नमिति सम्पूर्णम्, अथवा सर्वैः पर्यायैरथवा यथात्मानं तथा परम्, अथवा स्वपर्यायैः परपर्यायैश्च। अथ किमेतस्माज्ज्ञानात् प्रकृष्टतरमन्यत् किञ्चिज्ज्ञानमस्तीति?। उच्यते-नातः परं ज्ञानमस्ति अस्मात्-केवलात् परं-प्रधानतरं ज्ञानं-ज्ञेयपरिच्छेदि नास्ति किञ्चित्। एतस्माद् यद्यपि ज्ञानं न प्रधानतरमस्ति विषयस्तर्हि अप्रकाशितोऽस्ति तेन केवलज्ञानेनेति, तन्न, यतः--न च केवलेत्यादि। केवलज्ञानस्य विषयः सर्वद्रव्याणि सर्वपर्यायाश्च, एतस्माद् विषयात् परमन्यत् किञ्चिज्ज्ञेयं नास्ति यदप्रकाशितं केवलेनेति॥ एवं विषयमाख्याय केवलस्य तस्यैव पर्यायकथनं करोति—

केवलस्वरूपम्

भा०—केवलं परिपूर्णं समग्रमसाधारणं निरपेक्षं विशुद्धं सर्वभावज्ञापकं लोकालोकविषयमनन्तपर्यायमित्यर्थः॥ ३०॥

अत्राह—एषां मतिज्ञानादीनां युगपदेकस्मिन् जीवे कति भवन्तीति?। अत्रोच्यते—

टी०—केवलं परिपूर्णं भण्यते, सकलं द्रव्यभावजालं[2] परिच्छिन्दन् परिपूर्णमिति, यथैकं जीवपदार्थं तथा परमपि परिच्छिन्दत् समग्रमिति व्यपदिश्यते, असाधारणं मत्यादिज्ञानैरतुल्यत्वात्, निर्गता आलोकेन्द्रियादिरूपा अपेक्षा यत्र तन्निरपेक्षं, ग्राह्यं मुक्त्वा नेन्द्रियादीन्यपेक्षत इतिवायत्, विशुद्धं अशेषज्ञानदर्शनावरणमलविलयनात्. सर्वभावज्ञापकमिति सर्वेषां जीवादीनां भावानां ज्ञापकं-प्ररूपकम्॥ ननु च मूकं तत् केवलज्ञानं, तत् कथं प्ररूपकं[3] भण्यते? शब्दो हि ज्ञापको मतः, उच्यते—उपचारात् ज्ञापकं, यतः केवलज्ञानेन सर्वद्रव्यभावान् दृष्टान् शब्दः प्रकाशयति, ततः केवलज्ञानमेव प्रकाशकं भण्यते। लोकालोकौ विषयोऽस्य तत् लोकालोकविषयम्। कथमिति चेत्, यतः अनन्ताः पर्यायाः-परिणामाः यस्य तत् अनन्तपर्यायं, ज्ञेयं वाऽनन्तपर्यायमितिकृत्वा तदप्यनन्तपर्यायमभिहितं, ज्ञेयानुरोधेन॥ ३०॥

---

१ 'चास्ति' इति क-पाठः। २ 'जातं' इति क-ख-पाठः। ३ 'प्ररूपकं ज्ञापकं भण्यते' इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं सर्वेषां मत्यादीनां विषये प्रकाशितेऽवकाशे ब्रूते अन्तेवासी—एषामनन्तरख्यापितानां मतिज्ञानादीनां युगपद्—एकस्मिन् काले एकस्मिन् जीवे कति भवन्त्याधेयानि? किमेकं द्वे त्रीणि चत्वारि पञ्चापि? सर्वाणि तावन्न सङ्गच्छन्ते सर्वप्राणिनाम्, एवं सति समता स्यात्, सर्वेषां च सर्वज्ञता भवेत्, विरोधश्च स्यात् क्षायिकक्षायोपशमिकानां परस्परेण, तस्माद् यथैते दोषा न सन्ति तथा वाच्यम्, उच्यते अत्र—

सूत्रम्—एकादीनि भाज्यानि युगपदेकस्मिन्ना चतुर्भ्यः ॥ १-३१ ॥

भा०—एषां मत्यादीनां ज्ञानानामादित एकादीनि भाज्यानि युगपदेकस्मिन् जीवे आ चतुर्भ्यः। तद्यथा—कस्मिंश्चिज्जीवे मत्यादीनामेकं भवति। कस्मिंश्चिज्जीवे द्वे भवतः। कस्मिंश्चित् त्रीणि भवन्ति। कस्मिंश्चिच्चत्वारि भवन्ति ॥

युगपदेकजीवे ज्ञानसंख्या

टी०—एकादीत्यादि। एकशब्दः प्राथम्ये वर्तते, एकः—प्रथम आदिरेषां तान्येकादीनि—प्रथमादीनि भाज्यानि—विकल्प्यानि स्युर्न वा, युगपद्—एकस्मिन् कालेऽवधीकृते एकस्मिन् प्राणिनि, आ चतुर्भ्य इति आङभिविधौ न मर्यादायाम्, यत्रास्य मर्यादाऽभिप्रेता सूरेः तत्र ग्राग्रहणं करोति, 'विग्रहवती च संसारिणः प्राक् चतुर्भ्यः' (अ०२,सू०२९) तथा 'प्रदेशतोऽसंख्येयगुणं प्राक् तैजसात्' (अ०२,सू०३९) तस्मादिहाभिविधावाङ्, आ चतुर्भ्यो ज्ञानेभ्यः एकस्मिन् जीवे सम्भव इति, चत्वार्येकत्र जीवे सम्भवन्तीति। भजनां च दर्शयति—कस्मिंश्चिदित्यादिना। कस्मिंश्चिन्मनुष्यादिके जीवे मत्यादीनां पञ्चानां ज्ञानानामेकं सम्भवति, कथं? येन निसर्गसम्यग्दर्शनं प्राप्तं तस्य मतिज्ञानमाद्यमेवैकं समस्ति, न श्रुतं, यतस्तल्लब्धा सामायिकादिश्रुतं न पठति, अन्तरेणापि च श्रुतज्ञानमष्टौ प्रवचनमातरः संगृह्यन्ते तेन, अतस्तस्य ग्रन्थानुसारि विज्ञानं श्रुताख्यं न सम्भवति, एकं—प्रथमं मतिज्ञानमेव। कस्मिंश्चिज्जीवे द्वे भवतः—सम्यग्दर्शनसमन्वितस्य श्रोत्रेन्द्रियोपलब्धिः श्रुतं द्वादशाङ्गं, शेषेन्द्रियोपलब्धिर्मतिज्ञानम्। कस्मिंश्चित् प्राणिनि त्रीणि, द्वे मतिश्रुते तृतीयं चावधिज्ञानं यस्योत्पन्नम्। कस्मिंश्चिच्चत्वारि, एतानि त्रीणि चतुर्थं मनःपर्यायज्ञानम्, प्रतिपन्नचारित्रस्य तीर्थकृत इव ॥ अथ यस्मिन् श्रुतज्ञानमेकं कचित् प्राणिनि स किं न प्रदर्श्यते? यतो मतिरेवैका प्रदर्श्यते, उच्यते—यत्र श्रुतज्ञानं तत्रावश्यं मतिज्ञानम्, यत्र मतिज्ञानं तत्र श्रुतं स्याद् वा न वेति, तस्मान्मतिज्ञानमेवैकं क्वचिन्निदर्श्यते, एतदाह—

भा०—श्रुतज्ञानस्य तु मतिज्ञानेन नियतः सहभावस्तत्पूर्वकत्वात्। यस्य श्रुतज्ञानं तस्य नियतं मतिज्ञानम्। यस्य तु मतिज्ञानं तस्य श्रुतज्ञानं स्याद् वा न वेति। अत्राह—अथ केवलज्ञानस्य पूर्वैर्मतिज्ञानादिभिः किं सहभावो भवति नेति?। अत्रोच्यते—

---

१ 'ज्ञातेभ्यः' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—श्रुतज्ञानेत्यादि। श्रुतज्ञानस्य एवं ग्रन्थानुसारिणो **मतिज्ञानेन** इन्द्रियानिन्द्रियनिमित्तेन **नियतो**—निश्चितः **सहभावः** एकत्रवृत्तिरूपः, किं कारणम्? तत आह—**तत्पूर्वकत्वात्**—मतिज्ञानपूर्वकत्वात् श्रुतस्य, सति हि मतिज्ञाने श्रुतज्ञानसम्भव इति, अतो **यस्य** जन्तोः श्रुतज्ञानं ग्रन्थानुसार्यस्ति **तस्य** जन्तोर्नियतमिन्द्रियानिन्द्रियनिमित्तं **मतिज्ञानं** सम्भवति, तस्माच्छ्रुतज्ञानं यत्र प्राणिनि तत्र द्वे मतिश्रुते अवश्यं द्रष्टव्ये, **यस्य** तु जीवस्य **मतिज्ञानं** केवलं निसर्गसम्यग्दर्शनकालेऽनवाप्ताक्षरश्रुतस्य **तस्य श्रुतज्ञानं स्याद्** उत्तरकालं पठतो, **न वा**ऽनधीयानस्येति, तस्माद् यत्रैकं दर्श्यते तत्र मतिज्ञानं निदर्श्यते, श्रुताभावेऽपि भावादिति। एवं भजनायां निदर्शितायां चोदयत्यत्रावसरे—**अथ केवलज्ञानस्य** सकलज्ञेयग्राहिणः **पूर्वैः**—पूर्वकालप्राप्यैः पूर्वैर्वा सन्निवेशमङ्गीकृत्याभिधीयते **मतिज्ञानादिभिश्चतुर्भिः**—सह **किं सहभावः**—सहावस्थानं **भवति नेति**? । **उच्यते**—अन्यमतप्रचिकटयिषयाऽऽह—

केवले शेषज्ञानासद्भावेऽन्यमतम्

भा०—केचिदाचार्या व्याचक्षते—नाभावः, किन्तु तदभिभूतत्वादकिञ्चित्कराणि भवन्तीन्द्रियवद्। यथा वा व्यभ्रे नभसि आदित्य उदिते भूरितेजस्त्वादादित्येनाभिभूतान्यन्यतेजांसि ज्वलनमणिचन्द्रनक्षत्रप्रभृतीनि प्रकाशनं प्रति अकिञ्चित्कराणि भवन्ति तद्वदिति।

टी०—केचिदित्यादि, मत्तोऽन्ये **व्याचक्षते** सूरयः, नाभाव एवास्ति, कथं हि सतो वस्तुनः आत्यन्तिको नाशः स्यात्? यदि च स्यात् ततो यथैव केवलभास्वति जाते ज्ञानचतुष्टयमेवमन्येऽपि शमवीर्यदर्शनसुखितत्वादयो नश्यन्तु, न च तेषां नाशोऽभ्युपेयते, तस्मात् सहावस्थानमस्त्येव, यदि तर्ह्यस्ति सहावस्थानं मत्यादिज्ञानचतुष्टयस्य केवलेन सह ततः किमिति स्वमर्थं न प्रकाशयन्ति? उच्यते—अभिभवात्, तदाह—**किन्त्वभिभूतत्वात्**—हतप्रभावत्वात् **अकिञ्चित्कराणि** न किञ्चिदपि कर्तुं प्रकाशनं प्रभवन्ति। तत्र दृष्टान्तमाह—यथा हि केवलिनः सदपि चक्षुरादीन्द्रियं न व्याप्रियते विषयग्रहणं प्रति, प्रकाशितत्वात् केवलज्ञानेन, एवं मत्यादिचतुष्टयमपि अकिञ्चित्करं, तदीयस्य ज्ञेयस्य केवलभास्वता प्रकाशितत्वात्। अथैतदपि सन्दिह्यते भगवतः केवलिनो यन्नेत्रं तद् विषयग्रहणं प्रति अकिञ्चित्करमिति, एवं सति असन्देहरूपं दृष्टान्तं दर्शयामः—**यथा वा व्यभ्र** इत्यादि, येन प्रकारेणैतत् स्थितं लोके, विगतान्यभ्राणि यत्र तत् व्यभ्रं तस्मिन् व्यभ्रे **नभसि**—वियति **आदित्ये**—किरणमालिनि **उदिते**—प्रकटीभूते ज्वलनादीनि प्रकाशनं प्रत्यसमर्थानि भवन्ति, किमिति? **भूरितेजस्त्वाद्**—बहुतेजस्त्वात्, **आदित्येन**—सवित्रा **अभिभूतानि**-तिरोहितस्वसामर्थ्यानि अन्येषां तेजांसि **अन्यतेजांसि**, अन्यानि वा तेजआत्मकानि ज्वलनादीनि, **ज्वलनोऽग्निः मणिः**-सूर्यकान्तादिः **चन्द्रः**-शशी **नक्षत्रम्**-अश्विन्यादि, एतानि ज्वलनादीनि **प्रभृतिः**—आदिर्येषां तेजसां तानि ज्वलनमणिचन्द्रनक्षत्रप्रभृतीनि तेजांसि—तेजोमयानि **प्रकाशनम्**—

१ 'न्यथाऽऽचक्षते' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उद्द्योतनं प्रति अकिञ्चित्कराणि भवन्ति न किञ्चिद् बहिरवस्थितं कुड्यादिविषयं प्रकाशयन्ति, हतप्रभावत्वात्, तद्वदिति तेन प्रकारेण केवलभास्वता भूरितेजसाऽऽक्रान्तानि न विषयप्रकाशनं प्रति व्याप्रियन्ते ॥

सम्प्रति पराभिप्रायेणैव मत्यादिज्ञानचतुष्टयस्य केवलेन सहानवस्थानं दर्शयति—

भा०—केचिदप्याहुः—अपायसद्द्रव्यतया मतिज्ञानं, तत्पूर्वकं श्रुतज्ञानम्, अवधिज्ञानमनःपर्यायज्ञाने च रूपिद्रव्यविषये, तस्मान्नैतानि केवलिनः सन्तीति ॥

टी०—केचिदप्याहुरित्यादि। केचित् पुनर्ब्रुवते—नैतानि मत्यादीनि केवलिनः सन्ति, यस्मान्मतिज्ञानं अपायसद्द्रव्यतया भवति, अपायो नाम श्रोत्रादीन्द्रियोपलब्धस्येहितस्यार्थस्य निश्चयः, नैवंविधोऽपायः केवलिनोऽस्ति, यावच्च शोभनानि सम्यग्दलिकानि सन्ति तावन्मतिज्ञानं, तदेतद् द्वयमपि दूरोत्सारितं केवलिन इति नास्ति मतिज्ञानं केवलिनः, मतिज्ञानाभावे च मतिपूर्वकस्य श्रुतस्य सुतरामभाव इत्यतः श्रुतमपि नास्ति, अवधिमनःपर्यायज्ञाने च रूपिद्रव्यविषये गदिते, न चैवंविधोऽस्ति विषयः केवलिनः, सम्भिन्नलोकालोकग्राहित्वात्, तस्मात् ते अपि न स्त इति, तस्मादुपपत्तिबलादेतानि चत्वारि केवलिनो दिव्यदृशनो न सन्ति।

क्रमयुगपदुपयोगौ

भा०—किञ्चान्यत्। मतिज्ञानादिषु चतुर्षु पर्यायेणोपयोगो भवति, न युगपत्। सम्भिन्नज्ञानदर्शनस्य तु भगवतः केवलिनो युगपत् सर्वभावग्राहके निरपेक्षे केवलज्ञाने केवलदर्शने चानुसमयमुपयोगो भवति ॥ किं चान्यत्।

टी०—किञ्चान्यदित्यादिना स्वाभिप्रायद्वयं प्रकाशयन्ति—मतिज्ञानादिषु चतुर्षु मतिश्रुतावधिमनःपर्यायज्ञानेषु पर्यायेण—क्रमेण उपयोगः—स्वीयविषयग्राहिता भवति न युगपत्, कस्मिन् काले न स्वस्वविषये एषां व्यापारः ? यदा मतिज्ञानी मतिज्ञानेनोपयुक्तो न तदा श्रुतादीनामन्यतमेन केनचित्, यदा च श्रुतज्ञानेनोपयुक्तो न तदा मत्यादीनामन्यतमेनेति, केवलिनस्तु न क्रमेणैतज्ज्ञानगतोऽस्त्युपयोगः, यतः सम्भिन्न इत्यादि। ज्ञानं—विशेषग्राहि, दर्शनं—सामान्यग्राहि, ज्ञानं च दर्शनं च ज्ञानदर्शने, सम्भिन्ने—सर्वद्रव्यपर्यायग्राहके ज्ञानदर्शने यस्य स सम्भिन्नज्ञानदर्शनः तस्य, एवं माहात्म्यादिगुणान्वितस्य भगवतः, केवलं—सर्वार्थग्राहि ज्ञानं यस्यास्ति तस्य केवलिनः, युगपत्—एकस्मिन् समये, केवलज्ञाने अनुसमयमुपयोगो भवति दर्शने च । कीदृशि केवलज्ञाने दर्शने वा ?। उच्यते—सर्वभावग्राहके। सर्वे भावाः—पञ्चास्तिकायास्तेषां ग्राहकं, विशेषेण परिच्छेदकमित्यर्थः। निरपेक्षे । निर्गता अपेक्षा ज्ञेयं मुक्त्वाऽन्यत्र इन्द्रियादौ यस्य तन्निरपेक्षं तस्मिन्निरपेक्षे केवलज्ञाने विशेषग्राहिणि दर्शने च सर्वभावग्राहके निरपेक्षे सामान्यग्राहिणि। अनुसमयमुपयोगो भवतीति। अनुगतः—अव्यवहितः समयः—अत्यन्ताविभागः कालो यत्र कालसन्ताने स कालसन्तानोऽनुसमयस्तमनुसमयं कालसन्तानमुपयोगो भवति, "कालाध्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नोरत्यन्तसंयोगे" (पाणिनिः अ० २, पा० ३, सू० ५) इति द्वितीया, "अव्ययीभावो वा विभक्त्यादिषु" (पा० अ० २, पा० १, सू० ६) वारंवारेणोपयोगो भवतीतियावत्। एकस्मिन् समये केवलज्ञानोपयोगे वृत्ते ततोऽन्यस्मिन् केवलदर्शनोपयोग इति, एवं सर्वकालमवसेयम्। यद्यपि केचित् पण्डितम्मन्याः सूत्राण्यन्यथाकारमर्थमाचक्षते तर्कबलानुविद्धबुद्धयो[1] वारंवारेणोपयोगो नास्ति, तत् तु न प्रमाणयामः, यत आम्नाये भूयांसि सूत्राणि वारंवारेणोपयोगं प्रतिपादयन्ति-"नाणम्मि दंसणम्मि य एत्तो एगयरम्मि उवउत्ता"[2] (प्रज्ञापनायाम्)। तथा-"सव्वस्स केवलिस्सवि जुगवं दो नत्थि उवओगा"[3] (वि० ३०९६) इत्यादीनि। अथैवं मन्येथाः सूत्राणामेषामन्य एवार्थोऽन्य एवाव्युत्पन्नबुद्धिभिराख्यायत[4] इत्येतदपि तु दुःश्रद्धानम्, यतः सर्वसूत्राण्यन्धपुरुषस्थानीयानि सुधिया गृहीतानि शक्नुवन्त्यर्थं ख्यापयितुं, यथा श्वेतो धावतीत्यादि, एवंविधेषु च सूत्रेष्ववश्यमाप्तसम्प्रदाय एवान्वेषणीयो भवति, स चाविच्छेदेनार्थसम्प्रदायः समस्तश्रुतधरादधिकारिणः परिप्लवमानो मुनिपरम्परया यावदद्येत्यागमादविगानेन वारंवारेणोपयोग इति, कुतः पुनरर्थागमोऽकस्मात् उपयोगवादिनः? स्वत एव चेत् प्रेक्षितः स्वमनीषिका सिद्धान्तविरोधिनी न प्रमाणमित्यभ्युपेयते॥ अथागमात् प्रदर्शनीयः तर्ह्यसौ तस्माद् यत्किञ्चिदेतदिति। अथ मन्यसे साकारोऽनाकार इति शब्दभेदः केवलमत्र केवलिनि अर्थस्त्वभिन्न एव, यतः सर्वमेव विशेषपरिच्छेदकं ज्ञानं केवलिनि समस्ति न दर्शनमिति, इदमपि न जाघट्यते ज्ञानावरणं भगवतः क्षीणं दर्शनावरणीयं च निरवशेषं, तत्रैकत्वे सति कोऽयमावरणभेदाभिमानो निष्प्रयोजनः?। तथा साकारोपयोगोऽष्टधा दर्शनोपयोगश्चतुर्धेति, तथा ज्ञानं पञ्चधा दर्शनं चतुर्धेति, एकत्वे सति कुत इदमपि घटमानकं? न चातीवाभिनिवेशोऽस्माकं युगपदुपयोगो मा भूदिति, वचनं न पश्यामस्तादृशम्, क्रमोपयोगार्थप्रतिपादने तु भूरि वचनमुपलभामहे, न चान्यथा जिनवचनं कर्तुं शक्यते सुविदुषाऽपीति, प्रकृतमनुस्रियते। एतस्मात् केवलज्ञानोपयोगात् केवलदर्शनोपयोगाच्च विनाऽन्यस्य उपयोगस्य अभावात् केवलिनि मत्यादिज्ञानचतुष्टयसहभावो न गम्यते। किंचान्यदित्युपपत्त्यन्तरमालम्ब्यते—

क्षायोपशमिकक्षायिकतया भेदः

भा०—क्षयोपशमजानि चत्वारि ज्ञानानि पूर्वाणि, क्षयादेव केवलम्। तस्मान्न केवलिनः शेषाणि ज्ञानानि भवन्तीति॥३१॥

टी०—मत्यादीनि चत्वारि मनःपर्यायपर्यवसानानि ज्ञानानि मतिश्रुतावधिमनःपर्यायावरणीयकर्मणां क्षयोपशमावुररीकृत्य प्रवर्तन्ते, तदावरणीयकर्मक्षयोपशमनिमित्तानि, केवलं पुनः क्षयकारणमेव, तस्मान्न केवलिनः शेषाणि ज्ञानानि सन्तीति। अन्येषां तु

---

१ 'ोनुविशुद्धबुद्धयः' इति क-ख-पाठः, 'तर्कबलात् तु विशुद्धबुद्धयः' इति घ-टी-पाठः।

२ ज्ञाने दर्शने च अनयोरेकतरस्मिन् उपयुक्ताः। ३ सर्वस्यापि केवलिनो युगपद् द्वावुपयोगौ न स्तः।

४ 'एव व्युत्पन्न' इति क-ख-ग-पाठः। ५ 'सन्तीति' इति घ-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रन्थः 'ज्ञानदर्शनावरणयोस्तु कृत्स्नक्षयात् केवलज्ञानदर्शने भवतः तस्मान्न केवलिनः शेषाणि ज्ञानानि सन्ति,' ज्ञानदर्शनयोर्विशेषसामान्यग्राहकयोर्ये आवरणे-आच्छादने तयोरेव कृत्स्नक्षयात् केवले ज्ञानदर्शने-विशेषसामान्यग्राहके उत्पद्येते, अतश्चत्वारि क्षयोपशमनिमित्तान्येकं क्षयादेव केवलं कथं पुनरत्र सहावस्थायिता घटेत?॥३१॥

एवं मत्यादि ज्ञानपञ्चकं प्रमाणं प्रदर्श्य प्रमाणाभासाविश्किीर्षया आह—

सूत्रम्—मतिश्रुतावधयो विपर्ययश्च ॥ १-३२ ॥

भा०—मतिज्ञानं, श्रुतज्ञानं, अवधिज्ञानमिति विपर्ययश्च भवति, अज्ञानं चेत्यर्थः। ज्ञानविपर्ययोऽज्ञानमिति। अत्राह—तदेव ज्ञानं तदेवाऽज्ञानमिति, ननु छायातपवच्छीतोष्णवच्च तदत्यन्तविरुद्धमिति। अत्रोच्यते—

मत्यादीनां विपर्ययः।

टी०—मतिश्रुतावधयो विपर्ययश्च, यथोक्तलक्षणा मतिश्रुतावधयस्त्रयोऽपि विपर्ययश्च भवत्यज्ञानं चेत्यर्थः, ज्ञानाधिकारस्य प्रकृतत्वात् ज्ञानस्य विपर्ययो विपरीतता अज्ञानं, प्रमाणाभास इतियावत्। यदा यथार्थपरिच्छेदि तदा ज्ञानं, यदा त्वयथार्थं प्रवर्तते तदा ज्ञानाभासम्। एवमुक्ते पर आह-एकस्य विरुद्धधर्मद्वयसमारोपो न युक्त इति, तदेव मत्यादित्रयं प्रमाणं तदेव चाप्रमाणमिति छायातपवद् विरोधित्वादेकत्रासाम्प्रतम्, एतदाह-ननु छायातपवद् विरुद्धमेतत्, यो हि छायायामेवातपं मन्यते आतपे वा छायां तदत्यन्तविरुद्धं स्यात्। प्रतीतिविरोधश्च तथा, यो हि शीतमुष्णं ब्रूयात् उष्णं च शीतमिति प्रत्यक्षविरुद्धं च जायते। अत्रोच्यते—न ब्रूम एकत्राधारे एतत्त्रयं ज्ञानमज्ञानं च, किन्त्वन्यत्र ज्ञानमन्यत्र चाज्ञानमिति। क तर्हि ज्ञानम्? सम्यग्दृष्टौ योऽवबोधस्तज्ज्ञानम्, आधारान्तरे मिथ्यादृष्टौ योऽवबोधस्तदज्ञानम्। एतदाह—

भा०—मिथ्यादर्शनपरिग्रहाद् विपरीतग्राहकत्वमेतेषाम्। तस्मादज्ञानानि भवन्ति, तद् यथा-मत्यज्ञानं, श्रुताज्ञानं, विभङ्गज्ञानमिति। अवधिर्विपरीतो विभङ्ग इत्युच्यते॥

टी०—मिथ्यादर्शनेत्यादि। मिथ्यादर्शनेन-तत्त्वार्थाश्रद्धानरूपेण परिग्रहो यदा मत्यादित्रयस्य तदा विपरीतग्राहकत्वं-अयथार्थवस्तुपरिच्छेदित्वम् एतेषामिति मतिश्रुतावधीनां तस्मात् कारणात् अज्ञानानि कुत्सितान्ययथार्थपरिच्छेदीनि भवन्ति मत्यादीनि। मिथ्यादृष्टिपरिगृहीता मतिर्मत्यज्ञानं, मिथ्यादृष्टिपरिगृहीतं श्रुतं श्रुताज्ञानं, मिथ्यादृष्टिपरिगृहीतोऽवधिर्विभङ्ग इति। विभङ्ग इत्यस्य चार्थं प्रकाशयति—अवधिर्भवक्षयोपशमनिमित्तो विपरीतोऽन्यथावस्तुपरिच्छेदी विभङ्ग इति, यथावस्थितवस्तुपरिच्छेदि च प्रमाणमिष्टं, न चैतत् तथेत्यतः अप्रामाण्यं मिथ्यादृष्टिपरिगृहीतानामिति। अत्राप्रामाण्ये ख्यापिते मिथ्यादृष्टिपरिगृहीतस्य मत्यादित्रयस्य चोदक आह—

मिथ्यादृशामज्ञानिता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—अत्राह—उक्तं भवता सम्यग्दर्शनपरिगृहीतं मत्यादि ज्ञानं भवत्यन्यथाऽज्ञानमेवेति । मिथ्यादृष्टयोऽपि च भव्याश्चाभव्याश्चेन्द्रियनिमित्तानविपरीतान् स्पर्शादीनुपलभन्ते, उपदिशन्ति च स्पर्शं स्पर्श इति रसं रस इति, एवं शेषान्, तत् कथमेतदिति ? । अत्रोच्यते—तेषां हि विपरीतमेतद् भवति ॥ ३२ ॥

टी०—उक्तं भवता—प्रतिपादितं त्वया सम्यग्दर्शनेन जीवादितत्त्वश्रद्धानरूपेण परिगृहीतं मत्यादि ज्ञानं भवति । यथावद् वस्तुपरिच्छेदीतियावत् । अन्यथा तु मिथ्यादृष्टिना परिगृहीतं मत्यादित्रयं कुत्सितं ज्ञानमज्ञानमेवेति, तदेतन्न मृष्यते, यतः

मिथ्यादृष्टीनां प्रकाराः

मिथ्येत्यादि । मिथ्यादृष्टयोऽभिगृहीतमिथ्यादर्शनाः शाक्यादयः, अनभिगृहीतमिथ्यादर्शनाः, प्रवचनार्थसन्देहिनश्च त्रिविधा इति । अपिः सम्भावने, चः समुच्चये, ते मिथ्यादृष्टयो द्विधा भव्याश्चाभव्याश्च, सेत्स्यन् भव्यः, नैव कदाचित् सेत्स्यति यः सोऽभव्यः । ते मिथ्यादृष्टयो द्विविधा अपि, इन्द्रियनिमित्तानिति इन्द्रियाणि—श्रोत्रादीनि तानि निमित्तं—कारणमाश्रित्य अविपरीतान्—यथावस्थितान् स्पर्शादीनिति स्पर्शरसगन्धरूपशब्दान् उपलभन्ते आत्मना, उपदिशन्ति च अन्येभ्यः । कथमुपलभन्ते कथं चोपदिशन्ति ? अवैपरीत्येन, तच्चावैपरीत्यं दर्शयति—स्पर्शं—शीतादिकं स्पर्शमिति अविपरीततामाचष्टे, रसं—मधुरादिकं रसमिति एवमविपरीतमेवं शेषान्—शब्दरूपानवैपरीत्येन । तत् कथमेतदिति, बाधके हि प्रत्यये सत्ययथार्थता प्रत्ययान्तरस्य आश्रयितुं शक्या, यथा शुक्तिकाबुद्ध्या रजतबुद्धिर्बाधिकया शुक्तिकाबुद्ध्या निवर्त्यते, नैवमत्र बाधकं कञ्चित् प्रत्ययं पश्यामो यद्बलान्मिथ्यादृष्टीनां तदयथार्थं ज्ञानं मन्येमहीति ?। अत्रोच्यते—तेषां—मिथ्यादृष्टीनां यस्मात् तद् विज्ञानं विपरीतमेवेति, अयथार्थपरिच्छेदित्वात् ॥ ३२ ॥ कुतः ?

सूत्रम्—सदसतोरविशेषाद् यदृच्छोपलब्धेरुन्मत्तवत् ॥ १—३३ ॥

टी०—सदसतोरित्यादि । सद्—विद्यमानं असद्—अविद्यमानं तयोः सदसतोः—विद्यमानाविद्यमानयोः अविशेषाद्—यथावदवबोधाभावाद्, विद्यमाने हि पदार्थे उत्पादादिरूपेणान्यथावबोध एकनयाश्रयेणेति, अविद्यमानेऽपि ललाटदेशाध्यास्यात्मा सामस्त्येन हृदयाधिष्ठानो वा, एवं सदसतोरविशेषादयथावबोधात् तदज्ञानं, यदृच्छोपलब्धेरिति अनालोचिता अर्थोपलब्धिस्तस्या यदृच्छोपलब्धेः स्पर्शादिपरिज्ञानं भवति, उन्मत्तस्येव ॥

भा०—यथोन्मत्तः कर्मोदयादुपहतेन्द्रियमतिर्विपरीतग्राही भवति । सोऽश्वं गौरित्यध्यवस्यति गां चाश्व इति लोष्टं सुवर्णमिति सुवर्णं लोष्ट इति लोष्टं च लोष्ट इति सुवर्णं सुवर्णमिति तस्यैवमविशेषेण लोष्टं सुवर्णं सुवर्णं लोष्टमिति विपरीतमध्यवस्यतो नियत-

मिथ्यादृष्टेः अज्ञानित्वे हेतुः

१ 'चाश्व इति' इति घ-पाठः, 'चाश्वमिति' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मज्ञानमेव भवति । तद्वन्मिथ्यादर्शनोपहतेन्द्रियमतेर्मतिश्रुतावधयोऽप्यज्ञानं भवन्ति ॥ ३३ ॥

टी०-यथोन्मत्तो वायुपिशाचादिगृहीतः कर्मोदयात्-कर्मणां पुराकृतानां विपाकाद् यदा उपहतेन्द्रियमतिः उपहतेन्द्रिय उपहतमनाश्च संवृत्तो भवति तदा विपरीतग्राही-अन्यथावस्थितवस्तुपरिच्छेदी भवति, यतः स उन्मत्तः अश्वं सन्तं गौरयमित्येव-मध्यवस्यति एवं गृह्णात्युपदिशति च, गां च सतीं अश्वोऽयमित्यध्यवस्यति स्वयमन्येभ्य-श्चोपदिश्यत्यश्वोऽयमिति । सर्वपदार्थेष्वेव चोन्मत्तस्य यदृच्छयोपलब्धिर्न कतिपयेष्वित्येत-दुदाहरणभूयस्त्वेन कथयति-लोष्टं सुवर्णमित्यादिना । लोष्टं पृथिवीपरिणामं सन्तं मृदा-त्मकं सुवर्णमित्यध्यवस्यति, सुवर्णं च लोष्टमित्यध्यवस्यति, कदाचिच्च लोष्टं लोष्टमेवा-ध्यवस्यति, कदाचिद् वा सुवर्णं सुवर्णमित्येव, तस्योन्मत्तस्यैवमुक्तेनाविशेषेण अयथावदव-बोधेन लोष्टं सुवर्णमित्येवं विपरीतमध्यवस्यतः नियतं-निश्चितमज्ञानमेव, कुत्सित-मेव तज्ज्ञानं भवतीति । सम्प्रति दार्ष्टान्तिके योजयति-तद्वन्मिथ्यादर्शनेनोपहते-न्द्रियमनस्कस्य मतिश्रुतावधयस्त्रयोऽप्यज्ञानमेव भवन्ति, एकनयमतसमाश्रयणे तु न सर्ववस्तुपरिच्छेदः, न च तावन्मात्रं तद् वस्तु, नयमतान्तरेणान्यथापि परिच्छेदात्, अतः अज्ञानता त्रयाणाम्, समग्रनयसामग्रीप्रत्ययेनैकैकनयावलम्बी प्रत्ययो निवर्त्यत इति विद्यते हि सर्वनयसामग्रीप्रत्ययो बाधक इति ॥ ३३ ॥

चारित्राभिधाने हेतुः

भा०-उक्तं ज्ञानम् । चारित्रं नवमेऽध्याये वक्ष्यामः । प्रमाणे चोक्ते । नयान् वक्ष्यामः । तद्यथा—

टी०—प्रकृतपरिसमाप्तिं सूचयति-उक्तं ज्ञानम्, सम्यग्दर्शनज्ञानचारित्राणीत्युपक्षिप्तं त्रयमिति, सम्प्रत्यवसरप्राप्तं चारित्रं, तच्चेह लब्धावकाशमपि नाभिधीयते, यत इहाभिधा-यापि पुनः संवरप्रस्तावे 'आश्रवनिरोधः संवरः', 'स गुप्तिसमितिधर्मानुप्रेक्षापरीषहजय-चारित्रैः' (अ० ९, सू० १-२) इत्यत्र चारित्रद्वारे संवरप्ररूपकेऽभिधातव्यमेवातो ग्रन्थस्य लाघवमिच्छता तत्रैव नवमेऽभिधास्यते इत्याह-चारित्रं नवमेऽध्याये वक्ष्यामः । 'प्रमाणनयैरधिगमः' (अ०१, सू०६) इति च यदुक्तं तत्र प्रमाणमेतदेव पञ्चविधं सम्यग्दृष्टि-परिगृहीतं ज्ञानं, तदाह-प्रमाणे च प्रत्यक्षपरोक्षे उक्ते, नयास्तु पूर्वं नोक्ता इत्यतो नयान् वक्ष्यामः, ते च यथा स्वरूपतो व्यवस्थितास्तथा निर्दिश्यन्ते—

सूत्रम्—नैगमसङ्ग्रहव्यवहारर्जुसूत्रशब्दा नयाः ॥ १-३४ ॥

नयभेदाः

भा०—नैगमः, सङ्ग्रहः, व्यवहारः, ऋजुसूत्रः, शब्द इत्येते पञ्च नया भवन्ति ॥ ३४ ॥

टी०-नैगमेत्यादि । कृतद्वन्द्वसमासानां पञ्चानामपि प्रथमाबहुवचनान्तता । नया

१ 'नयानत्र' इति ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति च अनेकधर्मकदम्बकोपेतस्य वस्तुन एकेन धर्मेणोन्नयनमवधारणात्मकं नित्य एवानित्य एवेत्येवंविधं नयव्यपदेशमास्कन्दति, स चाध्यवसायविशेष इति। निगम्यन्ते-परिच्छिद्यन्ते इति निगमाः-लौकिका अर्थाः, तेषु निगमेषु भवो योऽध्यवसायो ज्ञानाख्यः स

नैगमस्य निर्देशः

नैगमः। स च सामान्येनापि व्यवहरति सामान्यबुद्धिहेतुना सामान्यवचनहेतुना च, अत्यन्तं भेदेभ्योऽन्यत्वरूपेण सत्तामात्रेण, तथा विशेषेणापि विशेषबुद्धिहेतुना विशेषवचनहेतुना च अत्यन्तं सामान्यादन्यत्वरूपेण व्यवहरति परमाणुनिष्ठितेन, तथा सामान्यविशेषेणापि गवादिना सर्वगोपिण्डेष्वनुवृत्त्यात्मकेन अश्वादिव्यावृत्त्यात्मकेन च व्यवहरति, यथा लोको व्यवहरति तथाऽनेन व्यवहर्तव्यमिति, लोकश्चोपदिष्टैः प्रकारैः समस्तैर्व्यवहरति। प्रवचने च वसतिप्रस्थकनिदर्शनद्वयेन विभावितः काणभुजराद्धान्तहेतुरवगन्तव्यः। अभेदेन सङ्ग्रहात् सर्वस्य सङ्गृह्णाति इति सङ्ग्रहः।

सङ्ग्रहस्य स्वरूपम्

यदि भवनाभिसम्बद्धस्यैव भावस्य भावत्वमभ्युपगम्यते ततः परिसमापितात्मस्वरूपित्वाद् भावस्य भ्रान्तिसमुपनिबन्धनघटादिविकल्पप्रकल्पनानर्थक्यम्, यदि घटादि वस्त्वपि भवनप्रवृत्तितन्त्रमेवेत्येवं सति भाव एव, तदनर्थान्तरत्वात् तत् स्वात्मवत्, भवनार्थान्तरत्वे वा व्योमोत्पलादिवदसत्त्वं विकल्पानां रासभविषाणादिसत्त्वं वा घटादिवद् भवनार्थान्तरत्वात्, एतद्दर्शनपुरस्सरा एव च सर्वनित्यत्वैकत्वकारणमात्रत्वादिवादाः कालपुरुषस्वभावदैवादयश्चेति भावः। निश्चयासद्गृहीतानां विधिपूर्वकमवहरणं व्यवहारः। यदि घटादिभेदश्रुत्या स्वसामान्यानुबद्धस्य

व्यवहारस्य व्याख्या

निरस्तसामान्यान्तरसम्बन्धस्य श्रूयमाणत्वानुगुणमेव ग्रहणं न स्यात्, किन्तु सर्वव्यपदेशविशेषाभिव्यङ्ग्यो भाव एव तेन तेन रूपेणाभिव्यज्यते, ततो घटाद्यन्यतरभेदश्रुतौ सर्वरूपभेदभावप्रतीतिप्रसङ्गस्ततश्च घटपटोदकादिरूपव्यतिकरभावान्निश्चयाभावप्रसङ्गः, उपदेशक्रियोपभोगापवर्गव्यवस्थादीनां चाभावात् सर्वसंव्यवहारोच्छेदः, सर्वविशेषव्याकरणे च निर्निबन्धनभवनाभावाद् भावाभाव एव, अविशेषत्वाभेदत्वानिरूप्यत्वादितमश्च[3] नैवासौ भावः खरविषाणादिवत्, तस्माद् व्यवहारोपनिपतितसामान्योपनिबन्धनं तु यदेव यद् यदा द्रव्यं पृथिवीघटादि व्यपदिश्यते तदेव तत् तदा त्रैलोक्याविभिन्नरूपं सततमवस्थितापरित्यक्तात्मसामान्यं महासामान्यप्रतिक्षेपेण संव्यवहारमार्गमास्कन्दतीति। एवंविधवस्तूपनिबन्धनैव च वर्णाश्रमप्रतिनियतरूपा यमनियमगम्यागम्यभक्ष्याभक्ष्यादिव्यवस्था, कुम्भकारादेश्च मृदानयनावमर्दनशिवकस्थासकादिकरणप्रवृत्तौ वेतनकादिदानस्य साफल्यम्, अव्यवहार्यत्वाच्च शेषमवस्तु, व्योमेन्दीवरादिवदिति। ऋजु-सममकुटिलं सूत्रयति ऋजु वा श्रुतम् आगमोऽस्येति सूत्रपातनवद् वा ऋजुसूत्रः, यस्मादतीतानागतवक्रपरित्यागेन वर्तमानपदवीमनुधावति, अतः साम्प्रतकालावरुद्धपदार्थत्वात् ऋजु-

ऋजुसूत्रस्य विचारः

---

१ 'निश्चितेन' इत्यपि पाठः। २ 'भावनिश्चया०' इति क-ग-पाठः। ३ 'दितश्च' इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रः, एष च भावविषयप्रकारातीतानागतविषयवचनपरिच्छेदे प्रवृत्तः सर्वविकल्पातीतातिसम्प्रमुग्धसङ्ग्रहग्रहाविशिष्टत्वाद् व्यवहारस्यायथार्थतां मन्यमानः अचरणपुरुषगरुडवेगव्यपदेशवद् वतमानक्षणसमवस्थितिपरमार्थवस्तु व्यवस्थापयति, अतीतानागताभ्युपगमस्तु खरविषाणास्तित्वाभ्युपगमान्न भिद्यते, दग्धमृतापध्वस्तविषयश्चानाश्वासो न कस्यचिदपि स्यात्, अघटादिलक्षणमृदाद्यनर्थान्तरत्वाच्च घटादिकालेऽपि घटादितैव स्यात्, न च तदेव तदेकं मृद् द्रव्यमन्यथा वर्तते, किं तर्हि ? अन्यदेव, अन्यप्रत्ययवशाद् वाऽन्यथोत्पद्यत इति न पिण्डादिक्रियाकाले कुम्भकारव्यपदेशः, यदि चान्यदपि कुर्वन्नन्यस्य कर्तेत्युच्यते पटादिकरणप्रवृत्तोऽपि प्रत्याख्यातविज्ञानान्तरसम्बन्धः स्यादेव कुम्भकारः, ततश्चाशेषलोकव्यवहारोपरोध इत्यतः पूर्वापरभागवियुतः सर्ववस्तुगतो वर्तमानक्षण एव सत्यः, नातीतमनागतं चास्तीति, एतद्दर्शननिबन्धनं चैतदुपदिश्यते, "पिब च खाद च" इत्यादि "एतावानेष पुरुषः" इत्यादि वेति । शब्दनयः—शब्द एव, सोऽर्थकृतवस्तुविशेषप्रत्याख्यानेन[2] शब्दकृतमेवार्थविशेषं मन्यते, यद्यर्थाधीनो विशेषः स्यात् न शब्दकृतः, तेन घटवर्तमानकाले घट एव निर्विशेषः स्यात् कर्मकरणसम्प्रदानापादानस्वाम्यादिविशेषान् नाप्नुयात्, ततश्च घटं पश्यत्येवमादिकारककृतो व्यवहारः छिद्येत, समानलिङ्गादिशब्दसमुद्भावितमेव वस्त्वभ्युपैति नेतरत्, नहि पुरुषः स्त्री, यदीष्येत वचनार्थहानिः स्यात्, भेदार्थं हि वचनम्, अतः स्वातिः तारा नक्षत्रमिति लिङ्गतः, निम्बाम्रकदम्बा वनमिति वचनतः, स पचति त्वं पचसि अहं पचामि पचावः पचामः इति पुरुषतः, एवमादि सर्वं परस्परविशेषव्याघातादवस्तु, परस्परव्याघाताच्चैवमाद्यवस्तु प्रतिपत्तव्यम्, यथा शिशिरो ज्वलनः, तथा विरुद्धविशेषत्वात् तटस्तटी तटमित्यवस्तु, रक्तनीलमिति यथा, यद् वस्तु तदविरुद्धविशेषमभ्युपयन्ति सन्तः यथा घटः कुटः कुम्भ इति । तथा चोच्यते—यत्र ह्यर्थो वाचं न व्यभिचरत्यभिधानं तत्, एवमयं समानलिङ्गसङ्ख्यापुरुषवचनः शब्दः, एतद्दर्शनानुगृहीतं चोच्यते—" अर्थप्रवृत्तितत्त्वानां शब्द एव निबन्धनम्[3] " इति, एवमेते मूलनयाः पञ्च नैगमादयः । अत्र चाद्याश्चत्वारोऽर्थप्रधानत्वादर्थतन्त्रत्वात्, शब्दनयः पुनरर्थोपसर्जनः शब्दप्रधानः शब्दतन्त्र इति ॥ ३४ ॥

अधुनैषां यथासम्भवं भेदप्रतिपिपादयिषयाऽऽह—

सूत्रम्—आद्यशब्दौ द्वित्रिभेदौ ॥ १–३५ ॥

टी०—तत्र आद्यशब्दावित्यादि । तत्र नैगमादिषु पञ्चसु यौ आद्यशब्दौ तौ यथासङ्ख्यं द्वित्रिभेदौ भवतः, आद्यौ च तौ शब्दौ चेति समानाधिकरणसमासाशङ्कायामाह—

आद्यशब्दनयभेदाः

---

१ ' अन्यत्प्रत्यय ' इति ख–ग–पाठः । २ ' ख्यातेन ' इति ख–पाठः । ३ अस्योल्लेखो हरिकारिकायां शब्दाद्वैते । ४ ' तत्र आद्यशब्दौ ' इति ग–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—आद्य इति सूत्रक्रमप्रामाण्यान्नैगममाह। स द्विभेदो-देशपरिक्षेपी सर्वपरिक्षेपी चेति। शब्दस्त्रिभेदः-साम्प्रतः, समभिरूढः, एवम्भूत इति॥

टी०—आद्य इति सूत्रक्रमेत्यादि। आदौ भव आद्यः इत्यनेन सूत्रकारः कमाह?। उच्यते-**नैगमं**, कुत इति चेत्? **सूत्रक्रमप्रामाण्यात्** अर्थसूचनात् **सूत्रं** नैगमादि **क्रमः**-परिपाटी तस्य **प्रामाण्यमेवमाश्रयणं** तस्मान्नैगमनयं ब्रवीति, **स** आद्यो नैगमो द्विभेदो द्वौ भेदावस्येति द्विभेदः, तौ च भेदावाचष्टे-**देशपरिक्षेपी सर्वपरिक्षेपी च**। देशो-विशेषः परमाण्वादिगतस्तं परिक्षेप्तुं शीलमस्येति देशपरिक्षेपी, विशेषग्राहीत्यर्थः। **सर्वपरिक्षेपी** सर्वं-सामान्यम् एकं नित्यं निरवयवादिरूपं तत् परिक्षेप्तुं शीलमस्य स सर्वपरिक्षेपी, सामान्यग्राहीतियावत्। सामान्यविशेषरूपस्तु नोक्तः, अनुवृत्तिलक्षणश्चेत् सामान्यं, व्यावृत्तिलक्षणश्चेत् विशेषः, ततोऽन्यस्याभावात्। अथवा आद्यन्तयोर्ग्रहणात् तन्मध्यगतस्यापि ग्रहणम्। **शब्दस्त्रिभेद** इति शब्दनयस्त्रिभेदः त्र्यंश इति, तानाह-**साम्प्रत** इत्यादिना, **साम्प्रतं**-वर्तमानं भावाख्यमेव वस्त्वाश्रयति यतोऽतः **साम्प्रतः**, सम्प्रतिकाले यद् वस्तु भवत् तत् साम्प्रतं तद्वस्त्वाश्रयन् साम्प्रतोऽभिधीयते॥ ननु च 'कालाद्ठ(ट्ठ?)ञ्' (पा० ४।३।११) इति साम्प्रतिक इति भवितव्यम्, नैष दोषः, वर्तमानक्षणवर्तिवस्तुविषयोऽध्यवसायस्तद्भवः शब्दः साम्प्रतः, स्वार्थिको वा प्रज्ञादित्वात्। एष च मौलशब्दनयाभिप्रायाविशिष्ट इति न पृथगुदाहरणैर्विभावितः। यां यां संज्ञामभिधत्ते तां तां समभिरोहतीति **समभिरूढः**, सोऽभिदधाति-यदि लिङ्गमात्रभिन्नमवस्तु, विसंवादित्वात् रक्तनीलतादिवत्, एवं सति मूलत एव भिन्नशब्दं कथं वस्तु स्यात्? शब्देन ह्यर्थो निरुक्तीक्रियते एतस्मान्निरुक्तादेष इति, यत्र तद्भेदस्तद्भिन्नमेव, यथा तु पूर्वनयेनैकं कृत्वोच्यते इन्द्रशक्रादि तथा यदवस्तु, घटज्वलनादिवद् भिन्ननिमित्तत्वात्, अनयोरेकत्वेनावस्तुता। एवं घटकुटयोरपि चेष्टाकौटिल्यनिमित्तभेदात् पृथक्ता, तथा प्रकृतिप्रत्ययोपात्तनिमित्तभेदाद् भिन्नौ शक्रेन्द्रशब्दावेकार्थौ न भवतः, विविक्तनिमित्तावबद्धत्वात् गवाश्वशब्दवत्। अथापि प्रतीतत्वादसंप्रमोहाल्लोके चैवं निरूढत्वात् इन्द्रशब्दस्य पुरन्दरादयः पर्याया इत्येतदनुपपन्नम्, एवं हि सामान्यविशेषयोरपि पर्यायशब्दत्वं स्यादेव, यतः प्लक्ष इत्युक्ते द्राक् वृक्षेऽस्ति सम्प्रत्ययः, अस्तित्वासम्प्रमोहे च संज्ञान्तरकल्पनायामिहापि तद्भुक्तादनुक्तप्रतिपत्तौ सत्यां पर्यायत्वप्रसङ्गः प्रविश पिण्डीं, भक्षयेत्यस्य गमात्, तथाऽस्तिर्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्तीति गम्यते, वृक्षः प्लक्षोऽस्तीति गम्यते, न्यायादस्तिः पर्यायः प्राप्तः, तस्माद् भेदः साधीयान् दन्तिहस्तिनोश्चैकत्वाद् दन्तहस्तैकत्वप्रसङ्ग इति। एवं संज्ञान्तरोक्तेः संज्ञा-

नैगमस्य द्वैविध्यम्

शब्दस्य त्रैविध्यम्

---

१ 'किमाह' इति क-ख-पाठः। २ 'गमनात्' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्तराभिधानमवस्त्विति प्रतिपादिते एवम्भूतनय आह–निमित्तं क्रियां कृत्वा शब्दाः प्रवर्तन्ते, नहि यदृच्छाशब्दोऽस्ति, अतो घटमान एव घटः, कुटंश्च कुटो भवति, पूर्दारणप्रवृत्त एव पुरन्दरः, यथा दण्डसम्बन्धानुभवनप्रवृत्तदासस्यैव दण्डित्वम्, अन्यथा व्यवहारलोपप्रसङ्गः। न चासौ तदर्थः, अनिमित्तत्वाद् यथा बहुत्वैकवचनम्, इति समुच्चये परिसमाप्तौ च ॥

भा०–अत्राह—किमेषां लक्षणमिति ?। अत्रोच्यते—

टी०–अत्राहेत्यादि। अस्मिन्नवसरे नैगमादीनामध्यवसायविशेषाणां लक्षणजिज्ञासया विविक्तचिह्नपरिज्ञानाभिप्रायेणाह–किं लक्षणमेषामिति। अत्रोच्यते–लक्षणम्—

नैगमलक्षणम् भा०–निगमेषु येऽभिहिताः शब्दास्तेषामर्थः शब्दार्थपरिज्ञानं च देशसमग्रग्राही नैगमः ॥

टी०–निगमेष्वित्यादि। न चैतानि सूत्राण्यवृत्तित्वात्, कैश्चित् पुनर्भ्रान्त्या सूत्राणीति प्रतिपन्नम्, तत्र नैगम इत्यस्यावयवप्रविभागेन व्याख्यानं–निश्चयेन गम्यन्ते–उच्चार्यन्ते–प्रयुज्यन्ते येषु शब्दास्ते निगमा–जनपदाः तेषु निगमेषु–जनपदेषु ये इत्यक्षरात्मकानां ध्वनीनां सामान्यनिर्देशः अभिहिता–उच्चारिताः शब्दा–घटादयस्तेषामर्थो–जलधारणाहरणादिसमर्थः, शब्दार्थपरिज्ञानं चेति शब्दस्य घटादिरर्थोऽभिधेयस्तत्परिज्ञानम्–अवबोधः, घट इत्यनेनायमर्थ उच्यते अस्य चार्थस्य अयं वाचक इति, यदेवंविधमध्यवसायान्तरं स नैगमः, स सामान्यविशेषावलम्बीत्येतद् दर्शयति–देशसमग्रग्राहीति। यदा हि स्वरूपतो घटमयं निरूपयति तदा सामान्यघटं सर्वसमानव्यक्त्याश्रितं घट इत्यभिधानप्रत्ययहेतुमाश्रयत्यतः समग्रग्राहीति। तथा विशेषमपि सौवर्णो मृण्मयो राजतः श्वेत इत्यादिकं विशेषं निरूपयत्यतो देशग्राहीति भण्यते नैगमनयः ॥

सम्प्रति सङ्ग्रहस्य लक्षणमाह—

सङ्ग्रहलक्षणम् भा०–अर्थानां सर्वैकदेशग्रहणं सङ्ग्रहः ॥

टी०—अर्थानामित्यादि। अर्थानां–घटादीनां सर्वैकदेशग्रहणमिति सर्वसामान्यं एकदेशो–विशेषः तयोः सर्वैकदेशयोः–सामान्यविशेषात्मकयोरेकीभावेन ग्रहणम्–आश्रयणमेवंविधोऽध्यवसायः सङ्ग्रहो भण्यते। एकीभावेन ग्रहणमेवं द्रष्टव्यम्—यौ हि सामान्यविशेषौ नैगमाभिमतौ तौ सम्पिण्डय सङ्ग्रहनयः सामान्यमेव केवलं स्थापयति सत्तास्वभावम्, यतः सत्तातो न व्यतिरिच्यते विशेषः ॥

व्यवहारलक्षणाभिधित्सयाऽऽह—

व्यवहारलक्षणम् भा०–लौकिकसम उपचारप्रायो विस्तृतार्थो व्यवहारः ॥

टी०–लौकिकेत्यादि। लोके–मनुष्यादिस्वभावे विदिताः लौकिकाः–पुरुषास्तै

१ 'सूक्ष्माण्य' इति ख–पाठः। २ 'किंचित्' इति ख–ग–पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समः–तुल्यः, यथा लौकिका विशेषैरेव घटादिभिर्व्यवहरन्ति तथाऽयमपीत्यतस्तत्समः, **उपचारप्राय** इति। उपचारो नामान्यत्र सिद्धस्यार्थस्यान्यत्राध्यारोपो यः, यथा कुण्डिका स्रवति, पन्था गच्छति, उदके कुण्डिकास्थे स्रवति कुण्डिका स्रवतीत्युच्यते, पुरुषे च गच्छति पन्था गच्छतीति। एवमुपचारप्राय उपचारबहुल इत्यर्थः। विस्तृतो–विस्तीर्णोऽनेकोऽर्थो ज्ञेयो यस्य स **विस्तृतार्थः** अध्यवसायविशेषो **व्यवहार** इति निगद्यते ॥

ऋजुसूत्रलक्षणव्याचिख्यासया आह—

ऋजुसूत्रलक्षणम् **भा०—सतां साम्प्रतानामर्थानामभिधानपरिज्ञानमृजुसूत्रः**॥

टी०—सतामित्यादि। **सतां**–विद्यमानानां, न खपुष्पादीनामसतां, तेषामपि **साम्प्रतानां**–वर्तमानानामितियावत् **अर्थानां** घटादीनां **अभिधानं**–शब्दः **परिज्ञानम्**–अवबोधो विज्ञानमितियावत्, अभिधानं च **परिज्ञानं** चाभिधानपरिज्ञानं यत् स भवति ऋजुसूत्रः। एतदुक्तं भवति–तानेव व्यवहारनयाभिमतान् विशेषानाश्रयन् विद्यमानान् वर्तमानक्षणवर्तिनोऽभ्युपगच्छन्नभिधानमपि वर्तमानमेवाभ्युपैति नातीतानागते, तेनानभिधीयमानत्वात् कस्यचिदर्थस्य, तथा परिज्ञानमपि वर्तमानमेवाश्रयति, नातीतमागामि वा, तत्स्वभावानवधारणात्, अतो वस्त्वभिधानं विज्ञानं चात्मीयं वर्तमानमेवान्विच्छन्नध्यवसायः स ऋजुसूत्र इति ॥

शब्दनयस्य त्रिभेदस्य लक्षणप्रचिकाशयिषया आह—

शब्दलक्षणम् **भा०—यथार्थाभिधानं शब्दः** ॥

टी०—यथेति। येन कारणेन भावरूपेण नामस्थापनाद्रव्यवियुतेनार्थो घटादिर्यथार्थः तस्याभिधानं शब्दः **यथार्थाभिधानं**, तदाश्रयी योऽध्यवसायः स **शब्दनयतयाऽभिधीयते**। वर्तमानमात्मीयं विद्यमानं भावघटमेवाश्रयति नेतरानिति ॥

इदानीमस्य शब्दनयस्य यत् पुरस्तात् त्रैविध्यं दर्शितं'शब्द–त्रिभेदः साम्प्रतः, समभिरूढ एवम्भूत' इति, अस्याद्यभेदलक्षणोद्विभावयिषया आह—

साम्प्रतलक्षणम् **भा०—नामादिषु प्रसिद्धपूर्वाच्छब्दादर्थे प्रत्ययः साम्प्रतः** ॥

टी०—नामेत्यादि। नामस्थापनाद्रव्यभावेषु नम्यमाने वस्तुनि घटादौ स्थाप्यमाने वाऽऽकारात्मना द्रव्ये च गुणसंद्रावात्मके भावे च प्रतिविशिष्टपर्यायरूपे **प्रसिद्धपूर्वात्** प्रसिद्धो–निर्ज्ञातः पूर्वमिति–संज्ञासंज्ञिसम्बन्धकाले प्रसिद्धोऽसौ घटादिशब्दोऽभिधानतया तेषां नामादीनामस्य घटादेरर्थस्यायं वाचक इत्येवं प्रसिद्धपूर्वाद् वाच्यवाचकलक्षणसम्बन्धसङ्केतनाद् योग्यतालक्षणसम्बन्धावगतेर्वा, **शब्दादिति**, अभिधानात् नाम्न इतियावत् **अर्थे**–अभिधेये यः **प्रत्ययो**–विज्ञानं स **साम्प्रतो** नयः। एतदुक्तं भवति–**नामादिषु** प्रतिविशिष्टवर्तमानपर्यायापन्नेष्वेव प्रसिद्धो वाचकतया यः शब्दस्तस्माच्छब्दात् भावाभिधा-

१ 'लक्षणाचिख्यासया' इति ग–टी–पाठः। २ 'लक्षणान्विभावयिषया' इति पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यिनः तद्वाच्येऽर्थे भावरूपे प्रवृत्तोऽध्यवसायः साम्प्रताख्यामासादयति। यतो भाव एव शब्दाभिधेयो भवति, तेनाशेषाभिलषितकार्यकरणादिति ॥

अधुना समभिरूढलक्षणं दर्शयन्नाह—

समभिरूढलक्षणम् **भा०—सत्स्वर्थेष्वसङ्क्रमः समभिरूढः ॥**

टी०—सत्स्वर्थेषु इत्यादि। **सत्सु**—विद्यमानेषु वर्तमानपर्यायापन्नेष्वित्यर्थः, **अर्थेषु**—घटादिषु **असङ्क्रम** इत्यन्यत्रागमनं शब्दस्य यत् सोऽसङ्क्रमः। यथा घट इत्यस्य शब्दस्य विद्यमानं घटं चेष्टात्मकं विरहय्य नान्यत्र कुटाद्यर्थे घटाभिधानसामर्थ्यमस्ति, अनभिधेयत्वात्, यदि चास्य घटशब्दस्य कुटादिरर्थोऽभिधेयो भवेदेवं सति यथोक्ताः सर्वसङ्करत्वादयो दोषा उपजायेरन् नित्यतो न शब्दान्तराभिधेयोऽर्थोऽन्यस्य शब्दस्याभिधेयो भवति, एवमसङ्क्रमगवेषणपरोऽध्यवसायः **समभिरूढः** ॥

एवम्भूतनयलक्षणोन्निनीषया आह—

एवंभूतलक्षणम् **भा०—व्यञ्जनार्थयोरेवम्भूत इति ॥**

टी०—व्यञ्जनेत्यादि । व्यञ्जनं—शब्दस्तस्यार्थः—अभिधेयो वाच्यम् तयोर्व्यञ्जनार्थयोरेवं संघटनं करोति घट इति यदिदमभिधानं तच्चेष्टाप्रवृत्तस्यैव जलधारणाहरणसमर्थस्य वाचकं, चेष्टां च जलाद्यानयनरूपां कुर्वाणो घटो मतः, न पुनः क्रियातो निवृत्तः, इत्थं यथार्थतां प्रतिपद्यमानोऽध्यवसाय एवम्भूतोऽभिधीयते इति ॥

नयस्य शब्दार्थः

भा०—अत्राह—उद्दिष्टा भवता नैगमादयो नयाः। तत्र[1] नया इति कः पदार्थ इति ?। अत्रोच्यते—नयाः प्रापकाः कारकाः साधका निर्वर्तका निर्भासका उपलम्भका व्यञ्जका इत्यनर्थान्तरम् ॥

टी०—अत्रावकाशे चोदकः प्रश्नयति—**उद्दिष्टाः**—अभिहिताः लक्षणतस्त्वया—**नैगमादयः** पञ्च। तत्र नैगमादिसूत्रे, **नया** इति यदभिधानं तस्यानेककारकसन्निधाने सति कः प्रत्ययार्थो ग्राह्य इति संशयानः पृच्छति—**तन्नया इति कः पदार्थः ?**। तदित्यनेन बहुवचनान्तमभिधानं नया इत्येतन्निर्दिशति, **नया इति** तु इतिशब्दः नया इत्यस्य पदार्थविपर्यासकृत्, नया इत्यस्य शब्दस्य कः पदार्थः ॥ ननु च कोऽर्थ इयता सिद्धः ? तत्र पदार्थ इति पदग्रहणमतिरिच्यते ?। उच्यते—शब्दस्य हि सिद्धोऽर्थो वाच्यो गम्यश्च, यथा गुड इत्युक्ते द्रव्यं वाच्यम्, माधुर्यादयस्तु गम्याः, एवमिहापि वाच्योऽर्थो यः कश्चित् कर्त्रादिरूपः शेषस्तु गम्य इति, तत्रेह वाच्यमर्थं पदग्रहणेन प्रश्नयति, पदस्यार्थो वाच्यः क इति, न तु गम्यमानम्, सूरिराह—**अत्रोच्यते—नयाः प्रापका** इत्यादिना, कर्त्रर्थः प्रदर्श्यते—नयन्त इति नयाः, सामान्यादिरूपेणार्थं प्रकाशयन्तीत्यर्थः। प्रापका इत्यनेन नयतेरन्तर्णीतण्यर्थता ख्यायते, प्रापयन्ति आत्मनि तं तमर्थं स्वाभिमताभिरुपपत्तिभिरिति। कुर्वन्तीत्यादिभिस्तु

---

१ 'वाच्यः' इति ख-पाठः। २ 'तन्नया' इति ध-पाठः, स एव च टीकाकारसम्मतः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नयतेरर्थान्तरतापि शक्या कल्पयितुमित्येतद् दर्शयति—कुर्वन्ति तद् तद् विज्ञानमात्मन इति **कारकाः**, अपूर्वं प्रादुर्भावयन्ति विज्ञानमितियावत् । तथा सिद्धिवचनोपायं साधयन्ति शोभनामन्योन्यव्यावृत्त्यात्मिकां विज्ञप्तिं जनयन्त्यतः **साधकाः** । तथा वर्तमानार्थोऽपि निर्वर्तका इति निश्चितेन स्वेनाभिप्रायेणोत्पन्नाः तेऽध्यवसायविशेषा नाशमनासादयन्तो **निर्वर्तका** इति । तथा दीप्त्यर्थोऽप्ययम् । **निर्भासकाः** वस्त्वंशज्ञापनपरत्वात् । तथोपलब्ध्यर्थताऽप्यस्य उपलम्भका इति दर्शयत्यनेन, प्रतिविशिष्टक्षयोपशमापेक्षत्वात् तांस्तानर्थविशेषानत्यन्तसूक्ष्मानवगाहमानाः **उपलम्भका** इति । व्यञ्जनार्थोऽप्ययं **व्यञ्जका** इत्यनेन कथयति, व्यञ्जयन्ति—स्पष्टयन्ति—स्फुटीकुर्वन्ति स्वाभिप्रायेण वस्तु, यथाऽऽत्मस्वभावे स्थापयन्तीत्यर्थः । एवमेते किञ्चिद् भेदं प्रतिपन्ना अपि शब्दा भाष्यकारेणानर्थान्तरमिति व्यपदिष्टा **इत्यनर्थान्तरमिति** ॥

सकर्मकाणां प्राप्येण कर्मणा भवितव्यमिति दर्शयति—

भा०—जीवादीन् पदार्थान् नयन्ति प्राप्नुवन्ति कारयन्ति साधयन्ति निर्वर्तयन्ति निर्भासयन्ति उपलम्भयन्ति व्यञ्जयन्तीति नयाः ॥

टी०—जीवादीन् पदार्थान् नयन्तीत्यादि । अत्र च णीजः प्रयोगो नयतेरर्थ इति **जीवादीन्** शास्त्रप्रतिपाद्यान् सप्त **पदार्थान्** इत्यनेन वाच्यान् व्यपदिशति, न गम्यान्, **तान् नयन्ति** इति नयाः । नयन्तीत्यादिना च यः कर्ता दर्शितस्तमेवानन्यं क्रियातो दर्शयति, यतो नयाः नयन्त इत्यनेन कर्तुः प्राधान्यं क्रियायां गुणभाव इति कैश्चित् प्रतिपन्नं क्रियायाः प्राधान्यं कर्तुर्गुणभाव इति, इह तथा नात्यन्तिकः कर्तृक्रिययोर्भेदोऽस्तीति, यतः स एव पदार्थः कर्तेत्येव व्यपदिश्यते स्वतन्त्रत्वात्, तथा स एव च साध्यात्मना वर्तमानः क्रियेत्याख्यायते, अतः कर्तृक्रिययोरनेनात्यन्तिकं भेदं निरस्यति—**नयन्ति** इत्यादिना ॥

नयशब्दार्थे निरूपिते चोदकोऽचूचुदत्—

भा०—अत्राह—किमेते तन्त्रान्तरीया वादिन आहोस्विद् स्वतन्त्रा एव चोदकपक्षग्राहिणो मतिभेदेन विप्रधाविता इति ? । अत्रोच्यते—**नैते तन्त्रान्तरीयाः, नापि स्वतन्त्राः मतिभेदेन विप्रधाविताः । ज्ञेयस्य त्वर्थस्याध्यवसायान्तराण्येतानि ।**

नयानामध्यवसानान्तरता

टी०—य एते नैगमादयो वस्त्वंशपरिच्छेदव्यापृता नयाः किमेते तन्त्रान्तरीया इत्यादि, तन्यन्ते—विस्तार्यन्तेऽस्मिन्ननेन वा जीवादयः पदार्थाः तन्त्रं—जैनप्रवचनं तस्मादन्यत् काणभुजादिशास्त्रं तन्त्रान्तरं तस्मिन् भवाः कुशला वा **तन्त्रान्तरीयाः** । गहादित्वाच्छः । स्वशास्त्रसिद्धानर्थानवश्यं वदन्तीति **वादिनः**, तत् किं वैशेषिकादयो वादिनो नया भण्यन्ते ? **आहोस्वित्** अथवेत्यस्य पक्षान्तरसूचकस्य निपातस्यार्थे प्रयुक्तः । **स्वतन्त्रा एवेति** । स्वं—आत्मीयं तन्त्रं—शास्त्रं येषां ते स्वतन्त्राः, स्वप्रधानाः जिनवचनमेव

१ '.तानासादयन्तो' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वबुद्ध्या विभजन्त एवमाहुः । **चोदकपक्षग्राहिण इति** । चोदको-दुरुक्तानुक्तादिसूचकस्तस्य पक्षो-विषयः तं चोदकपक्षं ग्रहीतुं शीलमेषामिति चोदकपक्षग्राहिणः **मतिभेदो**-बुद्धिभेदस्तेन **विप्रधाविताः**,अयथार्थनिरूपका इतियावत् । एवं चोदयतोऽयमभिप्रायः-यद्ययं तन्त्रान्तरीयत्वमेषां दर्शयिष्यति नास्य वक्ष्यमाणो विप्रतिपत्तिदोष आपत्स्यते, अथ स्वतन्त्रा एवेति निश्चेष्यति तथा सति नैव स्वेच्छास्वतन्त्राणामभ्यनुज्ञातो वस्त्वंशोऽभ्युपेयो वस्तुभागश्च प्रोज्झ्यः, यस्मादेकस्यापि पदस्यारोचनान्मिथ्यादर्शनमिति । एवंविधदोषोपचिक्षिप्सया चोदयति ॥ अथ पक्षान्तरमाश्रयिष्यति तत्राप्यस्य सुखेन विप्रतिपत्तिदोषं चोदयिष्यामीति मत्वा प्रश्नयति, सूरिस्तूभयमप्येतत् परित्यजन् पक्षान्तरमाश्रयते अत्रोच्यते इति ॥ **नैते तन्त्रान्तरीयाः, नापि स्वतन्त्राः**, किं तर्हि ? तदाह-**ज्ञेयस्येत्यादि**। विज्ञानगम्यस्य जीवादेः स्वसंवेद्यस्य वाच्यस्यार्थस्य घटपटादेः **अध्यवसायान्तराणि** विज्ञानभेदाः, आधिक्येनावसीयन्ते-परिच्छिद्यन्ते ततो येन सोऽध्यवसायः-प्रत्ययो विज्ञानम् अन्तराणीति भेदाख्यानम्, **एतानीति** नैगमादीनि पञ्च, एतत् कथितं भवति-वस्त्वेवानेकधर्मात्मकमनेकाकृतिना ज्ञानेन निरूप्यत इत्यतः स्वशास्त्रनिरूपणमेवेदम्, एतच्च दर्शयति—

घटे नयावतारः

भा०—तद्यथा—घट इत्युक्ते योऽसौ चेष्टाभिनिर्वृत्त ऊर्ध्वकुण्डलौष्ठायतवृत्तग्रीवोऽधस्तात् परिमण्डलो जलादीनामाहरणधारणसमर्थ उत्तरगुणनिर्वर्तनानिर्वृत्तो द्रव्यविशेषस्तास्मिन्नेकस्मिन् विशेषवति तज्जातीयेषु वा सर्वेष्वविशेषात् परिज्ञानं नैगमनयः ॥

टी०—तद्यथेत्यादिना । यथा ह्येते एकवस्तुविषया विज्ञानविशेषास्तथोदाहरणेन भावयति-**घट इत्युक्ते** नैगमाध्यवसाय एवं मन्यते-**योऽसाविति** लोकसिद्धः, **चेष्टाभिनिर्वृत्त** इति धात्वर्थानुगतिमाविष्करोति, कुम्भकारचेष्टाभिनिर्वृत्तोऽर्थो निष्पन्नः । किमाकार इति चेद् ? अत आह-**ऊर्ध्वमित्यादि**। ऊर्ध्वमुपरि **कुण्डलौ** वृत्तावोष्ठौ यस्य **आयता**-दीर्घा **वृत्ता**-समपरिधिः ग्रीवा यस्य ऊर्ध्वकुण्डलौष्ठश्चासावायतवृत्तग्रीवश्चेति समानाधिकरणः, उपरि तावदेवमाकारः । अथ **अधस्तात्** किमाकार इत्यत आह-अधोभागे **परिमण्डलः**, समन्ताद् वृत्त इत्यर्थः । कस्य पुनः कार्यस्यासौ क्षम इत्याह-**जलादीनामित्यादि** । जलघृतक्षीरादीनामाहरणे-देशाद् देशान्तरसञ्चारणे **समर्थः**-शक्तः आनीतानां च धारणे प्रत्यलः । **उत्तरेत्यादि** । पाकजरक्तादिगुणपरिसमाप्त्या निष्पन्नद्रव्यविशेष इति । न द्रव्यं सामान्यमात्रं, किं तर्हि ? **द्रव्यविशेषः**, परमार्थे सति, वाचा न संवृत्तिसतीति, **तास्मिन्** एवमात्मके **एकस्मिन् विशेषाः** शुक्लपीतादयः कनकरजतादयः खण्डहुण्डादयो वा तद्वति **तज्जातीयाः**-तत्प्रकाराः व्यावर्णितघटप्रकाराः तेषु च **सर्वेषु** लोकप्रसिद्धेषु **अविशेषात्** अभेदेन **परिज्ञानं**-निश्चितावबोधः **नैगमः** देशसमग्रग्राही नैगम इति, पूर्वाभिहितलक्षणप्रपञ्चोऽयं सामान्यविशेषवैचित्र्यप्रदर्शनार्थः ॥

१ 'एवं च' इति ख-ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ सङ्ग्रहः कथं घटमिच्छतीत्याह—

भा०—एकस्मिन् वा बहुषु वा नामादिविशेषितेषु साम्प्रतातीतानागतेषु घटेषु सम्प्रत्ययः सङ्ग्रहः ॥

टी०—एकस्मिन्नित्यादि । एकस्मिन् घटे **बहुषु** घटेषु **वा नामादिविशेषितेष्विति** नामस्थापनाद्रव्यभावघटेष्वित्यर्थः । **साम्प्रतेषु**–वर्तमानेष्वतीतेषु–अतिक्रान्तेष्वनागतेषु–आगामिषु घटेषु यः **सम्प्रत्ययः**–सामान्यं घटो घट इति परिज्ञानं **स सङ्ग्रहः**, यस्मात् सामान्यमेव घटादिरूपेण निर्भासते, न सामान्यादन्ये विशेषाः सन्ति ॥

व्यवहाराभिप्रायप्रकटनायाह—

भा०—तेष्वेव लौकिकपरीक्षकग्राह्येषूपचारगम्येषु यथास्थूलार्थेषु सम्प्रत्ययो व्यवहारः ॥

टी०—तेष्वित्यादि । एकद्वित्वबहुत्वनामादिरूपेषु लोके विदिता लौकिकाः परीक्षकत्वेन ज्ञाताः **लौकिकपरीक्षकाः**–पर्यालोचकाः तेषां **ग्राह्याः**–आदेयाः जलाद्याहरणार्थं ये घटास्तेषु, **उपचारगम्येष्विति** लोकक्रियाधारेषु, **यथास्थूलार्थेष्विति** सूक्ष्मसामान्योपसर्जनेषु, यतोऽस्य विशेषैरेव व्यवहारो भूयसा, न सामान्येनेति ॥

ऋजुसूत्रनयमतं विवृणोति—

भा०—तेष्वेव सत्सु साम्प्रतेषु सम्प्रत्ययः ऋजुसूत्रः ॥

टी०—तेष्वेवेत्यादि । घटेषु **सत्सु**–विद्यमानेषु वर्तमानसमयावधिकेषु **सम्प्रत्ययः ऋजुसूत्र** इति ॥

अधुना साम्प्रताभिप्रायं निरूपयति—

भा०—तेष्वेव साम्प्रतेषु नामादीनामन्यतमग्राहिषु प्रसिद्धपूर्वकेषु घटेषु सम्प्रत्ययः साम्प्रतः शब्दः ॥

टी०—तेष्वेवेत्यादि । ऋजुसूत्राभिप्रेतेषु वर्तमानकालावधिकेषु नामस्थापनाद्रव्यभावघटानां ये वाचकाः शब्दास्ते चान्यतमग्राहिणः, यस्माद् यस्य शब्दस्य **नम्यमानः** पदार्थो वाच्यो न तस्य स्थापना, यस्य वा स्थापना न तस्य द्रव्यं, यस्य द्रव्यं न तस्य भावः इत्यतो **नामादीनां** घटानां ये शब्दाः अन्यतमं–नामस्थापनादिकं गृह्णन्ति तेऽन्यतमग्राहिणस्तेषु शब्देषु उच्चारितेष्वन्यतमग्राहिषु[1] यद् विज्ञानं स साम्प्रतः, ते शब्दा यदि प्रसिद्धाः पूर्वं भवन्ति–निर्ज्ञाताभिधेयसम्बन्धाः अस्येदं वाच्यमित्यनेन रूपेण, तथा गमका इत्येतदाह–**प्रसिद्धपूर्वकेषु**, प्रसिद्धः पूर्वो येषां प्रथमं सङ्केतस्ते प्रसिद्धपूर्वकास्तेषु नामादीनामन्यतमवाचकेषु **सम्प्रत्यय** इति ॥

समभिरूढमतोद्भिभावयिषया आह—

---

१ ' उच्चरितेषु ' इति **ख**-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—तेषामेव साम्प्रतानामध्यवसायासङ्क्रमो वितर्कध्यानवत् समभिरूढः ॥

टी०—तेषामेव घटानां सतां—विद्यमानानां वर्तमानकालावधिकानां सम्बन्धी योऽध्यवसायासङ्क्रमः स समभिरूढः, अध्यवसायो—विज्ञानं तस्य विज्ञानस्योत्पादकत्वाभिधानमप्यध्यवसायस्तस्यासङ्क्रमः—अन्यत्र वाच्येष्वप्रवृत्तिः, नहि घट इत्यस्याभिधानस्य कुटो वाच्यः, कुट इत्यस्य वा घट इति । अध्यवसायासङ्क्रमं च दृष्टान्तेन भावयति—**वितर्कध्यानवदिति** । अन्यतमैकयोगानामेकत्वं वितर्कमिति वक्ष्यति नवमेऽध्याये (सू०४१), वितर्कः श्रुतं, वितर्कप्रधानं ध्यानं वितर्कध्यानं तद्वत् ॥ नन्वाद्येऽपि शुक्लभेदे वितर्कप्रधानता समस्ति ? नैवम्, तत्र सङ्क्रमाभ्युपगमात् 'अविचारं द्वितीयम्' (अ०९,सू०४४) इति वचनात् एकत्ववितर्कपरिग्रह इति ॥

एवम्भूताभिप्रायमाविष्करोति—

भा०—तेषामेव व्यञ्जनार्थयोरन्योन्यापेक्षार्थग्राहित्वमेवम्भूत इति ॥

टी०—तेषामेवेत्यादि । **तेषामेवानन्तरनयपरिगृहीतघटानां यौ व्यञ्जनार्थौ तयोरन्योन्यापेक्षार्थग्राही** योऽध्यवसायः स एवम्भूतः परमार्थः व्यञ्जनं वाचकः शब्दः, अर्थोऽभिधेयो वाच्यः । अथ का पुनरन्योन्यापेक्षा ?, यदि यथा व्यञ्जनं तथार्थो यथा चार्थस्तथा व्यञ्जनम्, एवं हि सति वाच्यवाचकसम्बन्धो घटते अन्यथा न, योग्यक्रियाविशिष्टमेव वस्तुस्वरूपं प्रतिपद्यत इति ॥

एवं भाविते नयानामभिप्राये चोदकः स्वाभिप्रायमभिव्यनक्ति—

भा०—अत्राह—एवमिदानीमेकस्मिन्नर्थेऽध्यवसायनानात्वात् ननु विप्रतिपत्तिप्रसङ्ग इति । अत्रोच्यते—

टी०—एवमिदानीमेकस्मिन्नित्यादिना भाष्येण । **एवमिति** यथा प्रतिपादितैरेकवस्तुनि परस्परविलक्षणैर्भेदैः, **इदानीमित्येतत्** पूर्वाभिहितनयवादकालापेक्षया प्रयुज्यते, एवमवस्थिते नयप्रस्थानेऽधुना इदमापनीपद्यते—**एकस्मिन्नर्थे** घटवस्तुनि, बहुष्वर्थेषु न दोषाशङ्काऽस्ति, प्रतिवस्तु नयप्रवृत्तेः, **एकस्मिन् पुनरध्यवसायनानात्वाद्** विज्ञानभेदात्, **ननु**शब्दो मीमांसायां, मीमांसनीयमेतदेवं, **विप्रतिपत्तिप्रसङ्ग** इति, विरुद्धत्वप्रतीतिर्विप्रतिपत्तिस्तस्याः प्रसङ्गोऽनिष्टमितियावत्, न ह्येकमेव वस्तु सामान्यं सत् पुनर्विशेषो भवति, त्रैकालिकः[1] वर्तमानक्षणावधिको वा, नामादित्रयनिरासाद् वा भावमात्रं पर्यायशब्दानभिधेयो वा विशिष्टक्रियाविष्टो वा वस्तुविशेष इति, विरुद्धाः प्रतीतयः सकलाः प्रतीयन्त इति, न च विरुद्धप्रतीतिकः पदार्थो निश्चेतुं शक्यते, न चानिश्चयात्मकं तत्त्वज्ञानमित्याकुमारसिद्धिः । शास्त्रकारस्तु येनाभिप्रायेण ज्ञेयस्यार्थस्याध्यवसायान्तराण्येतानीत्युक्तवान् तं प्रचिकटयिषुराह—**अत्रोच्यते विप्रतिपत्तिपरिहारः—**

---

१ 'त्रैकालिकः' इति ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वस्यैकत्वादि

भा०-यथा सर्वमेकं सदविशेषात्। सर्वं द्वित्वं जीवाजीवात्मकत्वात्। सर्वं त्रित्वं द्रव्यगुणपर्यायावरोधात्। सर्वं चतुष्टयं चतुर्दर्शनविषयावरोधात्। सर्वं पञ्चत्वं पञ्चास्तिकायात्मकत्वात्। सर्वं षट्कं षड्द्रव्यावरोधादिति। यथैता न विप्रतिपत्तयोऽथ चाध्यवसायस्थानान्तराण्येतानि, तद्वन्नयवादा इति॥

टी०-यथेत्यादि। सकलं जगदनेकावयवात्मकमपि सत्तामात्रव्याप्तेरविशेषादेकमुच्यते। एकं च सद् द्विधा, जीवाजीवमात्रविवक्षावशात्। कथं पुनरेकसङ्ख्याव्यवच्छिन्नं सद् द्वित्वसङ्ख्याया गोचरीभवति?, न च काल्पनिकमेतत्, अंशसद्भावात्, तस्मान्नास्ति विरोधः, एवं नयेष्वप्यविरोधप्रतिपत्तिः साधीयसीति। तथा तदेवैकं त्रिधा, द्रव्यगुणपर्यायेषु सर्वस्यावरुद्धत्वाद्, गुणपर्यायाणामन्वयि द्रव्यं, गुणा रूपादयः, पर्यायाः कपालादयः, सहभूत्वं क्रमभूत्वं चादाय भेदेनोपादानमिति। तथा तदेवैकं चतुर्धा, चक्षुर्दर्शनादिभिश्चतुर्भिः सर्वस्य विषयीकृतत्वात् तन्मात्रता। तथा तदेव पञ्चस्वभावं निरूप्यते, पञ्चास्तिकायात्मकत्वात्, एतदाह-सर्वं पञ्चत्वमास्तिकायावरोधात्[1], पञ्चस्वभावं सर्वमिदं जगत्, पञ्चभिरस्तिकायैरवरुद्धत्वात्, धर्माधर्माकाशजीवपुद्गलास्तिकायात्मकं यतः। तथा तदेव पञ्चस्वभावं षट्स्वभावं, षट्द्रव्यसमन्वितत्वात्, तदाह-सर्वं षट्कं षड्द्रव्यावरोधात्, सर्वं षड्स्वभावं जगत्, कुतः? षड्द्रव्यावरोधादिति। षड् द्रव्याणि कथम्? उच्यते-पञ्च धर्मादीनि कालश्चेत्येक इति। यथा-येन प्रकारेण एताः एकद्वित्रिचतुःपञ्चषडात्मिका अवस्थाः एकत्र जगत्युपादीयमाना न विरुद्धाः प्रतिपत्तयो भवन्ति, अथ च ज्ञेयस्य जगतः अध्यवसायान्तराणि-परिच्छेदकारिविज्ञानान्येकादिरूपेण, तद्वत् तेन प्रकारेण नयानां वादा-जल्पा अध्यवसायकृता न विरुध्यन्ते। एतत् कथयति-यो हि नाम यत्र वस्तुनि धर्मो न विद्यते स तत्र स्वेच्छयोपादीयमानस्तत्स्थेनापरेण धर्मेण विरोधं प्रतिपद्यते, यथाऽऽत्मनि अज्ञानिता उपादीयमाना ज्ञानरूपेणात्मस्थेन धर्मेण विरुद्धा सती त्यज्यते, नैवं नयेषु, यथा वा व्योम्नि मूर्तता तत्स्थेनापरेणामूर्तेन धर्मेण विरुद्धा सती विप्रतिपत्तिरुच्यते, नैवं नयेषु, यतो वस्तु सामान्यविशेषधर्मसमन्वितं कश्चित् केनचिदाकारेण परिच्छिनत्ति। यदि ह्यसन्नेवासौ धर्मस्तेन नयेन तत्र वस्तुन्यध्यारोप्येत स्याद् विप्रतिपत्तिप्रसङ्ग इति, न तु तथा।

भा०-किंचान्यत्। यथा मतिज्ञानादिभिः पञ्चभिर्ज्ञानैर्धर्मादीनामस्तिकायानामन्यतमोऽर्थः पृथक् पृथगुपलभ्यते, पर्यायविशुद्धिविशेषादुत्कर्षेण, न च ता[2]नि विप्रतिपत्तयो भवन्ति, तद्वन्नयवादाः॥

---

१ 'अस्तिकायावरोधात्' इति घ-पाठः। २ 'ता' इति घ-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०–किञ्चान्यदित्यनेनोपपत्त्यन्तरमप्यस्ति विप्रतिपत्तिदोषस्य परिहारार्थमिति दर्शयति–**यथा मतिश्रुतावधिमनःपर्यायकेवलज्ञानैः पञ्चभिर्धर्माधर्माकाशजीवपुद्गलानामस्तिकायानामिति**, अस्तीति–त्रैकालिकसत्तासंसूचको निपातः, अभूवन् भवन्ति भविष्यन्ति च यतोऽतः सूच्यन्तेऽस्तीत्यनेन, काय इत्यनेन प्रदेशावयवबहुत्वमाचष्टे, वक्ष्यति पञ्चमे असङ्ख्येयाः प्रदेशाः (अ०५,सू०७) इत्यादि, अतोऽस्ति च ते कायाश्चेति, तेषा**मन्यतमः अर्थ** इति धर्मादिः, **पृथक् पृथगुपलभ्यत** इति, अन्यथा चान्यथा च परिच्छिद्यत इत्यर्थः ॥ ननु चैकस्वभावस्य धर्मादेरस्तिकायस्य मत्यादिज्ञानैरयुक्तोऽन्यथात्वेन परिच्छेद इत्येवं चोदिते आह–**पर्यायविशुद्धीत्यादि**। पर्याया–भेदाः–विज्ञानस्वभावा मत्यादिरूपाः तेषां विशुद्धिः–स्वच्छता स्वावरणापगमजनिता तस्याः पर्यायविशुद्धेर्विशेषो–भेदस्तस्मात् **पर्यायविशुद्धिविशेषाद् उत्कर्षेण**–प्रकर्षेण तैर्मत्यादिभिस्तेषामस्तिकायानां पृथक् पृथगुपलब्धिर्भवति, तद्यथा मतिज्ञानी मनुष्यपर्यायं वर्तमानं चक्षुरादिनेन्द्रियेण साक्षात् परिच्छिनत्ति, तमेव च श्रुतज्ञानी आगमानुमानस्वभावेन, तमेवावधिज्ञानी अतीन्द्रियेण ज्ञानेन, तमेव मनःपर्यायज्ञानी तस्य मनुष्यपर्यायस्य यः प्रश्ने प्रवर्तते तद्गतानि मनोद्रव्याणि दृष्ट्वा अनुमानेनैव तं मनुष्यपर्यायमवच्छिनत्ति, केवलज्ञानी पुनरत्यन्तविशुद्धेन केवलेनावबुध्यते। न चैता मत्यादिका विप्रतिपत्तयः–विरुद्धाः प्रतिपत्तयः, स्वसामर्थ्येन विषयपरिच्छेदात्, तद्वन्नयवादा इति किं नाश्रीयते?। अथवा पर्यायविशुद्धिविशेषादुत्कर्षेणेत्यन्यथा वर्ण्यते, पर्यायाणां–क्रमभुवां मनुष्यादीनां जीवास्तिकायादिसम्बन्धिनां मत्यादिभिर्ज्ञानैः पृथक् पृथगुपलब्धिर्भवति, कथं? प्रकर्षेण, कस्मादिति चेत्? उच्यते–विशुद्धिविशेषात् ज्ञानादीनां मत्यादीनां, यतो मतिज्ञानी मनुष्यादेर्जीवस्य काँश्चिदेव पर्यायान् परिच्छिनत्ति ततो बहुतरांश्च श्रुतज्ञानी जानीते, यतोऽभिहितं—"संखातीतेऽवि भवे"[1] (आव० नि०) इत्यादि। श्रुतज्ञानिनोऽपि सकाशाद् बहुतरानवधिज्ञानी पर्यवस्यति, विशुद्धिप्रकर्षात्, ततो मनःपर्यायज्ञानी, ततश्च सर्वात्मना केवलीति। न चैवमनेकधा परिच्छेदप्रवृत्ता मत्यादिका ज्ञानशक्तयो विप्रतिपत्तिव्यपदेशमश्नुवते, तद्वन्नयवादा इति किं नाभ्युपेयते?॥

उपपत्त्यन्तरमाह—

प्रमाणार्थवत् तन्त्रान्तरता न

भा०—यथा वा प्रत्यक्षानुमानोपमानाप्तवचनैः प्रमाणैरेकोऽर्थः प्रमीयते, स्वविषयनियमात्, न च ता विप्रतिपत्तयो भवन्ति, तद्वन्नयवादा इति ॥

टी०—यथा वेत्यादिना। यथा वा गिरिगुहावस्थितोऽग्निरेकोऽनेकेन प्रत्यक्षादिना परिच्छिद्यते प्रमाणेन, सन्निकृष्टवर्तिना प्रत्यक्षेण, विप्रकृष्टवर्तिना लिङ्गज्ञानेन, अपरेणोपमया कनकपुञ्जपिञ्जरप्रकाशोऽग्निरिति, अन्यः आप्तोपदेशाद्ध्यवस्यत्यत्र वनगहनेऽग्निरिति, अत एवं प्रत्यक्षादिभिः **प्रमाणैरेकोऽर्थः प्रमीयते**, कुतः? **स्वविषयनियमात्**, स्वः–आ-

१ सङ्ख्यातीतानपि भवान्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्मीयो विषयो-ज्ञेयः स्वश्चासौ विषयश्च स्वविषयः तस्मिन्नियमात्-नियतत्वात्, यतः प्रत्यक्षादीनि स्वविषयमेव परिच्छिन्दन्ति, **न च ताः**-प्रत्यक्षादिका ज्ञानशक्तयः विरुद्धाः-अयथात्मिकाः प्रतिपत्तय इति च युज्यतेऽभिधातुं, **तद्वन्नयैरपि** स्वविषयनियमान्नास्ति विप्रतिपत्तिप्रसङ्ग इति ॥

सम्प्रति प्रक्रान्तनयलक्षणमुदाहरणं चादर्शितं संक्षिप्तरुचीनामनुग्रहार्थमार्याभिर्वक्तुकाम एवं प्रक्रमते—

भा०—आह च—

नयकारिकाः

नैगमशब्दार्थाना-मेकानेकार्थनयगमापेक्षः ।
देशसमग्रग्राही, व्यवहारी नैगमो ज्ञेयः ॥ १ ॥-आर्या

टी०—**आह चेत्यादि** । आह चेत्यात्मानमेव पर्यायान्तरवर्तिनं निर्दिशति, निगमो-जनपदस्तत्र भवाः **नैगमाः**-**शब्दास्तेषाम् अर्थाः**-अभिधेयाः अतस्तेषां नैगमशब्दार्थानाम्-**एको**-विशेषः **अनेकं**-सामान्यम् अनेकव्यक्त्याश्रितत्वात् तावेव चार्थौ **एकानेकार्थौ** तयोरेकानेकार्थयोर्नयः-प्रकटनं प्रकाशनं **एकानेकार्थनयः** स एव गमः-प्रकारः **एकानेकार्थनयगमस्तमपेक्षते**-अभ्युपैति यः स **एकानेकार्थनयगमापेक्षः**, पूर्ववाचोयुक्त्या पुनरमुमेवार्थमनुस्मरयन्नाह-**देशेत्यादि** । देशो-विशेषः **समग्रं**-सामान्यं तयोर्ग्राही-आश्रयिता, व्यवहारोऽस्य सामान्यविशेषाभ्यां परस्परविमुखाभ्यां अस्तीति **व्यवहारी, नैगमो** ज्ञातव्यः ॥ १ ॥

सङ्ग्रहस्य स्मरणकारिकामाह—

भा०—**यत् सङ्गृहीतवचनं, सामान्ये देशतोऽथ च विशेषे ।**
तत् सङ्ग्रहनयनियतं, ज्ञानं विद्यान्नयविधिज्ञः ॥ २ ॥

टी०—**यत् सङ्गृहीतेत्यादि** । यदिति ज्ञानं सम्बध्यते, कीदृशं तदिति? तत् **सङ्गृहीतवचनं** सङ्गृहीतं-सामान्यं वचनम् उच्यते तदिति वचनं, ज्ञेयमित्यर्थः । सङ्गृहीतं वचनं यस्मिन् ज्ञाने, सामान्यं ज्ञेयं यस्य ज्ञानस्येत्यर्थः, तज्ज्ञानं सङ्गृहीतवचनं, तत् पुनरेवं ज्ञानं प्रवर्तते-**सामान्ये**-सत्तायां **देश** इति सामान्यविशेषे गोत्वादिके, **अथ चेति** अथवा **विशेषे** खण्डमुण्डादिके । एतेषु सर्वेषु सम्पिण्डनारूपेण प्रवर्तते यतः सामान्यं विशेषो वा,न सत्तामन्तरेण कश्चिदस्तीत्येवं सम्पिण्ड्य यत् सत्तायां प्रक्षिपत् प्रवर्तते ज्ञानं **तत् सङ्ग्रहनयनियतं** तज्ज्ञानं सङ्ग्रहस्य नयस्य निश्चितमेवंस्वरूपं **विद्यात्**-जानीयात् **नयविधिज्ञ इति** नयभेदज्ञः ॥ २ ॥

व्यवहाराभिप्रायानुस्मरणायाह—

भा०—**समुदायव्यक्त्याकृति-सत्तासंज्ञादिनिश्चयापेक्षम् ।**
लोकोपचारनियतं, व्यवहारं विस्तृतं विद्यात् ॥ ३ ॥

---

१ 'न युज्यते' इति क-ख-पाठः । २ 'देशतो विशेषाच्च' इति ख-पार्श्वलिखितपाठः । ३ 'तदिति चेत्' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—**समुदायेत्यादि**। **समुदायः**–सङ्घातः **व्यक्तिः**–मनुष्य इति **आकृतिः**–संस्थानमवयवानां **सत्ता**—महासामान्यं **संज्ञादयो**—नामस्थापनाद्रव्यभावाः एषां समुदायादीनां **निश्चयो**–विशेषस्तमपेक्षते–अभ्युपैति यः स–**समुदायव्यक्त्याकृति-सत्तासंज्ञादिनिश्चयापेक्षः**। कथं निश्चयमेवापेक्षते न समुदायादीनीति ? उच्यते–नहि समुदायस्त्रैलोक्यादिरूपः समुदायिनोऽन्तरेण कश्चिदप्यस्ति, न च व्यक्तिः सामान्यविशेषरूपा मनुष्य इत्यादिका मनुष्यानन्तरेणास्ति, न चाकार आकारवन्तमन्तरेणास्ति, न वा सत्ता सत्तावन्तमन्तरेणास्ति, न वा नामादयो नम्यमानादीनन्तरेण केचन सम्भवन्ति, अनुपलभ्यमानत्वाद् व्यवहाराकरणादित्यर्थः विशेषस्तु स्वप्रत्यक्ष इति, तस्मात् स एव सत्य इत्येवं समुदायादिनिश्चयापेक्षस्तं विद्यादिति सम्बन्धः। **लोकोपचारनियतमिति**। लोके उपचारः गिरिर्दह्यत इत्यादिकः, तस्मिन् लोकोपचारे नियतं–निष्पन्नं **व्यवहारनयं विस्तृतमिति** उपचरितानुपचरितार्थाश्रयणाद् विस्तीर्णमित्यर्थः, **विद्याद्**–अवबुध्येत॥ ३॥

ऋजुसूत्रस्वभावमाह—

भा०—साम्प्रतविषयग्राहक–मृजुसूत्रनयं समासतो विद्याद्।
विद्याद् यथार्थशब्दं, विशेषितपदं तु शब्दनयम्॥ ४॥ इति॥

टी०–**साम्प्रतेत्यादि, साम्प्रतो**–वर्तमानः **विषयो**–ज्ञेयस्तस्य ग्राहकं, वर्तमानार्थाश्रयमित्यर्थः। **समासत** इति संक्षेपतः, यतो वर्तमानमात्मीयं नामादिकमित्यादिविशेषणोपेतं, सङ्गच्छत्ययम्। उत्तरार्धेन शब्दस्वरूपमाह–**विद्याद् यथार्थशब्दमिति**। अनेन तु एवम्भूत इव प्रकाशितो लक्ष्यते, सर्वविशुद्धत्वात् तस्येति, यतः स एवमभ्युपैति–यदाऽर्थश्चेष्टाप्रवृत्तस्तदा तत्र घट इत्यभिधानं प्रवर्त्य, नान्यदिति। साम्प्रतसमभिरूढौ कस्मान्नाम्रेडितावितिचेत् ? उच्यते–तावपि स्मारितावेव, यत आह—**विशेषितपदं तु शब्दनयमिति, विशेषितपदमिति** विशेषितज्ञानं, यतः साम्प्रतसमभिरूढयोरन्यादृशं ज्ञानं, नामादिषु प्रसिद्धपूर्वाच्छब्दादर्थे प्रतीतिः साम्प्रतः शब्दान्तरवाच्यश्चार्थः शब्दान्तरस्य नाभिधेयीभवतीत्येवं समभिरूढविज्ञानमिति, **इतिः** नयानुस्मरणपरिनिष्ठासूचकः॥

भा०—अत्राह–अथ जीवो नोजीवः अजीवः नोअजीवः इत्याकारिते केन नयेन कोऽर्थः प्रतीयते ? इति।

जीवादौ नयविचारः

टी०— **अत्राह** परः–घटाद्यजीवपदार्थोद्देशेन नैगमादयो नया विभावितः, सम्प्रति जीवपदार्थे विभावयन्नाह–**अथ जीवो नोजीव** इत्यादि। अथवा घटोदाहरणे विधिरेव केवलः प्रदर्शितः, अधुना विधिप्रतिषेधौ जीवे निरूपयति–अथेति प्रस्तुतानन्तर्यं द्योतयति, शुद्धपदे केवले **आकारिते**–उद्दिष्टे[२] उच्चरिते वा जीव इति, **नोजीवः** अजीव इति देशसर्वप्रतिषेधयुक्तयोर्वा

१ '०संज्ञादि निश्चयाः०' इति क–घ–पाठः, '०संज्ञाविनिश्चया०' इति ग–पाठः। २ 'केवले आदिष्टे' इति क–ख–पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवशब्दयोरुच्चरितयोः, नोअजीव इति प्रतिषेधद्वयसमन्विते जीवशब्दे उच्चरिते, केन नैगमादिना कोऽर्थः प्रतीयते ? सूरिराह—

भा०—अत्रोच्यते—जीव इत्याकारिते नैगमदेशसङ्ग्रहव्यवहारर्जुसूत्रसाम्प्रतसमभिरूढैः पञ्चस्वपि गतिष्वन्यतमो जीव इति प्रतीयते। कस्मात् ?। एते हि नया जीवं प्रत्यौपशमिकादियुक्तभावग्राहिणः। नोजीव इत्यजीवद्रव्यं, जीवस्य वा देशप्रदेशौ। अजीव इत्यजीवद्रव्यमेव। नोअजीव इति जीव एव, तस्य वा देशप्रदेशाविति ॥

टी०—शुद्धपदे जीव इत्याकारिते नैगमं समग्रग्राहिणं विहाय एवम्भूतं च शेषैर्देशनैगमादिभिः सर्वासु गतिषु वर्तमानोऽभ्युपगम्यते, तदाह—**नैगमदेशेत्यादि**। नैगमेन देशग्राहिणा तथा व्यवहारेण—विशेषग्राहिणा ऋजुसूत्रेण—वर्तमानवस्तुग्राहिणा साम्प्रतेन—वर्तमानभावग्राहिणा समभिरूढेन च—प्रतिशब्दं भिन्नार्थग्राहिणा, **पञ्चस्वपीति** नरकतिर्यङ्मनुष्यदेवसिद्धिगतिषु, **अन्यतम** इति नरकादिगतिवर्ती जीवः प्राणी **प्रतीयते**, नाभावो नापि च भावान्तरम्। **कस्मादिति** चोदयति परः—किमत्रोपपत्तिरस्त्युत स्वेच्छया नैगमादयोऽभ्युपगच्छन्त्येवमिति ?। सूरिराह—अस्त्युपपत्तिः, तां च कथयति—**एते हि नया** इत्यादिना। एते नैगमादयो नया यस्मात् **जीवं प्रति**—जीवमङ्गीकृत्य, कीदृशं जीवमिच्छन्ति ? औपशमिकादिभिर्यो युक्तः स जीवः, औपशमिकक्षायिकक्षायोपशमिकौदयिकपारिणामिकैर्युक्तः **औपशमिकादियुक्तः**, भाव इत्यर्थः। औपशमिकादियुक्तो योऽर्थः तं ग्रहीतुं शीलं येषां ते तद्ग्राहिणः। सर्वासु च नारकादिगतिषु अवश्यमौपशमिकादीनां भावानां यः कश्चित् सम्भवति भावः, सिद्धिगतौ च यद्यप्यौपशमिकक्षायोपशमिकौदयिकाः न सन्ति, तथापि क्षायिकपारिणामिकौ सम्भवतः इत्यसावपि जीवः। **नोजीव** इत्युच्चरिते किं प्रतीयते तैर्नयैः ? उच्यते—यदा नोशब्दः सर्वप्रतिषेधे वर्तते तदा 'नञ्युक्तमन्ययुक्तं च' इत्यनया कल्पनया वस्त्वन्तरमेव प्रतीयते, नाभावः, तच्चाजीवद्रव्यं पुद्गलादिकमित्यर्थः। यदा तु नोशब्दो देशप्रतिषेधकस्तदा देशस्यानिषिद्धत्वाज्जीवस्य देशश्चक्षुर्भागादिकः प्रदेशो वाऽत्यन्ताविभजनीय उच्यते नोजीव इत्यनेन, एतदाह—**जीवस्य वा देशप्रदेशाविति**। **अजीव** इति तूच्चरिते सर्वप्रतिषेधकत्वादकारस्य पर्युदासस्य वाऽऽश्रितत्वाज्जीवादन्यः अजीव इति **अजीवद्रव्यमेव** प्रतीयते पुद्गलादिकम्। **नोअजीव** इति पुनरभिहिते द्वयोरपि नोकाराकारयोः सर्वप्रतिषेधे यदा वृत्तिः आश्रिता तदा 'द्वौ प्रतिषेधौ प्रकृतं गमयतः' इति जीव इति प्रतीयते, यदा पुनरकारः सर्वनिषेधको नोशब्दश्च देशनिषेधको नोअजीव इत्याश्रीयते तदा नोनञोरपि कृतार्थतैवं स्याद् यदि तस्य[1] जीवस्य देशप्रदेशौ गम्येते इत्यतो जीवस्य देशप्रदेशावत्र गम्येते, तदाह—

१ 'देशस्य' इति ग-पाठः। २ 'तस्याजीवस्य' इति क-ख-ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य वा देशप्रदेशाविति । एवं तावन्नैगमादयश्चतुर्षु जीव इत्यादिषु विकल्पेषु प्रवृत्ताः, एवम्भूतस्तु नैवं प्रतिपद्यते, कथं तर्हीति चेदुच्यते—

भा०—एवम्भूतनयेन तु जीव इत्याकारिते भवस्थो जीवः प्रतीयते । कस्मात् ? । एष हि नयो जीवं प्रत्यौदयिकभावग्राहक एव । जीवतीति जीवः, प्राणिति प्राणान् धारयतीत्यर्थः । तच्च जीवनं सिद्धे न विद्यते, तस्माद् भवस्थ एव जीव इति । नोजीव इत्यजीवद्रव्यं सिद्धो वा । अजीव इत्यजीवद्रव्यमेव । नोअजीव इति भवस्थ एव जीव इति ।

टी०—एवम्भूतेत्यादि । एवम्भूतनयेन जीव इत्युच्चरिते भवस्थो जीवः प्रतीयते, भवः—संसारश्चतुर्विधस्तस्मिन् स्थितो भवस्थः—संसारिजीवः प्रतीयते । कस्मात् सिद्धिस्थं त्यजतीति चेत् ? उच्यते—एष हीत्यादि, एषं यस्मादेवम्भूतनयो जीवं प्रत्येवं प्रवर्तते—य एव औदयिकेन गतिकषायादिस्वभावेनावस्थाविशेषेण युक्तस्तस्यैव ग्राहकः—तमेवौदयिकभावयुक्तं जीवमिच्छति, यतः शब्दार्थ एवमवस्थितो 'जीव प्राणधारणे' जीवतीति जीवः । किमुक्तं भवति ? प्राणितीति, 'अन प्राणने' इति वाऽस्यार्थे, जीव इत्यस्य च धातोः सकर्तृकत्वं कथयति प्राणान् धारयतीति । प्राणाः—इन्द्रियाणि, मनोवाक्कायास्त्रयः, प्राणापानौ एकः आयुश्च तान् धारयति न मुञ्चति यावत् तावदसौ जीव इति मन्तव्यः, एतत् स्याद् इन्द्रियादयः प्राणाः सिद्धेऽपि सन्ति, तन्न, सिद्धे हि सर्वकर्मापगमान्न सन्तीन्द्रियादयः प्राणा इत्येतदाह—तच्च जीवनमित्यादि । तदिति शब्दार्थतया जीव इत्यस्य जीवनं—प्राणधारणं सिद्धे—मोक्षप्राप्ते नास्ति, तस्माद् भवस्थ एव संसार्येव जीवः, न सिद्ध इति । तथा नोजीव इत्युच्चरिते नोशब्दः सर्वप्रतिषेधक एव, देशस्याभावात्, देश्येव देशो न वस्त्वन्तरं, न च देशिनो देशो भिन्न इत्यभिधातुं युक्तम्, यदि हि भिन्नः स्यात् नासौ तस्य, भिन्नत्वाद् वस्त्वन्तरवत्, अथाभिन्नः देश्येव तर्ह्यस्ति न कश्चिद् देशो नामेत्यतः सर्वप्रतिषेधको नोशब्दोऽतः नोजीव इत्युक्ते जीवादन्यद् वस्तु सम्पूर्णं परमाणुप्रभृति प्रतीयते, तदाह—नोजीव इति अजीवद्रव्यमेव सिद्धो वा, प्राणधारणस्याभावात्, सोऽपि निर्जीव एवेति, अतः सिद्धो वा गम्यते । अजीव इति तूच्चरिते अजीवद्रव्यमेव परमाण्वादिकं, सर्वप्रतिषेधकत्वादकारस्य प्रतीयते । नोअजीव इत्युक्ते 'प्रतिषेधौ द्वौ प्रकृतं गमयतः' इति भवस्थः—संसार्येव जीवो गम्यते ॥ अथ कस्मान्नोजीव इत्यस्मिन् विकल्पे नोअजीव इत्यस्मिन् वा देशप्रदेशौ न गम्येते ? । उच्यते—देशप्रदेशयोरनभ्युपगमादनेन नयेनेति, एतदाह—

भा०—समग्रार्थग्राहित्वाच्चास्य नयस्य नानेन देशप्रदेशौ गृह्येते । एवं जीवौ जीवा इति द्वित्वबहुत्वाकारितेष्वपि, सर्वसङ्ग्रहणे तु जीवो, नोजीवः ।

---

१ 'एष स्यादेवंभूत' इति क-ख पाठः । २ 'प्रत्येवं' इति ख-पाठः, प्रतीत्येवं इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अजीवा नोअजीवो जीवौ नोजीवा अजीवौ नोअजीवौ इत्येकत्वद्वित्वाकारितेषु शून्यम्। कस्मात् ? ॥

टी०—समग्रार्थेत्यादि। समग्रः—सम्पूर्णः अर्थो—वस्तु सम्पूर्णं वस्तु समग्रार्थः तं ग्रहीतुं शीलमस्य समग्रार्थग्राही, सम्पूर्णमेव हि वस्तु गृह्णातीत्ययं नयः, न देशं प्रदेशं वा, समग्रार्थग्राहिणो भावस्तथावर्तिता **समग्रार्थग्राहित्वम्**, अतो **नानेनैवम्भूतनयेन देशप्रदेशौ** स्थूलसूक्ष्मावयवात्मकौ **गृह्येते**। एवं तावच्चत्वारो विकल्पा एकवचनेन दर्शिताः, यथा चैकवचनेन दर्शिताः एवं द्विवचनेन चत्वारो विकल्पा नेयाः, जीवौ १ नोजीवौ २ अजीवौ ३ नोअजीवौ ४, तथा च बहुवचनेनापि चत्वार एव, जीवाः १ नोजीवाः २ अजीवाः ३ नोअजीवा ४ नेयाः, एकवचनप्रतिपत्त्येव, केवलं तु द्विवचनं बहुवचनं वा विशेष इत्येतदाह—एवं **जीवा जीवा** इति। **इतिशब्द आद्यार्थः, द्वित्वबहुत्वाकारितेषु**—द्विवचनबहुवचनाभ्यामुच्चारितेषु एवमेवाभ्युपगमो नैगमादीनाम्॥ अथैतांश्चतुरो विकल्पान् सङ्ग्रहनयः कथमभ्युपैतीति?। उच्यते-**सर्वसङ्ग्रहेणेत्यादि**। सर्वसङ्ग्रहेण सामान्यवस्तुग्राहिणा एकवचनद्विवचनान्ता विकल्पा नाभ्युपगम्यन्ते, तांश्च विकल्पान् दर्शयति—**जीवो नोजीव** इत्यादिना। एकद्विवचनान्तेषूच्चरितेषु **शून्यं** भवतीति, नास्यैवं काचित् प्रतिपत्तिरस्तीत्यर्थः। **कस्मान्नास्तीति** चेत् ? उच्यते—

भा०—एष हि नयः सङ्ख्यानन्त्याज्जीवानां बहुत्वमेवेच्छति यथार्थग्राही। शेषास्तु नयाः जात्यपेक्षमेकस्मिन् बहुवचनत्वम्, बहुषु च बहुवचनं सर्वाकारितग्राहिण इति। एवं सर्वभावेषु नयवादानुगमः कार्यः ॥

टी०—एष हीत्यादि। एषः—सङ्ग्रहो यस्मात् **सङ्ख्याया** जीवगताया **आनन्त्यं** प्रतिपद्यते, **जीवानां** पञ्चगतिवर्तिनां **बहुत्वमेवेतिकृत्वा** बहुवचनान्तानेव विकल्पान् समाश्रयते। अयं विशेषोऽनेन प्रतिपन्नो देशसङ्ग्रहव्यवहारादिभ्यः, भावना तु तद्वदेव, जीवा इत्युक्ते पञ्चस्वपि गतिषु वर्तमानानाश्रयति, नोजीवा इत्यजीवास्तेषां च देशप्रदेशानिति, अजीवा इति तु अजीवद्रव्याणि पुद्गला इति, नोअजीवा इति जीवानेव तेषां च देशप्रदेशानिति। अस्यैव बहुवचनान्ता प्रतिपत्तिः, **शेषास्तु** नैगमादयो **नया** एकद्विबहुवचनान्तानप्याश्रयन्ति एतान् विकल्पान्, यदा च जीवशब्दस्य एकोऽर्थो वाच्यो भवति तदैकत्वादेकवचनम्, यदापि च सामान्यं वाच्यं तदापि चैकत्वात् एकवचनप्राप्तौ सत्यां बहुवचनमन्विच्छन्ति नैगमादयः। कथमिति चेत् ? उच्यते—**जात्यपेक्षं** जातिः—सामान्यरूपा तामपेक्षते यत् तज्जात्यपेक्षं बहुवचनम्, **एकस्मिन्नपि** पदार्थेऽभिधेये "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" (पा०अ०१,पा०२,सू०५८) इत्येनेन लक्षणेन। यदा पुनर्बहव एव अभिधेया जीवशब्दस्य प्राणिनस्तदा नैव बहुवचनं "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" उत्पादयन्ति, किन्तु लक्षणान्तरेण, तल्लक्षणं दर्शयति—"बहुषु चैव बहुवचनं भवति"

१ 'न्यस्तं कस्मात्' इति क-ख-पाठः। २ 'नयवादाधिगमः' इति घ-पाठः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यनेन, अतः सङ्ग्रहो बहुवचनान्तानेव विकल्पानाश्रयति, शेषास्तु नया एकवचनबहुवचनान्तानप्याश्रयन्तीत्येतदाह—**सर्वाकारितग्राहिण** इति । सर्ववचनैरेकवचनादिभिराकारितानेतान् विकल्पान् गृह्णन्ति तच्छीलाश्च सर्वाकारितग्राहिण इति । सम्प्रति ग्रन्थगौरवं मन्यमान एकत्र च विकल्पानां दर्शितत्वादन्यत्र सुखेन ज्ञास्यतीत्येतदतिदिशति—**एवं सर्वभावेष्वित्यादिना** । सर्वभावेषु—सर्वार्थेषु धर्मास्तिकायादिषु **नयवादानुगम** इति नयवादेनानुगमं—अनुसरणं—निभालनं कार्यं तत्त्वान्वेषिणा पुंसा ॥ एवं तावत् प्रमेयेण नयानां विचारः कृतः । सम्प्रति प्रमेयपरिच्छेदकेषु प्रमाणेषु को नयः कथं प्रवर्तते इत्यस्मिन्नवसरे पर आह—

भा०—अत्राह—**अथ पञ्चानां सविपर्ययाणां कानि को नयः समाश्रयत इति ?** । **अत्रोच्यते**—

टी०—**अथ पञ्चेत्यादि** । **अथेत्येतस्माद्** विचारादनन्तरं **पञ्चानां** मत्यादीनां ज्ञानानां ज्ञेयस्वतत्त्वतया ग्राहकाणां **सविपर्ययाणामिति** सह विपर्ययेण अज्ञानस्वभावेन यानि वर्तन्ते तेषां सविपर्ययाणां **कानि** मत्यादीनि **को नयो** नैगमादिः **श्रयते**—अभ्युपगच्छति ? । **अत्रोच्यते**—

ज्ञानाज्ञानेषु नयविचारः

भा०—**नैगमादयस्त्रयः सर्वाण्यष्टौ श्रयन्ते, ऋजुसूत्रनयो मतिज्ञानमत्यज्ञानवर्जानि षट् ॥**

टी०—**नैगमादिनयास्त्रयः**—नैगमसङ्ग्रहव्यवहाराः **सर्वाणि** निरवशेषाणि, कियन्तीति चेदुच्यते—**अष्टौ**, मतिज्ञानं, मत्यज्ञानं, श्रुतज्ञानं, श्रुताज्ञानं, अवधिज्ञानं, विभङ्गज्ञानं, मनःपर्यायज्ञानं, केवलज्ञानमष्टमम् । एतान्यष्टावपि यतोऽर्थं परिच्छिन्दन्ति, अतोऽभ्युपगच्छन्त्यष्टावपि । ऋजुसूत्रः पुनः षडेषां मध्ये श्रयते, **मतिज्ञानमत्यज्ञानवर्जानि षट्**, मतिं मत्यज्ञानं च नाभ्युपैति ॥

भा०—**अत्राह**—(**अथ**) **कस्मात् मतिं सविपर्ययां न श्रयत इति ?** । **अत्रोच्यते**—**श्रुतस्य सविपर्ययस्योपग्रहत्वात्, शब्दनयस्तु द्वे एव श्रुतज्ञानकेवलज्ञाने श्रयते ॥**

टी०—**अत्राह**—**अथ कस्मात् मतिं सविपर्ययामिति** मत्यज्ञानसहितामित्यर्थः **न श्रयते** नेच्छतीति ? । **अत्रोच्यते**—यस्मान्मतिमत्यज्ञाने **श्रुतज्ञानस्य सविपर्ययस्येति** श्रुताज्ञानसहितस्य **उपग्रहं** कुरुतः । कथमिति चेदुच्यते—यदेतदिन्द्रियजं चक्षुरादिभ्य उपजातं तद् हि अवग्रहणमात्रेण प्रवर्तमानं न वस्तुनो निश्चयं कर्तुमलम्, यदा श्रुतज्ञानेनासावालोचितोऽर्थो भवति तदा यथावन्निश्चीयते इति, तस्मात् तदेवाभ्युपगन्तव्यं श्रुतज्ञानं, किं मतिज्ञानेन ? इत्येवं श्रुतस्योपग्रहकरत्वात् न मतिज्ञानं सविपर्ययमाश्रीयते । शब्दनयस्तु भावार्थावलम्बी द्वे एव नान्यत् ताभ्यामित्युक्तम्, के ते ? उच्यते—श्रुतज्ञानकेवलज्ञाने । अत्र शब्दमते परोऽसूयया ब्रूते—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—अत्राह—अथ कस्मान्नेतराणि श्रयत इति ?। अत्रोच्यते—मत्यवधिमनःपर्यायाणां श्रुतस्यैवोपग्राहकत्वात्, चेतनाज्ञस्वाभाव्याच्च सर्वजीवानां नास्य कश्चिन्मिथ्यादृष्टिरज्ञो वा जीवो विद्यते। तस्मादपि विपर्ययान न श्रयत इति। अतश्च प्रत्यक्षानुमानोपमानाप्तवचनानामपि प्रामाण्यमभ्यनुज्ञायत इति ॥

टी०—अथ कस्मान्नेतराणि मत्यादीनि श्रयते ?। अत्रोच्यते—मत्यवधिमनःपर्यायाणां श्रुतस्यैवागमानुरक्तस्य उपग्राहकत्वाद्-उपकारकत्वात्, यतो मत्याद्यालोचितोऽर्थः न मत्यादिभिः शक्यः प्रतिपादयितुं मूकत्वान्मत्यादिज्ञानानाम्, अतस्तैरालोचितोऽप्यर्थः पुनरपि श्रुतज्ञानेनैवान्यस्मै स्वपरप्रत्यायकेन प्रतिपाद्यते, तस्मात् तदेवालम्बितुं युक्तं, नेतराणि। केवलज्ञानं तु यद्यपि मूकं तथाप्यशेषार्थपरिच्छेदात् प्रधानमितिकृत्वाऽवलम्ब्यत एव, तथा विपर्ययं नाभ्युपैत्यस्मात् चेतनाज्ञस्वाभाव्याच्चेत्यादि, चेतना—जीवत्वं परिच्छेदकत्वसामान्यं गृह्यते, ज्ञ इत्यनेन तु विशेषपरिच्छेदिता ग्राह्या, तयोश्चेतनाज्ञयोः स्वाभाव्यं—तथाभवनं तस्माच्चेतनाज्ञस्वाभाव्यात् सर्वजीवानां पृथिवीकायिकादीनां न विद्यते तेषां कश्चित् प्राणी मिथ्यादृष्टिः—अयथार्थपरिच्छेदी, सर्वे प्राणिनः स्वस्मिन् स्वस्मिन् विषये परिच्छेदकत्वेन प्रवर्तमानाः स्पर्शं स्पर्श इत्येवं परिच्छिन्दन्ति रसं च रस इत्यादि, अज्ञो वा अज्ञानी वा, न कस्यचित् प्राणिनो ज्ञानमविद्यमानं अस्य नयस्य मतेन। यथाऽभिहितम्—'सव्वजीवाणंपि[2] य णं अक्खरस्स अणंतो भागो निच्चुग्घाडितओ" (नन्दी० सू० ४२), अतः सर्वे सम्यग्दृष्टयः सर्वे च ज्ञानिनः, अतो विपर्ययो नास्ति मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानरूप इति, अतः—अभावादेव विपर्ययान् मत्यज्ञानादीन् नाश्रयते यतश्च छद्मस्थज्ञानानि सर्वाण्येव श्रुतेऽन्तर्भवन्ति[3], अतो यत् 'प्रत्यक्षमन्यत्' (अ०१ सू०१२) इत्यस्मिन् सूत्रे प्रतिज्ञातं नयवादान्तरेण तु यथा मतिश्रुतविकल्पजानि भवन्ति तथा पुरस्ताद् वक्ष्याम इति तदुपपन्नम्, अस्मिंश्चोपपन्ने सर्वप्राणिनां सम्यग्दृष्टित्वात् ज्ञानित्वाच्च सर्वज्ञानानां प्रामाण्यम्, तदाह-अतश्च प्रत्यक्षानुमानोपमानाप्तवचनानामपि प्रामाण्यमभ्युपगतं भवति। उक्तं चैषां प्राक् स्वरूपं प्रत्यक्षादीनां, प्रमाणनयविचारमनन्तरं सकलं चाध्यायार्थमुपसंहरन् कारिकाः पपाठ—

भा०—आह च—

अध्यायार्थोपसंहारः

विज्ञायैकार्थपदान्यर्थपदानि च विधानमिष्टं च।
विन्यस्य परिक्षेपात्, नयैः परीक्ष्याणि तत्त्वानि ॥१॥—आर्या
ज्ञानं सविपर्यासं, त्रयः श्रयन्त्यादितो नयाः सर्वम्।
सम्यग्दृष्टेर्ज्ञानं, मिथ्यादृष्टेर्विपर्यासः ॥ २ ॥—आर्या
ऋजुसूत्रः षट् श्रयते, मतेः श्रुतोपग्रहादनन्यत्वात्।
श्रुतकेवले तु शब्दः, श्रयते नान्यच्छ्रुताङ्गत्वात् ॥ ३ ॥—आर्या

---

१ 'विपर्ययो न श्रयत' इति ग-पाठः।
२ सर्वजीवानामपि चाक्षरस्यानन्तो भागो नित्योद्घाटितः।
३ 'श्रुतेन भवन्ति' इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिथ्यादृष्टयज्ञाने, न श्रयते नास्य कश्चिदज्ञोऽस्ति ।
ज्ञस्वाभाव्याज्जीवो, मिथ्यादृष्टिर्न चाप्यस्ति ॥ ४ ॥–आर्या
इति नयवादाश्चित्राः, क्वचिद् विरुद्धा इवाथ च विशुद्धाः ।
लौकिकविषयातीताः, तत्त्वज्ञानार्थमधिगम्याः ॥ ५ ॥–आर्या

टी०–आह चेत्यादि । **विज्ञाय**–ज्ञात्वा एकार्थानि **पदानि** जीवः प्राणी जन्तुरित्यादि, **अर्थपदानि च** निरुक्तपदानि परैरुक्षा–सम्बन्धनमुपक्रियेति परोक्षमित्यादीनि, **विधानं** नामस्थापनादिकम्, **इष्टं** चेति निर्देशस्वामित्वादि सत्सङ्ख्यादीनि च, एतज्ज्ञात्वा ततो **विन्यस्य** नामादिभिः **परिक्षेपात्**–समन्तात् **नयैः परीक्ष्याणि**–मीमांस्यानि **तत्त्वानि**–जीवादीनि सप्त ॥ १ ॥

ज्ञानं–मत्यादि **सविपर्यासं**–मत्यज्ञानादित्रयानुगतं नैगमादयस्त्रयः **श्रयन्ति**–अभ्युपगच्छन्ति **आदित**–आदेरारभ्य **नयाः**–वस्त्वंशग्राहिणः **सर्वम्**–अष्टविधम् । कस्य पुनर्ज्ञानं कस्य च विपर्यासो भवतीत्येतदाह—**सम्यग्दृष्टेः**–अर्हदभिहिततत्त्वश्रद्धायिनः यदिन्द्रियजमनिन्द्रियजं च तत् सर्वं ज्ञानं, **मिथ्यादृष्टेः** सर्वमेव **विपर्यासः** ॥ २ ॥

ऋजुसूत्र उक्तस्वरूपः **षट्**–मतिमत्यज्ञानरहितानि श्रुतादीनि **श्रयते**, मतिं तु सविपर्यासां न श्रयते,अ(य)तः श्रुतस्य ग्रन्थारूषितस्य **उपग्रहत्वात्**–उपकारकत्वाद् उक्तेन विधिना, ततश्च श्रुतादन्या मतिरतोऽनन्यत्वान्नाश्रयते । **शब्दस्तु** श्रुतज्ञानकेवलज्ञाने **श्रयते, नान्यत्**, किं कारणम् ? श्रुताङ्गत्वात् श्रुतस्य प्रतिविशिष्टबलाधानहेतुत्वादुक्तेन विधिना, शब्द एव नयः ॥ ३ ॥

मिथ्यादृष्टयज्ञाने, मिथ्यादृष्टम् अज्ञानं च अपरिच्छेदात्मकं **न श्रयते**, किं कारणम् ? यतो **नास्य कश्चिदज्ञोऽस्ति** नास्त्यस्य कश्चिदज्ञः शब्दस्य मतेन कश्चित् प्राणी । किं कारणमिति चेत् ? उच्यते–**ज्ञस्वाभाव्यात्** सर्वप्राणिनां ज्ञातृस्वरूपत्वाज्जीवो **मिथ्या, दृष्टिर्नास्ति न चाप्यज्ञोऽस्ति** ॥ ४ ॥

इति–एवमनेनोक्तेन स्वरूपेण **नयवादाः** नैगमादिविचाराः **चित्राः**–बहुरूपाः, विचित्रैः प्रकारैर्वस्तुनः परिच्छेदित्वात्, ते चित्राः **क्वचिद् विरुद्धाः** क्वचिद् वस्त्वंशे रुचिगृहीते विरुद्धा **इव** लक्ष्यन्ते, यतः सामान्ये आश्रिते यस्तत्रैव विशेषं कल्पयति तदा पूर्वापरेण विरुध्यते, विशेषे वा त्रैकालिकेऽभ्युपेते वर्तमानावधिके विशेष आश्रिते पूर्वः परेण विरुद्ध इति लक्ष्यते, एवं सर्वेष्वायोजनीयम् । एवं क्वचिद् विरुद्धा इव । अथवा सम्यगालोच्यमानाः **विशुद्धाः**, सामान्यादीनां धर्माणां सर्वेषां तत्र वस्तुनि भावात् ॥ अथैवमेव लौकिकानामपि वैशेषिकादीनां वस्तुविचारणायां सम्पतन्त्युत नेति ? । उच्यते–न सम्पतन्ति, यदि सम्पतेयुर्जैनशासनवत् तान्यपि निरवद्यानि मतानि स्युः, नैव

१ ' चाप्यज्ञः ' इतिघ–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत् तथा, एतदाह-**लौकिकविषयातीताः** लौकिकानां-वैशेषिकादीनां विषयाः-शास्त्राणि तान्यतीताः-अतिक्रान्ताः, न सन्ति तेष्वित्यर्थः ॥ अथ यथा ते वैशेषिकादयो नालोचयन्त्येभिर्वस्तु तथाऽत्रापि किमाश्रयते उत नेति ? उच्यते-न तथा नालोचनीयं वस्तु, किन्त्वालोचनीयमेवेति, एतदाह-**तत्त्वज्ञानार्थमधिगम्याः** तत्त्वं-सद्रूपं सर्वदोषरहितं यज्ज्ञानं तत् तत्त्वज्ञानं **तत्त्वज्ञानाय**-तत्त्वज्ञानार्थं-तत्त्वज्ञानप्रयोजनार्थम् **अधिगम्याः**-ज्ञेयाः । एतत् कथयति-समस्तनयसामग्र्या आलोच्यमानं वस्तु सुधियां प्रीतिमाधिनोति, अन्यथा यथावस्तु संवादो दुःखेनापाद्येत, यत एकनयमतावलम्बिनां वस्तुस्वरूपसम्पादने सामर्थ्याभावात् समग्रया नयविचारणया वस्तुस्वरूपप्रतिपादनं सुकरमवगतस्याद्वादसद्भावैरिति ॥ ५ ॥ ३५ ॥

ग्रन्थाग्रमङ्कतः ४३५९

इति श्रीतत्त्वार्थाधिगमेऽर्हत्प्रवचनसङ्ग्रहे भाष्यानुसारिण्यां तत्त्वार्थटीकायां प्रथमोऽध्यायः ॥ १ ॥

॥ इति प्रथमोऽध्यायः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ श्रीगौडीपार्श्वनाथाय नमः ॥

द्वितीयोऽध्यायः २

अध्यायसम्बन्धः

भा०—अत्राह—उक्तं भवता जीवादीनि तत्त्वानीति, तत्र को जीवः कथंलक्षणो वेति ? । अत्रोच्यते—

टी०—अत्राह—उक्तं भवतेत्यादिः सम्बन्धग्रन्थः, स चाध्यायप्रकरणसूत्रकृतस्त्रिधा तत्राध्यायकृतस्तावत् 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' (अ० १, सू० १) इत्यव्यतिरिक्तकरणतयाऽऽत्मनः कर्तुस्तादूप्येण निर्दिष्टानि मोक्षसाधनानि, अधुना तान्येवानेककर्मोपशमादिकारणकलापजन्यानि परिस्फुटविविक्तहेतुभाञ्जि प्रकाशयन्नाह—औपशमिक इत्यादि । तथाऽनुयोगद्वारप्रकरणप्रस्तावे निर्देशादिसूत्रव्याख्यायामुक्तम्, तद्यथा निर्देशः । को जीवः ? औपशमिकादिभावयुक्तो द्रव्यं जीवः, ते चामी जीवस्य औपशमिकादयो भावाः स्वतत्त्वेयत्ताभ्यामभिधीयन्ते—औपशमिक इत्यादि, तथा तत्त्वोद्देशः, तत्रादौ जीवपदार्थोपन्यासोऽकारि सूत्रकारेण, तत्स्वरूपावगमेच्छया च परः प्रश्नयति—को जीवः कथंलक्षणो वेति । किं पुनरत्र प्रयोजनं यदयमपहायाध्यायप्रकरणसम्बन्धौ सूत्रकृतमेव सम्बन्धमाविश्चकार भाष्यकारः ? । उच्यते—स्वल्पवक्तव्यत्वात्, सम्बन्धानां चानेकरूपत्वाद् अतो यत् किञ्चिद् घटमानकं सम्बन्धान्तरमुपादाय भाष्यकृत् कृती जायते, नैवावश्यमशेषसम्बन्धाभिधानमावर्तव्यमिति क्वचिन्नियमः, यच्च भाष्यकारोपात्तसूत्रसम्बन्धव्यतिरिक्तसम्बन्धद्वयप्रदर्शनमाविष्कृतं तदन्योपनिबन्धकारशैल्या न त्वपूर्वसम्बन्धोद्घट्टनेच्छयेति ॥ नन्वौदयिकौपशमिकक्षायिकक्षायोपशमिकपारिणामिकसान्निपातिका भावा इति क्रमसङ्ख्यानियमः प्रावचनोऽयं स एषः, किमर्थं परमर्षिप्रणीतप्रवचनन्यस्तक्रमसङ्ख्याभेदः सूत्रकारेणाकारि ?। अत्रोच्यते—क्रमभेदस्तावल्लाघवार्थमाश्रितः, कथम् ? औपशमिकभेदद्वयमधीत्य क्षायिकभेदपाठे चशब्दानुकृष्टौ च पूर्वकौ द्वावित्येवं नवभेदमवदत् क्षायिकम्, ननु प्रवचनक्रमेऽप्यौपशमिकक्षायिकावनन्तराविति न कश्चिद् विशेषः अस्ति, विशेषश्चशब्देन, किमनन्तरभेदद्वयाकर्षणमुतौदयिकैकविंशतिराकृष्यत इति सन्देहः, नन्वनन्तरभेदद्वयमेवाभिसम्भन्त्स्यते न व्यवहितम्, तदेतदेतावद् व्याख्यानमल्पधियः क्रशयन्ति गौरवं च जायते, तस्मादस्तु क्रमभेदः, अपिच—स्वल्पकालस्वामित्वादिविशेषादप्यौपशमिकादिर्युज्यते क्रमः, आन्तर्मौहूर्तिकत्वादल्पकाल औपशमिकः, अल्पस्वामिकश्चायम्, यतो न खलु बहुविधाः प्राणिनः प्राप्नुवन्ति तादृशं परिणतिविशेषम्, तदनन्तरं क्षायिकः, तस्मात् सामान्यभेदत्वाद् बहुतरकालस्वामित्वाच्च, ततः क्षायोपशमिको—बहुतरभेदकालस्वामित्वाच्च, ततः औ—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यिकः पूर्वस्वामिसाधर्म्यात् तदन्यकर्माश्रयत्वाच्च, ततः पारिणामिको महाविषयत्वादत्यन्तभेदाच्च पूर्वेभ्य इति। सान्निपातिकोऽपि लाघवैषिणा पृथक् नोपात्तः, मिश्रग्रहणादेव प्रतिलब्धः, यत एषामेवौपशमिकादीनां द्विकादिसंयोगेन सान्निपातिको निष्पद्यते षड्विंशतिविकल्पः, तत्रैकादश विरोधित्वादसम्भवतस्त्यक्ता विकल्पाः, पञ्चदशोपात्ताः **प्रशमरतौ** सम्भविनः, "षष्ठश्च सान्निपातिक इत्यन्यः पञ्चदशभेदः" (**प्रशम**० प०१९७) इति वचनात्, ते च विकल्पाः पञ्चदश औदयिकक्षायोपशमिकपारिणामिकास्त्रयोऽपि युगपदेकस्मिन् निपतन्ति जन्तौ, नारकतिर्यङ्मनुष्यदेवगतिभेदेन चैते चत्वारो विकल्पाः, तथौदयिकौपशमिकक्षायोपशमिकपारिणामिकाः क्वचिदकृतत्रिपुञ्जोपशमसम्यक्त्वसद्भावाद् गतिभेदेनैव चत्वारो विकल्पाः, पुनरौदयिकक्षायिकक्षायोपशमिकपारिणामिकाः क्वचित् क्षायिकसद्भावात् श्रेणिकादिवद् गतिभेदतः, पुनश्चौदयिकौपशमिकक्षायिकक्षायोपशमिकपारिणामिकाः दर्शनसप्तकवर्जं समस्तमोहनीयोपशमाच्छेषकर्मक्षयोपशमादित्वे सति मनुष्यगतावेवोपशमश्रेणिसद्भावे सत्येको विकल्पः, तथा औदयिकक्षायिकपारिणामिका एक एव भङ्गः, केवलिनो मनुष्यत्वकैवल्यजीवत्वाप्तेः, तथा क्षायिकपारिणामिकावेको भङ्गः, सिद्धे केवलसम्यक्त्वादिजीवत्वतः, पञ्चदश सान्निपातिका भावभेदाः पञ्चकचतुष्कत्रिकद्विकसंयोगनिष्पन्नाः चतुरादिगतिभेदैर्मिश्रग्रहणालब्धाः, मिश्रग्रहणेन च सान्निपातिकः संयोगमात्रं परिगृह्यते, न क्षयोपशमाविति, कृतसमासयोश्च पूर्वयोर्निर्देश उत्पत्तिविगमकालसाम्यात् संहतोत्तरकारणत्वाच्च, औपशमिकक्षायिकौ हि संहितौ मिश्रस्य कारणीभवतः, मिश्रे चासमासकरणं स्वामिबाहुल्यप्रतिपिपादयिषयाऽकारि, पूर्वभावद्वयवर्तिभ्यो जीवेभ्यो भूयिष्ठाः क्षायोपशमिकभावभाजः प्राणिनः, चरमयोः पृथक्करणं जीवाजीवसाधारणत्वख्यापनार्थम्, पूर्वकास्त्रयो जीवानामेव, इतरौ तु साधारणौ, समासश्चावियोगप्रचिकाशयिषयाऽनयोर्द्वयोरपि। अत्र चाद्यास्त्रयो भावाः कर्मविघातापेक्षाः प्रादुःष्यन्ति, बहलरजोवितानविघाते सति तिग्मरश्मेर्दीधितिकलापोत्पत्तिवत्, स पुनर्विघातो द्विविधः—स्ववीर्यापेक्षो देशक्षयः कर्मणः सर्वक्षयश्च, कर्मव्यापारापेक्षश्चतु(इत्यर्थः), स्वोपात्तकर्मोदयात् गत्यादयो भावाः समुपजायन्त आत्मनः सुरापानजनितनृत्यादिविकारवत्, मदोद्रेकान्नृत्यति हसति रोदति गायति क्रुध्यति च यथा शीलवानपि तथा गत्यादिकर्मोद्रेकाज्जीवस्तां तां विक्रियां प्रतिपद्यते गतिकषायादिकाम्। पारिणामिकस्तु निर्निमित्तः, स्वार्थे प्रत्ययविधानात्, परिणाम एव पारिणामिको राक्षसवदिति॥

अधुना भाष्यमनुस्रियते—अत्रेति। द्वितीयाध्यायावसरे शिष्य आह—प्रथमाध्यायेऽभिहितं भवता जीवादीनि सप्त तत्त्वानि, तत्प्रतिपत्तिः सम्यक्त्वम्, इतिशब्दः शब्दपदार्थः, कः? उक्तमात्रस्मरणात् तत्रेति तेषु तत्त्वेषु निर्धार्यतामादावुपन्यस्तो जीवः क इति किंस्वरूपः, किंसतत्त्वः, किमसौ द्रव्यं, गुणः, कर्मेति सन्दिहानस्य प्रश्नः, कथंलक्षणो वेति द्वितीयः, प्रश्नः कथमिति केन प्रकारेण किमनपायिना सता लक्षणेन सर्वास्ववस्थासु गम-

१ 'वृत्त्यादि' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केनाविनाभाविना हुताशन इवोष्णत्वेन लक्षयितव्यः, आहोस्विदपायभाजा व्यतिरिक्तेन धूमेनेव हुतभुगवबोद्धव्य इति पृच्छति—**कथंलक्षणो वेति**। लक्ष्यते अनेनेति लक्षणं—लिङ्गमित्यर्थः, कथं लक्षणमस्येति कथंलक्षणः, वाशब्दश्चशब्दार्थे, को जीवः कथंलक्षणश्चेति, इतिशब्दः शिष्याभिप्रायेयत्ताप्रकाशनार्थः। एवं प्रश्नद्वयप्रदर्शने प्रबोधने सति आचार्य आह—**अत्रोच्यते** इति। अत्रास्मिन् प्रश्नद्वयेऽपि भण्यते प्रतिवचनम्, तत्राद्यं प्रश्नमधिकृत्य सूरिः सूत्रमधिजगे—

सूत्रम्—औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च ॥ २—१ ॥

भावेषु औपशमिकाद्या भेदाः

भा०—औपशमिकः, क्षायिकः, क्षायोपशमिकः, औदयिकः, पारिणामिकः, इत्येते पञ्च भावा जीवस्य स्वतत्त्वं भवन्ति ॥ १ ॥

टी०—औपशमिक इत्यादि। समुदायार्थस्त्वयम्—औपशमिकादिभावयुक्तो द्रव्यं जीव इति कर्मगुणनिरासद्वारेण प्रतिपादयति। तत्रोपशमनमुपशमः—कर्मणोऽनुदयलक्षणावस्था भस्मपटलावच्छन्नाग्निवत् सः प्रयोजनमस्येत्यौपशमिकस्तेन वा निर्वृत्तः। तथा तदत्यन्तात्ययात् स क्षयः स प्रयोजनमस्य तेन वा निर्वृत्त इति क्षायिकः, भवनं भावः तेन पर्यायेण आत्मलाभः, कर्मण उपशमाद् यद् दर्शनं चरणं वा श्रद्धानलक्षणं विरतिलक्षणं वा तथोद्भवति तदौपशमिकशब्देनोच्यते, तथा क्षायिकशब्देन त एव दर्शनादिपर्यायाः श्रद्धानादिलक्षणाः शीर्णाशेषस्वविघातिकर्माशाः प्रतिपद्यन्त आत्मनः स्वरूपतयेति, क्षयोपशमाभ्यां निर्वृत्तो मिश्रः दरविध्या(ताव)च्छन्नज्वलनवत्, कथं पुनः भाव्यते? यदुदयावलिकाप्रविष्टं कर्म तत् क्षीणं शेषमनुद्रेकक्षयावस्थमिमामुभयीमवस्थामाश्रित्य मिश्रः प्रजायते॥ ननु चायमेवौपशमिकान्न भिद्यते, यतस्तत्राप्युदितं क्षीणमनुदितं चोपशान्तमिति। अत्रोच्यते—क्षयोपशमे ह्युदयोऽप्यस्ति, प्रदेशतया कर्मणो वेदनानुज्ञानात्, न त्वसाविति विघाताय, अनुभावं पुनर्न तत्र वेदयते, उपशमे तु प्रदेशकर्मापि नानुभवति मनागपि नोदयोऽयं विशेष इतियावत्। आगमश्चायम्—"से[२] णूणं भंते! णेरइयस्स वा तिरिक्खजोणियस्स वा मणुस्सस्स वा देवस्स वा जे कडे (पावे) कम्मे णत्थि णं तस्स अवेइत्ता मोक्खो? हंता गोयमा०! से केणट्ठेणं भंते! एवं वुच्चइ? एवं खलु गोयमा! मए दुविहे कम्मे पन्नत्ते, तंजहा पदेसकम्मे अणुभावकम्मे य, तत्थ णं जं तं पएसकम्मं तं नियमा वेएइ, तत्थ णं जं तं अनुभावकम्मं तं अत्थेगइयं

औपशमिकक्षायोपशमिकयोर्भिन्नता

१—'सतत्त्वं' इति क—ख—पाठः।

२ अथ नूनं भदन्त! नैरयिकस्य वा तिर्यग्योनिकस्य वा मनुष्यस्य वा देवस्य वा यत् कृतं (पापं) कर्म नास्ति तस्यावेदित्वा मोक्षः?। हन्त गौतम! तत् केनार्थेन भदन्त! एवमुच्यते? एवं खलु गौतम! मया द्विविधं कर्म प्रज्ञप्तं, तद्यथा—प्रदेशकर्म अनुभागकर्म च। तत्र यत् तत् प्रदेशकर्म तद् नियमेन वेदयति, तत्र यत् तद् अनु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेएइ अत्थेगइयं नो वेएइ, णायमेवं अरहता विण्णायमेयं अरहता—अयं जीवे इमं कम्मं अज्झोवगमियाए[1] वेयणाए वेदिस्सति, अयं जीवे इमं कम्मं उवक्कमियाए वेयणाए वेदिस्सति अहाकम्मं अहाक(निग)रणं जहा जहा तं भगवया दिट्ठं तहा तहा विपरिणमिस्सतीति—से तेणं अट्ठेणं गोयमा ! एवं वुच्चति" (भगवत्यां श० १, उ० ४, सू० ४०) अतोऽस्ति विशेषः औपशमिकक्षायोपशमिकयोरिति। अत्रापि त एव दर्शनादिपर्यायाः श्रद्धानादिलक्षणाः प्रदेशकर्मोदययुजः क्षायोपशमिकशब्दवाच्या भवन्ति, चशब्दः समुच्चयार्थः, औपशमिकक्षायिकौ स्वतत्त्वं मिश्रश्च स्वतत्त्वमिति। जीवस्येति कर्तृलक्षणा षष्ठी, जीवस्यैवैते त्रयो भावाः, नान्यस्य स्तम्भकुम्भादेः, वक्ष्यमाणदर्शनादिकलापानुपलब्धेः, इह च जीवशब्द आत्मपर्यायः शुद्धो गृह्यते, नायुःप्राणसम्बन्धोद्भासितो जीवनाज्जीव इति, मुक्तानां तदनभिसम्बन्धात्। अथवा द्रव्यभावप्राणसामान्याङ्गीकरणे सति प्रतिविशिष्टसम्बन्धापेक्षः शब्दो भवत्येव जीवनाज्जीवः, संसारिणः द्रव्यप्राणाः पञ्चेन्द्रियादयः, सिद्धानां भावप्राणाः ज्ञानोपयोगादय इति। स्वतत्त्वमित्ययं स्वशब्द आत्मात्मीयादिषु प्रसिद्धः, तत्रात्मनि वर्तमानोऽङ्गीक्रियते, तत्त्वशब्दो भावाभिधायी, ततश्चायं समुदायार्थः—जीवस्यायमात्मा भावः जीवस्यायमात्मस्वरूपभवनम्, एवमौपशमिकादिरूपेणात्मनैव स तथा भवतीति, अव्यतिरेकलक्षणा चेयं कर्तुरनर्थान्तरं षष्ठी, स्वतत्त्वं च पदार्थानामनध्यारोपितमनपोदितं च भवति, सर्वदा जीवश्चेतनालक्षण इति नाध्यारोपितं, नापोदितं किंचित्, चेतनायाः सुखदुःखादिसाधारणसंवेदनलक्षणायाः प्रति स्वं प्राणिविशेषप्रतिसंवेद्यत्वात्, तत्राध्यारोपो विभुनिरवयवनिष्क्रियादिधर्मकत्वेन, अपवादो नास्त्यात्मा न प्रमाणविषयो न च त्वक्पर्यन्तशरीरसम्बन्धीति, स्वानुभवविरुद्धत्वात्, अध्यारोपे चाप्रमाणकत्वात्, यदेव प्रत्यात्मप्रसिद्धं तदेवास्य लक्षणम्, वक्ष्यति च द्वितीयप्रश्नमधिकृत्य कथंलक्षणो वेति, 'उपयोगो लक्षणं' (अ० २, सू० ८) इति, चेतनाविशेषलक्षितस्य च[2] कर्मोदयाद्यपेक्षाणि भावान्तराण्यधिकृत्य को जीव इत्यत्र प्रश्ने प्रतिपत्तिराहिता आत्मनः, एकरूपमपि चैतन्यस्वतत्त्वं कर्मक्षयोपशमाद्यवस्थाविशेषनिमित्ताद्व्यपदेशाद्भावेयत्तानियमं प्रतिपद्यते, उपलक्षणभूताश्चैते प्रायः कर्मापेक्षत्वाद् भवन्ति स्वतत्त्वं, यथा चक्षुर्द्वारकज्ञानविषयो रूपमिति, उपयोगः पुनः स्वतत्त्वं यथा मूर्ती रूपमिति, तथा चाग्नेरुष्णत्ववच्चैतन्यलक्षणमहेयमात्मनः, तस्यैवाग्नेर्धूमवदौपशमिकादि प्रायो हेयमुपलक्षणमिति। कर्मविपाकाविर्भाव उदयः तत्प्रयोजनस्तन्निर्वृत्तो वा औदयिको भावः। तद्यथा—नरकगतिनामकर्मोदयान्नरकगतिरौदयिकोऽभिधीयते भावः, कषायमोहनीयोदयाच्च क्रोधी मानीत्याद्यौदयिकः, सर्वत्रैवं वासनाऽऽधेया, यद् यत्र

भागकर्म तदस्त्येककं वेदयति, अस्त्येककं नो वेदयति, ज्ञातमेतदर्हता, विज्ञातमेतदर्हता—अयं जीव इदं कर्म आभ्युपगमिक्या वेदनया वेदयिष्यति। अयं जीव इदं कर्म औपक्रमिक्या वेदनया वेदयिष्यति, यथाकर्म यथानिकरणं यथा यथा भगवता दृष्टं तथा तथा विपरिणंस्यति इति तत् तेनार्थेन गौतम ! एवमुच्यते।

[1] 'अज्झोवं गमियाए' इति ग-टी-पाठः। [2] 'निमित्ताद्यपदेशात्' इति ग-टी-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नरकगतिनाम विपक्कं सदौदयिकशब्देनोच्यते कषायमोहनीयं च विपक्कं क्रोधादि तत् कथं जीवस्य स्वतत्त्वं स्यात्? यतः कर्म पौद्गलिकं मूर्तमचेतनं,आत्मस्वभावस्तु तद्विपरीत इति। उच्यते—ननूक्तमेव प्राग् उपलक्षणभूताश्चैते प्रायः पार्थक्येनापि वर्तमाना धूमवदग्नेरात्मनो भावाः गमका भवन्ति हेयाश्च, अथवा य एते गत्याद्याः परिणामविशेषाः स जीव एव कर्मावष्टम्भजनित-परिणामानन्यत्वात्, अन्योऽन्यानुगतौ सत्यामविभागात्, तदात्मकत्वमुदकदुग्धयोरिवात्मक-र्मणोः, अतः स्वतत्त्वमात्मनो गत्यादयः, सैव हि चेतनाऽनपायिनी कर्ममलदिग्धाऽनेका-वस्थान्तरावस्कन्दिनी तथा व्यपदिश्यते इति न दोषः । कश्चिदाढौकते—परिणाम एव हि पारिणामिक इति स्वार्थे प्रत्ययो न प्रयोजननिर्वृत्त्योः, किं कारणम् ? आदिमत्त्वप्रसङ्गा-ज्जीवभव्याभव्यत्वादेः, यदि परिणामः प्रयोजनमस्येति व्युत्पत्तिः पारिणामिको जीव इति ततः प्रागवस्थायां नाभूज्जीव इति, युक्त्यागमाभ्यां चैष पक्षो विरुध्यते, एवं निर्वृत्यर्थे-ऽपि प्रागनिर्वृत्तौ निर्वर्त्येत, स एव दोषः, तथा भव्याभव्यत्वादिष्वपि योज्यम् । युक्ति-विरोधस्तावत् कथमसन् खरविषाणकल्प आत्मोत्तरकालं सम्भवेत् ? । आगमश्चायम्—"एस[1] णं भंते! जीवे तीतमणंतं सासयं समयं भूतीति[3] वत्तव्वं सिया? हंता गोयमा! एस-णं भंते! जीवे पडुप्पण्णं सासयं समयं भवतीति वत्तव्वं सिया ? हंता गोयमा! एस णं जीवे अणागयमणंतं सासतं[4] समयं भविस्सतीति वत्तव्वं सिया ? हंता गोयमा" (भगवत्यां श० १४, उ०४,सू०५११) तस्माद् युक्त्यागमविरोधौ मा भूतामिति । परिणाम एव हि पारिणामिक इति स्वार्थे प्रत्ययो न प्रयोजननिर्वृत्त्योः, किं कारणम् ? आदिमत्त्वप्रसङ्गात् पारिणामिकोऽनादिप्रसिद्धः सकलपर्यायराशेः प्रह्वतामभिमुखतां प्रतिपद्यमानोऽशेषभावाधारतां बिभर्तीति नामुना विना कस्यचिद् भावस्य निष्पत्तिः, अतश्च प्राधान्यमस्यैव भावानां मध्य-यिति । पारिणामिकशब्देन च द्रव्यभावप्राणावस्थाख्यः परिणाम उच्यते, तथा सेधनयोग्यः परिणामो भव्यः, अभव्यस्तु न कदाचित् सेधनयोग्यः परिणाम इति । सूत्रपर्यन्तवर्ती चशब्दः समुच्चये, औपशमिकादयो भावाः जीवस्य स्वतत्त्वमौदयिक-पारिणामिकौ च स्वतत्त्वमिति भावानां पर्यन्ते च वृत्ताविति शब्दोऽर्थपदार्थः; क एते औपशमिकाद्यर्थाः पञ्च भावाः ? जीवस्य स्वतत्त्वं भवन्ति, विनाऽप्येवकारेण सङ्ख्याशब्दो-पादानादवधृतिर्गम्यते पञ्चैवाऽन्यूनाधिका भावाः पर्यायाः जीवस्य स्वतत्त्वमुपलक्षणद्वारेण भूयसा भवन्ति । एते च सर्वजीवेषु सर्वदा साकल्येन न भवन्तीत्युपलक्षणमात्रमतो द्रष्टव्याः। एवमौपशमिकादिभावयुक्तो द्रव्यं जीवः सङ्कोचविकासस्वभावो लोकाकाशप्रदेशमाना-

---

१ एष भदन्त ! जीवः अतीतेऽनन्ते शाश्वते समये भवतीति वक्तव्यं स्यात् ? हन्त गौतम !, एष भदन्त ! जीवः प्रत्युत्पन्ने शाश्वते समये भवतीति वक्तव्यं स्यात् ? हन्त गौतम !, एष जीव अनागतेऽनन्ते शाश्वते समये भविष्यतीति वक्तव्यं स्यात् ? हन्त गौतम !

२ 'नीयमाणं' इति ग–टी–पाठः । ३ 'भुवीति' इति ग–टी–पाठः । ४ 'सासयं' इति ग–टी–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संख्येयप्रदेशोऽपि प्रदीपवदाश्रयमात्रावभासी प्रमाणत्वात् अमूर्तेभ्योऽप्याकाशादिभ्यो भिन्नजातीय इति ॥ १ ॥

एवमेते जीवस्य स्वनिमित्ताः कर्मक्षयावस्थानिमित्ताश्च भावा मूलभेदतो व्याख्याताः। अधुनैषां प्रत्येकं सम्भविनो भेदाः प्रतायन्ते, यथैव निमित्तान्तरादविलक्षणस्यापि जीवस्य भावानां पञ्चत्वं तथा पञ्चानामपि पृथक् पृथक् निमित्तापेक्षा भेदा भवन्ति, ते चामी—

सूत्रम्—द्विनवाष्टादशैकविंशतित्रिभेदा यथाक्रमम् ॥ २-२ ॥

भा०—एते औपशमिकादयः पञ्च भावाः द्विनवाष्टादशैकविंशतित्रिभेदा भवन्ति। यथा औपशमिको द्विभेदः। क्षायिको नवभेदः। क्षायिकोपशमिकोऽष्टादशभेदः। औदयिक एकविंशतिभेदः। पारिणामिकस्त्रिभेद इति। यथाक्रममिति येन सूत्रक्रमेणात ऊर्ध्वं वक्ष्यामः ॥ २ ॥

औपशमिकादीनां भेदसंख्या

टी०—द्विनवाष्टादशेत्यादि सूत्रम्, द्वौ च नव चेत्यादि द्वन्द्वः, पश्चाद् बहुव्रीहिः, द्विनवाष्टादशैकविंशतित्रयो भेदा येषां ते द्विनवाष्टादशैकविंशतित्रिभेदा औपशमिकादयः, प्रागुपन्यस्तसूत्रानुपूर्व्यपेक्षं यथाक्रमग्रहणम्। एतच्च व्यतिकरदोषनिवृत्त्यर्थं मा भूत् पञ्चानामेकस्यैते भेदाः, समस्तानां वा एतावन्त एव, किन्तु एकैकस्य भावस्य वक्ष्यमाणाः सम्यक्त्वचारित्रे इत्यादयो यथा स्युरिति यथाक्रमग्रहणम्। इह केचिद् विद्वांसः संसारस्थानामिति[2] वाक्यशेषमधीयते सिद्धव्यावृत्त्यर्थं, न किलैते द्व्यादिभिन्नास्तेषु सम्भवन्ति भावाः, एकरूपः पारिणामिक एव सम्भवति, तदेतदयुक्तम्, तत्र हि यथासम्भवं ग्रहीष्यन्ते, नावश्यं सर्वैः स्वभेदैः सर्वत्र भवितव्यम्, यथा संसारिणामपि मिथ्यादृष्टीनां न कदाचिदौपशमिकक्षायिकौ भवतः, अभव्यानां वा, तथा सिद्धेष्वपि यथासम्भवग्रहणमिति न किञ्चिद्वाक्यशेषेण। तथैवंरूपः पारिणामिक एव सम्भवति, तदेतदयुक्तम्, यस्मात् क्षायिकसम्यक्त्ववीर्यसिद्धत्वदर्शनज्ञानैः आत्यन्तिकैः स युक्तोऽतिनिर्द्वन्द्वेनापि च सुखेन, ज्ञानादयस्तु भावप्राणाः, मुक्तोऽपि जीवति स तर्हि, तस्माज्जीवत्वं नित्यं सर्वस्य जीवस्येत्येवमादयः पारिणामिका अपि भावाः सन्ति, न परिणाम एवेत्यवधृतिः ॥

सम्प्रति भाष्याक्षराणि विव्रियन्ते—एत इति प्रत्यक्षासन्नवाचिना सर्वनाम्नाऽनन्तरसूत्रनिर्दिष्टान् भावानभिमुखीकरोति, औपशमिकादय इति प्रतिविशिष्टं क्रममाचष्टे, भावा इति भवनलक्षणा जन्तोः परिणतिविशेषाः, पञ्चेति सङ्ख्ययाऽवधारणं तेषाम्, एतावता भाष्येणानूद्य पूर्वकमर्थमधुना भेदान् विधत्ते द्विनवेत्यादिना। इदं च सूत्रमेकमेवाचार्येण खण्डीकृत्याधीतम्, न पुनर्विवरणमस्य, कुत एतद् भवतीति? सूत्रमध्ये उच्चार-

१ 'क्षायोपशमिक' इति घ-पाठः। २ 'संसारस्थायिनाम्' इति ग-टी-पाठः। ३ 'वाक्यशेषमभिदधत' इत्युचितं प्रतिभाति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णाद् विभक्त्यश्रवणाच्च द्यादिषु निश्चीयते, पुनः सूत्रपाठे तर्हि किं प्रयोजनम् ? एतावल्लक्ष्यते-पूर्वं सूत्रार्थमनूद्य यथाक्रमं सूत्रं सम्बन्धयति–**औपशमिको द्विभेद** इत्यादि। विवरणं सुगमम्। **पारिणामिकस्त्रिभेद इति**, अयमितिशब्द आदिशब्दार्थे, शेषपारिणामिकभेदसङ्ग्रहार्थम्, **यथाक्रममिति**, अत्रेतिशब्दः शब्दपदार्थकः; अनेन शब्देनायमर्थः प्रत्याय्यते, **येन सूत्रक्रमेणात ऊर्ध्वं वक्ष्यामः**, येनेति वक्ष्यमाणेन सम्यक्त्वचारित्रे इत्यादिना अस्मात् सूत्रादुपरिष्टात् भणिष्यामः तेन क्रमेण यथाक्रममौपशमिकादयो द्रष्टव्याः। वाक्यान्तरेण प्रकृतार्थनिगमनमादर्शितम्, वाक्यान्तरनिरूपणं च व्याख्यायाः प्रधानाङ्गमिति सङ्ख्यानमात्रश्रवणादुद्देशसूत्रमिदं, न तु भेदनिर्देशः ॥ २ ॥

सम्प्रति संख्येयान् भावविशेषान् निर्दिशति; औपशमिकस्य तावत् सूत्रक्रमप्रामाण्यात् भेदद्वयं प्रतिपिपादयिषुराह–

सूत्रम्—सम्यक्त्वचारित्रे ॥ २–३ ॥

औपशमिकस्य द्वौ भेदौ

भा०—सम्यक्त्वं चारित्रं च द्वावौपशमिकौ भावौ भवत इति ॥ ३ ॥

टी०—सम्यक्त्वचारित्रे सम्यक्त्वमुक्तं प्रथमेऽध्याये लक्षणविधानाभ्याम्, चारित्रं नवमे वक्ष्यते। एतदुभयमपि सिद्धं गृहीत्वा इहौपशमिकभावो नियम्यते, सम्यक्त्वचारित्रे त्वनियते क्षायिकक्षायोपशमिकयोरपि भवतः, औपशमिकभावस्तु द्वयमिदमपहाय न भेदान्तरमवरुणद्धि, अयं च नियमो द्विनवाष्टादिसूत्रारम्भसामर्थ्याल्लभ्यते, औपशमिको द्विभेद एवेति गम्यते, सङ्ख्याशब्दोपादानेऽप्येवकारेण तद्यथेत्यादिभाष्ये अनन्तरसूत्रनिर्दिष्टं द्विभेदत्वमौपशमिकस्य तदधुना यथा भवति तथा प्रकाश्यते–सम्यक्त्वचारित्रे चेति, तत्त्वरुचिः **सम्यक्त्वम्**, सदसत्क्रियाप्रवृत्तिनिवृत्तिलक्षणं **चारित्रम्**, **च**शब्दः समुच्चये, एतदुभयमपि इष्टनियमप्रदर्शनार्थम्, **द्वाविति** सङ्ख्योपादानम्, स च प्रकटीकृत एव प्राक्। **औपशमिकावित्यनेन** नियम्य पदार्थं दर्शयति–**भावाविति**। सम्यक्त्वचारित्रयोरात्मपर्यायत्वं दर्शयति–**भवत इति**। श्रद्धानचरणक्रिययोः क्रियावतः सकाशादनन्यत्वमाह, अतः समुदायार्थोऽयम्–सम्यक्त्वचारित्रे द्वे एव औपशमिको भावो भवति, नान्यथेति ॥ ३ ॥

अथ क्षायिको नवभेद उद्दिष्टः सोऽधुना निर्दिश्यते—

सूत्रम्–ज्ञानदर्शनदानलाभभोगोपभोगवीर्याणि च ॥ २–४ ॥

क्षायिकस्य नव भेदाः

भा०—ज्ञानं, दर्शनं, दानं, लाभः, भोगः, उपभोगः, वीर्यमित्येतानि सम्यक्त्वचारित्रे च नव क्षायिका भावा भवन्तीति ॥४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—ज्ञानदर्शनेत्यादि सूत्रम्। कृतद्वन्द्वानां निर्देशः, चशब्दोऽनन्तरद्वयानुकर्षणार्थः सूत्रोक्ताः सप्त च द्वौ चशब्दानुकृष्टावित्येवं नव भेदाः॥ ननु च सिद्धत्वमपि क्षायिको भावः, स चेह न निर्दिष्टः सूरिणा, कोऽभिप्राय इति?। उच्यते—कर्माष्टकैकदेशक्षयादेते क्षायिकाः सूत्रेण प्रतिबद्धाः, सिद्धत्वं तु सकलकर्मक्षयजं भवप्रपञ्चपरिवर्तं परां विशुद्धिकाष्ठामितं परमक्षायिकं कालस्वभावभेदात् मुक्तकाल एव सर्वकर्माभावस्वभाव इत्यतो न प्रतिबद्धम्, ज्ञानादयस्तु संसृतौ मुक्तौ च केचित् सम्भवन्तीति विशेषप्रतिपादनार्थमग्रहणं सिद्धत्वस्येति। कथं पुनरयमाचार्याभिप्रायो गम्यते?। उच्यते—वक्ष्यति हि दशमे 'औपशमिकादिभव्यत्वाभावाच्चान्यत्र केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः' (अ०१०,सू०४) इति, तन्न खलु विस्मृत इहाचार्यस्यायं सिद्धत्वलक्षणो भावः, किन्तु मोक्षकाष्ठा परासाविति तत्रैवोपादास्यामहे—मोक्षाधिकार एव पठिष्यामः इत्यमुनाऽभिप्रायेण नेहाधीतः, ये पुनः कर्माष्टकैकदेशक्षयात् जातास्त इहावध्रियन्ते नवेत्यदोषः॥

भाष्याक्षराण्यधुनाऽनुगम्यन्ते—**ज्ञानमिति** केवलं सकलज्ञेयग्राहि समस्तज्ञानावरणक्षयप्रभवं परिगृह्यते, न शेषमसम्भवात्, **दर्शनमपि** केवलाख्यमशेषदर्शनावरणीयक्षयसमुद्भूतमुपात्तम्, न शेषं चक्षुराद्यसम्भवात्, **दानमिति** वक्ष्यते लक्षणतः 'स्वस्यातिसर्गो दानं' (अ० ७, सू० ३३) तच्च सकलदानान्तरायक्षयादेकस्मादपि तृणाग्रात् त्रिभुवनविस्मयकरं यथेप्सितमर्थिनो न जातुचित् प्रतिहन्यते प्रयच्छत इति, **लाभ** इति परस्माच्चतुर्वर्गस्यान्यतमसमस्तसाधनप्राप्तिः, स चाशेषलाभान्तरायकर्मक्षयादचिन्त्यमाहात्म्यविभूतिराविर्भवति। येन यत् प्रार्थयते तत् समस्तमेव लभते, न तु प्रतिषिध्यते। शुभविषयसुखानुभवो **भोगः**, अथवा भक्ष्यपेयलेह्यादिसकृदुपयोगाद् भोगः, स च कृत्स्नभोगान्तरायक्षयाद् यथेष्टमुपपद्यते, न तु सप्रतिबन्धः कदाचिद् भवति, न वा न भवत्यभिलषित इति। विषयसम्पदि सत्यां तथोत्तरगुणप्रकर्षात् तदनुभवः **उपभोगः**, पुनः पुनरुपभोगाद् वा वस्त्रपात्रादिरुपभोगः, स च निरवशेष उपभोगान्तरायकर्मणि क्षीणे यथेष्टमुपतिष्ठते। अप्रतिघः शक्तिविशेष आत्मनो **वीर्यम्**, तच्चाप्रतिहतमपास्ताशेषवीर्यान्तरायकर्मणो भवति, तेन च यदिच्छति तत् सर्वमायत्तीकरोति। **सम्यक्त्वं** पुनरनन्तानुबन्धिकषायमिथ्यात्वमिश्रसम्यक्त्वदर्शनसप्तकक्षयादात्यन्तिकादप्रतिहतं जीवादिपदार्थश्रद्धानलक्षणमसंहार्यमुपजायते। **चारित्रं** तु सकलमोहक्षयात् क्षायिकमाविर्भवति। **वीर्यमित्यत्रायमितिशब्दोऽर्थपदार्थकः, एतानीति** सूत्रोक्तानि, **चशब्दः** समुच्चये, **सम्यत्वचारिते च, नव क्षायिका भावा भवन्तीति**॥ ४॥

उद्दिष्टः क्षायोपशमिकोऽष्टादशधा, स इदानीमाविर्भाव्यते—

---

१ 'पारावर्त्ती' इति ग-टी-पाठः। २ 'पादनार्थग्रहणं सिद्धस्येति' इति क-ख-पाठः। ३ 'भव्यत्वाभव्यत्वान्यत्र' इति क-ख-पाठः। ४ 'त्यभिलाष इति' ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रम्—ज्ञानाज्ञानदर्शनदानादिलब्धयश्चतुस्त्रित्रिपञ्चभेदाः यथाक्रमं सम्यक्त्वचारित्रसंयमासंयमाश्च ॥ २—५ ॥

क्षायोपशमिकस्याष्टादश भेदाः

भा०—ज्ञानं चतुर्भेदं-मतिज्ञानं, श्रुतज्ञानं, अवधिज्ञानं, मनःपर्यायज्ञानमिति । अज्ञानं त्रिभेदं-मत्यज्ञानं, श्रुताज्ञानं, विभङ्गज्ञानमिति । दर्शनं त्रिभेदं-चक्षुर्दर्शनं, अचक्षुर्दर्शनं, अवधिदर्शनमिति। लब्धयः पञ्चविधाः-दानलब्धिः, लाभलब्धिः, भोगलब्धिः, उपभोगलब्धिः, वीर्यलब्धिरिति । सम्यक्त्वं चारित्रं संयमासंयम इत्येतेऽष्टादश क्षायोपशमिका भावा भवन्तीति ॥ ५ ॥

टी०—ज्ञानाज्ञानेत्यादि सूत्रम्, ज्ञानादीनां लब्धिपर्यन्तानां द्वन्द्वः, चतुरादीनामपि पञ्चानां द्वन्द्वः, पश्चाद् बहुव्रीहिः, चतुःत्रित्रिपञ्च भेदा यासां ताश्चतुस्त्रित्रिपञ्चभेदाः । अत्र च यथासङ्ख्यमभिसम्बन्धो ज्ञानादीनाम्, सम्यक्त्वादीनामपि कृतद्वन्द्वानां बहुवचनेन निर्देशः, अशक्यप्रतिबन्धमन्यथा सूत्रमतो विच्छेदमकरोत् सूत्रकारः ॥ ननु च सम्यक्त्वचारित्रयोरधिकारादेवानुवृत्तिर्भविष्यतीह सूत्रे, नार्थः शुद्धग्रहणेनेति । उच्यते-'चानुकृष्टमुत्तरत्र नानुवर्तत' इत्यभिप्रायः । चशब्दः समुच्चितौ, ज्ञानादयो लब्ध्यन्ताः सम्यक्त्वादयश्च । क्षायोपशमिकोऽष्टादशधा ॥

अधुना भाष्यार्थः-ज्ञानं चतुर्भेदमित्युद्देशभाष्यम्, मतिज्ञानमित्यादिनिर्देशः, एतानि च लक्षणविधानतः प्रथमे व्याख्यातानि, सम्प्रति तु नियममात्रं भावस्यावद्योत्यते । अत्र च मत्यादिचतुष्टयज्ञानावरणीयकर्मणां सर्वोपघातीनि देशोपघातीनि च स्पर्द्धकानि, तत्र सर्वेषु सर्वघातिस्पर्द्धकेषु ध्वस्तेषु देशोपघातिस्पर्द्धकानां च समये समये विशुद्ध्यपेक्ष्यं भागैरनन्तैः क्षयमुपगच्छद्भिर्देशोपघातिभिर्भागैश्चोपशान्तैः सम्यग्दर्शनसाहचर्याज्ज्ञानी भवति, तच्चास्य क्षयोपशमजं ज्ञानचतुष्टयमुच्यते, इतिशब्दः क्षायोपशमिकज्ञानेयत्ताप्रतिपत्त्यर्थः । अज्ञानं त्रिभेदमित्युद्देशः, मत्यज्ञानादि निर्देशः, ज्ञानमेव मिथ्यादर्शनसहचरितमज्ञानम्, कुत्सितत्वात् कार्याकरणादशीलवदपुत्रवद् वा, अज्ञानता च प्रपञ्चतः प्रथमे प्रतिपादिता, मिथ्यादृष्टेरवधिर्विभङ्ग उच्यते, भङ्गः-प्रकारः, कुत्सार्थो विरुपसर्गः, विगर्हितो भङ्गः विभङ्गः, विभङ्गं च तज्ज्ञानं च विभङ्गज्ञानम्, अत्र विभङ्गशब्देन कुत्सा गतेति न ज्ञानशब्दादौ नञ्योगस्तेन विभङ्गज्ञानम् । तदेतत् त्रिविधमपि ज्ञानावरणक्षयोपशमजमवसेयम् । अज्ञानेयत्तापरिच्छेदार्थमितिशब्दः । दर्शनं त्रिभेदमित्युद्देशः, चक्षुर्दर्शनमित्यादि निर्देशः, चक्षुषा दर्शनम्-उपलब्धिः सामान्यार्थग्रहणं स्कन्धावारोपयोगवत् तदहर्जातबालदारकनयनोपलब्धिवद् वा व्युत्पन्नस्यापि, अचक्षुर्दर्शनं-शेषेन्द्रियैः श्रोत्रादिभिः सामान्यार्थग्रहणम्, अवधिदर्शनावरणक्षयोपशमनाद् विशेषग्रहणविमुखोऽवधिदर्शनमित्युच्यते, नियमतस्तु तत् सम्यग्दृष्टि-

१ 'नञ्प्रयोगः' इति ग-टी-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वामिकम्, एवमेतत् त्रिविधमपि दर्शनावरणकर्मणः क्षयोपशमादुपजायत इति। अत्र **अपीति** शब्दः क्षायोपशमिकदर्शनेयत्ताधिगमार्थः। **लब्धयः पञ्चविधाः** इत्यमुना विवरणेन यथासङ्ख्यमुपदर्शयति-**दानलब्धिरित्यादिना** भाष्येण, आदिशब्दाक्षिप्ताः प्रतिविशिष्टा एव लब्धीरुपवर्णयति, अनेकरूपत्वाल्लब्धीनाम्॥ नन्वनन्तरसूत्रनिर्दिष्टाः प्रतिपदमेता एव ग्रहीष्यन्ते न पुनरुपादेया इति उच्यते-अत एव सूत्रे नोपात्ताः, प्रतिपदविवरणे पुनर्न दोषः कश्चित्, यथा यथा सुविवृतं भवति तथा तथा विवृणोति। एताः पञ्चापि लब्धयोऽन्तरायकर्मणां क्षयोपशमाद् भवन्ति, **सम्यक्त्वमनन्तानुबन्धिकषायदर्शनमोहक्षयोपशमादाविश्चकास्ति,** **चारित्रमपि** दर्शनमोहकषायद्वादशकक्षयोपशमाज्जायते सकलविरतिलक्षणम्, संयमश्चासावसंयमश्च **संयमासंयमः**-सङ्कल्पकृतात् प्राणातिपातान्निवृत्तिरारम्भकृतादनिवृत्तिः तथा मृषावादादिष्वपि योज्यम्। सङ्क्षेपतो द्वादशविधः श्रावकधर्मः संयमासंयमो व्यावृत्तिप्रवृत्तिलक्षणः। स च दर्शनमोहापोहादनन्तानुबन्ध्यप्रत्याख्यानकषायाष्टकक्षयोपशमाज्जायते। **इतिशब्दः** क्षायोपशमिकभेदेयत्ताप्रतिपादनार्थः। एतत् प्रतिपदमुद्दिष्टाः। **अष्टादशेति** सङ्ख्यावच्छिन्नाः। **क्षायोपशमिका** इति शेषभावव्युदासः। भवनलक्षणास्त्वेते **भावाः** प्रादुष्यन्तीति॥ ५॥

औदयिकस्त्वेकविंशतिविधान उद्दिष्टः, सोऽधुना भण्यते—

सूत्रम्—गतिकषायलिङ्गमिथ्यादर्शनाज्ञानासंयतासिद्धत्वलेश्याश्चतुरुत्तरैकैकैकषड्भेदाः॥ २-६॥

२१ भेदा औदयिकस्य

भा०—गतिश्चतुर्भेदा-नारक-तैर्यग्[1]यौन-मानुष्य-देवा इति। कषायश्चतुर्भेदः-क्रोधी, मानी, मायी, लोभीति। लिङ्गं त्रिभेदं-स्त्री, पुमान्, नपुंसकमिति। मिथ्यादर्शनमेकभेदं, मिथ्यादृष्टिरिति। अज्ञानमेकभेदं, अज्ञानीति। असंयतत्वमेकभेदं, असंयतोऽविरत इति। असिद्धत्वमेकभेदं, असिद्ध इति। एकभेदमेकविधमिति। लेश्याः षड्भेदाः- कृष्णलेश्या, नीललेश्या, कापोतलेश्या, तेजोलेश्या, पद्मलेश्या, शुक्ललेश्या। इत्येते एकविंशतिरौदयिकभावा भवन्ति॥ ६॥

टी०—गतिकषायेत्यादि सूत्रम्। गत्यादीनां लेश्यान्तानां द्वन्द्वः। चतुरादीनां षडन्तानां द्वन्द्वगर्भो बहुव्रीहिः। एवमियमेकविंशतिरौदयिकभेदानामवसेया॥ ननु च बहवोऽसङ्गृहीताः कर्मभेदाः प्राप्नुवन्त्यौदयिकाः, त्वया च परिसंख्या क्रियते, दर्शनावरणे तावन्निद्रादिपञ्चकं वेदनीयमुभयं मोहनीये हास्यादिषट्कं आयुश्चतुर्विधं नामकर्म सकलम्, गतिरुपात्ता केवलं तत्रत्या, गोत्रमुभयमपि, सर्वे एते औदयिका भावाः तत् कथमेषां परिगणनेन सङ्ग्रहः? उच्यते-अज्ञानग्रहणान्निद्रादिपञ्चकमाक्षिप्तम्, यतो ज्ञानदर्शनावरण-

१ 'तिर्यक्' इति ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्शनमोहनीयोदयादज्ञानं भवति, गतिग्रहणाच्छेषनामभेदाः गोत्रवेदनीयायूंषि चाक्षिप्तानि, यस्माद् गतिरायुष्कजात्यादिनामगोत्रवेदनीयानामन्यतमाभावेऽपि न सम्भाव्यते, भवधारणकारणत्वात् एषां कर्मणामिति, तथा लिङ्गग्रहणाद् हास्यादिषट्कग्रहणम्, हास्यादिषट्कस्य लिङ्गोपग्रहकारकत्वात्, कषायग्रहणाद् वा हास्यादिपरिग्रहः, यस्मादेते नव नोकषायाः कषायसहवर्तित्वादुच्यन्त इति ॥ ननु च कर्मप्रकृतिभेदानां द्वाविंशत्युत्तरशतं प्रकृतिगणनया प्रसिद्धमाम्नाये, न च तत्र लेश्याः परिपठितास्तत् कथम् ? । उच्यते—वक्ष्यते नामकर्मणि मनःपर्याप्तिर्नाम, पर्याप्तिश्च करणविशेषो येन मनोयोग्यान् पुद्गलानादाय चिन्तयति, ते च मन्यमानाः पुद्गलाः सह करणेन मनोयोग उच्यते, मनोयोगपरिणामश्च लेश्याः, ताश्च नोपात्ताः सूत्रभाष्ययोरिहोत्तरोत्तरभेदत्वादिति । अपरे मन्यन्ते—कर्माष्टकोदयादसिद्धत्व एव लेश्या ग्राह्याः, तदेतत् सर्वं सूत्रकारेण लाघवमिच्छता लेशत उपात्तं न साक्षात् ॥

अधुना भाष्यमनुस्रियते[1]—**गतिश्चतुर्भेदा** नारकादिचतुर्विधपर्यायोत्पादनव्यपदेशकारणसमर्थं यत् कर्म तद् गतिशब्देनोच्यते, तस्य कर्मण उदयादयं निर्वर्तते भावो नारकादिः नरकगतिनामकर्मोदयान्नारक इत्येवं सर्वत्र, आत्मगतिनामकर्मणोश्चाभेदमभिसन्धायाचार्येण प्रेक्षापूर्वकारिणा नारक इति निरदेशि, न तु नरकगतिमात्रमौदयिकस्य जीवस्वतत्त्वप्रतिपादनार्थम्, **इति**शब्दः सर्वभेदान्तेष्वियत्ताप्रदर्शनार्थः । **कषः**—संसारस्तस्यायमुपादानकारणविशेषः **कषायः** । स चतुर्धा क्रोधादिस्तदुदयात् क्रोध्यादिव्यपदेशः । अत्रापि जीवस्वतत्त्वप्रतिपत्तये क्रोधीति व्यपादेशि न क्रोध इति । **लिङ्गं त्रिभेदं**—स्त्रीत्वादि, तच्च लीनत्वाल्लिङ्गमुच्यते, यस्मात् पुरुषलिङ्गनिर्वृत्तावतिप्रकटायामपि कदाचित् स्त्रीलिङ्गमुदेति न च स्पष्टं बहिरुपलभ्यते नपुंसकलिङ्गं वा, तथा स्त्रियाः स्वलिङ्गनिर्वृत्तावतिस्पष्टायामेव जातुचित् पुन्नपुंसकलिङ्गोदयः, नपुंसकस्याप्येवं स्वलिङ्गनिर्वृत्तावुत्तरकालभाविनी कदाचित् पुंस्त्रीलिङ्गे भवतो न च निर्वृत्तितो लक्ष्यते, कपिलवदिति सर्वत्र योज्यम् । एतदेव त्रिविधं लिङ्गं वेद उच्यते, यस्य कर्मण उदयात् पौंस्नं स्त्रैणं नपुंसकत्वं च भवति तल्लिङ्गम्, अत्राप्यभेदेन निर्देशः **पुमान्, स्त्री, नपुंसकमिति। मिथ्यादर्शनमेकभेदं** तत्त्वार्थाश्रद्धानलक्षणम्, यस्य कर्मणः उदयान्न किञ्चित् तत्त्वं श्रद्धत्ते तन्मिथ्यादर्शनम् ॥ ननु च अभिगृहीतानभिगृहीतसन्देहतस्त्रिधोक्तम्[2], उच्यते—सर्वत्राश्रद्धानलक्षणं न भिद्यत इत्येकभेदमुक्तम्, अत्राप्यभेदोपचारात् मिथ्यादृष्टिरिति । **अज्ञानमेकभेदं** ज्ञानदर्शनावरणसर्वघातिदर्शनमोहनीयोदयादज्ञानमनवबोधस्वभावमेकरूपम्, तथैवाभेदमाधाय मनसि व्यपादिशद् **अज्ञानीति** । **असंयतत्वमेकभेदं** सञ्ज्वलनवर्जकषायद्वादशकोदयादसंयतत्वमेकरूपम्, अत्राप्यभेदेन निर्देशः पर्यायतश्च **असंयतः अविरत इति** । **असिद्धत्वमेकभेदं** वेदनीयायुर्नामगोत्रोदयादसिद्धत्वमेकरूपम्, तथैवाभेदादसिद्ध इति प्रदर्शितम् । एकभेदमित्यस्य पर्यायान्तरं कथयति पर्यन्ते

---

१ 'श्रियते' इति ख—पाठः । २ उक्तमेतत् ११३ तमे पृष्ठे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वत्र सम्बन्धनार्थम्—एकविधामिति, व्याख्याधर्मश्चायं पर्यायान्तरकथनमिति। **लेश्याः षड्भेदाः**। लिश्यन्त इति लेश्याः, मनोयोगावष्टम्भजनितपरिणामः, आत्मना सह लिश्यते एकीभवतीत्यर्थः। अनेकत्वेऽपि परिणामस्य परिस्थूरकतिपयभेदकथनमेव सुज्ञानत्वात् क्रियते, न त्वशेषपरिणामभेदाख्यानमशक्यत्वात्, इत्याह—**षड्भेदा** इति। सम्प्रति तारतम्यविशुद्धिक्रममाविर्भावयन् पठति—कृष्णलेश्येत्यादि। कृष्णा चासौ लेश्या **कृष्णलेश्या**, सर्वत्रैवमायोज्यम्। लेश्येति परिणाम उक्तः स कथं कृष्णादिवर्णसम्बन्धी स्यादात्मनः। उच्यते—द्विविधा लेश्या द्रव्यभावभेदतः। तत्र द्रव्यलेश्याः कृष्णादिवर्णमात्रम्, भावलेश्यास्तु कृष्णादिवर्णद्रव्यावष्टम्भजनिता परिणामकर्मबन्धनस्थितेर्विधातारः, श्लेषद्रव्यवद् वर्णकस्य चित्राद्यार्पितस्येति, तत्राविशुद्धोत्पन्नमेव कृष्णवर्णस्तत्सम्बद्धद्रव्यावष्टम्भादविशुद्धपरिणाम उपजायमानः कृष्णलेश्येति व्यपदिश्यते। आगमश्चायं—"जल्लेस्साइं दव्वाइं आदिअंति तल्लेस्से परिणामे भवति"[2] (प्रज्ञा० लेश्यापद)। तथा नीलवर्णद्रव्यावष्टम्भान्नीललेश्या, नीललोहितवर्णद्वययोगिद्रव्यावष्टम्भात् कापोतलेश्या, लोहितवर्णद्रव्यावष्टम्भात् तेजोलेश्या, पीतवर्णद्रव्यावष्टम्भात् पीतलेश्या, शुक्लवर्णद्रव्यावष्टम्भात् शुक्ललेश्या, वर्णाशुद्ध्यपेक्ष्या भावाशुद्धिः तच्छुद्ध्यपेक्ष्या भावशुद्धिरिति। तेजोलेश्यायाः शुभपरिणामापेक्षा इष्टा इष्टतरा इष्टतमा चेति। कापोतलेश्यायाः प्रातिलोम्येनानिष्टपरिणामापेक्षा अनिष्टा अनिष्टतरा अनिष्टतमा चेति। आसां च षण्णामपि लेश्यानां जम्बूवृक्षफलभक्ष[क]दृष्टान्तेनागमप्रसिद्धेन ग्रामदाहकपुरुषषट्केन च प्रसिद्धिरापाद्या, एवं सर्वान् भेदानाख्यायोपसंहरति—एत इत्यादि। **एकविंशतिरेवान्यूनाधिका भावाः** कर्मोदयापेक्षाः प्रादुर्भवन्तीति ॥ ६ ॥

लेश्यास्वरूपम्

पारिणामिकस्त्रिभेद उद्दिष्टः, स उच्यते—

सूत्रम्—जीवभव्याभव्यत्वादीनि च ॥ २-७ ॥

भा०—जीवत्वं, भव्यत्वं, अभव्यत्वमित्येते त्रयः पारिणामिका भावा भवन्ति। आदिग्रहणं किमर्थमित्यत्रोच्यते—अस्तित्वं, अन्यत्वं, कर्तृत्वं, भोक्तृत्वं, गुणवत्त्वं, असर्वगतत्वं, अनादिकर्मसन्तानबद्धत्वं, प्रदेशवत्त्वं अरूपत्वं, नित्यत्वमित्येवमादयोऽप्यनादिपारिणामिका जीवस्य भावा भवन्ति, धर्मादिभिस्तु समाना इत्यादिग्रहणेन सूचिताः। ये जीवस्यैव वैशेषिकास्ते[1] स्वशब्देनोक्ता इति। एते पञ्च भावास्त्रिपञ्चाशद्भेदा जीवस्य स्वतत्त्वं भवन्ति, अस्तित्वादयश्च ॥ ७ ॥ किञ्चान्यत्।

३ भेदाः पारिणामिकाः

टी०—जीवभव्याभव्यत्वादीनि च। अत्र भावे त्वप्रत्ययः प्रत्येकमभिसम्बध्यत इति प्रदर्शयन्नाह—जीवत्वमित्यादि। जीवभावो जीवत्वं स्वार्थिको भावप्रत्ययः।

---

१ 'विशेषकास्ते' इति ग-पाठः।

२ यल्लेश्यानि द्रव्याण्याददते तल्लेश्यः परिणामो भवति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीव एव जीवत्वमसङ्ख्येयप्रदेशाः चेतनेति, भव्या सिद्धिर्यस्यासौ भव्यः, उत्तरपदलोपाद् भीमादिवत्, भव्य एव **भव्यत्वम्**, अभव्यः सिद्धिगमनायोग्यः कदाचिदपि यो न सेत्स्यति अभव्य एवाभव्यत्वम् ॥ ननु वन्ध्यापुत्रोऽप्येवमभव्यः स्यात्, नैतत्, कुतः ? तुल्याधिकरणेऽन्यस्मिन् नञ्प्रयोगादब्राह्मणवत्। एतेनाकाशाभव्यत्वं प्रत्यस्तम्, इतिशब्दो व्यवच्छिनत्ति, भावत्रयमप्यसाधारण्येन जीवस्य। **एते त्रयः पारिणामिका भावा भवन्तीत्यनेन** भाष्येणैतत् प्रतिपादयति—न कर्मकृताः, स्वाभाविका एते जीवस्य त्रयोऽपि भवन्ति। **आदिग्रहणं किमर्थमिति** प्रश्नयतः[1] कोऽभिप्रायः ? एवं मन्यते—द्विनवाष्टादिसूत्रेण (अ० २, सू० २) त्रिपञ्चाशद् भावभेदा नियताः, तद्यदि सन्त्यन्येऽपि ततश्चानियतः सङ्ख्याभेदः, तथा चानर्थकं सूत्रम्, अथ तावन्मात्रा एव न सन्त्यन्ये ततोऽनर्थकमादिग्रहणमतः पृच्छति, अत्रोत्तरमुच्यते—द्विनवाष्टादिसूत्रेण जीववर्तिन एव त्रिपञ्चाशद् भेदाः सङ्गृहीता इति सङ्ख्यानियमो न भिद्यते, न चानर्थक्यं सूत्रस्य, जीववर्तिनोऽजीववर्तिनश्च (ये) साधारणाः पारिणामिकास्ते तत्र नोपात्ताः, तदुपादानायेदमादिग्रहणम्। अतस्तान् दर्शयति—**अस्तित्वादिना** भाष्येण ॥ **अस्तित्वं** भावानां मौलो धर्मः सत्तारूपत्वम्, तच्चात्मनो ज्ञाना-

अस्तित्वादयः साधारणाः

दिसद्भावात् प्रसिद्धमपह्नोतुमशक्यमादावुपन्यस्तम्, इदं च परमाण्वादीनामपि सामान्यम्। **अन्यत्वमिति** शरीरादात्मनः, तद्विलक्षणत्वात् परलोकसद्भावाच्चावश्यमन्यत्वमभ्युपेयम्, तथाऽण्वादीनामपि परस्परेणास्ति। **कर्तृत्वमिति** शुभाशुभकर्मणो निर्वर्तकत्वं योगप्रयोगसामर्थ्यात्, कर्तृत्वादेव च **भोक्तृत्वं** स्वप्रदेशव्यवस्थितशुभाशुभकर्मकर्तृत्वात्, कर्तृत्वं सूर्यकान्तेऽपि सवितृकिरणगोमयसङ्गमादुपलभ्यतेऽग्निनिवृत्तौ अतः सामान्यम्, भोक्तृत्वं मदिरादिष्वत्यन्तप्रसिद्धं भुक्तोऽनया गुड इति। क्रोधादिमत्त्वात् **गुणवत्त्वं** ज्ञानाद्यात्मकत्वाद् वा, परमाण्वादावपि गुणवत्त्वमेकवर्णादित्वात् समानम्। त्वक्पर्यन्तशरीरमात्रव्यापित्वात् **असर्वगतत्वं** संसार्यात्मनः, मुक्तस्यापि समन्ततः परिमितत्वात् स्वदेहप्रमाणत्रिभागहीनावगाहात्मकत्वादसर्वव्यापिता, परमाण्वादिभिस्तुल्या। **अनादिकर्मसन्तानबद्धत्वमिति** अविद्यमानादिकर्मसन्ततया वेष्टितः संसारी संसृतौ पर्यटतीति, न मुक्त इति यथासम्भवमेतद् योज्यम्। कार्मणशरीरमप्यनादिकर्मसन्तानबद्धमिति सामान्यः चेतनाचेतनयोर्धर्मः। **प्रदेशवत्त्वं** तु लोकाकाशप्रदेशपरिमाणप्रदेश एक आत्मा भवति, धर्मादिद्रव्यसामान्यमेतत्। **अरूपत्वमिति** रूपरसगन्धस्पर्शविरहितत्वादात्मनः, तच्चाकाशादिभिस्तुल्यम्, **नित्यत्वमिति** 'तद्भावाव्ययं नित्यम्' (अ० ५, सू० ३०) इति वक्ष्यते, नित्यश्च ततो ज्ञानादिसद्भावादयमात्मा, तुल्यं चैतदाकाशादिभिः। एवमेते दश धर्माः साधारणा भाष्यकृतोपदर्शिता आदिशब्दाक्षिप्ताः। पुनरप्यादिग्रहणं कुर्वन् ज्ञापयत्यत्रानन्तधर्मकमेकम्, तत्राशक्याः प्रस्तारयितुं सर्वे धर्माः प्रतिपदं, प्रवचनज्ञेन पुंसा यथा-

---

१ 'प्रश्नयति' इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्भवमायोजनीयाः, क्रियावत्त्वं पर्यायोपयोगिता प्रदेशाष्टकनिश्चलता एवम्प्रकाराः सन्ति भूयांसः। अपिः समुच्चये। एवम्प्रकाराश्च अनादिपारिणामिका भवन्ति जीवस्य भावाः, धर्मादिभिस्तु समाना इत्यादिग्रहणेन सूचिताः।

क्रियावत्त्वादयः

एवमादयोऽपीत्यादि भाष्यम्। एवम्प्रकारा-एवमादयः क्रियावत्त्वप्रकाराः, धर्मादिभिरिति क्वचिद्, पुद्गलद्रव्यं यथासम्भवमुपदर्शितमेव, तथा केचिदात्मन एव वैशेषिका आदिशब्देनाक्षिप्यन्ते पर्यायोपयोगितादयः। तुशब्दो विशेषकः। धर्मादिविशिष्टास्तत्समाश्च[1]। इतिः परिसमाप्तौ। अयमादिग्रहणार्थस्यादिग्रहणेन सूचिताः इति गमयति विधृतमर्थमनेन ग्रन्थेन॥ ये जीवस्यैवेत्यादि ग्रन्थ आत्मन एवासाधारणा ये धर्मा जीवभव्याभव्यत्वलक्षणास्त इह सूत्रे स्वशब्देन यो यस्य वाचकः शब्दो जीवादिस्तेनैवोक्ता इति। एतेनादिशब्दस्य त्रितयपर्यन्तवर्तित्वं व्याख्यातम्, अन्यथा जीवत्वादीनि चेति सूत्रं स्यात्। सूत्रपर्यन्तवर्ती चशब्दः समुच्चये। सम्यक्त्वचारित्रादयो जीवस्य स्वतत्त्वं जीवत्वादयश्च स्वतत्त्वमिति। इत्येते पञ्च भावा इत्यादि भाष्यम्। इतिशब्दः सकलभावोपसंहारार्थः, एत इति प्रतिपदं ये उद्दिष्टा औपशमिकादयः पञ्चैवाऽन्यूनाधिका भावाः पर्यायान्तराण्यात्मनः त्रिपञ्चाशद्भेदा येषां ते त्रिपञ्चाशद्भेदा भवन्ति आत्मनः स्वतत्त्वं, द्विनवाष्टादिसूत्रे (अ० २, सू० २) च सङ्ख्या प्राक् नियता सैवानेनोपसंहृतेति। एते च भावविकल्पा जीवानां यथासम्भवमायोज्याः, न सर्वे सर्वेषामिति, क्षायिकपारिणामिकावेव सिद्धानाम्, औपशमिकवर्जा नारकतिर्यग्योनीनाम्, देवमनुष्याणां पञ्चापि, न त्वौपशमिकक्षायिके सम्यक्त्वचारित्रे वा युगपद् भवत इति, एवमयमात्मा परिणामैरेभिरौपशमिकादिभिर्युक्तः परिणामी द्रव्यमिति निश्चेतव्यः, नहि श्रद्धानादिलक्षणाः परिणामाः केनचिद् घटादिषूपलब्धपूर्वाः, तस्मादेषां भावानामवश्यं केनचिदन्वयिना पदार्थेन भवितव्यम्, स चात्मेति॥ ७॥

अधुना द्वितीयप्रश्नमतिबहुग्रन्थप्रतानव्यवच्छिन्नमनुसन्दधान आह-किञ्चान्यदिति। भावपञ्चकमव्यापित्वान्न परितोषमाधातुमलमस्य श्रोतुः पश्यन्नाचार्यः सकलजीवपदार्थव्यापीदमव्यभिचारि त्रिकालविषयं लक्षणमात्मनो निर्दिदिक्षुः सम्बन्धयति भावपञ्चकाद् अन्यच्च-किं लक्षणमस्याव्यभिचारीति यदप्राक्षीत् तदिदमुच्यते—

सूत्रम्—उपयोगो लक्षणम्॥ २-८॥

भा०—उपयोगो लक्षणं जीवस्य भवति॥

टी०—उपयोगो लक्षणं भवति जीवस्येत्येतावद् भाष्यमस्य सूत्रस्य। **उपयोगः** उपलम्भः, ज्ञानदर्शनसमाधिः ज्ञानदर्शनयोः सम्यक्-स्वविषयसीमानुल्लङ्घनेन धारणं समाधिरुच्यते, अथवा युञ्जनं योगः-ज्ञानदर्शनयोः प्रवर्तनं विषयावधानाभिमुखता, सामीप्यवर्ती योग उपयोगो नित्यसम्बन्ध इत्यर्थः। लक्ष्यतेऽनेनेति लक्षणम्, उपयोगेन लक्ष्यत इति। जीवस्येति कर्मलक्षणा इह

उपयोगस्य लक्षणता

१ 'सदृशाश्च' इति ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षष्ठी द्रष्टव्या। उपयोगेनोपलभ्यते इतियावत्। समुदायार्थस्त्वयम्–सामान्यविशेषावबोधदर्शनान्निश्चीयतेऽस्त्यत्रात्मा यस्यामू सामान्यविशेषावबोधौ, न चास्ति कश्चित् क्वचिज्जीवो यस्य न स्तः साकारानाकारोपयोगावित्यतोऽनपायीदं लक्षणमस्य जन्तोः, आगमश्चायम्–"सव्वजीवाणंपि य णं अक्खरस्स अणंतभागो निच्चुग्घाडियओ" (नन्दी० सू० ४२)। सर्वजीवानामपीति अशेषसर्वकग्रहणेन संसारिणां परिग्रहः पृथिवीकायादीनाम्, अपिः सम्भावनायां, णमिति वाक्यालङ्कारार्थः, अक्षरमिति–सामान्यविशेषरूपोऽवबोधस्तस्यानन्तभागोऽवबोधस्य नित्यमेव-सर्वदा उद्घाटः–प्रकाशो निरावरणः, यस्मात् सकलत्रैलोक्यान्तर्वर्तिनोऽपि हि पुद्गलाः कर्मतया परिणताः सन्तोऽपि न समावरीतुमलमेकस्यात्मनः सर्वात्मनाऽवबोधम्, यथा च नितान्तघनपटलपिहितेऽपि सवितुर्मण्डले ज्योतिर्लेशः कियानपि चकास्त्येव, न सर्वथैव प्रणश्यति तथाऽऽत्मनोऽप्यवबोधलेशः स्फुरत्येव कियानपि सर्वदा, यदि चावृणुयुस्ते पुद्गलाः सर्वात्मना ततो निर्जीवितैव स्यादात्मनः, तस्माद् या च यावती च मात्राऽऽवरतः प्रबोधस्य सर्वजीववर्तिनी स्वभावादेव निरावरणा समस्ति सा च सर्वजघन्योपयोगमात्रा प्रथमसमये सूक्ष्मनिगोदापर्याप्तानामेव भवति, ततः परंतु सैवोपयोगमात्रा शेषैकेन्द्रियद्वित्रिचतुःपञ्चेन्द्रियभेदेन भिद्यमाना सम्भिन्नश्रोत्रत्वादिलब्धिकलापेन च लब्धिनिमित्तकरणशरीरेन्द्रियवाङ्मनःसापेक्षा प्रवर्धमाना नानारूपक्षयोपशमापादितवैचित्र्याऽवग्रहादिभेदात् सर्वक्षयमवाप्य सकलज्ञेयग्राहिणीं परां विशुद्धिकाष्ठां समासादयति केवलज्ञानसंज्ञिताम्, अत एव जीवस्वभावश्चैतन्यविशेषाणां सर्वेषां प्रमाणाख्यानामुपयोगरूपाणां स्वसंवेद्यत्वमवश्यमभ्युपगन्तव्यम्, उत्तरकालं तदनुस्मारणोपपत्तेः, अनुस्मरणं हीदं स्वयमनुभूतस्यार्थस्य दृष्टं नान्यथा, तस्माज्ज्ञात्वा योऽनुस्मरत्युत्तरकालं स एक आत्माऽन्वयी प्रतिपत्तव्यः। न खलु ज्ञानस्मृती भिन्नपदार्थाधारे क्वचिद् दृष्टे, तस्मादस्त्येक आत्मेति, तथा परत्र हिताहितप्राप्तिपरिहारविषयां क्रियां दृष्ट्वा बुद्धिपूर्वकत्वानुमानं स्वदेह इव, ताश्च बुद्धयः प्रमाणं जीव इत्येकोऽर्थ इति। यथाऽऽह–"आया[3] भंते! नाणे अण्णाणे? गोयमा! आया सिय नाणे सिय अण्णाणे, णाणे पुण नियमा आया" (भगवत्यां)। बुद्धिरूपस्य चात्मनोऽनुमानगम्यत्वमवसेयम्, स्वदेहे च क्रिया बुद्धिपूर्वा स्वानुभवसिद्धा, तत्क्रियाजनिते च सुखदुःखे, रूपाद्यर्थज्ञानानि चानुभवसिद्धत्वात् प्रत्यक्षप्रमाणविषयत्वं बुद्धीनाम्, स एव चात्मेति, स्वदेहव्यापी स्वात्मा, परदेहव्यापी पर इति। तथा शरीरकारणयोः शुक्रौजसोर्धात्विन्द्रियाङ्गोपाङ्गादिपरिणामगतेरभिसन्धिमानाहर्तानुमीयते, तथाऽऽहारपरिणामित्वात् तच्छवशरीरं केनाप्यभिसन्धिमता क्वापि गच्छतोत्सृष्टं, स चोत्सृष्टाऽऽत्मेति निश्चीयते, एवमयमुपयोग-

उपयोगस्य नित्यता

१ सर्वजीवानामपि अक्षरस्यानन्तभागो नित्यमुद्घाटितकः।

२ 'वा' इति ख–पाठः।

३ आत्मा भदन्त! ज्ञानं अज्ञानं? गौतम! स्यात् ज्ञानं स्यात् अज्ञानं, ज्ञानं पुनर्नियमादात्मा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्षितः कर्ता भोक्ता चात्माऽध्यवसातव्यः । अथात्र पर आरेकते—ज्ञानरूप आत्मा चेत् अनवरतमेव कस्मान्न पश्यति सोऽर्थान् ? जानानं हि ज्ञानमुच्यते, ज्ञानं च न जानीते च विप्रतिषिद्धमिदम्, आत्मा च ज्ञानरूपोऽतः सर्वदा तेन जानानेनैव भवितव्यम्, न जातुचिदन्यथेति, कस्माद् विज्ञानात्मकत्वे पूर्वोपलब्धार्थविषयमस्य विस्मरणमविनष्टज्ञानस्य सतो भवति ? किं वा कारणमव्यक्तबोधो भवत्यात्मा ? नाव्यक्तमिष्यते ज्ञानमुपलब्धिस्वरूपत्वात्, न च ज्ञानात्मकत्वात् संशयेनास्य कदाचिदुत्पत्तव्यम्, अशेषविषयग्रहणं च स्यात् निरङ्कुशत्वाज्ज्ञानस्येति ? अत्रोच्यते—ज्ञानात्मत्वे सत्यपि नानवरतोपयोगप्रसङ्गः, कथम् ? कर्मवशादयमात्मा सर्वप्रदेशेषु प्रदेशाष्टकमपहाय मध्यवर्तिपिठरान्तर्वर्तिज्वलनज्वालाकलापतप्तोद्वर्तमानवारिवच्चलः सततमेव कृकलाशवदर्थान्तरेषु परिणमते, अनवस्थितोद्भ्रान्तमनस्त्वाच्च कथमुपयुज्येत स चिरमेकस्मिन्नर्थे ? स्वभावादेव चोपयोगस्थितिकालोऽन्तर्मुहूर्तपरिमाणः प्रकर्षाद् भवति, ज्ञानावरणकर्मपटलावच्छन्नत्वाच्च न सर्वदाऽवैति, यथा प्रकाशमयत्वेऽपि भास्वान् बहलाभ्रपटलाभिभूतमूर्तिर्न प्रकाशते स्पष्टं तथाऽयमात्मेति, स्मृतिरप्यत एव नावश्यम्भाविनी भवति तस्येति प्रत्येतव्यम् । अव्यक्तबोधसंशयासर्वार्थग्रहणानि चावरणशीलज्ञानावरणकर्मसद्भावाद्भ्युपेयानि, यदा च लब्धिरूपान्तःकरणेन्द्रियाभोगिकानाभोगिकवीर्यसम्पन्नस्य ज्ञानावरणक्षयोपशमो भवति करणानुरूपस्तदा च ज्ञानं तत्क्षयोपशमानुरूपमाविर्भवति, लब्ध्यनुरूपकरणवीर्यानुसारितया, वीर्यापगमे च पुनरपि तदेव कर्मावृणोति सद्यस्तमात्मानं प्रागपाकीर्णशैवलमलानामपामच्छत्वमिव, पुरुषकारव्यापारोपरमसमनन्तरमेव शैवलपटलानि यथा पुनराच्छादयन्ति, यथा वा भस्माद्यनेकद्रव्योद्घृष्टविमलदर्पणतलमागन्तुकश्यामिकामलीमसमाशु जायते तथाऽस्यात्मनो मुहुर्मुहुर्ज्ञानावरणजलधौ निमज्जनोन्मज्जने कुर्वतः स्पष्टः स्पष्टतरः स्पष्टतमो मलीमसो मलीमसतरो मलीमसतमश्च बोधः प्रादुरस्ति, अभ्यन्तरीकृतोभयविशेषसामर्थ्यस्थित्युत्पत्तिव्ययानेकधर्मान्वयद्वृत्तिः सोऽयमात्मा प्रकाशस्वभावतिग्मांशुरिव चैतन्यस्वतत्त्वः स्वपरविभासी साकारानाकारोपयोगद्वयलाञ्छनोऽस्तीति प्रतिपद्यध्वमपास्तसमस्तशङ्कमिति ॥ ८ ॥

ज्ञानस्वभावत्वेऽपि अज्ञानादयः

एतावज्जीवस्वतत्त्वं विचार्यम्, नातः परं किञ्चिदस्ति स्वनिमित्तानां परनिमित्तानां च जीवधर्माणामभिहितव्यतिरेकेणासम्भवात्, स चोपयोगो यावता भेदेन वर्तते तावता सङ्गृह्यतेऽधुनेत्यत आह—

सूत्रम्—स द्विविधोऽष्टचतुर्भेदः ॥ २—९ ॥

भा०—स उपयोगो द्विविधः—साकारोऽनाकारश्च । ज्ञानोपयोगो दर्शनोपयोगश्चेत्यर्थः । स पुनर्यथासङ्ख्यमष्टचतुर्भेदो भवति । ज्ञानोपयोगोऽष्टविधः—मतिज्ञानोपयोगः, श्रुतज्ञानोपयोगः, अवधि-

उपयोगस्य भेदाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानोपयोगः, मनःपर्यायज्ञानोपयोगः, केवलज्ञानोपयोग इति, मत्यज्ञानोपयोगः, श्रुताज्ञानोपयोगः, विभङ्गज्ञानोपयोग इति । दर्शनोपयोगश्चतुर्भेदः, तद्यथा—चक्षुर्दर्शनोपयोगः, अचक्षुर्दर्शनोपयोगः, अवधिदर्शनोपयोगः, केवलदर्शनोपयोग इति ॥ ९ ॥

टी०—**स द्विविधोऽष्टचतुर्भेदः**, तच्छब्देन भाष्यकारोऽनन्तरमुपयोगं सम्बन्धयति, स उपयोगः सकलजीवराशेश्चिह्नभूतो **द्विविधो**—द्विप्रकारो भवति । अपरे पुनस्तच्छब्दं नाधीयतेऽनन्तरत्वात् किल स एव सम्भन्त्स्यते नार्थस्तत्पाठेन, तदेतदयुक्तम्, अन्यत्रापि हि तच्छब्दोपन्यासेऽनन्तर एव सम्बध्येत[1] ततश्च न क्वचित् तच्छब्दः प्रयोक्तव्यः स्यात्, तथा च 'कायवाङ्मनःकर्म योगः', 'स आस्रवः' (अ० ६, सू० १-२) इति, 'सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते', 'स बन्धः' (अ० ८, सू० २-३) इति । पुनस्त एवाहुः—नहि योगः भेद्यत्वेन विवक्षितः किन्त्वास्रवता विधीयते योगानां तत्र, अयं पुनरुपयोगो विभित्सितस्तत्र किमन्यः स्याद् यो द्विविधत्वादिना भिद्येत ? तथेतरत्रापि पुद्गलादानस्यात्मसात्कृतस्य बन्धविधानम्, अतो न समानम् । उच्यते—कः खल्वयं नियमो यत्र भेदविधिस्तत्र तच्छब्दो न प्रयुज्यते इति ? रुचिमात्रमेवमङ्गीकृतं स्यात्, अविगानेन च भाष्यमेवं पठ्यते—स उपयोगो द्विविधस्तदेतदगमितं स्यात्, तस्मादस्तु तच्छब्दः । द्विविध एवोपयोगो भवतीत्यवधार्यते मूलभेदतः, तच्च द्वैविध्यं आचार्यः स्पष्टयति—**साकारोऽनाकारश्चेति** । आकारो—विकल्पः सह आकारेण साकारः, अनाकारस्तद्विपरीतः, निर्विकल्प इत्यर्थः । एतद् व्याख्यानमन्ये[2]ऽपवदन्ते—साकारानाकारयोर्यत्केवलदर्शने शक्त्यभावः प्रसज्यते मनःपर्याये च दर्शनप्रसङ्गः, तयोर्हि घटादिसामान्यग्रहणेऽपि ज्ञानमेव तन्न दर्शनमिति, तस्मादाकारो लिङ्गम्, स्निग्धमधुरादिशङ्खशब्दादिषु यत्र लिङ्गेन ग्राह्यार्थान्तरभूतेन ग्राह्यैकदेशेन वा साधकेनोपयोगः स साकारः, यः पुनर्विना लिङ्गेन साक्षात् सोऽनाकारः, एवं सति पूर्वकं दोषद्वयं परिहृतं भवति, तदेतदयुक्तम्, यत् तावदुच्यते—केवलदर्शने शक्त्यभावः प्रसजतीति का पुनरसौ शक्तिः ? यदि तावद् विशेषविषयः परिच्छेदः शक्तिशब्दवाच्यस्तस्याभावश्चोद्यते ततोऽभिलषितमेव सङ्गृहीतं स्यात् । अथ सामान्यार्थग्रहणशक्त्यभावश्चोद्यते ततस्तस्य दर्शनार्थतैवानुपपन्ना स्यात्, किं हि तेन दृश्यते ? यदप्युक्तं मनःपर्याये दर्शनप्रसङ्ग इति तदागमानवबोधादयुक्तम् । न ह्यागमे मनःपर्यायदर्शनमस्ति, चतुर्विधदर्शनश्रवणात्, आगमप्रसिद्धं चेहोपनिबध्यते, न स्वमनीषिका प्रत-

तच्छब्दस्य सार्थकता

साकारानाकार शब्दार्थः

---

१ 'सम्बध्यते' इति क-ख-पाठः । २ 'मन्ये एवं वदन्त' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्यत इति । मनःपर्यायज्ञानिनो हि भगवत्यामाशीविषोद्देशके (श०८, उ०२, सू०३२१) द्वे त्रीणि वा दर्शनान्युक्तानि, अतो गम्यते यो मनःपर्यायविदवधिमांस्तस्य त्रयमन्यस्य द्वयम्, अन्यथा हि त्रयमेवाभविष्यदिति । तत्रागमप्रसिद्धस्य व्याख्या क्रियते–निर्विकल्पोऽर्थोऽनाकारार्थः यद् दर्शनं तन्निर्विकल्पम्, अतो न मनःपर्यायदर्शनप्रसङ्गः, तस्मात् तदेवास्तु पूर्वव्याख्यानम्, पर्यायाः–विकल्पास्तैः सहवर्ति साकारम्, अनाकारमालोचनमात्रं निर्विकल्पकमिति । उपयोगक्रमश्च द्रष्टव्यः–प्रागनाकारः पश्चात् साकार इति, प्रवृत्तौ क्रमनियमः, यतस्तु नापरिस्पृष्टसामान्यो विशेषाय धावति । यद्येवं ततः सूत्रमित्थमध्येयं–स द्विविधश्चतुरष्टभेद इति । उच्यते–पारमर्षप्रवचनप्रसिद्धक्रमानुवृत्त्या सूत्रं न्यबध्नीत सूत्रकारः– "कतिविहे णं भंते ! उवओगे पण्णत्ते ? गोयमा ! दुविहे पण्णत्ते, तंजहा–सागारोवओगे य अणागारोवओगे य" (प्रज्ञा० प० २९, सू० ३१२) । अथार्ष एव कैमर्थक्यात् क्रमभेदः ?। उच्यते–बहुभेदत्वाद् बहुवक्तव्यत्वाच्च प्राक् साकारोपन्यासस्ततोऽनाकारः स्वल्पभेदवक्तव्यत्वात्, मत्यादिज्ञानेषु च व्याख्यातेषु प्रायश्चक्षुर्दर्शनाद्यपि व्याख्यातमेवेति यत्किञ्चिदुत्तरत्र व्याख्येयं स्यात्, अतोऽपि युज्यते प्रथमतः साकारोपयोग इति । चशब्दः समुच्चितौ । साकारश्चोपयोगोऽनाकारोपयोगश्च । एतदेवोपयोगद्वयं प्रसिद्धतरवाक्यान्तरेण निरूपयन्नाह–ज्ञानोपयोगो दर्शनोपयोगश्चेत्यर्थः । एतावानुपयोगो भवन् भवेद् यदुत ज्ञानरूपो दर्शनरूपश्चेति, नातोऽन्य उपयोगः समस्ति ॥ ननु च ज्ञानदर्शनाभ्यामर्थान्तरभूत उपयोगोऽस्त्येकान्तनिर्विकल्पः, एवं च विग्रहगतिप्राप्तानां ज्ञानदर्शनोपयोगासम्भवेऽपि जीवलक्षणव्याप्तिरन्यथा ह्यव्यापकं लक्षणं स्यात्, तेषां हि द्रव्येन्द्रियमनसामभावादुपयोगोऽस्त्येकान्तनिर्विकल्पः, एवं च विग्रहगतिप्राप्तानां ज्ञानदर्शनोपयोगासम्भवेऽपि तन्निमित्तं मतिज्ञानं नास्ति, ततश्च तत्पूर्वकं श्रुतमपि न सम्भवति, अतस्तेषां ज्ञानदर्शनोपयोगाभावादजीवत्वं स्यादिति, तदेतत् सर्वमयुक्तमुक्तम्, स्वसिद्धान्तानवबोधात्, इह प्रवचने मत्यादीनि लब्धित उपयोगतश्च चिन्त्यन्ते, तत्र सम्यग्दृष्टेरविरतो जघन्यतरोऽन्तर्मुहूर्तपरिणामकालं प्रकर्षतः षट्षष्टिसागरोपमाणि साधिकानि लब्धिमङ्गीकृत्याधीतः, उपयोगतोऽन्तर्मुहूर्तमेव जघन्योत्कर्षाभ्याम्, मिथ्यादृष्टेरनादिमत्यज्ञानादि कस्यचित्, कस्यचित् तु सादि भवति लब्धितः, उपयोगतस्तु तस्याप्यन्तर्मुहूर्तमवस्थानम्, तत्र यदेतदुच्यते द्रव्येन्द्रियमनसामभावान्मतिज्ञानं नास्ति तत्पूर्वकं श्रुतमपि नास्ति तन्मिथ्या, आगमविरोधश्च– "जाईस्सरो उ भगवं, अप्पडिवडिएहिं तिहिं उ नाणेहिं" (आव० नि० ऋषभजन्माधिकारे)। यदि तदा मतिश्रुते न स्तः कथमप्रतिपतितज्ञानश्च्युत्वे भगवान् नाकपृष्ठतः ?। तथाऽमुनाऽ-

उपयोगे ज्ञानदर्शनभिन्नताया निरासः

---

१ कतिविधो भदन्त ! उपयोगः प्रज्ञप्तः ? गौतम ! द्विविध उपयोगः प्रज्ञप्तः, तद् यथा–साकारोपयोगश्चानाकारोपयोगश्च । २ जातिस्मरस्तु भगवान्, अप्रतिपतितैस्त्रिभिर्ज्ञानैर्युक्त एव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्याचार्येणोक्तम्–'ज्ञानैः पूर्वाधिगतैः' (सम्बन्ध–का० १२) इत्यादि, तथा **भगवत्यामाशीविषोद्देशके** (श०८, उ०२, सू० ३१९) "अपज्जत्तगा णं भंते! जीवा किं नाणी अण्णाणी? तिन्नि गोयमा! नाणा तिन्नि अण्णाणा भयणाए", तथा तस्यामेवैकोनविंशतिशते "मइअण्णाणी णं भंते! मतिअण्णाणभावेणं किं पढमे अपढमे? गोयमा! नो पढमे अपढमे, एवं सुअअण्णाणीवि"॥ ननु चागम एवोपयोगात्मा ज्ञानदर्शनव्यतिरिक्त उक्तः, **भगवत्यां** द्वादशशते–द्रव्यकषाययोगोपयोगज्ञानदर्शनचरणवीर्यात्मानोऽष्टौ भवन्ति, अत्र चोपयोगात्मा पृथगुपात्तः, स च विग्रहगतौ जीवानां भविष्यति, एतदपि वार्तम्, यस्मात् तस्मिन्नेवात्माऽष्टकाधिकारे (श०१२, उ०१०, सू०४६७) उक्तम्–"जस्स दवियाता तस्स उवयोगाता णियमा अत्थि, जस्स उवयोगाता तस्स नाणाया वा दंसणाया वा णियमा अत्थि" एवं सूत्रेऽतिस्पष्टेऽपि विभक्ते न विद्मः कुत इदं तेषां मोहमलीमसधियामागतम्? अपिच–सूत्रे ज्ञानदर्शने एवोपयोगतामापन्ने बहिरर्थाकारपरिणतिनी सती समुपात्ते उपयोगग्रहणेन, न पुनर्ज्ञानदर्शनव्यतिरिक्तः कश्चिदुपयोग इति, तथा तु ज्ञानदर्शनात्मैव, क्रोधादिकषायपरिणतः कषायात्मा उच्यते, न तद्व्यतिरिक्तोऽन्यस्तथाऽयमपि भविष्यति। एतेन कर्मानावृतप्रदेशाष्टकाविकृतचैतन्यसाधारणावस्थोपयोगभेदः प्रत्यस्तोऽवगन्तव्यः, तथा विग्रहगतिभाजामपर्याप्तकानां च जीवानामागमे लब्धीन्द्रियमुक्तम्–"जीवे णं भंते! गब्भाओ गब्भं वक्कममाणे किं सइंदिए वक्कमइ अणिंदिए वक्कमइ? गोयमा! सिय सइंदिए सिय अणिंदिए, से केणट्ठेणं भंते! एवं वुच्चइ? गोयमा! दव्विन्दियाइं पडुच्च अणिंदिए वक्कमति, लद्धिन्दियाइं पडुच्च सइंदिए वक्कमति" (**भग०** श०१, उ०७, सू०६१)। तस्मादात्मनोऽवस्थाद्वयवर्तिनोऽवश्यं लब्धीन्द्रियमभ्युपेयम्, तदाश्रितं च मतिज्ञानादि, केवलं बाह्यकरणानिर्वृत्तौ ज्ञानविभागो नास्ति करणकृतस्तत्रेति। अथैतत् स्यात्, न ज्ञानसद्भावमपह्नुमहे तदा वयम्, किन्तु ज्ञाने सत्यप्युपयोगो नास्तीति ब्रूमः, तदेतत् सुप्ताद्यवस्थास्वपि समानम्, अथवा विलक्षवचनमित्यपकर्ण्यम्। तस्मादवस्थितमिदम्–द्विविध एवोपयोगो ज्ञानदर्शनाख्यः तद्व्यतिरिक्तस्तु नास्ति। **स** इदानीं द्विविध उपयोगो **यथासङ्ख्यं** यथानिर्देशमष्टभेदश्चतुर्भेदश्च भवति। पुनःशब्दः संख्यानियमार्थः। नातः परं विकल्पमर्हति, ज्ञानोपयोगो दर्शनोपयोगो वा। तमेवाधुना सङ्ख्यानियममाविष्करोति—**ज्ञानोपयोगोऽष्टभेद** इत्यादिना भाष्येणोद्देशनिर्देशरूपेण। **मतिज्ञानोपयोग** इति। मतिज्ञानाकारपरिणामस्तदात्मकत्व-

---

१ अपर्याप्ता भदन्त! जीवाः किं ज्ञानिनोऽज्ञानिनः? त्रीणि गौतम! ज्ञानानि त्रीणि अज्ञानानि भजनया।

२ मत्यज्ञानी भदन्त! मत्यज्ञानभावेन किं प्रथमोऽप्रथमः? गौतम! न प्रथमः, अप्रथमः, एवं श्रुताज्ञान्यपि।

३ यस्य द्रव्यात्मा तस्य उपयोगात्मा नियमादस्ति, यस्योपयोगात्मा तस्य ज्ञानात्मा वा दर्शनात्मा वा नियमादस्ति।

४ जीवो भदन्त! गर्भात् गर्भं व्युत्क्रामन् किं सेन्द्रियो व्युत्क्रामति अनिन्द्रियो व्युत्क्रामति?, गौतम! स्यात् सेन्द्रियः स्यादनिन्द्रियः, तत् केनार्थेन भदन्तैवमुच्यते?, गौतम! द्रव्येन्द्रियाणि प्रतीत्य अनिन्द्रियो व्युत्क्रामति, लब्धीन्द्रियाणि प्रतीत्य सेन्द्रियो व्युत्क्रामति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मात्मनः, तथा श्रुतज्ञानादिष्वपि योज्यम् । इतिशब्दः साकारोपयोगपरिसमाप्त्यर्थः । इतरत्राप्यज्ञानपरिसमाप्तये । **चक्षुर्दर्शनोपयोग** इति चक्षुरालोचनाकारपरिणाम आत्मनस्तदात्मकत्वं तद्रूपता, औपचारिकनयश्च ज्ञानप्रकारमेव दर्शनमिच्छति, शुद्धनयः पुनरनाकारमेव सङ्गिरते दर्शनमाकारवच्च विज्ञानम् । आकारश्च विशिष्यनिर्देशो भावस्य पर्यायतः प्रोक्तः, स च दर्शनसमनन्तरमेव सम्पद्यतेऽन्तर्मुहूर्तकालभावित्वात् । आकारपरिज्ञानाच्च प्रागालोचनमवश्यमभ्युपेयम्, अन्यथा प्रथमत एव पश्यतः किमपीदमिति कुतोऽव्यक्तबोधनं स्यात् ? यदि चालोचनमन्तरेणाकारपरिज्ञानमुत्पादत एव पुंसः स्यात् तथा सत्येकसमयमात्रेण स्तम्भकुम्भादीन् विशिष्य गृह्णीयात्, न च तथोपलभ्यते, अपिच-समयमपि सङ्गृह्णीयान्न च केवलिनमन्तरेण समयग्रहणमस्ति ?। अपरे वर्णयन्ति-वर्तमानकालविषयं तु सदर्थग्रहणं दर्शनम्, त्रिकालविषयं साकारं ज्ञानमिति, एतदपि वार्तम्, वर्तमानस्य परमनिरुद्धसमयरूपत्वाद् विवेचनाभावः, तस्मात् छद्मस्थानामनाकाराद्धाऽल्पत्वादेवाव्यक्ता, साकाराद्धाऽधिक्याच्चान्तर्मुहूर्तिकी[2] व्यक्ता भवति, न चान्तर्मुहूर्तादुपर्येकत्रावधानमस्ति वस्तुनि, प्रत्यक्षमेतत्, अनाकाराद्धा साकाराद्धा द्वयपरावृत्तिश्च प्राणिनां स्वभावादुपजायमाना स्वसंवेद्या च नापह्नुतुं शक्याऽतिबहुभिरपि हेतुभिः । अत्र च यथा साकाराद्धायां सम्यङ्मिथ्यादृष्टयोर्विशेषः, नैवमस्ति दर्शने, अनाकारत्वे द्वयोरपि तुल्यत्वादित्यर्थः । चक्षुर्दर्शनवदचक्षुर्दर्शनं वाच्यं शेषेन्द्रियविषयम्, अथवेन्द्रियनिरपेक्षमेव तत् कस्यचिद् भवेद् यतः पृष्ठत उपसर्पन्तं सर्पं बुद्ध्यैवेन्द्रियव्यापारनिरपेक्षं पश्यतीति । अवधिदर्शनं तु सम्यग्दृष्टेरेव, न मिथ्यादृष्टेः, चक्षुर्दर्शनमेव किल तस्येति पारमर्षी श्रुतिः । केवलज्ञानोपयोगप्रवाहविच्छेदेऽनाकाराद्धा केवलदर्शनमुच्यते स्वाभाविकम्, अनाकारग्रहणकालश्च तत्र नाकर्तुमलमल्पत्वाद् भावात्, न पुनस्तन्नाकरोति, यथा समयमात्रेणागृह्णानः पुमान् घटकमन्य इति न व्यपदिश्यते तद्ग्रहणशक्तियुक्तत्वाद्, अल्पिष्ठकालत्वादशक्तस्तद्ग्रहे तथा भगवानपीति ॥ ९ ॥

एवमेतत् सर्वगतिवर्तिनां जीवानामिन्द्रियकषायलेश्यादिविशेषवतामप्यविलक्षणं लक्षणमुक्तम्, ते पुनरुपयोगलक्ष्याः कतिविधा जीवा इति प्रकारान्तरेण तावद् द्वैविध्यं वर्णयितुकाम आह—

सूत्रम्—संसारिणो मुक्ताश्च ॥ २-१० ॥

भा०—ते जीवाः समासतो द्विविधा भवन्ति-संसारिणो मुक्ताश्च ॥ १० ॥ किञ्चान्यत् ।

टी०—संसारिणो मुक्ताश्च । यदवष्टम्भेनात्मनः संसरणम्-इतश्चेतश्च गमनं भवति

---

१ ' स गृह्णीयान्न ' इति प्रतिभाति । २ ' द्धान्तमुहूर्तिकी ' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संसारस्य शब्दार्थः

स संसारः—कर्माष्टकरूपः, स येषां विद्यते ते संसारिणः । अथवा बलवतो मोहस्याख्या संसारस्तत्सम्बन्धात् संसारिणः, नारकाद्यवस्था वा संसारः, तदवस्थायोगात् संसारिणः । मुच्यन्ते स्म मुक्ताः । कुत इति चेत्? अनन्तरत्वात् संसारादिति वाच्यम् । अतो निर्धूताशेषकर्माणः संसारान्मुक्ता इति व्यपदिश्यन्ते । समस्य कस्माल्लाघवैषिणा निर्देशो नाकारि सूरिणेति? उच्यते—भिन्नस्वभावप्रतिपादनार्थमुभयेषाम्, संसारिणो हि प्रागभिहितौपशमिकादिस्वभावास्तद्विनिर्मुक्तास्तु मुक्ताः । तथोभयत्रोभयोर्बहुवचनमानन्त्यप्रतिपत्तये, संसारिणोऽनन्ताः । मुक्ताश्चेति । संसारिणामादावुपन्यासः प्रत्यक्षबहुभेदवाच्यार्थः, तदनु मुक्तवचनं संसारिपूर्वकत्वप्रसिद्ध्यर्थं तत्साहचर्यादभावनिषेधार्थं च । एकैकानेकविकल्पज्ञापनार्थश्चशब्दः । संसारिणां तावत् समनस्कादिभेदोऽनन्तर एव वक्ष्यते, मुक्तानामप्यनन्तरपरम्परतद्भेदाः शास्त्रपरिसमाप्तिदेशे वक्ष्यन्ते, प्रधानगुणभावख्यापनार्थो वा चशब्दो द्रष्टव्यः । ते जीवाः समासत इत्यादि भाष्यम् ॥ त इति औपशमिकादिभावभाजः समनन्तरव्यावर्णितोपयोगलाञ्छना जीवाः परामृश्यन्ते, समासतः—संक्षेपात् द्विप्रकारा भवन्ति, न तु विस्ताराभिधानतः, तच्च द्वैविध्यं दर्शयति—संसारभाजो मुक्तिप्राप्ताश्चेति ॥ १० ॥

किञ्चान्यदित्यनेन सम्बन्धमाचष्टे सूत्रस्य भाष्यकारः, जीवाधिकारानुवृत्तावन्यदपि किञ्चिद्भेदान्तरमुपदिश्यते—

सूत्रम्—समनस्कामनस्काः ॥ २–११ ॥

भा०—समासतस्त एव जीवा द्विविधा भवन्ति—समनस्काश्च अमनस्काश्च । तान् पुरस्ताद्[2] (अ० २, सू० २५) वक्ष्यामः ॥ ११ ॥

टी०—समनस्कामनस्काः, कृतसमासनिर्देशात् संसारिण एव सम्बध्यन्ते न मुक्ताः, यदि च मुक्ता अपि सम्बध्येरन् न तर्हि समस्य निर्दिशेदाचार्यः, विशकलीकृत्य पूर्ववत् स्पष्टमभिदध्यादसमस्तमेव । कृतसमासनिर्देशे चायमभिप्रायः—नैष सङ्घातो विशकलीभूतः प्रयुज्यते विशेषणतया, किन्तु संहतरूप एवैकस्य, सम्भवतो विशेषणमिति, उभयसम्भवश्च संसारिणाम्, न मुक्तानाम्, अथवा व्याख्यानाद् विशेषप्रतिपत्तिः, संसारिणोऽभिसम्बध्यन्ते, न मुक्ताः, अथवा नेदं विधायकम्, किन्त्वनुवादकम्, येषां नामाम्नायेऽभिहितं समनस्कामनस्कत्वं तेषामेवानूद्यते, सिद्धानां पुनरमनस्कत्वमेव, नोभयमिति । अपरे पुनर्योगमुत्तरं विभजन्ते—संसारिण इति, यथोक्तलक्षणाः संसारिणो भवन्ति, ततः संसारिण इत्यनुवर्तमाने त्रसस्थावरा इति, अन्ये पुनः सूत्रमेव विपर्यासयन्ति विभज्य, प्राक् तावत् संसारिणः पश्चात् त्रसस्थावराः ततः समनस्कामनस्का इति, तदेतदयु-

१ समासं कृत्वा इत्यर्थः । २ 'परस्ताद्' इति घ–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्तमनाचार्यत्वात्। अधुना सूत्रार्थः-**समासत एवेत्यादि भाष्यम्**। पुनरपि सङ्क्षेपादेव द्वैविध्यमभिधीयते, जीवा इति प्रेक्षापूर्वकारितयोदचीचरद् इदं कषति चेतसि सूरेरुक्तानामप्यभिसम्बन्धप्रसङ्गः समनस्कामनस्कत्वेनेत्यतो जीवाः प्रतिविशिष्टायुर्द्रव्यसहिताः परिगृह्यन्त इति सिद्धव्युदासः। **समनस्काश्चेति** सह मनसा समनस्काः, तद्विरहितास्त्वितरे। किं पुनस्तन्मनो येन सम्बन्धात् समनस्का इति व्यपदिश्यन्ते?। उच्यते-द्विविधं तद् द्रव्यभावभेदात्, तत्र मनोऽभिनिर्वृत्त्यै यद् दलिकद्रव्यमुपात्तमात्मना सा मनःपर्याप्तिर्नाम करणविशेषः, तेन करणविशेषेण सर्वात्मप्रदेशवर्तिनाननन्तप्रदेशान् मनोवर्गणायोग्यान् स्कन्धान् चित्तार्थमादत्ते ते करणविशेषपरिगृहीताः स्कन्धाः द्रव्यमनोऽभिधीयते(न्ते)। भावमनस्तु जीवस्योपयोगः, चित्तचेतनायोगाध्यवसानावधानस्वान्तमनस्काररूपः परिणामः। श्रुतज्ञानावरणक्षयोपशमजतया चैतन्मनोरूपं करणमिष्यतेऽर्हद्भिः, धारणा च मनोयुक्तस्यैव च जन्तोर्भवति, नेतरस्येति। अत्र ये द्रव्यभावमनोभ्यामुभाभ्यामपि युक्तास्ते समनस्काः, ये पुनर्भावमनसैवोपयोगमात्रेण मनःपर्याप्तिकरणविशेषनिरपेक्षेण युक्तास्ते अमनस्काः, एषां मनःपर्याप्तिकरणनिर्वृत्त्यभावात्, चेतना तु तया पटीयसी भवति यथेतरेषां द्रव्यमनोऽवष्टम्भाद्, वृद्धयष्टिस्थानीयद्रव्यमनोऽवष्टम्भेन संज्ञिनः स्पष्टमनुचिन्तयन्ति। तत्प्रविभागश्चायम्-नारकदेवगर्भव्युत्क्रान्तिकमनुष्यतिर्यञ्चः समनस्काः, शेषास्त्वमनस्काः, **तान् पुरस्ताद् वक्ष्याम इति** 'संज्ञिनः समनस्काः', पुरो-भविष्यति सूत्रे (अ० २, सू० २५) व्याख्यास्यामः समनस्कामनस्कविशेषमिह पुनर्भेदमात्राख्यानमित्यावेदयति भाष्यकार इति ॥ ११ ॥

मनसो द्वैविध्यम्

अथ जीवप्रकारान्तरसङ्ग्रहप्रस्तावमेवोपजीवयन्नाहाचार्यः—

सूत्रम्—संसारिणस्त्रसस्थावराः ॥ २-१२ ॥

संसारिजीवभेदप्रदर्शनम्

भा०—संसारिणो जीवा द्विविधा भवन्ति-त्रसाः स्थावराश्च ॥ १२ ॥ तत्र।

टी०—संसारिणस्त्रसाः स्थावराः। इतः प्रभृति संसार्यधिकार एव आ अजीवकायाध्यायाद् वेदितव्यः। मुक्ताः पुनर्दशमेऽध्याये वक्ष्यन्ते। उक्तलक्षणः संसारः, स येषामस्ति ते तथोच्यन्ते॥ ननु च संसारिणो मुक्ताश्चेति इह सूत्रे यत् संसारिग्रहणं तदेवानन्तरसूत्रसम्बन्धितमधिकरिष्यते नार्थः पुनः संसारिग्रहणेन। उच्यते-पूर्वकं संसारिग्रहणं भेदकथनाभिप्रायेण जीवानामवाचि, तच्च समनस्कामनस्कसूत्रे प्रयत्नतः सम्बन्धमुपनीतं नोत्तरत्र प्रवर्तितुमुत्सहते, इदं पुनर्न भेदप्रतिपत्तये, किन्तु

१ '०त्रसाः स्थावराः' इति ग- पाठः। २ '०पुनर्भेद' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदितः प्रभृति वक्ष्यते आ चतुर्थाध्यायपरिसमाप्तेस्तत् सर्वं संसारिणामित्यधिक्रियते। ते च संसारिणो जीवा द्विविधा भवन्ति, तद्यथा—त्रसाः स्थावराश्चेति। परिस्पष्टसुखदुःखेच्छाद्वेषादिलिङ्गास्त्रसनामकर्मोदयात् त्रसाः, अपरिस्फुटसुखादिलिङ्गाः स्थावरनामकर्मोदयात् स्थावराः, आदौ च त्रसाभिधानं सुखग्रहणार्थम्, स्पष्टलिङ्गत्वात्, समास उभयेषां परस्परसङ्क्रमार्थम्, त्रसाः स्थावरेषु स्थावराः त्रसेषु मृत्वोपजायन्त इति। एवं तावत् संसारिणो द्वैविध्येन विकल्पिताः—त्रसाः स्थावराश्चेति ॥ १२ ॥

सूत्रम्—पृथिव्यम्बुवनस्पतयः स्थावराः ॥ २—१३ ॥

भा०—पृथ्वीकायिकाः, अप्कायिकाः, वनस्पतिकायिकाः इत्येते त्रिविधाः स्थावरा जीवा भवन्ति। तत्र पृथिवीकायोऽनेकविधः शुद्धपृथिवीशर्करावालुकादिः। अप्कायोऽनेकविधः हिमादिः। वनस्पतिकायोऽनेकविधः शैवलादिः ॥ १३ ॥

स्थावराणां ३ भेदाः

टी०—तत्र स्थावरानेव तावद् वक्ष्मः—पृथिव्यम्बुवनस्पतयः स्थावराः ॥ ननु च यथोद्देशं निर्देशः कर्तव्यः, प्रथमं त्रसा वक्तव्याः ततः स्थावराः। उच्यते—प्रेक्षापूर्वकारितयाऽऽचार्येण स्वरुचितव्यवस्थां भित्त्वा स्थावरास्तावदभिहिताः। का पुनरसौ प्रेक्षापूर्वकारिता? भण्यते—वक्ष्यत्युत्तरसूत्रं(१४)'तेजोवायू द्वीन्द्रियादयश्च त्रसाः,' तत्र इन्द्रियप्रकरणमधीत्य वक्ष्यति 'वाय्वन्तानामेकम्' (अ० २, सू० २३) तत्रायमर्थः—पृथिव्यादीनां वाय्वन्तानामेकेन्द्रियं स्पर्शनं भवति, यदि पुनः पूर्वं त्रसाभिधानं कुर्यात् पश्चात् स्थावरानभिदध्यात् तथा(दा) गौरवं जायेत, अर्थलाघवैषिणा सता क्रमो भिन्नः। तत्रेत्यनेन सूत्रं सम्बन्धयति, तत्र द्वितये प्रस्तुते स्थावरास्तावदुच्यन्ते प्रयोजनार्थम्—पृथिवीकायिका इत्यादि भाष्यम् ॥ ननु च सूत्रे कायग्रहणं नास्ति, भाष्ये कथमकस्माद् विहायसोऽपतदिति? । उच्यते—लाघवार्थिना सूत्रे नोपात्तम्, विनाऽपि तेन सिद्धेः, भाष्ये तु यथेष्टमधिकमप्युच्चार्यते सूत्रार्थमनुञ्चतेति। तत्र पृथिव्येव कायः पृथिवीकायः, स येषां विद्यते ते पृथिवीकायिकाः ॥ ननु च लघुत्वात् प्रक्रमस्य बहुव्रीहौ सति तदभिहितत्वान्मत्वर्थीयेन न भाव्यम्, ततश्च पृथिवी कायो येषां ते पृथिवीकायाः, सत्यमेवमेतत्, तथाप्यनरवन्ति चक्राणीत्येवमाद्यनेकप्रयोगदर्शनात् साधुत्वमत्रापि प्रतिपत्तव्यम्। अथवा पृथिवीकायादयो जातिशब्दास्ततश्च मत्वर्थीयः सिद्धः कृष्णसर्पवद्वल्मीकन्यायेनेति, एवमितरयोरपि योज्यमेतत्। इतिशब्दोऽर्थपदार्थकः। त्रिविधा एव स्थानशीला भवन्ति जीवाः पृथिव्यादयः, न पुनः स्थावरनामकर्मोदयनिर्वृत्तानां त्रैविध्यं निर्धारयति, तेजोवाय्वोरपि तन्निर्वृत्तेरिति। स्थूलोत्तरद्वयाधारत्वादादौ न्यस्ता पृथिवी, तदन्वापस्तदाधेयत्वाल्लेश्याप्र-

---

१ 'मृत्वोपयात' इति क-ख पाठः। २ 'पृथ्व्यब्व०' इति घ-पाठः। ३ 'लाघवार्थ' इति ख-पाठः ४ 'इतरेतरयोरपि' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्येकशरीरासङ्ख्येयत्वसाम्याच्च, ततो वनस्पतिरनन्तत्वात्, समासश्च परस्परसङ्क्रमज्ञानार्थः। अधुना स्वस्थान एव पृथिव्यादीनामनेकभेदमाचिख्यासुराह–पृथिवीकायोऽनेकविध इत्यादि भाष्यम्। पृथ्वीकायजात्यनतिक्रमेणानेकभेदता दर्श्यते–शुद्धपृथिवी वक्ष्यमाण-शर्करादिभेदरहिता मृत्तिकारूपा गोमयकचवराद्यनेकेन्धनरहिता वा, तथा शर्करापृथिवी परिलघुकाश्मशकलव्यतिमिश्रा, वालुकापृथिवी वालुकाव्यतिमिश्रा मृत्तिकेति। आदिशब्देनोपल-शिला-लवणोषायस्त्रपुता-म्र-सीसक-रजत-सुवर्ण-वैर-हरिताल-हिङ्गुलक-मनःशिला-सस्यकाञ्जन-प्रवालाभ्रपटलाभ्रवालि-का-गोमेद[1]-रुचक[2]-ङ्क-स्फटिक-लोहिताक्ष-मरकत-मसारगल्ल-भुजगेन्द्रनील-चन्दन-गैरिक-हंसग-र्भ-पुलक-सौगन्धिक-चन्द्रसूर्यकान्त-वैडूर्य-जलकान्तप्रकाराः सर्वे बादरपृथिवीकायभेदा ग्राह्याः। एते च शुद्धपृथिव्यादयः स्वाकरस्था एव प्रायश्चैतन्यं बिभ्रति, गोमयकचवरसवितृतापादिस-म्पर्कात् तु गतचेतना अपि जायन्ते, एषां च बादराणां यत्रैको जीवस्तत्रासङ्ख्येयैर्नियमतो-भाव्यम्, स्थानमपि चैषां पृथिव्यष्टकाधोऽधः पातालभवननरकप्रस्तरादि। अपरं सूक्ष्म-पृथिवीकायाः सर्वलोकव्यापिनः, उभयेषामपि चैषाममी परमर्षिप्रणीतप्रवचनप्रसिद्धा भेदा वेदितव्याः पर्याप्तकापर्याप्तकशरीरत्रयाङ्गुलासङ्ख्येयभागशरीरसेवार्तसंहननमसूरचन्द्रसंस्थान-कषायसंज्ञाचतुष्काद्यलेश्यात्रयस्पर्शनेन्द्रियवेदनाकषायमारणान्तिकसमुद्घातासंज्ञिनपुंसकवेदप-र्याप्तिचतुष्टयमिथ्यादर्शनाचक्षुर्दर्शनाज्ञानकाययोगसाकारानाकारोपयोगाहारादिप्रकाराः, विशे-षास्तु बादरपृथिवीकायानामाद्याश्चतस्रो लेश्याः, शेषं समानम्, असङ्ख्येयाश्च प्रत्येक-मुभये। कथं पुनरिदं विज्ञायते साकारानाकारोपयोगादिजीवलिङ्गकलापोऽत्राशेषप्राणिचि-ह्नभूतोऽस्तीति ?। उच्यते–आगमतो युक्तितश्च, आगमस्तावत्–" पुढविकाइया णं भंते ! किं सागारोवओगोवउत्ता अणागारोवओगोवउत्ता ? गोयमा ! सागारोवओगोवउत्तावि अणागारोवओगोवउत्तावि " (प्रज्ञा० सू० ३१२)॥ तथा " पुढविकाइए णं भंते ! अक्कंते समाणे केरिसयं वेदणं पच्चणुभवति ? गोयमा ! से जहा नामए केइ पुरिसे तरुणे बलवं जुवाणे जाव निउणसिप्पोवगए एगं पुरिसं जुण्णं जराजज्जरियदेहं परिहीणसगलिंदिय-वियारं दुब्बलं किलंतं जमलपाणिणा मुद्धाणंसि अभिहणेज्जा, से णं गोयमा ! पुरिसे तेणं जमलपाणिणा मुद्धाणंसि अभिहते समाणे केरिसयं वेयणं पच्चणुभवति ?, अणिट्ठं सम-

पृथ्वीकायिकाना-मनेके भेदाः

---

१ ' वालिका ' इति क-ख-पाठः। २ ' गोमेदक ' इति क-ख-पाठः। ३ ' रुचकाङ्क ' इति ग-टी-पाठः। ४ पृथ्वीकायिकाः भदन्त ! किं साकारोपयोगोपयुक्ताः अनाकारोपयोगोपयुक्ताः ?, गौतम ! साका० अपि अना० अपि। ५ पृथ्विकायिको भदन्त ! आक्रान्तः सन् कीदृशीं वेदनां प्रत्यनुभवति ?। गौतम ! तद्यथानामकः कश्चित् पुरुषस्तरुणो बलवान् युवा यावत् निपुणशिल्पोपगत एकं पुरुषं जीर्णं जराजर्जरितदेहं परिहीनसकलेन्द्रियव्यापारं दुर्बलं क्लाम्यन्तं पाणियमलेन मूर्ध्नि अभिहन्यात्, स गौतम ! पुरुषस्तेन पाणियमलेन मूर्ध्नि अभिहतः सन् कीदृशीं वेदनां प्रत्यनु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णाउसो !, तस्स णं गोयमा ! पुरिसस्स वेयणाहिंतो पुढविकाइए अक्कंते समाणे अणिट्ठतरियं अकंदिततरियं चेव अमणामतरियं चेव वेयणं पच्चणुभवति" (भग०श०९,उ०३,सू०६५३)। एवमेवाप्तेजोवायुवनस्पतिकाया अपि वक्तव्याः। युक्तिरपि सास्नाविषाणादिसङ्घाता हि छेद्यभेद्योत्क्षेप्यभोग्याद्येयरसनीयस्पृश्यदृश्यद्रव्यत्वे सति जीवशरीरतया प्रसिद्धाः, पृथिव्यादीनां च छेद्यत्वादिदृष्टमपह्नोतुं न शक्यते, जीवशरीरत्वेन निरूपितत्वात्, पाणिपादसङ्घातानामिव पृथिव्यादीनामपि कदाचिच्चैतन्यं, न चात्यन्तमचित्ततेति, कदाचित् किञ्चिदचेतनमपि शस्त्रोपहतत्वात् पाण्यादिवदेवेति, अर्शोविकाराङ्कुरवच्च समानजातीयाङ्कुरोत्पत्तिमत्त्वे सति स्वाश्रयावस्था विद्रुमलवणोपलादयः पृथिवीविकाराश्चेतना ततश्च विद्रुमलवणादिवत् पृथिवीविकारे सति अभ्रपटलाञ्जन-हरिताल-मनःशिला-शुद्धपृथिवी-शर्कराप्रभृतयश्चैतन्यमव्यक्तं मत्तसुप्तमूर्च्छितपुरुषवदनुभवन्तीत्यागमतो युक्तितश्चैषामुपयोगो[1] लक्षणं प्रतिपत्तव्यमितरत्रापि च यथासम्भवमेतदुभयमायोजनीयम्। **अप्कायोऽनेक** इत्यादिग्रन्थः। अत्राप्यादिग्रहणेनावश्याय-महिका-करक-हरतनु-शुद्ध-शीतोष्ण-क्षाराम्ल-लवण-क्षीर-घृतोदकप्रकाराः परिगृह्यन्ते, बादराणां समुद्र-हद-नदीप्रभृतिस्थानमितरेषां सर्वलोकस्तथैवासङ्ख्येयतापर्याप्तकादिभेदश्चाशेषस्तथैव केवलं शरीरसंस्थानं स्तिबुकबिन्दुकसंस्थितमेवावसेयम्।

अप्कायिकानां भेदप्रदर्शनम्

वनस्पतिकाय इत्यादिग्रन्थः। **शैवलादिरिति**। साधारणशरीरबादरवनस्पतिकायोपादानात् तदुपलक्षितास्ते चान्ये च ग्राह्याः, शैवालावकपणकहरिद्रार्द्रकमूलकाल्लुकासिंहकर्णिप्रभृतयः, तथा प्रत्येकशरीराः वृक्ष-गुच्छ-गुल्म-लतावितानप्रभृतयः। अत्र साधारणवनस्पतेरनन्तजीवानामेकं शरीरमुच्छ्वासनिःश्वाससमतासमाहारादानता चेत्यादिलक्षणमागमतोऽनुसर्तव्यम्। प्रत्येकशरीरास्त्वसङ्ख्येयजीवाः सङ्ख्येयजीवा वा बहुभेदाः, पर्याप्तकादिर्भेदस्तथैव, केवलमनित्थं रथं शरीरसंस्थानमेषामवसेयम्, शेषमन्यत् समानम्। स्थानं घनोदधिघनवलयाद्येषां, सङ्ख्यामङ्गीकृत्यानन्ताः सर्वे वनस्पतयः, सूक्ष्माः सर्वलोकव्यापिनो वनस्पतयः ॥ १३ ॥

वनस्पतिकायिकानां भेदनिरूपणम्

उक्ताः स्थावराः, त्रसा उच्यन्ते—

सूत्रम्—तेजोवायू द्वीन्द्रियादयश्च त्रसाः ॥ २—१४ ॥

भा०—तेजःकायिका अङ्गारादयः। वायुकायिका उत्कलिकादयः। द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रियाः पञ्चेन्द्रिया इत्येते त्रसा भवन्ति। संसारिणस्त्रसाः स्थावरा इत्युक्ते एतदुक्तं भवति—मुक्ता नैव त्रसा नैव स्थावरा इति ॥ १४ ॥

त्रसानां भेदाः

भवति ? अनिष्टं श्रमणायुष्मन् ! तस्य गौतम ! पुरुषस्य वेदनायाः (सकाशात्) पृथ्वीकायिक आक्रान्तः सन् अनिष्टतरां अकान्ततरां अमनोज्ञतरामेव वेदनां प्रत्यनुभवति।

१ 'मुपयोगलक्षणत्वम्' इति ग-टी-पाठः ॥ २ 'तेजोवायुद्वीन्द्रियादयः त्रसाः' इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—तेजोवायू इति। अङ्गारार्चिरलातशुद्धाग्न्यादिभेदं बादरं तेजः, बादरस्य तु मनुष्यक्षेत्रमेव स्थानम्, न ततः परमस्ति, सूक्ष्मं सर्वलोकपर्यापन्नम्, शरीरसंस्थानं सूचीकलापाकृति, शेषपर्याप्तकादिभेदः पूर्वकैः समानः, प्रमाणतोऽसङ्ख्येयजीवः। प्राच्यप्रतीच्याद्युत्कलिकामण्डलिकादिभेदो वायुः, बादरस्य स्थानं घनवाततनुवाततद्वलयाधोलोकपातालभवनादि, सूक्ष्मः सर्वलोकपर्यापन्नः, प्रमाणतोऽसङ्ख्येयजीवः, पूर्वकैः पर्याप्तकादिभेदः समानः, शरीरसंस्थानं तु पताकाकृति द्रष्टव्यम्॥ द्वे इन्द्रिये येषां ते द्वीन्द्रियाः, ते द्वीन्द्रिया आदौ येषां ते द्वीन्द्रियादय इति तद्गुणसंविज्ञानो बहुव्रीहिः, पञ्चेन्द्रियपर्यवसानाः, वक्ष्यति-'पञ्चेन्द्रियाणि' (अ० २, सू० १५) इति। पञ्चैव नातः परमिन्द्रियम्, नियमाद्धि तद्वतामवच्छेदः। चशब्दः समुच्चितौ। सर्वे एते त्रसा भवन्ति। इतिशब्दोऽवधृतौ। एतावन्त एव सामान्यत इति। त्रसत्वं च द्विविधं-क्रियातो लब्धितश्च। तत्र क्रिया कर्म चलनं देशान्तरप्राप्तिः। अतः क्रियां प्राप्य तेजोवाय्वोस्त्रसत्वम्, लब्धिस्तु त्रसनामकर्मोदयः, यस्माद् द्वीन्द्रियादीनां क्रिया च देशान्तरा-

त्रसत्वस्य द्वैविध्यम्

प्राप्तिलक्षणेति, लब्ध्या पृथिव्यप्तेजोवायुवनस्पतयः सर्वे स्थावरनामकर्मोदयात् स्थावरा एव, आदिवचनं तेजसश्चक्षुःप्रत्यक्षाल्पत्वात्, ततो वायोस्तदधिकसूक्ष्मत्वात्, असमासकरणं तेजोवाय्वोः संज्ञाद्वैविध्यप्रतिपादनार्थम्-त्रसौ स्थावरौ चेति, तेजोवाय्वोः समासकरणं स्थावरैः सहैकेन्द्रियत्वसाधर्म्यात्, द्वीन्द्रियाद्युत्तरवचनमिन्द्रियक्रमवृद्धेः। संसारिणस्त्रसा इत्यादि भाष्यम्। कोऽभिप्रायः? अर्थापत्तिरपि प्रमाणान्तरं नयवादान्तरेणेति प्रागुक्तम्, तस्याः प्रामाण्यद्वारेण विषयप्रदर्शनं क्रियते-संसारिणां त्रसस्थावरत्वविधाने मुक्तानामुभयमपोदितं भवतीति, न ते त्रसाः स्थावरा वा तल्लक्षणानुपपत्तेरिति॥ १४॥

निर्दिष्टा उपयोगिनः, सम्प्रतीन्द्रियाण्युच्यन्ते-कः पुनरस्य सम्बन्धः सूत्रस्य? उच्यते-उक्तं प्रथमे 'तदिन्द्रियानिन्द्रियनिमित्तं' (अ० १, सू० १४) मतिज्ञानमनन्तरं च द्वीन्द्रियादयस्त्रसास्तत्र कियन्तीन्द्रियाणि? कतिविधानि वा तानि? तेषां वा मध्ये कस्य किमिन्द्रियमुपयोगिन इति? तत्रादौ सङ्ख्यानमेव तावन्निरूपयितुमाह—

सूत्रम्—पञ्चेन्द्रियाणि॥ २-१५॥

टी०—अथवा येयं चैतन्यव्यक्तिर्जीवानां सेन्द्रियद्वारेणेति, तानि च न सर्वाणि सर्वस्येति विभागो वक्ष्यते, इन्द्रियनियमः पुनः पञ्चधैवेत्यत आह-पञ्चेन्द्रियाणि। अथवा जीवानामुपयोगो लक्षणमन्वयि सर्वत्र निगदितम्, तस्योपयोगस्य निमित्तान्यमून्यपदिशन्ति पञ्चेन्द्रियाणि॥ ननु च सूत्रारम्भो निष्फल एव लक्ष्यते, किमनेनोक्तेन भवति पञ्चेन्द्रियाणीति?। इन्द्रियस्वरूपमेवात्र वक्तव्यम्, द्रव्येन्द्रियमित्थंलक्षणमेवंप्रकारं च भावेन्द्रियम् इत्याशङ्कायामाह भाष्यकारः—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—पञ्चेन्द्रियाणि भवन्ति। आरम्भो नियमार्थः षडादिप्रतिषेधार्थश्च। " इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा " (पा० अ० २, पा० ५, सू० ९३)। इन्द्रो जीवः सर्वद्रव्येष्वैश्वर्ययोगात् विषयेषु वा परमैश्वर्ययोगात्, तस्य लिङ्गमिन्द्रियम्, लिङ्गनात् सूचनात् प्रदर्शनादुपष्टम्भनाद् व्यञ्जनाच्च जीवस्य लिङ्गमिन्द्रियम् ॥ १५ ॥

टी०—पञ्चेन्द्रियाणि भवन्तीति। आरम्भो नियमार्थः। अन्यूनाधिकतयाऽवधार्यन्ते एतावन्तीन्द्रियाणि प्रकर्षतो भवन्त्येकस्य जन्तोरित्येवंप्रकारो नियमः प्रतिपिपादयिषितः, तथा षडादिप्रतिषेधार्थश्च। षट् आदौ येषां तानि षडादीनि सामर्थ्यादिन्द्रियाण्येव सम्बध्यन्ते, अस्मादुपात्तेन्द्रियपञ्चकव्यतिरेकेण यावन्ति परैरभ्युपेयन्ते सर्वेषामत्र प्रतिषेधः, सूत्रारम्भादेव ॥ ननु च नियमादेवेदमवाप्तमन्यूनानधिकानि पञ्चैवेति, पुनः किमुच्यते षडादिप्रतिषेधार्थश्चेति ?। उच्यते—नियमस्यैतावत् फलं पञ्चैवेति सिद्धान्तोऽयं जैनः, तद्व्यतिरिक्तेन्द्रियान्तराभ्युपगमवादी तु निराकार्योऽवश्यं दूषणमुत्प्रेक्ष्य सिद्धान्तवादिना, अतस्तद्बीजभूतमिदं वचनं षडादिप्रतिषेधार्थश्चेति। तत्र मनस्तावदिन्द्रियं न भवति, इन्द्रियाणि चक्षुरादीनि स्वतन्त्राणि सन्ति रूपाद्यर्थग्रहणेषु प्रवर्तन्तेऽन्यनिरपेक्षाणि, मनः पुनश्चक्षुरादीन्द्रियकलापविषयीकृतमनुपतति रूपाद्यर्थं, न साक्षादित्यतश्चक्षुरादिवन्नेन्द्रियं मनः, किन्त्वनिन्द्रियम्, एतच्चोपरिष्टाद् वक्ष्यते। तथा वागादयः किल वचनादिव्यापारपरायणत्वादिन्द्रियव्यपदेशभाज इत्येतदप्ययुक्तम्, नहि यथा चक्षुरादिद्वारजन्मविज्ञानं परिणमतेऽर्थग्रहणायैवं वागादिद्वारजन्मविज्ञानं वचनादिषु परिणतिमुपैति, न च वाग्वचनयोः कश्चिद् भेदोऽस्ति, शब्दात्मिका चेयमात्मप्रयत्नसंस्कारप्रयोगक्रमवर्तिनीत्वात्, स च श्रोत्रेन्द्रियविषयः, न चेन्द्रियमिन्द्रियान्तरमास्कन्दिष्यते, नियतविषयत्वात्। तथा पाण्याद्यवयवक्रियाणामिन्द्रियत्वे भ्रूक्षेपस्तनभुजशिरस्फुरणक्रियाणामपीन्द्रियत्वं स्यात्, अथैता एव प्रतिविशिष्टावयवसाध्याः क्रियाः प्रदिश्यन्त इन्द्रियाकारेण नान्यास्ततो रुचिरेव युक्तितयाङ्गीकृता स्यात्, अपि च छिन्नपाणिः पादाभ्यामादत्ते, ध्वस्तचरणश्च पाणिभ्यां विहरति, विनष्टपायुप्रदेशा च भगन्दरव्याधिना योषिदुपस्थेनाप्युत्सृजतीत्येवमतिसङ्कीर्णता स्यात्, न चैवं कदाचिदन्धीभूतः श्रोत्रेण रूपमाददान उपलभ्यते, तस्माद् यत्किञ्चिदेतत्। प्रकृतमुच्यते—सङ्ख्याशब्दो व्याख्यातः। पञ्चैवेन्द्रियाणि भवन्ति। अधुनेन्द्रियाणीत्यस्यावयवस्य शब्दनिर्भेददिदर्शयिषयाऽऽह—इन्द्रियमिन्द्रलिङ्गमिति। एतावता शब्दप्राभृतप्रसिद्धं लक्षणमुपलक्षयति, स्वयमेव च पुनर्व्याचष्टे—इन्द्रो जीवः सर्वद्रव्येष्वैश्वर्ययोगात्, इन्दनादिन्द्रः सर्वभोगोपभोगाधिष्ठानसर्वद्रव्यविषयैश्वर्योपभोगाज्जीवः, तच्च पर्यायतोऽस्य सम्भवत्यनादौ संसारेऽनेकजन्मान्तरवृत्तेर्देवादिस्थानापेक्षया, न चास्ति किल कश्चित् प्रदेशो लोकेऽणुमात्रोऽपि यत्रैकेन जन्तुना न जन्ममरणे समनुभूते तिप्राणापानशरी-

इन्द्रियसंख्याप्रतिपादनम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राहारादिग्रहणं वा नाकारीति, प्रवचने चोपदिष्टमजापाटकनिदर्शनम्, अत एव भगवद्भिरालोकितसकललोकस्वभावैरतः परमेश्वरोऽयं सर्वत्र सर्वस्य सर्वदा ईश्वरत्वाद्। यो व सर्वद्रव्यविषयमुक्तन्यायेन परमेश्वरत्वमस्यापह्नुते प्रवचनाद् बहिर्वर्तमानस्तं प्रति प्रकारान्तरेण परमेश्वरतामाविष्करोति-**विषयेषु वा परमैश्वर्ययोगादिति**। प्रसिद्धाः खलु विषयाः शब्दादयस्तद्विषयश्चात्मनः परिभोगोऽविगानेन प्रतिपन्नः प्रवादिभिस्तदेवास्य परमैश्वर्यं विषयपरिज्ञानाधिकत्वात्, न खलु तं विहायात्मानमन्यो विषयान् भुङ्क्ते कश्चिज्जानीते वा। **वा**शब्दो विकल्पार्थः। तमेवमुभाभ्यां प्रकाराभ्यामात्मानमिन्द्रतायामवस्थाप्य सर्वनाम्ना परामृशति-**तस्य लिङ्गमिन्द्रियमिति**। तस्यैवंप्रकारस्यात्मन इन्द्रस्य लिङ्गं-चिह्नमविना-

इन्द्रियस्य शब्दार्थः

भाव्यत्यन्तलीनपदार्थावगमकारीन्द्रियमुच्यते, तदेव च लिङ्गमात्मावगमहेतुतयाऽनेकप्रसिद्धतरपर्यायभेदेन दर्शयति-**लिङ्गनादित्यादिना** भाष्येण। **लिङ्गनात्**-अवगमनात्, तद्यथा-कश्चिच्छोत्रेणोपलभ्य शब्दान् मनोहरानुत्फुल्ललोचनयुगस्तदभिमुखदत्तावधानः सुखास्वादनिर्भरहृदयः सहसोपजायते रोमाञ्चकञ्चुकितच्छविः, तदत्रावगमयति विद्वन्मनांसि श्रोत्रमस्त्यत्रान्तर्वर्ती शरीरादिसङ्घातविलक्षणः कोऽपि परमात्मा यस्यैवंविधा विकाराः समुपलक्ष्यन्ते शब्दमागृहीतवतः। एषैव च भावना स्तवनादीनामपि, लिङ्गपर्यायत्वात्। अथवेन्द्रियमिन्द्रलिङ्गमित्यत्र पञ्चार्थास्तान् पञ्चापि दर्शयत्यनेन भाष्येण। लिङ्गार्थोऽभिहित एव, **सूचनादित्यनेन** दिष्टार्थमाख्याति-**जीवेन दिष्टानि**-सूचितानि लेशतः प्रवर्तितानि तस्मिन् सत्यर्थग्रहणनिमित्तानि राजपुरुषवत्, **जीवेन दृष्टानि** प्रकर्षेण दर्शनमुपलब्धि ग्राहितानि नित्यसम्पृक्तत्वाज्जीवेन संसृष्टान्युपलम्भहेतुतया परिणामितानि, अन्यथा तदभावे तदनुत्पत्तिरेव, **जीवेन जुष्टानि** शब्दादीनां व्यञ्जकहेतुत्वादासेवितानि तदत्ययेऽर्थानामग्राहकत्वात्। **च**शब्दः समुच्चये। **जीवस्य लिङ्गमिन्द्रियमित्यनेनाभिहितार्थनिगममावेदयति तस्माज्जीवस्य यल्लिङ्गं तदिन्द्रियमिति** ॥ १५ ॥

एवं तर्हि सुखदुःखेच्छादयोऽपि जीवलिङ्गत्वादिन्द्रियाणि स्युः, न खल्वेवमवधार्यते जीवलिङ्गं सर्वमिन्द्रियं किन्तु यदिन्द्रियं तज्जीवलिङ्गमिति नियमः, जीवलिङ्गं पुनर्जातुचिदिन्द्रियमथवा सुखादीनि ॥

उक्तानीन्द्रियाणि सङ्ख्यातः, प्रकारवचनेनाधुनाभिधित्सुराह—

सूत्रम्-द्विविधानि ॥ २-१६ ॥

भा०—द्विविधानीन्द्रियाणि भवन्ति—द्रव्येन्द्रियाणि भावेन्द्रियाणि च ॥ १६ ॥

टी०—द्विविधानि अविशेषोपादानात् पञ्चापि द्विप्रकाराणि **भवन्ति** उत्तरसूत्रद्व-

---

१ 'सूचनादीनां' इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यापेक्षया पञ्चापि द्वाभ्यां विशेषाभ्यां भिद्यन्ते निर्वृत्त्युपकरणविशेषेण लब्ध्युपयोगविशेषेण चेति ॥ ननु चैवं दशेन्द्रियाणि प्रसजन्ति द्विःपञ्चकाभिधानात् ततश्च नियमोऽनर्थकः षडादिप्रतिषेधश्चेति । उच्यते–यद्येवमभविष्यद् दशेन्द्रियाणीति सूत्रमकरिष्यत् प्राक्तनम्, न चैवमाचरितं तस्मादाश्रयप्रकारकथनमेतद् विवक्षितमेकस्यैव द्वित्वेन, यथा हि भवनद्वारं दार्वाकाशपरिच्छेदवदपि न द्व्यामवतिष्ठते द्वित्वेऽप्याकाशदारुणोः, प्रयोजनं चास्य निर्गमप्रवेशलक्षणमेकस्यैव, तथा लब्धिनिर्वृत्त्युपकरणोपयोगाः क्रमेणामुना चतुष्टयमिन्द्रियलक्षणमविशकलितम्, न चेन्द्रियबहुत्वम्, अत एव निर्वृत्त्यभावाच्छेषत्रययोगाच्च मनोऽनिन्द्रियमुक्तं तस्मादयमदोषोऽतः सुष्ठूचे–द्विविधानीन्द्रियाणि भवन्ति । सामान्यतः द्रव्यमयानि द्रव्यात्मकानि द्रव्येन्द्रियाणि, भावेन्द्रियाणि तु भावात्मकान्यात्मपरिणतिरूपाणीति । अत्र च पुद्गलद्रव्यमेवानन्तप्रदेशस्कन्धमात्मप्रयोगापेक्षमायतते निर्वृत्त्युपकरणरूपतया सर्वाणीन्द्रियाण्यनन्तप्रदेशानि असङ्ख्येयात्मप्रदेशाधिष्ठितानि च द्रव्यात्मकानि भवन्ति इतरत्र द्वये आत्मपरिणामो भावः प्रयत्नमातिष्ठत इति॥१६॥

इन्द्रियाणां मुख्यभेदौ

उक्तमिन्द्रियं द्रव्यभावभेदतो द्विविधम्, अधुना स्वरूपतो निरूपयितुकाम आह—

सूत्रम्—निर्वृत्त्युपकरणे द्रव्येन्द्रियम् ॥ २–१७ ॥

भा०—तत्र निर्वृत्तीन्द्रियमुपकरणेन्द्रियं च द्विविधं द्रव्येन्द्रियम् । निर्वृत्तिरङ्गोपाङ्गनामनिर्वर्तितानीन्द्रियद्वाराणि, कर्मविशेषसंस्कृताः शरीरप्रदेशाः, निर्माणनामाङ्गोपाङ्गप्रत्यया मूलगुणनिर्वर्तनेत्यर्थः । उपकरणं बाह्यमभ्यन्तरं च निर्वर्तितस्यानुपघातानुग्रहाभ्यामुपकारीति ॥ १७ ॥

द्रव्येन्द्रियभेदौ

टी०—तत्र निर्वृत्त्युपकरणे द्रव्येन्द्रियम् । तत्रेत्यनेन भाष्यकारः सूत्रं सम्बन्धयति, तत्र द्वितये द्रव्येन्द्रियं तावन्निर्धार्यते, स्वरूपभेदाभ्यां निर्वर्तनं निर्वृत्तिः प्रतिविशिष्टसंस्थानोत्पादः, उपक्रियतेऽनेनेत्युपकरणं निर्वृत्तिरेवेन्द्रियं निर्वृत्तीन्द्रियम्, उपकरणेन्द्रियमप्येवम् । उभयमेतत् पुद्गलपरिणामरूपमपि सदिन्द्रियव्यपदेशमश्नुते भावेन्द्रियोपयोगकारणत्वात्, यस्मात् हि तत्साचिव्यं भावस्यैवोपलिङ्गने[1] समायाति आत्मभावपरिणामस्य भाविनो यत् सहायतया क्षमं द्रव्यं तदिह द्रव्येन्द्रियं प्रस्थदारुवदेषितव्यम् । तत्र निर्वृत्त्युपकरणयोः स्वरूपमाविष्करोति भाष्येणैव–निर्वृत्तिरङ्गोपाङ्गनामेत्यादिना । निर्माणनामकर्मान्तर्गतः कर्मभेदो वर्धकिस्थानीयः कर्णशष्कुल्याद्यवयवसन्निवेशविशेषरचनायामाहितनैपुणः, तथौदारिकादिशरीरत्रयाङ्गोपाङ्गनामकर्मभेदो यदुदयादङ्गान्युपाङ्गानि च निष्पद्यन्ते शिरोङ्गुल्यादीनि, एतत् कर्मद्वयमुभयरूपं द्रव्येन्द्रियप्रसाधनाय यतते । भाष्यभावना चैवं कार्या ।

निर्वृत्तीन्द्रियविचारः

---

१ ' वोलिङ्गने ' इति क–ख–पाठः, ' वोपलिङ्गनैः ' इति ग–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्वृत्तिः किंरूपेत्यत आह-अङ्गेति। अङ्गोपाङ्गनाम्ना प्रतिविशिष्टेन कर्मभेदेन **निर्वर्तितानि**-जनितानि-घटितानि **इन्द्रियद्वाराणि**-इन्द्रियविवराणि, इन्द्रियशब्देन चात्र भावेन्द्रियमुपयोगरूपं विवक्षितं तस्येन्द्रियस्य द्वाराण्यवधानप्रदानमार्गाश्चित्राः शष्कुल्यादिरूपा बहिरुपलभ्यमानाकारा निर्वृत्तिरेका, अपरा त्वभ्यन्तरनिर्वृत्तिः, नानाकारं कायेन्द्रियमसङ्ख्येयभेदत्वादस्य चान्तर्बहिर्भेदो निर्वृत्तेर्न कश्चित् प्रायः, प्रदीर्घत्र्यस्रसंस्थितं कर्णाटकायुधं क्षुरप्रस्तदाकारं रसनेन्द्रियम्। अतिमुक्तकपुष्पदलचन्द्रकाकारं किञ्चित् सकेसरवृत्ताकारमध्यविनतं घ्राणेन्द्रियम्। किञ्चित् समुन्नतमध्यपरिमण्डलाकारं धान्यमसूरवच्चक्षुरिन्द्रियम्, पाथेयभाण्डकयवनालिकाकारं श्रोत्रेन्द्रियं नालिककुसुमाकृति चावसेयम्। तत्राद्यं स्वकायपरिमाणं द्रव्यमनश्च शेषाण्यङ्गुलासङ्ख्येयभागप्रमाणानि सर्वजीवानाम्। तथा चागमः-"फासिंदिए णं भंते! किंसंठिए पण्णत्ते? गोयमा! नाणासंठाणसंठिए, जिब्भिन्दिए णं भंते! किंसंठिए पण्णत्ते? गोयमा! खुरप्पसंठिए, घाणिन्दिए णं भंते! किंसंठिए पण्णत्ते? गोयमा! अतिमुत्तयचंदकसंठिए, चक्खुरिन्दिए णं भंते! किंसंठिए पण्णत्ते? गोयमा! मसूरयचंदसंठिए पण्णत्ते, सोइंदिए णं भंते! किंसंठिए पण्णत्ते? गोयमा! कलंबुयापुप्फसंठिए पण्णत्ते" (**प्रज्ञा० सू० १९१**)। अभ्यन्तरां निर्वृत्तिमङ्गीकृत्य सर्वाण्यमूनि सूत्राण्यधीतानि, बाह्या पुननिर्वृत्तिश्चित्राकारत्वान्नोपनिबद्धुं शक्या, यथा मनुष्यस्य श्रोत्रं भ्रूसमं नेत्रयोरुभयपार्श्वतः, अश्वस्य मस्तके नेत्रयोरुपरिष्टात् तीक्ष्णाग्रमित्यादिभेदाद् बहुविधाकाराः। इमामेव चातिक्रान्तभाष्यार्थं पर्यायान्तरेण स्पष्टयति भाष्यकारः-**कर्मविशेषसंस्कृताः शरीरप्रदेशाः**। अथवाङ्गोपाङ्गनामैवोपात्तमतीतभाष्ये न तु निर्माणकर्म तदुपादानायेदमुच्यते-**कर्मविशेष** इत्यादि। कर्मविशेषो नामकर्म तस्यापि विशेष अङ्गोपाङ्गनामनिर्माणकर्म च आभ्यां कर्मविशेषाभ्यां संस्कृता विशिष्टावयवरचनया निष्पादिता-निर्वर्तिताः औदारिकादिशरीराणां त्रयाणां प्रदेशाः-प्रतिविशिष्टा देशाः कर्णशष्कुल्यादयः प्रदेशाः। कर्मविशेषाभिधानश्रवणादतिसम्प्रमुग्धबुद्धेर्व्यामोहस्तदवस्थ एव चेतसीत्यतस्तदवबोधार्थं भूयोऽप्याह-**निर्माणनामाङ्गोपाङ्गप्रत्यया मूलगुणनिर्वर्तनेत्यर्थः**। कर्मविशेषं नामग्राहमाचष्टे निर्माणनाम च अङ्गोपाङ्गे च निर्माणनामाङ्गोपाङ्गे, मध्यव्यवस्थितो नामशब्द उभयं विशेष्यतया क्षिपति, ते कर्मणी प्रत्ययः कारणं-निमित्तं यस्य निर्वृत्तेः सा निर्माणनामाङ्गोपाङ्गप्रत्यया, मूलगुणनिर्वर्तना उत्तरगुणनिर्वर्तनापेक्षयोच्यते। उत्तरगुणनिर्वर्तना हि श्रवणयोर्वेधः प्रल-

इन्द्रियसंस्थानानि

---

१ स्पर्शेन्द्रियं भदन्त! किंसंस्थानं प्रज्ञप्तम्? गौतम। नानासंस्थानसंस्थितम्, जिह्वेन्द्रियं भदन्त! किंसंस्थानं प्रज्ञप्तम्? गौतम! क्षुरप्रसंस्थितम्, घ्राणेन्द्रियं किंसंस्थानं प्रज्ञप्तम्? गौतम! अतिमुक्तचन्द्रकसंस्थितम्, चक्षुरिन्द्रियं किंसंस्थानं प्रज्ञप्तम्? गौतम! मसूरकचन्द्रसंस्थितम्, श्रोत्रेन्द्रियं भदन्त! किंसंस्थानं प्रज्ञप्तम्? गौतम! कदम्बकपुष्पसंस्थितं प्रज्ञप्तम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

म्बतापादनं चक्षुर्नासिकयोरञ्जननस्याभ्यामुपस्कारः तथा भेषजप्रदानाज्जिह्वाया जाड्यापनयः स्पर्शनस्य विविधचूर्णगन्धवासप्रघर्षात् तदिति विमलत्वकरणम्, एवंविधानेकविशेषनिरपेक्षा यथोत्पन्नवर्तिनी औदारिकादिप्रायोग्यद्रव्यवर्गणा मूलकारणव्यवस्थितगुणनिर्वर्तनोच्यते। इतिशब्द एवशब्दार्थः, एवमेषोऽर्थः प्रवचनविद्भिराख्यात इति ॥ सम्प्रत्युपकरणेन्द्रियस्वरूपमाख्यातुमाह—**उपकरणं बाह्यमभ्यन्तरं च निर्वर्तितस्यानुपघातानुग्रहाभ्यामुपकारीति। निर्वृत्तौ सत्यां कृपाणस्थानीयायामुपकरणेन्द्रियमवश्यमपेक्षितव्यम्**, तच्च स्वविषयग्रहणशक्तियुक्तं खड्गस्येव धारा छेदनसमर्था तच्छक्तिरूपमिन्द्रियान्तरं निर्वृत्तौ सत्यपि शक्त्युपघातैर्विषयं न गृह्णाति तस्मान्निर्वृत्तेः श्रवणादिसंज्ञके द्रव्येन्द्रिये तद्भावादात्मनोऽनुपघातानुग्रहाभ्यां यदुपकारि तदुपकरणेन्द्रियं भवति, तच्च बहिर्वार्ति, अन्तर्वार्ति च, निर्वृत्तिद्रव्येन्द्रियापेक्षयाऽस्यापि द्वैविध्यमावेद्यते। यत्र निर्वृत्तिद्रव्येन्द्रियं तत्रोपकरणेन्द्रियमपि न भिन्नदेशवर्ति तस्येति कथयति तस्याः स्वविषयग्रहणशक्तेर्निर्वृत्तिमध्यवार्तिनीत्वात्। एतदेव स्फुटयति—**निर्वर्तितस्य**—निष्पादितस्य स्वावयवविभागेन यदनुपहत्यात अनुग्रहेण चोपकरोति ग्रहणमात्मनः स्वच्छतरपुद्गलजालनिर्मापितं तदुपकरणेन्द्रियमध्यवस्यन्ति विद्वांसः, आगमे तु नास्ति कश्चिदन्तर्बहिर्भेद उपकरणस्येत्याचार्यस्यैव कुतोऽपि सम्प्रदाय इति। एवमेतदुभयं द्रव्येन्द्रियमभिधीयते तद्भावेऽप्यग्रहणात् उपकरणत्वान्निमित्तत्वाच्चेति। निर्वृत्तेरादावभिधा जन्मक्रमप्रतिपादनार्थं तद्भावे ह्युपकरणसद्भावाच्छस्त्रशक्तिवदिति ॥ १७ ॥

उपकरणेन्द्रियस्वरूपम्

अथ भावेन्द्रियं किमित्यत्रोच्यते—

भावेन्द्रियभेदौ

सूत्रम्—लब्ध्युपयोगौ भावेन्द्रियम् ॥ २–१८ ॥

भा०—लब्धिरुपयोगस्तु भावेन्द्रियं भवति। लब्धिर्नाम गतिजात्यादिनामकर्मजनिता तदावरणीयकर्मक्षयोपशमजनिता च। इन्द्रियाश्रयकर्मोदयनिर्वृत्ता च[1] जीवस्य भवति। सा पञ्चविधा। तद्यथा—स्पर्शनेन्द्रियलब्धिः, रसनेन्द्रियलब्धिः, घ्राणेन्द्रियलब्धिः, चक्षुरिन्द्रियलब्धिः, श्रोत्रेन्द्रियलब्धिरिति ॥ १८ ॥

लब्धीन्द्रियस्य कारणत्रयापेक्षत्वं भेदाश्च

टी०—लब्ध्युपयोगौ भावेन्द्रियम्। लब्धिः प्रतिस्वमिन्द्रियावरणकर्मक्षयोपशमः, स्वविषयव्यापारः प्रणिधानं वीर्यमुपयोगः, एतदुभयं भावेन्द्रियमात्मपरिणतिलक्षणं भवति। अत्राचार्यो लब्धिस्वरूपनिर्वर्णनायाह—**लब्धिर्नामेत्यादि भाष्यम्**। लाभो लब्धिः प्राप्तिः। नामशब्दो वाक्यालङ्कारार्थः। अथवा लब्धिरिति यदेतन्नामाभिधानं तस्यायमर्थः **गतिजात्यादिनामकर्मजनिता** लब्धिरुच्यते। गतिजाती आदिर्यस्य तद् गतिजात्यादि, गतिजात्यादि च तन्नाम-

लब्धीन्द्रियस्वरूपम्

---

१ 'वा भवति जीवस्य' इति स्व–पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मकर्म च गतिजात्यादिनामकर्म तेन जनिता-निर्वर्तिता, मनुष्यगतिनामोदयान्मनुष्यस्तथा पञ्चेन्द्रियजातिनामोदयात् पञ्चेन्द्रिय इत्यतो मनुष्यत्वपञ्चेन्द्रियत्वादिलाभे प्रतिस्वं तदावरणकर्मक्षयोपशमो निर्वर्त्यते, तस्य क्षयोपशमस्य गतिजातिप्रभृतिनामकर्मकारणत्वान्निर्दिष्टमाचार्येण । आदिग्रहणेन यत् तदत्र नान्तरीयकं शरीरादिक्षयोपशमलब्धेर्नामान्तःपाति तत् सकलमादीयते । अपरे त्वायुष्कमपि तदाश्रयत्वात् कारणमाचक्षते क्षयोपशमस्य, एवं विदूरवर्ति कारणमपदिश्याधुना प्रत्यासन्नतरकारणान्तरमाविष्करोति–**तदावरणीयकर्मक्षयोपशमजनिता** चेति । तस्याः खलु रूपादिग्रहणपरिणतेरावरणीयमावारकमाच्छादकं, बाहुलकात् कर्तरि व्युत्पत्तिः, तदावरणीयं च तत् कर्म च **तदावरणीयकर्म** मतिज्ञानदर्शनावरणकर्मेत्यर्थः, तस्योभयस्य **क्षयोपशमो**ऽभिहितलक्षणस्तज्जनिता च तन्निष्पादिता चेत्यर्थः । चशब्दः पूर्वकं कारणं समुच्चिनोति ॥ ननु च क्षयोपशम एव लब्धिरुक्ता तेन जनितान्या का भवेल्लब्धिः ? । उच्यते–मतिज्ञानदर्शनावरणक्षयोपशमावस्थानिर्वृत्तौ यो ज्ञानसद्भावः क्षायोपशमिकः सोऽत्र लब्धिरुच्यते, कथं कृत्वोक्तं प्राक् क्षयोपशमो लब्धिरिति कारणे कार्योपचारमालम्ब्य नड्वलोदकं पादरोगवदित्यभिहितमतो न दोषाय । अन्ये पुनराहुः–अन्तरायकर्मक्षयोपशमापेक्षा इन्द्रियविषयोपभोगज्ञानशक्तिर्लब्धिरुच्यते । पुनः प्रत्यासन्नतमकारणनिर्दिदिक्षया भाष्यकृत् प्रतनुते ग्रन्थम्–**इन्द्रियाश्रयकर्मोदयनिर्वृत्ता च जीवस्य भवतीति** । इन्द्रियाण्याश्रयोऽवकाशो येषां कर्मणां तानीन्द्रियाश्रयाणि कर्माणि यावन्ति कानिचिन्निर्माणाङ्गोपाङ्गादीनि यैर्विना तानि न निष्पद्यन्ते तदुदयेन-तद्विपाकेन निर्वृत्ता-जनितात्मनो लब्धिरुद्भवति, स्वच्छे हि दर्पणतले प्रतिबिम्बोदयो भवति, न मलीमसे, तथा निर्माणाङ्गोपाङ्गादिभिरत्यन्तविमलतद्योग्यपुद्गलद्रव्यनिर्मापितानीन्द्रियाणि तस्याः क्षयोपशमलब्धेरतुलं बलमुपयच्छन्ति, कारणतां बिभ्रतीति । सैषा लब्धिः कारणत्रयापेक्षा पञ्चप्रकारा भवति । **तद्यथा–स्पर्शनेन्द्रियलब्धिरित्यादि** भाष्यम् । यथा तत् पञ्चविधत्वं तस्यास्तथा दर्श्यते–स्पृष्टिः–स्पर्शनं, स्पर्शनं च तदिन्द्रियं चेति स्पर्शनेन्द्रियम्, एतदेव लब्धिः **स्पर्शनेन्द्रियलब्धिः** शीतोष्णादिस्पर्शपरिज्ञानसामर्थ्यमनभिव्यक्तमुपयोगात्मनेतियावत् । एवं जिह्वेन्द्रियादिलब्धयोऽपि वाच्याः । **इतिशब्दो** लब्धेरियत्तामावेदयति ॥ १८ ॥

उक्ता लब्धिः, अधुनोपयोग उच्यते–यदि लब्धिनिर्वृत्त्युपकरणक्रमेणोपयोगस्ततोऽतीन्द्रियोपयोगाभावो निर्वृत्त्याद्यपेक्षाभावात् । एतदुक्तं भवति–अवध्यादीनामतीन्द्रियत्वादत्यन्ताभाव एव विशेषो वाच्यः ? । उच्यते–न खुल सर्व उपयोगो लब्धिनिर्वृत्त्युपकरणेन्द्रियकृतः, किं तर्हि स एवैकस्त्रितयनिमित्त इत्यत आह—

सूत्रम्—उपयोगः स्पर्शादिषु ॥ २–१९ ॥

भा०—स्पर्शादिषु मतिज्ञानोपयोग इत्यर्थः । उक्तमेतदुपयोगो लक्षणम् (अ० २, सू० ८) । उपयोगः प्रणिधानम् । आयोगस्तद्भावः परिणाम इत्यर्थः । एषां च

१ 'चायुष्कम्' इति ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्यां निर्वृत्तावुपकरणोपयोगौ भवतः, सत्यां च लब्धौ निर्वृत्त्युपकरणोपयोगा भवन्ति । निर्वृत्त्यादीनामेकतराभावेऽपि विषयालोचनं न भवति ॥ १९ ॥

टी०—**उपयोगः स्पर्शादिषु** । स्पर्शरसगन्धवर्णशब्देषु ग्रहणरूपो व्यापार उपयोगो गृह्यते स्पर्शनेन्द्रियादिनिमित्तो नावध्याद्युपयोगः । अमुमेवार्थं स्पष्टयन् भाष्यकृदाह—**स्पर्शादिषु मतिज्ञानोपयोग इत्यर्थः** । स्पर्शादिविषयो मतिज्ञानव्यापारः प्रतिनियतविषयानुभवनमुपलम्भनमिति, अनेन शेषज्ञानव्युदासमादर्शयति मतिज्ञानोपयोग एव लब्धिनिर्वृत्त्युपकरणापेक्षः प्रवर्तते न शेष इति । अत्रोपयोगसामान्यश्रुत्यपह्नुतावधानश्चोदयति—स्पर्शादिविषयो य उपयोगपरिसमाप्तिव्यापार इत्युक्तम् । एतच्च परमाणुद्व्यणुकादिष्वपि द्रष्टम्, परमाणुरपि हि सर्वात्मनोपयुज्यते द्व्यणुकादिस्कन्धपरिणामे, ततश्च सोऽप्युपयोगलक्षणं प्राप्नोतीत्यत आह भाष्यकारः—**उक्तमेतदुपयोगो लक्षणमिति** । अथवा भाष्यकारः स्वयमेवोपयोगविशेषव्याख्यामातितनिषुराह—**उक्तमेतदित्यादि** । अभिहितमेतदुपयोगश्चैतन्यपरिणामो जीवस्य वैशेषिकं लक्षणं कः परमाण्वादिष्वत्र प्रसङ्गोत्यन्तासम्बन्ध एव । तमेवोपयोगं पर्यायतः कथयति चैतन्यलक्षणं विशेषव्याख्यानदर्शनद्वारेण—

उपयोगेन्द्रियस्वरूपम्

उपयोग इत्यादि । उपयोगस्तु द्विविधा चेतना—संविज्ञानलक्षणा अनुभवनलक्षणा च, तत्र घटाद्युपलब्धिः संविज्ञानलक्षणा, सुखदुःखादिसंवेदनानुभवनलक्षणा एतदुभयमुपयोगग्रहणाद् गृह्यते । **प्रणिधानमवहितमनस्कत्वम्**, एतदुत्कीर्तयति—स्पष्टो हि मतिज्ञानोपयोगो मानसोपयोगावश्यम्भावी द्रव्येन्द्रियाद्यपेक्षश्च नावध्याद्युपयोगस्तथेति **आयोग** इति । स्वविषयमर्यादया स्पर्शादिभेदनिर्भासो ज्ञानोदयः स्पर्शनेन्द्रियादिजन्माभिधीयते **तद्भाव** इति । उपयोगलाञ्छनो जन्तुस्तच्छब्देनामृश्यते तस्य भावः स्पर्शनादिद्वारजन्मज्ञानमात्मनो भूतिरुद्भव इतियावत्, **परिणामोऽप्यात्मन** एव तद्भावलक्षणो नार्थान्तरप्रादुर्भावलक्षणः, स्पर्शनादिनिमित्तज्ञानस्यात्मपरिणतिरूपत्वादित्यर्थः ॥ सम्प्रति प्रवृत्तौ क्रमनियममापादयन्नाह—**एषामित्यादि** भाष्यम् । **एषामिति**।

निर्वृत्त्यादीनां क्रमः

व्याख्यातस्वरूपाणां निर्वृत्त्युपकरणलब्ध्युपयोगेन्द्रियाणामयं प्रवृत्तिक्रमो यदुत निर्वृत्तिः प्राक् तस्यां सत्यामुपकरणमुपयोगश्च भवति निर्वृत्त्याश्रयत्वादुपकरणस्य तद्द्वारजन्मत्वाच्चोपयोगस्य । एतच्च निर्वृत्त्यादित्रयं लब्धीन्द्रियपूर्वकं दर्शयति—श्रोत्रादिक्षयोपशमलब्धौ सत्यां निर्वृत्तिः शष्कुल्यादिका भवति, यस्य तु लब्धिर्नास्त्येवंप्रकारा न खलु तस्य प्राणिनः शष्कुल्यादयोऽवयवा निर्वर्तन्ते तस्माल्लब्ध्यादयश्चत्वारोऽपि समुदिताः शब्दादिविषयपरिच्छेदमापादयन्त इन्द्रियव्यपदेशमश्नुवते । एकेनाप्यवयवेन विकलमिन्द्रियं नोच्यते, न च स्वविषयग्रहणसमर्थं भवति, अमुमर्थं भाष्येण दर्शयति—**निर्वृत्त्यादीनामिति** सूत्रोपन्यस्तक्रममङ्गीकृत्योच्यते निर्वृत्त्युपकरणलब्ध्युपयोगानामन्यतमाभावे एकेनाप्यङ्गेन विकले सति समुदाये न जातुचित् शब्दादिविषयस्वरूपावबोधो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकोपयोगिता

भवत्यात्मनः, विकलकरणत्वात्। अत्र च यदा शब्दोपयोगवृत्तिरात्मा भवति तदा न शेषकरणव्यापारः स्वल्पोऽप्यन्यत्र कान्तद्विष्टाभ्यस्तविषयकलापात्, अर्थान्तरोपयोगे हि प्राच्यमुपयोगबलमाक्रियते कर्मणा, शङ्खशब्दोपयुक्तस्य शृङ्गशब्दविज्ञानमस्तमिततन्निर्भासं भवति, अतः क्रमेणोपयोग एकस्मिन्नपीन्द्रियविषये, किमुत बहुविधविशेषभाजीन्द्रियान्तरे, तस्मादेकेनेन्द्रियेण सर्वात्मनोपयुक्तः सर्वः प्राण्युपयोगं प्रत्येकेन्द्रियो भवति। एवं शेषविषयपरिच्छेदपरिणतावपि वाच्यम्, ये पुनरत्यन्तकान्तद्विष्टाभ्यस्ता विषयास्तानन्यमनस्कोऽपि विस्मर्तुं चेच्छन् न विस्मरति, अतः सहैवोपयोगो भवति उपयोगान्तरेणेति। एतच्चोपयोगद्वयमेकस्मिन् काले पारमर्षप्रवचनाभ्यासाहितनैपुणाः न बाढमभ्युपयन्ति, यत आर्षगङ्गनिह्नवकैर्युगपत् क्रियाद्वयोपयोगः प्रपञ्चतः प्रतिषिद्धो न चागमान्तरे क्वचिदुपनिबद्धः। क्रमस्तु तत्रोत्पलदलशतभेदवदतिशुष्कशष्कुलीभक्षणोपलब्धिवद् वाऽतिसूक्ष्मत्वात् समयादिकृतो दुर्लक्षश्छद्मस्थेनेति। 'उपयोगः स्पर्शादिषु' इति केचिद् भाषन्ते सूत्रमिदं न भवति, भाष्यमेव सूत्रीकृत्य केचिदधीयते, तदेतदयुक्तम्, अविगानेन सूत्रमध्येऽध्ययनात् प्रतिविशिष्टाचार्यसम्प्रदायगम्यत्वाद् विवरणाच्च निश्चीयते सूत्रतेति ॥ १९ ॥

भा०—अत्राह—उक्तं भवता पञ्चेन्द्रियाणि (अ० २, सू० १५) इति। तत् कानि तानीन्द्रियाणीति ?। उच्यते ॥

टी०—अत्राह उक्तमित्यादि सम्बन्धप्रदर्शनपरमिदं भाष्यम्, अत्रावसरे शिष्य आह—अभिहितमेतद् भवता पञ्चैवेन्द्रियाणि भवन्ति सङ्ख्यातः तत् कानि पुनस्तानि नामतः ? उच्यते—स्वरूपतोऽवधृत्य नामविषयं प्रश्नमकृतेत्यतोऽत्र प्रश्ने अभिधीयते प्रतिवचनम् ॥

सूत्रम्—स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि ॥ २-२० ॥

इन्द्रियनामानि

भा०—स्पर्शनं, रसनं, घ्राणं, चक्षुः, श्रोत्रमित्येतानि पञ्चेन्द्रियाणि ॥ २० ॥

टी०—स्पर्शनेत्यादि सूत्रम्। स्पृश्यतेऽनेनेति स्पर्शनम्, सर्वाणि करणकारकसाधनान्यात्मनः कर्तुरभेदेन वर्तमानान्यतिशयवत् प्रयोजनप्रधानं प्रत्याहितपाटवानि ज्ञाने निर्वर्त्ये करणानि कथञ्चिज्जीवादनन्यत्वाद् गमने प्रसाध्ये पादवद् देवदत्तो मांसपिण्डः पादाभ्यां गच्छति ग्राममित्यपराणि भेदभाञ्जि करणान्यस्य कर्तुरसिपरशुवास्यादीन्येवं भिन्नाभिन्नकरणकलापग्रामणीरयमात्मा निरवशेषक्रियानुष्ठानशक्तियुक्तः कर्ता, अन्यथोभयकरणग्रामव्युदासानुगृहीतस्तृणमपि कुटिलयितुमयोग्यः स्यात् किमुतैहिकामुष्मिकानेककार्यविषयव्यापारानुष्ठानमिति, यथैव च प्रतिविशिष्टज्ञाननिर्वृत्त्याधाने करणत्वमिन्द्रियाणाम्, एवं वीर्यबले

१ 'दुर्लक्षच्छद्मस्थोनेति उपः' इति क-ख-पुस्तकयोर्मध्ये अत्रायं भाग उपलब्धः परं त्वनुपयुक्तः प्रामादिक इव भातीति टिप्पण्यां निवेशितः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्वर्त्य योगा मनोवाक्कायलक्षणाः करणान्यात्मनो वेदितव्यानि । इतिशब्द एवंशब्दार्थे । एवमेतानि नामग्राहमुपदिष्टानि पञ्चेन्द्रियाणि भवन्ति, स्पर्शनादिक्रमनियमो बुद्धिपूर्वं सूरेरमुतो नियोगाज्जन्तवो वाग्यन्ताः स्पर्शनकरणभाज इति सुखमेव वक्ष्यामि, तथा परे स्पर्शनमादौ वर्णयन्ति सर्वजीवस्वामिकत्वात् सर्वशरीरव्यापित्वात् अल्पशक्तित्वाच्च ततो रसनादीनि तरतमयोगेनाल्पस्वाम्यणुशरीरदेशस्थबहुशक्तित्वादिति ॥ २० ॥

अथात्मनो लिङ्गान्येतानीत्युक्तं तत् केन पुनः प्रयोजनविशेषेणोपकुर्वन्त्यात्मनः ? । उच्यते–विषयोपभोगतदादानकरणतयेति । विषयाश्च स्पर्शादयोऽर्थास्ते चामी यथाक्रममेषामवसातव्याः ॥

सूत्रम्—स्पर्शरसगन्धवर्णशब्दास्तेषामर्थाः ॥ २–२१ ॥

इन्द्रियाणां विषयाः

भा०—एतेषामिन्द्रियाणामेते स्पर्शादयोऽर्था भवन्ति यथासङ्ख्यम् ॥ २१ ॥

टी०—स्पर्शरसेत्यादि सूत्रम् । स्पृश्यतेऽसाविति स्पर्शः शीतोष्णादिभेदलक्षणोऽष्टधा, रसः पञ्चधा तिक्तादिभेदलक्षणः लवणस्य मधुरान्तर्गतत्वात्, गन्धो द्विधा-सुरभिरितरश्च, साधारणश्चेत्यपरे, वर्णः पञ्चधा शुक्लादिभेदलक्षणः, वाग्योगप्रयत्ननिसृष्टोऽनन्तानन्तप्रदेशिकपुद्गलस्कन्धप्रतिविशिष्टपरिणामः शब्दः, पुद्गलद्रव्यसङ्घातभेदजन्मा वा गर्जितादिरूपः । एते स्पर्शादयो यथोक्तलक्षणास्तेषामनन्तरातीतसूत्रन्यस्तानां स्पर्शनादिकरणानामर्थाः परिच्छेद्याः प्रयोजनानि निर्वर्त्यानीतियावत् । एनमेवार्थं स्पष्टयन् भाष्यकृदाह–एतेषामित्यादि । एतेषाम्–आत्मलिङ्गतया निरूपितानां स्पर्शनादीनां एते स्पर्शादयोऽनेकभेदभाजोऽर्यमाणस्वरूपत्वाद् यथासङ्ख्यमर्था भवन्त्यव्यतिकररूपेण ग्रहणविशेषात् । तेषामर्था इत्यसमासकरणं सम्बन्धस्य स्पष्टताप्रतिपत्त्यर्थम्, समासे तु चतुर्थ्यर्थारेकाऽपि स्यात् सा चानिष्टा तस्मादसमासः । अर्थग्रहणं च विषयशब्दमपहाय यदकारि सूरिणा तदेतज्ज्ञापयितुमभिप्रेतमावस्थिकमेतदर्थत्वम्, एकमेव हि वस्त्वर्यमाणत्वादवस्थाभेदेन तथा तथार्थतामियर्ति, तथाहि यदेवाङ्गुल्यग्रेण स्पृश्यते तदेव च विद्रुमद्रुमच्छायानुकारिणा जिह्वाग्रेण रस्यते,

एकस्यार्थस्यानेकविषयता

मोदकद्रव्यमाघ्रायते च नासिकाविवरेण, चक्षुषा तदेवालोक्यते, तदेव चातिबहुकालपर्युषितमतिकठिनीभूतमभ्यवहियमाणमातनोति ध्वनिम्, न खलु तत्र क्वचिद् देशे स्पर्शः क्वचिद् रसादिरवस्थितः किन्तु य एव देशः शीत उष्णो वा स्पर्शनेनोपलब्धः स एव पुनर्मधुरो रसनेनास्वाद्योपलभ्यते, तस्मात् तदेवैकमभिन्नं पुद्गलद्रव्यमनेकग्रहणापेक्षया भेदमासादयति, पित्राद्यनेकविशेषापेक्षपुरुषभेदप्रतिपत्तिवत्, तद् हि चक्षुर्ग्रहणगोचरतामितं द्रव्यमभेदमपि नीलाद्याकारेण परिणतिमुपागच्छद् रूपमिति व्यपदिश्यते, रसनग्रहणविषयतामापन्नं तिक्तादिपरिणाममास्कन्दद् रस इति तदेवाभिधीयते,

१ 'तेषामि०' इति ग–पाठः । २ ' व्यतिरेक ' इति ग– पाठः । ३ ' ग्रहणागोचरता ' इति क–ख–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमितरेन्द्रियप्राप्तानामपि वाच्यम्। द्रव्यमिन्द्रियनानात्वान्नानाकारस्पर्शादिभेदमापद्यते स्वनिमित्ततस्त्वेकाकारद्रव्यस्वलक्षणविशिष्टत्वात्, यदेवास्यान्तरङ्गं लक्षणं तदेव स्वरूपं त एव हि तस्य धर्माः सर्वदाऽजहद्वृत्तित्वात् स्वलक्षणम्, परनिमित्तास्तु क्षेत्रद्रव्यकालादयोऽपगच्छन्तोऽनुगच्छन्तश्च न स्वलक्षणं तदनादिपारिणामिकधर्माविष्कृतस्वरूपं वस्त्विन्द्रियादिव्यपदेशाद् भिद्यते, यश्च स्वरूपावस्थितस्य पश्चादिन्द्रियसम्बन्धो नासौ वस्तुनः स्वरूपं भवति तेन स्पर्शादयो न द्रव्यादर्थान्तरमथ न परनिमित्त एषां भेदो द्रव्याभेदेऽपीति। एतेन दार्शनस्पार्शनमेव च द्रव्यमिति प्रत्यस्तम्। अत्र चात्माङ्गुलप्रमितसातिरेकयोजनलक्षावस्थितं चक्षुः प्रकाशनीयरूपं गृह्णाति प्रकर्षत इति सिद्धान्तः। एतेन पुष्करार्धवर्तिपुरुषसातिरेकैकविंशतिलक्षाप्रमितप्रदेशोत्कृष्टदिवसोदयकालवर्तिसूर्यदर्शनचोद्यमपास्तमध्यवसातव्यम्। अप्राप्तकारित्वाच्च योग्यदेशव्यवस्थितमेव रूपमागृह्णाति शरीरदेशस्थम्। अप्राप्तकारिता चास्य मनोवदनुग्रहोपघातशून्यत्वात्, न चास्य हुतभुग्जलशूलाद्यालोकनाद् दहनक्लेदनपाटनादयो दृश्यन्ते। आवृताग्रहणात् प्राप्तविषयमिति चेत्, असदेतत्, मनोऽपि हि विषगराद्यावृतं न गृह्णात्यथ चाप्राप्तकारीति, स्पर्शरसगन्धास्तु योजननवकप्रमिताद् देशादागताः प्रकर्षतः स्पर्शनादिभिः शरीरव्यवस्थितैरुपलभ्यन्ते स्पर्शनरसनघ्राणानां प्राप्तकारित्वात्, प्राप्तकारित्वं चोपघातानुग्रहदर्शनादग्निचन्दनादिभिरवगन्तव्यम्। शब्दोऽपि स्वपरिणाममजहद् योजनद्वादशकप्रमितात् प्रदेशादागतः श्रोत्रेण प्राप्तकारिणोत्कर्षाद् गृह्यते स चायाति श्रोत्रदेशमाशु पुद्गलमयत्वे सति सक्रियत्वात्, सक्रियत्वं वायुना उह्यमानत्वाद् धूमस्येव, गृहादिषु तु पिण्डीभवनाद् विशेषतश्च द्वारानुविधानात् तोयवत् प्रतिघाताच्च नितम्बादिषु वायुवदिति। प्राप्तकारित्वं चानुग्रहोपघातपाटवबाधिर्यादिदर्शनादस्यावसेयम्। अवरतश्चक्षुरङ्गुलसङ्ख्येयभागप्रमितदेशवर्ति रूपं परिच्छिनत्ति, शेषाण्यङ्गुलासङ्ख्येयभागप्रमितप्रदेशादागतं विषयमाददते करणानीति ॥ २१ ॥

द्रव्यक्षेत्रादीनामनिमित्तता

प्राप्याप्राप्यविषयता

यथा चैषां स्पर्शादयोऽर्थास्तैर्ग्रहणादेवमिदमर्हत्प्रणीतं यथास्थितजीवपदार्थख्यापनपरम्, प्रयोजनापेक्षया द्व्यनेकद्वादशभेदं श्रुतज्ञानं मनसोऽर्थ इत्याचिख्यासुराह—

सूत्रम्—श्रुतमनिन्द्रियस्य ॥ २—२२ ॥

भा०—श्रुतज्ञानं द्विविधमनेकद्वादशविधं नोइन्द्रियस्यार्थः ॥ २२ ॥

टी०—श्रुतमनिन्द्रियस्य। श्रुतं ज्ञानावरणक्षयोपशमप्रभवं द्रव्यश्रुतानुसारि प्रायो निजार्थोपसङ्गतमात्मनः परिणतिप्रसादरूपं तत्त्वार्थपरिच्छेदात्मकं भावश्रुतं तदनिन्द्रियस्य मनसोऽर्थः, अथवाऽर्थावग्रहसमयात् परतो मतिज्ञानमेव श्रुतज्ञानं भवति तच्च न सर्वेषामिन्द्रियाणामर्थावग्रहात् परतः, किन्तु मनोऽर्थावग्रहादेव परतो मतिः श्रुतीभवति विशेषतस्तु श्रुतग्रन्थानुसारेणेति, द्व्यनेकद्वादशविधविशे-

अनिन्द्रियस्य विषयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यभावश्रुते

षपरिग्रहो न पुनर्भावश्रुतमात्रमेकेन्द्रियादीनाम्, अनिन्द्रियाभावेऽपि तत्सद्भावात् ॥ ननुच शब्द एव श्रूयमाणत्वाच्छ्रुतव्यपदेशमवरोत्स्यति, किमन्येनान्तर्वर्तिना गणतिथविशेषणक्लेशलभ्येन श्रुतेन परिकल्पितेन कारणान्तरेण च तद्विषयेणेति ? । उच्यते—श्रुतमिति ज्ञानमत्र प्रस्तुतमात्मनः परिणतिविशेषः, शब्दस्तु प्रतिघाताभिभवयुक्तत्वात् मूर्तिमान् रूपाद्यात्मकः श्रोत्रग्रहणलक्षणः स कथं भवितुमर्हति ज्ञानम्, अयमपि हि जातुचिद् द्रव्यश्रुतव्यपदेशमासादयति भावश्रुतकारणत्वाद् वा उपचारवशात्, एतच्च प्रथमाध्याये प्रायो निरूपितमिह तु मनसस्तद्विषयत्वेन नियम्यते, अनिन्द्रियं मनोऽभिधीयते रूपग्रहणादावस्वतन्त्रत्वादसम्पूर्णत्वादनुदरकन्यावत्, इन्द्रियकार्याकरणाद्वाप्यपुत्रव्यपदेशवत्, तच्चाप्राप्तकारि लोचनवत्, तोयज्वलनचिन्ताकालेऽनुग्रहोपघातशून्यत्वात्, तत्र च द्रव्यमनः स्वकायपरिमाणमात्मापि भावमनः सोऽपि त्वक्पर्यन्तदेशव्यापी, भावमनश्च मनुते द्रव्यमनः-समालम्बनद्वारेण यदिन्द्रियपरिणामं तस्य व्यापारानुविधानात् अतस्तस्यैवंरूपस्यानिन्द्रियस्य श्रोत्रप्रणालिकोपात्तशब्दवाच्यविचारिणोऽर्थः श्रुतज्ञानम्, तच्च प्रयोगविशेषसंस्कृतं वर्णपदवाक्यप्रकरणाध्यायादिभेदं मनोऽन्तरेण न करणान्तरं परिच्छेत्तुमलम्, एतद्धितावितानुभयप्राप्तिपरिहारोपेक्षालक्षणपुरुषार्थनिर्वर्तनक्षमत्वात् मनसा वीक्ष्यमाणं तस्यैवार्थो नेन्द्रियान्तरस्य, यथा धर्मास्तिकायशब्दोच्चारणसमनन्तरमेव पूर्वकृतसङ्केतापेक्षो द्राग् नित्यैकामूर्तगत्यर्थलोकाकाशव्याप्यक्रियार्थं द्रव्यं मनसोपलभ्यते[1] तत् श्रुतमनिन्द्रियस्यार्थ इति स्थितमेतद्, भाष्यकारेण च भाष्ये विशिष्टश्रुतपरिग्रहार्थं विशेषणमुपात्तम् श्रुतज्ञानमित्यादि । श्रुतज्ञानमित्यात्मपरिणामाख्यानं शब्दव्युदासार्थम्, द्विविधम्—अङ्गबाह्यमङ्गान्तरगतं च, आद्यमनेकभेदमावश्यकादि, इतरदाचारादिद्वादशभेदम्, अनेन श्रुतविशेषाख्यानं न पुनः सर्वमेव श्रुतमनिन्द्रियार्थः । नोइन्द्रियस्यार्थ इत्यनेन पर्यायशब्देन नञर्थं स्फुटयति । न खल्वेतदिन्द्रियम् इन्द्रियलक्षणानुपपत्तेः, एकदेशस्त्विन्द्रियलक्षणस्य समस्तत एवासम्पूर्णत्वान्नोघटवन्नोइन्द्रियमुच्यत इति ॥ २२ ॥

मनसः स्वरूपम्

उक्तानीन्द्रियाणि सङ्ख्यातः प्रकारतः स्वरूपतो विषयतश्च । अधुना तानि कति कस्य जन्तोर्भवन्तीति निरूपयन्नाह—

सूत्रम्—वाय्वन्तानामेकम् ॥ २—२३ ॥

टी०—तत्र सम्बन्धमेव तावदापादयति सूत्रस्य भाष्यकारः अत्राहोक्तं भवतेत्यादिनाभाष्येण ।

भा०—अत्राह—उक्तं भवता पृथिव्यब्वनस्पतितेजोवायवो द्वीन्द्रियादयश्च

---

१ 'पलभते' इति ख-पाठः । २ 'वनस्पत्यन्तानामेकम्' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थावराणामिन्द्रियनियमः

(अ० २, सू० १३-१४) नव जीवनिकायाः, पञ्चेन्द्रियाणि (अ० २, सू० १५) चेति। तत् किं कस्येन्द्रियमिति ?। अत्रोच्यते-पृथिव्यादीनां वाय्वन्तानां जीवनिकायानामेकमेवेन्द्रियम्, सूत्रक्रमप्रामाण्यात् प्रथमं स्पर्शनमेवेत्यर्थः ॥ २३ ॥

टी०-अत्रेन्द्रियप्रकरणप्रस्तावे पर आह-प्रतिपादितं भवता भू-जल-तरु-हुताशनानिला द्वि-त्रि-चतुः-पञ्चेन्द्रियाश्च नव जीवभेदाः, पञ्चेन्द्रियाणि सङ्ख्यातो निरूपितानि तत् किं कस्येन्द्रियमिति स्पर्शनादीनां मध्ये पञ्चानां किमिन्द्रियं स्पर्शनादि कस्य पृथिव्यादेरिति संशयानः प्रश्नयति ॥ नन्वनुपपन्न एव संशयः श्रोतुर्यतः प्राङ्निचायि तेनेदं स्थावरत्रसविधाने 'पृथिव्यम्बुवनस्पतयः स्थावराः' (अ०२, सू० १३) 'तेजोवायू द्वीन्द्रियादयश्च त्रसाः' (अ० २, सू० १४), तत्र द्वे एव इन्द्रिये येषां ते द्वीन्द्रियास्ते आदौ येषां ते द्वीन्द्रियादयः द्वित्रिचतुःपञ्चेन्द्रिया इत्यर्थः। सामर्थ्याच्च पृथिव्यादीनामेकमेवेन्द्रियं भविष्यति वाय्वन्तानामेवं च सिद्धे सूत्रमपि नारब्धव्यमिति ?। उच्यते-द्वीन्द्रियादीनां सत्यं द्वीन्द्रियादिता निश्चिता द्वित्वादिसामान्यान्न विशेषतः द्वे इन्द्रिये येषामिति, के पुनस्ते द्वे इति न निश्चिनुमः। एवं त्रीन्द्रियादिष्वपि योज्यम्, तथा सामर्थ्यादिलाद्यनिलान्तानामेकं कतमम्(दि)न्द्रियं भवतु किं न निर्दिश्यते अतस्तदवस्थः संशयस्तस्मादुपपन्नः प्रश्नः सूत्रारम्भश्चेति। अपिच चोदनाऽनवकाशैव, यतः किमिन्द्रियं कस्य जीवस्य विशेष्याभिहितम्[1]। पृथिव्यादीनामित्यादि भाष्यम्। वाय्वन्तानामित्युक्ते न ज्ञायते किमादीनामेकं भवत्यतः सामर्थ्यलभ्यपृथिवीग्रहणमकरोद् भाष्यकारः ततः परमपरस्य जीवनिकायस्यासम्भवादिति। अथैवमाशङ्केत परतो मा भूत् सम्भव आरात् किं न सम्भवति वाय्वन्तानां वनस्पत्यादीनामब्वादीनां वा भवत्वेकमिति, एवं व्याचक्षाणेन शेषजीवभेदपरित्यागे प्रयोजनं वक्तव्यमतो निष्फलत्वान्नैवमभिसम्बद्धुं शक्यम्। जीवनिकायानामित्यचेतनपृथिव्यादिव्युदासः, जीवनिकायानां जीवसङ्घातानामेकमेवेन्द्रियं भवति न द्व्यादीनि न विनिश्चितमेकं स्पर्शनादीनां मध्ये कतमदित्यत आह-सूत्रक्रमप्रामाण्यात् प्रथमं स्पर्शनमेवेत्यर्थः। इन्द्रियनामनिर्देशसूत्रक्रमं प्रमाणीकृत्यैकं प्रथममवसेयम्, पुनस्तदेव विशिनष्टि नामतः-स्पर्शनमेवेति। न चाप्रसिद्ध एकशब्दः प्रथमार्थे, 'एको गोत्रे' इत्यादिदर्शनादिति। २३ ॥

उक्तः क्षिति-उदक-तरु-ज्वलन-पवनानामिन्द्रियनियमः। सम्प्रति द्वीन्द्रियादीनामुच्यते इत्याह-

सूत्रम्-कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानि ॥ २-२४॥

भा०-कृम्यादीनां पिपीलिकादीनां भ्रमरादीनां मनुष्यादीनां च यथासङ्ख्यमेकैकवृद्धानीन्द्रियाणि भवन्ति यथाक्रमम्। तद्यथा-कृम्यादीनां अपा-

१ 'विशेषोऽभिहितं' इति ग-पाठः। २ 'दोषः' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वीन्द्रियादीनामिन्द्रियवृद्धिः

दिक-नूपुरक-गण्डूपद-शङ्ख-शुक्तिका-शम्बूका-जलूंका[1]-प्रभृतीनामेकेन्द्रियेभ्यः पृथिव्यादिभ्य एकेन वृद्धे स्पर्शनरसनेन्द्रिये भवतः। ततोऽप्येकेन वृद्धानि पिपीलिका-रोहिणिका-उपचिका-कुंन्थु[2]-तुंबुरुक-त्रपुसबीज-कर्पासास्थिका-शतपद्युत्पतक-तृणपत्र-काष्ठहारक-प्रभृतीनां त्रीणि स्पर्शन-रसन-घ्राणानि। ततोऽप्येकेन वृद्धानि भ्रमर-वटर-सारङ्ग-मक्षिका-पुत्तिका-दंश-मशक-वृश्चिक-नन्द्यावत-कीट-पतङ्गादीनां चत्वारि स्पर्शन-रसन-घ्राण-चक्षूंषि। शेषाणां च तिर्यग्योनिजानां मत्स्योरग-भुजङ्ग-पक्षि-चतुष्पदानां सर्वेषां च नारक-मनुष्य-देवानां पञ्चेन्द्रियाणीति ॥ २४ ॥

टी०—कृमिपिपीलिकादि सूत्रम्। अयमादिशब्दः प्रत्येकमभिसम्बध्यते कृम्यादिषु, न समुदाय इति भाष्येण दर्शयति—कृम्यादीनामित्यादिना। गतार्थमेतत्, यथासङ्ख्यमेकैकवृद्धानीन्द्रियाणि भवन्ति। सूत्रे त्वेकैकवृद्धानीत्युक्तं, तत्र न ज्ञायते प्रथममेकेन कतमेन वृद्धमिति सन्देहव्यवच्छेदार्थमाह—यथासङ्ख्यम्, येन क्रमेणोपन्यस्तानि तमेवोररीकृत्यैकैकेन वृद्धानि भवन्ति, न क्रमोल्लङ्घनेन। एतदेव पुनः स्पष्टयति—यथाक्रमं—यथानुपूर्वी, तद्यथेत्यनेन तामानुपूर्वीमादर्शयितुमुपक्रमते—कृम्यादीनां—कृमिप्रकाराणाम्, आदिशब्दस्य प्रकारार्थत्वात्। अपादिकादयः प्रायः प्रसिद्धाः, एषामेकेन वृद्धे स्पर्शनरसने भवतः, पृथिव्यादिभ्यः सकाशादेकेनेन्द्रियेण (रसनेन) वृद्धे सति स्पर्शने द्वे स्पर्शनरसने भवतः, अन्यथा यद्येकेन वृद्धे स्पर्शनरसने सम्बध्येते ततस्त्रीणि प्राप्नुवन्ति, ततोऽप्येकेन वृद्धानि[3]त्यादिभाषितेनापि द्वीन्द्रियेभ्यः पिपीलिकादीनामेकेन घ्राणेन सहिते स्पर्शनरसने त्रीणि सन्ति ततो वृद्धानि भवन्ति इति, ततोऽप्येकन वृद्धानि भ्रमरादीनां सुज्ञानम्, शेषाणां च तिर्यग्योनिजानामिति एकेन्द्रियादितिर्यग्योनिजापेक्षया शेषग्रहणम्, एतद्व्यतिरिक्ताः शेषास्तिर्यग्योनयस्तान् विस्तरतो मत्स्यादीन् दर्शयति—सर्वेषां च नारक-मनुष्य-देवानां पञ्चेन्द्रियाणि। अतिर्यग्योनित्वात् पृथगुपादानं नारकादीनाम्। किं पुनरत्र मनुष्यादीनामित्यभिधाय सूत्रे नारकमनुष्यदेवानामिति विवृतं शेषाणां च तिर्यग्योनिजानामिति, न यथा कृम्यादिषु प्रदीर्घैकदण्डकपाठस्तथेह, उच्यते—कृम्यादिष्वेकजातीया एव सर्वे दण्डकेन निर्दिष्टा इति युक्तम्, इह पुनस्तिर्यग्योनयोऽवश्यं पृथग् निवेश्याः भिन्नजातीयत्वान्नारकादिभ्यः, तथा

नारकादिक्रमे हेतुः

नारकादयोऽपि भिन्नगतिवार्तित्वात् भेदेनैवोपात्ताः। एवं तर्हि मनुष्यनारकदेवानामिति किं नोक्तमादौ मनुष्योपन्यासात्? उच्यते—लोकक्रमसन्निवेशमाचार्येणाधाय चेतसि नारकमनुष्यदेवानामित्युक्तम्। अथवा विवरणग्रन्थो यथे-

---

१ 'जलौका' इति ग—टी—पाठः। २ 'कुन्थुछुरुक' इति क—ख—पाठः। ३ 'वृद्धादीनीति' इति क—ख—पाठः।
४ 'पन्यसनात्' इति ग—पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाष्यपाठभेदः

ष्टमारभ्यत इति नातिदोषाय। अपरेऽतिविसंस्थुलमिदमालोक्य भाष्यं विषण्णाः सन्तः सूत्रे मनुष्यादिग्रहणमनार्षमिति सङ्गिरन्ते, गौरवहेतुत्वात्, विनापि किल मनुष्यादिग्रहणेन चत्वार्येकेन वृद्धानि येषां ते सामर्थ्यान्मनुष्यादयो भविष्यन्ति, तदेतदयुक्तप्रायं लक्ष्यते, अविगानेनैवंविधसूत्राध्ययनात्, सामर्थ्यलाभे वा भ्रमरादिग्रहणमपि न कर्तव्यम्, त्रीण्येकेन वृद्धानि स्पर्शन-रसन-घ्राण-चक्षूंषि भ्रमरादीनामेवेति। इदमन्तरालमुपजीव्यापरे वातकिनः स्वयमुपरभ्य सूत्रमधीयते-'अतीन्द्रियाः केवलिनः' येषां मनुष्यादीनां ग्रहणमस्ति सूत्रेऽनन्तरे त एवमाहुः-मनुष्यग्रहणात् केवलिनोऽपि पञ्चेन्द्रियत्वप्रसक्तेः अतस्तदपवादार्थमतीत्येन्द्रियाणि केवलिनो वर्तन्त इत्याख्येयम्, तदेतद् वार्तम्, भगवतो द्रव्येन्द्रियसद्भावात्, भावेन्द्रियाभावश्चात्यन्तिको मत्यादिचतुष्टयविनिर्मुक्तत्वात् केवलस्येति किमत्रानिष्टमापद्यत इति न विद्मः ॥ २४ ॥

भा०—अत्राह-उक्तं भवता-द्विविधा जीवाः-समनस्का अमनस्काश्चेति। तत्र के समनस्का इति ?। अत्रोच्यते ॥

टी०—अत्राह-उक्तं भवतेत्यादिः सम्बन्धग्रन्थः। इन्द्रियनियम आपादिते मनोनियमाभिधानेच्छयाऽत्रावसरे शिष्य आह-अभिहितं त्वया प्राग् द्विप्रकारा जीवाः संसारिणः-'**समनस्का अमनस्काश्च**' (अ० २, सू० ११) तत्र नारकादिषु के समनस्का इति विभक्तमिच्छामि ज्ञातुम्, के वाऽमनस्का इति नोक्तम्, अन्यतरसमूहाभिधानेऽन्यतरस्य सुज्ञानत्वात् अत्र शिष्यप्रश्नावसायेऽभिधीयते—

सूत्रम्—संज्ञिनः समनस्काः ॥ २-२५ ॥

भा०—सम्प्रधारणसंज्ञायां संज्ञिनो जीवाः समनस्का भवन्ति। सर्वे नारकदेवा गर्भव्युत्क्रान्तयश्च मनुष्यास्तिर्गग्योनिजाश्च केचित्। ईहापोहयुक्ता गुणदोषविचारणात्मिका सम्प्रधारणसंज्ञा। तां प्रति संज्ञिनो विवक्षिताः। अन्यथा ह्याहार-भय-मैथुन-परिग्रह-संज्ञाभिः सर्व एव जीवाः संज्ञिन इति ॥२५॥

टी०—संज्ञिनः समनस्काः, संज्ञा विद्यते येषां ते संज्ञिनः, शिक्षादित्वाद् व्रीह्यादित्वाद् वा, विद्यमानं मनो येषां ते समनस्काः सपुत्रादिवत्, संज्ञामात्रसम्बन्धात् सर्वे पृथिव्यादयः संज्ञिनो दशविधसंज्ञाभ्यनुज्ञानात् इत्यागममनुपश्यन्नाचार्य आह-**सम्प्रधारणसंज्ञायामित्यादि**। अथवा कालहेतुदृष्टिवादोपदेशाख्यास्तिस्रः संज्ञास्तत्र कतमां संज्ञामधिकृत्योच्यते संज्ञिनः समनस्का इति ?। आह-**सम्प्रधारणसंज्ञायामित्यादि**, न सर्वा संज्ञाऽऽगमोक्ताऽत्र गृह्यते, किन्तु या सम्प्रधारणात्मिका तस्याः परिग्रहः। किं पुनः कारणमूहलोकाहारादिसंज्ञास्त्यज्यन्ते ?। ऊहादिसंज्ञाः तावदतिस्तोकत्वादशोभनत्वाच्चाहारादिसंज्ञा नाधिक्रियन्ते, नहि कार्षापणमात्रेण धनवान्, मूर्ति-

सम्प्रधारणसंज्ञा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मात्रेण वा रूपवानिति व्यपदिश्यते, यथा च प्रभूतद्रविणो धनवान्, प्रशस्तरूपः स्वरूपवानुच्यते तथा महत्या शोभनया चेह संज्ञया संज्ञिनो ग्रहीष्यन्ते, भूमप्रशंसातिशयनादिषु मत्वर्थीयविधानात्, कालहेतुदृष्टिवादोपदेशसंज्ञानां च मध्ये कालिक्येव परिगृह्यते नेतरे, निरूपितमिदं नन्द्यां सूत्रव्याख्याने–हेतुकालदृष्टिवादोपदेशक्रममुत्तरोत्तरविशुद्धमपहाय किं कारणं कालिक्यादौ व्यवस्थापितेत्येवमाक्षिप्तेऽभिहितमुत्तरं (हारिभद्रीये)–संज्ञ्यसंज्ञीति सर्वत्र श्रुते कालिक्याः संज्ञायाः प्रायः संव्यवहारः क्रियते, अतः क्रमविशुद्धिमनादृत्य सूत्रमुपनिबद्धम्, अतस्तां कालिकीं संज्ञामधिकृत्य भाष्यकृद् व्याख्यानयति–**सम्प्रधारणसंज्ञायां** ये वर्तन्ते **जीवास्ते समनस्का भवन्ति**। सम्प्रधारणमालोचनं येन सुदीर्घमपि कालमनुस्मरति भूतमागामिनं चानुचिन्तयति कथं नु कर्तव्यं किं वा तत्रानुष्ठेयमत एव दीर्घकालिकीत्युक्ताऽऽगमे पूर्वपदलोपात्। तच्च सम्प्रधारणमेवंरूपं कस्य सम्भवति ? योऽनन्तानन्तान् मनोयोग्यान् स्कन्धान् आदाय मन्यते, तल्लब्धिसम्पन्नो मनोविज्ञानावरणक्षयोपशमादिसमेतः, यथा च रूपोपलब्धिश्चक्षुष्मतः प्रदीपादिप्रकाशपृष्ठेन तद्वत् क्षयोपशमलब्धिमतो मनोद्रव्यप्रकाशपृष्ठेन मनःषष्ठैरिन्द्रियैरर्थोपलब्धिः, यथा वाऽविशुद्धचक्षुषो मन्दमन्दप्रकाशे रूपोपलब्धिरेवमसंज्ञिनः पञ्चेन्द्रियसम्मूर्च्छनजस्यात्यल्पमनोद्रव्यग्रहणशक्तेरर्थोपलब्धिः, यथा चेह मूर्च्छितादीनामव्यक्तं सर्वविषयविज्ञानमेवमतिप्रकृष्टावरणोदयादेकेन्द्रियाणाम्, अतः शुद्धतरं शुद्धतमं च द्वीन्द्रियादीनामा पञ्चेन्द्रियसम्मूर्च्छनजेभ्यः, ततस्तत्संज्ञिनामतिप्रकृष्टतरमिति ?। आह–कुतः पुनश्चैतन्यसमानतायामात्मनो यदिदमुपलब्धिनानात्वम् ? उच्यते–सामर्थ्यभेदात्, स च क्षयोपशमानन्त्याद् यथा चेह छेदनत्वे तुल्ये चक्रवर्तिनश्चक्रस्य यत् सामर्थ्यं तत् क्रमशो हीयमानसामर्थ्यानां न शरपत्रादीनामस्ति, एवमेव हि मनोविषयाणां संज्ञिनां चैतन्ये सति या पटुता सम्प्रधारणायां नासौ क्रमशो हीयमानानामसंज्ञिनामिति। एवं तावद् विशिष्टसंज्ञाभाज एव संज्ञिन इति प्रतिपादितम्॥ इदानीं नामग्राहमाचष्टे तान् संज्ञिनः–**सर्वे नारकदेवा** इत्यादिना। पृथिवीसप्तकवर्तिनो नारकाः, भवनवनचरज्योतिषिकवैमानिकाश्च देवाः, गर्भेण व्युत्क्रान्तिर्येषां मनुष्याणां ते **गर्भव्युत्क्रान्तयः**, उपरिष्टात् (अ०२,सू०३२) त्रिविधं जन्म वक्ष्यते, तत्र मातृपितृसंयोगाज्जीवस्योत्पादो गर्भजन्मोच्यते, तेन गर्भजन्मना विविधमुत्क्रमणं–उद्गमनं-प्रादुर्भावो येषां कदाचिच्छिरसा कदाचित् पादाभ्यां मातुरुदरान्निःसरणमित्येवंविधमनुष्याणां च समनस्कत्वम्। गर्भव्युत्क्रान्तिग्रहणात् सम्मूर्च्छनजन्ममनुष्यव्यावृत्तिः। **तिर्यग्योनिजास्त्वित्यादि**। पञ्चेन्द्रियतिर्यग्योनिजाः गो-महिषी-अजाविक-करि-केसरि-व्या-

उपलब्धिनानात्वम्

---

१ ' तथा च' इति ग-पाठः। २ ' मनोविषयिणां संज्ञानाम् ' इति ग-टी-पाठः। ३ ' तत्संज्ञिनः ' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घ्रादयः। केचिद्ग्रहणाद् गर्भव्युत्क्रान्तय एव परिगृह्यन्ते, न सम्मूर्च्छनजन्मभाजः। ईहापोहयुक्ता इति। सामान्यार्थग्रहणानन्तरभाविनी सदर्थमीमांसा ईहा-किमयं शङ्ख-ध्वनिरुताहो शृङ्गध्वनिरिति, मधुरादिगुणयोगादयं शङ्खस्यैव ध्वनिः, न शृङ्गस्येत्यन्वयव्यतिरेकवद् विज्ञानमपोह उच्यते, ईहापोहाभ्यां युक्ता ईहापोहयुक्ता-**गुणदोषविचारणात्मिका सम्प्रधारणसंज्ञा, तां प्रति संज्ञिनोऽत्र संज्ञिनो विवक्षिताः,** गुणाश्च दोषाश्च गुण-दोषाः, स्वार्थपुष्टिहेतवो गुणाः, तदपचयहेतवो दोषाः, तेषां विचारणम्-आलोचनं-कथं गुणावाप्तिर्दोषपरिहारश्चेति तदेवात्मा-स्वरूपं यस्याः सम्प्रधारणसंज्ञायाः सा गुणदोषविचारणा-त्मिका सम्प्रधारणसंज्ञा, तामेवंविधां संज्ञामभिमुखीकृत्य संज्ञिनो वक्तुमभिप्रेताः। अन्यथा हीत्यादि। यदि प्रतिविशिष्टा संज्ञा नाङ्गीक्रियते ततः सर्व एव जन्तवः पृथिव्यादिभेदाः समनस्काः स्युः, आहारादिसंज्ञाभिः संज्ञिन इतिकृत्वा, तस्माद् विशिष्ट-संज्ञाभाजः संज्ञिनः समनस्का भवन्ति। तत्रासद्वेदनीयोदयादोजलोमप्र-क्षेपभेदेनाहाराभिलाषपूर्वकं विशिष्टपुद्गलग्रहणमाहारसंज्ञा, संज्ञा नाम विज्ञानम्,तद्विषयमाहारमभ्यवहरामीति मोहनीयोदयात्, साध्वसलक्षणा भयसंज्ञा-भयपरिज्ञानं बिभेमीति,: पुरुषादिवेदोदयाद् दिव्यौदारिकशरीरसम्बन्धाभिलाषासेवनं मैथुनसंज्ञा, ततोऽ-न्यथा वाऽपि मूर्च्छालक्षणा परिग्रहसंज्ञा, भावतोऽभिष्वङ्गो मूर्च्छा, तस्मात् सिद्धं प्रणिधान-विशेषाहितसंस्कारविज्ञानपाटवादरविजृम्भितपरिणामाः संज्ञिनः॥ ननु च सम्प्रधारणसंज्ञा मनोलक्षणा, मनश्च सम्प्रधारणसंज्ञारूपम्, ततश्चायुक्तं लक्षणमन्योन्यलक्षणत्वाद् हस्तकरवत् संज्ञिनः समनस्का इति। उच्यते-लक्ष्यपदार्थो द्विविधेन लक्षणेन लक्ष्यते स्वसिद्धेन परसिद्धेन वा, स्वसिद्धेनाग्निरुष्णत्वेन, परसिद्धेनाभिनववारिवाहपटलस्निग्धतरवनखण्डबलाकाकमल-सौरभादिना महान् जलाशयः, तत्रेहापि लक्ष्याः समनस्काः प्रसिद्धेन गुणदोषादानपरि-हाररूपेण बहिर्वर्तिना प्रत्यक्षप्रमाणसमधिगम्येन सम्प्रधारणसंज्ञाफलेन लिङ्गभूतेन संज्ञित्वेनानु-मीयन्तेऽन्तःकरणवत्तया विद्वद्भिः, न चाग्नेर्लक्षणमुष्णता तदभेदवर्तिन्यपि यथा तथा सम्प्रधारणसंज्ञाऽपि बहिरतिस्फुटहिताहितप्राप्तिपरिहाररूप-फला लिङ्गिनो भेदेनापि वर्तमाना लक्षणमेव। अथवा पर्यायकथनेनेदं व्याख्यानं समनस्कानाम्, के समनस्का इति पृष्टे संज्ञिनः समनस्का इत्येकोऽर्थः, यथाऽन्यत्र 'मतिस्मृतिसंज्ञाचिन्ताभिनिबोध इत्यनर्थान्तरं' (अ० १, सू० १३), 'सम्यग्योगनिग्रहो गुप्तिः' (अ०९, सू० ४) इति। इहापि गुणदोषविचारणाफलयोगात् प्रसिद्धतरः संज्ञिशब्द-स्तेन प्रत्यायनमप्रसिद्धस्य समनस्कशब्दार्थस्य। एवंच हस्तकरवदित्यप्युपपन्नं भवति, कस्यचिदन्यतरप्रसिद्धावन्यतरो व्याख्यायते-कः करः? हस्त इति, विवक्षावशाद् वा कदा-चित् कारणेन तत्कार्यमनुमीयते जातुचित् कार्येण कारणम्, अत्र च मनः कारणं सम्प्र-धारणसंज्ञा कार्यतया लक्ष्यते इति, कदाचिद् वा सैव मनसा लक्ष्यत इत्यन्योन्यलक्षणताऽपि न दोषायेति॥ २५॥

आहारादिसंज्ञा-स्वरूपम्

सम्प्रधारणेन समनस्कतालक्षणम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तः प्रतिविशिष्टानामेव भवस्थानां मनोयोगनियमः । अथ येऽन्तर्गतौ वर्तन्ते प्राणिनस्तेषां कतमो योगः ? । उच्यते—

सूत्रम्—विग्रहगतौ कर्मयोगः ॥ २—२६ ॥

टी०—अथवा संसारिणोऽधिकृतास्ते च संसरणधर्माणो भवाद् भवान्तरप्राप्तेः, तच्च तेषां संसरणं द्विधा—देशान्तरप्राप्तिलक्षणं भावान्तरप्राप्तिलक्षणं च, तत्र ये पूर्वशरीरपरित्यागाद् देशान्तरं गत्वा जन्म लभन्ते तेषां देशान्तरप्राप्तिलक्षणम्, ये पुनः स्वशरीर एवोत्पद्यन्ते मृताः सन्तः कृम्यादिभावेन तेषां भावान्तरप्राप्तिलक्षणम्, एतदुभयमपि न चेष्टालक्षणयोगमन्तरेण संसरणमस्ति, त्यक्तपूर्वकशरीरस्य जन्तोर्गतेरभावाद् गतिपूर्विका चोभयप्राप्तिरिति ? उच्यते—गतिहेतुसद्भावान्न गमनप्रतिषेधः, सा गतिरन्तरालवर्तिनी द्विधा—ऋज्वी वक्रा च, ऋज्वी तावत् पूर्वशरीरयोगोत्थापितप्रयत्नविशेषादेव गतिरिष्यते धनुर्ज्याविमोक्षाहितसंस्कारेषुगमनवत्, तस्यां च पूर्वकः स एव योगो वाच्यः, अतोऽन्यस्यानु विग्रहगतौ कर्मयोगः, विग्रहो वक्रमुच्यते, विग्रहेण युक्ता गतिर्विग्रहगतिः अश्वरथन्यायेन, विग्रहप्रधाना वा गतिः विग्रहगतिः शाकपार्थिवादिवत्, तस्यां विग्रहगतौ कर्माष्टकेनैव योगः, न शेषौदारिकादिकायवाङ्मनोव्यापार इति, कर्मणो योगः कर्मयोगः कार्मणशरीरकृतैव चेष्टेत्यर्थः । एतदेव व्यक्तं भाष्येण दर्शयति—

संसरणस्य द्वैविध्यम्

अन्तर्गतिविचारः

भा०—विग्रहगतिसमापन्नस्य जीवस्य कर्मकृत एव योगो भवति । कर्मशरीरयोग इत्यर्थः । अन्यत्र तु यथोक्तः कायवाङ्मनोयोग इति ॥ २६ ॥

टी०—विग्रहगतीत्यादि । समासादितवक्रगतेर्जन्तोः कर्माष्टकं कर्मशब्देनोच्यते । कर्मकृत एव योगो भवतीत्यवधारणेन व्युदासमावेदयति शेषयोगानाम्, पुनः स्पष्टतरमसन्देहार्थं विवृणोति—**कर्मशरीरयोग इत्यर्थः** । कर्मैव शरीरं कर्मशरीरं कार्मणमिति स्फुटयति, स्वार्थे च व्युत्पत्तिमावेदयति कर्मैव कार्मणम्, न पुनर्जातभवाद्यर्थसम्बन्धोऽत्र कश्चित् समस्ति । अयं च नियमोऽन्तर्गतेरेव क्रियते न कार्मणस्येति ख्यापयन्नाह—**अन्यत्र तु यथोक्तः कायवाङ्मनोयोग इति** । अन्तर्गतेरन्यत्र यथाभिहित आगमे कायादियोगो भवति, तुशब्दो गत्यन्तरविशेषप्रदर्शनपरतयोक्तः । तद्यथा—नारकगर्भव्युत्क्रान्तितिर्यग्मनुष्यदेवानां त्रयोऽपि योगाः, सम्मूर्च्छनजन्मभाजां तिर्यग्मनुष्याणां कायवाग्योगावेव । अथवा **यथोक्त इति** । येन प्रकारेणोक्तः कायादियोगः पञ्चदशभेदः स तथा समायोजनीयो गत्यन्तरभेदेष्विति सूचयति, तत्र मनोयोगश्चतुर्धा—सत्यः, असत्यः, सत्यासत्यः, असत्यामृष इति, एवं वाग्योगेऽपि, काययोगः सप्तभेदः—औदारिकः, औदारिकमिश्रः, वैक्रियः, वैक्रियमिश्रः, आहारकः, आहारकमिश्रः, कार्मणश्चेति ॥ ननु च 'अनादिसम्बन्धे च'

योगविभागः

१ वक्रगतौ चेत्यधिकम् । २ ' इत्यर्थः ' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(अ० २, सू० ४२), 'सर्वस्य' (अ ०२, सू० ४३) इतिवचनात् तैजसयोगसद्भावोऽपि, अतोऽष्टविधेन काययोगेन भवितव्यम्, ततश्च षोडशभेदो योगः स्यात्, अवधारणं च भाष्ये कर्मकृत एवेति तदप्यसमीक्ष्य कृतं स्यात्, तत्रोच्यते–'सर्वस्य' (अ०२, सू० ४३) इत्यत्र सूत्रे तैजसयोगमाचार्योऽन्यमतेन निराकरिष्यति, 'एके त्वाचार्याः नयवादापेक्षम्' (अ०२, सू० ४३) इत्यादिना भाष्येण, अतः क्रममुदीक्षस्व मा त्वरिष्ठाः, तत्रैवेदं निश्चेष्यते, समासतस्तावद्

तैजसस्य भिन्नयोगाभावः

गृहाण–तैजसं कार्मणान्न भिन्नमेकमेवेदमित्यतः पञ्चदशधा योगः, अवधारणमपि भाष्ये नासमञ्जसमिति। सोऽयमधुना जीवेषु पञ्चदशविधो योगः आयोज्यते–संज्ञिमिथ्यादृष्टेरारब्धो यावत् सयोगकेवली तावदाद्यतुर्यौ मनोयोगौ लभ्येते, एतेष्वेव च स्थानेषु सत्यवाग्योगोऽपि, तुरीयः पुनर्वाग्योगो द्वीन्द्रियमिथ्यादृष्टेरारब्धो यावत् सयोगिकेवली तावत् समस्ति, द्वितीयतृतीयवाग्योगौ संज्ञिमिथ्यादृष्टेरारब्धौ यावत् क्षीणकषायवीतरागच्छद्मस्थस्तावल्लभ्यते। एवं मनोयोगावपि द्वितीयतृतीयौ। ऋजुगत्यां यावद् भवान्तरसम्प्राप्तिस्तावदन्तराले यथासम्भवमौदारिकवैक्रियकाययोगौ भवतः, वक्रायां तु पुनस्तौ विनिवर्तेते, नारकसुरा वैक्रिययोगभाजः, तिर्यग्-

योगस्वामिनः

मनुष्या औदारिकवैक्रिययोगिनः, आहारकयोगः प्रमत्तेन निष्पाद्यते पश्चादप्रमत्तस्य भवति, एत एव हि नारकादयोऽपर्याप्तकावस्थावर्तिनो मिश्रयोगभाजो भवन्ति, औदारिकवैक्रिये येषां ग्राह्ये पुरोजन्मनि तेषां कार्मणेन मिश्रः, यस्याहारकं ग्राह्यं तस्यौदारिकेण मिश्रः, सम्यग्मिथ्यादृशमपहाय मिथ्यादृष्टेरारब्धोऽन्तर्गतौ कार्मण एव योगस्तावल्लभ्यते यावदुपशान्तकषायवीतरागच्छद्मस्थ इति। केवलिसमुद्घातकाले च तृतीयचतुर्थपञ्चमसमयेषु कार्मण एव। सूत्रे चावध्रियते विग्रहगतेः, न कर्मयोगः, ततोऽन्यत्रापि दर्शनादिति, द्वितीयषष्ठसप्तमेष्वौदारिककार्मणमस्ति, प्रथमाष्टमयोरौदारिक एव, एवमन्यत्र तु यथोक्तः कायादियोगः समायोजितो भवति॥ अथ विग्रहगतौ कर्मयोग इतिवचनादेकविग्रहायामपि गतौ कार्मण एव योगः कस्मान्न भवति? साऽपि हि विग्रहगतिर्भवत्येवेति। उच्यते–विग्रहगताविति न व्याप्तिर्विवक्षिता तिलतैलवत्, किन्तु विषयो विवक्षितः खे शकुनिरुदके मत्स्य इति यथा, अवश्यं चैतदेवं ग्रहीतव्यम्, अन्यथा द्विविग्रहायां त्रिविग्रहायां वा गतावाद्यन्तयोरपि समययोः कार्मणयोगः प्राप्नोति, इष्यते च द्विविग्रहायां मध्यमसमये त्रिविग्रहायां मध्यमयोर्द्वयोरिति॥ ननु च विग्रहगतिसमापन्नः कार्मणेन योगेन भवान्तरं सङ्क्रामति तत् कथं 'निरुपभोगमन्त्यम्' (अ० २, सू० ४५) इति वक्ष्यते, अयमेव हि

विग्रहगतौ निरुपभोगता

तस्योपभोगो यदुत भवान्तरसङ्क्रान्तिरिति?। उच्यते–विशिष्टः सूत्रे सुखदुःखयोरुपभोगः कर्मबन्धानुभवो निर्जरालक्षणश्च प्रतिषेत्स्यते, न चेष्टारूप इति। अथ कथं सूत्रमिदम्?–"[1]जावं च णं भंते! अयं जीवे एयति वेयति चलति फंदति तावं च णं णाणावरणिज्जेणं जाव अंतराइएणं

१ यावच्च भदन्त! अयं जीव एजते व्येजते चलति स्पन्दते तावच्च ज्ञानावरणीयेन यावद् अन्तरायिकेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बज्झतित्ति ? हंता गोयमा ! " कार्मणयोगकाले चास्ति चलनं, तत् कथं बन्धादि-लक्षणोपभोगप्रतिषेधः ? । उच्यते—भवस्थमाश्रित्य भगवता सूत्रं प्राणायि, ज्ञानावरणाद्यास्रवाणां तदैव सद्भावात्, अपिच अल्पः कालः समयद्वयं कस्तत्रोपभोगेनाभिसम्बन्ध इति, स्याद् वा काययोगप्रत्ययस्तत्र बन्धः स तु न विवक्ष्यते भाष्यकारेण, ज्ञानावरणाद्यास्रवविशेषाहितबन्धनिराकारसूत्रं व्याख्यास्यत इति, एवं तर्ह्यानुपूर्वीनामकर्मोपभोगस्तदैव नान्यदा जन्तोरन्यत्र केवलिद्विचरमसमयात्, ज्ञानावरणाद्युपभोगश्च यथासम्भवमतः कथमुपभोगप्रतिषेध इति ?। उच्यते—पुनः पुनर्विरुवन्मुधा कदर्थयसि त्वमस्मान्, तत्रैव सूत्रे निश्चयिष्यते एतद् अभिव्यक्तरूपा हिंसादयो न तत्र सन्ति, न च तदनुरूपफलोपभोग इति व्यक्तिमावेश्य चेतसि प्राणैषीत् सूत्रमाचार्यस्तस्मादवस्थितमिदम्—विग्रहगतौ कार्मण एव योगः, न शेष इति ॥ २६ ॥

अथ येषां जीवानां गतिर्भवान्तरप्रापिणी सा किं यथाकथंचिद् भवति, आहोस्विदस्ति कश्चिन्नियमः ? । अस्तीत्युच्यते—

सूत्रम्—अनुश्रेणिर्गतिः ॥ २—२७ ॥

टी०—अथवा किं पुनरयमात्मा भवान्तरप्राप्तौ वक्रां गतिं प्रतिपद्यते गतिनियमात् कुतश्चिदुताहो यथाकथंचिदिति ? । **गतिनियमात्** इत्याह—कः पुनरसौ गतिनियमः ? उच्यते—**अनुश्रेणिर्गतिः**। श्रेणिः—आकाशप्रदेशपङ्क्तिः स्वशरीरावगाहप्रमाणा, प्रदेशाश्चामूर्ताः क्षेत्रपरमाणवोऽत्यन्तसूक्ष्माः नैरन्तर्यभाजः, सा चासङ्ख्येयप्रदेशा जीवगतिविवक्षायाम्, अन्यत्र मौक्तिकहारलतेव एकैकाकाशप्रदेशरचनाहितस्वरूपाऽपि ग्राह्या, परमाणोस्तावत्यामेव व्यवस्थानात्, द्व्यणुकादेस्तावत्यामधिकायां चेत्येवमनन्तप्रदेशिकस्कन्धपर्यवसानं पुद्गलद्रव्यमुपयुज्य वाच्यम् । तत्रानुश्रेणीति । श्रेणिमनु अनुश्रेणि श्रेण्यामनुसारिणी गतिरितियावत्, अनुगङ्गं वाराणसी यथा । गमनं—गतिः—देशान्तरप्राप्तिः, सा चाकाशश्रेण्यभेदवर्तिनी स्वयमेव समासादितगतिपरिणतेर्जन्तोर्गतिहेतुसकललोकव्यापिधर्मद्रव्यापेक्षा प्रादुरस्ति, भवान्तरसङ्क्रान्त्यभिमुखो जीवो मन्दक्रियावत्त्वात् कर्मणो यानेवाकाशप्रदेशानवष्टभ्य शरीरवियोगं करोति तानेवाभिन्दन् देशान्तरं गच्छत्यूर्ध्वमधस्तिर्यग् वा, विश्रेणिगत्यभावाद्, धर्मास्तिकायाभावाच्च परतो लोकपर्यन्ते एव व्यवतिष्ठते, लोकनिष्कुटोपपातक्षेत्रवशाच्च भवान्तरप्राप्ताववश्यमेव धर्माज्जीवो वक्रां गतिं प्रतिपद्यते, पुद्गलानामपि परप्रयोगनिरपेक्षाणां स्वाभाविकी गतिरनुश्रेणिर्भवति यथाऽणोः प्राच्यात् लोकान्तात् प्रतीच्यं लोकपर्यन्तमेकेन समयेन प्राप्तिरिति प्रवचनोपदेशः, परप्रयोगापेक्षया त्वन्यथाऽपि गतिरस्तीति ॥

गतेरनुश्रेणितानियमः

बध्यते ? हन्त गौतम ! ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधुना भाष्यमनुगम्यते—

भा०—सर्वा गतिर्जीवानां पुद्गलानां चाकाशप्रदेशानुश्रेणिर्भवति, विश्रेणिर्न भवतीति गतिनियम इति ॥ २७ ॥

टी०—सर्वा गतिरित्यादि । सर्वेति ऊर्ध्वमधस्तिर्यग् वा देशान्तरप्राप्तिः, **जीवानां**-जीवनयुजां संसरणधर्माणामित्यर्थः, **पुद्गलानामिति**, पूरणाद् गलनाच्च पुद्गलाः—निरुक्त-प्राभृतानुसारेण उपचयापचयभाजः, तेषां च, समुच्चितौ चशब्दः । कथं पुनरत्र पुद्गलग्रहण-मतर्कितमेव सहसा विहायसोऽपतदिति ? । उच्यते—जीवाधिकारानुवृत्तौ गतिनियमविवक्षायामनुपात्तमपि सूत्रे लाघवैषिणा भाष्यकारेणोपात्त-मेकप्रयत्नसाध्यत्वात्, अन्यथा तु गौरवं जायते, अतश्चेदमवश्यमर्थतो वक्तव्यम्—पुद्गलानां चेति, उत्तरत्र सूत्रे जीवग्रहणाद्, अन्यथा जीवाधिकारानुवृत्तौ जीवग्रह-णस्य न किंचित् प्रयोजनमुपलभ्यते, तस्मात् पश्यत्ययमाचार्यो जीवानां पुद्गलानां च गतिनियमं अनन्तरसूत्रेऽतः पुद्गलव्यवच्छित्तये जीवग्रहणमिति । **आकाशप्रदेशानुश्रेणि-र्भवति** । जीवपुद्गलावगाहलक्षणमाकाशं तस्य प्रदेशाः—परमाणवोऽमूर्तास्तेषां पङ्क्तिः-प्रदीर्घा श्रेणिरसंख्यातप्रदेशा, पुद्गलगमने तु सङ्ख्यातप्रदेशाऽपि, तामेवंविधां श्रेणिमनु-पत्य गमनमुपजायते, आकाशप्रदेशानां या श्रेणिस्तामनु जायते गतिर्भवत्ययमर्थः समासस्तु, कथमेतच्चिन्त्यम् आकाशग्रहणं, धर्मादिद्रव्यनिवृत्त्यर्थम्, तदेव ह्यवगाहदानेन व्याप्रियते, न शेषमिति । उक्तलक्षणायाः श्रेणेर्विगता या गतिः सा **विश्रेणिर्जीवानाम्**, पुद्गलानां तु स्वभावाद्, **विश्रेणिर्न भवतीति गतिर्नियम्यते**। पूर्वापरायता वियत्प्रदेशश्रेणयो दक्षिणो-त्तरायताश्चापराः तथा चोर्ध्वमधश्च धर्माधर्मद्रव्यद्वयावधिका यास्तास्वेव गतिसद्भावात् ता एव विमिश्र न कदाचिदपि प्रयान्तीति ॥ २७ ॥

अनुश्रेणी पुद्गल-ग्रहणे हेतुः

अत्राह—सैवंस्वभावा गतिः किमृज्वेव गत्वोपरमति, अथ कृत्वापि वक्रं पुनरुप-जायते ? । उच्यते—पुद्गलानामनियमः, सिद्धयतस्त्वेकान्तेनैवाविग्रहेत्यत आह—

सूत्रम्—अविग्रहा जीवस्य ॥ २-२८ ॥

सिध्यमानस्य गतिनियमः

भा०—सिद्धयमानगतिर्जीवस्य नियतमविग्रहा भवति ॥२८॥

टी०—एतावद् भाष्यमस्य सूत्रस्य । सेधनशक्तियुक्तः **सिद्धयमानः** सेधनशीलो वा तस्य गतिर्गमनं पूर्वप्रयोगादिहेतुचतुष्टयजनितम् । **जीवस्येति** ग्रहणात् पूर्वयोगैर्जीवाः पुद्गलाश्चेति ज्ञापितं भवति, सिद्धयमानस्येति सामर्थ्यलब्धमुदचीचरत् सूरिरुत्तरयोगे संसारिग्रहणात्, ***नियतं*** *सर्वकालमेव सिद्धयताम्*, ***अविग्रहा***—*ऋज्वी गतिर्भवतीति वेदितव्यमिति ॥२८॥*

आह—अन्यस्य सिद्धयमानजीवव्यतिरिक्तस्य कथमिति ? । उच्यते—

---

१ 'सूत्रोक्तः' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रम्—विग्रहवती च संसारिणः प्राक् चतुर्भ्यः ॥ २–२९ ॥

टी०—विग्रहवती—वक्रा चशब्दादविग्रहा वाऽनन्तरसूत्रनिर्दिष्टा गतिर्भवति, **संसारि**-ग्रहणानुवृत्तौ पुनः संसारिग्रहणं सिद्धग्रहणादपास्तस्य प्राक्तनसंसारिग्रहणस्य पुनः प्रत्युज्जीवनाय अर्थवशाच्च विभक्तिविपरिणामः **प्राक् चतुर्भ्यः** इत्यन्तर्गतिकालप्रकर्षावधारणार्थः, 'एकसमयोऽविग्रहः' (अ० २, सू० ३०) इति वक्ष्यमाणत्वात्। चतुर्भ्यो विग्रहेभ्य आरात् सविग्रहा भवति, त्रिविग्रहा प्रकर्षत इति, प्राक्शब्दस्य मर्यादाभिधायित्वात् ॥

अधुना भाष्यानुसरणं क्रियते—

विग्रहगतिसङ्ख्याः

भा०—जात्यन्तरसङ्क्रान्तौ संसारिणो जीवस्य विग्रहवती चाविग्रहा च गतिर्भवतीति, उपपातक्षेत्रवशात् तिर्यगूर्ध्वमधश्च, प्राक् चतुर्भ्य इति येषां विग्रहवती तेषां विग्रहाः प्राक् चतुर्भ्यो भवन्ति, अविग्रहा एकविग्रहा द्विविग्रहा त्रिविग्रहा इत्येताश्चतुस्समयपराश्चतुर्विधा गतयो भवन्ति, परतो न सम्भवन्ति, प्रतिघाताभावाद् विग्रहनिमित्ताभावाच्च। विग्रहो वक्रितम्, विग्रहोऽवग्रहः श्रेण्यन्तरसङ्क्रान्तिरित्यनर्थान्तरम्। पुद्गलानामप्येवमेव। शरीरिणां च जीवानां विग्रहवती चाविग्रहवती च प्रयोगपरिणामवशात्। न तु तत्र विग्रहनियम इति ॥ २९ ॥

टी०—जात्यन्तरसङ्क्रान्ताविति। जातिरेकेन्द्रियादिभेदात् पञ्चधा, जातेरन्या जातिर्जात्यन्तरं तस्मिन् सङ्क्रान्तिः-गमनं जात्यन्तरसङ्क्रान्तिस्तस्यां जात्यन्तरसङ्क्रान्तौ सत्यामिति। अथ यदा स्वजातावेवोत्पद्यते तदा कथम्? तदाऽपि ह्येवमेव गतिर्वक्तव्या, जात्यन्तरग्रहणं तु तदा प्रदर्शनमात्रकारि व्याख्येयम्। अथवा जननं—जन्म जातिशब्देनोच्यते, जन्मनो जन्मान्तरावाप्तिर्जात्यन्तरसङ्क्रान्तिरिति न कश्चिदत्र दोषः। संसारः—कर्म तदभिसम्बन्धात् **संसारिणो जीवस्येति** जीवनधर्मभाजः, ऋजुगतौ पूर्वकमेवाऽऽयुर्भवति यावदुपपातदेशं प्राप्नोति, कुटिलगतौ यावद् वक्रं तावत् पूर्वकम्, तत्परतो भविष्यज्जन्मविषयमायुरुदेतीत्येवंविधार्थज्ञापनाय जीवस्येत्यवोचत्। समुच्चयार्थं दर्शयति—वक्रा चावक्रा च उभयी गतिः। किं पुनः कारणमत्र येन कदाचिद् वक्रा कदाचिदवक्रेति ?।

विग्रहे हेतुः

अत आह—**उपपातक्षेत्रवशात्** उपपातक्षेत्रं यत्र जन्म प्रतिपत्स्यते तस्य वशः—आनुलोम्यमनुकूलता उपपातक्षेत्रवशस्तस्मादुपपातक्षेत्रवशात् कारणात्। **तिर्यगूर्ध्वमधश्च प्राक् चतुर्भ्य इति**, दिक्षु विदिक्षु च व्यावहारिकीषु स म्रियमाणो यावत्यामाकाशश्रेणाववगाढस्तावत्प्रमाणां श्रेणिमनुश्रदूर्ध्वमधश्च प्राक् चतुर्भ्यो विग्रहेभ्यः सविग्रहया गत्योपपद्यते, न चायं नियमः प्रतिपत्तव्योऽन्तर्गत्याऽवश्यं विग्रहवत्या भवितव्यम्, किन्तु **येषां विग्रहवती तेषां प्राक् चतुर्भ्यो विग्रहा भवति**, येषां जीवानामुपपातक्षेत्रवशाद् विग्रहवती गतिर्भवति तेषां विग्रहत्रययुक्ता प्रकर्षतो द्रष्टव्या। अमुमेवातिक्रान्तमशेषं भाष्यार्थं व्यक्तिमा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पादयन्नाह–**अविग्रहा** इत्यादि। यस्योपपातक्षेत्रं समश्रेणिव्यवस्थितमुत्पित्सोः प्राणिनः स ऋज्वायतां श्रेणिमनुपत्योत्पद्यते, तत्रैकेन समयेन वक्रमकुर्वाणः, कदाचित् तदेवोपपातक्षेत्रं विश्रेणिस्थं भवति **तदैकविग्रहा द्विविग्रहा त्रिविग्रहा** चेति तिस्रो गतयो निष्पद्यन्ते, आकाशप्रदेशश्रेणीः लिखित्वा प्रत्यक्षीक्रियन्ते। तथा चागमः—अपज्जत्तसुहुमपुढविकाइए णं भंते! इमीसे रयणप्पभाए पुढवीए पुरच्छिमिल्ले चरमंते समोहते समोहणित्ता जे भविए इमीसे रयणप्पभाए पुढवीए पच्चच्छिमिल्ले चरमंते अपज्जत्तसुहुमपुढविकाइयत्ताए उववज्जित्तए से णं भंते! कइसमइएणं विग्गहेणं उववज्जेज्जा? गोयमा!

त्रिसमयीं यावत् विग्रहः

एगसमइएण वा दुसमइएण वा तिसमइएण वा विग्गहेण उववज्जेज्जा, से केणट्ठेणं भंते! एवं वुच्चइ? एवं खलु गोयमा! मए सत्त सेढीओ पण्णत्ताओ, तंजहा–उज्जुआयता सेढी एगओवंका दुहओवंका एगओखहा दुहओखहा चक्कवाला अद्धचक्कवाला (**भग०** श० २५, उ० ३, सू० ७३०), उज्जुआयताए सेढीए उववज्जमाणे एगसमएणं विग्गहेणं उववज्जेज्जा, एगओवंकाए सेढीए उववज्जमाणे दुसमइएणं विग्गहेणं उववज्जेज्जा, दुहओवंकाए सेढीए उववज्जमाणे तिसमइएणं विग्गहेणं उववज्जेज्जा, से तेणट्ठेणं गोयमा! एवं वुच्चइ"। एकसमयेन वा विग्रहेणोत्पद्यते द्विसमयेन वा त्रिसमयेन वेति, कः पुनः शब्दार्थ इति सन्दिहानः प्रश्नयति, कुतः पुनः सन्देहः? आचार्येण परिभाषितम्–**विग्रहो वक्रितं विग्रहोऽवग्रहः श्रेण्यन्तरसङ्क्रान्तिरिति**, अत्रायमर्थो न सङ्गच्छते, यस्मात् न ह्येकसमयायां गतौ वक्रमस्ति, अपरे व्याचक्षते–विग्रहाय गतिर्विग्रहगतिः विगृह्य वा गतिर्विग्रहगतिः, तत्र विग्रहायेति आगामिजन्मशरीरार्था गतिरिति प्रतिपादयन्ति, विगृह्य वा गतिरिति वक्रं कृत्वा या गतिः साऽपि विग्रहगतिः,

विग्रहगतिशब्दार्थः

ऋज्वी प्रथमविकल्पेन सङ्गृहीता पश्चिमविकल्पेन वक्रेति, उभय्यामपि विकल्पनायां सूत्रार्थो न घटते, विग्रहार्था या गतिस्तस्यामेष्यज्जन्मनि शरीरेण सम्बन्धः, न गमनपरिणामकाल एव, तत्र कः सम्बन्धः एकसमयेन वा विग्रहेणोत्पद्यते, यदा पुनर्विगृह्य गतिः, तदा सुतरामनुपपन्नम्, न ह्येकसमयगतौ वक्रस्य सम्भवः, भाष्यं च विगृह्यगतिपक्ष एव गमितं भवति विग्रहो वक्रितमित्यादि, नेतरत्र, तस्मादेवं सूत्रं व्याख्येयम्–एकसमयेन वा विग्रहेणोत्पद्येतेति, विग्रहशब्दोऽवच्छेदवचनो न वक्रतामिधायीत्यतोऽयमर्थः–एकसमयेन वाऽवच्छेदेन विरामेण। कस्यावच्छेदेनेति चेत्?

---

१ अपर्याप्तसूक्ष्मपृथ्वीकायिको भदन्त! अस्या रत्नप्रभायाः पृथ्व्याः पूर्वस्मिन् चरमान्ते समवहत समवहत्य यो भव्योऽस्या रत्नप्रभायाः पृथिव्याः पश्चिमे चरमान्ते अपर्याप्तसूक्ष्मपृथ्वीकायिकतयोत्पत्तुं स भदन्त! कतिसामयिकेन विग्रहेणोत्पद्येत? गौतम! एकसामयिकेन वा द्विसामयिकेन वा त्रिसामयिकेन वा विग्रहेणोत्पद्यते, तत् केनार्थेन भदन्तैवमुच्यते? गौतम! मया सप्त श्रेणयः प्रज्ञप्ताः, तद्यथा–ऋज्वायता श्रेणी एकतोवक्रा द्विधावक्रा एकतःखा द्विधाखा चक्रवाला अर्धचक्रवाला, ऋज्वायतया श्रेण्योत्पद्यमान एकसमयेन विग्रहेण उत्पद्यते एकवक्रया श्रेण्योत्पद्यमानो द्विसामयिकेन विग्रहेणोत्पद्यते, द्विवक्रया श्रेण्योत्पद्यमानस्त्रिसामयिकेन विग्रहेणोत्पद्यते, तदेतेनार्थेन गौतम! एवमुच्यते।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामर्थ्याद् गतेरेव, एकसमयपरिमाणगतिकालोत्तरभाविनाऽवच्छेदेनोत्पद्येत, तत्रापि वक्रया श्रेण्योत्पद्यमानः समयद्वयपरिमाणगतिकालोत्तरभाविनावच्छेदेनोत्पद्येत, अत्र च वक्रशब्दोऽप्युचरितो विग्रहशब्दस्य, यदि च विग्रहोऽपि वक्रमेव वक्ष्यते पुनरुक्तता स्यात्, सामानाधिकरण्यं च द्विसामायिकशब्देनानुपपन्नमेव स्याद् विग्रहशब्दस्य, तस्माद् वक्रमत्र साक्षादुपात्तमेकतो वक्रा उभयतो वक्रेति, विग्रहशब्दश्चावच्छेदवचन इति न किञ्चिद् विरुध्यते ॥ ननु चात्र सूत्रे त्रिवक्रा गतिर्नोपात्तैव, तद् कथं सूत्रकारेणोपन्यस्ता प्रवचनाद् बहिर्वर्तमानेति ?। उच्यते—यद्यपि गतिपरिमाणसूत्रे नोपात्ता तथाऽप्यर्थतस्तत्प्रस्ताव एवोपरिष्टादभिहिता, यथा "अपज्जत्तसुहुमपुढविक्काइए[1] णं भंते ! अधोलोगखेत्तणालीए बाहिरिल्ले खेत्ते समोहए समोहणित्ता जे भविए उड्ढलोगखेत्तणालीए बाहिरिल्ले खेत्ते अपज्जत्तसुहुमपुढवीकाइयत्ताए उववज्जेज्जा, सेणं भंते ! कइसमइएणं विग्गहेणं उववज्जेज्जा ? गोयमा ! तिसमइएण वा चउसमइएण वा विग्गहेणं उववज्जेज्जा" । चत्वारश्च समयास्त्रिवक्रायामेवेति अतो न दोषः, तथा पञ्चसमयाऽपि गतिः सम्भवति, न चोपात्ता सूत्रे, यः प्राणी महातमःप्रभापृथिवीविदिग्व्यवस्थितः कालं करोति ब्रह्मलोकविदिशि चोत्पद्यते तस्य पञ्चसमया गतिरवश्यं भवति, न च क्वचित् प्रतिबद्धा, अत्र केचिद् वर्णयन्ति—अस्ति सत्यं सम्भवः पञ्चसमयाया गतेर्न पुनस्तया कश्चिदुत्पद्यते जन्तुरित्यतो न प्रतिबद्धेति । अथवा विद्यमानाऽपि नोक्तेयं यथा चतुःसमयेति । इयांस्तु विशेषः—चतुःसमयाऽर्थतोऽभिहिता सूत्रान्तरे, पञ्चसमया तु नार्थतो न सूत्रत इति, किं पुनः कारणं सङ्ग्रहकारेण चतस्र एव गतय उपात्ताः, न पुनश्चक्रवालादयोऽपीति ?। उच्यते—एताः प्रायः कालपरिमाणमङ्गीकृत्य एतास्वेव चतसृषु पतन्त्यतो नोपात्ताः पार्थक्येन, तथा भूयसा भवन्ति जीवानामेताः पुद्गलानां तु प्राय इत्यतोऽपि नादृताः, पारमर्षप्रवचनवेदिनस्तु सूत्रं परिज्ञास्यन्ति सर्वथा, वयं प्रकृतमेव प्रस्तुमः । सम्प्रति गतीनामियत्तामावेदयन्नाह—एवमेता ऋज्वादयश्चतुःसमयाः परा यासां ताश्चतुःसमयपराश्चतुर्विधा एव गतयो भवन्ति, परतः पञ्चसमयादिका न सम्भवतीत्यर्थः । सर्वत्र च पूर्वशरीरविच्छेदाविच्छेदौ मण्डूकजलूकागतिभ्यां भावनीयाविति, आसां च मध्ये नारकादीनामविग्रहैकद्विविग्रहा एव भवन्ति न तु त्रिविग्रहाः । एकेन्द्रियाणां त्रिविग्रहाश्चेतराश्च, किं पुनः कारणमेकसमयैवाविग्रहा भवति न द्विसमया त्रिसमया वा तावदसौ मृतो जात्ववक्रं यावत् समयद्वयं कालतः पूर्णमेव समयत्रयमपीत्यत आह—प्रतिघाताभावात् । को वा नियमोऽवग्रहत्र्यात् परतोऽन्यो विग्रहो नास्तीति चत्वारि पञ्च वा वक्राणि विधाय किमिति नोत्पत्तिस्थानमाप्नोतीति ?। उच्यते—विग्रहनिमित्ताभावाच्च, येन हि

त्रिवक्रानुपादाने हेतुः

पञ्चसमयानुपादाने हेतुः

अविग्रहे हेतुः

---

१ अपर्याप्तसूक्ष्मपृथ्वीकायिको भदन्त ! अधोलोकक्षेत्रनाड्या बहिःक्षेत्रे समवहतः समवहत्य यो भव्य ऊर्ध्वलोकक्षेत्रनाड्या बहिःक्षेत्रे अपर्याप्तसूक्ष्मपृथ्वीकायिकतयोत्पद्येत स भदन्त ! कतिसामयिकेन विग्रहेणोत्पद्येत ? गौतम ! त्रिसामयिकेन वा चतुःसामयिकेन वा विग्रहेणोत्पद्येत ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत् स्थानमाप्तव्यमृज्वी गत्या स तदविश्राम्यन्नन्तराले स्वभावादेव केनचिदप्रतिहतः प्रतिघातहेतुना तदवश्यं प्राप्नोति, किं तत्र द्वितीयादिसमयकल्पनया ? अतः प्रतिघाताभावात् अन्तराले तस्यैकसमयैव भवति । अपरे वर्णयन्ति–सिद्ध्यमानगतेरेव प्रतिघाताभावः, प्रतिघातकं हि कर्म, तदभावादित्यर्थः, तथा जन्तुनैकविग्रहया गत्या यत् स्थानं यातव्यं तदसौ समयद्वयेनैव प्राप्नोति, उपपातक्षेत्रवशात्, न ततोऽपि श्रेण्यन्तरमाक्रामयतीति, अतो विग्रहनिमित्ताभावादुच्यते विग्रहनिमित्त उपपातक्षेत्रवश इति, एवं द्वित्रिविग्रहयोर्योजनीयम् । अन्ये प्ररूपयन्ति–गतेर्निमित्तं कार्मणशरीरं, तत्सन्तानव्युच्छेदश्च विग्रहनिमित्ताभाव इति ॥ एवं गतिनियममावेद्य अधुना विग्रहशब्दार्थं पर्यायान्तरैरादर्शयति–विग्रहणं–**विग्रहः**–वक्रितं–कुटिलमित्यर्थः ।

विग्रहशब्दस्य पर्यायाः

पुनरप्यपरितुष्यन् विशेषप्रतिपिपादयिषया आह–**विग्रहोऽवग्रहः श्रेण्यन्तरसङ्क्रान्तिरित्यनर्थान्तरम्** । विग्रहः कः ? अवग्रहः, ऋजुताया अवच्छेद इत्यर्थः, तथा श्रेणेरन्या श्रेणिः श्रेण्यन्तरं, तत्र सङ्क्रान्तिस्तदवाप्तिरिति, आलेखिते चतुरस्राकाशप्रतरे बिन्दुकश्रेणिभिः समस्तमिदमनुभवमारोहति । एवमेषामर्थो विग्रहशब्दार्थादनर्थान्तरमर्थराशिरित्युपसंहृतः। अथेदानीं पुद्गलानामप्यतिदेशं कुर्वल्लाँघवार्थमाह–**पुद्गलानामप्येवमेव** । यथा संसारिणां चतस्रो गतयः सम्भाविताः तथा पुद्गलानामपि परमाण्वादीनां विस्रसाप्रयोगाभ्यामाभावनीयाः । अन्तर्गतावयं कालनियमो विग्रहनियमश्च प्रतिपादितः। अधुना भवस्थानामेव शरीरिणां या गतिः सा कथमिति ? उच्यते–**शरीरिणामित्यौदारिकाद्यपेक्ष्योक्तम्**, अन्यथाऽन्तरगतावपि कार्मणशरीरयोगाद् वपुष्मानेवेति न साधुः स्यात् । चशब्देनान्तर्गतिवर्तिनो जीवाः समुच्चीयन्ते पुद्गला वा, शरीरिणां च **जीवानामेव गतिर्भवति विग्रहवती चाविग्रहा च, न कश्चिद् भेदः** । सविग्रहाविग्रहसम्भावनायां

वक्रगतौ हेतुः

प्रयोगपरिणामवशादिति गतेः कारणमाह । स्वप्रयत्नापेक्षो वाऽसौ तथा गच्छति परप्रयत्नापेक्षो वा कृष्यमाण इति प्रयोगपरिणामवशात् उच्यते । परिणामो विस्रसास्वभावः प्रयत्ननिरपेक्षस्तद्वशाद् वा तथा गच्छति। अथवा प्रयोग एव परिणामस्तद्वशादिति शरीरिणामप्येवमेवेत्यतिदिष्टम्, अतस्तस्य देशापवादः प्रदर्श्यते– **न तु तत्र विग्रहनियम इति** । नैव तत्र–शरीरिषु विग्रहा नियम्यन्ते अल्पे वा बहवो वा यथोक्तविग्रहेभ्य इति ॥ २९ ॥

भा०—अत्राह–अथ विग्रहस्य किं परिमाणमिति ?। अत्रोच्यते–क्षेत्रतो भाज्यम्, कालतस्तु ॥

टी०—अत्राहेत्यादिः सम्बन्धग्रन्थः । अविग्रहवद्गतिविचारग्रस्तावे पर आह—**अथ विग्रहस्य किं परिमाणमिति ?**। अथेत्यनेन पूर्वक्रियानन्तर्यमावेदयति, विग्रहो वक्रं तस्य किं परिमाणं, प्रमाणमित्यर्थः, कियता कालेन विग्रहो जायत इति प्रश्नार्थः, **अत्र** प्रश्नेऽभिधीयते निर्णय इत्यत आह—**क्षेत्रतो भाज्यम्, कालतस्तु ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रम्—एकसमयोऽविग्रहः ॥ २–३० ॥

टी०—क्षेत्रतो भाज्यमेकादिप्रदेशभावित्वात् क्षेत्रतो विग्रहपरिमाणं भाज्यम्, कुतः? संहारविसर्गधर्मात्मकत्वाज्जीवप्रदेशानाम्, पूर्वशरीरावगाहनक्षेत्रादुपपातव्यपेताद्, एकादिप्रदेशादिकं चोपपातक्षेत्रमध्यवसातव्यम्, एकादिप्रदेशान्तरितं वा, लोकान्ताल्लोकान्तमिति वा, कालतः पुनर्नियतपरिमाण एव विग्रहो भवति ॥

विग्रहे समयमानम्

भा०—एकसमयोऽविग्रहो भवति । अविग्रहा गतिरालोकान्तादपि एकेन समयेन भवति, एकविग्रहा द्वाभ्याम्, द्विविग्रहा त्रिभिः, त्रिविग्रहा चतुर्भिरिति । अत्र भङ्गप्ररूपणा कार्येति ॥ ३० ॥

टी०—एकसमयोऽविग्रहो भवतीत्यादि भाष्यम् । एकोऽन्यनिरपेक्षः अविभागी यः कालः परमनिरुद्धश्च समयः स एकः समयो यस्य व्यवधायकः स एकसमयो भवतीह विग्रहः । एतदुक्तं भवति—भवान्तरालवर्तितायां जन्तोर्गतिपरिणतस्यैकेन समयेनातिक्रान्तेन वक्रा गतिर्जायत इति, न चायं नियमः, सर्वस्यावश्यं समयातिक्रमे वक्रेण भवितव्यम्, किन्तु पूर्वापरसमयावधिक[1] एष विग्रहः, तेन द्वित्रिचतुःसमयासु गतिषु भवति, नैकसमयायाम्, अपिच यत्र विग्रहस्तत्रैकसमयत्वमुपलक्षणम्, न पुनः एकसमयपरिमाणे काले व्यवच्छिन्ने सर्वत्र विग्रहेण भवितव्यम्, या हि ऋज्वी गतिर्न तस्यां विग्रहोऽस्ति, अथ चैकसमयेति । सम्प्रति नियतकालपरिमाणामेकसमयां गतिं क्षेत्रतो भाज्यतया दर्शयति—**अविग्रहा गतिरालोकान्तादपि एकेन समयेन भवति**, ऋज्वी गतिः क्षेत्रमङ्गीकृत्य कदाचिदव्यवहितश्रेण्यन्तरमात्र एव विरमति जन्तोरुत्पादवशात्, कदाचिच्छ्रेणिद्वयमतिक्रम्योपरमति आलोकान्ताद् वा सिद्ध्यमानस्य भवतीत्येकसमयपरिमाणभेदवर्ति, सर्वत्र गतिविशेषात्, यथा देवदत्तयज्ञदत्तयोरेकः प्रहरेण त्रीणि योजनानि छिनत्ति, अपरो योजनमध्यर्धं यातीति, एवं तावदवक्रा गतिरेकेन समयेन भवतीति निरूप्य अविग्रहपरिमाणं चाख्याय विग्रहप्रमाणत एव सुज्ञानसमयसङ्ख्या एकद्वित्रिवक्रा गतीराख्याति, **एकविग्रहा द्वाभ्याम्**, एको विग्रहो यस्यां सैकविग्रहा पूर्वापरसमयावधिकत्वात् विग्रहस्य सामर्थ्यान्निश्चीयते द्वाभ्यां समयाभ्यां निष्पाद्यत एकविग्रह इति । एवं द्वित्रिविग्रहयोरपि वाच्यम्[2] ॥ अथैकस्यां नरकादिगतौ विवक्षितायां ये प्राणिनस्तत्र नरक उत्पत्स्यन्तेऽन्तर्गतिवर्तिनस्ते किं सर्वेऽपि विग्रहगत्या एकस्मिन् काले उत्पद्यन्ते, अथ अविग्रहया, उत द्वाभ्यामिति? अत आह—**अत्र भङ्गप्ररूपणा कार्या**[3], अत्रैवंविधविचारप्रस्तावे भङ्गाः—विकल्पाः तेषां प्ररूपणा—विभावना कार्या । सा चैवं कार्या—नारकाः कदाचित् सर्व एव विग्रहगतयो भवन्ति, अथवा अविग्रहगतयश्च, विग्रहगतिश्चैकः स्यात्, अथवा अविग्रहगतयो विग्रहगतयश्चेति, एतेन विकल्पत्रयेणैकेन्द्रियान् विहाय शेषा

---

१ ' समयोपाधिक ' इति ग–पाठः । २ 'गतिराख्याति ' इति क–ख–पाठः । ३ ' कर्तव्या ' इति क–ख–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याख्याताः, एकाद्युपपादोपपत्तेर्यावत् स्वसङ्ख्यानियम इति, एकेन्द्रियास्तु नित्यमविग्रहगतयो विग्रहगतयश्चापदिश्यन्त इति ॥ ३० ॥

उक्तो विग्रहः । अथ विग्रहगतिसमापन्ना जीवाः किमाहारकाः अनाहारका इति ? अनाहारका इत्याह, यद्यनाहारकाः एवं तर्हि कियन्तं कालमिति वक्तव्यमिति, उच्यते—

सूत्रम्—एकं द्वौ वाऽनाहारकः ॥ २-३१ ॥

भा०—विग्रहगतिसमापन्नो जीवः एकं वा समयं द्वौ वा समयावनाहारको भवति, शेषं कालमनुसमयमाहारयति । कथमेकं द्वौ वाऽनाहारकौ न बहूनीति, अत्र भङ्गप्ररूपणा कार्या ॥ ३१ ॥

विग्रहेऽनाहारकता

टी०—**विग्रहगतीत्यादि** भाष्यम् । उक्ता विग्रहगतिस्तां **समापन्नः**—अनुप्राप्तो **जीवः** सामर्थ्यात्—विग्रहापेक्षत्वाद् द्विविग्रहां त्रिविग्रहां वाऽनुप्राप्तो गृह्यते, तत्र द्विविग्रहायामेकं समयं मध्यमं त्रिविग्रहायां **द्वौ समयावनाहारकौ** मध्यमौ **भवति** । अनन्तरसूत्रात् समयग्रहणमनुवर्तते, वाशब्दो विकल्पार्थः कदाचिदेकं कदाचिद् द्वाविति । अपरे वाशब्दात् त्रीन् वा समयाननाहारको भवतीति व्याचक्षते, तं[1] च केवलिनमादर्शयति समुद्घातकाले त्रिचतुर्थपञ्चमसमयेषु, तदत्यन्तासम्बद्धम्, विग्रहगतिसमापन्नो जीव इत्येवंविधे भाष्यप्रक्रमे कः प्रस्तावः केवलिसमुद्घातानाहारककालस्य? अथाप्रस्तुतमप्यत्रावश्यं वक्तव्यं भाष्यादुत्तीर्य, ततोऽन्तर्मुहूर्तार्धं शैलेश्यवस्थायामनाहारक इति किं नोक्तम् ? सादिकमनिधनं कालं सिद्धोऽनाहारक इति वा, अतः प्रस्तावापास्तत्वान्न विद्वन्मनांस्याराधयत्येतद् व्याख्यानम् । यदि पुनः पञ्चसमयायां गतौ वाशब्देन समयत्रयं समुच्चीयते ? उच्यते—अभिहितं प्राक् न तादृश्यां गत्यां कश्चिदुपपद्यते, अथास्ति सम्भवः, न कश्चिद् दोषः ॥ अथ किमाहारकविशेषमङ्गीकृत्य अनाहारकत्वमाख्यायते सूरिणा उत सर्वाहारनिषेध इति ? सर्वाहारनिषेध इत्याह, कति वाऽऽहाराः ? ननु त्रयः, ओजआहारो लोमाहारः प्रक्षेपाहार इति, तत्रौजआहारोऽपर्याप्तकावस्थायां कार्मणशरीरेणाम्बुनिक्षिप्ततप्तभाजनवत् पुद्गलादानं सर्वप्रदेशैर्यत् क्रियते जन्तुना प्रथमोत्पादकाले योनौ अपूपेनेव[2] प्रथमकालप्रक्षिप्तेन घृतादेरिति, एष च आन्तर्मुहूर्तिकः । लोमाहारस्तु पर्याप्तकावस्थाप्रभृति यत् त्वचा पुद्गलोपादानमाभवक्षयाच्च सः । प्रक्षेपाहारः ओदनादिकवलपानाभ्यवहारलक्षणः । अतोऽत्राहारत्रयमपि प्रतिषिध्यते, भवस्थतायामेव त्रितयाभ्यनुज्ञानात् । प्रथमान्त्यसमययोरन्तर्गतौ च्युतजन्मदेशस्थत्वादाहारक एव, पूर्वोत्तरशरीरपरित्यागादानकालाभेदवर्तित्वात्, कर्मपुद्गलादानं पुनर्योगकषायहेतुकमन्तर्गतावपि सर्वत्र सर्वकालमस्ति, वर्षणसमये समादीप्तनाराचप्रक्षेपवत्, तद् यथा जलधारा-

आहारस्य त्रैविध्यम्

वाशब्दस्य विचारः

---

१ 'स च' इति क-ख-पाठः । २ 'अपूपेनैव' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्निपातापादितसामर्थ्ये वर्षति पर्जन्ये नाराचद्रव्यं ज्याहस्तविप्रयोगाहितवेगमग्निज्वालाकलापादीप्तमम्भःपुद्गलग्रहणं कुर्वदेव गच्छति, एवमयमन्तरात्मा कार्मणेन शरीरेण कर्मोष्णत्वात् पुद्गलग्रहणं कुर्वन्नविच्छिन्नमागामिजन्मनेऽभिधावतीति, न खल्वेवंरूपस्य पुद्गलादानस्य प्रतिषेधः, किन्तु परिपोषहेतुको य आहार औदारिकवैक्रियशरीरद्वयस्य स विवक्षितः प्रतिषेध्यत्वेनेति, अतोऽन्तर्गतावेकं समयं समयद्वयं वाऽनाहारकः, **शेषं कालमनुसमयमाहारयति** एकद्विसमयव्यतिरिक्तः शेषकालमाहारमभ्यवहरति । अत्यन्तसंयोगप्रदर्शनार्थमनुसमयमित्युक्तम् । अनुसमयमविच्छेदेन, प्रतिसमयमित्यर्थः । उत्पत्तौ प्रथमसमयादारभ्यान्तर्मुहूर्तिक ओजआहारः, पश्चादाभवक्षयाल्लोमाहारः, कावलिकस्तु कादाचित्कः । **कथमेकं द्वौ वेत्यादि**, केन प्रकारेणैकं द्वौ वा समयावनाहारको जन्तुर्न पुनरतोऽपि **बहून्** समयानित्यत्र प्रश्ने विकल्पानां विभावना **कार्या**, सा च ऋतैव द्विविग्रहायामेकं त्रिविग्रहायां द्वाविति।

जन्मसूत्रे प्रस्तावना

भा०—अत्राह—एवमिदानीं भवक्षये जीवः अविग्रहया विग्रहवत्या वा गत्या गतः कथं पुनर्जायत इत्यत्रोच्यते—उपपातक्षेत्रं स्वकर्मवशात् प्राप्तः शरीरार्थं पुद्गलग्रहणं करोति। सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते (अ० ८, सू० २) इति। तथा कायवाङ्मनःप्राणापानाः पुद्गलानामुपकारः (अ० ५, सू० १९)। नामप्रत्ययाः सर्वतो योगविशेषात् (अ० ८, सू० २५) इति वक्ष्यामः। तज्जन्म, तच्च त्रिविधम्, तद्यथा—

टी०—अत्राहेत्यादिः सम्बन्धग्रन्थः। अत्रावसरे शिष्यः पृच्छत्यजानानः—एवमुक्तेन प्रकारेण इदानीमिति, सर्वसंसारिणां स्वजीवितव्यवच्छेदविशिष्टं कालमामृशति भवक्षये इति, प्रागुपात्तौदारिकवैक्रियशरीरपरिक्षये सति, ऋज्वा वक्रया वा गत्या गत उपपत्तिदेशं प्राप्तो जीवः, केन प्रकारेण पुनर्जायत इति। पुनःशब्दः प्राक्तनजन्मापेक्षः, जायते—प्रादुर्भवति, औदारिकवैक्रियशरीरितयोत्पद्यत इतियावत्। अत्र उच्यते—उपपातक्षेत्रं स्वकर्मवशात् प्राप्तः शरीराद्यर्थं पुद्गलग्रहणं करोति, यस्मिन् क्षेत्रे उत्पत्स्यते तदुपपातक्षेत्रमवकाशस्थानमाश्रय इति पर्यायाः, तत्प्राप्तः स्वकर्मवशादिति, पूर्वोपात्तकर्मपरिणतिसामर्थ्यादेव विहाय प्राणान् भवान्तरमासादयति नेश्वरादिप्रेरित इति सूचयति। सर्वं हि तस्य कर्मण्येव तदा निष्पादयन्ति, उत्पत्तिस्थानमृजु गन्तव्यमनेन वा मार्गेण यातव्यमस्यां वा वेलायां प्रवर्तितव्यमस्मिन् वा योन्यन्तरे मयोत्पत्तव्यं नान्यत्रेत्येतदशेषमचिन्त्यसामर्थ्यभाञ्जि कर्माण्यात्मपरिणामापेक्षाणि प्रसाधयन्ति, न पुनरन्तरालवर्तितायामुदीक्ष्यमाणस्तिष्ठति वेलाम्, नापि सभागसन्ततिपतितान् सत्त्वान् क्रीडतो रिरंसयाऽनुप्रविशति, असमञ्जसत्वात्, अतः कर्मानुभावादनुप्राप्त औदारिकवैक्रियशरीरनिष्पत्तये पुद्गलानां तत्प्रायोग्यानामादानं करोति।

१ ' शरीरक ' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ कथमस्य ते पुद्गलास्तद्योग्या ग्रहणमागच्छन्ति, केन हेतुना लगन्त इतियावत्, अत आह-'**सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते**' (अ० ८, सू० २), सकषायत्वाल्लगन्ति ते पुद्गलाः, स्नेहाभ्यक्तशरीरे रेणुलगनवत्, एतदष्टमेऽभिधास्यते विस्तरेण, तथा पञ्चमेऽपि द्रव्योपकारप्रस्तावेऽध्येष्यते-**कायवाङ्मनःप्राणापानाः पुद्गलानामुपकारः** (अ० ५, सू० १५) इति। शरीराणि पञ्चविधान्यौदारिकादीनि पुद्गलानामुपकार इत्यतोऽपि ते पुद्गलास्तथाश्लेषात् तथा परिणमन्ते तस्यामवस्थायामिति, प्रपञ्चत एतत् प्रतिपादयिष्यते तत्रैव। तथाऽष्टमे-'**नामप्रत्ययाः सर्वतो योगविशेषात्**' (अ० ८, सू० २५) सूक्ष्मा एकक्षेत्रावगाढाः स्थिताः सर्वात्मप्रदेशेष्वनन्तानन्तप्रदेशा इति प्रदेशबन्धविचारे वक्ष्यते। बन्धननामकर्मोदयहेतुतः कर्मपुद्गलग्रहणमिति आद्योपपत्तिर्बन्धसामान्ये, मध्यमा उपकारभेदविवक्षाद्वारेण, अन्त्या प्रदेशबन्धप्रस्तावाकृष्टेत्यतस्तिसृणामपि सूचनम्, न पुनरभिन्नैकवस्तुसन्निपातिन्यस्तिस्रोऽपि, पुनरुक्तदोषप्रसक्तेः, इदं च स्वस्थान एवोपपत्तित्रयमपि विविक्तमुन्मीलिष्यतीति नोत्त्रसितव्यम्, अतो यत् तदेवंविधं पुद्गलग्रहणं **तज्जन्म, तच्च त्रिविधम्**, आश्रयग्रहणभेदात् तत्त्रैविध्यं दर्शयितुकामस्तद्यथेत्यनेनोपक्रमते ॥ ३१ ॥

सूत्रम्—सम्मूर्च्छनगर्भोपपाता जन्म ॥ २-३२ ॥

जन्मभेदाः

भा०—सम्मूर्च्छनं १ गर्भ २ उपपात ३ इत्येतत् त्रिविधं जन्म ॥ ३२ ॥

सम्मूर्च्छनजन्मनो व्याख्या

टी०—सम्मूर्च्छनगर्भोपपाता जन्म। सम्मूर्च्छनं गर्भ उपपात इत्येतत् त्रिविधं जन्मेत्येतावद् भाष्यमस्य सूत्रस्य। अत्र सम्मूर्च्छामात्रं सम्मूर्च्छनम्, यस्मिन् स्थाने स उत्पत्स्यते जन्तुस्तत्रत्यपुद्गलानुपसृज्य शरीरीकुर्वन् सम्मूर्च्छनं जन्म लभते, तदेव हि तादृक् **सम्मूर्च्छनं** जन्मोच्यते। जन्म च शरीरद्वयसम्बन्धित्वेनात्मनो यः परिणामः, अतस्तत् सम्मूर्च्छनजन्मोत्पत्तिस्थानवर्तिपुद्गलजालमनुपमृद्य[2] न प्रादुरस्ति, किण्वाद्युपमर्दनात् सुराजन्मवत्, पिष्टकिण्वोदकादीनामुपमर्दनात् सुराया जन्म दृष्टम्, तथा बाह्यपुद्गलानामाध्यात्मिकानां चोपमर्दनाद् यज्जन्म भवति तत् सम्मूर्च्छनजन्म व्यपदिश्यते, बाह्यपुद्गलोपमर्दनलक्षणं तावद् यथा कृम्यादीनां काष्ठादिषु, काष्ठत्वक्पक्वफलादिषु जीवाः कृम्यादयः समुपजायमानाः तानेव काष्ठफलत्वग्वर्तिनः पुद्गलान् शरीरीकुर्वन्त उपजायन्ते, तथा जीवद्गवादिशरीरेषु कृम्यादयः प्रादुःष्यन्तस्तानेव जीवद्गवादिशरीरावयवानादाय स्वशरीरतया परिणति-

---

१ 'कथमस्मात् पुद्गलात् तद्योग्या' इति क-पाठः। २ 'मनुपसृज्य न प्रादु' इति ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मापादयन्तीत्याध्यात्मिकपुद्गलोपमर्दनलक्षणमेतज्जन्म, प्रत्यक्षं चैतत्, प्रायस्तत्र गर्ताद्युपलब्धेः। तथा योषिद्योनावैकध्यमागत्य ग्रहणं शुक्ररक्तयोर्यत् क्रियते जीवेन जनन्यभ्यवहृताहाररसपरिपोषापेक्षं तद् गर्भजन्मोच्यते, अत्रापि गर्भ एव जन्म प्रतिपत्तव्यम्। इदं पूर्वजन्मनो भिन्नलक्षणम्, आगन्तुकशुक्रशोणितग्रहणात्, न खलु योषिद्योनेस्तदेव शुक्रशोणितं स्वरूपमतोऽस्ति भेदः। तथा उपपातक्षेत्रप्राप्तिमात्रनिमित्तं यज्जन्म तदुपपातशब्देनोच्यते, यथा प्रच्छदपटस्योपरिष्टाद् देवदूष्यस्याधस्तादत्रान्तरालवर्तमानान् पुद्गलान् वैक्रियशरीरतयाऽऽददानो देवः समुज्झवति, इदं च पूर्वाभ्यां भिन्नलक्षणम्, नहि प्रच्छदपटदेवदूष्यपुद्गलानेवासौ शरीरीकरोति, नापि शुक्रादिपुद्गलानाददान उत्पद्यते, तस्मात् प्रतिविशिष्टक्षेत्रप्राप्तिरेवास्य जन्मनो निमित्तं भवति, तथा नारकाणां नरककुड्यव्यवस्थितातिसङ्कुटमुखनिष्कुटा वातायनकल्पा योनिस्तत्र वैक्रियशरीरपुद्गलानादाय निष्पीड्यमाना वज्रमयनरकतले जलमध्यक्षिप्तपाषाणवन्महता वेगेन प्रतिपतन्ति। एवमेतत् त्रिविधं जन्म वेदितव्यमात्मनः शरीरतयात्मलाभ इति। अपरे वर्णयन्ति—सम्मूर्च्छनमेवैकं सामान्यतो जन्म, तद्धि गर्भोपपाताभ्यां विशेष्यत इति ॥ ३२ ॥

गर्भजन्मनो विचारः

उपपातजन्मनः स्वरूपम्

अत्र च सम्मूर्च्छनमादौ, प्रत्यक्षबहुस्वामित्वात्; तदनु गर्भः, प्रत्यक्षौदारिकशरीरसाधर्म्यात्; तत उपपातः, स्वामिवैधर्म्यात्, इति। उक्तं जन्म प्रादुर्भावमात्रं शरीरिणाम्, न तु प्रतिविशिष्टस्थाननिर्देशः कृतः, कीदृशि पुनः स्थाने प्रथमत उत्पद्यमानाः सम्मूर्च्छन्ति, शुक्रासृग्ग्रहणं वा कुर्वन्ति, वैक्रियशरीरं वा समादद्ते, किंगुणे धामनि नारकदेवा इति ? अतस्तेषां जन्मनां विशिष्टस्थाननिरूपणाय योनयोऽभिधीयन्ते—

अनन्तरसूत्रसम्बन्धः

सूत्रम्—सचित्तशीतसंवृताः सेतरा मिश्राश्चैकशस्तद्योनयः ॥२—३३॥

भा०—संसारे जीवानामस्य त्रिविधस्य जन्मन एताः सचित्तादयः सप्रतिपक्षा मिश्राश्चैकशो योनयो भवन्ति। तद्यथा—सचित्ता, अचित्ता, सचित्ताचित्ता, शीता, उष्णा, शीतोष्णा, संवृता, विवृता, संवृताविवृता, इति। तत्र नारकदेवानामचित्ता योनिः। गर्भजन्मनां मिश्रा। त्रिविधाऽन्येषाम्। गर्भजन्मनां देवानां च शीतोष्णा। तेजःकायस्योष्णा। त्रिविधाऽन्येषाम्। नारकैकेन्द्रियदेवानां संवृता। गर्भजन्मनां मिश्रा। विवृताऽन्येषामिति ॥

जन्मिनां योनिनवकम्

---

१ 'देवनारकानां' इति घ-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—अथवाऽयमात्मा पूर्वभवशरीरनाशे तदनु शरीरान्तरप्राप्तिस्थाने यान् पुद्गलान् शरीरार्थमादत्ते तान् कार्मणेन सह मिश्रयति तप्तायःपिण्डाम्भोग्रहणवच्छरीरनिर्वृत्त्यर्थं बाह्यपुद्गलान् यस्मिन् स्थाने तत् स्थानं योनिस्तत्प्रविभागार्थमिदमुच्यते—**सचित्तेत्यादि**। **संसारे जीवानामित्यादि**। अष्टप्रकारकर्मवर्तिनां जन्तूनाम्, **अस्य** अनन्तरसूत्रनिर्दिष्टस्य **त्रिभेदस्य** सम्मूर्च्छनादेः। **जन्मन** इत्यनेन च **तद्योनय** इति सूत्रावयवार्थमाचष्टे, तस्य जन्मनो योनयस्तद्योनय इति, **एताः सचित्तादयः**, एता इति प्रत्यक्षासन्नाः सचित्तशीतसंवृतास्तिस्रः, **सप्रतिपक्षाः**, सह प्रतिपक्षैरचित्तोष्णविवृतैः सप्रतिपक्षाः, प्रतिक्रुष्टः प्रत्यनीको वा पक्षः प्रतिपक्षः, **मिश्राश्च** एतद्द्वयमेकीभूतं मिश्रमुच्यते, तच्चोक्तमेव द्वयं गृह्यते प्रस्तावान्न तु तद्व्यतिरिक्तं सचित्तादित्रयमचित्तादित्रयं च एतदेवोभयं मिश्रीक्रियते, यस्य च मूलभेदस्य यत् प्रतिपक्षत्वेन निर्दिष्टं तयोर्द्वयोर्मिश्रणम्, **तद्यथा—सचित्ताचित्ता**, शीतोष्णा, संवृतविवृता, **च**शब्दः समुच्चये, **एकैका एकशः**, एकैका सेतरा सचित्तादीनाम्, एकैका च मिश्रा स्वप्रतिपक्षेणैव, एवमेता नव योनयो भवन्ति। योनिशब्दस्यार्थः युवन्ति—मिश्रीभवन्ति यत्र स्थाने जन्महेतुद्रव्याणि कार्मणेन सह तद्योनिः, तच्च[1] स्थानमाश्रयभावेन यूयत इति योनिः। अमुमेवातिक्रान्तमर्थं स्पष्टयन्नाह—**तद्यथा—सचित्तेत्यादि**। विशिष्टप्रतिपक्षदर्शनार्थं मिश्रार्थप्रतिपादनार्थं चेदं भाष्यम्। **सचित्ता** जीवप्रदेशाधिष्ठिता १ **अचित्ता** तद्विपरीता २ **सचित्ताचित्ता** प्रस्तुतद्वयस्वभावमिश्रा ३ **शीता** शिशिरा १ तद्विपरीतोष्णा २ उभयस्वभावा **मिश्रा** ३ **संवृता** प्रच्छन्ना सङ्कटा वा १ तद्विपरीता **विवृता** २ **मिश्रो**भयस्वभावा ३ एतावत्यो योनयः।

सम्प्रति जन्मभाजां विभज्यन्ते कस्य का योनिर्भवतीत्याह—**तत्र** आसां मध्ये योनीनां **देवनारकाणामचित्ता योनिर्भवति**, शेषा व्युदस्यन्ते कस्य का योनिः देवानां प्रच्छदपटदेवदूष्यान्तरालं योनिस्तच्चाचेतनं, न जीवप्रदेशाधिष्ठितम्, नारकाणां तु वज्रमयनरककुड्येषु वातायनकल्पा योनयो भवन्त्यचेतनाः, **गर्भजानां मिश्राः** तिर्यञ्चो मनुष्याश्च गर्भजन्मभाजस्तेषां मिश्राः, प्रागचित्तायाः प्रस्तुतत्वात् सचित्ताचित्तेत्यर्थः। योषिद्योनिविचारः योषितां किल नाभेरधस्तात् सिराद्वयं पुष्पमालावैकक्ष्यकाकारमस्ति, तस्याधस्तादधोमुखसंस्थितकोशाकारा योनिस्तस्याश्च बहिश्शूतकलिकाकृतयो मांसमङ्कुर्यो जायन्ते, ताः किलासृक् स्फुटित्वा ऋतौ स्रवन्ति, तत्र केचिदसृजो लवाः कोशकाकारां योनिमनुप्रविश्य सन्तिष्ठन्ते, पश्चाच्छुक्रसम्मिश्राँस्तानाहारयन् जीवस्तत्रोत्पद्यते, तत्र ये योन्याऽऽत्मसात्कृतास्ते सचित्ताः कदाचिन्मिश्रा इति, ये तु न स्वरूपतामापादितास्तेऽचित्ताः,

---

१ 'तद्वा' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपरे वर्णयन्ति—असृक् सचेतनं शुक्रमचेतनमिति, अन्ये ब्रुवते—शुक्रशोणितमचित्तं योनिप्रदेशः सचित्त इत्यतो मिश्रा । **त्रिविधाऽन्येषामिति** । देवनारकगर्भव्युत्क्रान्तितिर्यङ्मनुष्यव्यतिरिक्तानां सम्मूर्च्छनजन्मनां तिर्यग्मनुष्याणामित्यर्थः । तेषामनियमेन कदाचित् सचित्ता कदाचिदचित्ता कदाचिन्मिश्रेति, यथा गोकृम्यादीनां सचित्ता, काष्ठघुणादीनामचित्ता, केषाञ्चित् पूर्वकृतक्षते समुद्भवतां मिश्रेति ॥ अधुना शीतादित्रिकं विभजते[1]—**गर्भजन्मनां देवानां च शीतोष्णा** गर्भव्युत्क्रान्तीनां तिर्यग्मनुष्याणां देवानां चोभयस्वभावा स्वभावादेव जायते, देवानां साधारणा सुखबहुलत्वात् क्षेत्रानुभावाच्च, तेजसः उष्णाऽत्यन्तप्रसिद्धैव । **त्रिविधाऽन्येषाम्** । अन्येषामिति गर्भव्युत्क्रान्तितिर्यग्मनुष्यदेवतेजोव्यतिरिक्तानां सम्मूर्च्छनजन्मतिर्यग्मनुष्यनारकाणाम्, सम्मूर्च्छनजतिर्यग्मनुष्याणां कस्यचिच्छीता कस्यचिदुष्णा कस्यचिदुभयस्वभावा, स्थानविशेषादिति, नारकाणामाद्ये पृथिवीत्रये प्रकृष्टोष्णा, चतुर्थ्यां क्वचिन्नरके शीता क्वचिदुष्णा तथा पञ्चम्याम् । कथं पुनर्भिन्नाधारोभयस्वभावा स्यात्? उच्यते—एकस्यां पृथिव्यामुभयमस्तीति न भिन्नाधारत्वम् ॥ ननु तत्रापि नारकभेदवर्तित्वादनुभयस्वभावत्वमेवेति ? उच्यते—चतुर्थपञ्चमपृथिवीनारकाणामुभयस्वभावेति सामान्याभिधानाददोषः । पाश्चात्ययोर्द्वयोः प्रकृष्टशीता, न त्वेषां साधारणाऽस्ति दुःखात्मकत्वात्, यद्यप्यविशेषेणोक्तं त्रिविधाऽन्येषामिति तथापि यथासम्भवमत्र विभागः । संवृतादित्रयविभागार्थमाह—**नारकैकेन्द्रियदेवानां संवृता** । नारकाणां पृथिव्यप्तेजोवायुवनस्पतीनां च सहदेवानां सङ्कुटा, प्रच्छन्नेत्यर्थः । नारकाणां वज्रमयनरककुड्यव्यवस्थितत्वात् सङ्कुटा सती प्रवर्धमानवपुषामतिदुःखा, देवानां पुनः (प्रच्छन्ना अपि) प्रच्छदपटदेवदूष्यान्तरालवर्तिनी समुच्छ्वसच्छरीरभाजां सोच्छ्वासत्वादेव न दुःखा, पृथिव्यादीनां केषांचित् कथञ्चिदवगन्तव्या । **गर्भजानां मिश्रा** गर्भव्युत्क्रान्तितिर्यग्मनुष्याणां संवृतविवृता सङ्कुटप्रकाशेत्यर्थः। **विवृताऽन्येषां** नारकैकेन्द्रियदेवगर्भव्युत्क्रान्तितिर्यङ्मनुष्यव्यतिरिक्तानां सम्मूर्च्छनजद्वीन्द्रियादितिर्यङ्मनुष्याणामित्यर्थः । तेषां विवृता, अतिप्रकाशत्वात् ॥ अथ कथं योनिलक्षाणामशीतिश्चतुरुत्तरा प्रतिजाति प्रतिपादिता प्रवचने ? । तद् यथा—पृथिव्यप्तेजोवायूनां प्रत्येकं सप्त सप्त योनिलक्षाः, प्रत्येकवनस्पतीनां दश, साधारणानां चतुर्दश, द्वित्रिचतुरिन्द्रियाणां प्रत्येकं द्वे द्वे लक्षे, शेषतिर्यङ्नारकदेवानां प्रत्येकं चतस्रश्चतस्रो लक्षाः, मनुष्याणां चतुर्दश, इह तु नव योनयः प्रतिबद्धाः सूत्रे तदेतदतिविप्रकृष्टमन्तरालमुपक्षिपति चेतः संशयदोलायामस्माकमतोऽत्राभिधीयतां समाधिः । अयमुच्यते—नव योनय इति सङ्ग्राहकमेतदासां परिसङ्ख्यानमवसेयम्, विस्तरः प्रतिजाति वक्तव्यः, पृथिवीकायस्य याऽभिहिता योनिः सैव स्वजातिभेदापेक्षया सप्तलक्षपरिमाणा भवति शर्करावालुकादिभेदा

नारकादिषु योनिविभागः

जीवयोनिसंख्या

---

१ 'विभज्यते' 'विभजन्ते' इति—ग—टी—पाठौ । २ धनुश्चिह्नितो भागः ग—पाठ एव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावत्यो जातयस्तावद्भेदा योनयोऽपि पृथिवीकायस्येत्यवगन्तव्यम्। न च मूलयोनिमतिवर्तन्ते ताः, किन्तु जातिभेदाद् भिद्यन्त इति, अतः सङ्ग्राहकम्, एवं शेषाणामपि वाच्यम्, स्वजातिभेदापेक्षमेतत् परिमाणमिति ॥ ३३ ॥

अत्राह—उक्तं त्रिविधं जन्म, तत्र न संविद्महे तस्य त्रिविधस्यापि जन्मनः के स्वामिन इति, तद्विभागप्रदर्शनायेदमुच्यते—

सूत्रम्—जराय्वण्डपोतजानां गर्भः ॥ २–३४ ॥

गर्भजजन्मवतां भेदाः

भा०—जरायुजानां मनुष्य-गो-महिष्यजाविकाश्व-खरोष्ट्र-मृग-चमर-वराह-गवय-सिंह-व्याघ्रर्क्ष-द्वीपि-श्व-शृगाल-मार्जारादीनाम्। अण्डजानां सर्प-गोधा-कृकलास-गृहकोकिलिका-मत्स्य-कूर्म-नक्र-शिशुमारादीनाम्। पक्षिणां च लोमपक्षाणां हंस-चाष-शुक-गृध्र-श्येन-पारापत-काक-मयूर-मण्डू-बक-बलाकादीनाम्। पोतजानां शल्लक-हस्ति-श्वाविल्लापक-शश-शारिका-नकुल-मूषिकादीनाम्, पक्षिणां च चर्मपक्षाणां जलूका-वल्गुलि-भारण्ड-पक्षिविरालादीनां गर्भो गर्भोज्जन्मेति ॥ ३४ ॥

टी०—जराय्वण्डपोतजानां गर्भः। अत्रायं जनिः प्रत्येकमभिसम्बध्यते, जरायुजानां अण्डजानां पोतजानामिति। जरायुनि जायन्ते स्म जरायुजाः-जरायुमध्यगताः, जरायुवेष्टिता इत्यर्थः। **जरायुजानां मनुष्य-गो-महिष्यादीनामिति** सुज्ञानं भाष्यम्। अण्डे जायन्ते स्माण्डजाः, तेषां **अण्डजानां सर्प-गोधादीनामिति** भाष्यं सुखावबोधमेव। अण्डजजातिभेदप्रदर्शनायेदं भाष्यम्। **पक्षिणां च लोमपक्षाणां हंस-चाषेत्यादि** प्रायो गतार्थम्। लोमप्रधानाः पक्षा येषां ते लोमपक्षाः, अपरे लोमपक्षिणामित्यधीयन्ते[1] न तु च मत्वर्थीयोऽतिदुर्लभः स्याद् वा ज्ञापकादेः कथञ्चित्, अथवा पक्षिण एव विशिष्यन्ते, लोमानुगता लोमप्रधाना वा पक्षिणो लोमपक्षिणस्तत्राद्यपक्षिशब्दः पक्षिसामान्यमावेदयति, इतरस्तु व्यवच्छिद्य विशेषेऽवस्थापयतीति। पोता एव जाता इति पोतजाः शुद्धप्रसवा न जराय्वादिना वेष्टिता इतियावत्। अत्र च "अन्येष्वपि दृश्यन्ते" इति वचनाङ्ग[2]ः, अपरे त्वेतच्छब्दव्युत्पत्तिभीत्या जराय्वण्डजपोतानां गर्भ इत्यँभिधीयते—सूत्रमाहितनैपुण्यास्तत् सर्वथा त एवावयन्ति सूरिविरचितन्यासमन्यथाकर्तुम्, वयं तु प्रकृतानुसरणमेव कुर्मः। **पोतजानां शल्लकादीनामित्यादि** भाष्यमतिस्फुटत्वान्न विव्रियते। **पक्षिणां च चर्मपक्षाणामित्यादि**। अत्रापि पूर्ववद् व्याख्या कार्या, शेषमतिस्पष्टमेव। **गर्भो जन्मेति** उक्तलक्षणमेषां प्राणिनामशेषाणां गर्भो जन्म भवतीति ॥ ३४ ॥

---

१ 'मद्ध्र' इति घ–पाठः। २ 'गर्भो जन्मेति' इति घ–पाठः। ३ 'अत्र च' 'तत्तु च' इति पाठौ विचारणीयौ। ४ 'अभिदधते' इति प्रतिभाति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथेदानीमुपपातजन्मविभक्तये सूत्रमाह—

सूत्रम्—नारकदेवानामुपपातः ॥ २–३५ ॥

उपपातजानां भेदाः

भा०—नारकाणां देवानां चोपपातो जन्मेति ॥ ३५ ॥

टी०—नारकदेवानामिति गत्यपेक्षः क्रमव्यपदेशः । अपरे अभिदधते अभ्यर्हितत्वादल्पाच्तरत्वाच्च, यदादावाचार्येण देवा न न्यस्तास्तज्ज्ञापयति जन्मनो दुःखहेतुत्वं तच्च प्रकृष्टं किल नारकेष्विति तेषां नारकाणां देवानां च उक्तलक्षण **उपपातो जन्म** भवति ॥ ३५ ॥

अधुना सम्मूर्च्छनजन्मविभक्तुकाम आह—

सूत्रम्—शेषाणां सम्मूर्च्छनम् ॥ २–३६ ॥

भा०—जराय्वण्डपोतजनारकदेवेभ्यः शेषाणां सम्मूर्च्छनं जन्म । उभयावधारणं चात्र भवति । जराय्वादीनामेव गर्भः, गर्भ एव जराय्वादीनाम् । नारकदेवानामेवोपपातः, उपपात एव नारकदेवानाम् । शेषाणामेव सम्मूर्च्छनम्, सम्मूर्च्छनमेव शेषाणाम् ॥ ३६ ॥

संमूर्च्छनजा जीवाः

टी०—शेषाणां सम्मूर्च्छनम् । उक्तव्यतिरिक्ताः शेषाः, के पुनरभिहिता जराय्वण्डपोतजनारकदेवा एभ्यः शेषाणां जीवानां पृथिवीजलानलानिलतरुद्वित्रिचतुरिन्द्रियगर्भव्युत्क्रान्तिपञ्चेन्द्रियतिर्यङ्मनुष्याणां सम्मूर्च्छनं जन्माभिहितलक्षणं भवति । शेषग्रहणं लाघवार्थमानन्त्यख्यापनार्थं च जन्मभाजां सूरिणाऽकारि । अथवा सामर्थ्यलभ्यं जन्म शेषाणामतः शेषमर्थाद् भविष्यति तस्मादुभयोर्नियमप्रतिपादनायेदं शेषग्रहणमाश्रीयते । योगत्रयमपि चैतज्जन्मवतां जन्मसङ्करनिवारणार्थमाचार्येण प्राणायीति, अतस्तन्निवारणार्थं परस्परावधारणदिदर्शयिषयाऽऽख्याति–**उभयावधारणं चात्र भवति जराय्वादीनामेव गर्भः, गर्भ एव जराय्वादीनाम्**[1] जराय्वादयो गर्भश्च एतदुभयमस्यावधारणमवच्छेदो भवति । चशब्द एवशब्दार्थे । उभयावधारणमेव नान्यतरावधारणमनवधारणं वा । प्रथमोपन्यासेन गर्भोऽवधार्यते जराय्वादयोऽनवधृतास्तेऽनु पाश्चात्योपन्यासेऽवच्छिद्यन्ते–**गर्भ एव जराय्वादीनामिति** । गर्भो जराय्वादीन् न जहाति, जराय्वादयोऽपि गर्भं न त्यजन्तीति समुदायार्थः । एवमितरत्रापि योगद्वये वाच्यमवहितमानसेन । किं पुनः कारणं येनान्तराले योनिसूत्रमधीतं, न जन्मसूत्रानन्तरमेव जन्मविभागः कृत इति ? । उच्यते–जन्मनो योनेश्च यकत्तकद्वान्तरमित्यस्यार्थस्य ज्ञापनाय जन्मसूत्रानन्तरमेव योनिसूत्रोपन्यास इति ॥ ३६ ॥

अत्राह—तेषु जन्मसु यथोक्तयोनीनां जीवानां कानि शरीराणि कियन्ति वा किंलक्षणानि वा भवन्तीति ? । अत्रोच्यते—

---

१ 'जरायुजादीनाम्' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रम्—औदारिकवैक्रियाहारकतैजसकार्मणानि शरीराणि ॥२–३७॥

टी०—अत्र केचित् सूत्रावयवमवच्छिद्य शरीराणीति पृथक् सूत्रं कल्पयन्ति, अधिकारार्थमतिबहुवाच्यमेतच्छरीरप्रकरणमतोऽधिकार इति, अत्रोच्यते–गौरवमात्रमपास्यैवमवच्छिन्दानैः सूत्रमन्यन्न किञ्चिदाप्तं स्यात् सूत्रपर्यन्ते हि वर्तमानं शरीरग्रहणं नाधिक्रियते पृथगुपन्यस्तमादावधिकाराय जायत इति काऽत्र युक्तिस्तैराश्रयणीया शरणायेति ।

सूत्र-विचारः

भा०—**औदारिकं, वैक्रियं, आहारकं, तैजसं, कार्मणमित्येतानि पञ्च शरीराणि संसारिणां जीवानां भवन्ति ॥ ३७ ॥**

शरीरभेदाः

टी०—**औदारिकं वैक्रियमित्यादि** । तत्रोदारं बृहदसारं यद् द्रव्यं तन्निर्वृत्तमौदारिकमसारस्थूलद्रव्यवर्गणासमारब्धमौदारिकप्रायोग्यपुद्गलग्रहणकारणपुद्गलविपाक्यौदारिकशरीरनामकर्मोदयनिष्पन्नम् । एवमितरशरीरेष्वपि वैक्रियादिशब्दप्रक्षेपादेष दण्डको वाच्यः । विक्रिया विकारो बहुरूपतानेककरणं तया निर्वृत्तमनेकाद्भुताश्रयं विविधगुणर्द्धिसम्प्रयुक्तपुद्गलवर्गणाप्रारब्धं वैक्रियम् । शुभतरशुक्लविशुद्धद्रव्यवर्गणाप्रारब्धं प्रतिविशिष्टप्रयोजनायाहियतेऽन्तर्मुहूर्तस्थित्याहारकम्, कृल्ल्युटो बहुलवचनात् । तेज इत्यग्निः, तेजोगुणोपेतद्रव्यवर्गणासमारब्धं तेजोविकारस्तेज एव वा तैजसमुष्णगुणं शापानुग्रहसामर्थ्याविर्भावनं तदेव यदोत्तरगुणप्रत्यया लब्धिरुत्पन्ना भवति तदा परं प्रति दाहाय विसृजति रोषविषाध्मातमानसो गोशालादिवत्, प्रसन्नस्तु शीततेजसाऽनुगृह्णाति । यस्य पुनरुत्तरगुणलब्धिरसती तस्य सततमभ्यवहृताहारमेव पाचयति, यच्च तत् पाचनशक्तियुक्तं तत् तैजसमवसेयम् । कर्मणा निर्वृत्तं कार्मणम्, अशेषकर्मराशेराधारभूतं कुण्डवद् बदरादीनामशेषकर्मप्रसवसमर्थं वा यथा बीजमङ्कुरादीनाम्, एषा च किलोत्तरप्रकृतिः शरीरनामकर्मणः पृथगेव कर्माष्टकात् समुदायभूतादित्यतः कर्मैव कार्मणम् । परे नेच्छन्ति स्वार्थप्रत्ययमुपपत्तीश्चाभिदधते, न किल कर्मण्येव कार्मणं ज्ञानावरणादीनां तदाश्रयत्वाच्चक्षुरादिवज्ज्ञानावरणादीनां तदाश्रयभूतकार्मणमाश्रयत्वेन व्यवतिष्ठमानं कथं ज्ञानावरणादिमात्रमेव स्याद्, यथा चक्षुरादीनामौदारिकशरीरमाश्रयकारणमन्यदन्यानि चेन्द्रियाणि तथा कार्मणमपि कर्मभ्योऽन्यद्, यदि च तन्न स्यात् कुण्डभेदाद् बदराणामिवेतस्ततः पतनं स्यात् कर्मणामनिष्टं चैतत्, तस्माद् यदेषामाश्रयकारणं तत् कार्मणं शरीरमिति। उत्पत्तिकारणभेदाच्च पृथक् कर्मभ्यः कार्मणम्, बन्धननामकर्मप्रत्ययं प्रद्वेषादिनिमित्तं च कर्मोत्पद्यत इत्याप्तोपदेशः, शरीराणां तु स्वशरीरनामकर्मोदयादुत्पत्तिरतोऽन्यत्वम्, पाकभेदाच्चान्यत् ज्ञानावरणादि कर्म पच्यमानं मूढताद्युत्पादयति, कार्मणशरीरकारणपाकस्तु कार्मणमेव शरीरमारभते, तस्मादन्यत् पूर्वोत्तरकालं बन्धाविनिवृत्तेश्चान्यत्वं मोहज्ञानावरणादिवत्, अनिवृत्तिस्थाने हि विनिवर्तते बन्धः कार्मणस्य,

औदारिकादिशरीराणां व्युत्पत्तिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्मणस्तु सह तेन पूर्वमुत्तरत्र च यथापूर्वं मोहक्षयः पश्चाज्ज्ञानावरणक्षय इति, तदेतत् सर्वमुपपत्तिजालमनैकान्तिकम्, अभिन्नकर्मस्वपि दर्शनात्। अन्यच्च ज्ञानावरणादिकर्माष्टकात् पृथक् कल्प्यमाने कार्मणे नवमकर्मप्रसङ्गः, कार्यकारणवादाभ्युपगमे वा कर्मकार्मणयोः स्यात् अन्यत्वं स्यात् अनन्यत्वमभ्युपेयमन्यथा वा त एव दीर्घायुषोऽवगच्छन्ति येऽत्रान्यत्वमेकान्तेनाभिनिविशन्त इति। वयं तु ब्रूमः—कर्मभिर्निष्पन्नं कर्मसु भवं कर्मसु जातं कर्मैव वा कार्मणमिति न कश्चिद् दोषः प्रक्रियायामाहितनैपुणस्येति॥ अथैषामौदारिकादीनां किं सर्वपुद्गलद्रव्याण्येव ग्रहणप्रायोग्यानि, आहोस्वित् कानिचिदेवेति?। उच्यते—न खलु सर्वाणि, किन्तु द्रव्यवर्गणाप्ररूपणक्रमेण कानिचिदेव योग्यानि भवन्ति, तद्यथा—परमाणूनामेका वर्गणा-वर्गो-राशिरिति पर्यायाः। द्विप्रदेशानामपि स्कन्धानामेका वर्गणा, एवमेकपरमाणुवृद्ध्या सङ्ख्येयप्रदेशस्कन्धानां सङ्ख्येयवर्गणाः, असङ्ख्येयप्रदेशस्कन्धानामसङ्ख्येयाः, ततोऽनन्तप्रदेशस्कन्धानामनन्ता वर्गणाः, स्वल्पपुद्गलप्रयोगत्वादयोग्याः समुल्लङ्घ्या अनन्ता एवौदारिकशरीरयोग्या वर्गणा भवन्ति, पुनस्तस्यैवाग्रहणयोग्यास्ततोऽनन्ताः अतिबहुपुद्गलात्मकत्वात्, एवमेकैकपुद्गलप्रक्षेपपरिवृद्ध्या वैक्रियाहारकतैजसभाषाप्राणापानमनःकार्मणानामेकैकस्या योग्या योग्या अयोग्याश्चेति द्रव्यवर्गणात्रयमाभावनीयम्, आद्या च अल्पत्वादयोग्या, अन्त्या तु बहुत्वात्, मध्यमा तदनुरूपत्वाद् योग्येति सर्वत्र वासनाऽऽधेया। भाषाप्राणापानमनोग्रहणमत्राप्रस्तुतमपि कार्मणशरीरयोग्यवर्गणाप्रदर्शनार्थमध्यवसातव्यम्। एवं तावत् प्रतिविशिष्टपुद्गलद्रव्यनिर्मापितान्यौदारिकादीनि निश्चितम्॥ अथेदानीमिदं भाष्यमनुस्रियते—**इत्येतानि पञ्च शरीराणि संसारिणां जीवानां भवन्ति**, एवमेतानि पञ्चैवान्यूनानधिकानि शरीराणीति, शीर्यन्त इति शरीराणीति जीर्यमाणत्वाच्चयापचयवत्त्वाच्च विशरारुताभाञ्ज्येतानि गतिचतुष्टयवर्तिनामेव प्राणिनां यथा सम्भवन्ति, न सिद्धानामिति सामर्थ्याद् व्युदासः। निर्ज्ञातस्य संज्ञिनः संज्ञेत्यतो न लघ्वपि शरीरग्रहणमादावुपन्यस्तं विशरारुत्वाच्छरीराणि इत्यन्वर्थसंज्ञासिद्ध्यर्थं न कायग्रहणमाश्रितं लघीयोऽपि। आदावौदारिकं स्थूलाल्पप्रदेशबहुस्वामित्वात्, ततो वैक्रियं पूर्वस्वामिसाधर्म्यात्, ततोऽप्याहारकं लब्धिसाधर्म्यात्, ततस्तैजसं सूक्ष्मासङ्ख्येयस्कन्धात्मकत्वात्, ततः कार्मणं सर्वकारणाश्रयसूक्ष्मानन्तप्रदेशत्वादिति॥ ३७॥

अत्राह—कथं पुनरयं विशेषो निश्चीयते औदारिकादीनामिति? उच्यते—न्यायाद् वचनाच्च। न्याय उक्तः, वचनं त्विदं यथाक्रमं तेषां पूर्वस्मात्।

सूत्रम्—परं परं सूक्ष्मम्॥ २—३८॥

टी०—तेषामित्यनेन भाष्यकारः सूत्रसम्बन्धमावेदयति—

शरीराणां परस्परं महत्त्वाल्पत्वे

भा०—**तेषामौदारिकादीनां[1] शरीराणां परं परं सूक्ष्मं वेदितव्यम्। तद्यथा—औदारिकाद् वैक्रियं सूक्ष्मम्, वैक्रियादाहारकम्, आहारकात् तैजसम्, तैजसात् कार्मणमिति॥ ३८॥**

१ 'ोकादिशरी०' इति घ-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—**तेषाम्**, अनन्तरसूत्रोपदिष्टानामौदारिकादीनां **शरीराणां परं परं सूक्ष्मं वेदितव्यम्**। निर्ज्ञातत्वादादिशब्दप्रयोगः, औदारिकादीनामन्यार्थवाचित्वमपि सम्भवतीति, अतो विशेषणं *शरीराणामिति*। *विशरणशीलत्वाच्छरीराणि*। ***परं परमिति*** *वीप्सया व्याप्तिं* दर्शयति, पूर्वं पूर्वमपेक्ष्य औदारिकादीनां परं परं **सूक्ष्मं** सूक्ष्मगुणं द्रव्यं सूक्ष्मं तद् यत्रास्ति तत् सूक्ष्मम्, अर्शआदिपाठाच्छरीरम्, अतोऽयमर्थः सूक्ष्मपरिणामपुद्गलद्रव्यारब्धं **वेदितव्यम्**—अवसेयम्। एतेन प्रामाण्याधिकृतं चोद्यमपास्तं भवति, सूक्ष्मत्वादेव च प्रायो वैक्रियादिचतुष्कस्य दर्शनमनुपपन्नम्, इह परिणतिविशेषमङ्गीकृत्य पुद्गलाः केचिदतिस्थूलतया वर्तन्तेऽल्पेऽपि सन्तो भेण्डकाष्ठादिषु, केचिन्निचिततरपरिणामभाजोऽतिभूयांसोऽपि सूक्ष्मावस्थामासादयन्ति करिदशनादिषु, प्रसिद्धं चैतत् प्रायस्तुलामारोपिते भेण्डदन्तखण्डे प्रमाणतः सदृशे परिणामागतामेतिविप्रकृष्टां[2] धियमाधत्ते इति, तदेतत् परिशिथिलां परिणतिमनपेक्ष्य निचिततरां पुद्गलानामन्यथा लाघवं गौरवं वा प्रतिपत्तुमशक्यं तुल्यप्रमाणत्वे सति, अतः पूर्वपूर्वमुत्तरोत्तरापेक्षया शरीरं परिस्थूरद्रव्यारब्धमतिशिथिलनिचयमदभ्रं च भवत्युत्तरं सूक्ष्मं प्रत्यारब्धमतिघननिचयमणु च भवतीति पुद्गलद्रव्यपरिणतेर्वैचित्र्यात्। अमुमेवार्थं भाष्यकारः प्रकाशयन्नाह—**तद्यथा**—**औदारिकादित्यादि**। तदेतद् यथा स्पष्टतरं भवति तथा वेद्यते—**औदारिकाच्छरीराद् वैक्रियं सूक्ष्मम्**, औदारिकमल्पद्रव्यं स्थूलं शिथिलनिचयम्, वैक्रियं बहुतरद्रव्यं सूक्ष्मघननिचयं चेति, अतः सूक्ष्ममुच्यते॥ ननु चौदारिकं योजनसहस्रप्रमाणमुत्कर्षात् वैक्रियं तु योजनलक्षप्रमाणम्, अतः कथं सूक्ष्ममिति?। उच्यते—यद्यपि प्रमाणतस्तदतिमहद् वैक्रियं तथापि सूक्ष्ममेवादृश्यत्वात् इच्छया तु तत्कर्तुर्दृश्यत इत्यतो नो दोषः, तथा **वैक्रियादाहारकं** सूक्ष्ममित्यभिसम्बन्धः, सूक्ष्मतरपरिणामपरिणतं बहुतरपुद्गलद्रव्यारब्धमाहारकम्, **आहारकात् तैजसं** बहुतरद्रव्यमतिसूक्ष्मपरिणामपरिणतं च, **तैजसात् कार्मणमतिबहुकद्रव्यप्रचितमतिसूक्ष्मं** च भवति, अतः सूक्ष्मताऽऽपेक्षिकी प्रतिपत्तव्या, न सूक्ष्मनामकर्मोदयजनितेति॥ ३८॥

शरीराणां सूक्ष्मतादर्शनम्

एवं तावत् कारणानां सूक्ष्मात् परं परं सूक्ष्ममभिहितमतिबहुपुद्गलद्रव्यारब्धमपि प्रचयविशेषात् तत् कथमुत्तरोत्तरेषु बहुतरद्रव्यारब्धमिति? अत आह—

सूत्रम्—प्रदेशतोऽसङ्ख्येयगुणं प्राक् तैजसात्॥ २—३९॥

भा०—तेषां शरीराणां परं परमेव प्रदेशतोऽसङ्ख्येयगुणं भवति प्राक् तैजसात्, औदारिकशरीरप्रदेशेभ्यो वैक्रियशरीरप्रदेशा असङ्ख्येयगुणाः, वैक्रियशरीरप्रदेशेभ्य आहारकशरीरप्रदेशा असङ्ख्येयगुणा इति॥ ३९॥

प्रदेशापेक्षया शरीरतारतम्यम्

---

१ 'परिमाणतां' इति ग-पाठः। २ 'मविप्रकृष्टां' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—तेषां शरीराणामित्यादि भाष्यम्। तेषामित्यौदारिकादीनामनन्तरसूत्रात् परं परमित्येतदनुवर्तते, अभिसम्बध्नाति भाष्यकारः **परं परमेव,** एवशब्दस्तमेव क्रमनियममवद्योतयति परं परमित्यमुमेव क्रममङ्गीकृत्यासङ्ख्येयगुणता विधीयते नान्यथेति। **प्रदेशत इति।** प्रवृद्धो देशः प्रदेशः, अनन्ताणुकस्कन्धः प्रदेशोऽत्राभिधीयते, एवंविधैः प्रदेशैः प्रदेशतः "इतरेभ्योऽपि दृश्यन्ते" इति वचनात् **असङ्ख्येयगुणं भवति।** एतदुक्तं भवति—औदारिकशरीरग्रहणयोग्यो यः स्कन्धोऽनन्तप्रदेश एकः स यदाऽन्यैरनन्ताणुकैः स्कन्धैरसङ्ख्येयैर्गुणितो भवति तदा वैक्रियग्रहणयोग्यो जायते, एवं वैक्रियग्रहणयोग्योऽनन्तप्रदेशस्कन्धः, एको यदाऽन्यैरनन्ताणुकस्कन्धैरसङ्ख्येयैरभ्यस्तो भवति तदाऽऽहारकग्रहणयोग्यतामेति। **प्राक् तैजसादिति** मर्यादां दर्शयति, न खलु सर्वेष्वयं क्रमो ग्राह्यः, किन्तु तैजसकार्मणे विहायाद्येषु त्रिषु शरीरेष्वेतद् विधानम्। अमुमेवार्थं स्पष्टतरमाचष्टे भाष्येणामुना—**औदारिकशरीरप्रदेशेभ्यो वैक्रियप्रदेशा असङ्ख्येयगुणाः,** औदारिकशरीरयोग्यस्कन्धोऽनन्ताणुकोऽपि सर्वस्तोकः, उत्तरस्कन्धापेक्षयाऽनन्तसङ्ख्यायाश्चानन्तभेदत्वात्, अत एक औदारिकयोग्यः स्कन्धो यदाऽन्यैरनन्तप्रदेशस्कन्धैरसङ्ख्येयैर्गुणितो भवति तदा वैक्रिययोग्य इति पिण्डार्थः। औदारिकशरीरे प्रदेशाः औदारिकशरीरप्रदेशाः अनन्ताणुकाः स्कन्धा इत्यर्थः। न पुनः प्रदेशाः परमाणवो गृह्यन्तेऽर्थासम्भवात्, वैक्रियशरीरप्रायोग्याः प्रदेशाः स्कन्धा जायन्ते असङ्ख्येयैरनन्तपरमाणुप्रचितस्कन्धैरन्यैर्गुणिताः, औदारिकयोग्या ये स्कन्धास्तेऽत्र गुण्यतया विवक्षिताः। बहुवचनमौदारिकशरीरयोग्यस्कन्धबहुत्वापेक्षं वैक्रियस्कन्धबहुत्वापेक्षं चेति। तथा **वैक्रियशरीरप्रदेशेभ्य आहारकशरीरप्रदेशा असङ्ख्येयगुणा इति,** वैक्रियशरीरयोग्यस्कन्धेभ्यः आहारकशरीरयोग्याः स्कन्धा अनन्ताणुभिरसङ्ख्येयैः स्कन्धैर्गुणिता भवन्ति वैक्रिययोग्याः स्कन्धाः, प्रत्येकमनन्तप्रदेशैरसङ्ख्येयैः स्कन्धैरभ्यस्ताः सन्त आहारकयोग्या जायन्त इति, बहुवचनमत्राप्युभययोग्यस्कन्धबहुत्वापेक्षमिति ॥ ३९ ॥

अत्राह—प्राक् तैजसादित्युक्तम्। अथ कः पुनस्तैजसकार्मणयोः स्कन्धप्रदेशनियम इति?। अत्रोच्यते—

सूत्रम्—अनन्तगुणे परे ॥ २—४० ॥

भा०—परे द्वे शरीरे—तैजसकार्मणे पूर्वतः पूर्वतः प्रदेशार्थतयाऽनन्तगुणे भवतः। आहारकात् तैजसं प्रदेशतोऽनन्तगुणम्। तैजसात् कार्मणमनन्तगुणमिति ॥ ४० ॥

तैजसकार्मणयोः प्रदेशमानम्

टी०—परे द्वे शरीरे इत्यादि भाष्यम्। परे इत्युक्तेऽपि द्विशब्दोपादानं सप्तम्याशङ्काव्यावृत्त्यर्थम्, द्वित्वमन्यथाऽपि सम्भवतीति प्रतिविशिष्टद्वयप्रदर्शनार्थमाह-**तैजसकार्मणे इति।** पूर्वस्मात् पूर्वतः वीप्सया व्याप्तिमादर्शयति—**प्रदेशार्थतयेति।** अनन्ताणुस्कन्धार्थ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वेनानन्तगुणे भवतः। एतदेव स्फुटीकरोति—**आहारकात् तैजसं प्रदेशतोऽनन्तगुणम्**, आहारकशरीरयोग्यस्कन्धोऽनन्ताणुकोऽन्यैरनन्तपरमाणुप्रचितस्कन्धैरनन्तैर्गुणितस्तैजसशरीरग्रहणयोग्यो भवति। **प्रदेश** इति प्रदेशैरनन्ताणुकैरनन्तैः **अनन्तगुणमिति** च फलमेव निर्दिष्टमाचार्येण, अनन्तो गुणबहुत्वं यस्य तदनन्तगुणम्, अस्माच्च फलनिर्देशात् ज्ञायतेऽनन्तैः स्कन्धैर्गुणितं सदनन्तगुणं भवति, अन्यथा प्रदेशैरनन्तैरिति दुर्लभं स्यात्। एवमसङ्ख्येयगुणमपि वाच्यम्, तथा **तैजसात् कार्मणमनन्तगुणमिति** तैजसशरीरयोग्यः स्कन्धोऽन्यैरनन्ताणुकैः स्कन्धैर्गुणितः कार्मणशरीरयोग्यो भवति ॥ ननु चार्थे तैजसं कार्मणं चान्तरा भाषाप्राणापानमनोयोग्यवर्गणा निर्दिष्टास्ततः क्रमवृद्धः स्कन्धराशिर्मनोग्रहयोग्यकार्मणस्य निर्दिष्टः, इह तु तैजसादनन्तरमेवेत्येतत् कथम् ? उच्यते—न कश्चिद् विशेषः तैजसादारभ्य यावन्मनस्तावत् क्रमवृद्ध्यान्तरालेऽनन्ता एव स्कन्धा भवन्ति, पुनस्तत्राप्येकाणुकादिप्रक्षेपादनन्ताः कार्मणयोग्यास्तदेवानन्तगुणत्वम्, इह तु पुनर्न स क्रम आश्रितः, किन्त्वनन्तस्कन्धगुणः स राशिः कार्मणयोग्य आख्यात इति, अतः स एवायं मषीम्रक्षितकुर्कुटाभोऽर्थार्पणविशेषो मा विप्रतिपत्थास्त्वमिति ॥ ४० ॥

अयं चान्यो विशेषोऽन्यशरीरेभ्यस्तयोर्यदुत—

सूत्रम्—अप्रतिघाते ॥ २—४१ ॥

भा०—एते द्वे शरीरे-तैजसकार्मणे अन्यत्र लोकान्तात् सर्वत्राप्रतिघाते भवतः ॥ ४१ ॥

टी०—एते द्वे शरीरे इत्यादि भाष्यम्। एते अनन्तरसूत्रप्रस्तुते प्रत्यक्षासन्ने, द्विशब्दोपादानमत्र प्रथमाबहुवचनाशङ्काव्यावृत्त्यर्थम्। विशरणधर्मत्वाच्छरीरे द्वित्वं विशेषप्रतिपत्त्यर्थम्। **तैजसकार्मणे** जीवाजीवाधारक्षेत्रं-लोकस्तस्यान्तोऽवसायस्तस्माल्लोकान्तादन्यत्र लोकान्ते हि प्रतिहन्येते, ते गतिस्थितिहेतुधर्माधर्मद्रव्याभावात् तदुपग्रहाद् हि जीवानां पुद्गलानां च गतिरुपजायते जलचराणामिव जलद्रव्यापेक्षे[1], अन्यत्र तु सर्वस्मिन् लोके न तयोः प्रतिघातः क्वचन विद्यते मूर्तत्वेऽपि हि तयोरतिसूक्ष्मत्वात् सर्ववर्त्मसु गतेः प्रतिघातासम्भवः सदाचारमुनिवत्, ते अपि न किञ्चित् प्रतिहतस्नेहगिरिजलधिवलयद्वीपपातालनरकविमानप्रस्तरानपि भिन्दती जातेऽक्षतस्वरूपे वज्रवन्न जातुचित् कुण्ठतामश्नुवाते। न खलु लोहपिण्डमाविशन्तस्तेजोऽवयवाः परिस्फुरन्मूर्तयोऽपि कयाचिदुपपत्त्या निवारयितुं पार्यन्ते तद्विध्मापनायाम्भोवयवाश्च समाहताः, सूक्ष्मत्वादेवमेव च शरीरके राजवल्लभपुरुषवत् सर्वत्राव्याहतप्रवेशनिर्गमे प्रतिपत्तव्ये इति ॥ ४१ ॥

तैजसकार्मणयोरप्रतिघातिता

---

१ 'पेक्षेत्यन्यत्र' इति कँ-खं-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न च ताभ्यां कदाचित् संसारी विरहित इत्यावेदयन्नाह—

सूत्रम्—अनादिसम्बन्धे च ॥ २–४२ ॥

तैजसकार्मणयोरनादिः सम्बन्धः

भा०—ताभ्यां तैजसकार्मणाभ्यामनादिः[1] सम्बन्ध इति ॥ ४२ ॥

टी०—अनादिसम्बन्धे च। आदिः—प्राथम्यम्, अविद्यमान आदिर्यस्यासावनादिः, सम्बन्धनं—सम्बन्धः, संयोग इत्यर्थः, अनादिः सम्बन्धो ययोः परस्परेण संसारिभिश्च सह ते अनादिसम्बन्धे शरीरके भवतः सुवर्णधातुपाषाणसंयोगवदाकाशपृथिव्यादिसंयोगवद् वा। चशब्दः सम्बन्धविकल्पार्थः, नैकान्तत एवानादिः सम्बन्धः, किन्तु द्रव्यास्तिकनयावष्टम्भेन तयोरतिदीर्घकालप्रवाहादविच्छेदवर्ती सकलभविष्यदवस्थान्तरबीजभूतो विचित्रपरिणामशक्तिप्रचितपुद्गलद्रव्यैराधीयमानप्रचयापचयोऽनादिकपुरुषप्रयत्ननिर्वर्त्यनानारूपकर्मविकाराविच्छेदः सन्तानविशेषस्तदङ्गीकरणेनायमनादिः सम्बन्धः प्रतीयते। आदिमांश्च पर्यायनयवक्तव्यताभ्यन्तरीकृतत्वात्। क्रियत इति कर्म मिथ्यादर्शनाविरतिप्रमादकषाययोगबन्धहेतुसद्भावात् तीव्रमन्दाद्युपपत्तेश्च। प्रतिक्षणमयमुपचीयते पुरुषः कषाययोगाद्यास्रवद्वारवर्ती दृढतरैः कर्मणा यैस्तत् कथमनादिः सम्बन्धो निरूपयितुं शक्येतातिसाहसिकैरपि, ज्ञानावरणादिकर्मणां च स्थितिकालनियमादवश्यमपूर्वकर्मोपादेयम्, तच्चादिमत्सम्बन्धमेवावधूतशङ्कं प्रतिपद्यध्वम्, अतश्चशब्दो द्रव्यपर्यायास्तिकनयद्वयान्तर्वर्तितामापादयति सम्बन्धस्य ॥

अधुना भाष्यानुसृतौ यत्न आस्थीयते—ताभ्यामित्यादि भाष्यम्। ताभ्यामुक्तलक्षणाभ्यां तैजसकार्मणशरीरकाभ्यामनादिरकृतकः सन्तत्याऽङ्गीकरणेन संयोगोऽनादेरकृतकस्य जीवस्येति, नहि जीवः केनचिदुत्पादितश्चैतन्यात्मनेति श्रुतिपथमागमद् वचो यो वा मन्येत कृतकमात्मानमुपयोगलक्षणमनादिपारिणामिकभाववर्तिनमपत्रपस्तस्यापि वचनमयुक्तिकमसङ्गतपूर्वापरमिति विद्वद्भिरुपकर्ण्यम्[2], अतोऽनादिस्तदनादित्वात् तैजसकार्मणे अप्यनादिसम्बन्धे विद्वांसः प्रमातुमर्हन्ति, अन्यथा परित्यक्तसकलशरीरकलङ्कस्य मुक्तस्येव केन हेतुना संसारिता स्यादिति ? ॥ ४२ ॥

अथैते अनादिसम्बन्धे अपि सति किमशेषसंसारिण एव स्त आहोस्वित् कस्यचिदेवेति ? । अत आह—

सूत्रम्—सर्वस्य ॥ २–४३ ॥

सर्वसंसारिणां तैजसकार्मणवत्ता

भा०—सर्वस्य चैते तैजसकार्मणे शरीरे संसारिणो जीवस्य भवतः। एके त्वाचार्या नयवादापेक्षं व्याचक्षते। कार्मणमेवैकमनादिसम्बन्धम्। तेनैवैकेन जीवस्यानादिः सम्बन्धो भवतीति। तैजसं तु लब्ध्यपेक्षं भवति। सा च तैजसलब्धिर्न सर्वस्य, कस्य-

---

१ 'ोनादिसम्बन्धो जीवस्येत्यनादिसम्ब' इति घ–पाठः। २ 'रुपकर्ण्य' इति ख–पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिदेव भवति। कोपप्रसादनिमित्तौ शापानुग्रहौ प्रति तेजोनिसर्गशीतरश्मिनिसर्गकरम्, तथा भ्राजिष्णुप्रभासमुदयच्छायानिर्वर्तकं सशरीरेषु[1] मणिज्वलनज्योतिष्कविमानवदिति ॥ ४३ ॥

टी०—**सर्वस्य चैते** इत्यादि भाष्यम्। अशेषसर्वकर्माधाय चेतसि, अवोचत् सूरिः **सर्वस्येति**, चशब्देनावृत्तौ तैजसकार्मणे समाकर्षत्यनादिसम्बन्धापेक्षे, एवंरूपे एते शरीरके **संसारिणो जीवस्य** सकर्मकस्य जन्तोर्भवतः। सर्वस्यामवस्थायां न कश्चित् तादृशः प्राणी विद्यते यस्यैते दुःखपञ्जरप्रभवभववर्तिनो न स्त इति। एवं स्वाभिप्रायमुपवर्ण्याधुना मतान्तरमुपदर्शयन्नाह—**एके त्वाचार्या** इत्यादि। अन्ये पुनराचार्याः प्ररूपयन्ति—प्रतिविशिष्टनयवादालम्बनाः सन्तः **कार्मणमेवैकमनादिसम्बन्धमविच्छिन्नः** प्रवाहो यस्मात् कर्मणस्तस्मात् **तेनैवैकेन जीवस्यानादिः सम्बन्धो भवति** न पुनस्तैजसेनापि, तत्प्रवाहादर्शनात्। किं पुनर्नयवादमुररीकृत्य ते सूरयस्तैजसमपह्नुवते किमत्र वक्तव्यम् ॥ ननु सुज्ञानमेवेदम्, यो ह्यतीतानागतकालावधिकवस्तुविशेषव्युदासमातिष्ठते वर्तमानक्षणवर्त्येव वस्तु वस्तुतामावसतीत्येवमनुसन्धाय प्रवर्तते स खलु प्रकाशनामातिक्रान्तागामिचक्रपरिहारित्वाद् वर्तमानक्षणर्जुसूत्रणादृजुसूत्र इति प्रतीतस्तमपेक्षमाणाः प्रथयन्ति—**तैजसं तु लब्ध्यपेक्षं भवतीत्यादि**। तुशब्दोऽवधारकः तैजसं लब्ध्यपेक्षमेव **भवति**—सत्तामासादयति, सा **च तैजसलब्धिर्विशिष्टतपोनुष्ठानादिभिः** साधनैः कस्यचिदेव भवति **न सर्वस्य** जन्तोस्तत्साधनकलापविमुखस्य, स च तद्योग्यसाधनसमासादिततेजोलब्धिस्तेजोनिसर्गमातनोति, क्रोधावेशादरुणलोचनश्चलत्कपोलाधरपुटः कृशानुपुञ्ज इव दुष्प्रेक्ष्यः क्षमावनितया दुर्भग इवातिदूरमपास्तः शापप्रदानं प्रति कृताध्यवसायः स्फुलिङ्गमालाकुलमत्युष्णतेजः प्रयत्नविशेषात् तथा मुञ्चति **गोशालादिवद्** येन परस्तदैव भस्मसाद् भवति, तथा मनःप्रसादावेशादनुकम्पया वाऽनुग्राह्यपक्षं प्रति प्रल्हादकारिणममृतकल्पं तेजोविशेषमनुष्णदीधितिवद् विधूतसकलपरितापतिमिरराशिमनुग्रहप्रवणमानसं क्षिपति येनाशु सुखास्वादविनिमीलितलोचनोऽपूर्व इव जायते, यथा च भगवतैवोष्णलेश्यापरीताङ्गयष्टिगोशालकलिरनुगृहीतः शीततेजोनिसर्गेण, क्रोधप्रसादौ निमित्तं ययोः शापानुग्रहयोस्तौ **क्रोधप्रसादनिमित्तौ शापानुग्रहावभिमुखीकृत्य तेजोनिसर्गं करोति**। हतस्त्वं दग्धस्त्वमित्येवमादि क्रोधाविष्टवचनं शापः। कदाचिद् वा बाह्यनिमित्तापेक्षमन्तःकर्मापि परिणमते येनायं काणः कुण्ठः कुब्जो वा भवतीति सोऽपि शाप एवावगन्तव्यः। अतः क्रोधनिमित्तशापप्रदानाभिमुख उष्णतेजोनिसर्गं करोति। प्रसादनिमित्तानुग्रहाभिमुखः **शीतरश्मिनिसर्गकरो** भवति। शीता रश्मयो यस्य निसृज्यमानतेजोविशेषस्य स शीतरश्मिः, शीतरश्मिश्चासौ निसर्गश्च शीतरश्मिनिसर्गस्तत्करणशीलं

तैजसस्यानादितायां मतभेदः

---

१ 'तैजसं शरीरेषु' इति घ-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शीतरश्मिनिसर्गकरं तैजसम् । तथा भ्राजिष्णुप्रभेत्यादि । भ्राजनशीलो—भ्राजिष्णुः प्रभाणां समुदयस्तस्य छाया—आभा भ्राजिष्णुप्रभासमुदयच्छाया ॥ ननु च भ्राजिष्णुरेव भवति, किं हि तस्य विशेष्यते ? मलीमसत्वेनापि दर्शनात्, मलीमसप्रभो मणिरिति संव्यवहरन्ति लौकिकाः, तस्याः छाया(या) निर्वर्तकं उत्पादकं—तैजसं, शरीरेष्वौदारिकादिकेषु केषुचित् मणिज्वलनज्योतिष्कविमानवदिति । यथा हि मणयः स्फटिकाङ्कवैडूर्यादयो भ्राजिष्णुच्छाया विमलपुद्गलारब्धत्वात्, ज्वलनो वा निरस्तप्रत्यासन्नतिमिरव्रातः प्रद्योतते स्वतेजसा, ज्योतिष्कदेवानां वा चन्द्रादित्यादीनां विमानान्यतिभास्वराणि निर्मलद्रव्यारब्धत्वात्, तथा तैजसशरीरापेक्षमौदारिकादिषु शरीरेषु केषुचिदेव स्फुरन्मृजाजालमुपलभ्यते, न सर्वेषु, अन्यथा तद्भावात् । कया युक्त्या तत् तथा भवेत् ? एतच्च तेष्वेव शरीरेषु द्रष्टव्यं यानि लब्धेराधारतां प्रतिपद्यन्ते, अन्यथा ग्रन्थो न सङ्गच्छेत, तथा भ्राजिष्णुप्रभेत्यादि च, किं कारणं ? ये हि लब्धिप्रत्ययमेवेच्छन्ति तैजसं तेषां तावदन्यत्र लब्धेरभावान्न घटते, आचार्याभिप्रायोऽपि नायं, पराभिप्रायप्रस्तावात् । अपरे वर्णयन्ति—आचार्यमतमेवेदम्, अन्ये तु नित्यसम्बन्धमेव तत्कार्यमपि च भ्राजिष्णुप्रभेत्यादि, तदेतदयुक्तमव्याप्तेरिति ॥ अथ यानि शरीराणि लब्धिरहितानामपि मयूखजालमुद्वमन्ति दृश्यन्ते, तेषु कथम् ? । तत्र हि कार्मणौदारिकशक्तिरेव सा तादृगिति न तैजसस्य, यथा वैक्रियेष्वितिप्रत्याख्यानवादिन एवं वर्णयन्ति, तस्माद् यदधुनैव लब्ध्या समुद्भाव्यते तत् कथमनादिसम्बन्धं सर्वस्य वा जन्तोः स्यादाहारकवदप्राप्तलब्धेर्न तेन दाहादि किंचित् कार्यमनुष्ठातुं शक्यमनुपजातकुम्भेनेव जलाद्याहरणादि, प्रतिनिवृत्ततथाविधलब्धिरपि पुमान् तथा किंचित् कर्तुं समर्थो न भवति ध्वस्तघट इव तैलधारणादि, तस्मान्नास्ति तैजसं सर्वस्य जन्तोः, न चानादिसम्बन्धम्, इह च सूत्रे प्रेक्षापूर्वकारितयाऽऽचार्येणाक्षेपोऽकारि सूत्रद्वयमप्याक्षेप्स्यामीति, अन्यथा पूर्वसूत्र एवाक्षेपो युज्यते, एवमेकीयमतेन प्रत्याख्यातमेव तैजसमनादिसम्बन्धतया सर्वस्येति । या पुनरभ्यवहृताहारं प्रति पाचकशक्तिर्विनाऽपि लब्ध्या सा तु कार्मणस्यैव भविष्यति, कर्मोष्णत्वात्, कार्मणं हीदं शरीरमनेकशक्तिगर्भत्वादनुकरोति विश्वकर्मणः, तदेव हि तथा समासादितपरिणति व्यपदिश्यते यदि तैजसशरीरतया ततो न कश्चिद् दोष इति ॥ ४३ ॥

अथ किं यथैते सर्वस्यानादिसम्बन्धे युगपच्च किमेवमन्यान्यपि युगपदेकस्य भवन्त्युताहो न ? । अत्रोच्यते—सन्ति, न तु सर्वाणि । कियन्ति तर्हीति ? । अत आह—

सूत्रम्—तदादीनि भाज्यानि युगपदेकस्या चतुर्भ्यः ॥ २—४४ ॥

भा०—ते आदिर्[1]नी एषामिति तदादीनि । तैजसकार्मणे यावत् संसारभाविनी[2] आदिनी कृत्वा शेषाणि युगपदेकस्य जीवस्य भाज्यान्या चतुर्भ्यः ॥

---

१ ' आदिनौ ' इति घ-पाठः । २ ' ०विनौ आदिम् ' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—ते आदिनीत्यादि । प्रस्तुते तैजसकार्मणे तच्छब्देनाभिसम्बध्येते । ते आदिनी एषामौदारिकादीनां मेढीभूते व्यवस्थिते तानि तदादीनि समुदायसमासार्थः । एतदेव स्पष्टतरं करोति-तैजसकार्मणे यावत् संसारभाविनी आदिनी कृत्वा यावत् संसारं भवितुं शीलमनयोस्ते यावत्संसारभाविनी तैजसकार्मणे आदिनी कृत्वा मेढीभूततया व्यवस्थाप्य शेषाणि औदारिकादीनि एकस्मिन् काले एकस्य जीवस्य भाज्यानि-विकल्प्यानि, आ चतुर्भ्य इति यावच्चत्वारि युगपदेकजीवस्य भवन्त्यप्रत्याख्यानपक्षे । अथैकीयमतेन तैजसं प्रत्याख्यातं तदा त्रीणि युगपदेकस्य स्युः, आचार्यस्याभिप्रायः-कार्मणवत् तैजसं प्रायः सर्वदा सर्वस्यास्ति, यतस्ते आदिनी एषामिति विग्रहं कृतवान् । ये तु प्रत्याचक्षते तेषां विग्रहः-तत् आदि कार्मणमेषां तानि तदादीनि । उभयथा च भाष्यं भविष्यति, आचार्यस्य तु विग्रहगतौ कर्मकृत एव योगो भवति, न तु तैजसमित्यत्रैव लब्ध्यपेक्षत्वात् तत् किल नास्ति, तस्यामवस्थायामन्यत्र त्वाचार्यस्य तैजसं सर्वत्रास्ति । तामिदानीमात्माभिप्रायानुसारिणीं भजनां दर्शयन्नाह—

भा०—तद्यथा-तैजसकार्मणे वा स्याताम् । १ । तैजसकार्मणौदारिकाणि वा स्युः । २ । तैजसकार्मणवैक्रियाणि वा स्युः । ३ । तैजसकार्मणौदारिकवैक्रियाणि वा स्युः । ४ । तैजसकार्मणौदारिकाहारकाणि वा स्युः । ५ ॥ कार्मणमेव वा स्यात् । ६ । [कार्मणतैजसे वा स्याताम् । ७ ।] कार्मणौदारिके वा स्याताम् । ७ । कार्मणवैक्रिये वा स्याताम् । ८ । कार्मणौदारिकवैक्रियाणि वा स्युः । ९ । कार्मणौदारिकाहारकाणि वा स्युः । १० । कार्मणतैजसौदारिकवैक्रियाणि वा स्युः । ११ । कार्मणतैजसौदारिकाणि[1] वा स्युः । १२ । न तु कदाचिद् युगपत् पञ्च भवन्ति । नापि वैक्रियाहारके युगपद् भवतः । स्वामिविशेषादिति वक्ष्यते ॥ ४४ ॥

टी०—तद्यथेत्यादिना । अन्तर्गतौ तैजसकार्मणे केवले स्तः, इह तु तैजसमाश्रितमाचार्येण, विग्रहगताविवत्यत्र पराभिप्रायेण नाश्रितम्, भवस्थतायामेते च औदारिकं चेति त्रीणि युगपत् । अथवा एते च वैक्रियं चेति त्रीणि, तिर्यङ्मनुष्याणां तैजसकार्मणौदारिकैः सह लब्धिप्रत्ययवैक्रियशरीरसद्भावे युगपदविच्छिन्नप्रदेशत्वाच्चत्वारि, चतुर्दशपूर्वधरमनुष्यस्याहारकलब्धौ सत्यां तैजसकार्मणौदारिकैः सह युगपदेवं चत्वारि, पञ्चनालतन्तुवदेवाविच्छेदेनैकजीवप्रदेशैश्चतुष्टयमपि प्रतिबद्धमवसेयम् । एवमेतान् पञ्च विकल्पान् स्वमते प्रदर्श्याधुना एकीयमतमादर्शयितुमाह-कार्मणमेव वा स्यात्, न ह्यन्तर्गतौ लब्धिप्रत्ययं तैजसमस्ति, लब्धेर्मृतावेव प्रच्यवनात्, अतः कार्मणमेवैकमिति प्रथमो विकल्पः, कार्मणतैजसे वा स्याताम्इत्ययमत्रानुपपन्नो विकल्पो हेया तु

एकजीवे युगपत् शरीरसंख्या

---

१ ' काहारकाणि ' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाष्येष्वधीतः, कथं ? यैः प्रत्याख्यातं सहजं तैजसं तेषां कुतोऽन्तर्गतौ तत्सम्भवः ? न चान्याऽवस्था भवस्थतायामस्ति यत्रोभयमेव स्यात्, अनुत्पन्नतैजसवैक्रियलब्धेः **कार्मणौदारिके** द्वे भवतः, अथवा कार्मणवैक्रिये देवनारकाणां, तिर्यङ्मनुष्याणामनुत्पन्नतैजसलब्धीनां **कार्मणौदारिकवैक्रियाणि** युगपत्, अनुत्पन्नतैजसवैक्रियलब्धेश्चतुर्दशपूर्वधरमनुष्यस्य **कार्मणौदारिकाहारकाणि वा,** उत्पन्नलब्धीनां नृतिरश्चां **कार्मणतैजसौदारिकवैक्रियाणि** युगपच्चत्वारि भवन्ति, चतुर्दशपूर्वधरमनुष्यस्यानुत्पन्नवैक्रियलब्धेः कार्मणतैजसौदारिकाहारकाणि युगपत्, एवमेतेऽन्याचार्यदर्शनेन सप्त विकल्पा भवन्ति ॥

युगपत् पञ्चशरीर्याभावः

इदानीमा चतुर्भ्य इत्यस्य व्यवच्छेदस्य फलं दर्शयति—**न तु कदाचित् पञ्च युगपद् भवन्तीति** । नैव जातुचिदेकस्मिन् काले पञ्चानां सम्भवः आहारकवैक्रिययोर्युगपदभावात् । एतदनेन भाष्यवचनेन दर्शयति—**नापि वैक्रियाहारके युगपद् भवतः** । पूर्वमुपन्यस्तं(?) पञ्च युगपन्न जातुचित् सम्भवन्तीति तद्भावनार्थमिदम्, अपिशब्दोऽवधारकः । नैव वैक्रियाहारके युगपद् भवतः, लब्धिद्वयाभावात् । एते उभे लब्धी युगपदेकत्र न सम्भवतो व्यक्तिरूपेण, यस्मिन् काले वैक्रियं तस्मिन्नेव काले आहारकमिति, पर्यायेण तु सम्भवतः, कृत्वा वैक्रियमुपरततद्व्यापारः करोत्येवाहारकं, तदभावाच्च नैककाले पञ्च शरीराणि सम्भवन्त्येकस्य । किं पुनः कारणमेकस्यैकदा ते लब्धी न भवत इति ? आह—**स्वामिविशेषादिति** वक्ष्यति—'लब्धिप्रत्ययं च' (अ० २, सू० ४८) 'शुभं विशुद्धमव्याघाति चाऽऽहारकं चतुर्दशपूर्वधरस्यैव' (अ० २, सू० ४९) इत्यत्र सूत्रद्वये, स्वामिविशेषो वक्ष्यते । नृतिरश्चां लब्धिप्रत्ययं वैक्रियं भवति, तद्यथा—संयतः करोति वैक्रियं नियमत एव प्रमत्तस्तदा भवति, उत्तरकालं च तां लब्धिमुपजीवन् आहारकस्यापि प्रमत्तो निष्पादकः, निष्पत्त्युत्तरकालं तु नियमत एवाप्रमत्तो भवतीत्यस्मात् स्वामिविशेषाद् वक्ष्यमाणान्न लब्धिद्वयमेकस्यैकदेति, आहारकलब्धिमुपजीवन्नपि शुभाध्यवसायत्वादप्रमत्त इति ॥ ४४ ॥

उक्तानि शरीराणि, किं पुनरेषां प्रयोजनम् ? उपभोगः, उपभोगवन्ति शरीराणि, तेषां तु—

सूत्रम्—निरुपभोगमन्त्यम् ॥ २–४५ ॥

टी०—अथवा इहौदारिकादिशरीरभावे तावत् सुखदुःखोपभोगो दृष्टस्तत् किं यदा कार्मणं विग्रहगतौ तदाऽनेन सुखदुःखोपभोग आत्मना क्रियते नेति ? ।

कार्मणस्य बाह्योपभोगाभावः

उच्यते—**निरुपभोगमन्त्यम्** । अथवा शरीराणामिन्द्रियत्वं सुखदुःखोपलब्ध्यधिष्ठानत्वं व्यापारश्चास्ति, कार्मणमपि च शरीरन्यायवचनात् व्यापारवच्च विग्रहगतौ कर्मयोगवचनाच्च, परकारणत्वाच्च ॥ नन्विन्द्रियवदङ्गोपाङ्गनिर्वृत्तेरभावात् तत् किमस्मिन्नर्थोपलब्धिसुखदुःखोपभोगविशेषो नास्ति लब्धीन्द्रियसद्भावे सतीति? ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्यते—तान्येव सोपभोगानि समस्तोपभोगकारणत्वात् कालान्तरावस्थानाच्च, इदं तु निरुपभोगमन्त्यम् ॥

भा०—अन्त्यमिति सूत्रक्रमप्रामाण्यात् कार्मणमाह। तत् निरुपभोगम्। न सुखदुःखे तेनोपभुज्येते, न तेन कर्म बध्यते, न वेद्यते, नापि निर्जीर्यत इत्यर्थः। शेषाणि तु सोपभोगानि। यस्मात् सुखदुःखे तैरुपभुज्येते कर्म बध्यते वेद्यते निर्जीर्यते च, तस्मात् सोपभोगानीति ॥ ४५ ॥

टी०—**अन्त्यमिति सूत्रक्रमप्रामाण्यादिति**। अन्ते भवमन्त्यम्, कस्यान्त्यमिति चेद् अत आह—सूत्रक्रमप्रामाण्यादौदारिकादिशरीराणां चतुर्णां पर्यन्तवर्ति **कार्मणमाह**, सूत्रकारादविभक्तोऽपि हि भाष्यकारो विभागमादर्शयति, व्युच्छित्तिनयसमाश्रयणात्[2]। औदारिकादिशरीरचतुष्टयपर्यन्तवर्ति **तत् निरुपभोगं** निरस्तोपभोगं **निरुपभोगम्**, उपभोगो वक्ष्यमाणः प्रतिविशिष्ट एव, तदभावान्निरुपभोगमुच्यते। कः पुनरसावुपभोगो यमधिकृत्योच्यते **निरुपभोगम्**? अत आह—**न सुखदुःखे तेनोपभुज्येते** इति। मनोज्ञामनोज्ञशब्दादिविषयसम्पर्कजं च सुखं दुःखं न तेनोपभुज्येते, निर्वृत्त्युपकरणेन्द्रियाभावाल्लब्धीन्द्रियसन्निधौ सत्यपि, उभयेऽपि हि शब्दादयो विषया निर्वृत्त्युपकरणेन्द्रियविरहविह्वलेन कार्मणेन नोपभोक्तुं शक्यन्त इति निरुपभोगम्, असङ्ख्यातसमयनिर्वृत्तश्च छद्मस्थस्य सुखदुःखोपभोगः, विग्रहगतेश्च चतुःसमयपरत्वात् सोऽयुक्तः, तथा **न तेन कर्म बध्यते, न वेद्यते, नापि निर्जीर्यते इत्यर्थः**। उपभोगविशेषनिषेधप्रदर्शनार्थमिदमातन्यते, तेन कार्मणेन वपुषा न खलु कर्म बद्धुं पार्यते, अभिव्यक्तकारणाभावात्, कारणैर्हि कर्ता व्यापारमातनोति पाणिपादश्रोत्रादिभिः तद्यथा—औदारिकशरीरी मनेऽभिसन्धानपूर्वकमाकृष्याकर्णान्तं शिलीमुखं मृगवधाय क्षिपति, असत्प्रलापादि बहु भाषते, अदत्तद्रविणमादत्ते, पाण्यादिना योषितमभिगच्छति, सकलकायव्यापारेण परिगृह्णाति मनोवाक्कायव्यापारैः, एवमेष कर्मबन्धकरणकलापस्तदा न समस्त्यभिव्यक्तस्वरूपः कार्मणे, तद्धि पाणिपादमुखलोचनाद्यवयवविनिर्मुक्तं मनोवाग्व्यापाररहितं च, अतो न हिंसाद्यास्रवकृतं तेन कर्म बध्यते। तथा तेन न वेद्यते, न निर्जीर्यते वा, एवंविधास्रवजनितकर्म तेन शरीरकेण नानुभूयते, तस्य ह्युपभोगो नारकादिगतिषु नान्तर्गतौ अत्यल्पकालत्वात् औदारिकवैक्रियाभावाच्च, अनुभूयमानमेवेह निर्जीर्यते नीरसतामापाद्यमानं परिशटदात्मप्रदेशेभ्यः प्रत्यस्तस्नेहलेशमामुक्तरसकुसुम्भकवन्निर्जीर्णमुच्यते, न चैतत् तस्यामवस्थायां मनोव्यापाराभावात् प्रत्तिपत्तुमुत्सहन्तेऽतिकोविदाः, तथा कार्मणं हि कर्मसङ्घातः स चोपभोग्यो भवति, नोपभोजकः। औदारिकाद्यप्येवमेवेति चेत्, न, बाह्येन्द्रियपक्षतामङ्गीकृत्योपभोक्तृत्वमौपचारिकमत्यन्तप्रसिद्धम्, अतोऽभिव्यक्तसुखदुःखकर्मानुबन्धानुभवनिर्जरालक्षणमुपभोगमाधाय

---

१ ' णत्वात्राऽन्तराव ' इति क-ख-पाठः। २ 'पर्यायनयसमाश्रयणात्' इति ख-टी-पाठः। ३ ' प्रत्यस्तनेहलेशमामुक्तरस ' इति क-ख-पाठः, ' पादलेशानामुक्तं ' इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चेतसि कार्मणमनुपभोगमध्यगायि सूरिणा इत्येवमुपात्तप्रतिविशिष्टोपभोगव्यतिरिक्तेनोपभोगेन यदि तदभिसम्बध्यते गमनादानादिक्रियारूपेण कषाययागप्रत्ययेन बन्धेन न कश्चिद् दोषः । एवंविधः सर्वथोपभोगस्तस्य प्रतिषिध्यते नोपभोगसामान्यमिति । अथ कार्मणव्यतिरिक्तानि शरीराणि कथं प्रतिपत्तव्यानीति ? अत आह—**शेषाणि तु सोपभोगानी**त्यादि । उक्तं कार्मणम्, तद्व्यतिरिक्तान्यौदारिकवैक्रियाहारकतैजसानि शेषशब्देनाभिधित्सितानि, तानि च सोपभोगानि प्रतिपत्तव्यानि । कथम् ? औदारिके तावन्निर्वृत्त्युपकरणेन्द्रियसद्भावादिष्टानिष्टविषयसम्पृक्तौ सत्यां सुखदुःखोपभोगः परिस्फुटपरिनिष्पन्नपाणिपादावयवकलापत्वाच्च, वधानृताद्यास्रवद्वारवर्तित्वात् कर्मबन्धानुभवनिर्जराः सिद्धाः, वैक्रियेऽप्येवमेव भावना कार्या, आहारके तु शरीरेन्द्रियाभिव्यक्तौ सत्यां सुखदुःखोपभोगः सम्भवति ॥ नन्वप्रमत्त इत्युक्तं प्राक् को दोषः ? सत्यामपि शब्दाद्युपलब्धौ न प्रमाद्यत्यस्याम्, अनवस्थितशुभाशुभगुणाः खल्वमी शब्दादयो विषया न मनस्विनः परितोषमाधातुं क्षमा इत्यनित्यतावगमपूर्विकां वैराग्यवासनामेवाधिवसति, न तूत्कर्षमायाति, निन्दां वा समादत्ते, किन्तु यथावस्थिततया स्वसङ्कल्पशिल्पविरचनां विधूय तान् विषयान् स विद्वान् परिणमयति, कर्मबन्धानुभवनिर्जरणानि त्वस्य तथाविधास्रवजनितानि न सम्भाव्यन्तेऽप्रमत्तत्वादेव, न चावश्यं कार्मणेऽसम्भवता, सकलेनोपभोगेन तत्र भवितव्यम्, सुखदुःखोपभोगेनापि हि भोगवदेवेष्यते न निरुपभोगं यथासम्भवमर्थप्रतिपत्तेः सामान्यतो वा सम्भवः, अनुभवनिर्जरणे तु प्राक् कृतकर्मणोऽपि स्तः, कर्मबन्धस्त्वप्रमादत्वादतिदुर्घटः, तथाविधो योगप्रत्ययः पुनः केवलिनोऽपि न निवर्तत एवेति प्रतिपत्तव्यम् । तैजसशरीरेण तेजसि निसृष्टे दग्धे वैरिणि मनसः परितोषसुखमापाद्य जायते परमानन्दः, तथाऽनुग्राह्यपक्षे शिशिरतेजोनिसर्गेण परित्राते प्राणिनि प्रीतेरनुत्तमायाः प्रादुर्भावः । दुःखमपि वेद्यते तपःप्रभावादिभिर्बलवता परिरक्षितस्य द्विषोऽन्यस्य वा स्वनिसृष्टे तेजस्यप्रभवति मनागप्यपकर्तुमुपकर्तुं वा तैजसशरीरभाजः स्फुटमेव । एष चैवंविधसुखदुःखोपभोगस्तैजसनिमित्त इति तेन द्वारेणोपजायते, अतस्तेन सुखदुःखे उपभुज्येते, शापानुग्रहप्रवणत्वात्, तद्द्वारेणैव पुण्यस्यापुण्यस्य वा बन्धः तत्पूर्विकैवानुभवनिर्जरे न प्रतिषेद्धुं पार्येते, अतस्तदपि सोपभोगम्, समुद्घातनिसर्गात्मत्वात् । लब्धिप्रत्ययमेतदेवं भवतु, यत् पुनः सर्वदा समस्ति सर्वप्राणिषु तत् कथं सोपभोगम् ? तदपि हि परिगृहीताहारपाककारित्वात् सम्यक्परिणामापादनात् सुखमाधत्ते, तद्विपरीततया तु व्याप्रियमाणं तदेव दुःखाय सम्पद्यते, कर्मबन्धानुभवनिर्जरास्तु प्रत्येकं तस्य न सम्भाव्यन्ते, औदारिकादिसहवर्तित्वात्, अतः पूर्वकेणाप्युपभोगेन सोपभोगं भवत्येवेति मा न परितुषः । **शेषाणि तु सोपभोगानि** इत्यस्यैव वचनस्य विवरणद्वारेण भाष्यप्रणयनं, **यस्मादित्यादि** । अन्येनोपभोगेन सोपभोगानि मा ग्रहीत् क्वचिदतः सुहृद् भूत्वा सूरिराचष्टे, औदारिकादिभिः सुखदुःखोपभोगः कर्मबन्धानुभवनिर्जराश्च व्याख्यात-

औदारिकादीनां प्रयोजनानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्यायेन क्रियन्ते तस्मात् सोपभोगानि इति निगमनम्, कार्मणमपहायैकं शेषाण्येवंविधेनोपभोगेन सोपभोगानीति ॥ ४५ ॥

भा०—अत्राह–एषां पञ्चानामपि शरीराणां सम्मूर्च्छनादिषु त्रिषु जन्मसु किं क्व जायत इति ?। अत्रोच्यते—

टी०—अत्राहेत्यादिः सम्बन्धग्रन्थः। अजानानः प्रश्नयति—एषामौदारिकादीनां वपुषां पञ्चानामपि त्रिषु जन्मसु सम्मूर्च्छनादिषु किं शरीरं क्व जन्मनि जायते सम्भवत्युत्पद्यते वा ?। अत्रोच्यते—

सूत्रम्—गर्भसम्मूर्च्छनजमाद्यम् ॥ २–४६ ॥

भा०—आद्यमिति सूत्रक्रमप्रामाण्यादौदारिकमाह। तद् गर्भे सम्मूर्च्छने वा जायते ॥ ४६ ॥

टी०—आदौ भवमाद्यं शरीरप्रकरणप्रथमसूत्रक्रमप्रामाण्यादौदारिकमाह, तद् गर्भे जन्मनि सम्मूर्च्छने वा जायते-सम्भवतीति, जनिः जन्मनि प्रत्येकमभिसम्बध्यते। गर्भे जातं गर्भाद् वा गर्भजमेवं सम्मूर्च्छनजमपि, उक्तलक्षणे च गर्भसम्मूर्च्छने जन्मनामतो गर्भजन्मनां सम्मूर्च्छनजन्मनां च प्राणिनामौदारिकं तावद् भवति, न त्ववधारणमौदारिकमेव, तैजसकार्मणयोरपि तत्र सम्भवात्, लब्धिप्रत्ययवैक्रियाहारकयोर्वा गर्भजन्मन्युत्तरकालभावित्वात्॥ ननु च भूते डविधानं तत् कथं भाष्यकारो विवृणोति जायत इति वर्तमानकालाभिधायिना शब्देनेति ?। उच्यते–न दोषोऽयं यस्माज्जातमुत्पन्नमुत्तरकालमपि पुनः पुनः पर्यायापेक्षया सम्भवतीत्युपपन्न एव निर्देश इति। एतच्च शरीरं जघन्येनाङ्गुलासङ्ख्येयभागप्रमाणमुत्कर्षतो योजनसहस्रप्रमाणमपि ॥ ४६ ॥

औदारिकशरीरस्य स्वामिनः

औदारिकप्रमाणम्

सूत्रम्—वैक्रियमौपपातिकम् ॥ २–४७ ॥

भा०—वैक्रियं शरीरमौपपातिकं भवति। नारकाणां देवानां चेति ॥ ४७ ॥

वैक्रियस्वामिनः

टी०—उपपातजन्मोपपातशब्देनोच्यते तस्मिन् भवमौपपातिकं वैक्रियं शरीरं, तन्निमित्तत्वादवधिवत् सहजम्, तच्च सामर्थ्यान्नारकदेवानामेव न शेषाणाम्। द्विविधं च तद्–भवधारकमुत्तरवैक्रियं च, तत्राद्यस्य जघन्येनाङ्गुलासङ्ख्येयभागः प्रमाणम्, उत्कृष्टं पञ्च धनुःशतानि, उत्तरवैक्रियं जघन्येनाङ्गुलसङ्ख्येयभागप्रमितमुत्कर्षेण योजनलक्षणप्रमाणमिति ॥ ४७ ॥

वैक्रियप्रमाणम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रम्—लब्धिप्रत्ययं च ॥ २–४८ ॥

लब्ध्या वैक्रिय-सद्भावः

भा०—लब्धिप्रत्ययं च वैक्रियं शरीरं भवति। तिर्यग्योनीना मनुष्याणां चेति ॥ ४८ ॥

टी०—लब्धिप्रत्ययं च वैक्रियं चेत्यादि। चशब्दादुत्कृष्टं वैक्रियमुदचीचरद् भाष्यकारः। तपोविशेषजनिता लब्धिस्तत्प्रत्ययं–तत्कारणमेतच्छरीरं भवत्यजन्मजमिदमित्यर्थः। अथवा गर्भजन्मनामेवेदमुत्तरकालं भवतीति न कश्चिद् दोषः। लब्धिप्रत्ययवैक्रियशरीरप्रतिविशिष्टस्वामिनिर्दिदिक्षया आह–तिर्यग्योनीनां मनुष्याणां चेति। सामान्याभिधानेऽपि लब्धिप्रत्ययवचनाद्, भूयसां गर्भव्युत्क्रान्तितिर्यङ्मनुष्याणामिदं द्रष्टव्यम्, तपोविशेषानुष्ठानाद्, वायोश्च वैक्रियं लब्धिप्रत्ययमेव, शेषतिर्यग्योनिजानां मध्ये, नान्यस्येति ॥ ४८ ॥

अत्राह–अथाहारकं किंलक्षणमिति ?। अत्रोच्यते—

सूत्रम्—शुभं विशुद्धमव्याघाति चाहारकं चतुर्दशपूर्वधर एव ॥२–४९॥

आहारकस्य स्वरूपम्

भा०—शुभमिति शुभद्रव्योपचितं शुभपरिणामं चेत्यर्थः। विशुद्धमिति विशुद्धद्रव्योपचितं असावद्यं चेत्यर्थः। अव्याघातीति आहारकशरीरं न अव्याहन्ति न व्याहन्यते चेत्यर्थः ॥

टी०—इदमपि लब्ध्यपेक्षमेव, किन्तु वैक्रियादयं विशेषः शुभादिकृतः, अजन्मजत्वं च सामान्यम्। शुभमिति शुभद्रव्योपचितमित्यादि। शुभानि द्रव्याणीष्टवर्णगन्धरसस्पर्शभाञ्जि तैः प्रचितं–निर्वर्तितम्, शुभः परिणामश्चतुरस्रं संस्थानमाकारो यस्य तच्छुभपरिणामं चाहारकं भवति। चशब्दः समुच्चये। विशुद्धद्रव्योपचितं शुभपरिणामं चेति। विशुद्धमिति विशुद्धद्रव्योपचितमसावद्यं चेत्यर्थः। स्वच्छस्फटिकशकलमिव सकलवस्तुप्रतिबिम्बाधारभूतं विशुद्धद्रव्योपचितमुच्यते। अपरे वर्णयन्ति–विशुद्धं शुक्लमत्र विवक्षितम्, असावद्यमिति अवद्यं–गर्हितं–पापं सहावद्येन सावद्यम्, न सावद्यमसावद्यम्, सावद्यं हिंसादिप्रवृत्तिर्यस्मात्, इदं न हिंसादौ प्रवर्तते, न च हिंसादिप्रवृत्तितः उत्पद्यते, तस्माद् विशुद्धमसावद्यमाहारकमित्युच्यते। अव्याघातीति व्याहन्तुं शीलमस्य व्याघाति, न व्याघाति अव्याघाति, आहारकशरीरं न किञ्चिद् व्याहन्ति-विनाशयति, न व्याहन्यते इति, न च तदन्येन पदार्थेन व्याहन्तुं शक्यते। कथं पुनरिदमेकेन यत्नेनोभयं लभ्यते कर्ता कर्म चेति ? कृल्ल्युटो बहुलाभिधानात्। निर्वृत्तिकार्यहेतुसमुच्चयार्थश्चशब्दः ॥

---

१ सूत्रे ' तैजसमपि ' इत्यधिकं क–ख–पुस्तकयोः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—तच्चतुर्दशपूर्वधर एव। कस्मिंश्चिदर्थे कृच्छ्रेऽत्यन्तसूक्ष्मे सन्देहमापन्नो निश्चयाधिगमार्थं क्षेत्रान्तरितस्य भगवतोऽर्हतः पादमूलमौदारिकेण शरीरेणाशक्यगमनं मत्वा लब्धिप्रत्ययमेवोत्पादयति। पृष्ट्वाऽथ भगवन्तं छिन्नसंशयः पुनरागत्य व्युत्सृजत्यन्तर्मुहूर्तस्य ॥

आहारकस्य स्वामी

टी०—तदेवंविधमाहारकं चतुर्दशपूर्वधर एव-लब्धिप्रत्ययमेवोत्पादयतीति क्रियोपरिष्टादभिधास्यते। चतुर्दशेति सङ्ख्या, पूर्वं प्रणयनात् पूर्वाण्युच्यन्ते, तानि धारणाज्ञानेनालम्बत इति चतुर्दशपूर्वधरः, स च द्विविधः-भिन्नाक्षरोऽभिन्नाक्षरश्च, ते च यस्यैकैकमक्षरं श्रुतज्ञानगम्यपर्यायैः सत् कारिकाभेदेन भिन्नं वितिमिरतामितं स भिन्नाक्षरः, तस्य च श्रुतज्ञानसंशयापगमात् प्रज्ञाभावस्ततश्चाहारकलब्धितामपि नैवोपजीवति विनालम्बनेन, स एव श्रुतकेवली भण्यते, शेषः करोत्यकृत्स्नश्रुतज्ञानलाभादवीतरागत्वाच्च, अत एव केचिदपरितुष्यन्तः सूत्रमाचार्यकृतन्यासादधिकमधीयते "अकृत्स्नश्रुतस्यर्द्धिमतः" इत्यनेन विशेषणकलापेनेति, एवंविधश्चतुर्दशपूर्वधर एव सञ्जातलब्धिस्तन्निर्वर्तयति, नान्यः श्रुतविदन्यो वा अवधारणफलम्। किमर्थं पुनरसौ तां लब्धिमुपजीवतीत्याह-कस्मिंश्चिदर्थे इत्यादि। श्रुतज्ञानगम्ये कस्मिंश्चिदेवार्थेऽत्यन्तगहने सन्दिहानस्तदर्थनिश्चितये विदेहादिक्षेत्रवर्तिनोऽर्हत्श्चरणकमलाभ्याशमौदारिकेण वपुषा न खलु पार्यते गन्तुमित्यवबुध्य सञ्जातर्द्धिविशेषो लब्धिप्रत्ययमेव नान्यप्रत्ययमुपजनयति आहारकशरीरं, गत्वा च तत्राशु भगवन्तमालोकितसमस्तलोकालोकमालोक्याभिवन्द्य पृष्ट्वा[1] च विच्छिन्नसंशयः परिभूतपाप्मा पुनरागत्य तमेव देशं यत्र प्राग् गच्छतौदारिकमनाबाधबुद्ध्या न्यासकवन्निक्षिप्तं स्वप्रदेशजालावबद्धं तदवस्थमास्ते, ततो विहायाहारकमुपसंहारमानीयात्मप्रदेशजालं प्रागौदारिकमेवानुप्रविशति, एष चारम्भात् प्रभृत्या अपवर्गात् सर्वोऽन्तर्मुहूर्तपरिमाणः कालो भवतीति, प्रमाणं चास्यावरतो न्यूनः पाणिरुत्कर्षेण सम्पूर्ण इति ॥ अथ तैजसकार्मणे कस्मिन् जन्मनि समुद्भवत इति नानयोर्नियमः, सर्वत्राप्रतिहतशक्तित्वात्, सर्वजन्मसु सहतैजसं कार्मणं वा स्यान्न तु लब्धितैजसम्, अतो लब्धिप्रस्तावमुपजीवन् भाष्यकारः तैजसमपीत्याह—

चतुर्दशपूर्वधरस्य विचारः

तैजसे हेतुः

भा०—तैजसमपि शरीरं लब्धिप्रत्ययं भवति ॥

टी०—तेजोविकारस्तैजसं सर्वस्योपलक्षणं रसाद्याहारपाकजननम्, तच्चावश्यं सर्वप्राणिविषयमभ्युपगन्तव्यम्, अन्यथा शरीरपदे तैजसशरीराणि बद्धान्यनन्तानि अनन्तोत्सर्पिण्यवसर्पिणीसमयराशिसमसङ्ख्यानि कालतः, क्षेत्रतोऽनन्तानन्ता लोकाः, द्रव्यतः सिद्धेभ्योऽनन्तगुणानि सर्वजीवानन्तभागोनानि, किं पुनः कारणमनन्तानि ? तत्स्वामिनामा-

१ 'दृष्ट्वा च' इति ख-पाठः, 'दृष्ट्वा' इति तु घ-पाठः। २ 'लब्धिसतीमपि' इति प्रतिभाति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्त्यादित्येष ग्रन्थः सर्वो विघटेत, लब्धिप्रत्यय एवाङ्गीक्रियमाणे तैजसवपुषि, अतो विद्यमानमपि सर्वासुमत्सु सहजमनादृत्य तैजसं लब्ध्यधिकारे लब्धिप्रत्ययमेवाचष्टे नेतरदिति। तैजसं शरीरं तैजससशरीरलब्धिकारणसमुद्भूतशक्ति भवति तपोविशेषानुष्ठानात् कस्यचिदेव जातुचित्, न सर्वस्येति। इदानीं सकलशरीरबीजभूतं कार्मणं नियमेन दर्शयन्नाह—

भा०—कार्मणमेषां निबन्धनमाश्रयो भवति। तत्कर्मत एव भवतीति बन्धे पुरस्ताद् वक्ष्यति। कर्म हि कार्मणस्य कारणमन्येषां च शरीराणामादित्यप्रकाशवत्। यथाऽऽदित्यः स्वमात्मानं प्रकाशयति अन्यानि च द्रव्याणि, न चास्यान्यः प्रकाशकः, एवं कार्मणमात्मनश्च कारणमन्येषां च शरीराणामिति॥

कार्मणस्य स्वरूपम्

टी०—कार्मणमेषां निबन्धनमाश्रयो भवतीत्यादि। कर्मणो विकारः कार्मणं, तदेषामौदारिकादीनां शरीराणां निबन्धनं बीजमाश्रयः सकलशक्त्याधारत्वात् कुड्यमिव चित्रकर्मणो भवति। आमूलमुच्छिन्ने तु भवप्रपञ्चप्ररोहबीजे कार्मणे वपुषि न पुनर्विमुक्तिभाजः शरीरकाणा(?)मधियन्त्यपि प्रक्षालितसकलकल्मषाः, तच्चैवंविधं कार्मणं कर्मभ्य एव ज्ञानावरणादिभ्यो जायते न पुनरन्यत् तस्य कारणमस्ति, ज्ञानावरणादिकं चाष्टमेऽध्याये बन्धाधिकारे पुरस्तात् अग्रे वक्ष्यति समूलोत्तरम्, एतदेव चार्थजातं स्पष्टयन्नाह—कर्म हीत्यादि। यस्मात् ज्ञानावरणादिकर्म कार्मणस्य कारणं तदात्मकत्वात् अन्येषां चौदारिकादिशरीराणाम्, न च स्वात्मनि क्रियाविरोधः, आदित्यप्रकाशवत्। प्रकाशं दृष्टान्ततयोपन्यस्य विवरणकाले यथाऽऽदित्य इत्याह तदेतत् कथम्? न खलु सर्वथाऽऽदित्यात् प्रकाशो व्यतिरिक्त इत्यभ्युपेतुं शक्यम्, तेन प्रकाशस्वभावः प्रकाशमयः आदित्य इत्यनेन न कश्चिद् विशेषः, आदित्यप्रकाशवदादित्यवद् वाऽभिहितः, स यथा तिग्मांशुः स्वमण्डलं प्रकाशयत्यन्यानि च स्तम्भकुम्भादिद्रव्याणि, न चान्यपदार्थः प्रकाशकः सवितृमण्डलस्यानवस्थाप्रसक्तेरभ्युपेतुं शक्यः॥ ननु च घटाद्यप्रकाशात्मकत्वात् प्रकाशयतु भास्वान्, मूर्तिस्तु प्रकाशात्मिकैव तस्याः किं प्रकाश्यते तत्स्वभावत्वादिति?। उच्यते—यद्यपि प्रकाशस्वभावा मूर्तिस्तथापि सा प्रकाश्यैव भवति, प्रमाणवत्, प्रमाणं हि स्वपररूपप्रकाशकारीष्यते, अन्यथा चानेकदोषापत्तिः स्यात्। एवं कार्मणमित्यादि। एवमेतेनादित्यप्रकाशनिदर्शनेन कार्मणं शरीरमात्मनश्च स्वरूपस्य कारणमन्येषां चौदारिकादिवपुषाम्, न पुनर्ज्ञानावरणादिकर्मव्यतिरिक्तमस्य कारणमन्वेषितव्यम्, कर्ममात्रत्वात् कर्मस्वभावत्वात् कार्मणस्येति। एतयोश्च तैजसकार्मणयोरवरतः प्रमाणमङ्गुलासंख्येयभागः उत्कृष्टतश्चौदारिकशरीर-

कार्मणतैजसप्रमाणम्

---

१ 'परस्ताद्' इति घ-पाठः। २ 'न चास्यान्यैः प्रकाशः' इति ख-पाठः। ३ 'विभक्तिभाजः' इति ख-पाठः। ४ 'मूलोत्तरभेदम्' इति ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमाणे केवलिनः समुद्घाते लोकप्रमाणे वा भवतः मरणान्तिकसमुद्घाते वा आयामतो लोकान्ताल्लोकान्तायते स्यातामिति ॥

औदारिकस्य विस्तरेणार्थः

भा०—अत्राह—औदारिकमित्येतदादीनां शरीरसंज्ञानां कः पदार्थ इति ? । अत्रोच्यते—उद्गतारमुदारम्, उत्कटारमुदारम्, उद्गम एव वोदारम्, उपादानात् प्रभृति अनुसमयमुद्गच्छति वर्धते जीर्यते शीर्यते परिणमतीत्युदारम्, उदारमेवौदारिकम्, नैवमन्यानि। यथोद्गमं वा निरतिशेषं, ग्राह्यं छेद्यं भेद्यं दाह्यं हार्यमित्युदाहरणादौदारिकम्, नैवमन्यानि, उदारमिति च स्थूलनाम। स्थूलमुद्गतं पुष्टं बृहन्महदिति, उदारमेवौदारिकम्। नैवं शेषाणि। तेषां हि परं परं सूक्ष्ममित्युक्तम् (अ० २, सू० ३८)॥

टी०—संशयानः पृच्छति, औदारिकमिति पदमादौ येषां वैक्रियादिपदानां तेषाम् एतदादीनां कोऽर्थोऽत्र विवक्षितः ? एतदुक्तं भवति—किमेता औदारिकादिसंज्ञा अर्थवत्तामनुगता विधीयन्ते आहोस्विद् यदृच्छयेति ? । अन्वर्थसंज्ञा एता न यादृच्छिक्य इति भाष्यकृदादर्शयति—उद्गतारमुदारमित्यादिना भाष्येण । अन्वर्थत्वाच्च संज्ञयैव लक्षणभेदं प्रथयति, पृथग्लक्षणव्यवस्थानं वा, अत एवान्वर्थसंज्ञाविवरणान्नैवमन्यानीति प्रत्येकमन्यलक्षणव्यवच्छेदेनान्यलक्षणाभिधानात्, एभ्य एव विशेषेभ्यः शरीराणां नानात्वं सेत्स्यति ॥ ननु च शरीरप्रकरणप्रथमसूत्रे एतद् भाष्यं युक्तं स्यात्, इह तु प्रकरणान्ताभिधाने न किञ्चित् प्रयोजनं वैशेषिकमस्तीति । उच्यते—तदेवमयं मन्यते, तदेवेदमादिसूत्रमाप्रकरणपरिसमाप्तेः प्रपञ्च्यते, अथवा प्रकरणान्ताभिधाने सत्यमेव न किञ्चित् फलमस्त्यसूत्रार्थत्वादतः क्षम्यतामिदमेकमाचार्यस्येति, तत्र उद्गतारमुदारम् इति। उद्गता—उत्कृष्टा आरा—छाया यस्य तदुद्गतारमुदारं प्रधानमित्यर्थः । तीर्थङ्करगणधरशरीराङ्गीकरणादेवमुच्यते, नहि तीर्थकरादिशरीरेभ्योऽन्यत् प्रधानतरमस्ति त्रिलोक्यां शरीरमिति। अथवा उत्कटारमुदारम् । उत्कृष्टा आरा—मर्यादा—प्रमाणं यस्य तदुत्कटारमुदारम्, अवस्थितसातिरेकयोजनसहस्रप्रमाणत्वात्, अन्यच्चैवंविधं नास्ति ॥ ननु वैक्रियमधिका योजनलक्षेति सत्यमेवमेतद्, अवस्थितं तन्न भवति, पञ्चधनुःशतप्रमाणमेवावस्थितं वैक्रियम्, औदारिकं पुनरवस्थितमेवमुच्यते । उद्गम एव वा उदारः, उद्गमनं—उद्गमः—प्रादुर्भावः स एव चोदारशब्देनोच्यते । यत उपादानात् प्रभृतीत्यादि । उपादानं हि शुक्रशोणिताद्यौदारिकस्य तद्ग्रहणप्रभृत्येव चानुसमयमुद्गच्छति अविभज्यमानस्वरूपः कालविशेषः समयोऽभिधीयते, अतः प्रतिसमयमेव तदुत्तरामुत्तरां व्यवस्थां स्वीयपर्याप्त्यपेक्षामुद्गच्छति—प्राप्नोति, न तदस्ति कालविवरं यत्रावस्थान्तरं न समासादयतीति, एवं च भाष्यकारो दर्शयति—तत् वर्धते वयःपरिणामेनोपचीयमानमूर्ति प्रतिवेलमाभाव्यते, जीर्यत इति जरामधिगच्छति—वयोहानिमाप्नोति, शीर्यत इति शिथिलसन्धि-

१ ' ०दारणा० ' इति घ-पाठः । २ ' प्रतिवलयमा० ' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बन्धनमालम्बमानचर्ममण्डलमुपलक्ष्यते तदेव जातुचिदतः शीर्यत इत्युच्यते, **परिणमतीति** समन्ताज्जराभारविधुरमानमति परिपेलवग्रहणशक्तीन्द्रियग्रामं वलीवलयलेखाविचित्रमन्यदिवोपजायते, अतो मुहुर्मुहुरुद्गमनाद् **उदारमेवौदारिकं** स्वार्थे प्रत्ययविधानात्। **नैवमन्यानीति**, यथेदमौदारिकमेवंविधानेकविशेषणविशिष्टं न तथा वैक्रियाहारकतैजसकार्मणानि, नहि वैक्रियस्य जरसा विवृद्ध्या वा प्रतिक्षणं योगोऽस्त्यवस्थितत्वात् तथाऽऽहारकस्य, तैजसकार्मणयोस्तु सुतरां न समस्त्यङ्गोपाङ्गाद्यनिर्वृत्तेः। अथवाऽन्यथा व्युत्पत्तिः—**यथोद्गमं वा निरतिशेषमित्यादि** भाष्यम्। यो य उद्गमो यथोद्गमं निरतिशेषं निःशेषं निरतिशयं वा मांसास्थिस्नाय्वाद्यवबद्धत्वात् सर्वमेव तुल्यम्, ग्राह्यादिधर्मयोगाद् गृह्यते पाण्याद्यवयवैरिन्द्रियैर्वा, छिद्यते परश्वादिना, भिद्यते नाराचादिना, दह्यतेऽग्निभास्करादिना, ह्रियते महावायुवेगेनेत्येवमादिभिर्विदारणादुदारमुच्यते, पृषोदरादित्वाच्च संस्कारयत्युदारणादौदारिकम्। **नैवमन्यानीति** सुज्ञानम्। नहि वैक्रियादिषु मांसास्थिग्राह्यादयो विशेषाः सन्ति। अथवाऽन्यथा **उदारमिति चेत्यादि**। चशब्दोऽथवेत्यस्यार्थे। स्थूलस्याभिधानमुदारमिति स्वल्पप्रदेशोपचितत्वात् बृहत्त्वाच्च भेण्डवदुदारं स्थूलमिति। अस्यैव पर्यायान् सुखावबोधार्थमाख्याति—**स्थूलमुद्गतं पुष्टं बृहन्महदित्युदारमेवौदारिकम्**। स्थूलत्वाद् भेण्डवत् ऊर्ध्वं गतमुच्छ्रायमुद्गतमतिप्रमाणत्वात्, पुष्टं शुक्रशोणितादिप्रचितत्वात्, बृहत् प्रतिक्षणं वृद्धियोगात्, योजनसहस्रप्रमाणावस्थितारोहपरिणाहत्वान्महत्, उदारमेवौदारिकमित्यनेन न तन्नियमः किन्तु प्रदर्शनमेतत् क्वचित् स्वार्थे क्वचिन्निवृत्ताद्यर्थेष्विति। **नैवं शेषाणि** वैक्रियादीनि। किं कारणमत आह—**तेषां हि परं परं सूक्ष्ममित्युक्तं** (२, ३८) यस्मात् तेषां वैक्रियादीनां परं परं प्राक् सूक्ष्ममभिहितं तस्मान्नैवं शेषाणीति॥

वैक्रियस्य विस्तरेण व्याख्या

भा०—वैक्रियमिति। विक्रिया विकारो विकृतिर्विकरणमित्यनर्थान्तरम्। विविधं क्रियते। एकं भूत्वा अनेकं भवति। अनेकं भूत्वा एकं भवति। अणु भूत्वा महद् भवति। महच्च भूत्वाऽणु भवति। एकाकृति भूत्वा अनेकाकृति भवति। अनेकाकृति भूत्वा एकाकृति भवति। दृश्यं भूत्वा अदृश्यं भवति। अदृश्यं भूत्वा दृश्यं भवति। भूमिचरं भूत्वा खेचरं भवति। खेचरं भूत्वा भूमिचरं भवति। प्रतिघाति भूत्वा अप्रतिघाति भवति। अप्रतिघाति भूत्वा प्रतिघाति भवति। युगपच्चैतान् भावाननुभवति। नैवं शेषाणीति। विक्रियायां भवति, विक्रियायां जायते, विक्रियायां निर्वर्त्यते, विक्रियैव वा वैक्रियम्॥

टी०—वैक्रियमित्यादि भाष्यम्। प्राक् तावत् सुखावबोधार्थं पर्यायानाचष्टे—**विक्रिया विकारो विकृतिर्विकरणमित्यनर्थान्तरम्**। विविधा विशिष्टा वा क्रिया विक्रिया, तस्यां भवं वैक्रियम्, प्रकृतेरन्यत्वं विकारः, विचित्रा कृतिर्विकृतिः, विविधं क्रियत इति विकरणम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतेऽनर्थान्तरमभिदधति ध्वनयः । एतदधुना स्पष्टयन्नाह—विविधं क्रियत इत्यादिना । विविधमनेकप्रकारं तद् वैक्रियं क्रियते, कथं पुनस्तदित्युच्यते-एकं भूत्वा अनेकं भवति विकर्तुः समासादितवैक्रियलब्धेरिच्छानुविधानात् । एकं भवतीत्यादि भाष्यं सुज्ञानं यावत् प्रतिघाति भूत्वेत्यादि । प्रतिहननशीलं भूत्वा स्थूलत्वात् सूक्ष्मावस्थानमनुप्राप्तं सदप्रतिघाति भवति, एककालमेव च सर्वानभिहितलक्षणान् भावान् विकारान् वेदयते, नैवमौदारिकाहारकादीन्यतो विशिष्टलक्षणमेवेदं विज्ञेयम् ॥ तथा चोक्तं भगवत्यां तृतीयशते पञ्चमोद्देशके—" अणगारे णं भंते ! भावियप्पा बाहिरए पोग्गले परियाइत्ता पभू एगं महं इत्थीरूवं जाव संदमाणियारूवं वा विउव्वित्तए ? । हंता पभू । अणगारे णं भंते ! भावियप्पा केवइयाइं पभू इत्थीरूवाइं विउव्वित्तए ? । गोयमा ! से जहा नामए जुवतिं जुवाणे हत्थेणं हत्थंसि गिण्हिज्जा चक्कस्स वा नाभी अरगाउत्ता सिया, एवमेव गोयमा ! अणगारे णं भावियप्पा वेउव्वियसमुग्घाएणं समोहणित्ता संखिज्जाइं जोयणाइं दंडं निसिरति जाव दोच्चंपि वेउव्वियसमुग्घाएणं समोहणित्ता पभू केवलकप्पं जंबुद्दीवं दीवं बहूहिं इत्थीरूवेहिं आइण्णं वितिकिण्णं जाव करित्तए, अदुत्तरं च णं गोयमा ! पभू तिरियमसंखेज्जदीवसमुद्दे भरिए विउव्वित्तए जाव नो चेव णं संपत्तीए विउव्वति वा विउव्वस्संति वा " (सू० १६१) ॥ तथा चतुर्दशशते अष्टमोद्देशके-" अत्थि णं भंते ! अव्वाबाधा (हा) देवा ? हंता अत्थि । से केणट्ठेणं भंते ! एवं वुच्चति-अव्वाबाधा देवा अव्वाबाधा देवा ? गोयमा ! पभू णं एगमेगे अव्वाबाधे देवे एगमेगस्स पुरिसस्स एगमेगंसि अच्छिपत्तंसि दिव्वं देविड्ढिं दिव्वं देवजुइं दिव्वं देवाणुभावं दिव्वं बत्तीसइविहं नट्टविहिं उवदंसेत्तए, नो चेव णं तस्स पुरिसस्स किंचि आबाधं वा वाबाहं वा उप्पाएइ छविच्छेदं वा करेइ, सुहुमं च णं उवदंसेज्जा, से तेणट्ठेणं जाव अव्वाबाधा देवा" (सू० ५३१)॥ तथाऽष्टादशशते सप्तमोद्देशके-" [३]देवे णं भंते महड्ढिए जाव महेसक्खे रूवसहस्सं विउव्वित्ता पभू णं अण्णमण्णेणं सद्धिं संगामं संगामित्तए ? हंता पभू, ताओणं भंते ! बोंदीओ किं एगजीवफुडाओ अणेगजीवफुडाओ ? गोयमा ! एकजीवफुडाओ नो अणेगजीवफुडाओ । ते णं भंते ! तेसिं

---

१ अनगारो भगवन् ! भावितात्मा बाह्यान् पुद्गलान् अपर्यादाय प्रभुः एकं महत् स्त्रीरूपं वा, यावत् स्यन्दमानिकारूपं वा विकुर्वितुम् ? । हन्त प्रभुः । अनगारो भगवन् ! भावितात्मा कियन्ति प्रभुः स्त्रीरूपाणि विकुर्वितुम् ? गौतम ! स यथा नाम युवतिं युवा हस्तेन हस्ते गृह्णीयात्, चक्रस्य वा नाभिः अरकायुक्ता स्यात्, एवमेव गौतम ! अनगारोऽपि भावितात्मा वैक्रियसमुद्घातेन समवहन्ति, यावत्-प्रभुः गौतम ! अनगारो भावितात्मा केवलकल्पं जंबूद्वीपं द्वीपं बहुभिः स्त्रीरूपैः आकीर्णम्, व्यतिकीर्णम्, यावत्-कर्तुम् । अथोत्तरं च गौतम ! प्रभुः तिर्यग्-असंख्यद्वीपसमुद्रान् भर्तुं विकुर्व्य यावत् नो चैव सम्पत्त्या विकुर्वेति विकुर्विष्यति वा ।

२ सन्ति भदन्त ! अव्याबाधा देवाः ? हन्त सन्ति । तत् केनार्थेन भदन्त ! एवमुच्यते—अव्याबाधा देवा अव्याबाधा देवाः ? गौतम ! प्रभुः एकैकोऽव्याबाधदेवः एकैकस्य पुरुषस्य एकैकस्मिन् अक्षिपत्रे दिव्यां देवर्धिं दिव्यां देवद्युतिं दिव्यं देवानुभावं दिव्यं द्वात्रिंशद्विधं नाट्यविधिं उपदर्शयितुम्, नैव तस्य पुरुषस्य कांचिदाबाधां वा व्याबाधां वोत्पादयति छविच्छेदं वा करोति, सूक्ष्मतयोपदर्शयेत्, तदेतेनार्थेन यावदव्याबाधा देवाः ।

३ देवो भदन्त ! महर्धिकः यावत् महेशाख्यः रूपसहस्रं विकुर्व्य प्रभुरन्योऽन्येन सार्धं सङ्ग्रामं सङ्ग्रामयितुम् ? हन्त प्रभुः, तानि भदन्त ! शरीराणि किमेकजीवस्पृष्टानि अनेकजीवस्पृष्टानि ? गौतम ! एकजीवस्पृष्टानि नानेकजीव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बोंदीणं अंतरा किं एगजीवफुडा अणेगजीवफुडा ? गोयमा ! एकजीवफुडा नो अणेगजीवफुडा । पुरिसे णं भंते! अंतरे हत्थेण वा पाएण वा असिणा वा पभू विच्छिंदित्तए । नो इणमट्ठे समट्ठे, नो खलु तत्थ सत्थं कमति " (सू० ६३५)॥ एतानि च सूत्राणि वैक्रियाद्यर्थेषूपयुज्य नियोज्यानि, न स्वार्थ एव प्रत्ययविधिः । अनियमं दर्शयति—**विक्रियायां भवमि**त्यादिना भाष्येण, एतच्च सुज्ञानमेवातः कदाचिद् वैक्रियं वैक्रयिकं चेति ॥

आहारकस्य शब्दार्थविस्तारः

भा०—आहारकमाह्रियत इत्याहार्यम् । आहारकमन्तर्मुहूर्तस्थिति । नैवं शेषाणि ।

टी०—आहारमाह्रियत इत्यादि भाष्यम् । गृह्यते प्रतिविशिष्टप्रयोजनप्रसाधनाय कार्यपरिसमाप्तेश्च पुनर्मुच्यते याचितोपकरणवत् संशयव्यवच्छेदार्थावग्रहणार्थिदर्शनादि च कार्यम्, आह्रियते **आहार्यमित्यनेन** शब्दद्वयेन विशिष्टकारकसाध्यमाहारकशब्दं दर्शयति कृल्ल्युटो बहुलवचनात्, तच्चाहारकमन्तर्मुहूर्तस्थिति, एतावता च कालेनाभिलषितप्रयोजनपरिसमाप्तिस्तस्याहर्तुरुपजायते, परिनिष्ठितप्रयोजनश्च पुनर्विमुञ्चति नोत्तरकालमपि तां लब्धिमुपजीवति अतोऽन्तर्मुहूर्तस्थितिः, आत्मलाभो यस्य तदन्तर्मुहूर्तस्थिति । **नैवं शेषाणीति**, व्यतिरेकमन्यतः प्रतिपादयति—शेषाण्यौदारिकादीनि तत्प्रसाध्यप्रयोजननिवर्तनाय नालं नापि नियमत एव तावत्या स्थित्या योगः प्रमाणेन वेति ॥

तैजसस्य विचारः

भा०—तेजसो विकारस्तैजसं तेजोमयं तेजःस्वतत्त्वं शापानुग्रहप्रयोजनम् । नैवं शेषाणि ॥

टी०—तेजसो विकारस्तैजसमित्यादि । उष्णभावलक्षणं तेजः संसिद्धं सर्वप्राणिषु पाचकमन्धसः । तस्यैवंविधस्य तेजसो विकारस्तैजसमवस्थान्तरापत्तिरिति । एतदेव पर्यायान्तरेणाख्याति—**तेजोमयं स एव विकारार्थस्तेजःस्वतत्त्वम्**, तेजसः स्वतत्त्वं-स्वरूपं-आत्मा-स्वभावस्तत् तेजःस्वतत्त्वम् **शापानुग्रहप्रयोजनमिति** । लब्धिनिर्वृत्तिमपेक्ष्योच्यते शापानुग्रहौ प्रयोजनं यस्य निग्राह्यानुग्राह्यपक्षयोस्तत् तु शापानुग्रहप्रयोजनमिति । **नैवं शेषाणीति** । औदारिकादिभ्यो व्यतिरिच्यते एतत् स्वगुणैरिति प्रथयति—

कार्मणविचारः

भा०—कर्मणो विकारः कर्मात्मकं कर्ममयमिति कार्मणम् । नैवं शेषाणि ॥

टी०—कर्मणो विकार इत्यादि । ज्ञानावरणादिकर्मणो विकृतिः कार्मणमेकलोलीभाव इति कर्माणि तान्येवात्मा यस्य स्वरूपं **कर्ममयमिति** विकारार्थ एव पर्यायतः । **नैवं शेषाणि** इत्यौदारिकादिलक्षणव्युदासः । एवमन्वर्थसंज्ञकानि प्रतिपाद्य औदारिकादीन्येकप्रयत्नप्रसाध्यं लक्षणभेदाच्छरीरनानात्वमप्यतिदिशति—

स्पृष्टानि, पुरुषो भदन्त ! अन्तरा हस्तेन वा पादेन वा असिना वा प्रभुर्विच्छेत्तुम् ? नैषोऽर्थः समर्थः नैव तत्र शस्त्रं क्राम्यति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—एभ्य एव चार्थविशेषेभ्यः शरीराणां नानात्वं सिद्धम्। किं चान्यत्।

शरीराणां नानात्वे हेतवः

कारणतो विषयतः स्वामितः प्रयोजनतः प्रमाणतः प्रदेशसङ्ख्यातोऽवगाहनतः स्थितितोऽल्पबहुत्वत इत्येतेभ्यश्च नवभ्यो विशेषेभ्यः शरीराणां नानात्वं सिद्धमिति ॥ ४९ ॥

टी०—एभ्य एव चार्थविशेषेभ्यः शरीराणां नानात्वं सिद्धम् । उदाराद्यर्थविशेषेभ्यो विहितलक्षणेभ्यः विविक्तस्वरूपेभ्यः शरीराणां नानात्वं सिद्धं, घटपटादीनामिव लक्षणभेदात् सिद्धमिति । किं चान्यदित्यादि । न केवलमन्वर्थसंज्ञाख्यानद्वारेणैव विशेषः शरीराणाम्, अन्येभ्योऽपि हेतुभ्यः सम्भवत्येव कारणादिभ्यः । तत्र कारणतस्तावत् स्थूलपुद्गलोपचितमूर्त्यौदारिकम्। न तथा वैक्रियादीनि। 'परं परं सूक्ष्मम्' (अ० २, सू०३८) इति वचनात्॥ तथा विषयकृतो भेदः। विद्याधरौदारिकशरीराणि प्रत्यानन्दीश्वरादौदारिकस्य विषयः जङ्घाचारणं प्रत्यारुचकपर्यन्तात्[1] तिर्यक्, ऊर्ध्वमा पाण्डुकवनात्। वैक्रियमसङ्ख्येयद्वीपसमुद्रविषयम्। आहारकस्य यावन्महाविदेहक्षेत्राणि। तैजसकार्मणयोरासर्वलोकात्। तथा स्वामिकृतो विशेषः। औदारिकस्य मनुष्यतिर्यञ्चः । वैक्रियस्य देवनारकास्तिर्यङ्मनुष्याश्च केचित्। आहारकस्य चतुर्दशपूर्वधरमनुष्यसंयुतः। तैजसकार्मणयोः सर्वसंसारिणः। तथा प्रयोजनकृतो भेदः। औदारिकस्य धर्माधर्मसुखदुःखकेवलज्ञानावाप्त्यादि प्रयोजनम्। वैक्रियस्य स्थूलसूक्ष्मैकत्वव्योमचरक्षितिगतिविषयाद्यनेकलक्षणा विभूतिः । आहारकस्य तु सूक्ष्मव्यवहितदुरवगाहार्थव्यवस्थितिः। तैजसस्याहारपाकः शापानुग्रहदानसामर्थ्यं च। कार्मणस्य भवान्तरगतिपरिणामः। तथा प्रमाणकृतो भेदः । सातिरेकं योजनसहस्रमौदारिकम्। योजनलक्षप्रमाणं वैक्रियम्। रत्निप्रमाणमाहारकम्। लोकायामप्रमाणे तैजसकार्मणे। तथा प्रदेशसङ्ख्यातो भेदः। 'प्रदेशतोऽसङ्ख्येयगुणं प्राक् तैजसात् अनन्तगुणे परे' (अ० २, सू० ३९-४०) इत्युक्तः प्रदेशभेदः प्राक्। तथाऽवगाहनाकृतो विशेषः। सातिरेकयोजनसहस्रप्रमाणमौदारिकमसङ्ख्येयगुणप्रदेशेषु यावत्स्ववगाढं भवति तेभ्यो बहुतरकासङ्ख्येयप्रदेशावगाढं योजनलक्षप्रमाणं वैक्रियं भवति, आहारकमाभ्यामल्पप्रदेशावगाढं भवति हस्तमात्रत्वात्, तैजसकार्मणे लोकान्तायताकाशश्रेण्यावगाढे भवतः। तथा स्थितिकृतो भेदः। औदारिकं जघन्येनान्तर्मुहूर्तस्थिति, उत्कर्षेण त्रिपल्योपमस्थिति। वैक्रियं जघन्येनान्तर्मुहूर्तस्थिति, उत्कर्षेण त्रयस्त्रिंशत्सागरोपमस्थिति। आहारकमन्तर्मुहूर्तस्थित्येव। तैजसकार्मणयोः सन्तानानुरोधादनादित्वमपर्यवसानता चाभव्यसम्बन्धितया, अनादित्वं सपर्यवसानता च भव्यसम्बन्धित्वेनेति। तथाऽल्पबहुत्वकृतो विशेषः। सर्वस्तोकमाहारकं यदि सम्भवति कदाचिन्न सम्भवत्यपि। किं कारणम्? येन तस्यान्तरमुक्तं जघन्येनैकसमयः, उत्कृष्टतः षण्मासाः, तद्यदि भवति ततो जघन्येनैकमादि कृत्वा यावदुत्कर्षेण नवसहस्राणि युगपद् भवन्त्याहारकशरीराणाम्। आहारकाद् वैक्रियशरीराण्यसङ्ख्येयगुणानि नारकदेवानामसङ्ख्येयत्वात् असङ्-

१ 'पर्वतात्' इति क-पार्श्वस्थपाठः। २ 'तस्यान्तर्मुहूर्तं' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ख्येयोत्सर्पिण्यवसर्पिणीसमयराशिसमसङ्ख्यानि भवन्ति। वैक्रियशरीरेभ्य औदारिकशरीराण्यसङ्ख्येयगुणानि, तिर्यक्शरीरमनुष्याणामसङ्ख्येयत्वात्, असङ्ख्येयोत्सर्पिण्यवसर्पिणीसमयराशिसमसङ्ख्यानि ॥ ननु च तिर्यञ्चोऽनन्ताः तत् कथमानन्त्ये च सति असङ्ख्येयानि शरीराणि स्युः? । उच्यते—प्रत्येकशरीराणामसङ्ख्येयानि साधारणास्त्वनन्तास्तेषामनन्तानामेकं शरीरं भवतीत्यतोऽसङ्ख्यातानि, न पुनरनन्तानामपि प्रत्येकं शरीरमस्ति, तस्मात् सुष्ठूक्तमसङ्ख्येयानीति, औदारिकशरीरेभ्यस्तैजसकार्मणान्यनन्तगुणानि । तानि हि प्रत्येकं सर्वजीवानां संसारिणां भवन्त्यतोऽनन्तानि, न पुनरेकं तैजसं कार्मणं वा बहूनामिति ॥ एवमेतेभ्यः कारणादिभ्यो नवभ्यो विशेषेभ्यः शरीराणां नानात्वं सिद्धं-प्रतिष्ठितमवसातव्यमिति ॥ ४९ ॥

लिङ्गसूत्रे प्रस्तावना

भा०—अत्राह—आसु चतसृषु संसारगतिषु को लिङ्गनियमः? । अत्रोच्यते—जीवस्यौदयिकेषु भावेषु व्याख्यायमानेषूक्तम्-'त्रिविधमेव लिङ्गं-स्त्रीलिङ्गं पुल्लिङ्गं नपुंसकलिङ्गमिति' (अ० २, सू० ६)। तथा चारित्रमोहे नोकषायवेदनीये त्रिविध एव वेदो वक्ष्यते (अ० ८, सू० १०) स्त्रीवेदः पुंवेदो नपुंसकवेद इति। तस्मात् त्रिविधमेव लिङ्गमिति ॥ तत्र ।

टी०—अत्राह—आसु चतसृषु संसारगतिषु को लिङ्गनियम इति सम्बन्धग्रन्थः। अत्रावसरे शिष्यः प्रश्नयति-आसु नरकतिर्यङ्मनुष्यामराख्यासु चतुःसङ्ख्यानियतासु संसारगतिषु को लिङ्गनियम इति, कियन्ति लिङ्गान्यासु गतिषु सम्भवन्तीति पृच्छचते, लिङ्गसङ्ख्यामेव तावन्निर्धारयितुमिच्छति, न पुनः किं लिङ्गं कस्यां गताविति पृच्छचते। अत्रोच्यते-प्राक् तावल्लिङ्गेयत्ता निर्धार्यते ततश्च निर्वृत्तानि लिङ्गानि सङ्ख्यया गतिषु विभक्ष्यन्त इति। अतस्तमेव नियमं दर्शयति-त्रिविधमेव लिङ्गं न न्यूनमधिकं वा, तच्च प्राक् प्रदर्शितं प्राय इत्येवमावेदयति जीवस्यौदयिकेष्वित्यादिना भाष्येण गतिकषायलिङ्गसूत्रे (अ० २, सू० ६) औदयिकमेकविंशतिभेदमाचक्षाणेन स्त्रीपुंनपुंसकलिङ्गानि त्रीण्येवाभिहितानि किमिति न स्मर्यन्ते? तथा चारित्रमोह इत्यादि द्विविधो मोहोऽष्टमे वक्ष्यते (अ० ८, सू० १०) दर्शनचारित्रभेदात्, तत्र चारित्रमोहे चारित्रमोहोऽपि द्विविधः-कषायचारित्रमोहो नोकषायचारित्रमोहश्च। तत्र नोकषायवेदनीये हास्यरत्यरतिभयशोकजुगुप्सास्त्रीपुंनपुंसकवेदभेदे त्रिविध एव वेदो वक्ष्यते। यस्य कर्मण उदयात् पुरुषाभिलाषस्तत् कर्म स्त्रीवेदशब्दाभिधेयम्, यस्य पुनरुदयात् स्त्र्यभिलाषस्तत् कर्म पुरुषवेदः, स्त्रीपुरुषद्वयाभिलाषो यदुदयात् तत् कर्म नपुंसकवेद इति, तस्मात् त्रिविधमेव लिङ्गमन्यस्यासम्भवात्, तदेव चैषां स्वस्थानं वेदानां तथैव च स्वरूपतो विस्तरेण व्याख्यास्यन्ते, तत्र चेयत्तया व्यवच्छिन्नाः सन्त इह संसारगतिषु नियम्यन्ते को वेदः कस्यां गताविंत्यत आह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रम्—नारकसम्मूर्च्छिनो नपुंसकानि ॥ २—५० ॥

टी०—केनचित् पुनरधीयते-नपुंसकवेदवन्तो जीवाः नारकसम्मूर्च्छिनो नपुंसकाः, नपुंसकं येषां विद्यते, अर्शआदिपाठादतं विधाय ॥

भा०—**नारकाश्च सर्वे सम्मूर्च्छिनश्च नपुंसकान्येव भवन्ति, न स्त्रियो न पुमांसः । तेषां हि चारित्रमोहनीयनोकषायवेदनीयाश्रयेषु त्रिषु वेदेषु नपुंसकवेदनीयमेवैकमशुभगतिनामापेक्षं पूर्वबद्धनिकाचितमुदयप्राप्तं भवति, नेतरे इति ॥ ५० ॥**

नपुंसकवेदवन्तो जीवाः

टी०—**नारकाश्चेत्यादि** भाष्यम् । नरकेषु भवा नारकाः **सर्वे** सप्तसु पृथिवीषु वर्तमानाः **सम्मूर्च्छिनश्च** सम्मूर्च्छनं सम्मूर्च्छः सम्मूर्च्छा वा सम्मूर्च्छनजन्मेत्यर्थः तद् येषां विद्यते ते सम्मूर्च्छिनः, सम्मूर्च्छनजन्मभाजश्च पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुरिन्द्रियाश्च केचित् तिर्यङ्मनुष्याः, सर्वे एते **नपुंसकान्येव** नपुंसकवेदभाज एवेत्यवधारयति। सामर्थ्यालब्धमवधारणाफलं दर्शयति-**न स्त्रियो न पुमांसः** न स्त्रीवेदभाजो न पुरुषवेदवेदिनः, किं पुनः कारणं नपुंसकवेद एव तेष्वित्यत आह-**तेषां हीत्यादि** । यस्मात् तेषां नारकाणां सम्मूर्च्छनजन्मनां च **चारित्रमोहनीयनोकषायवेदनीयाश्रयेषु त्रिषु वेदेषु**, चारित्रमोहनीयं च तन्नोकषायवेदनीयं चेति चारित्रमोहनीयनोकषायवेदनीयम्-नवधा हास्यादि तद् आश्रयः-स्थानं येषां ते तदाश्रयास्तेषु तदाश्रयेषु त्रिषु वेदेषु निर्धार्यते । **नपुंसकवेदनीयमित्यादि** । नपुंसकत्वानुभवो नपुंसकवेदनीयं तदेवैकमशुभगतिनामापेक्षम्, प्रदर्शनवाक्यमिदमशुभगतिनामापेक्षमिति, अशुभगत्यादिनामगोत्रवेद्यायुष्कोदयापेक्षो मोहोदयः परो येनाशुभं महानगरदाहोपमं मैथुनाभिलाषमनुभवन्ति नारकाकाङ्क्षारूपमिति, सम्मूर्च्छनजन्मानोऽपि हि तिर्यञ्चो मनुष्याश्चाशुभगत्यादिनामगोत्रवेद्यायुष्कोदयापेक्षमोहोदयाकाङ्क्षावन्तो नपुंसकत्वमनुभवन्ति, **पूर्वबद्धनिकाचितमुदयप्राप्तं** पूर्वस्मिन् जन्मन्यनन्तरे बद्धं नपुंसकत्वयोग्यास्रवैः परिगृहीतमित्यर्थः । निकाचितं तदेव ग्रहणानन्तरमात्मसात्कृतं क्षीरोदकवदन्योन्यानुगतिलक्षणेन सम्बन्धेनात्मप्रदेशैः सहाविभागितयाऽध्यवसायविशेषाद् व्यवस्थापितम्, **उदयप्राप्तमिति** समासादितपरिपाकावस्थम्, तदेवंविधं नपुंसकवेदनीयमेव नारकसम्मूर्च्छिमानां जन्तूनां दुःखबहुलत्वाद् **भवति, नेतरे** स्त्रीपुंवेदनीये कदाचिदिति ॥ ५० ॥

उक्तं नारकसम्मूर्च्छिनां लिङ्गम्, अथ देवानां किं लिङ्गमित्यत आह—

सूत्रम्—न देवाः ॥ २—५१ ॥

देवानां वेदौ

भा०—**देवाश्चतुर्निकाया अपि नपुंसकानि न भवन्ति, स्त्रियः पुमांसश्च भवन्ति । तेषां हि शुभगतिनामापेक्षे स्त्रीपुंवेदनीये पूर्वबद्धनिकाचिते उदयप्राप्ते द्वे एव भवतो नेतरत् । पारि-**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शेष्याच्च गम्यते जरायण्डपोतजास्त्रिविधा भवन्ति—स्त्रियः पुमांसो नपुंसकानीति ॥ १ ॥

टी०—प्रकृतस्य प्रतिषेधं दर्शयति, नपुंसकवेदः प्रकृतः, स एव प्रतिषिध्यते, दीव्यन्ति इति देवाः क्रीडाद्युतिगतिष्वतिशयवतीषु वाच्याः, चत्वारो निकायाः-सङ्घाताः-समूहाः येषां भवनवनचरज्योतिषिकवैमानिकाख्यास्ते चतुर्निकायास्ते चतुर्विधा अपि न नपुंसकानि भवन्ति, नपुंसकवेदप्रतिषेधोत्तरकालं चाप्रतिषिद्धत्वात् सामर्थ्यात् स्त्रीपुरुषवेदद्वययोगिता गम्यतेऽतस्तां दर्शयति—स्त्रियः पुमांसश्च भवन्ति । स्त्रीवेदभाजः पुरुषवेदवेदिनश्चेत्यर्थः। भवनपतिव्यन्तरज्योतिषिकसौधर्मेशानेषु वेदद्वयमप्युपपाततः, तदुपरि पुरुषवेद एव, नेतरः। किं पुनः कारणं देवानां नपुंसकवेदो नास्तीत्यत आह—तेषां हीत्यादि। यस्मात् तेषां शुभगत्यादिनामगोत्रवेद्यायुष्कापेक्षमोहोदयादभिलषितप्रीतिसाधकं मायार्जवोपचितं करीषतृणपूलाग्निसदृशं स्त्रीवेदनीयमेकं पुंवेदनीयमेवाधिकं पूर्वबद्धनिकाचितमुदयप्राप्तं भवति नेतरन्नपुंसकवेदनीयमबद्धत्वात्। अत्र च स्त्रीवेदो नपुंसकवेदापेक्षया शुभ उच्यते, न पुनः शुभ एव । इदानीं सामर्थ्यालुब्धं दर्शयति—पारिशेष्याच्च गम्यत इत्यादिना । परिशेषसिद्धया विज्ञायते जरायण्डपोतजास्त्रिविधा भवन्ति-स्त्रियः पुमांसो नपुंसकानि चेति ॥ ५१ ॥

आयुषोऽपवर्तनादि

भा०—अत्राह—चर्तुगतावपि संसारे किं व्यवस्थिता स्थितिरायुषः उताकालमृत्युरप्यस्तीति ? । अत्रोच्यते-द्विविधान्यायूंषि-अपवर्तनीयानि अनपवर्तनीयानि च। अनपवर्तनीयानि पुनर्द्विविधानि-सोपक्रमाणि निरुपक्रमाणि च । अपवर्तनीयानि तु नियतं सोपक्रमाणीति ॥ तत्र—

टी०—अत्राहेत्यादिः सम्बन्धग्रन्थः । अत्र प्रस्तावे संशयानः प्रश्नयति-नारकतिर्यङ्मनुष्यामरभेदभाजि संसारेऽतीतानन्तरजन्मपरिगृहीतस्यायुषः किं व्यवस्थिता तावत्येव स्थितिः-अनुभवकालः पूर्वबद्धा हि यावती, अथापरिपूरितायामपि तस्यां स्थितावपहाय प्राणान् परलोकप्रयाणाभिमुखः प्राणी प्रवर्तते ?। अकाले मृत्युः अकालमृत्युः प्रागुपात्तजीवनकालावधेर्वाक्काले स्वोपात्तमनुष्यायुर्द्रव्याणामनुभवतः कृत्स्नपरिक्षयो मृत्युः स पुनः किमकालेऽपि पूर्वप्रतिबद्धायुःसंस्कारविच्छेदाबधावपरिसमाप्तेऽपि भवति आहोस्विन्नियमत एव तावन्तं कालं प्राणिति प्राणीति,कुतः पुनरयं संशयः? सकललोकप्रवादात्,एवं लौकिकाः प्रभाषन्ते—अयमकाले मृतो जन्तुर्व्यापादितो वा, अयं पुनः स्थविरः स्वकालपरिमाणमायुरनुभूय मृत्युगोचरमायात इत्यतः सन्देहः किमकालेऽपि मरणयोग इति ? तथैव सङ्ग्रामे समर्थतरुणबहुजनव्यापत्तिमनुप्रेक्ष्य युगपत् संशयप्रसवः, न तत्र प्रतिपत्तिराधातुं शक्याऽऽत्मनि अयुक्तिकत्वात्,सर्व एते समायुषः सममेकसंख्यानिबन्धनमेभिर्भवान्तरमासाद्यायुरुपचितमिति न शक्यमवगन्तुम्, अतः संशेते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनः किमकालमृत्युरप्यस्तीति, तत एव आयोधनादक्षतवपुषः परिणति(त)शतजर्जरसकलसन्धयः स्थविरास्तीव्रहेतिहस्तास्तीरयित्वा समरमुपगच्छन्तोऽवलोक्यन्ते, अतोऽवगम्यते—न खलु कश्चिदकाल एव विषमाण्यवगाहमानोऽपि शरशतापादितक्षतिरपि प्रकृष्टदुःखवेदनार्तो मरणमभिलषन्नपि प्राणैर्वियुज्यते, एवमनेकस्मिन् संशयबीजप्रसवे सति प्रश्नप्रवृत्तौ प्रतिवचनमुच्यते-द्विविधान्यायूंषि—अपवर्तनीयान्यनपवर्तनीयानि चेति । अकाले मृत्योरस्ति सम्भव इत्येवंविधार्थप्रदर्शनपरायणमिदमास्तीर्यते भाष्यम् । द्विविधान्यायूंषि—जीवितानि भवन्ति,

आयुषो द्वैविध्यम्

प्रयोगविशेषाच्च द्वैविध्यं, न स्वभावात्, तत्रायुषो बन्धकास्तावत् सम्यग्मिथ्यादृष्टिविरहिता मिथ्यादृष्टेरारभ्य यावदप्रमत्तसंयत इति षट्सु स्थानेषु जन्तवः अजघन्योत्कृष्टाध्यवसायविशेषभाजः पृथुकषायाः साद्यध्रुवायुर्विकल्पयुजः, तत्र नारकदेवासङ्ख्येयवर्षायुषः प्राणिनः षण्मास्यामवशेषायां नियमादायुषो बन्धकाः । शेषास्त्वायुषस्त्रिभागेऽवशेषे पुरोवर्तिजन्मानुभवयोग्यमायुर्बध्नन्ति, त्रिभागत्रिभागे वाऽवशेष इति । अथवा त्रिभागत्रिभागत्रिभागे वाऽवशेष इति । एतदुक्तं भवति—त्रिभागावशेषायुषो नवभागशेषायुषः सप्तविंशतिभागावशेषायुषो वा परभवायुर्बध्नन्ति, ततः परं न बध्नन्तीत्यर्थः । तत्रावनिजलज्वलनमारुततरुद्वित्रिचतुरिन्द्रियाणां निरुपक्रमायुषां च पञ्चेन्द्रियाणां नियमित एव त्रिभागावशेषे बन्धो भवत्यायुषः, सोपक्रमायुषां पुनः पञ्चेन्द्रियाणामनियमेन बन्धो यावत् सप्तविंशतिभागावशेषकल्पनेति, ते च प्राणिनस्तदैव तदायुर्बध्नन्तोऽध्यवसायविशेषात् केचिदपवर्तनार्हं कुर्वन्ति केचिदनपवर्तनीयमिति, मन्दपरिणामप्रयोगोपचितमपवर्त्यं तीव्रपरिणामप्रयोगोपचितमनपवर्त्यम्, तत्रापवर्तना नाम प्राक्तनजन्मविरचितस्थितेरल्पतापादनमध्यवसानादिविशेषात्, अनपवर्तनीयं पुनस्तावत्कालस्थित्येव न ह्रासमायाति स्वकालावधेरारात्, तैलवर्तिक्षयतो निर्विघातप्रदीपोपशान्तिवत् घनसंहतत्वाद् वा पवनश्लेषवत्, तच्च किलाखिन्नवीर्यारब्धत्वात् असङ्ख्येयसमयोपार्जितमायुरनपवर्त्यम्, तथा गाढबन्धनत्वान्निकाचितबन्धात्मनियमादनपवर्त्यायुर्भवति । अथवैकनाडिकापरिगृहीतमायुः संहतिमत्त्वात् संहतपुरुषराशिवदभेद्यं वा एकनाडिकाविवरप्रक्षिप्तबीजनिष्पादितसस्यसंहतिवद् वा, विवराद् बहिः पतितबीजप्रसूतं हि सस्यमसंहतत्वात् प्रविरलतायां सत्यां सर्वस्यैव गवादेर्गम्यम्, एवं किलायमात्माऽऽयुर्बध्नन्नेकात्मलब्धिपरिणामस्वाभाव्याच्छरीरव्याप्यपि सन्नाडिकामार्गपरिणामो भवति, ततस्तामवस्थामासाद्य यानायुष्कपुद्गलान् बन्धाति ते नाडिकाप्रविष्टत्वात् संहतिमत्त्वे सति अभेद्या विषशस्त्राग्न्यादीनामिति, मन्दतीव्रपरिणामसन्निधानाच्च स तत् तथा जन्मान्तर एव रचयति इहत्यजन्मव्याधिवत् । अल्पाद्धातुवैषम्यनिदानापथ्यसेवनाद् यो व्याधिः समुपजातः स कालान्तरेणोपेक्ष्यमाणः समासादितोदग्रवृद्धिः समूलघातं निहन्ति शरीरकं, न पुनराश्वेव, निपुणभिषग्वरोपदिष्टतत्प्रत्यनीककक्रियाकलापानुष्ठानाच्च द्राग् विच्छेदमापाद्यते, तथैव यन्म-

---

१ ' समरमपयान्तः ' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्दपरिणामप्रयोगकारणाभ्यासादासादितमनेनायुर्जन्तुनाऽतीतजन्मनि तदपवर्तनार्हमाचक्षते क्षतक्लेशाः । यः पुनरतिमहान्तं धातुक्षोभमाश्रित्यापथ्यनिदानासेवनादिना समजनि व्याधिरतिदीर्घकालकलापापादितजरठिमासमुपगूढनिरवशेषाङ्गोपाङ्गसङ्घातः कुष्ठक्षयादिः, स खलु भेषजप्रकारमनेकमुपचीयमानमनुदिनमप्यवगणय्य सञ्जातबलः क्षिप्रमाक्षिपति तं रोगिणमकाण्ड एव, न खलु प्रयत्नपरमेण धन्वन्तरिणाऽपि शक्यः समुच्छेत्तुम् । एवं हि तीव्रपरिणामप्रयोगबीजजनितशक्ति तदायुरात्तमतीतजन्मनि न शक्यमन्तराल एवावच्छेत्तुमित्यनपवर्तनीयमुच्यते । तथा हि—कालाकालसमाप्त्योरायुषःसम्भवत्यनेकं निदर्शनं, तद्बलाच्च प्रतीतिरुपजायते श्रोतुः, अतस्तदभिधानमाम्रफलपाकवत् भस्मकव्याधिपरिगतपुरुषभोजनवत् वेष्टितार्द्रपटवितताशोषवत्, वेष्टितपलालवृततरज्जुप्रगुणीकृतदाहवत्, एकार्थेषु बुद्धिमन्दग्राहककालभेदवत्, एकमार्गेऽश्वपङ्गुगमनभेदवत्, यथैता भिन्नकालानुवर्तिन्योऽप्यवस्थास्तुल्यनिदर्शनगतास्तथा तुल्येऽपि कर्मणि स्वपरिणामादिक्रियाविशेषाद् भिन्नोऽनुभवकालः परममध्यमजघन्याख्यः, तस्माद् द्विविधमायुरपवर्तनीयमनपवर्त्यं चेति व्यवस्थितम् ॥ अधुनाऽनपवर्तनीयायूंषि द्विविधान्यभिधित्सुराह—**अनपवर्तनीयानि पुनर्द्विविधानि—सोपक्रमाणि निरुपक्रमाणि च ।** तत्रोपक्रमणमुपक्रमः प्रत्यासन्नीकरणकारणमुपक्रमशब्दाभिधेयम्, अतिदीर्घकालस्थित्यप्यायुर्येन कारणविशेषेणाध्यवसानादिनाऽल्पकालस्थितिकमापाद्यते स कारणकलाप उपक्रमः,तेन तादृशोपक्रमेण सोपक्रमाण्यनपवर्तनीयान्यायूंषि भवन्ति । निर्गतोपक्रमाणि निरुपक्रमाण्यध्यवसानादिकारणकलापाभावात्, यथैव तज्जिहास्यते अतिदीर्घकालस्थितिस्वपरिणतिविशेषात् तथा अल्पमपि वृद्धिमापादयिष्यते रसायनाद्युपयोगतश्चेत् तन्न, अबद्धत्वात्, जन्मान्तरे हि बद्धमायुस्तावता वा कालेनानुभूयेत ह्रस्वीयसा वाऽध्यवसानादियोगात् आभिचारिककर्मणाऽवाप्य कालफलपाकवत् स्याद्, अबद्धं पुनर्न शक्यते संवर्धयितुममृतोपयोगेनापि । यथा हि दीर्घपटः प्रागुक्तो वेष्टनयाऽल्पः शक्यः कर्तुं न पुनर्द्राघिमानमापादयितुमनुपात्ततावद्दलिकत्वात् । स्यादेतद् रसायनाद्युपयोगाद् यावत्स्थितिकमात्तं प्रागायुस्तावतीं स्थितिमखण्डयत् तदासीत न पुनर्वृद्धिमश्रद्धेयामाधातुमलं तदिति । अत्र च किलौपपातिका असङ्ख्येयवर्षायुषश्च निरुपक्रमा एव, चरमदेहाः उत्तमपुरुषाश्च सोपक्रमा निरुपक्रमाश्च ॥ नन्विदं विप्रतिषेध्यमनपवर्त्यायुषः सोपक्रमाश्चेति । उच्यते—अध्यवसानाद्युपक्रमकारणानि किल सन्त्यमीषां चरमदेहोत्तमपुरुषाणां न पुनरायुरपवर्त्यते, सत्स्वपि तेष्वनपवर्त्यायुष्ट्वात्, न खलूपक्रमसन्निधानं तत्र प्रतिषिध्यते, किन्तु सत्यप्युपक्रमकारणसान्निध्येऽतिगाढबन्धत्वान्न तदायुरपवर्त्यते ॥ ननु चौपपातिकासङ्ख्येयवर्षायुषामपि तुल्यमेतत् सन्निधानमिति । उच्यते—सत्यम्, नारकादीनामुपक्रमकलापः सन्निहितस्तथापि ते सोपक्रमायुषो न भण्यन्ते

अपवर्तनेऽपि क्षयाभावः

---

१ ' मार्गेऽश्वपङ्गु ' इति ख-पाठः । २ ' तथैव ' इति ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कदाचिदप्युपक्रान्तेरदर्शनात् । अपरे वर्णयन्ति—तीर्थकरौपपातिकानां नोपक्रमतो मृत्युः, शेषाणां चरमदेहोत्तमपुरुषासङ्ख्येयवर्षायुषामुभयथा, एवंविधाभ्युपगमे भाष्यमुपरिष्टादगमितं स्यात्, औपपातिकाश्चासङ्ख्येयवर्षायुषश्च निरुपक्रमाः, चरमदेहाः सोपक्रमा निरुपक्रमाश्चेति भाष्यमिदमत्यन्तमसङ्गतं स्यात् । कर्मप्रकृतिग्रन्थानुसारिणस्तु वर्णयन्ति—

" अद्धा जोगुक्कस्सा, बंधित्ता भोगभूमिए सुलहं ।
सव्वप्पजीवितं वज्जइत्तु उवट्टि(य)त्ता दोण्हम् ॥ "

युगलिनोऽप्यायुषोऽपवर्तनम्

उत्कृष्टप्रदेशोदयविचारे सङ्ग्रहिष्यामियं गाथा, अर्थस्त्वस्याः—उत्कृष्टबन्धाद्वायामायुषो योगेनोत्कृष्टेन तिर्यगायुर्मनुष्यायुर्वा बद्ध्वा मृतः सन् भोगभूमिजेषु तिर्यक्षु मनुष्येषु च त्रिपल्योपमस्थितिषूत्पन्नः पश्चादाशु सर्वाल्पजीवितमन्तर्मुहूर्तं विहाय शेषमायुस्त्रिपल्योपमस्थितिकमपवर्तयन्त्यन्तर्मुहूर्तोनमिति । यदा च तदपवर्तितं भवति तदा किलोत्कृष्टः प्रदेशोदयो भवतीति, न च शक्यमनेनाभिप्रायेण भाष्यं गमयितुमतिविरोधात्, तस्मादवस्थितमिदमनपवर्तनीयानि द्विविधानि-सोपक्रमाणि निरुपक्रमाणि चेति, अपवर्तनीयानि तु नियतं सोपक्रमाणि। तुशब्दोऽवधारकः । सोपक्रमाण्येवापवर्तनीयान्यायूंषि भवन्ति सर्वदा, यतो न ह्यपवर्तनाध्यवसानादिकं निमित्तमन्तरेणात्मलाभं प्रतिपद्यते । तत्र केऽनपवर्त्यायुषः के वाऽपवर्त्यायुष इत्यन्यतराख्यानेऽन्यतरपरिज्ञानं भवति लघुत्वाच्चानपवर्त्यायुषः सूत्रेण दर्शयति—

सूत्रम्—औपपातिकचरमदेहोत्तमपुरुषासङ्ख्येयवर्षायुषोऽनपवर्त्यायुषः ॥ २—५२ ॥

टी०—अनपवर्त्यायुषो निर्धार्यन्तेऽमुना योगेन, तच्चावधारणं तत्र शब्देनाख्याति भाष्यकारः ।

अनपवर्त्यायुषः स्वामिनः

भा०—औपपातिकाश्चरमदेहा उत्तमपुरुषाः असङ्ख्येयवर्षायुष इत्येतेऽनपवर्त्यायुषो भवन्ति । तत्र औपपातिका नारकदेवाश्चेत्युक्तम् (अ० २, सू० ३५)। चरमदेहा मनुष्या एव भवन्ति, नान्ये । चरमदेहा अन्त्यदेहा इत्यर्थः । ये तेनैव शरीरेण सिद्ध्यन्ति । उत्तमपुरुषास्तीर्थकरचक्रवर्त्यर्धचक्रवर्तिनः । असङ्ख्येयवर्षायुषो मनुष्यास्तिर्यग्योनिजाश्च भवन्ति ।

टी०—औपपातिका इत्यादि भाष्यम् । उपपातजन्मानो नारकदेवाः, चरमः-अन्त्यो देहो येषां ते चरमदेहाः-पुनर्देहग्रहणं ये न करिष्यन्ति, उत्तमपुरुषास्तीर्थकरचक्रवर्तिबलदेववासुदेवाः । केचिदभिदधते—नास्ति सूत्रकारस्योत्तमपुरुषग्रहणमिति तत् कथं तीर्थकरादि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्ग्रह इति चेत्, एवं च मन्यन्ते चरमदेहग्रहाद् ग्रहीष्यन्ते, कथम्? ये किल चरमदेहास्ते नियमत एवोत्तमा भवन्ति, उत्तमास्तु चरमदेहत्वेन भाज्या वासुदेवादय इति, तस्मादनार्षमुत्तमपुरुषग्रहणमिति, उभयथा च भाष्यमुपलक्ष्यते अविगानात्, आदावुत्तमपुरुषास्तीर्थकरादय इति विवृतमुत्तरकालं पुनर्नोपात्तमुत्तमपुरुषग्रहणं निरुपक्रमसोपक्रमनिरूपणायाम्, अतो भाष्यादेव सन्देहः, किमस्ति नास्तीति संशयात्तमेवेदमस्माकम्। असङ्ख्येयवर्षाणि गणितविषयातीतान्यायूंषि येषां तेऽसङ्ख्येयवर्षायुषोऽकर्मभूम्यन्तरद्वीपका मनुष्याः, भरतैरावतविदेहेषु च तत्तुल्यकालाः पञ्चेन्द्रियतिर्यग्योनयश्च तदन्यक्षेत्रद्वीपसमुद्रेषु, एवमेतेऽनपवर्त्यायुषो द्रष्टव्याः। एतदेव स्पष्टयति भाष्यकारः—**औपपातिका नारका देवाश्चेत्युक्तमिति** स्मारयति प्रागभिहितं (अ०२,सू०३५), नाधुना व्याख्येयमिति। **चरमशरीरास्तु मनुष्या एव भवन्ति, नान्ये।** नारकतिर्यग्देवव्युदासः सिद्धचयोग्यत्वात्। चरमदेहान् प्रसिद्धतरपर्यायशब्देन कथयति—**चरमदेहा अन्त्यदेहा इत्यर्थः।** ये तेनैव शरीरेण सकलकर्मजालमपहाय सिद्धिमशेषकर्मापगमलक्षणामाप्नुवन्ति इति। **उत्तमपुरुषास्तीर्थकरचक्रवर्त्यर्धचक्रवर्तिनः** तीर्थकरनामकर्मोदयवर्तिनस्तीर्थकराः, चक्रवर्तिनोऽपि नवनिधिपतयश्चतुर्दशानां रत्नानां नेतारः स्वपौरुषोपात्तमहाभोगभुजः सकलभरताधिपा भवन्ति, अर्धचक्रवर्तिनस्तु बलदेववासुदेवाः[1] एवमादयश्चान्येऽपि किल प्रदर्शनाद् गणधरादयो गृह्यन्ते। **असङ्ख्येयवर्षायुषो मनुष्यास्तिर्यग्योनिजा भवन्तीत्यादि** भाष्यम्। एतेष्वेवासङ्ख्येयवर्षजीवित्वं लभ्यते, न नारकदेवेषु सम्भवन्त्यपि, तत्रासङ्ख्येयानि वर्षाण्यौपपातिकग्रहणान्निवार्यन्त इति, मनुष्याणां तिरश्चां च मध्ये सम्भवन्त्यसङ्ख्येयवर्षायुषस्तेऽनपवर्त्यायुषः। ते च—

भा०—सदेवकुरूत्तरकुरुषु सान्तरद्वीपकास्वकर्मभूमिषु कर्मभूमिषु च सुषमसुषमायां सुषमायां सुषमदुष्षमायामित्यसङ्ख्येयवर्षायुषो मनुष्या भवन्ति। अत्रैव बाह्येषु द्वीपेषु समुद्रेषु तिर्यग्योनिजा असङ्ख्येयवर्षायुषो भवन्ति। औपपातिकाश्चासङ्ख्येयवर्षायुषश्च निरुपक्रमाः। चरमदेहाः सोपक्रमा निरुपक्रमाश्चेति। एभ्य औपपातिकचरमदेहासङ्ख्येयवर्षायुर्भ्यः शेषा मनुष्यास्तिर्यग्योनिजाः सोपक्रमा निरुपक्रमाश्चापवर्त्यायुषोऽनपवर्त्यायुषश्च भवन्ति। तत्र येऽपवर्त्यायुषस्तेषां विषशस्त्रकण्टकाग्न्युदकाह्यशिताजीर्णाशनिप्रपातोद्बन्धनश्वापदवज्रनिर्घातादिभिः क्षुत्पिपासाशीतोष्णादिभिश्च द्वन्द्वोपक्रमैरायुरपवर्त्यते। अपवर्तनं शीघ्रमन्तर्मुहूर्तात् कर्मफलोपभोगः, उपक्रमोऽपवर्तननिमित्तम्॥

अपवर्तनीयायुषि हेतुः

---

१ 'बलदेवप्रतिवासुदेवाः' इति क-ख-पाठः। २ अयं तु घ-पाठः, '०पातिकं चरम०' इति तु ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—मन्दरनीलयोरुत्तरदक्षिणा गन्धमादनमाल्यवतोर्मध्य उत्तराः कुरवः एकादशयोजनसहस्रद्विचत्वारिंशाष्टशतसद्विकलविस्तृताः । मन्दरनिषधयोर्दक्षिणोत्तराः सौमनसविद्युत्प्रभयोर्मध्ये देवकुरवस्तावत्प्रमाणाः, सह देवकुरुभिरुत्तरकुरवः सदेवकुरूत्तरकुरवस्तत्र देवकुरूत्तरकुरुषु जम्बूद्वीपधातकीखण्डपुष्करद्वीपार्धवृत्तिषु, तथा हिमवतः प्राक् पश्चाद् विदिक्षु त्र्यादिषु नवान्तेषु योजनशतेषूदधावगाह्य तावद्विस्तरायामाः सप्तान्तरद्वीपाश्चतुश्चतुःप्रागुत्तरक्रमादेकोरुकादयस्तानन्तरद्वीपान् कायन्तीत्यन्तरद्वीपका मनुष्याः सहान्तरद्वीपकैः सान्तरद्वीपकाः, कर्मणो भूमयः यत्र जाताः प्राणिनः सकलं कर्म क्षपयित्वा सिद्ध्यन्ति तीर्थकराद्युपदेशात् ताः कर्मभूमयो भरतैरावतविदेहक्षेत्राणि पञ्चदश प्रत्येकं पञ्चभेदत्वात् । न कर्मभूमयोऽकर्मभूमयः तासु अकर्मभूमिषु-हैमवतहरिवर्षरम्यकहैरण्यवताख्यासु जम्बूद्वीपधातकीखण्डपुष्करवरद्वीपार्धवर्तिनीषु तथोक्तलक्षणासु कर्मभूमिषु च ये मनुष्याः प्रथमद्वितीयतृतीयसमासु यदा भवन्त्यसङ्ख्येयवर्षायुषस्तदा तेऽनपवर्त्यायुषो मन्तव्याः दृढबद्धत्वादग्न्यादिभिः कांह्रदुकापरान्नानुक्रमवत् । अत्रैव बाह्येष्वित्यादि । सदेवकुरूत्तरकुरुष्वित्यादि समस्तमुपलक्षयत्यत्रैवेति । तथा बाह्येषु मनुष्यक्षेत्राद् बहिर्ये वर्तन्ते द्वीपाः समुद्राश्च तेषु तिर्यग्योनिजा असङ्ख्येयवर्षायुषो भवन्ति,मनुष्यक्षेत्रे च बहिश्चेत्यसङ्ख्येयवर्षायुषां तिरश्चां सम्भवः । तत्र प्रागुक्तमनपवर्तनीयानि द्विविधानि भवन्तीति तद् दर्शयत्यधुना भाष्येण—औपपातिकाश्चासङ्ख्येयवर्षायुषश्च निरुपक्रमाः । न ह्येषां प्राणापानाहारनिरोधाध्यवसाननिमित्तवेदनापराघातस्पर्शाख्याः सप्त वेदनाविशेषाः सन्त्यायुषो भेदकाः उपक्रमा इति, अतो निरुपक्रमा एव । चरमदेहाः पुनः सोपक्रमा निरुपक्रमाश्चेति । अत्रोत्तमपुरुषा नोक्ताः, एतानि प्राणापाननिरोधादीनि किल चरमदेहेषु सम्भवन्त्येव नोच्छिन्दन्तीति सोपक्रमा भण्यन्ते, केचित् तत्र निरुपक्रमा येष्वेतानि न सम्भवन्तीत्यपीति । इदानीं सामर्थ्यलब्धमर्थं दर्शयति—एभ्य इत्यादि । उक्तलक्षणेभ्यः औपपातिकादिभ्यो व्यतिरिच्यमानाः शेषाः । ते च नियमतो मनुष्याः तिर्यञ्चो वा आयुरुभयथा भजन्ते, प्राणापाननिरोधादिकारणकलापोपक्रम्यत्वात् सोपक्रमायुषः केचित्, केचित् तु न तैरुपक्रम्यन्त इति निरुपक्रमायुषः । यदुक्तं-'प्रागपवर्तनीयानि तु नियतं सोपक्रमाणी'ति तद्विशेषदिदर्शयिषया आह—अपवर्त्यायुषोऽनपवर्त्यायुषश्च शेषाः । तत्र येऽपवर्त्यायुषस्ते नियतं सोपक्रमाः । ये पुनरनपवर्त्यायुषस्ते शेषाश्चेति-निरुपक्रमायुष एव । एतदेव भाष्यकारः स्पष्टयन् विभजते—तत्र येऽपवर्त्यायुषस्तेषामित्यादिना । तेषु मनुष्येषु तिर्यक्षु च येषामपवर्तनीयमायुस्तेषामपवर्त्यते । अमी विषादयो हेतवः सुज्ञानत्वाच्च न विवृताः । आदिशब्दाच्च पूर्वोक्ताः प्राणापाननिरोधादयः कांश्चिदपहाय ग्राह्याः । एभिर्हेतुभिरायुरपवर्तते स्वल्पीभवतीतियावत्, द्वन्द्व उपघात आयुषस्तस्योपक्रमैः, तत्प्रत्यासन्नीकरणैरित्यर्थः । किं

---

१ 'कंकटुकापरान्तानुपक्रमवत्' इति ग-टी-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनरपवर्तनमुच्यत इत्याह—**अपवर्तनं शीघ्रमन्तर्मुहूर्तात् कर्मफलोपभोगः**, न खलु कर्मनाशोऽपवर्तनं, किन्तु शीघ्रं यः सकलायुष्कर्मफलोपभोगस्तदपवर्तनम्, अनेनैतत् कथयति तावदपवर्तते तदायुर्यावदन्तर्मुहूर्तस्थितिजातं, ततः परं निवर्ततेतादृग्विधाध्यवसानाद्यभावात्। अत्र चापवर्तनफले कर्मफलोपभोगेऽपवर्तनशब्दः प्रयुक्तो भाष्यकारेण—**उपक्रमोऽपवर्तनं निमित्तमिति** पर्यायाख्यानमात्रमेतत्। अल्पतापत्तिकारणानामुपक्रमः, अपवर्तनमपि दीर्घकालस्थितितः कर्मणो ह्रस्वस्थितिकरणं निमित्तं विषशस्त्राद्यल्पताहेतुः, एवमिदमपवर्तनमिहायुरङ्गीकृत्याभिहितमन्यासामपि तु प्रकृतीनामनिकाचितावस्थानां प्रायोऽवसेयम्। तपोऽनुष्ठानात् पुनर्निकाचिता अप्यपवर्त्यन्त इति पारमर्षी श्रुतिः॥

अथेदानीं कर्मविनाशलक्षणमपवर्तनशब्दार्थमङ्गीकृत्य चोदयति—अत्राहेत्यादिना भाष्येण।

भा०—अत्राह—यद्यपवर्तते कर्म तस्मात् कृतनाशः प्रसज्यते यस्मान्न वेद्यते। अथास्त्यायुष्कं कर्म म्रियते च, तस्मादकृताभ्यागमः प्रसज्यते येन सत्यायुष्के म्रियते, ततश्चायुष्कस्य कर्मणः आफल्यं प्रसज्यते। अनिष्टं चैतत्। एकभवस्थिति वाऽऽयुष्कं कर्म न जात्यन्तरानुबन्धि। तस्मान्नापवर्तनमायुषोऽस्तीति। अत्रोच्यते—

टी०—अत्रावसरे पर आह—**यद्यपवर्ततेऽपैति**-विनश्यति फलमदत्त्वाऽऽयुष्ककर्म **तस्मात्** यस्य कर्मणः **कृतस्य** सतो निष्फलत्वान्नाशः **प्रसज्यते यस्मात् तन्न वेद्यते**—नानुभूयत इत्यर्थः। अनिष्टं चैतद्—अवश्यं हि कर्मोपात्तमनुरूपं फलमुपाधाय स्वामिनि परिशटत्युत्तरकालं न पुनरदत्त्वैव फलं विलीयत इति। **अथाननुभूते सत्येवायुष्के म्रियते तस्मादकृतस्यैवाभ्यागमो** मरणस्यान्तराल एव **प्रसज्यते, येन सत्यायुष्के म्रियते** ततश्चायुषो विफलताप्रसङ्गः, **अनिष्टं चैतत्**, न खलु जैनसिद्धान्तोऽयं यत् कृतं सत्कर्म प्रणश्यति, अदत्तफलमकृतमेव चानुभूयत इति। **अन्यच्च** अननुभूते तस्मिन् कर्मण्ययमपरो दोषः—**एकभवस्थिति वाऽऽयुष्कं कर्म न जात्यन्तरानुबन्धि**॥ ननु चान्यस्मिन् भवे बद्धमन्यत्र वेद्यते कथमेकभवस्थिति स्यात्?। उच्यते—न बन्धं प्रति ब्रूमः, उपभोगं प्रत्येकभवस्थितिकमायुराचक्ष्महे, एकस्मिन्नेकभवे भवत्यायुष उपभोगो न द्वितीयेऽपीति, यथा च त्वयाऽभ्युपेयते सत्येवायुषि म्रियते तथा तेनायुषा जात्यन्तरानुबन्धिना भाव्यम्, असिद्धान्तप्रस्थानं चैतत्, तस्माद् दोषचतुष्टयसम्भवान्नापवर्तनमायुषां विद्यते इति। अत्रोच्यते समाधानम्—

आयुषो ह्रासेऽपि कृतनाशादिदोषाभावः

भा०—कृतनाशाकृताभ्यागमाफल्यानि कर्मणो न विद्यन्ते। नाप्यायुष्कस्य जात्यन्तरानुबन्धः, किन्तु यथोक्तैरुपक्रमैरभिहतस्य सर्वसन्दोहेनोदयप्राप्तमायुष्कं कर्म शीघ्रं पच्यते तदपवर्त-

---

१ 'तदपवर्तते' इति क-पाठः। २ 'चायु०' इति घ-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वमित्युच्यते । संहतशुष्कतृणराशिदहनवत् । यथा हि संहतस्य शुष्कस्यापि तृणराशेरवयवशः क्रमेण दह्यमानस्य चिरेण दाहो भवति तस्यैव शिथिलप्रकीर्णोपचितस्य सर्वतो युगपदादीपितस्य पवनोपक्रमाभिहतस्यार्थस्याशु दाहो भवति तद्वत् ॥

टी०—न खल्वेते दोषाः प्रतिभान्ति जिनशासनावलम्बिनाम्, सिद्धान्तापरिज्ञानाच्चैवं चोद्यते, नायमार्हतः कृतान्तः फलमदत्त्वा कर्म प्रणश्यतीति, किन्तु यथोक्तैरुपक्रमैरध्यवसानविषशस्त्रादिभिरभिहतस्याभिप्लुतस्य सर्वसन्दोहेन—सर्वात्मना साकल्येनासादितोदयमायुष्कं कर्म प्राप्तविपाकमाशु भवति, यस्तु तस्य क्रमभावी विपाकः सोऽपवर्त्यते, अनुभवः पुनः सर्वस्य युगपन्न निषिध्यते इत्येषोऽपवर्तनशब्दार्थः । बहिर्वर्तमानवस्तुविशेषप्रसिद्ध्याऽन्तःप्रसिद्धिः साध्यत इत्याह—संहतेति । संहतत्वात् परिशेषत्वानपि तृणपुञ्जश्चिराय दह्यते, यदा तु विरलितो भवत्यवयवशस्तदाऽऽशु भस्मसाद् भवति, तद्वदायुषोऽप्यनुभवः, यदाऽऽयुर्दृढसंहतमतिघनतया बन्धकाल एव परिणामापादितं भवति पवनश्लेषवत् तत् क्रमेण वेद्यमानं चिराय वेद्यते, यत् पुनर्बन्धकाल एव शिथिलमाबद्धं तद् विकीर्णतृणराशिदाहवदपवर्त्याशु वेद्यत इति । एवंविधार्थप्रक्रमे दृष्टान्तसुलभतामादर्शयन्नाह—

अपवर्तनेऽप्यक्षयत्वे दृष्टान्तः

भा०—यथा वा सङ्ख्यानाचार्यः करणलाघवार्थं गुणकारभागहाराभ्यां राशिं छेदादेवापवर्तयति, न च सङ्ख्येयस्यार्थस्याभावो भवति, तद्वदुपक्रमाभिहतो मरणसमुद्घातदुःखार्तः कर्मप्रत्ययमनाभोगयोगपूर्वकं करणविशेषमुत्पाद्य फलोपभोगलाघवार्थं कर्मापवर्तयति, न चास्य फलाभाव इति ॥ किञ्चान्यत् ।

टी०—यथा वा सङ्ख्यानाचार्य इत्यादि । सङ्ख्यानं—गणितशास्त्रं तत्प्रधान आचार्यः सङ्ख्यानाचार्यो गणितप्रक्रियायामाहितनैपुणः, करणलाघवाय करणानि—गुणकारभागहारापवर्तनोद्वर्तनादीनि गणितशास्त्रप्रसिद्धानि, तत्र यो लघुः करणोपायः स्वल्पकालस्तेन तत्फलमानयति गणिताभिज्ञत्वात्, तुल्येऽपि हि फलानयने गुणकारभागहारौ चिराय तत्फलमभिनिवर्तयतः, स पुनर्गणितनिपुणो गुणकारभागहाराभ्यां चिरकालकारिभ्यां सकाशात् करणलाघवार्थमपवर्तनार्हं राशिच्छेदादेवार्धादिकादपवर्तयति, षण्णवत्यादिकम्, अनपवर्तनार्हं पुनर्लघुकरणाभिज्ञोऽपि न शक्नोत्येवापवर्तयितुम्, एकपञ्चाशदुत्तरसहस्रादिकम्, गुणकारभागहारक्रममेवात्र प्रयोजयति, न च सङ्ख्येयस्यार्थस्याभावो भवति, फलभूतस्य करणविशेषे सत्यपि प्रेप्सितफलाभेदमादर्शयति । करणव्यापारकालो बहुरल्पभेदः फलमविशिष्टमेवोभययोर्यथैतद्वदुपक्रमाभिहतो मरणसमुद्घातदुःखार्तः कर्मप्रत्ययमनाभोग-

१ ' प्रसिद्धयतः प्रसिद्धिः ' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योगपूर्वकं करणविशेषमुत्पाद्य फलोपभोगलाघवार्थं कर्मापवर्तयति, न चास्य फलाभाव इति, उपक्रमो-विषाग्निशस्त्रादिस्तेनाभिहतो मरणं-आयुःक्षयस्तत्र समुद्घातः, मरणसमुद्घातो नाम स्वशरीरकादात्मप्रदेशापकर्षो मूर्च्छानुगतश्चेतनाविमुक्त इवाव्यक्तप्रबोधलक्षणोऽस्तमितसकलबहिर्वार्तेचेष्टाक्रियाविशेषः स एव चातिचिररूढमूलप्रदेशोत्खननरूपत्वाद् दुःखं तेनार्तो-विषण्णः किंकर्तव्यताविमुखः कर्मप्रत्ययं-कर्मकारणं करणविशेषमुत्पाद्यापवर्तनाख्यम्, कर्मकारणता तु करणविशेषस्य पूर्वभवबन्धकाल एव प्रयत्नशैथिल्यात् सोपक्रमबन्धः अत्यन्तापरिज्ञानमनाभोगः अनाभोगकृतो योगः योगः-चेष्टाविशेषः अनाभोगयोगस्तत्पूर्वकं-तत्कारणम्। एतदुक्तं भवति-अजानान एव हि तदपवर्तनाकरणेनापवर्तनार्हं कर्मापवर्तयति आहाररसादिविपरिणामवत्, किमर्थं पुनरपवर्तयति ? फलोपभोगार्थमायुष्कर्मफलोपभोगायानाभोगनिर्वर्तितेन वीर्यविशेषेणेति, न चास्यायुष्कर्मणः फलाभावो भवति। इयांस्तु विशेषः—क्रमपरिभोगे बहुकालः, संवर्तितपरिभोगे स्वल्प इति, न पुनरुक्तं तत्र किञ्चित् कर्म परिशटतीति। किञ्चान्यदित्यनेनापरमपि प्रकृतार्थोपयोगिनमादर्शयति दृष्टान्तम्—

प्रकृतस्य समर्थनम्

भा०—यथा वा धौतपटो जलार्द्र एव संहताश्चिरेण शोषमुपयाति, स एव च वितानितः सूर्यरश्मिवायुभिर्हतः क्षिप्रं शोषमुपयाति, न च संहते तस्मिन्नभूतस्नेहागमो नापि वितानिते सति अकृत्स्नशोषः, तद्वद्यथोक्तनिमित्तापवर्तनैः कर्मणः क्षिप्रं फलोपभोगो भवति, न च कृतप्रणाशाकृताभ्यागमाफल्यानीति ॥ ५२ ॥

टी०—यथा वा धौतपट इत्यादि। एवं चैष प्रकृतोऽर्थः प्रतिपत्तव्यः। यथा वा क्षालितपटो जललेशोपचितमूर्तिरेवावेष्टितश्चिरायोद्वायति, स एव प्रयत्नविशेषतो विस्तारितः सन् सहस्ररश्मिमयूखमालाभिः परिपीताशेषजललवः प्रबलपवनवेगविघट्टितनिरवशेषप्रदेशः शीघ्रमपास्ताश्रितजलसङ्घातःसमासादिताधिकतरधवलिमाऽपि परिशष्यति। न च संहते तस्मिन्नभूतस्नेहागम इति, न चाभूतजलस्नेहागमो भवति तस्मिन् संवेष्टितपटे, किन्तु संहतत्वात् तावन्त एव जलावयवाः कालेन बहुना परिशटन्ति, न पुनरभूतानामेव स्नेहावयवानामागमः, नापि वितानिते अकृत्स्नशोषः, न च प्रसारिते तस्मिन् पटे कृत्स्नजलावयवपरिशोषो न भवति, विततेऽपि हि सर्व एव ते जलावयवाः परिशष्यन्ति, तेषां हि जलावयवानां यावती मात्रा वेष्टितपटे तावत्येव प्रसारितेऽपि, परिशोषकालस्तु भिद्यते। परे व्याख्यानयन्ति-न च संहते तस्मिन् न भूतः स्नेहापगमः, भूत एव सञ्जात एवेत्यर्थः, किन्तु बहोः कालात्, वितानिते तु द्रागेव च कृत्स्नवारिनिवहापगमः। तद्वदित्यनेन दार्ष्टान्तिकमर्थस्य दर्शयति—तुल्यतया यथोक्तनिमित्तापवर्तनः क्षिप्रं फलोपभोगो भवतीति। यथाऽभिहितं विषाग्निशस्त्रादि येषामपवर्तनानां तान्यवपर्तनानि यथोक्तानि निमित्तानि तैर्यथोक्तनिमित्ता-

१ '०वाग्व्यभिहतः' इति घ-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पवर्तनैः कर्मण आयुषः शीघ्रं फलविपाको भुज्यत इत्यर्थः । अतः क्रमानुभवे वेष्टितार्द्रपटपरिशोषकालवद् बहुत्वं कालस्य, प्रसारितार्द्रपटपरिशोषकालचाल्पकालता परिवर्तितायुष्कपरिभोगकालस्य । एवं च सति न कृतप्रणाशाकृताभ्यागमाकल्यानीति निगमयति—समस्तायुर्द्रव्योपभोगात् कृतविप्रणाशो नास्ति, न चायुष्यपरिनिष्ठिते म्रियत इत्यकृताभ्यागमाभावः, परिभुक्तत्वादेव च सकलस्यायुषो न वैफल्यप्रसङ्गः, अत एव जात्यन्तरानुबन्धत्वाभावोऽपीति । न चेह भाष्यकारेणोक्तः, प्रागुपन्यस्तस्यापि पूर्वकत्रयस्याभावे तदभावात्, तस्मादवस्थितमिदम्—केचिदकाले प्राणिनो म्रियन्ते पूर्वजन्मोपात्तायुष्ककालापेक्षया, केचिदनन्तरातीतजन्मोपात्तायुष्ककालमखण्डमवसायं प्रापय्य विहायास्ते(?) न शेषात् स्वकृतकर्मादिष्टं जन्मान्तरमनुबध्नन्तीति ॥ ५२ ॥

ग्रन्थाग्रमङ्कतः ३४२०

इति श्रीतत्त्वार्थसूत्रेऽर्हत्प्रवचनाधिगमे भाष्यानुसारिण्यां तत्त्वार्थटीकायां द्वितीयोऽध्यायः ॥ २ ॥

॥ इति द्वितीयोऽध्यायः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ श्रीगौडीपार्श्वनाथाय नमः ॥

तृतीयोऽध्यायः ३

भा०–अत्राह–उक्तं भवता नारका इति गतिं प्रतीत्य जीवस्यौदयिको भावः। तथा जन्मसु 'नारकदेवानामुपपातः'(अ० २, सू०३५)। वक्ष्यति च स्थितौ 'नारकाणां च द्वितीयादिषु' (अ० ४, सू० ४३), आस्रवेषु 'बह्वारम्भपरिग्रहत्वं च नारकस्यायुषः' (अ० ६, सू०१६) इति। तत्र के[1] नारका नाम क[2]वेति ? । अत्रोच्यते–नरकेषु भवा नारकाः। तत्र नरकप्रसिद्ध्यर्थमिदमुच्यते–

टी०–अत्राह–उक्तं भवतेत्यादिः सम्बन्धग्रन्थः, स चाध्यायप्रकरणसूत्रकृतः, तत्राध्यायकृतस्तावद् द्वितीये जीवा लक्षणविधानाभ्यामभिहिताः, तत्र लक्षणमेकरूपत्वान्न पुनरभिधीयते, विधानं तु बहुरूपत्वात् पुनः पुनरभिधापयति, अतोऽत्रापि तृतीयेऽध्याये प्रतिविशिष्टस्थाननिरूपणाद्वारेण जीव[3]विधानमेव विवक्षितमिति। प्रकरणसूत्रकृतौ तु सम्बन्धौ भाष्यकारेणोपात्तौस्वयमेव, तयोः प्राकाश्यमापाद्यते।

नारकाधिकार-प्रस्तावना

अत्र–अध्यायपरिसमाप्तिप्रस्तावे शिष्य आह–अभिहितं भवता द्वितीयेऽध्याये भावप्रकरणे नारका इति गतिं प्रतीत्य जीवस्यौदयिको भाव इति। गतिकषायलिङ्गसूत्रं (अ० २, सू० ६) अनेन भाष्येण सूचयति। तथा तस्मिन्नेव द्वितीये जन्मप्रकरणप्रस्तावे नारकदेवानामुपपातः (अ० २, सू० ३५) इत्युक्तम्, तथा चतुर्थेऽध्याये स्थितावायुषः प्रस्तुतायां वक्ष्यति भवान्–नारकाणां च द्वितीयादिषु, दश वर्षसहस्राणि प्रथमायाम् (अ० ४, सू० ४३, ४४) इति, तथा षष्ठेऽध्याये कर्मास्रवविचारणायां बह्वारम्भपरिग्रहत्वं च नारकस्यायुषः (अ० ६, सू० १६) इति प्रतिपादयिष्यते। तत्रैवमनेकस्मिन् स्थाने नारकशब्दश्रवणादाहितसंशयः पृच्छति—के नारका नामेति जीवत्वसामान्यमवधृतं विशेषो निवासादिरनवधृत इत्यतः प्रश्नयति–के पुनस्ते नारका इति। अत्रोच्यते-नरकेषु भवा नारकाः, वक्ष्यन्ते उपरिष्टादुष्ट्रिकापिष्टपचनीलोहीकरकाद्याकृतयः सीमन्तादयो नरकाः विशिष्टाकृतयोऽपुण्यसंभारजनितगौरवाणां सत्त्वानामुत्पत्तिस्थानविशेषाः,ते च किलाशुभकर्मभाजो नरान् कायन्ति-आह्वयन्तीति नरकाः,"रूढिषु हि क्रिया[4]व्युत्पत्तिकर्मार्था नार्थक्रिया[5]र्था " इतिवचनात् न ते [6]कञ्चिदाह्वयन्ति नापि नरानिति, तिरश्चामपि तत्र गमनाद् अतो व्युत्पत्तिमात्रमेव केवलम्, तेषु[7] नरकेष्वुष्ट्रिकाद्याकृतिषु भवा नारकाः,

नारकाधिकारस्थानानि

१'तत्र के नाम' इति ग-टी-पाठः। २ 'चेति' इति घ-पाठः। ३ 'जीवविशिष्टमेव' इति ख-पाठः। ४ 'क्रियाव्युत्पत्ति' इति ग-पाठः। ५ 'नर्थक्रिया' इति ग-टी-पाठः ६ 'किञ्चित्' इति क-ख-पाठः। ७ 'केषु' इति ग-टी-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्त्वविशेषा इत्यर्थः । **तत्र नरकप्रसिद्ध्यर्थमिदमुच्यते**, तत्र–तेषु नरकेषु विवक्षितेषु तन्मूलत्वात् तत्प्रतिष्ठत्वान्नारकप्रतिपत्त्यर्थमेव तावदिदमभिधीयते नान्तरीयकत्वादिति ॥

सूत्रम्—रत्नशर्कराबालुकापङ्कधूमतमोमहातमःप्रभा भूमयो घनाम्बुवाताकाशप्रतिष्ठाः सप्ताधोऽधः पृथुतराः ॥ ३–१ ॥

टी०—सूत्रकृतोऽप्येष एव सम्बन्धोऽतः पृथग् नोक्तः[1], अथवा वक्ष्यते नवमे–**आज्ञापायविपाकसंस्थानविचयाय धर्म्यमप्रमत्तसंयतस्य** (अ० ९, सू० ३७) इति, तत्र संस्थानविचयः—

"लोकस्याधस्तिर्यग्, विचिन्तयेदूर्ध्वमपि च बाहुल्यम् ।
सर्वत्र जन्ममरणे, रूपिद्रव्योपयोगांश्च ॥"–**प्रशम०** श्लो० १६०

इति, तत्र प्राक् तावदधोलोकस्वरूपमेव पृथिवीभेदेनोच्यते । **रत्नशर्करेत्यादि सूत्रम्** । ततस्तिर्यग्लोकस्वरूपं जम्बूद्वीपलवणादिप्रक्रमेण, पश्चाच्चतुर्थे ऊर्ध्वलोकस्वरूपमिति, एवमयं त्रिविभागः पञ्चास्तिकायसमुदयवृत्तिर्जीवाजीवाधारक्षेत्रलक्षणो वैशाखस्थानस्थितकटिस्थकरयुग्मपुरुषाकृतिर्लोकः, तस्याधस्तनभागस्वरूपावगमनायेदमुच्यते । अथवा सम्यग्दर्शनभाग्भिर्जीवैर्लोकस्यासङ्ख्येयभागः स्पृष्ट इत्युक्तं प्रथमाध्याये (सू० ८) **सम्यग्दृष्टिना** तु सर्वलोकः, तदुच्यतां निर्देशतः को लोक इत्यतोऽधोविभागादिः स आख्यायते ॥ **रत्नशर्करेत्यादि सूत्रम्**, रत्नानि–वज्रादीनि तत्प्रधाना **रत्नप्रभा**, शर्करादयोऽपि प्रतीतास्तत्प्रधानाः सर्वा वक्तव्याः, प्रभाशब्दो रूपस्वभाववाची, रत्नप्रभा रत्नस्वभावा रत्नमयी रत्नबहुलेति, एवं शर्कराप्रभादयोऽपि वाच्याः, एष च प्रभाशब्दः प्रत्येकमभिसम्बध्यत इति दर्शयति—

नरकपृथ्वीनामाधाराः

भा०—रत्नप्रभा शर्कराप्रभा वालुकाप्रभा पङ्कप्रभा धूमप्रभा तमःप्रभा महातमःप्रभा[2] इत्येता भूमयो घनाम्बुवाताकाशप्रतिष्ठा भवन्त्येकैकशः सप्ताधोऽधः[3] ॥

टी०—**रत्नप्रभेत्यादिना** भाष्येण । **इत्येता भूमयो घनाम्बुवाताकाशप्रतिष्ठा भवन्त्येकैकशः सप्ताधोऽधः**, एवमेता रत्नप्रभाद्याः पृथिव्यो घनाम्बुनि वायौ वियति च प्रतिष्ठिताः, नेश्वराद्याधारा इत्याचष्टे । घनाम्बु च वाताश्चाकाशं च घनाम्बुवाताकाशानि तेषु प्रतिष्ठा–स्थितिर्वर्तनं यासां ता **घनाम्बुवाताकाशप्रतिष्ठा भवन्ति**, एकैका एकैकशः **घनाम्बुवाताकाशक्रमेण** प्रतिष्ठिताः, न पुनः सप्तानामप्यध एव घनाम्बुवाताकाशानि प्रत्येकमन्तरालेषु न सम्भवन्तीति, सङ्ख्ययाऽवधार्यन्ते सप्तैवान्यूनाधिका इति । अधोऽध इति प्रतिविशिष्टक्रमाख्यानं तिर्यगूर्ध्वदिशो व्युदासः, एतदेव स्पष्टयति—

---

१ 'सम्बन्धो न पृथगुक्तः' इति क-ख-पाठः । २ 'महातमःप्रभा भूमयो' इति ग–टी-पाठः । ३ अधः' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—रत्नप्रभाया अधः शर्कराप्रभा, शर्कराप्रभाया अधो वालुकाप्रभा इत्येवं शेषाः। अम्बुवाताकाशप्रतिष्ठा इति सिद्धे घनग्रहणं क्रियते तेनायमर्थः प्रतीयेत[1] घनमेवाम्बु अधः पृथिव्याः[2], वातास्तु घनास्तनवश्चेति ॥

टी०—रत्नप्रभाया अधोऽसङ्ख्येया योजनकोटीनां कोटीरवगाह्य शर्कराप्रभा भवति, शर्कराप्रभायास्त्वधोऽसङ्ख्येया एव योजनकोटीनां कोटीरतिक्रम्य[3] वालुकाप्रभा भवति, एवं शेषाः पङ्कप्रभाद्या असङ्ख्येययोजनकोटीकोट्यवकाशान्तरा वक्तव्या अधोऽध इति ॥ अथ घनग्रहणं किमर्थं क्रियते अम्बुवाताकाशप्रतिष्ठा इत्येतावतैवाभिलषितार्थप्रसिद्धेरिति? सूरिराह—सत्यमेवं सिद्ध्यति, सिद्धे सति यत् तथापि घनग्रहणं क्रियते तेनायमर्थो ज्ञाप्यते घनमेवाम्बु अधः पृथिव्याः प्रत्येकं यथा स्यात्, मा भूद् द्रवमिति। वातास्तूभयथा घनास्तनवश्चेति। यथैव पृथिवीनामधोऽधो व्यवस्थानमशेषाणामेवमेकस्यां पृथिव्यां स्वभेदानामधोऽधो व्यवस्थानं दर्शयितुमाह—

घनशब्दफलम्

भा०—तदेवं खरपृथिवी पङ्कप्रतिष्ठा, पङ्को घनोदधिवलयप्रतिष्ठः, घनोदधिवलयं घनवातवलयप्रतिष्ठम्, घनवातवलयं तनुवातवलयप्रतिष्ठम्, ततो महातमोभूतमाकाशम्। सर्वं चैतत् पृथिव्यादि तनुवातवलयान्तमाकाशप्रतिष्ठम्, आकाशं चौत्मप्रतिष्ठम्[4]। उक्तमवगाहनमाकाशस्येति ॥

खरपंकादिप्रतिष्ठात्वम्

टी०—तदेवं खरपृथिवी पङ्कप्रतिष्ठा। आदावत्र रत्नप्रभायाः खरपृथिवीकाण्डं रत्नबहुलं योजनसहस्रषोडशकबाहल्यम्, तत् पङ्कपृथिवीकाण्डे पङ्कबहुले चतुरशीतियोजनसहस्रबहुले प्रतिष्ठितम्, तदपि पङ्कपृथिवीकाण्डमप्पृथिवीकाण्डे जलबहुलेऽशीतियोजनसहस्रघने प्रतिष्ठितम्। अत्र चाचार्येणाब्बहुलं काण्डं नोपात्तं पृथग्, घनोदधिवलयग्रहणेनैव लब्धत्वाद्, घनोदधिश्च घनोदधिवलयं चेत्येकदेशनिर्देशात्, तत् पुनर्जलबहुलं काण्डं विंशतियोजनसहस्रबहुले घनाम्बुवलये प्रतिष्ठितम्, घनोदधिवलयमप्यसङ्ख्येययोजनसहस्रघने घनवातवलये प्रतिष्ठितम्, घनवातवलयमपि ह्यसङ्ख्येययोजनसहस्रबाहल्ये तनुवातवलये प्रतिष्ठितम्, ततस्तनुवातवलयात् परं महातमोभूतमाकाशमसङ्ख्येययोजनकोटीकोटीप्रमाणम्, तदन्तरालवर्ति वियत् तनुवातवलयद्वितीयपृथिव्योः सूचिभेद्येन सन्तमसेन समन्ततो विजृम्भमाणेनातिघनतां गतेन व्याप्तम्, अतो महातम इव तत् प्रतिभातीति महातमोभूतमुच्यते, तच्चास्याः खरकाण्डादिभेदायास्तनुवातवलयपर्यन्तायाः रत्नप्रभापृथिव्याः प्रपन्नमाधारतामधिगन्तव्यमित्यादर्शयति—सर्वं चैतत् पृथिव्यादीत्यादिना। न चैतत् अश्रद्धेयं प्रत्यक्षप्रमाणसमधिगम्यानि

---

१ 'येन प्रतीयते' इति घ-पाठः। २ 'पृथिव्यां' इति ग-घ-टी पाठः। ३ 'योजनकोटीरतिक्रम्य' इति ग-टी-पाठः। ४ 'त्वात्म०' इति घ-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चन्द्रादित्यादिविमानानि निरालम्बे विहायसि परिप्लवन्ते, न चाधः पतन्ति लोकानुभावादेवमेवैताः पृथिव्योऽपीति, आकाशं पुनरात्मन्येव प्रतिष्ठितम्, नाधारान्तरसमासादितप्रतिष्ठमिति, यस्मादुक्तम्-अवगाहनमाकाशस्येति, पञ्चमेऽध्याये सूत्रतः उक्तम्-'आकाशस्यावगाहः' (अ० ५, सू० १८) उपकारः, अवगाहदानेन व्याप्रियत आकाशं सर्वद्रव्याणामवगाहवतां निरवगाहदानव्यापारपरं सदवगाहिष्यते तदन्यत्र तदनुरूपाधाराभावादतः स्वप्रतिष्ठं प्रतिपत्तव्यम् ॥

भा०-तदनेन क्रमेण लोकानुभावसन्निविष्टा असङ्ख्येययोजनकोटीकोट्यो विस्तृताः सप्त भूमयो रत्नप्रभाद्याः। सप्तग्रहणं नियमार्थम्। रत्नप्रभाद्या मा भूवन्नेकशः अनियतसङ्ख्या इति। किञ्चान्यत्। अधः सप्तैवेत्यवधार्यते, ऊर्ध्वं त्वेकैवेति वक्ष्यते॥

टी०-तदनेन क्रमेणेत्यादि भाष्यम्, तस्मादनेन क्रमेण घनाम्बुघनवाततनुवातवलयाकाशप्रतिष्ठानाः सप्तापि भूमयो लोकानुभावादेव सन्निविष्टाः, लोकानुभावो हि लोकस्थितिरनाद्या न केनचिदीश्वरादिना कृता व्योमवदकृत्रिमा, असङ्ख्येययोजनकोटीकोट्यो विस्तृता इति तिर्यक्प्रमाणमाचष्टे, नाधः प्राच्यात् रत्नप्रभापृथिवीपर्यन्तात् प्रतीच्यं तत्पर्यन्त एतावदन्तरालमतीत्य भवतीत्येवं शेषाणामपि बहुतरा बहुतमाश्च कोट्यो भवन्ति, वृत्तत्वाच्च सर्वासां तुल्यविष्कम्भायामताऽध्यवसेया॥ प्रवचनं चेदम्-" कतिविहा[3] णं भंते! लोकट्ठिती पण्णत्ता? गोयमा! अट्ठविहा लोगट्ठिई पण्णत्ता, तंजहा-आगासपतिट्ठिए वाए १ वातपतिट्ठिए उदही २ उदधिपइट्ठिया पुढवी ३ पुढवीपतिट्ठिता तसथावरा पाणा ४ अजीवा जीवपतिट्ठिया ५ जीवा कम्मपइट्ठिया ६ अजीवा जीवसंगहिता ७ जीवा कम्मसंगहिता ८ ॥ से केणट्ठेणं भंते! एवं वुच्चति अट्ठविहा लोगट्ठिती? गोयमा! से जहा नामए केति पुरिसे वत्थिमाडोवेति, वत्थिमाडोवेत्ता उप्पिंसि तं बंधति, बंधित्ता मज्झे गंठिं देति, मज्झे गंठिं दलइत्ता उवरिल्लं गंठिं मुइत्ता उवरिल्लं देसं वामेति, वामेत्ता आउक्कायस्स पूरेति, पूरित्ता उप्पिंसि तं बंधति, बंधित्ता मज्झिल्लं गंठिं मुयति, तेणं गोयमा! से आउक्काए तस्स वाउक्कायस्स उवरितले चिट्ठति, से तेणं अट्ठेणं गोयमा! एवं वुच्चति-अट्ठविहा लोकट्ठिती पण्णत्ता। से जहा वा केइ पुरिसे वत्थिमाडोवेति, आडोवेत्ता कडीए

प्रतिष्ठाने लोकस्थितिर्हेतुः

---

१ 'ह्यनियत०' इति घ-पाठः। २ ' तुल्यविष्कम्भायामेत्यध्यवसेया' इति ख-पाठः।

३ कतिविधा भदन्त! लोकस्थितिः प्रज्ञप्ता? गौतम! अष्टविधा लोकस्थितिः प्रज्ञप्ता, तद्यथा—आकाशप्रतिष्ठितो वातः, वातप्रतिष्ठित उदधिः, उदधिप्रतिष्ठिता पृथ्वी, पृथ्वीप्रतिष्ठिता त्रसस्थावराः प्राणाः, अजीवा जीवप्रतिष्ठिताः, जीवाः कर्मप्रतिष्ठिताः, अजीवा जीवसंगृहीताः, जीवाः कर्मसंगृहीताः। अथ केनार्थेन भदन्त! एवमुच्यते—अष्टविधा लोकस्थितिः? गौतम! तत् यथानामकः कश्चित् पुरुषः बस्तिमापूरयति, बस्तिमापूर्य उपरिष्टात् तां बध्नाति बद्ध्वा मध्ये ग्रन्थिं ददाति, मध्ये ग्रन्थिं दत्त्वा उपरितनं ग्रन्थिं मुक्त्वा उपरितनं देशं वमयति (रिक्तीकरोति) वमयित्वा अप्कायं पूरयति, पूरयित्वा उपरिष्टात् तां बध्नाति, बद्ध्वा मध्यमं ग्रन्थिं मुञ्चति, तेन गौतम! सः अप्कायः तस्य वायुकायस्य उपरितले तिष्ठति, तदेतेनार्थेन गौतम! एवमुच्यते—अष्टविधा लोकस्थितिः प्रज्ञप्ता। अथ यथा वा कश्चित् पुरुषः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बंधति, बंधित्ता अत्थाहमतारमपोरिसियंसि उदगंसि ओगाहेज्जा, णूणं गोयमा ! से पुरिसे तस्स आउक्कायस्स उप्पिं उवरितले चिट्ठति ? हंता चिट्ठति, एवमेव अट्ठविहा लोकट्ठिती पण्णत्ता" (भग०श०१,उ०६,सू०,५४)।रत्नप्रभायाश्च प्रथमं काण्डं रत्न-वज्र-वैडूर्य-लोहिताख्य-मसारगल्ल-हंसगर्भ-पुलक-सौगन्धिक-ज्योतीरसाञ्जनाञ्जन-पुलक-रजत-जातरूपाङ्क-स्फटिकारिष्ठभेदात् षोडशधा, इतरे त्वेकाकारे पङ्कजलबहुले काण्डे, शेषाश्च भूमयः शर्कराद्याः एकाकारा एवावसातव्याः। **सप्तग्रहणं नियमार्थमित्यादि**, विशिष्टसङ्ख्याशब्दोपादानान्नियमः क्रियते सप्तैवाधः पृथिव्यः, का पुनराशङ्का नियमाभिप्रायानुवर्तिनः सूरेरिति?। उच्यते–**रत्नप्रभाद्या मा भूवन्नेकशो ह्यनियतसङ्ख्या** इति। रत्नप्रभायाः प्रथमं काण्डं षोडशधा, तथा पङ्कबहुलं काण्डं जलबहुलं काण्डमिति एकैकस्य भेदस्य पृथिवीत्वाद् बहुत्वं पृथिवीनामधः स्यात्, अत एवमेकैका ह्यनियतसङ्ख्या मा भूदिति सप्तग्रहणमुपात्तम्, इतरा अपि च प्रतरादिभेदेन भिद्यमाना बहुत्वमनुयान्ति स्वस्थान एवेति तस्मान्नियमापादनम्[1]। **किञ्चान्यत्**–अन्यदपि हि सप्तग्रहणस्य प्रयोजनमस्त्येव किञ्चित्, **अधः सप्तैवेत्यवधार्यते** विशिष्टसङ्ख्यानियमोऽधः प्रदर्श्यते, न पुनः पृथिव्य एतावत्य एव त्रैलोक्य इत्यवधार्यते, यत ऊर्ध्वं त्वेकैवेति वक्ष्यति, उपरिष्टात् पुनः सर्वैकल्पविमानान्यतीत्यार्धतृतीयद्वीपविष्कम्भायामोत्तानकच्छत्राकृतिरीषत्प्राग्भारा नाम पृथिवी दशमेऽध्याये (१९ तम)कारिकाभाष्येण व्याख्यास्यते 'तन्वी मनोज्ञा सुरभिः, पुण्या परमभासुरा' इत्यादिनेति। तथाऽन्यदपि सप्तग्रहणस्य प्रयोजनमाख्यायते—

अधःपृथ्वीनां सप्तत्वनियमः

भा०—अपिच–तन्त्रान्तरीया असङ्ख्येयेषु लोकधातुषु असङ्ख्येयाः पृथिवीप्रस्तारा इत्यध्यवसिताः, तत्प्रतिषेधार्थं च सप्तग्रहणमिति॥

असङ्ख्यप्रस्तारे निरासः

टी०—तन्त्रान्तरीया इत्यादि भाष्यम्। अन्तरे भवाः अन्तरीयास्तन्त्रप्रधाना अन्तरीयास्तन्त्रान्तरीयाः–जिनप्रवचनबाह्यास्ते च प्रायः प्रस्तावान्मायासूनवीया एव गृह्यन्ते, सर्वतः किलासङ्ख्येया एव लोकधातवस्तेषु **चासङ्ख्येया एव पृथिवीप्रस्तारा इत्यध्यवसिता दुर्मेधसः॥** तदागमश्चायम् "यथा हि वर्षति देवे प्रततधारं नास्ति वीचिका वा अन्तरिका वा एवमेव पूर्वायां दिशि लोकधातवो नैरन्तर्येण व्यवस्थितास्तथाऽन्यास्वपि दिक्ष्विति" **तत्प्रतिषेधार्थं च सप्तग्रहणं** क्रियते, सप्तैवैताः सर्वतः परिमाणपरिच्छिन्ना लोकान्तर्वर्तिन्यः, लोकश्च परिमाणवान् सर्वतो जीवाजीवात्मकत्वाच्छरीरादिवदिति, मूर्तिमद्द्रव्यात्मकत्वाद् वा घटादिवत्।

बस्तिमापूरयति आपूर्य कक्ष्यां बध्नाति, बद्ध्वा अस्ताघमतार्यमपौरुषेयं उदकमवगाहेत, नूनं गौतम! स पुरुषः तस्य अप्कायस्य उपरि उपरितले तिष्ठति ? हन्त तिष्ठति, एवमेव अष्टविधा लोकस्थितिः प्रज्ञप्ता।

१ ' माभूवन्नेकशः' इति ग-टी-पाठः। २ 'नियमादापादनम् ' इति ग-टी-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृथ्वीनामाकारो नामानि बाहल्यं च

भा०—सर्वाश्चैता अधोऽधः पृथुतराश्छत्रातिच्छत्रसंस्थिताः। घर्मा वंशा शैला अञ्जना रिष्ठा माघव्या माघवीति च आसां नामधेयानि यथासङ्ख्यमेवं भवन्ति। रत्नप्रभा घनभावेनाशीतं योजनशतसहस्रम्, शेषा द्वात्रिंशदष्टाविंशतिर्विंशत्यष्टादशषोडशाष्टाधिकमिति।

टी०—सर्वाश्चैता इत्यादि भाष्यम्। रत्नप्रभाद्या महातमःप्रभापर्यवसाना अधोऽधः पृथुतराः—एकरज्जुप्रमाणा विष्कम्भायामाभ्यां रत्नप्रभा, शर्कराप्रभाऽर्धतृतीयरज्जुप्रमाणा, वालुकाप्रभा चतूरज्जुप्रमाणा, पङ्कप्रभा पञ्चरज्जुप्रमाणा, धूमप्रभा रज्जुषट्कप्रमाणा, तमःप्रभाऽर्धसप्तरज्जुप्रमाणा, महातमःप्रभा सप्तरज्जुप्रमाणेति। अत एव छत्रातिच्छत्रसंस्थिता भवन्त्येताः, छत्रातिच्छत्रे ह्युपरितनं छत्रमायामविष्कम्भाभ्यां लघु भवति, तदधोवर्ति विस्तीर्णतरम्, तस्याप्यधो विशालतममित्यतः छत्रातिच्छत्रवत् स्थिताः, सर्वत्र घनभावेन समा झल्लर्याकृतयः। तासां चोत्कीर्तनमुभयथा नामतो गोत्रतश्च, तत्र प्रथमा घर्मा नाम्ना रत्नप्रभा गोत्रेण, द्वितीया वंशा नाम्ना शर्कराप्रभा गोत्रेण, तृतीया शैला नाम्ना वालुकाप्रभा गोत्रेण, चतुर्थ्यञ्जना नाम्ना पङ्कप्रभा गोत्रेण, पञ्चमी रिष्ठा नाम्ना धूमप्रभा गोत्रेण, षष्ठी माघव्या नाम्ना तमःप्रभा गोत्रेण, सप्तमी माघवी नाम्ना महातमःप्रभा गोत्रेणेति, एवमेतानि नामधेयानि—नामान्येवासां यथाक्रममुभयथाऽवगन्तव्यानीति॥ तत्र रत्नप्रभा पूर्वापरादिविभागव्यवच्छिन्ना सर्वत्र घनभावेन बहलतया अशीतिसहस्रोत्तरयोजनलक्षप्रमाणेति, द्वितीया द्वात्रिंशत्सहस्रोत्तरलक्षप्रमाणा, तृतीयाऽष्टाविंशतिसहस्रोत्तरलक्षप्रमाणा, चतुर्थी विंशतिसहस्रोत्तरलक्षप्रमाणा, पञ्चम्यष्टादशसहस्रोत्तरलक्षप्रमाणा, षष्ठी षोडशसहस्रोत्तरलक्षप्रमाणा, सप्तमी सहस्राष्टकोत्तरलक्षप्रमाणेति॥

अधुना सर्ववसुधावर्तिनो घनोदधीन् मध्यप्रदेशे बहलतया निर्दिशति—

घनोदध्यादिमानम्

भा०—सर्वे घनोदधयो विंशतियोजनसहस्राणि, घनवाततनुवातास्त्वसङ्ख्येयानि, अधोऽधस्तु घनतरा विशेषेणेति॥ १॥

टी०—सर्वे घनोदधयो विंशतियोजनसहस्राणि। घनाः सर्वपृथिवीनामधोभागवर्तिनां मध्यप्रदेशेषु, प्रदेशहान्या तु हीयमानाः पार्थिवाः पृथिवीपर्यन्तप्रदेशेषु वलयाकृतिव्यवस्थानास्तनुतरा भवन्ति, तद्यथा—प्रथमायां घनोदधिवलयबहलता सर्वत्र षड् योजनानि, द्वितीयस्यां घनोदधिवलयं सत्रिभागषड्योजनबहलम्, तृतीयस्यां त्रिभागोनसप्तयोजनबहलम्, चतुर्थ्याः सप्तयोजनबहलम्, पञ्चम्याः सत्रिभागसप्तयोजनबहलम्, षष्ठ्यास्त्रिभागोनयोजनाष्टकबहलम्, सप्तम्यां योजनाष्टकबहलमिति। तथा सर्वे घनवाता असङ्ख्येयानि योजनसहस्राणि मध्येषु, पर्यन्तेषु तनुकाः, रत्नप्रभायास्तावद्[3]र्धपञ्चमयोजनबहलं घनवातवलयम्, द्वितीयस्याः

१ 'घनवातास्त्व०' इति क-पाठः। २ 'स्थानात् तनुतरा' इति प्रतिभाति। ३ 'अध्यर्धपञ्चम' इति ग-टी-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रोशोनपञ्चयोजनबहलम्, तृतीयस्याः पञ्चयोजनबहलम्, चतुर्थ्याः सक्रोशपञ्चयोजनबहलम्, पञ्चम्यास्त्वर्धषष्ठयोजनबहलम्, षष्ठ्याः क्रोशोनयोजनषट्कबहलम्, सप्तम्याः षड्योजनबहलमिति । तनुवातवलयमपि मध्ये सर्वासामसङ्ख्येयानि योजनसहस्राणि घनम्, पर्यन्तेषु प्रदेशहान्या तनुकम्, रत्नप्रभायास्तावत् तनुवातवलयं षट्क्रोशघनम्, द्वितीयस्याः सत्रिभागषट्क्रोशघनम्, तृतीयस्यास्त्रिभागोनसप्तक्रोशघनम्, चतुर्थ्याः सप्तक्रोशघनम्, पञ्चम्याः सत्रिभागसप्तक्रोशघनम्, षष्ठ्यास्त्रिभागोनाष्टक्रोशघनम्, सप्तम्याः क्रोशाष्टकघनमिति । एते च **घनवाततनुवाताः** घना घनतरा घनतमाश्चाधोऽधो **विशेषेणानादिपरिणामवशादेव** द्रष्टव्याः ॥ एतासां च पृथिवीनां सप्तानामपि परतस्तिर्यग् न समनन्तरमेवालोको भवति, नापि सप्तम्याः समनन्तरोऽधः, किन्तु रत्नप्रभायास्तावद् द्वादश योजनानि गत्वा परतश्चतसृष्वपि दिक्षु विदिक्षु सर्वासु पश्चादलोको भवति, द्वितीयस्यास्त्रिभागोनानि त्रयोदश योजनानि गत्वा भवत्यलोकः, तृतीयस्याः सत्रिभागानि त्रयोदश योजनानि यात्वाऽलोकः, चतुर्थ्याश्चतुर्दश योजनान्यवगाह्यालोकः, पञ्चम्यास्त्रिभागोनानि पञ्चदश योजनानि प्रविश्यालोकः, षष्ठ्याः सत्रिभागानि पञ्चदश योजनान्यतीत्यालोकः, सप्तम्याः षोडश योजनानि तिर्यगधश्च गत्वा भवत्यलोक इति ॥ सर्वाश्चैता अनादिपारिणामिकभावव्यवस्थानाः, नामान्यपि रत्नाद्याकारसम्बन्धात् गोत्रकृतानि रत्नप्रभादीनि तत्स्वभावत्वादनाद्यानि, घर्मादीन्यपि यादृच्छिकान्यनादिकालप्रसिद्धानीति, एवमयमधोलोकश्चतुर्थपृथिव्यवकाशान्तरसमधिकार्धव्यतीतमध्योऽधोमुखशरावाकृतिर्नव योजनशतान्यवगाह्य समतलाद् भूभागादधोरत्नप्रभाव्यवस्थितोपरितनाऽधस्तनक्षुल्लकप्रतरारब्धः, सप्तमपृथिवीपरतो यावत् षोडश योजनानीति ॥ १ ॥

अधुना नारकजीवविवक्षायामन्तरतमतदाधारमिदमेव प्रक्रियते भूमिषु—

सूत्रम्—तासु नरकाः ॥ ३—२ ॥

भा०—तासु रत्नप्रभाद्यासु भूमिषु ऊर्ध्वमधश्चैकैकशो योजनसहस्रमेकैकं वर्जयित्वा मध्ये नरका भवन्ति ।

टी०—उक्ता भूमयो नामतो गोत्रतः संस्थानतः सङ्ख्यातश्च, प्रस्तुतत्वात् ताः सर्वनाम्ना परामृश्यन्ते, तासूक्तलक्षणासु रत्नप्रभाद्यासु भूमिषूर्ध्वमेकैकस्याः पृथिव्याः स्वावगाहाद् योजनसहस्रमपहायोपर्यधश्चैकं परित्यज्य[3] शेषे स्वावगाहे नरका[4] भवन्ति औषष्ठ्याः, रत्नप्रभायास्तावदष्टसप्ततिसहस्राधिकलक्षायाम्, द्वितीयस्यास्त्रिंशत्सहस्राधिकलक्षायाम्, तृतीयस्याः षड्विंशतिसहस्राधिकलक्षायाम्, चतुर्थ्यास्त्वष्टादशसहस्राधिकलक्षायाम्, पञ्चम्याः षोडशसहस्राधिकलक्षायाम्, षष्ठ्या-

नारकाणां स्थानम्

---

१ 'मधोऽधो' इति ग-पाठः । २ 'भूषूर्ध्व०' इति ङ-पाठः । ३ 'त्यज्याशेषे' इति क-पाठः । ४ 'नारका' इति क-ख-पाठः । ५ 'आद्याः' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रुतुर्दशसहस्राधिकलक्षायाम्, सप्तम्यास्त्ववगाह्याधः पञ्चाशत्सहस्राणि पञ्चविंशतिशताधिकानि अधश्च तावन्त्येव विहाय मध्ये त्रिषु सहस्रेषु नरका भवन्ति, एष च सप्तमपृथिवीगतविशेषो नोपात्तः साक्षाद् भाष्यकारेण, तत्रायमभिप्रायः—यत् किल बाहुल्याद् वर्तते तदुपात्तमितरदेकपृथिवीवर्तियुतकमेवाऽतो नाख्यातमिति ॥

तानिदानीं प्रसिद्धैरिहत्यनिदर्शनैर्भयानकसंस्थानैर्नरकान् प्रतिपादयितुमाह—

नारकावासानां संस्थान नामानि च

भा०—तद्यथा-उष्ट्रिकापिष्टपचनीलोहीकरकेन्द्रजानुकाजन्तोकायस्कुम्भायःकोष्ठादिसंस्थाना वज्रतलाः सीमन्तकोपक्रान्ताः, रौरवोऽच्युतो रौद्रो हाहारवो घातनस्तापनः शोचनः क्रन्दनो विलपनश्छेदनो भेदनः खटापटः कलापिञ्जर इत्येवमाद्याः अशुभनामानः, कालमहाकालरौरवमहारौरवाऽप्रतिष्ठानपर्यन्ताः ॥

टी०—तद्यथा-उष्ट्रिकेत्यादि । उष्ट्रिकादयो भाण्डकविशेषा लोकप्रसिद्धत्वात् सुज्ञाना एव, एवंविधाकृतयो हि नरका अविद्यमानसुखाः क्षुरप्राकृतिवज्रतलाः प्रबहलध्वान्तपटलपूरिताश्च सर्पमार्जारादिमृतकगन्धयः करपत्र-शक्ति-कुन्त-तोमराग्रसदृशस्पर्शाः आवलिकातो बहिर्वर्तमाना नानासंस्थाना उष्ट्रिकाद्याकृतयः प्रकीर्णनरका भवन्ति, आवलिकान्तःपातिनस्तु त्रिविधसंस्थाना वृत्तत्र्यस्रचतुरस्राकृतयः, ते च सीमन्तकोपक्रान्ताः, सर्वेऽपि हि ते रत्नप्रभापृथिवीप्रथमप्रतरमध्यवर्तिसीमन्तकाभिधाननरकेन्द्रकमवधिमवस्थाप्योपक्रम्यन्ते, तत्रावलिकाप्रविष्टा दिक्षु रत्नप्रभायां त्रयोदशसु प्रस्तरेषु विदिक्षु च प्रथमप्रतरदिगावलिका प्रमाणेनैकोनपञ्चाशन्नरकाः, अष्टचत्वारिंशच्च नरका विदिक्ष्वावलिका, इदमावलिकाद्वयमप्येकैकेन नरकावासेन हीयमानं हीयमानमशेषप्रतरवर्ति तावन्नेतव्यं यावत् सप्तमवसुन्धरायामेकैकः शेषो दिक्षु नरकः सञ्जातो विदिक्षु नास्त्येव मध्ये चैक इन्द्रकः शेष इति ॥ अत्र कांश्चिन्नामग्राहमाख्याति-रौरवोऽच्युत इत्यादिना । एषां मध्ये केचिदिन्द्रकाः केचिदावलिकाप्रविष्टाः केचित् प्रकीर्णकाः सूरिणोपात्ताः सत्त्वानां संवेगप्राप्त्यर्थम्, एषां हि नामान्यप्यादधति भयमतुलमाकर्ण्यमानानि, किमुत तत्र जन्मभोग इति भीताः सन्तो न सहसा पापस्थानेषु वर्तिष्यन्त इत्यभिप्रायः ॥ एवमाद्या-एवंप्रकाराः, अशुभनामानो यावन्तः किल लोके व्याधयः शपथाश्चानिष्टनामानि च तन्नामानो नरकाः सर्वे भवन्ति ॥ अधुना सप्तमपृथिवीवर्तिनः पञ्च नरकान्नामादेशं कथयति—कालेत्यादि । अप्रतिष्ठाननरकेन्द्रकात् पूर्वतः कालः, अपरतो महाकालः, रौरवो

---

१ 'तदुपपातं' इति क-पाठः । २ 'पृथिवीवर्तियुतकमेवावर्तियुतकमेव' इति ग-पाठः । ३ 'जानुकजन्त्राकाय इति घ-पाठः । ४ 'हारवः' इति ग-टी-पाठः । ५ 'शोचनस्तापनः क्रन्दनो' इति घ-पाठः । ६ 'संवेगमाप्त्यर्थं' इति, 'संवेगसमाप्त्यर्थं' इति च ग-टी-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दक्षिणतः, उत्तरतो महारौरवः, मध्ये चाप्रतिष्ठाननरकेन्द्रकः, स च सकलनरकेन्द्रकपर्यन्तवर्ती, न ततः परमन्यो नरकसत्त्वावासः समस्ति । तत्र—

भा०—रत्नप्रभायां नरकाणां प्रस्तरास्त्रयोदश । द्विद्व्यूनाः शेषासु ॥

नरकेषु प्रस्तराणां नरकावासानां च संख्या

रत्नप्रभायां नरकावासानां त्रिंशच्छतसहस्राणि । शेषासु पञ्चविंशतिः पञ्चदश दश त्रीणि एकं पञ्चोनं नरकशतसहस्रमित्याषष्ठ्याः, सप्तम्यां तु पञ्चैव महानरका इति ॥ २ ॥

टी०—रत्नप्रभापृथिव्यां नरकप्रस्तरास्त्रयोदश वेश्मभूमिकाकल्पाः । द्विद्व्यूनाः शेषासु—शर्कराप्रभादिषु महातमःप्रभापर्यवसानासु, त्रयोदश द्व्यूनाः द्वितीयस्यामेकादश प्रस्तराः, एकादश द्व्यूनाः तृतीयस्यां नवप्रस्तराः, नव द्व्यूनास्तुर्यवसुधायां सप्त, सप्त द्व्यूनाः पञ्चम्यां पञ्च, पञ्च द्व्यूनाः षष्ठ्यां त्रयः, त्रयो द्व्यूनाः सप्तम्यामेक इति ॥ कियन्तः पुनरेकैकस्यां भूमौ नरका इति तत्प्रसिद्ध्यर्थमाह—रत्नप्रभायामित्यादि । रत्नप्रभायामावलिकाप्रविष्टनरकाणां चत्वारि सहस्राणि त्रयस्त्रिंशदुत्तरचतुःशताधिकानि, प्रकीर्णकानामेकोनत्रिंशल्लक्षाः पञ्चनवतिसहस्राणि पञ्च शतानि सप्तषष्ट्यधिकानि, उभयेऽप्येकीकृतास्त्रिंशल्लक्षा भवन्ति प्रथमायाम्, शेषासु पञ्चविंशतिरित्यादि । शर्कराप्रभादिषु सप्तम्यन्तासु यथाक्रममेतत्परिमाणमावेदयति नरकाणाम्, द्वितीयस्यामावलिकाप्रविष्टानां षड्विंशतिशतानि पञ्चनवत्यधिकानि, प्रकीर्णकानां चतुर्विंशतिर्लक्षाः सप्तनवतिसहस्राणि शतत्रयं पञ्चोत्तरम्, एकत्र पञ्चविंशतिर्लक्षाः । तृतीयस्यामावलिकाप्रविष्टानां चतुर्दश शतानि पञ्चाशीत्यधिकानि, प्रकीर्णकानां चतुर्दश लक्षाः सहस्राण्यष्टानवतिः पञ्च शतानि पञ्चदशोत्तराणि, एकत्र पञ्चदश लक्षाः । चतुर्थ्यामावलिकाप्रविष्टानां सप्त शतानि सप्तोत्तराणि, प्रकीर्णकानां नव लक्षाः सहस्राणि नवनवतिः द्वे शते त्रिनवत्यधिके, एकत्र दश लक्षाः । पञ्चम्यामावलिकाप्रविष्टानां द्वे शते पञ्चषष्ट्यधिके, प्रकीर्णकानां द्वे लक्षे नवनवतिसहस्राणि सप्त च शतानि पञ्चत्रिंशदधिकानि, एकत्र तिस्रो लक्षाः । षष्ठ्यामावलिकाप्रविष्टानां त्रिषष्टिः, प्रकीर्णकानां नवनवतिसहस्राणि नव शतानि द्वात्रिंशदधिकानि, एकत्र नरकपञ्चकोनैकलक्षाः । सप्तम्यां तु पञ्चैव नरकाः, प्रकीर्णका न सन्त्येवेति । अत्र रत्नप्रभात आरभ्य आषष्ठ्याः केचिन्नरकाः सङ्ख्येयानि योजनसहस्राणि आयामविष्कम्भपरिधिभिः, केचिदसङ्ख्येयानीति, सप्तम्यामप्रतिष्ठाननरकेन्द्रको विष्कम्भायामपरिधिभिर्जम्बूद्वीपतुल्यः, कालादयस्तु चत्वारोऽसंख्येयानि योजनसहस्राणि विष्कम्भायामपरिधिभिः, सर्वे चैते नरका बुध्नप्रदेशे योजनसहस्रबहलाः, मध्येऽपि योजनसहस्रप्रमाणशुषिरभाजः, उपर्यपि सङ्कुचिता योजनसहस्रमेवमेते नरकास्तासु रत्नप्रभादिभूमिषु महातमःप्रभापर्यवसानासु व्यवस्थिताः पृथिव्यादिवदना-

१ ' नरकाः ' इति घ-टी-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिकालसन्निवेशिनः पृथुपापविपाकभाजां सत्त्वानामाश्रयाः वज्रकुड्यमयाः[1] नित्यान्धतमसाश्च वेदितव्याः । विशेषार्थिना चावलिकाप्रविष्टवृत्तव्यस्रचतुरस्रेयत्तापरिज्ञानाय देवेन्द्रनरकेन्द्रकप्रकरणमपेक्षणीयमिति ॥ २ ॥ किञ्चान्यत् ।

सूत्रम्–तेषु[2] नारका नित्याशुभतरलेश्यापरिणामदेहवेदना-विक्रियाः ॥ ३–३ ॥

टी०—तेषु व्यावर्णितलक्षणेषु, नरकेषु भवा **नारकाः** । **नित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः**, अथवोभयमाक्षिप्यतेऽनेन नरकाः नारकाश्च, **तेषु नित्याशुभेत्यादि** सूत्रम्, इह सूत्रे नरका नारकाश्च उभये परिगृह्यन्ते, प्रस्तावान्[3]नरका लेश्यादेहवेदनाविक्रियासम्भवान्नारकाः, नित्यशब्दोऽभीक्ष्णवचनो नित्यप्रहसितादिवत्, नित्याशुभतरलेश्यादयो येषु येषां वा ते नित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः ॥

नरकनारकाणां स्वरूपम्

भा०—ते नरका भूमिक्रमेणाधोऽधो निर्माणतोऽशुभतराः । अशुभा रत्नप्रभायाम्, ततोऽशुभतराः शर्कराप्रभायाम्, ततोऽप्यशुभतरा वालुकाप्रभायाम्, इत्येवमासप्तम्याः[4] ॥

टी०—**ते नरका** इत्यादि भाष्यम् । प्राक्तनसूत्रनिरूपिताः सर्वनामशब्देनात्र गृह्यन्ते नरकाः सीमन्तकादयोऽप्रतिष्ठानपर्यन्ताः, रत्नप्रभादिभूक्रमेणाधोनिर्माणतः संस्थाननिवृत्तेः, **अशुभतरा** भयानकाः, **अशुभा रत्नप्रभायामधस्तनीष्वशुभतरा** अशुभतमाश्चेत्यासप्तम्याः । एतद् भाष्यकारेण सामान्यतो युक्तमेव व्याख्यातम्, न पुनरशुभग्रहणमस्ति सूत्रे, यच्चाशुभतरग्रहणं तल्लेश्यादिभिः सम्बद्धम्, अतः सामान्यव्याख्यानमिदं प्रतिपत्तव्यम्, एकशेषनिर्देशाद् वा सिद्धम् ॥

सम्प्रति नित्यार्थमाचष्टे—

भा०—नित्यग्रहणं गतिजातिशरीराङ्गोपाङ्गकर्मनियमादेते लेश्यादयो भावा नरकगतौ नरकजातौ[5] च नैरन्तर्येणाभवक्षयोद्वर्तनाद् भवन्ति, न च कदाचिदक्षिनिमेषमात्रमपि, न[6] शुभा वा भवन्तीत्यतो नित्या उच्यन्ते[7] ।

टी०—**नित्यग्रहणं गतिजाति०नियमादेते लेश्यादय** इत्यादि । नित्यशब्दोपादानमत्र नरकगतिनरकपञ्चेन्द्रियजात्योर्नियमादशुभतरलेश्यादिभिः सम्बन्धप्रतिपादनार्थम्,

---

१ 'वज्रकुम्भमयाः' इति क-पाठः । २ ' तेषु नारका' इति घ-पुस्तके नास्ति । ३ 'नारका' इति क-पाठः । ४ 'सप्तम्याम्' इति ग-टी-पाठः । ५ 'एकदेशानिर्देशाद्', 'एकदेशनिर्देशाद्' इति क-ख-पाठः । ६ नरकपञ्चेन्द्रियजातौ' इति घ-पाठः । ७ 'न भवन्ति शुभा' इति घ-पाठः । ८ इत्युच्यन्ते इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेव विवृणोति—एते सूत्रोपात्ता लेश्यादयो भावा नैरन्तर्येणाविच्छेदेन पौनःपुन्येनाभवक्षयादुद्वर्तनकालावधिका भवन्ति, भवक्षये हि सति ते उद्वर्तन्ते, अन्तराले नास्ति जीवितक्षय इत्यावेदयति । नैरन्तर्यार्थं पुनः स्पष्टयति—लोचननिमेषप्रमितमपि कालमशुभेन नास्ति तेषां वियोगः, किमु बहुतरकमिति दर्शयति । अथवैतावन्तमेव कालमशुभास्ते लेश्यादयः स्युरिदमपि नास्तीत्यतो नित्यास्त उच्यन्ते । नन्वेवंविधे नित्यशब्दार्थेऽनुपपन्नमाभीक्ष्ण्यं स्यात्, तिरोधानपूर्वकः प्रादुर्भावः पुनः पुनराभीक्ष्ण्यशब्दार्थः, इह तु नैरन्तर्येण व्याख्यातमाभवक्षयादिति, उच्यते—तावेव हि तिरोधानाविर्भावौ विशेष्येते नैरन्तर्येण, तौ हि निर्व्यवधानौ भवतः सर्वकालमेव तेषाम्, अथ 'तद्भावाव्ययं' (अ० ५, सू० ३०), नित्यलक्षणमपि सम्बन्धुं शक्यते, न कश्चिदपराध इति ।

नारकाणां लेश्या

भा०—अतोऽशुभतरलेश्याः । कापोतलेश्या रत्नप्रभायाम् ततस्तीव्रतरसङ्क्लेशाध्यवसाना कापोता शर्कराप्रभायाम् । ततस्तीव्रतरसङ्क्लेशाध्यवसाना कापोतनीला वालुकाप्रभायाम् । ततस्तीव्रतरसङ्क्लेशाध्यवसाना नीला पङ्कप्रभायाम् । ततस्तीव्रतरसङ्क्लेशाध्यवसाना नीलकृष्णा धूमप्रभायाम् । ततस्तीव्रतरसङ्क्लेशाध्यवसाना कृष्णा तमःप्रभायाम् । ततस्तीव्रतरसङ्क्लेशाध्यवसाना कृष्णैव महातमःप्रभायामिति ॥

टी०—अतोऽशुभतरलेश्या इत्यादि । आद्यास्तिस्रोऽशुभलेश्यास्ताः सप्तस्वपि पृथिवीषु प्रकृष्टतया विभज्यन्ते क्रमवैपरीत्येन, तेषां हि मानसपरिणामो लेश्या, स तीव्रस्तीव्रतरस्तीव्रतम इत्यशुभाभिभूतत्वाद् भवति, तत्र प्रथमायां कापोता तीव्रा, शर्कराप्रभायां सैव तीव्रतरा, तीव्रतमा च कापोता तीव्रा च नीला वालुकाप्रभायाम्, पङ्कप्रभायां नीला तीव्रतरा, धूमप्रभायां नीला तीव्रतमा कृष्णा च तीव्रा, तमःप्रभायां कृष्णा तीव्रतरा, महातमःप्रभायां कृष्णैव तीव्रतमा । अपरे मन्यन्ते—नारकाणां षडपि लेश्याः सम्भवन्ति, सम्यक्त्वप्रतिपत्तेरिति ॥

नारकाणां पुद्गलपरिणामः

भा०—अशुभतरपरिणामः । बन्धन-गति-संस्थान-भेद-वर्ण-गन्ध-रस-स्पर्शागुरुलघुशब्दाख्यः, दशविधोऽशुभः पुद्गलपरिणामः, नरकेषु अशुभतरश्च[1] । तिर्यगूर्ध्वमधश्च सर्वतोऽनन्तेन भयानकेन नित्योत्तमकेन तमसा नित्यान्धकाराः श्लेष्म-मूत्र-पुरीष-स्रोतो-मल-रुधिर-वसा-मेद-पूयानुलेपनतलाः । श्मशानमिव पूति-मांस-केशास्थि-चर्म-दन्त-नखास्तीर्णभूमयः । श्व-शृगाल-मार्जार-नकुल-सर्प-मूषिक-हस्त्यश्व-गो-मानुष-शवकोष्ठाशुभतरगन्धाः । हा मातः! धिगहो कष्टं बत मुञ्चत[2] धावत प्रसीद भर्तः! मा वधीः कृपणकमित्यनुबन्धरुदितैस्तीव्रकरुणैः दीनविक्लवैर्विलापैरार्तस्वनैर्निनादै-

१ 'अतः' इति घ-पुस्तके नास्ति । २ 'अधोऽधः' इत्यधिको घ-पाठः । ३ 'मुञ्च तावत् धावत' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दीनकृपणकरुणैर्याचितैर्बाष्पसन्निरुद्धैर्निस्तनितैर्गाढवेदनैः क्रूजितैः सन्तापोच्छ्वासनिश्वासैरनुपरतभयस्वनाः ।

टी०—**अशुभतरपरिणाम** इत्यादि । स्पर्श-रस-गन्ध-वर्ण-शब्द-संस्थान-भेद-गति-बन्धागुरुलघुपरिणामो दशधा । **स्पर्शस्तावद्** वृश्चिकदंश-कपिकच्छू-मुर्मुराङ्गारसदृशः, **रसोऽपि** तत्रत्यपुद्गलानां पिचु-मन्द-कोशातकीनिर्याससमः, **गन्धोऽपि** श्व-मार्जार-शृगाल-हस्त्यश्व-कुथितमृतकगन्धातिरिक्ततराशुभपरिणामः, **वर्णोऽपि** गम्भीरलोमहर्षणः त्रासकारी परमकृष्णः, **शब्दोऽपि** खरपरुषनिष्ठुरपरिणामः, **संस्थानं** नरकाकृतिः नारकाकृतिश्च, उभयमप्यालोक्यमानमेवोद्वेगमुपजनयति महाश्वभ्रवत् पिशाचाकृतिवद् वा, **भेदपरिणामोऽपि** पुद्गलानामशुभः शरीरनरककुड्यादिभ्यो विभिद्यमानाः पुद्गलाः वर्णस्पर्शादिभिरशुभपरिणामा जायन्ते, ततश्च दुःखहेतवो भवन्ति, **गतिर्नारकाणामप्रशस्तविहायोगतिनामकर्मोदयादशुभा** भवन्त्युष्ट्रपतङ्गादिवद्, **बन्धोऽपि** पुद्गलानां शरीरादिषु संश्लिष्यतामत्यन्ताशुभतरपरिणामो भवति, वर्णादिभिः **अगुरुलघुपरिणामोऽप्यशुभः**, सर्वेषां हि जीवानां शरीराण्यात्मनो न गुरूणि नापि लघूनीत्यगुरुलघुपरिणामः, स चानिष्टोऽनेकविधदुःखाश्रयत्वात् । अत्र च भाष्यकारेण स्पर्शादिदशविधपरिणामे किञ्चिद् दर्शितं किञ्चिन्न । तिर्यगूर्ध्वमधश्चेत्यादिना वर्णपरिणामः प्रतिपादितः, श्व-शृगाल-मार्जारादिना गन्धः, हा मातः! धिगहो कष्टमित्यादिना शब्दपरिणामः । शेषास्तु ग्रन्थगौरवभीत्या न प्रतिपदमुक्ताः, एतत्सम्बन्धित्वात् तु वक्तव्या इति ॥

नारकाणां शरीरस्वरूपं मानं च

भा०—**अशुभतरदेहाः** । **देहाः शरीराणि । अशुभनामप्रत्ययादशुभान्यङ्गोपाङ्गनिर्माणसंस्थानस्पर्शरसगन्धवर्णस्वराणि हुण्डानि निर्ल्लूनाण्डजशरीराकृतीनि । क्रूर-करुण-बीभत्स-प्रतिभयदर्शनानि दुःखभाञ्ज्यशुचीनि च तेषु शरीराणि भवन्ति । अतोऽशुभतराणि चाधोऽधः । सप्त धनूंषि त्रयो हस्ताः षडङ्गुलमिति शरीरोच्छ्रायो नारकाणां रत्नप्रभायाम् । द्विर्द्विः शेषासु । स्थितिवच्चोत्कृष्टजघन्यतो वेदितव्यः ॥**

टी०—**अशुभतरदेहा** इत्यादि । **अशुभनामकर्मोदयप्रत्ययात्** सर्वाण्यङ्गोपाङ्गादीनि तद्देहेष्वशुभानि द्रष्टव्यानि, सर्वाङ्गावयवानांस्वप्रमाणेष्वव्यवस्थानात्, तेषां हि नियतमेव **हुण्डानि** शरीराणि, उत्खातशेषपिच्छपक्षिशरीरवद् **बीभत्सानि** । तानि च तेषां द्विविधानि शरीराणि भवन्ति—भवधारकाण्युत्तरवैक्रियाणि च, तत्र भवधारकं जघन्येनाङ्गुलासङ्ख्येयभागप्रमाणं प्रथमायाम्, अन्यासु च पृथिवीषु, उत्कर्षेण सप्त धनूंषि त्रयो हस्ताः षट् चाङ्गुलानीति उत्सेधाङ्गुलमङ्गीकृत्योच्यते । परमाण्वादिक्रमेणाष्टौ यवमध्यान्यङ्गुलमेकम्, चतुर्विंशत्यङ्गुलो हस्तः,

---

१ 'ोपोष्णैश्च निश्वा०' इति घ-पाठः । २ 'ोता वेदितव्या' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्हस्तं धनुरिति । अथ शेषासु कथं[1] भूमिष्वित्यत आह—द्विर्द्विः शेषासु । रत्नप्रभानारकशरीरप्रमाणं[2] द्विगुणं द्वितीयस्यां नारकशरीरप्रमाणम् । तदपि द्विगुणं तृतीयस्याम् । एवं यावत् सप्तम्यां पञ्च धनुःशतानि पूर्णानि[3] । उत्तरवैक्रियं तु प्रथमायां जघन्येनाङ्गुलसङ्ख्येयभागप्रमितम्, अन्यासु च, उत्कर्षेण पञ्चदश धनूंषि अर्धतृतीयाश्च रत्नयः प्रथमायाम्, एतदेव द्विगुणं द्वितीयस्याम्, एवं तावत् ज्ञेयं यावत् सप्तम्यां धनुःसहस्रमिति । एतच्चाधःप्रमाणं रत्नप्रभादिषु पर्यन्तवर्तिप्रतरनारकाणामुत्कृष्टं द्रष्टव्यम्, जघन्यमुत्कृष्टं वा प्रथमप्रतरादिभेदेन सर्वत्र वक्तव्यम्, स्थितिवत् । यथाऽऽयुषः स्थितिः प्रथमप्रतरादिभेदेन भिद्यमाना दशनवतिसहस्रादिना रत्नप्रभायां पर्यन्तप्रतरे सागरोपमप्रमाणा[4] भवत्येवमेव शरीरप्रमाणमपि प्रथमप्रतरादिभेदेन जघन्योत्कृष्टाभ्यां भेत्तव्यमित्यावेदयति । उक्तमिदमतिदेशतो भाष्यकारेणास्ति चैतत्, न तु मया क्वचिदागमे दृष्टं प्रतरादिभेदेन नारकाणां शरीरावगाहनमिति ॥

नारकाणां वेदना

भा०—अशुभतराश्च[5] वेदना भवन्ति नरकेष्वधोऽधः। तद्यथा[6]—प्रथमायां उष्णवेदनाः, द्वितीयायामुष्णवेदनाश्च, तीव्रतरास्तीव्रतमाश्चातृतीयायाम्, उष्णशीते चतुर्थ्याम्, शीतोष्णे पञ्चम्याम्, परयोः शीततराः शीततमाश्चेति, तद्यथा—प्रथमशरत्काले चरमनिदाघे वा पित्तप्रकोपाभिभूतशरीरस्य सर्वतो दीप्ताग्निराशिपरिवृतस्य व्यभ्रे नभसि मध्याह्ने निवातेऽतिरस्कृतातपस्य यादृगुष्णजं दुःखं भवति ततोऽनन्तगुणं प्रकृष्टं[9] कष्टमुष्णवेदनेषु नरकेषु भवति । पौषमाघयोश्च मासयोस्तुषारलिप्तगात्रस्य रात्रौ हृदयकरचरणाधरोष्ठदशनायासिनि प्रतिसमयप्रवृद्धे शीतमारुते निरग्न्याश्रयप्रावरणस्य यादृक् शीतसमुद्भवं दुःखमशुभं भवति ततोऽनन्तगुणं प्रकृष्टं कष्टं शीतवेदनेषु नरकेषु भवति । यदि किलोष्णवेदनान्नरकादुत्क्षिप्य नारकः सुमहत्यङ्गारराशावुद्दीप्ते प्रक्षिप्येत स किल सुशीतां मृदुमारुतां शीतलच्छायामिव प्राप्तः सुखमनुपमं विन्द्यात्, निद्रां चोपलभेत, एवं कष्टतरं नारकमुष्णमाचक्षते। तथा किल यदि शीतवेदनान्नरकादुत्क्षिप्य नारकः कश्चिदाकाशे माघमासे निशि प्रवाते महति तुषारराशौ प्रक्षिप्येत[11] सदन्तशब्दोत्तमप्रकम्पायासकरेऽपि तत्सुखं विन्द्यादनुपमां निद्रां चोपलभेत, एवं कष्टतरं नारकशीतदुःखमाचक्षते इति ॥

---

१ कथंशब्दः क-ख-पाठे नास्ति । २ 'शरीराणां द्विगुणं' इति क-ख-पाठः । ३ 'पूर्णानीति' इति ग-पाठः । ४ 'प्रमाणं' इति क-पाठः । ५ आगमशब्देनात्र मूलागमः, तेन वृत्त्यादिषु एतत्सत्त्वेऽपि न क्षतिः, उत्तरे तु पृथ्वीवद् द्विगुणमिति स्पष्टमेव । ६ 'अशुभतरवेदनाः' इत्यधिको ग घ-पाठः । ७ 'तद्यथा—उष्णवेदनास्तीव्रास्तीव्रतरास्तीव्रतमाश्च तृतीयायाः' इति ग-घ-पाठः । ८ 'शीताः शीततराश्चेति' इति घ-पाठः । ९ 'प्रकृष्टमुष्ण' इति क-ख-पाठः । १० 'तुषारभिन्न' इति क-पाठः । ११ 'सदन्त' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अशुभतरविक्रियाः । अशुभतराश्च विक्रिया नरकेषु नारकाणां भवन्ति, शुभं करिष्याम इत्यशुभतरमेव विकुर्वते । दुःखाभिहतमनसश्च दुःखप्रतीकारं चिकीर्षवः गरीयस एव ते दुःखहेतून् विकुर्वते इति ॥ ३ ॥

टी०—अशुभतराश्च वेदना इत्यादि भाष्यम् । **प्रथमायां** तीव्रोष्णवेदना, द्वितीयस्यां सैव तीव्रतरा, तृतीयस्यां तीव्रतमा, चतुर्थ्यामुष्णवेदनाका बहवो नारकाः, शीतवेदनाकास्त्वल्पे, तेनोभय्यपि वेदना तस्याम्, पञ्चम्यां शीतवेदनाका बहवः स्तोकास्तूष्णवेदनाकाः, तत्राप्युभय्येव वेदना, षष्ठ्यामतिशीता, सप्तम्यां शीततमेति ॥ अधुनाऽवेदनाद्वयस्यापि किञ्चित् साधर्म्यमङ्गीकृत्य दृष्टान्तद्वयमुपन्यस्यति असद्भावप्रज्ञापनया, न पुनर्नारकः केनचिदुत्क्षेप्तुमानेतुं चेह शक्यते, प्रकृष्टाशुभकर्मानुभावादेवेति, न च तत्राग्निरस्ति पृथिवीपरिणाम एवासौ क्षेत्रस्वभावादनादिपरिणामलक्षणः प्रकृष्टोष्णतानुगतः सन्तमसरूपः सत्त्वानां दुःखहेतुरिति ॥

तद्यथा प्रथमशरत्काल इत्यादि भाष्यमेव सुज्ञानम् ॥

अशुभतरविक्रिया इत्यादि भाष्यम्, उत्तरवैक्रियं हि ते शरीरमाकलितप्रयत्ना अपि रचयन्तो रूपवत्तेच्छया क्षेत्रकर्मानुभावाद् विरूपतरमाविष्कुर्वते विदूषकवदिति ॥३॥

ते च नारकास्तासु भूमिषु नरकेषु वा ।

सूत्रम्—परस्परोदीरितदुःखाः ॥ ३-४ ॥

भा०—परस्परोदीरितानि च दुःखानि नरकेषु नारकाणां भवन्ति । क्षेत्रस्वभावजनिताच्चाशुभात् पुद्गलपरिणामादित्यर्थः ॥

टी०—मिथ्यादृष्टयो भवप्रत्ययविभङ्गानुगतत्वादालोक्य परस्परमेवाभिघातादिभिर्दुःखानि उत्पादयन्ति, सम्यग्दृष्टयस्तु संज्ञित्वादेवात्मानमनुशोचन्तोऽतीतजन्मानाचारकारिणं क्षेत्रस्वभावजनितानि दुःखानि सहमानाः परैरुदीरितवेदनाः स्वायुषः क्षयमुदीक्षन्तेऽतिदुःखिताः न पुनरन्यनारकाणां ते समुदीरयन्ति वेदनाः, तेषां चावधिज्ञानं न विभङ्ग इति । न केवलं परस्परोदीरणनिर्वृत्तानि तेषां दुःखानि किन्तु सहजान्यपि सन्तीत्यत आह—**क्षेत्रस्वभावेत्यादि** । नरकक्षेत्रस्यायमेव स्वभावो यद् दुःखात्मकता । नहि तत्र काचित् सुखमात्रा समस्ति । यदपि ह्युपपातादिहेतुकं सुखमाचक्षते तदपि बहुतरदुःखपरिलीढत्वादल्पकालस्थायित्वाच्च दुःखमेव, अत एवंविधक्षेत्रानुभावनिर्वर्तितपुद्गलपरिणामाच्च ते दुःखमनुभवन्तीत्यर्थः । एतदेव वचनं व्याख्यानयति सूत्रमपहाय—

---

१ 'अशुभतरवेदना' इति ग-पाठः । २ 'स्वरूपः' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—तत्र क्षेत्रस्वभावजनितः[1] पुद्गलपरिणामः शीताष्णक्षुत्पिपासादिः । शीतोष्णे व्याख्याते । क्षुत्पिपासे वक्ष्यामः । अनुपरतशुष्केन्धनोपादाननेनाग्निना तीक्ष्णेन प्रततक्षुदग्निना दन्दह्यमानशरीरा अनुसमयमाहारयन्ति[2] ते सर्वपुद्गलानप्यद्युस्तीव्रया च नित्यानुषक्तया पिपासया शुष्ककण्ठौष्ठतालुजिह्वाः सर्वोदधीनपि पिबेयुः, न च तृषं समाप्नुयुस्ते वर्द्धयातामेव चैषां क्षुत्तृष्णे इत्येवमादीनि क्षेत्रप्रत्ययानि ॥

क्षेत्रजा वेदना

टी०—तत्र क्षेत्रस्वभावजनितेत्यादि सुगमम् । पुनः सूत्रं परामृश्य सूत्रार्थाख्यानं करोति ॥

भा०—परस्परोदीरितानि च । अपि चोक्तम्—'भवप्रत्ययोऽवधिर्नारकदेवानाम्'(अ०१,सू०२२)इति । तन्नारकेष्ववधिज्ञानम् अशुभभवहेतुकं मिथ्यादर्शनयोगाच्च विभङ्गज्ञानं भवति । भावदोषोपघातात् तु तेषां दुःखकारणमेव भवति । तेन हि ते सर्वतः तिर्यगूर्ध्वमधश्च दूरत एवाजस्रं दुःखहेतून् पश्यन्ति । यथा च काकोलूकमहिनकुलं चोत्पत्त्यैव बद्धवैरं तथा परस्परं प्रति नारकाः । यथा वा अपूर्वान् शुनो दृष्ट्वा श्वानो निर्दयं क्रुध्यन्त्यन्योऽन्यं प्रहरन्ति च, तथा तेषां नारकाणामवधिविषयेण दूरत एवान्योऽन्यमालोक्य क्रोधस्तीव्रानुशयो जायते, दुरन्तो भवहेतुकः । ततः प्रागेव दुःखसमुद्घातार्ताः क्रोधाग्न्यादीपितमनसः अतर्किता इव श्वानः समुद्धता वैक्रियं भयानकं रूपमास्थाय तत्रैव पृथिवीपरिणामजानि क्षेत्रानुभावजनितानि चायःशूलशिला-मुशल-मुद्गर-कुन्त-तोमरासि-पट्टिश-शक्ति-योधन-खड्ग-यष्टि-परशु-भिण्डिमालादीन्यायुधान्यादाय कर-चरण-दशनैश्चान्योऽन्यमभिघ्नन्ति । ततः परस्पराभिहता विकृताङ्गा निस्तनन्तो गाढवेदनाः सूनाघातनप्रविष्टा इव महिषशूकरोरभ्राः स्फुरन्तो रुधिरकर्दमेऽपि चेष्टन्ते । इत्येवमादीनि परस्परोदीरितानि नरकेषु नारकाणां दुःखानि भवन्तीति ॥ ४ ॥

परस्परोदीरितं दुःखम्

टी०—परस्परोदीरितानि चेत्यादि । परस्परोदीरणायां कारणं दर्शयति—अपि चोक्तं—भवप्रत्ययोऽवधिर्नारकदेवानामिति मिथ्यादृशां विभङ्गज्ञानमितरेषामवधिज्ञानमेव, शेषं सुज्ञानमत्र भाष्यमिति ॥ ४ ॥

एवं ते परस्परेणोदीरयन्ति दुःखम्, विशेषेण तु—

सूत्रम्—सङ्क्लिष्टासुरोदीरितदुःखाश्च प्राक् चतुर्थ्याः ॥ ३—५ ॥

भा०—सङ्क्लिष्टासुरोदीरितदुःखाश्च नारका भवन्तीति । तिसृषु भूमिषु प्राक् चतुर्थ्याः ।

---

१ '०नितपुद्गल०' इति ख-घ-पाठः । २ 'तीक्ष्णोदराग्निना' इति ग-पाठः ' तीक्ष्णेन प्रततेन क्षुद० ' इति तु घ-पाठः । ३ 'येन ते' इति ग-पाठः । ४ 'प्नुयुर्वर्धेयातां' इति ग-पाठः । ५ 'शक्तययोधन' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—चशब्दः परस्परोदीरणं क्षेत्रस्वभावं चाभिमुखीकरोति। प्राक् चतुर्थ्या इति मर्यादा नाभिविधिरिति। सङ्क्लिष्टचित्तास्त्वशुभानुबन्धिबालतपोकामनिर्जरोपार्जितदेवजन्मानः स्वल्पविभवलाभाध्माता जन्मान्तरानालोकिनः एतावत्त्रैलोक्ये सुखमित्यध्यवसिताः। ते च भवनवासिनां प्रथम एवासुरनाम्नि निकाये भवन्ति, नान्येषु, तेषु नामोत्कीर्तनेनापि रौद्रतया भयमादधति किमुत दर्शनेनेत्यावेदयति—

भा०—तद्यथा—अम्बाम्बरीष-श्याम-शबल-रुद्रोपरुद्रकाल-महाकालास्यसिपत्रवन-कुम्भी-वालुका-वैतरणी-खर-स्वर-महाघोषाः पञ्चदश परमाधार्मिका मिथ्यादृष्टयः पूर्वजन्मसु सङ्क्लिष्टकर्माणः पापाभिरतयः आसुरीं गतिमनुप्राप्ताः कर्मक्लेशजा एते तान्छील्यान्नारकाणां वेदनाः समुदीरयन्ति विचित्राभिरुपपत्तिभिः। तद्यथा—तप्तायोरसपायननिष्टप्तायःस्तम्भालिङ्गनकूटशाल्मल्यग्रारोपणावतारणायोघनाभिघातवासीक्षुरतक्षणक्षारतप्ततैलाभिषेचनायस्कुम्भपाकाम्बरीषभर्जनयन्त्रपीडनायःशूलशलाकाभेदनक्रकचपाटनाङ्गारदहनवाहनसूचीशाड्वलापकर्षणैस्तथा सिंहव्याघ्र-द्वीपि-श्व-शृगाल-वृक-कोक-मार्जार-नकुल-सर्प-वायस-गृध्र-काकोलूक-श्येनादिखादनैस्तथा तप्तवालुकावतरणासिपत्रवनप्रवेशनवैतरण्यवतारणपरस्परयोधनादिभिरिति॥

परमाधार्मिककृता वेदनाः

स्यादेतत् किमर्थमेवं ते कुर्वन्तीति?। अत्रोच्यते—पापकर्माभिरतय इत्युक्तम्। तद्यथा—गो-वृषभ-महिष-वराह-मेष-कुक्कुट-वार्तकलावकान्मुष्टिमल्लांश्च युध्यमानान् परस्परं चाभिघ्नतः पश्यतां रागद्वेषाभिभूतानां अकुशलानुबन्धिपुण्यानां नराणां परा प्रीतिरुत्पद्यते तथा तेषामसुराणां नारकाँस्तथा तानि कारयतामन्योन्यं घ्नतश्च पश्यतां परा प्रीतिरुत्पद्यते। ते हि दुष्टकन्दर्पास्तथाभूतान् दृष्ट्वाऽट्टहासं मुञ्चन्ति, चेलोत्क्षेपाक्ष्वेडितास्फोटितावल्लिततलतालनिपातांश्च कुर्वन्ति, महतश्च सिंहनादान् नदन्ति। तच्च तेषां सत्यपि देवत्वे सत्सु च कामिकेष्वन्येषु प्रीतिकारणेषु मायानिदानमिथ्यादर्शनशल्यतीव्रकषायोपहतस्यानालोचितभावदोषस्याप्रत्यवकर्षस्याकुशलानुबन्धिपुण्यकर्मणो बालतपसश्च भावदोषानुकर्षिणः फलं, यत्सत्स्वप्यन्येषु प्रीतिहेतुष्वशुभभावा एव प्रीतिहेतवः समुत्पद्यन्ते। इत्येवमप्रीतिकरं निरन्तरं सुतीव्रं दुःखमनुभवतां मरणमपि काङ्क्षतां तेषां न विपत्तिरकाले विद्यते, कर्मनिर्धारितायुषाम्। उक्तं हि—'औपपातिकचरमदेहोत्तमपुरुषासंख्येयवर्षायुषोऽनपवर्त्यायुषः' (अ० २, सू० ५३) इति। नैव तत्र शरणं विद्यते, नाप्यपक्रमणम्। ततः कर्मवशादेव दग्धपाटितभिन्नच्छिन्नक्षतानि च तेषां सद्य एव संरोहन्ति शरी-

१ 'पायिनोनिष्ट' इति क-पाठः। २ 'तर्जन' इति घ-पाठः। ३ 'वतरासिपत्र' इति क-पाठः। ४ 'निपातनाश्च' इति ग-पाठः, 'निपातनांश्च' इति तु घ-पाठः। ५ 'मप्रतीकारम्' इति ग-टी-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राणि दण्डराजिरिवाम्भसि ॥ एवमेतानि त्रिविधानि दुःखानि नरकेषु नारकाणां भवन्तीति ॥ ५ ॥

टी०—अम्बाम्बरीषेत्यादि भाष्यम् । अम्बाः, अम्बरीषाः, श्यामाः, शबलाः, रुद्राः, उपरुद्राः, कालाः, महाकालाः, असयः, असिपत्रवनाभिधानाः, कुम्भीनामानः, वालुकाभिधानाः, वैतरणीसंज्ञाः, खरस्वराः, महाघोषाश्चेति एते पञ्चदशासुरनिकायान्तःपातिनो देवविशेषा एव **परमाधार्मिका** उच्यन्ते । अधर्मचारिणः अधार्मिकाः । प्रकर्षपर्यन्तवर्तिनः अधार्मिकाः परमाधार्मिका इति । एते च भिन्नहेतुकदुःखोत्पादनादेवावाप्तताद्दग्विधसंज्ञाः समवगन्तव्याः, शेषं भाष्यं सुज्ञानमेव प्रायः, **एवमेतानि त्रिविधानि दुःखानि नरकेषु नारकाणां भवन्ति**, परस्परोदीरणजनितानि क्षेत्रस्वभावोत्पन्नानि सङ्क्लिष्टासुरोदीरितानि वाऽऽचतुर्थ्याः, चतुर्थ्यादिषु परस्परोदीरितानि क्षेत्रानुभावजनितानि चेति द्विविधान्येवेति॥५॥

नारकाश्चानपवर्त्यायुष्ट्वादनुबद्धातिविषमदुःखानुभूलालीढमूर्तयो नाकाले मर्तुमिच्छन्तोऽपि हि म्रियन्ते, पूर्णे स्वायुषि पश्चादुद्वर्तिष्यन्ते, तत् पुनः स्वायुस्तेषां किमित्यत आह—

सूत्रम्—तेष्वेक-त्रि-सप्त-दश-सप्तदश-द्वाविंशति-त्रयस्त्रिंशत्-सागरोपमाः सत्त्वानां परा स्थितिः ॥ ३—६ ॥

टी०—'तासु नरका' इत्येतान् नरकान् सूत्रत्रयान्तरितान् भाष्यकृदभिसम्बन्धयति॥

भा०—तेषु नरकेषु नारकाणां पराः स्थितयो भवन्ति । तद्यथा—रत्नप्रभायामेकं सागरोपमम्[1]। एवं त्रिसागरोपमा, सप्तसागरोपमा, दशसागरोपमा, सप्तदशसागरोपमा, द्वाविंशतिसागरोपमा, त्रयस्त्रिंशत्सागरोपमा इति । जघन्या तु पुरस्ताद् वक्ष्यते । 'नारकाणां च द्वितीयादिषु' , 'दश वर्षसहस्राणि प्रथमायाम्' (अ०४, सू०४३-४४) इति ॥

नारकाणां परा स्थितिः

टी०—तेषु-उक्तलक्षणेषु **नरकेषु** ये सत्त्वाः । सत्त्वशब्दः प्रेक्षापूर्वकारितयोपात्तः अनुकम्पाप्रदर्शनार्थम् । सत्त्वा वराका इति, क्लेशभुजो जनाः सत्त्वा इति लोकेऽनुकम्पाशब्देनोच्यन्ते । एताश्चोत्कृष्टाः **स्थितयो भवन्ति, रत्नप्रभायामेकं सागरोपमं** प्रकृष्टा स्थितिः सत्त्वानाम्, **एवं त्रिसागरोपमा** स्थितिर्द्वितीयस्यामित्यादि सुज्ञानम् । उपमानमुपमा-सादृश्यं सागरेणोपमाः सागरोपमाः,बहुत्वप्रतिपादनार्थं सागरग्रहणम्, एका(कं) सागरोपमा(मं) प्रमाणं यस्याः स्थितेःसैकसागरोपमा स्थितिरित्येवमन्यत्रापि योज्यम् । जघन्या स्थितिः पुरो वक्ष्यते लाघवमुपजीवताऽऽचार्येण चतुर्थेऽध्याये—**'नारकाणां च द्वितीयादिषु' 'दश वर्षसहस्राणि प्रथमायाम्** (सू० ४३-४४)इति, । रत्नप्रभायामवरतो दश वर्षसहस्राण्यायुषः स्थितिः, द्वितीयादिषु

---

१ 'निकायानामुपपातिनः' इति क–पाठः । २ ' ०पमाः ' इति क-ख-ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षट्स्वेक-त्रि-सप्त-दश-सप्तदश-द्वाविंशतिसागरोपमा जघन्या स्थितिर्भवति । इयं च-स्थितिर्जघन्या उत्कृष्टा वा सामान्येनैकस्यां पृथिव्यामुक्ता न प्रथमप्रतरादिभेदेन, प्रतिप्रतरं स्थितिपरिज्ञानाय विशेषार्थिना नरकेन्द्रकाः समालोकनीया इति । अथैतासु सप्तसु पृथिवीषु किमविशेषेण सर्वे प्राणिनो नरकास्रववर्तिनः सर्वासूत्पद्यन्ते उत केचित् कस्याश्चिदिति, तथा के वा कुतो भूमेरुद्वृत्ताः सन्तो भवन्ति, किं वा लभन्ते सम्यग्दर्शनादीनाम्? इत्यत आह—

नारकाणामागतिर्गतिश्च

भा०—[1]तत्रास्रवेषु यथोक्तैर्नारकसंवर्तनीयैः कर्मभिरसंज्ञिनः प्रथमायामुत्पद्यन्ते । सरीसृपा द्वयोरादितः प्रथमद्वितीययोः । एवं पक्षिणस्तिसृषु । सिंहाः चतसृषु । उरगाः पञ्चसु । स्त्रियः षट्सु । मत्स्यमनुष्याः सप्तस्विति । न तु देवा नारका वा नरकेषूपपत्तिमाप्नुवन्ति । नहि तेषां बह्वारम्भपरिग्रहादयो नरकगतिनिर्वर्तका हेतवः सन्ति (अ०६, सू० १६) । नाप्युद्वर्त्य नारका देवेषूत्पद्यन्ते । न ह्येषां सरागसंयमादयो देवगतिनिर्वर्तका हेतवः सन्ति (अ०६, सू० २०) । उद्वृत्तास्तु तिर्यग्योनौ मनुष्येषु वा उत्पद्यन्ते । मनुष्यत्वं च प्राप्य केचित् तीर्थकरत्वमपि प्राप्नुवन्ति, आदितस्तिसृभ्यः, निर्वाणं चतसृभ्यः, संयमं पञ्चभ्यः, संयमासंयमं षड्भ्यः, सम्यग्दर्शनं सप्तभ्योऽपीति ।

टी०—तत्रास्रवेषु यथोक्तैर्नारकसंवर्तनीयैरित्यादि भाष्यं सुज्ञानम् ॥ अधस्तनीषु षट्स्वपि भूमिषु रत्नप्रभादिवत् किं द्वीपादिविनिवेशाः सन्ति? न सन्तीत्यत आह—

नारकेष्वसंभविनः पदार्थाः

भा०—द्वीप-समुद्र-पर्वत-नदी-ह्रद-तडाग-सरांसि वा ग्राम-नगर-पत्तनादयो विनिवेशा बादरो वनस्पतिकायो वृक्ष-तृण-गुल्मादिः द्वीन्द्रियादयस्तिर्यग्योनिजा मनुष्या देवाश्चतुर्निकाया अपि न सन्ति । अन्यत्र समुद्घातोपपातविक्रियासाङ्गतिकनरकपालेभ्यः । उपपाततस्तु देवा रत्नप्रभायामेव सन्ति । नान्यासु । गतिस्तृतीयां यावत् ।

टी०—द्वीपसमुद्रेत्यादि भाष्यं सुज्ञानं प्रायः । नैते द्वीपादयः सन्ति सन्निवेशा रत्नप्रभामपहायान्यत्रेति, एतस्य विधेरपवादः अन्यत्र समुद्घात इत्यादि । समुद्घातगताः केवलिनः, औपपातिका नारका एव, तथा वैक्रियलब्धिसम्पन्नाः, साङ्गतिकाः पूर्वजन्ममित्रादयः, नरकपालाः परमाधार्मिकाः, एते सर्वेऽपि द्वितीयादिषु भूमिषु कदाचित् केचित् क्वचित् संभवेयुरपीति, उपपातमङ्गीकृत्य रत्नप्रभायामेव देवाः सन्ति न शेषासु, गमनमङ्गीकृत्य यावत् तृतीयां ततः परं न गच्छन्त्येव, शक्तौ सत्यामपि लोकानुभावादेवेति । तथा अन्यमपि लोकानुभावमादर्शयति प्रसङ्गात्—

---

१ 'तत्रास्रवैः' इति घ-पाठः । २ 'उद्वर्तितास्तु', इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—यच्च वायव आपो धारयन्ति न च विष्वग् गच्छन्ति आपश्च पृथिवीं धारयन्ति न च प्रस्पन्दन्ते। पृथिव्यश्चाप्सु विलयं न गच्छन्ति। तत् तस्यानादिपारिणामिकस्य नित्यसन्ततेर्लोकविनिवेशस्य लोकस्थितिरेव हेतुर्भवति।

लोकानुभावजाः पदार्थाः

टी०—यच्च वायव इत्यादि। तनुवातवलयमाकाशप्रतिष्ठमनालम्बनं घनवातवलयं बिभर्ति, घनमारुतवलयमप्यापो धत्ते, न च ता आपो विष्वग् गच्छन्ति, विशीर्यन्ते स्रवन्तीत्यर्थः आपश्च कठिनीभूताः सत्यः पृथिवीर्धारयन्ति न स्पन्दन्ते, ताश्च पृथिव्यो न तास्वप्सु विलीयन्ते, स एष सर्वोऽप्यनादिपारिणामिकः क्रमसन्निवेशो नित्यसन्ततिर्द्रव्यास्तिकनयावलम्बनात्। तथा चागमः—"इमा[1] णं भंते! रयणप्पभा पुढवी किं सासता असासता? गोयमा! सिय सासया सिय असासया, से केणट्ठेणं भंते! एवं वुच्चइ? गोयमा! दव्वट्ठयाए सासया, वण्णपज्जवेहिं गन्धपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं असासया, से एतेणं अट्ठेणं गोयमा! एवं वुच्चइ"। अस्यावस्थानस्य लोकानुभाव एव हेतुः-कारणं भवतीति।

भा०—अत्राह-उक्तं भवता—'लोकाकाशेऽवगाहः' (अ० ५, सू० १२), 'तदनन्तरमूर्ध्वं गच्छत्यालोकान्तात्' (अ० १०, सू० ५) इति। तत्र लोकः कः कतिविधो वा किंसंस्थितो वेति?। अत्रोच्यते—पञ्चास्तिकायसमुदायो लोकः।

टी०—अत्राह-उक्तं भवतेत्यादिः सूत्रपातनिकाग्रन्थः। सूत्राण्यधिकृत्योच्यते, उक्तं भवता—'लोकाकाशेऽवगाहः' पञ्चमेऽध्याये (सू० १२), तथा दशमे (सू० ५) 'तदनन्तरमूर्ध्वं गच्छत्यालोकान्तादिति,' एवमनेकस्मिन् सूत्रे लोकशब्द उच्चरितः, तत्र को लोकः कतिविधो वा किंसंस्थितो वेति? उच्यते—पञ्चास्तिकायसमुदायो लोकः। धर्माधर्माकाशजीवपुद्गलाः पञ्चास्तिकायास्तत्समुदायो लोकः, आकाशमाधारो भवति, धर्मादयस्त्वाधेयाः, आधाराधेयभावेन यदवस्थानमनाद्यमेषां स लोकः, तथा चागमः—"किमिदं[2] भंते! लोगेत्ति पवुच्चति? गोयमा! जीवा चेव अजीवा चेव"।

भा०—ते चास्तिकायाः स्वतत्त्वतो विधानतो लक्षणतश्चोक्ता वक्ष्यन्ते च। स च लोकः क्षेत्रविभागेन त्रिविधः—अधस्तिर्यगूर्ध्वं[3] चेति। धर्माधर्मास्तिकायौ लोक[4]व्यवस्थाहेतू। तयोरवगाहनविशेषाल्लोकानुभावनियमात् सुप्रतिष्ठकवज्राकृतिर्लोकः। अधोलोको गो[5]कन्धरार्धाकृतिः॥

लोकस्य त्रैविध्यं

---

१ इयं भदन्त! रत्नप्रभा पृथ्वी किं शाश्वती अशाश्वती? गौतम! स्यात् शाश्वती स्यात् अशाश्वती। तत् केनार्थेन भदन्त! एवमुच्यते? गौतम! द्रव्यार्थतया शाश्वती, वर्णपर्यवैर्गन्धपर्यवै रसपर्यवैः स्पर्शपर्यवैरशाश्वती, तदेतार्थेन गौतम! एवमुच्यते।

२ किमयं भदन्त! लोक इति प्रोच्यते? गौतम! जीवाश्चैव अजीवाश्चैव।

३ 'ोगूर्ध्वश्चेति' इति ख-टी-पाठः। ४ 'लोकहेतू' इति क-ग-पाठः। ५ कन्धराकृतिः इति क-ख-पाठः। 'कन्धाराधरार्धाकृतिः' इति तु ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०--ते **चास्तिकाया** इत्यादि । अस्ति च ते कायाश्चास्तिकायाः, प्रवाहनित्यतामस्तिशब्दः प्रतिपादयति, न कूटस्थनित्यताम्, कायग्रहणं प्रदेशावयवबहुत्वार्थमिति पञ्चमे वक्ष्यते, **स्वतत्त्वतः**-स्वरूपतः-औपशमिकादिभावतः स्वतत्त्वो जीवः । **विधानतः**-संसारिमुक्तादिभेदतः, **लक्षणतः**-उपयोगो लक्षणमित्येवं जीवास्तिकायोऽभिहितः, शेषाश्च क्वचित् प्रसङ्गेनेत्यत **उक्ताः**, पञ्चमे पुनः प्रतिपदमेव वक्ष्यन्ते धर्मास्तिकायादयः स्वतत्त्वविधानलक्षणैरिति ॥ **स चैवंविधलक्षणः लोकः क्षेत्रविभागेन त्रिविधः अधस्तिर्यगूर्ध्वं चेति** । क्षेत्रविभागो विशिष्टमर्यादाव्यवच्छिन्नः, तद्यथा-समतलाद् भूभागादधोऽवगाह्य नव योजनशतानि रत्नप्रभाव्यवस्थितोपरितनाधस्तनक्षुल्लकप्रतरारब्धः सप्तमधरायाः परतो यावत् षोडश योजनानि तावदधोलोकः, तिर्यग्लोकस्तु तेभ्य एव क्षुल्लकप्रतरेभ्य आरब्धोऽष्टादशयोजनशतान्यूर्ध्वमारुह्य यावज्ज्योतिर्लोकोपरितनतलस्तावद् भवति, ज्योतिर्लोकोपरितनतलारब्धो यावदूर्ध्वं सिद्धिक्षेत्रादुपरि योजनमेकं तावदूर्ध्वलोक इति ॥ अधुना लोकसंस्थानव्याख्यानायाह-**धर्माधर्मास्तिकायावित्यादि** । धर्माधर्मद्रव्ये हि वक्ष्यमाणे समन्ततो लोकसन्निवेशमर्यादाव्यवस्थायाः कारणभूते, यावत्याकाशेऽवगाढे यथावस्थिते तथा तदवगाहनवशाल्लोकसन्निवेशः । ननु[3] क्वचित् पृथुनी क्वचित् तनुके क्वचित् प्रदेशवृद्धिपरिहाणियायिनी केन[4] सन्निवेशं ग्राहिते इत्याह-**लोकानुभावनियमात्** । लोकानुभावो हि महानुभावश्चित्रानेकशक्तिगर्भोऽनादिपारिणामिकस्वभावविशेषस्तत्कृतादेव नियमात् तथासंस्थाने ते द्रव्ये नेश्वरादीच्छाविरचिते, इत्येवं धर्माधर्मद्वयव्यवस्थानकृतो लोकसन्निवेशः । स च सुप्रतिष्ठकवज्राकृतिः सुप्रतिष्ठकवज्रयोरिव संस्थानं-आकृतिर्यस्यासौ सुप्रतिष्ठकवज्राकृतिर्लोकः, सुप्रतिष्ठकः-शरयन्त्रकं यत्र व्यवस्थाप्य वासांसि धूप्यन्ते, तत् किल बहुनुहरति लोकसन्निवेशस्य, वज्रमपि शक्रायुधं तदपि बहुसदृशमाचक्षते प्रवचनविदः, लोकसंस्थानस्य स्फुटतरः सन्निवेशोऽमुनैव सूरिणा प्रकरणान्तरे (**प्रशम०** गा० २१०-२११) अभिहितस्तद्यथा—

" जीवाजीवौ द्रव्यमिति षड्विधं भवति लोकपुरुषोऽयम् ।
वैशाखस्थानस्थः पुरुष इव कटिस्थकरयुग्मः ॥-आर्या
तत्राधोमुखमल्लकसंस्थानं वर्णयन्त्यधोलोकम् ।
स्थालमिव तिर्यग्लोकमूर्ध्वमथ मल्लकसमुद्गम् ॥ " ॥

एवं समुदायसन्निवेशमाख्यायाधुना प्रत्येकमधोविभागादिसन्निवेशाभिधित्सया आह-**अधोलोको गोकन्धरार्धाकृतिः** । गोग्रीवायास्त्वधरमर्धमुपरिष्टात् सङ्क्षिप्तमधस्तात् क्रमवृद्ध्या विशालं विशालतरं च भवति तद्वदधोलोकसन्निवेशः , उपरि तनुकोऽधस्तु विशालो विशालतरश्चेति । एतदर्थसमर्थनायाह-

---

१ ' सिद्धिक्षेत्रात् ' इति क-ख-पाठः । २ ' तदा ' इति ग-पाठः । ३ ' ते तु ' इति ग-पाठः । ४ ' केन तथा ' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—उक्तं ह्येतद् । भूमयः ससाधोऽधः पृथुतराश्छत्रातिच्छत्रसंस्थिताः' (अ० ३, सू० १) इति ता यथोक्ताः । तिर्यग्लोको झल्लर्याकृतिः । ऊर्ध्वलोको मृदङ्गाकृतिरिति । तत्र तिर्यग्लोकप्रसिद्ध्यर्थमिदमाकृतिमात्रमुच्यते ॥ ६ ॥

तिर्यग्लोक-प्रस्तावना

टी०—उक्तं ह्येतदित्यादिना । यथोक्तं यथासन्निवेशं यथाप्रमाणं चाधोलोक इति । झल्लर्याकृतिस्तिर्यग्लोकः । झल्लरी सर्वत्र समतला तुल्यविष्कम्भायामा वादित्रविशेषस्तद्वत् तिर्यग्लोकसन्निवेशः, स च विष्कम्भायामाभ्यां रज्जुप्रमाणो जम्बूद्वीपमेरुरुचकमध्य इति । मृदङ्गाकृतिरूर्ध्वलोक इति ॥ मृदङ्गो—वादित्रविशेष उपरिष्टादधश्च संक्षिप्तो मध्ये पृथुस्तद्वदूर्ध्वलोकः, ऊर्ध्वाधः किञ्चिदूनसप्तरज्जुको ब्रह्मलोकाऽधोव्यवस्थितकृष्णराजिमध्यगलोकान्तिकदेवनिवासरिष्टविमानप्रस्तारमध्यस्तिर्यक्पञ्चरज्जुप्रमाणो ब्रह्मलोकप्रदेशेऽन्यत्र प्रदेशहान्या[1] अनियतप्रमाण इति । तत्र च त्रितयेऽधोलोकः प्रागाख्यातः, अधुना तिर्यग्लोकप्रसिद्ध्यर्थमिदमाकृतिमात्रमुच्यते, एवंविधस्तिर्यग्लोक इत्यस्यार्थस्य प्रतीतये सर्वमिदं आ अध्यायपरिसमाप्तेः प्रतायते, संस्थानमात्रं, मात्रशब्दः संक्षेपाभिधानार्थः केनचिल्लेशोद्देशेन न पुनर्विस्तरेणेति, विस्तरतस्तु द्वीपसागरप्रज्ञप्त्यादिभ्योऽधिगन्तव्य इत्यावेदयति ॥ ६ ॥

सूत्रम्—जम्बूद्वीपलवणादयः शुभनामानो द्वीपसमुद्राः ॥ ३—७ ॥

भा०—जम्बूद्वीपादयो द्वीपा लवणादयश्च समुद्राः । शुभनामान इति । यावन्ति लोके शुभानि नामानि तन्नामान इत्यर्थः । शुभान्येव वा नामान्येषामिति ते शुभनामानः । द्वीपादनन्तरः समुद्रः । समुद्रादनन्तरो द्वीपः ॥

द्वीपसमुद्र-व्यवस्था

टी०—जम्बूद्वीपादयो द्वीपा इत्यादि भाष्यम् । जम्बूद्वीप इति संज्ञासंज्ञिसम्बन्धोऽत्रानादिः, पुरुषप्रवाहानादित्वात्, जम्बूतरोश्च सर्वदा सत्त्वात् लोकसन्निवेशस्य च न कदाचिदनीदृशत्वात्, स च शब्दार्थसम्बन्धः पुरुषान्तरव्यवस्थाप्योऽनादिप्रवाहरूपोऽपि व्यवहारक्षमतया सन्नियुज्यत इति । जम्बूद्वीपादयो द्वीपाः लवणादयः समुद्रा इत्यादिशब्दस्य प्रत्येकमभिसम्बन्धमापादयति । शुभनामान इत्यनेन विशिष्टामेव संज्ञां द्वीपसमुद्राणां प्रतिपादयति, शुभानि च तानि नामानि चेति शुभनामानि प्रशस्ताभिधानानीत्यर्थः । शुभनामानि येषां ते शुभनामानः, एतदेव स्पष्टयति—यावन्ति लोके शुभानि नामानि तन्नामान इत्यर्थः । कियन्ति पुनस्तानि ? असङ्ख्येयानि लोके शुभनामानीति । तच्चासङ्ख्येयकं विशिष्टमेव परिगृह्यते, तद्यथा—असङ्ख्येयखण्डवालाग्रभूतासङ्ख्येयवर्षकोद्धारकालसूक्ष्मपल्योपमप्रपञ्चनिष्पन्नार्धतृतीयसागरोपमोद्धारसमयराशिप्रमाणतुल्या द्वीपसमुद्राः । शुभान्येव वा नामान्येषामिति एतावद्विगानेनावधार्यते, शुभानि हि सर्वेषां द्वीपसमुद्राणां

१ 'ब्रह्महान्या' इति ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नामानि, नाशुभान्यपीति, अस्मिन् पक्षे सङ्ख्योन्नेया। द्वीपादनन्तरः समुद्रः समुद्रादनन्तरो द्वीपः इत्यनेनैतत् कथयति-नासङ्ख्येयसकलद्वीपपरिसमाप्तौ जातायां पश्चाल्लवणादयः समुद्राः, किन्तु प्राक् तावद् द्वीपः पश्चात् समुद्रोऽनन्तरः पुनर्द्वीपः पुनः समुद्र इत्येवमा-स्वयम्भूरमणसमुद्रादिति ॥ एतदेव विवृणोति यथासङ्ख्यमित्यादिना भाष्येण—

द्वीपसमुद्रनामानि

भा०—यथासङ्ख्यम् । तद्यथा—जम्बूद्वीपो द्वीपः । लवणोदः समुद्रः । धातकीखण्डो द्वीपः । कालोदः समुद्रः । पुष्करवरो द्वीपः । पुष्करोदः समुद्रः । वरुणवरो द्वीपः । वरुणोदः समुद्रः । क्षीरवरो द्वीपः । क्षीरोदः समुद्रः । घृतवरो द्वीपः । घृतोदः समुद्रः । इक्षुवरो द्वीपः । इक्षुवरोदः समुद्रः । नन्दीश्वरो द्वीपः । नन्दीश्वरोदः समुद्रः । अरुणवरो द्वीपः । अरुणवरोदः समुद्रः । इत्येवमसङ्ख्येया द्वीपसमुद्राः स्वयम्भूरमणपर्यन्ता वेदितव्या इति ॥ ७ ॥

टी०—लवणोद इति, "संज्ञायामुत्तरपदस्य" (परिभाषे) इति वचनादुदभावः, शेषं सुज्ञानम् । पर्यन्ते उपसंहरति, न खलु शक्यन्ते नामग्राहमाख्यातुमसङ्ख्येयत्वादत एवंप्रकारा द्वीपाः समुद्राश्चासंख्येयाः स्वयम्भूरमणसमुद्रपर्यन्ता वेदितव्याः । सर्वं चैतज्जम्बूद्वीपादिसमुद्रद्वीपवलयजालमस्यामेव रत्नप्रभापृथिव्यामवस्थितमवसेयम्, एतावांश्च तिर्यग्लोकः न ततः परम्, अधोलोकादिविभागतश्चेह लोकोऽपदिश्यते साकल्येन सर्वज्ञज्ञानविषयत्वात् । सर्वं हि ज्ञेयं ज्ञातव्यं सर्वज्ञेनोपदेष्टव्यं च चरित्रोपयोगि श्रद्धानलक्षणसम्यग्दर्शनविषयतया च निरवशेषं मुक्तिमार्गाङ्गतया, तथातिशयज्ञानविभूतिलाञ्छितत्वाच्च सर्वातीन्द्रियाणां पदार्थानां सुप्रत्ययितपुरुषप्रत्यक्षेक्षितजनपदव्यवहारप्रतिपत्तिवत् सर्वं सुश्रद्धानमित्यवेत्य मुक्तसंशयं प्रतिपत्तव्यम्, ज्योतिषनिमित्तगणितशास्त्राणां सर्वज्ञलाञ्छनत्वात् ध्यानप्रक्रियायां च लोकसन्निवेशविशेषजीवोत्पादादिचिन्तनमुपदिष्टमतो यदभिदधते बालिशाः कुतर्कपटप्रसारणपटवो वटवः, क्लेशादिप्रहाणोपायोपदेशबहिर्भूतो द्वीपसमुद्रादिसन्निवेशोपदेशो मुमुक्षोरनुपदेशा(श्यः अ)युज्यमानत्वात्, तदपास्तमवसातव्यमिति ॥ ७ ॥

एते चानन्तरसूत्रनिर्दिष्टा द्वीपाः समुद्राश्च सर्वेऽपि—

सूत्रम्—द्विर्द्विर्विष्कम्भाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः ॥ ३—८ ॥

द्वीपसमुद्रसंस्थानम्

भा०—सर्वे चैते द्वीपसमुद्रा यथाक्रममादितो द्विर्द्विर्विष्कम्भाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः प्रत्येतव्याः । तद्यथा—

टी०—सर्वे चैत इत्यादि भाष्यम् । जम्बूद्वीपादयो द्वीपाः स्वयम्भूरमणसमुद्रपर्यन्ता येन क्रमेण व्यवस्थिता निर्दिष्टा वा तेन क्रमेण, आदितः प्रभृति लवणसमुद्रप्रभृति, द्विगुणविष्कम्भा भवन्ति । विष्कम्भो-व्यासो-विस्तारः तत्क्रमानुसारितयैव पूर्वपूर्वपरिक्षे-

१ 'क्षीरवरोदः' इति घ-टी-पाठः । २ 'नन्दीश्वरवरोदः' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पिणो वलयाकृतयश्च प्रत्येतव्याः ॥ ननु चानिर्ज्ञातमेवेदं द्विर्द्विर्विष्कम्भा इति, सति मौलविष्कम्भे निर्ज्ञातस्वरूपे युज्यत एतच्छेषाणां, द्विगुण इत्यत्र तु स एव न निरूपित इत्यत्राशङ्कमान आह—

भा०—योजनशतसहस्रं विष्कम्भो जम्बूद्वीपस्य वक्ष्यते (सू०९)।तद्द्विगुणो लवणजलसमुद्रस्य, लवणजलसमुद्रविष्कम्भाद् द्विगुणो धातकीखण्डद्वीपस्य,इत्येवमास्वयम्भूरमणसमुद्रादिति ॥ पूर्वपूर्वपरिक्षेपिणः । सर्वे पूर्वपूर्वपरिक्षेपिणः प्रत्येतव्याः । जम्बूद्वीपो लवणसमुद्रेण परिक्षिप्तः । लवणजलसमुद्रो धातकीखण्डद्वीपेन परिक्षिप्तः । धातकीखण्डद्वीपः कालोदसमुद्रेण परिक्षिप्तः । कालोदसमुद्रः पुष्करवरद्वीपार्धेन परिक्षिप्तः । पुष्करवरद्वीपार्धं मानुषोत्तरेण पर्वतेन परिक्षिप्तम् । पुष्करवरद्वीपः पुष्करवरोदेन समुद्रेण परिक्षिप्तः । एवमास्वयम्भूरमणात् समुद्रादिति ॥ वलयाकृतयः। सर्वे च ते वलयाकृतयः सह मानुषोत्तरेणेति ॥ ८ ॥

टी०—योजनशतसहस्रं जम्बूद्वीपविष्कम्भो वक्ष्यते अनन्तरागामिनि सूत्रे । शेषेषु लवणजलादिषु द्विगुणद्विगुण इति पूर्व पूर्व उत्तरेणोत्तरेण परिक्षिप्तो—वेष्टितस्तच्छीलेनेति, एतच्चानिष्टविनिवेशव्यावृत्त्यर्थं वचनम्, तिर्यगेवं व्यवस्थिता इत्यर्थः । वलयस्येवाकृतिः-संस्थानं येषां लवणजलादीनां ते वलयाकृतयः, चतुरस्रादिनिवृत्त्यर्थं चेदमवगतव्यम्, शेषं सुज्ञानमेव भाष्यमित्यतो न विव्रियत इति ॥ ८ ॥

वलयाकृतयो द्वीपा इत्यनन्तरसूत्रेऽभिहितम्, अतो जम्बूद्वीपस्यापि द्वीपत्वाद् वलयाकृतिप्रसक्तिस्तदपवादायेदमुच्यते—

सूत्रम्—तन्मध्ये मेरुनाभिर्वृत्तो योजनशतसहस्रविष्कम्भो जम्बूद्वीपः ॥ ३—९ ॥

टी०—जम्बूतरुप्रधानत्वाज्जम्बूद्वीपः ।

जम्बूद्वीपस्वरूपम्

भा०—तेषां द्वीपसमुद्राणां मध्ये तन्मध्ये। मेरुनाभिः, मेरुरस्य नाभ्यामिति मेरुर्वाऽस्य नाभिरिति मेरुनाभिः । मेरुरस्य मध्ये इत्यर्थः । सर्वद्वीपसमुद्राभ्यन्तरो वृत्तः कुलालचक्राकृतिर्योजनशतसहस्रविष्कम्भो जम्बूद्वीपः, वृत्तग्रहणं नियमार्थम् ।

टी०—तेषामित्यादि भाष्यम्। अनेन विशिष्टसमासप्रतिपत्तिं दर्शयति। तेषामसङ्ख्येयानामुक्तलक्षणानां द्वीपसमुद्राणां मध्ये तन्मध्ये इति, मध्यमत्र नैश्चयिकं, न व्यावहारिकमिति । अन्येऽपि जम्बूद्वीपाः सन्त्यतो विशेषणमाह-मेरुनाभिरिति । नाभिरिव नाभिः,

---

१ योजन = ४००० कोशाः । २ 'पुष्करद्वीपार्ध' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा शरीरमध्ये नाभिरवयवोऽङ्गिनां भवत्येवमसौ मेरुर्जम्बूद्वीपस्य मध्ये व्यवस्थित इति मेरुनाभिरुच्यते। कण्ठेकालवद् गमकत्वात् समासः। व्यधिकरणबहुव्रीहिभीत्या वाक्यान्तरेणाह-मेरुर्वाऽस्य नाभिरिति मेरुनाभिः, नाभिशब्दो मध्यवचन इति दर्शयति, मेरुरस्य मध्ये इत्यर्थः। वृत्त इत्यनेन प्रतरवृत्ताख्यानं करोति, तत्प्रदर्शनार्थं च कुलालचक्राकृतिरित्याह।

भा०—लवणादयो वलयवृत्ताः, जम्बूद्वीपस्तु प्रतरवृत्त इति यथा गम्येत, वलयाकृतिभिश्चतुरस्रत्र्यस्रयोरपि परिक्षेपो विद्यते तथा च मा भूदिति ॥ मेरुरपि काञ्चनस्थालनाभिरिव वृत्तो योजनसहस्रमधो धरणितलमवगाढः नवनवत्युच्छ्रितः दशाधो विस्तृतः सहस्रमुपरीति। त्रिकाण्डस्त्रिलोकप्रविभक्तमूर्तिश्चतुर्भिर्वनैर्भद्रशाल नन्दन सौमनसपाण्डुकैः परिवृतः। तत्र शुद्धपृथिव्युपलवज्रशर्कराबहुलं योजनसहस्रमेकं प्रथमं काण्डम्। द्वितीयं त्रिषष्टिसहस्राणि रजतजातरूपाङ्कस्फटिकबहुलम्। तृतीयं षट्त्रिंशत् सहस्राणि जाम्बूनदबहुलम्। वैडूर्यबहुलाऽस्य चूलिका चत्वारिंशद् योजनान्युच्छ्रायेण मूले द्वादश विष्कम्भेण मध्येऽष्टावुपरि चत्वारीति। मूले वलयपरिक्षेपि भद्रशालवनम्। भद्रशालवनात् पञ्च योजनशतान्यारुह्य तावत्प्रतिक्रान्तिविस्तृतं नन्दनम्। ततोऽर्धत्रिषष्टिसहस्राण्यारुह्य पञ्चयोजनशतप्रतिक्रान्तिविस्तृतमेव सौमनसम्। ततोऽपि षट्त्रिंशत् सहस्राण्यारुह्य चतुर्नवतिचतुःशतप्रतिक्रान्तिविस्तृतं पाण्डुकवनमिति। नन्दनसौमनसाभ्यामेकादशैकादश सहस्राण्यारुह्य प्रदेशपरिहाणिर्विष्कम्भस्येति ॥ ९ ॥

मेरुस्वरूपम्

टी०—लवणादयो वलयवृत्ताः। अयं पुनः कुलालचक्रवत् प्रतरवृत्त इति नियम आपाद्यते, योजनेयत्ताभिधानं तच्छेषविष्कम्भप्रसिद्ध्यर्थम्, न वलयाकृतिना लवणजलधिना परिक्षिप्त इति वृत्तताऽवगम्यते यस्माद् वलयाकृतिभिश्चतुरस्रत्र्यस्रयोरपि परिक्षेपो विद्यत इति प्रेक्षापूर्वकारितया च मेरुर्विशेषणतयोपात्तस्तत्स्वरूपमप्याख्यास्यामीत्यत आह—मेरुरपि काञ्चनस्थालनाभिरिव वृत्तः, काञ्चनस्थालं-काञ्चनपात्री तन्मध्ये नाभिस्तद्वद् वृत्तः, अधस्ताद् योजनसहस्रं प्रविष्टः नवनवतिसहस्राणि दृश्योच्छ्रायः, यददृश्यं सहस्रं भूमौ तत् सर्वत्र विष्कम्भायामाभ्यां दश सहस्राणि, उपरि सहस्रं यत्र चूलिकोद्गमः। काण्डं विशिष्टप्रमाणानुगतो विच्छेदः। त्रिकाण्डः त्रिलोकस्पृक् चतुर्भिर्वनैर्भद्रशालाभिर्वेष्टितः। तत्र च यद् भूमाववगाढं पृथिव्यादिविशेषणं योजनसहस्रप्रमाणं तदेकं काण्डम्, भूपरितलारब्धं द्वितीयं त्रिषष्टियोजनसहस्राणि रजतादिविशेषणं, तृतीयं तदुपरि षट्त्रिंशत् सहस्राणि जम्बूनदबहुलं, ततस्तदुपरि वैडूर्यबहुला चूलिकाऽस्य चत्वारिंशद्योजनोच्चा, उद्गमप्रदेशे विष्कम्भायामाभ्यां द्वादश योजनानि, मध्येऽष्टौ उपरि चत्वारि। भूमौ व्यवस्थितं भद्रशालवनं वलयाकृति, भद्रशालवनभूमेः पञ्च योजनशतान्यारुह्योपरि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथममेखलायां तावत्प्रतिक्रान्तिविस्तृतं तावती चासौ प्रतिक्रान्तिश्च तावत्प्रतिक्रान्तिः, विस्तारः पञ्चयोजनशतप्रमाण एव, तावत्प्रतिक्रान्त्या विस्तृतमेवंप्रकारेण विस्तीर्णमित्यर्थः। तच्च द्वितीयं वनं नन्दनं नाम । ततोऽर्धत्रिषष्टीत्यादि । त्रिषष्टिसहस्रसङ्ख्यापूरणस्य योजनसहस्रार्धेन युक्ता सङ्ख्यार्धत्रिषष्टिरुच्यते। अत्र पञ्च योजनशतानि द्वितीयकाण्डप्रमाणादाक्षिप्तानि नन्दनवनेनेत्यतोऽर्धत्रिषष्टिसहस्राण्यारुह्योपरि । पञ्चयोजनशतविस्तीर्णमेव द्वितीयमेखलायां सौमनसं वनं तृतीयं भवति । ततोऽप्युपरि षट्त्रिंशत् सहस्राण्यारुह्य चतुर्नवत्युत्तरैश्चतुर्भिर्योजनशतैर्विस्तीर्णं पाण्डुकं नाम वनं मेरोः शिरसि तुर्यमवसेयम्। अयं च मेरुगिरिर्न सर्वत्र समप्रमाणप्रवृद्धः, किन्तु प्रदेशपरिहाण्या परिहीयमानः प्रवृद्ध इति। तद् दर्शयति—नन्दनसौमनसाभ्यामित्यादि । नन्दनादूर्ध्वं सौमनसाच्चाधः किल मध्य एकादशैकादश योजनसहस्राण्यारुह्य योजनसहस्रं परिहीयते विष्कम्भस्येति, ऊर्ध्वं सौमनसान्नन्दनवनाच्चाधो न सूरिणा परिहाणिरुक्ता। प्रदेशपरिहाणिग्रहणमङ्गुलादिप्र(सिद्ध्यर्थमङ्गुलादि)ष्वप्ययमेव परिहाणिविधिरिति। एषा च परिहाणिराचार्योक्ता न मनागपि गणितप्रक्रियया सङ्गच्छते, यतः सौमनसवनेऽन्तर्विष्कम्भः सहस्रत्रयं शतद्वयं द्विसप्तत्यधिकमष्टौ चैकादशभागाः, बहिर्विष्कम्भः पुनः सहस्रचतुष्टयं शतद्वयं च द्विसप्तत्यधिकमष्टौ चैकादशभागा योजनस्य। तत्राचार्योक्तपरिहाण्या नैकोऽपि विष्कम्भ आगच्छति, न चैतावत्या चा (सत्यावा) गमेऽधीतत्वाच्छङ्काग्राहिकयेति। गणितशास्त्रविदो हि परिहाणिमन्यथा वर्णयन्त्यार्षानुसारिणः। मेरोर्योजनान्यूर्ध्वमेका लक्षा, तत्राधो भूमावदृश्यं योजनसहस्रमपचयरहितं,सर्वत्र च वृत्तविष्कम्भो योजनसहस्राणि दश,यद् दृश्यं तत्र परिहाणिः,भद्रशालवनादूर्ध्वं पञ्च योजनशतान्यारुह्य सर्वतश्च पञ्चयोजनशतान्यन्तः प्रविश्य नन्दनवनं भवति। तत्र वने मेरोरन्तर्बहिर्वा कीदृग् विष्कम्भ इति,तत्रेदं कर्म त्रैराशिकभङ्ग्या—यदि योजनमेकमारुह्योपरि वृत्तक्षेत्रेऽपचयः सर्वत्रैकादशभागो योजनस्य ततः पञ्च योजनशतान्यारुह्य कोऽपचयः स्यात्?। लब्धं पञ्चचत्वारिंशद् योजनानि पञ्च चैकादशभागा योजनस्य,एतदधस्तनवृत्तदशसहस्रविष्कम्भादपास्य शेषमुपरि विष्कम्भो नन्दनवने बहिर्लभ्यत इति, स चायम्—नव सहस्राणि नव शतानि चतुःपञ्चाशदधिकानि षट् चैकादशभागाः योजनस्य । अस्माच्च बहिर्विष्कम्भात् सर्वतो नन्दनवनचक्रवालविष्कम्भं पञ्चशतिकं द्विगुणमपास्यान्तर्विष्कम्भोऽयं नन्दनवन एव भवति—अष्टौ सहस्राणि नव शतानि चतुःपञ्चाशदधिकानि षट् चैकादशभागाः। इदानीं नन्दनवनादुपरि योजनसहस्राण्यर्धत्रिषष्टिरा(मा)रुह्य को मेरुविष्कम्भो बहिर्भवति? अत्रापि तदेव कर्म, यदि योजनमारुह्य वृत्तविष्कम्भे सर्वतोऽपचयो योजनस्यैकादशभागस्तत आरुह्यार्धत्रिषष्टिः(ष्टिं)योजनसहस्राणि कोऽपचयो भवेदिति? लब्धं पञ्च सहस्राणि षट् शतान्येकाशीत्यधि-

---

१ 'चाधोधो न' इति क–पाठः। २ 'प्रत्ययया' इति क–पाठः। ३ $३२७२\frac{८}{११}$। ४ $४२७२\frac{८}{११}$। ५ $४५\frac{५}{११}$। ६ $९९५४\frac{६}{११}$। ७ $८९५४\frac{६}{११}$। ८ $५६८१\frac{१}{११}$।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कानि नव चैकादशभागा योजनस्य । एतन्नन्दनवनान्तर्विष्कम्भादपास्य शेषमुपरि सौमनसेऽन्तर्विष्कम्भो लभ्यते । स चायम्—त्रीणि[1] सहस्राणि शतद्वयं च द्विसप्तत्यधिकमष्टौ चैकादशभागा योजनस्येति। अस्मिन्नेव सौमनसान्तर्विष्कम्भे सौमनसवनचक्रवालविष्कम्भं पञ्च-[विं]शतिकं द्विगुणं निधाय बहिर्विष्कम्भो लभ्यते, स चायम्—चत्वारि[2] सहस्राणि द्वे शते द्व्युत्तरसप्तत्यधिके अष्टौ चैकादशभागा इति । इदानीं सौमनसवनादारुह्योपरि षट्त्रिंशद्योजनसहस्राणि पाण्डकवनं भवति। तस्य च विष्कम्भो योजनसहस्रम्, सौमनसवनाद् योजनमारुह्य कोऽपचयो भवतीति नाभिहितः । स चायमपचयो गणितधर्मेण भवति—यदि योजनमेकमारुह्य योजनस्य षण्णवतित्रिशतभागाः पञ्चविंशतिक्षयः (?)सर्वतस्ततः षट्त्रिंशद् योजनसहस्राण्यारुह्य कोऽपचयो भवेदिति? लब्धं सहस्रत्रयं[3] शतद्वयं च द्व्युत्तरसप्तत्यधिकं योजनैकादशभागाश्चाष्टौ । एतत् सौमनसवनाभ्यन्तरविष्कम्भादपास्यं स्यात्, शेषमुपरि पाण्डुकवनस्य वृत्तविष्कम्भो योजनसहस्रमिति॥ ९ ॥

स एवंविधो जम्बूद्वीपः सप्तक्षेत्रात्मको बोद्धव्यः । तानि चामूनि—

सूत्रम्—तत्र भरत-हैमवत-हरि-विदेह-रम्यक-हैरण्यवतैरावतवर्षाः क्षेत्राणि ॥ ३—१० ॥

भरतादिक्षेत्रस्वरूपम्

भा०—तत्र जम्बूद्वीपे भरतहैमवतहरयो विदेहाः रम्यकहैरण्यवतमैरावतमिति वंशाः क्षेत्राणि भवन्ति । भरतस्योत्तरतः हैमवतम् । हैमवतस्योत्तरतः हरयः । इत्येवं शेषाः । वंशा वर्षा वास्या इति चैषां गुणतः पर्यायनामानि भवन्ति ।

टी०—तत्र जम्बूद्वीप इत्यादि भाष्यम् । तत्रोक्तलक्षणे, जम्बूद्वीप इत्यनेनैतद् दर्शयति न द्वीपान्तराण्येतानि भरतादीनि, किन्तु जम्बूद्वीपस्यैवैकस्य विशिष्टावधिका विभागा इति, जगतः स्थितेरनादित्वात् संज्ञामात्रम् भरतदेवनिवाससम्बन्धाद् वा भरतं भारतं वा, हिमवतोऽदूरभवत्वाद् हैमवतम्, हरयो विदेहाश्च पञ्चालतुल्याः, रम्यकमिति संज्ञायां कन्, हैरण्यवत् हैरण्यवतदेवनिवाससम्बन्धात्, तथैरावतमपीति । एवमेते सप्त **वंशा** वर्षाः **क्षेत्राणी**त्यनर्थान्तरत्वं दर्शयति ॥ अधुना विशिष्टक्रमसन्निवेशप्रदर्शनाभिधित्सया आह—**भरतस्योत्तरतो हैमवतमित्यादि** गतार्थं प्रायः । **वंशादीनि गुणतः पर्यायनामानि भवन्तीति** । **वंशाः** किल पर्ववन्तो भवन्ति तद्वत् पर्वभागविभजनाद् वंशा एवामी भरतादयः, **वर्ष**सन्निधानाच्च **वर्षाः**, मनुजादिनिवासाच्च **वास्याः** ।

---

१ ३२७२$\frac{८}{११}$। २ ४२७२$\frac{८}{११}$। ३ ३२७२$\frac{८}{११}$। ४ 'भरतं हैमवतं हरयो' इति घ-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—सर्वेषां चैषां व्यवहारनयापेक्षादादित्यकृताद् दिग्नियमादुत्तरतो मेरुर्भवति ।

टी०—**सर्वेषामित्यादि** भाष्यम् । सर्वक्षेत्राणां **चैषां** भरतादीनामैरावतपर्यन्तानां **व्यवहारनयापेक्षादादित्यकृताद् दिग्नियमादुत्तरतो मेरुर्भवति** । व्यवहारो हि सङ्गृहीतानां पदार्थानां विधिपूर्वकमवहरणं, लोकप्रसिद्धव्यवहारतत्परत्वात्, न खलु निश्चयमवलम्बते, सर्वव्यवहारोच्छेदप्रसङ्गात् । तथा चाह—"असत्योपाधि यत् सत्यं, तद्वच्छब्दनिबन्धनम्" इति, शुक्ला बलाका कृष्णो भ्रमर इत्येवमादिप्रसिद्धिवशव्यवस्थितमेव वस्तु प्रतिजानीतेऽस्तीति ॥ तमेवंविधव्यवहारनयमपेक्षते यो दिग्नियमः सवितृगतिजनितस्तस्माद् दिग्नियमात् सर्वेषामुत्तरतो मेरुर्दक्षिणतश्च लवणजलनिधिरिति । न पुनर्नैश्चयिकदिग्व्यवस्थासमासादनेनेदमुच्यते, किन्तु यस्मिन् क्षेत्रे यत्रादित्य उदेति सा दिक् प्राची, यस्यामस्तमेति सा[1]ऽऽशा प्रतीची, कर्कटकादिराशीन् धनुर्धरान्तान् यत्र व्यवस्थितश्चरति क्रमेण सा दक्षिणा, तथा मकरादीन् मिथुनान्तान् यत्र स्थितश्चरति सोत्तरा दिगिति, तथाऽन्तरालदिशि(शः) एतत्संयोगाद् वाच्याः । तथोर्ध्वमधश्च । सवित्रपेक्षैव दिग् व्यवह्रियत इति व्यावहारिकी सर्वेषां दिग् भवति । कथं पुनर्व्यवहारमात्रमेवेदं निरपेक्षमिति? । उच्यते यतोऽस्माकं यत्रादित्य उदेति सा प्राची, सैव च पूर्वविदेहकानां प्रतीची, तत्रादित्यस्यास्तमितत्वाद्, विप्रतिषिद्धं चेदम्, एवमन्यास्वपि योज्यम्, तस्माद् व्यवहारमात्रमिदं, न निश्चय इति । अथ नैश्चयिकी दिक् कथं प्रतिपत्तव्येत्यत आह—

नैश्चयिकदिगपेक्षया व्यवस्था

भा०—लोकमध्यावस्थितं त्वष्टप्रदेशं[2] रुचकं दिग्नियमहेतुं प्रतीत्य यथासम्भवं भवतीति ॥ १० ॥

टी०—**लोकमध्यावस्थितमित्यादि** । तिर्यग्लोकमध्यावस्थितः समतलभूभागमेरुव्यवस्थितो वियत्प्रदेशाष्टकनिर्माणो रुचकश्चतुरस्राकृतिः । स किल दिशामैन्द्र्यादीनां विदिशां चाग्नेयादीनां प्रभवः, तत्र दिशो द्विप्रदेशादिकाः प्रदेशद्वयोत्तरवृद्ध्या वर्धमाना महाशकटोद्धिसंस्थानाः सादिका विगतपर्यवसाना नभोदेशैरनन्तैर्विशिष्टाकृतिलब्धव्यवस्थानैर्जनितस्वरूपाश्चतस्रः, विदिशस्तु मुक्तावलीसन्निभा एकैकाकाशदेशरचनाहितस्वरूपाः सादिकाश्चापर्यवसिताश्चानन्तप्रदेशाश्चतस्र एव, उपरिष्टात्तानेव चतुरः प्रदेशानवधीकृत्योपरिस्थितचतुःप्रदेशादिकाऽनुत्तरा विमला नाम दिग् भवति, तथाऽधस्तात् तमोऽभिधानाऽधस्तनाकाशप्रदेशचतुष्टयप्रवहेति। एताश्चानादिकालसन्निवेशिन्यस्तथाऽनादिकालप्रसिद्धनामानो निश्चयनयावलम्बनात् प्रतिपत्तव्याः । न तदङ्गीकरणेनोत्तरतो मेरुरुच्यत इति । अतस्तमेवंविधं **रुचकं दिग्नियमहेतुं प्रतीत्य यथासम्भवं**—येन प्रकारेण यस्याः सम्भवो द्विप्रदेशादिकेन द्व्युत्तरादिना एकप्रदेशादिना चानुत्तरेण तथा चतुःप्रदेशादिनाऽनुत्तरेणैव यथासम्भवं **भवतीत्युच्यत** इति ॥१०॥

---

१ 'सा प्रतीचा' इति क-पाठः । २ 'चाष्ट०' इति घ-पाठः । ३ 'स्थितांश्च०' इति ग पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथैषां भरतादिक्षेत्राणां किंकृतो विभाग इत्याह—

सूत्रम्—तद्विभाजिनः पूर्वापरायता हिमवन्-महाहिमवन्-निषध-नील-रुक्मिशिखरिणो वंशधरपर्वताः ॥ ३—११ ॥

टी०—तानि विभक्तुं शीलमेषामिति तद्विभाजिनोऽकृत्रिमसन्निवेशित्वात् तच्छीलाः, पूर्वापरायता इत्युभयतो लवणजलधिमवगाढाः हिमवदादिसंज्ञानिर्देशः, वंशा वर्षा वा क्षेत्राणि तेषां धारकाः—विशिष्टव्यवच्छेदकारिणो गिरयोऽनादिकालव्यवस्थानाः ।

हिमवदादिवर्षधरस्वरूपम्

भा०—तेषां वर्षाणां विभक्तारः हिमवान् महाहिमवान् निषधो नीलो रुक्मी शिखरीत्येते षड् वर्षधराः पर्वताः ॥ भरतस्य हैमवतस्य च विभक्ता हिमवान् । हैमवतस्य हरिवर्षस्य च विभक्ता महाहिमवान्, इत्येवं शेषाः ॥ तत्र पञ्च योजनशतानि षड्विंशानि षट् चैकोनविंशतिभागा (५२६$\frac{६}{१९}$) भरतविष्कम्भः । स द्विर्द्विर्हिमवद्धैमवतादीनामाविदेहेभ्यः । परतो विदेहेभ्योऽर्धार्धहीनाः ॥

टी०— तेषां वर्षाणामित्यादि भाष्यं प्रायो गतार्थम्, कथं पुनरमी वंशधरपर्वता इत्यादर्शयति—भरतस्य हैमवतस्य च विभक्ता हिमवान् । तन्मध्यव्यवस्थितत्वाद् भारतहैमवतयोर्विभागमापादयति हिमवान् । तथा हैमवतहरिवंशयोर्व्यवस्थाकारी महाहिमवान् । इत्येवं शेषगिरयोऽपि नामग्राहं वक्तव्या इत्यतिदिशति, हरिवंशविदेहयोर्विभक्ता निषधः, विदेहरम्यकयोर्विभक्ता नीलः, रम्यकहैरण्यवतयोर्विभक्ता रुक्मी, हैरण्यवतैरावतयोर्विभक्ता शिखरीति ॥ अधुनैषां क्षेत्राणां विभागे सति प्रमाणमाख्याति—तत्र भरतक्षेत्रमारोपितचापाकारम्, अतः प्रागिषोरेव प्रमाणमुच्यते-पञ्च योजनशतानि षड्विंशत्यधिकानि षट् चैकोनविंशतिभागा योजनस्य भरतक्षेत्रविष्कम्भः । अपरे त्विदमेव भाष्यवाक्यं सूत्रीकृत्याधीयते । विष्कम्भत इति मध्यप्रदेशे भवति, एवमैरावतक्षेत्रविष्कम्भोऽपि । हिमवदादिपर्वतानां शेषक्षेत्राणां चैवमतिदिशन्नाह—सं द्विर्द्विर्हिमवद्धैमवतादीनामाविदेहेभ्य इति, तद्यथा—हिमवच्छिखरिणोर्योजनसहस्रं द्व्युत्तरपञ्चाशताधिकं द्वादश चैकोनविंशतिभागा योजनस्य, हैमवतहैरण्यवतयोः सहस्रद्वयं शतं च पञ्चोत्तरं पञ्च चैकोनविंशतिभागा योजनस्य, महाहिमवद्रुक्मिणोश्चत्वारि सहस्राणि शतद्वयं दशोत्तरं दश चैकोनविंशतिभागा योजनस्य, हरिरम्यकयोरष्टौ सहस्राणि चत्वारि शतान्येकविंशत्यधिकानि एकश्चैकोनविंशतिभागो योजनस्य, निषधनीलयोः षोडश सहस्राण्यष्टौ शतानि द्व्युत्तरचत्वारिंशताधिकानि द्वौ चैकोनविंशतिभागौ योजनस्य, विदेहानां त्रयस्त्रिंशत्सहस्राणि षट् च शतानि चतुरशीत्यधिकानि चत्वारश्चैकोनविंशतिभागा योजनस्येति । परतो विदेहेभ्योऽर्धार्धहीना इति । नीलादीनां प्रमाणमाचष्टे लाघविक आचार्यः—

---

१ 'वर्षधर०' इति घ-पाठः । २ 'स भरतेषुद्विर्द्विगुणो द्विगुणः पर्वतानां क्षेत्राणां विष्कम्भो भवत्याविदेहेभ्य इति ग-टी-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विदेहक्षेत्रेषुरर्धहीनो नीलेषुर्भवति, सोऽर्धहीनो रम्यकेषुरित्येवं यावदैरावतक्षेत्रमिति ॥

अधुनैषां हिमवदादिकुलपर्वतानां अवगाहोच्छ्रयान् प्रतिपादयति—

हिमवदादीनां मानम्

भा०—पञ्चविंशतियोजनान्यवगाढो योजनशतोच्छ्रयो हिमिवान्। तद्द्विर्महाहिमवान्। तद्द्विर्निषध इति ॥

टी०—पञ्चविंशतीत्यादि उच्छ्रायचतुर्भागोऽवगाहः सर्वेषाम्, उच्छ्रायो योजनशतं अवगाहः पञ्चविंशतिर्योजनानि हिमवतः। एतदेव द्विगुणमुच्छ्रयावगाहप्रमाणं महाहिमवतः, योजनशतद्वयमुच्छ्रयः पञ्चाशदवगाहः। एतद्द्विगुणं निषधस्य, चत्वारि शतान्युच्छ्रायः शतमवगाह इति। नीलादीनां निषधादिवदुच्छ्रयावगाहाविति ॥ इदानीं जीवाधनुःकाष्ठे कथयति—

भरतस्य ज्यामानादि

भा०—भरतवंशस्य[1] योजनानां चतुर्दश सहस्राणि चत्वारि शतान्येकसप्ततीनि च षड्भागा विशेषोना[2] (१४४७१$\frac{६}{११}$) ज्या। इषुर्यथोक्तो (५२६$\frac{६}{१९}$) विष्कम्भः, धनुःकाष्ठं चतुर्दश सहस्राणि शतानि पञ्चाष्टाविंशानि एकादश च भागाः साधिकाः(१४५२८$\frac{११}{१९}$)।

टी०—भरतवंशस्येत्यादि भाष्यम्। हिमवत आराद्भागवर्तिनी जीवेयं प्रतिपत्तव्या, धनुःकाष्ठं च, इषुर्यथोक्तो विष्कम्भ इति प्रागभिहितोऽपि पुनरिहोपन्यस्तः इषुरिति, तत्रैवं नोक्तस्तस्मात् पुनरुपन्यास इति।

वैताढ्यो देवकुरवश्च

भा०—भरतक्षेत्रमध्ये पूर्वापरायत उभयतः समुद्रमवगाढो वैताढ्यपर्वतः षड् योजनानि सक्रोशानि[3] धरणिमवगाढः पञ्चाशद् विस्तरतः पञ्चविंशत्युच्छ्रितः ॥ विदेहेषु निषधस्योत्तरतो मन्दरस्य दक्षिणतः काञ्चनपर्वतशतेन चित्रकूटेन विचित्रकूटेन चोपशोभिता देवकुरवः।

टी०—भरतक्षेत्रमध्य इत्यादि। वैताढ्यपर्वतो दक्षिणोत्तरार्धविभागकारी विद्याधराधिवासः पञ्चाशत्पष्टिनगरयुक्तदक्षिणोत्तरश्रेणिद्वयालंकृतो गुहाद्वयोपशोभितश्च प्रतिपत्तव्यः। विदेहेष्वित्यादि। मेरुगिरेर्दक्षिणतो निषधस्योत्तरतो देवकुरवो भवन्ति, ते च काञ्चनपर्वतकशतेनोपशोभिताः हृदपञ्चकोभयपर्यन्तव्यवस्थितैर्दशभिर्दशभिः काञ्चनपर्वतैर्विभूषिताः, शीतोदानदीपूर्वापरगौ निषधाच्चतुस्त्रिंशाष्टशतसचतुःसप्तभागान्तरौ चित्रविचित्रकूटौ योजनसहस्रोच्चौ तावदधोविस्तृतौ तदर्धमुपरि ताभ्यां चोपशोभिता देवकुरवः। ते च—

---

१ 'ोतवर्ष' इति घ-पाठः। २ 'विशेषतो' इति घ-पाठः। ३ ४ क्रोशाः = १ योजनम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—विष्कम्भेणैकादश योजनसहस्राण्यष्टौ च शतानि द्विचत्वारिंशानि द्वौ च भागौ । एवमेवोत्तरेणोत्तराः कुरवः चित्रकूटविचित्रकूटहीना द्वाभ्यां च काञ्चनाभ्यामेव यमकपर्वताभ्यां विराजिताः ॥ विदेहा मन्दरदेवकुरूत्तरकुरुभिर्विभक्ताः क्षेत्रान्तरवद् भवन्ति-पूर्वे चापरे च । पूर्वेषु षोडश चक्रवर्तिविजया नदीपर्वतविभक्ताः परस्परस्यागमाः, अपरेऽप्येवंलक्षणाः षोडशैव । तुल्यायामविष्कम्भावगाहोच्छ्रायौ दक्षिणोत्तरौ वैताढ्यौ, तथा हिमवच्छिखरिणौ महाहिमवद्रुक्मिणौ निषधनीलौ चेति ॥

उत्तरकुरुविदेहादयः

टी०—विष्कम्भेणेत्यादि सुज्ञानम् । इदानीमुत्तरकुरूनतिदिशति—एवमेवोत्तरेणोत्तराः कुरवः काञ्चनकनगशतेनोपशोभिताः, किन्तु चित्रविचित्रकूटाभ्यां हीनास्तत्स्थाने च काञ्चनाभ्यां तत्प्रमाणाभ्यामेव यमकपर्वताभ्यां शीतानदीकूलगाभ्यां विराजिता इति ॥ विदेहा इत्यादि । मन्दरगिरिणा देवकुरूत्तरकुरुभिश्च विभक्ता व्यवच्छिन्नमर्यादाः स्थापिताः,एकक्षेत्रान्तःपातिनोऽपि क्षेत्रान्तरवद् भवन्ति। तत्रत्यमनुष्यादीनां परस्परेण गमनागमनाभावात् । अतः पूर्वे चापरे च उभये विदेहा भवन्ति, मेरोः पूर्वतः पूर्वे, अपरतोऽपरे, तत्र पूर्वेषु विदेहेषु षोडश चक्रवर्तिविजया नदीपर्वतविभक्ताः परस्परस्यागमाः चक्रवर्तिनां विजेतव्या भोक्तव्याश्च, नदीभिर्गिरिभिश्च विभक्ताः परस्परेणागम्याः क्षेत्रविशेषा इत्यर्थः । अधुनाऽपरानप्यतिदिशति–अपरेऽप्येवंलक्षणाः षोडशैव चक्रवर्तिविजयाः सरिद्गिरिविभक्ताः परस्परासम्भाव्यमानगमना इति । अधुनोत्तरभागवर्तिपर्वतान् प्रमाणतो निर्दिशति—तुल्यायामेत्यादि भाष्यमेव सुज्ञानम् ।

भा०—क्षुद्रमन्दरास्तु चत्वारोऽपि धातकीषण्डपुष्करार्धकाः महामन्दरात पञ्चदशभिर्योजनसहस्रैर्हीनोच्छ्रायाः । षड्भिर्योजनशतैर्धरणितले हीनविष्कम्भाः । तेषां प्रथमं काण्डं महामन्दरतुल्यम् । द्वितीयं सप्तभिर्हीनम् । तृतीयमष्टाभिः । भद्रशालनन्दनवने महामन्दरवत् । अर्धषट्पञ्चाशद् योजनसहस्राणि सौमनसं पञ्चशतविस्तृतमेव । ततोऽष्टाविंशतिसहस्राणि पाण्डुकं चतुर्नवतिचतुःशतविस्तृतमेव भवति । उपरि चाधश्च विष्कम्भोऽवगाहश्च तुल्यो महामन्दरेण । चूलिका चेति ॥

क्षुद्रमन्दरस्वरूपम्

टी०—क्षुद्रमन्दरास्त्वित्यादि ॥ धातकीषण्डे द्वौ पुष्करद्वीपार्धे द्वौ इत्येवं चत्वारोऽपि क्षुल्लकमन्दरा भवन्ति जम्बूद्वीपमध्यवर्तिमेरोर्हीनप्रमाणत्वात् । तच्चादर्शयति–महामन्दरात् पञ्चदशभिर्योजनसहस्रैर्हीनोच्छ्रायाः—चतुरशीतियोजनसहस्रोच्छ्रिताः । तथा षड्भिर्योजनशतैर्धरणितले हीनविष्कम्भाः चतुःशताधिकनवसहस्र-

१ ' स्परागमाः ' इति घ-पाठः । २ 'शतं विस्तृतम्' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विष्कम्भा इत्यर्थः । तेषां चतुर्णामपि प्रथमं काण्डं महामन्दरतुल्यं धरणिमवगाढं सहस्रप्रमाणमित्यर्थः । द्वितीयं काण्डं सप्तभिः सहस्रैर्हीनं मन्दरात् षट्पञ्चाशत्सहस्रप्रमाणमित्यर्थः । तृतीयं काण्डमष्टाभिः सहस्रैर्हीनं, मेरोः सकाशात् अष्टाविंशतिसहस्रप्रमाणमित्यर्थः । भद्रशालनन्दनवने महामन्दरे इव द्रष्टव्ये, धरण्यां भद्रशालवनम्, तदुपरि पञ्चशत्यां नन्दनमिति, तत उपरि अर्धषट्पञ्चाशत्सहस्राण्यारुह्य सौमनसम्, पञ्च शतानि नन्दनवनेनाक्षिप्तानि द्वितीयकाण्डस्यातोऽर्धषट्पञ्चाशत्सहस्राणि गत्वा तत् पञ्चशतविस्तीर्णमेव भवति । ततोऽष्टाविंशतिसहस्राण्यारुह्य पाण्डुकवनं चतुर्नवतिचतुःशतविस्तीर्णमेवावसेयम्, तथोपरि चाधश्च विष्कम्भोऽवगाहश्च तुल्यो महामन्दरेण यथासङ्ख्यमत्राभिसम्बन्धः, उपरि मस्तके यो विष्कम्भः स महामन्दरेणैषां तुल्यः, सहस्रप्रमाण इत्यर्थः, अधश्च योऽवगाहः सोऽपि महामन्दरेण तुल्यः, योजनसहस्रमानः, एषां भवति । चूलिका चैषां महामन्दरचूडासदृशी प्रमाणतोऽवसातव्येति । अधुना लाघवार्थं द्वीपादीनां परिधिगणितपदजीवाद्यानयनाय करणोपाया भण्यन्ते । तत्रेप्सितवृत्तक्षेत्रपरिधेरानयनायेदं करणसूत्रम्—

परिध्यानयनादिकरणम्

भा०—विष्कम्भकृतेर्दशगुणाया मूलं वृत्तपरिक्षेपः, स विष्कम्भपादाभ्यस्तो गणितम् । इच्छावगाहोनावगाहाभ्यस्तस्य विष्कम्भस्य चतुर्गुणस्य मूलं ज्या । ज्याविष्कम्भयोर्वर्गविशेषमूलं विष्कम्भाच्छोध्यं शेषार्धमिषुः । इषुवर्गस्य षड्गुणस्य ज्यावर्गयुतस्य[1] मूलं धनुःकाष्ठम् । ज्यावर्गचतुर्भागयुक्तमिषुवर्गमिषुविभक्तं तत्प्रतिकृतिवृत्तविष्कम्भः । उद्गधनुःकाष्ठाद् दक्षिणं शोध्यं शेषार्धं बाहुरिति । अनेन करणाभ्युपायेन क्षेत्राणां[2] वैताढ्यादिपर्वतानामायामविष्कम्भज्येषुधनुःकाष्ठपरिमाणानि ज्ञातव्यानि ॥ ११ ॥

टी०—विष्कम्भकृतेर्दशगुणाया मूलं वृत्तपरिक्षेपः, विष्कम्भो योजनशतसहस्रं तल्लक्षगुणं, कृतिः वर्गो भवति, पुनर्दशगुणा क्रियते, पश्चान्मूलमानीयते, तद् वृत्तक्षेत्रपरिक्षेपः, तत्र योजनराशौ लब्धव्ये त्र्येकषट्द्विद्विकसप्तकैः क्रमेण मूलमानेतव्यम्, ततोऽयं राशिरधस्तात् जातः ६३२४५४ । एषोऽर्धेन छिन्नो योजनत्रिलक्षषोडशसहस्रसप्तविंशद्विशतसङ्ख्यो भवति, शेषमुपरीदं ४८४४७१ चतुर्भिर्गुण्यते, चतुर्गव्यूतं योजनं यतः, ततो गव्यूतराशिर्भवति[3] । षडादिराशिना भागो हार्यः, लब्धमिदं गव्यूतत्रयं शेषमुपरीदं ४०५२२ । धनुःसहस्रद्वयेन गुण्यते जातः ततो धनुरादिराशिः । षडादिराशिना भागलब्धमिदं

---

१ 'कृतस्य' इत्यधिको घ-पाठः । २ 'सर्वक्षेत्राणां सर्वपर्वता०' इति घ-पाठः । ३ (१९३७८८४) । ४ 'यतस्ततो' इति पाठः । ५ (८१०४४०००) ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१२८, शेषमुपरीदं ८९८८८ । षण्णवत्यङ्गुलं धनुर्भवतीति षण्णवत्या गुण्यते, जातोऽङ्गुलराशिः । भागलब्धमिदं १३, शेषमुपरीदं ४०७३४६ । द्वाभ्यां गुण्यते यतोऽर्धाङ्गुलद्वयेनैकमङ्गुलं भवति, जातोऽर्धाङ्गुलराशिः, षडादिराशिना भागलब्धमिदं १। शेषाश्चार्धाङ्गुलभागा एतावन्त उद्धरिताः १८२२३८ । अधस्तात् षडादिराशिः एष जम्बूद्वीपपरिधिः । वृत्तग्रहणं चतुरस्रादिक्षेत्रव्यावृत्त्यर्थम्, परिक्षेपग्रहणं विष्कम्भेषु जीवादिव्यावृत्त्यर्थमिति। अधुना गणितपदमानीयते जम्बूद्वीपस्य, तत्रेदं करणसूत्रम् ॥ **स विष्कम्भपादाभ्यस्तो गणितं प्रक्रान्तविष्कम्भो लक्षैकपादः पञ्चविंशतिसहस्राणि विष्कम्भपादेनाभ्यस्तो--गुणितो विष्कम्भपादाभ्यस्तः**, स इति परिधिः जम्बूद्वीपस्याभिसम्बध्यते, प्रक्रान्तार्थपरामर्शित्वात् सर्वनामशब्दानाम् । गणितमिति गणितपदमित्यर्थः । जम्बूद्वीपे योजनप्रमाणानि चतुरस्रखण्डान्येतावन्ति भवन्तीत्यर्थः। तत्र परिधियोजनराशिः पञ्चविंशतिसहस्रगुणितोऽयं ७९०५६७५००० । गव्यूतत्रितयं पञ्चविंशतिसहस्रगुणं जातमिदं ७५००० । गव्यूतराशिश्चायं योजनीक्रियते । चतुर्भिर्भागलब्धमिदं १८७५० । योजनराशिरयम् । धनुरपि पञ्चविंशतिसहस्रगुणः, जातमिदं ३२००००० । अयमपि धनुराशिर्योजनीक्रियते । अष्टौ धनुःसहस्राणि योजनं भवतीति वचनात् अष्टाभिः सहस्रैर्भागलब्धमिदं ४०० । अयमपि योजनराशिरनन्तरराशौ प्रक्षिप्तः, जातमिदं १९१५० । अयमपि च सप्तकोटिशतादिराशौ, जातमिदं ७९०५६९४१५० । अङ्गुलराशिः पञ्चविंशतिसहस्रगुणो जातमिदं ३२५००० । अर्धाङ्गुलं पञ्चविंशतिसहस्रगुणं जातमिदं २५००० । अस्यार्धाङ्गुलराशेरर्धं गृह्यते ततोऽङ्गुलानि लभ्यन्तेऽमूनि १२५००। एतान्यङ्गुलराशौ क्षिप्यन्ते, जातमिदं ३३७५००। ततः षण्णवत्या भागो यस्मात् षण्णवत्यङ्गुलं धनुर्भवति । भागलब्धमिदं ३५१५ । अयं धनूराशिः, शेषमङ्गुलानां षष्टिः । अस्य धनूराशेर्भागः सहस्रद्वयेन, लब्धमेकं गव्यूतं शेषमिदं १५१५ ॥

अधुना जीवानयनमुच्यते-**इच्छावगाहोनावगाहाभ्यस्तविष्कम्भस्य चतुर्गुणस्य मूलं ज्या** ॥ ईप्सितोऽवगाहो यावान् स इच्छावगाहस्तेनोनो विष्कम्भः इच्छावगाहोनः पुनरवगाहेनाभ्यस्यते-गुण्यते, इच्छावगाहोनश्चासावावगाहाभ्यस्तश्च इच्छावगाहोनावगाहाभ्यस्तः, तस्य पुनश्चतुर्भिर्गुणितस्य यन्मूलं सा मण्डलक्षेत्रस्य जीवा भवति । अत्र विष्कम्भो योजनलक्षः, एष ईप्सितावगाहोनः क्रियते, ईप्सितश्चायं ५२६ षट् च कला ६। एष उपरितनो राशिः संवर्ण्यते कलीक्रियत इत्यर्थः । एकोनविंशत्या गुण्यते, जातमिदं ९९९४। अत्र षट् कलाः क्षिप्यन्ते, जातमिदं १०००० । विष्कम्भराशिरपि संवर्ण्यते एकोनविंशत्या, जातमिदं १९००००० । एषोऽवगाहराशिरमुतः पात्यते, जातमिदं १८९०००० । पुनरवगाहराशिना गुण्यते, जातमिदं १८९०००००००० । ततश्चतुर्भिर्गुण्यते जातमिदं ७५६०००००००० । अस्य मूलं जीवा भवति, तच्च ग्राह्यं द्विसप्तचतुष्कनवपञ्चचतुष्ककैः,

---

१ (८६२९२४८)। २ (८१४६९२)।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रमेण जातमिदं { २९७८८८४ / ५४९९०८ } अधस्त्योऽर्धेन च्छिन्नो जातमिदं २७४९५४ । अस्य राशेरेकोनविंशत्या भागलब्धमिदं १४४७१ । कलाश्च पञ्च । शेषं यदुद्धरितं तत्रैका न्यूना कला लभ्यत इत्येषा जीवा ॥

अधुना करणसूत्रमिषोरानयनाय—**ज्याविष्कम्भयोर्वर्गविशेषमूलं विष्कम्भाच्छोध्यं शेषार्धमिषुः** । जीवावर्गस्य विष्कम्भवर्गस्य च (यो) विशेषस्तस्य मूलं विष्कम्भाच्छोध्यते, शेषस्य यदर्धं स इषुर्भवति, तत्र जीवावर्गोऽयं ७५६०००००००० विष्कम्भवर्गश्चायमेकषष्टयुत्तरत्रिशतगुणः ३६१००००००००० । अस्माज्जीवावर्गे विशुद्धे शेषमिदं भवति ३५३४४००००००० । अस्य मूलमादीयते, शून्याष्टकस्यार्धेन चत्वारि शून्यानि शेषस्य मूलमेव काष्ठकाष्ठकैर्लब्धमिदं १८८०००० । एतद् विष्कम्भादेकोनविंशतिगुणाच्छोध्यम्, शेषं जातमिदं २०००० । अस्यार्धेनेदं १०००० । अस्यैकोनविंशत्या भागलब्धमिदं ५२६ षट् च कला इषुरिति ॥

अधुना धनुःकाष्ठानयनाय करणसूत्रम्—**इषुवर्गस्य षड्गुणस्य ज्यावर्गयुक्तस्य [कृतस्य] मूलं धनुःकाष्ठम्** ॥ इषोः कलीकृतस्यायं वर्गः १००००००००० । एष षड्भिर्गुण्यते, जातमिदं ६००००००००० । एष ज्यावर्गे क्षिप्यते, ज्यावर्गश्चायं ७५६०००००००० । जातमिदं ७६२००००००००० । अस्य मूलमात्रं धनुःकाष्ठं भवति, तच्च द्विकसप्तषट्शून्यचतुष्कत्रिकैः क्रमेणादीयते, ततोऽयं राशिर्भवति अधस्त्यस्यार्धेन छिन्नस्यैकोनविंशत्या भागलब्धमिदं १४५२८ । एकादश चैकोनविंशतिभागा इति ॥ { २६२१५१ / ५५२०८६ }

सम्प्रति विष्कम्भानयनाय करणसूत्रमिदम्—**ज्यावर्गचतुर्भागयुक्तमिषुवर्गमिषुविभक्तं तत्प्रकृतिवृत्तविष्कम्भः** ॥ जीवावर्गचतुर्भागेन युक्त इषुवर्गः इषुणा विभक्तः स्वभाववृत्तविष्कम्भो भवति, ज्यावर्गः ७५६०००००००० । अस्य चतुर्भागोऽयं १८९०००००००० । एष इषुवर्गे क्षिप्यते, इषुवर्गश्चायं १००००००००० । एकीकृतमिदं जातं १९०००००००००० । भागपरावृत्त्या एकषष्टयधिकशतत्रयेणेषुर्गुण्यते, एकोनविंशतिभागेनैकः स गुणकार उपरितनस्य, इतरस्य चैकोनविंशतिभागेनैकोनविंशतिरेव, शून्यचतुष्कापगमे तया भागलब्धमिदं १००००० ॥

अधुना बाहुरानीयते, तत्रेदं करणसूत्रम्—**उदग्धनुःकाष्ठाद् दक्षिणं शोध्यं शेषार्धं बाहुरिति** । **अनेन करणाभ्युपायेन क्षेत्राणां वैताढ्यादिपर्वतानामायामविष्कम्भज्येषुधनुःकाष्ठपरिमाणानि ज्ञातव्यानि** ॥ उदग्धनुःकाष्ठमिदं २५२३० कला ४ चत्वारश्चैकोनविंशतिभागाः, अमुष्माद् दक्षिणं धनुःकाष्ठं पात्यते, तच्चेदं १४५२८ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकादश चैकोनविंशतिभागाः, पांतिते[1] उपरितनराशिरयं १०७०२ । अधस्तादेकादश कला न पतन्ति चतसृभ्यः कलाभ्य इतिकृत्वा उपरितनराशिर्न ददात्यर्धमतो रूपमेकमवतार्यते, एकोनविंशतिमध्यादेकादश शुद्धा अष्टौ शेषकलाचतुष्टयक्षेपाद् द्वादश, जाताः अर्धेन षट्, उपरितनराशिर्न ददात्यर्धमतो रूपमेकमवतार्यते एकोनविंशतिरपि नार्धं ददातीत्येकोनविंशतिरूपमपनीयते, तस्यार्धेनार्धकलाः,अष्टादशानामर्धेन नवषट्कपञ्चदशकलाः सार्धा जाताः उपरितनराशेरर्धेनेदं ५३५०। एतावती बाहा क्षुल्लहिमवत इत्यनेन च परिक्षेपज्यानयनकरणाभ्युपायेन सर्वक्षेत्राणां सर्वपर्वतानां चायामविष्कम्भेषुधनुःकाष्ठप्रमाणान्यवगन्तव्यानीति । अपरे पुनर्विद्वांसोऽतिबहूनि स्वयं विरचय्यास्मिन् प्रस्तावे सूत्राण्यधीयते विस्तरदर्शनाभिप्रायेण, तन्न युक्तमयं सङ्ग्रहः सूरिणा संक्षेपः कृत इत्यतोऽत्र विस्ताराभिधानमपाचीनमाचक्षते प्रवचननिपुणाः । अथ विस्तरतो विवक्षितस्ततो ग्रन्थलक्षपरिभाषिताया जम्बूद्वीपदेशनायाः पटुप्रज्ञैस्तैर्विस्तृणद्भिरपि कियदत्र विस्तृतं स्यात् ? विस्तरार्थिनो वा बहुगुणः सिद्धान्त एव तत्कृतसूत्रेभ्य इत्यत उपेक्षणीयस्तदभिप्राय इति ॥ ११ ॥

एवमिमां जम्बूद्वीपवक्तव्यतां परिसमाप्य समासतः सम्प्रति द्वीपान्तरवक्तव्यताभिधित्सयोवाच--

सूत्रम्—द्विर्धातकीखण्डे ॥ ३-१२ ॥

टी०—अस्य भाष्यम् ।

धातकीखण्डे क्षेत्राद्यतिदेशः इषुकारौ च

भा०—ये एते मन्दरवर्षवंशधरा जम्बूद्वीपेऽभिहिताः[2] एते द्विगुणा धातकीखण्डे द्वाभ्यामिष्वाकारपर्वताभ्यां दक्षिणोत्तरायताभ्यां विभक्ताः । एभिरेव[3] नामभिर्जम्बूदीपकसमसङ्ख्या पूर्वार्धेऽपरार्धे च चक्रारसंस्थिता निषधसमोच्छ्रायाः कालोदलवणजलस्पर्शिनो वंशधराः सेष्वाकारा अरविवरसंस्थिता वंशा इति ॥ १२ ॥

टी०—ये एते मन्दरवर्षवंशेत्यादि भाष्यम् । लवणजलनिधेर्बहिर्धातकीखण्डो द्वीपो धातकीवृक्षसम्बन्धाद् वलयाकृतिः लक्षचतुष्टयविष्कम्भः, तस्मिन् धातकीखण्डे मन्दरादयो जम्बूद्वीपकमन्दरादिभ्यः सङ्ख्यया द्विगुणमाना वेदितव्याः, जम्बूद्वीपे मेरुरेकस्तत्र द्वौ पूर्वापरदिग्मध्यव्यवस्थितौ मेरू, वंशा भरतादिक्षेत्राण्यैरावतपर्यवसानानि, तानि तत्र द्विसङ्ख्यायुक्तानि प्रत्येकं २ । वंशधरा हिमवदादयः पर्वता वैताढ्यादयश्च तेऽपि तत्र द्विर्द्विः स्थिताः, एते च सर्वेऽपि मन्दरादयो द्वाभ्यामिष्वाकारपर्वताभ्यामृजुभ्यामित्यर्थः । दक्षिणोत्तरदिङ्मध्यव्यवस्थिताभ्यां दक्षिणोत्तरायताभ्यां च विभक्ताः—विच्छिन्नाः पूर्वार्धे चापरार्धे च व्यवस्थिताः, एभिरेव[3] नामभिर्जम्बद्वीपकैः समा सङ्ख्या येषां भरतादिप्रतिक्षेत्रं जम्बू-

---

१ 'पात्यन्ते' इति ग-टी-पाठः । २ ' ०रवंशवर्षधरा ' इति घ-पाठः । ३ 'एतैरेव' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वीपकसमसङ्ख्याः, चक्रनाभिप्रतिबद्धारकवत् संस्थिताः, तत्र वर्षधरपर्वता निषधगिरिसदृशोच्छ्रायाश्चतुर्योजनशतोच्छ्राया इत्यर्थः। कालोदलवणजलस्पर्शिनो वंशधराः सेष्वाकाराः कालोदसमुद्रो धातकीखण्डपरिक्षेपी लवणोदधिर्जम्बूद्वीपपरिक्षेपी, एतयोर्जलं कालोदलवणजलं तत्स्प्रष्टुं शीलमेषामिति कालोदलवणजलस्पर्शिनो हिमवदादयः, सहेष्वाकारपर्वताभ्यां पञ्चयोजनशतोच्छ्रायाभ्यामिति। धातकीखण्डवर्तिनश्च हिमवदादयो जम्बूद्वीपकहिमवदादिविच्छेदप्रतिनिधिना व्यवस्थिता वैताढ्यादयः क्षेत्राणि चेति। अरविवरसंस्थिता वंशा इति। अराणां विवराण्यन्तरालानि तद्वद् व्यवस्थिताः वंशाः—क्षेत्राणि तत्रेति। सङ्क्षेपात् तु प्रतिपत्तव्यमिदं यन्नाम किञ्चिन्नदीदेवकुरूत्तरकुरुप्रभृति जम्बूद्वीपेऽभिहितं तत् सर्वं धातकीखण्डे द्विर्द्विरवसातव्यमिति ॥ १२ ॥

यथैव धातकीखण्डे जम्बूद्वीपविधिर्द्विरुक्तस्तथैव—

सूत्रम्—पुष्करार्धे ॥ ३—१३ ॥

भा०—यश्च धातकीखण्डे मन्दरादीनां सेष्वाकारपर्वतानां सङ्ख्याविषये नियमः स एव पुष्करार्धे वेदितव्यः ॥

टी०—पुष्करद्वीपः कालोदसमुद्रपरिक्षेपी षोडशलक्षविष्कम्भस्तस्यार्धमारात्तममष्टौ योजनलक्षास्तस्मिन् पुष्करार्धे च जम्बूद्वीपविधिर्द्विर्द्विर्द्रष्टव्यः। यश्च धातकीखण्डे विधिरुक्त इष्वाकारौ दक्षिणोत्तरदिङ्मध्यावस्थितौ दक्षिणोत्तरायतौ पञ्चशतोच्चौ, तथा मन्दरौ चतुरशीतिसहस्रोच्छ्रयादिकौ वंशधराश्चतुःशतोच्चा इत्येवमादिकः सङ्ख्याविशेषनियमः स पुष्करार्धेऽप्यशेषो वेदितव्य इति।

मानुषोत्तरः पर्वतः

भा०—ततः परं मानुषोत्तरो नाम पर्वतो मानुष्यलोकपरिक्षेपी सुनगरप्राकार(वत्)वृतः पुष्करद्वीपार्धे निर्दिष्टः काञ्चनमयः। सप्तदशैकविंशानि योजनशतानि उच्छ्रितः। चत्वारि त्रिंशानि क्रोशं चाधो धरणितलमवगाढः। योजनसहस्रद्वाविंशमधस्ताद् विस्तृतः। सप्तशतानि त्रयोविंशानि मध्ये। चत्वारि चतुर्विंशान्युपरीति।

टी०—ततः परमित्यादि भाष्यम्। आरात्तमपुष्करार्धात् परतः समनन्तरो धान्यपल्यकार्धाकृतिः वलयवृत्तो मानुषोत्तराभिधानो गिरिर्मानुष्यलोकपरिक्षेपी महानगरप्राकारप्रतीकाशः कनकमयः पुष्करद्वीपार्धविभागकारीति। शेषं सुगुच्छ्रायादि सुज्ञानम्।

भा०—न कदाचिदस्मात् परतो जन्मतः संहरणतो वा चारणविद्याधरर्द्धिप्राप्ता अपि मनुष्या भूतपूर्वा भवन्ति भविष्यन्ति च।

टी०—न कदाचिदस्मादित्यादि। अस्मान्मानुषोत्तराद् गिरेः परतो न कस्मिंश्चिदपि काले जायन्ते जनिष्यन्तेऽजनिषत चेति मनुष्या इत्यत एवायं मानुषोत्तरोऽभिधीयते। तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संहरणतोऽपि न सन्ति मनुष्याः, तत्र संहरणं नाम वैराद्यनुबन्धात् केनचिद् देवविद्याधरादिना इहत्यमनुष्यस्तत्रोत्क्षिप्य नीयेतायमत्रोर्ध्वशोषं शुष्यतु म्रियतां वाप्यकृतप्रतीकारः क्षिप्रमेवं वैरादिनिर्यातनार्थं, संहरणममून् विहाय क्रियते—

"समणीं अवगतवेदं, परिहारपुलागमप्पमत्तं च ।
चोद्दसपुव्विं आहा-रयं च णवि कोइ संहरइ ॥" आर्या[1]

तस्मादपि संहरणतो न मनुष्यास्तत्परत इति, अवश्यं हि मनुष्येण मर्तव्यमन्तर्मानुषोत्तरनगस्येति । तथा चारणविद्याधरर्द्धिप्राप्ता अपि मनुष्यास्तमुल्लङ्घ्य गताः सन्तः परतो न म्रियन्ते इति नियम्यते, न पुनर्गमनमेषां मानुषोत्तराद् बहिर्निषिध्यते, तपोविशेषानुष्ठानाज्जङ्घाचारिणो विद्याचारिणश्च संयता नन्दीश्वरादिद्वीपान् गच्छन्ति चैत्यवन्दनायै, प्रसिद्धश्चायमावश्यकादिष्वपि प्रायो विधिः, तथा विद्याधरा महाविद्यासम्पन्नाः ऋद्धिप्राप्ताश्च वैक्रियादिशरीरभाजः सर्वे गच्छन्ति परतः, न तु प्राणान् परित्यजन्ति तत्रैवेति । एवंविधातिशयप्राप्ता अपि तत्र नो म्रियन्ते, किमुत निरतिशयमनुष्या इति दर्शयति—

मानुषोत्तराभिधाने कारणम्

भा०—अन्यत्र समुद्घातोपपाताभ्यामत एव च मानुषोत्तर इत्युच्यते ।

टी०—अन्यत्र समुद्घातोपपाताभ्यामित्यपोद्यते[2] मारणान्तिकसमुद्घातेन समुपहतः कश्चिदर्धतृतीयद्वीपान्तर्वर्ती बहिर्वर्तिद्वीपसमुद्रेषूत्पत्स्यते तेन चोत्पत्तिप्रदेशे प्रक्षिप्तमात्मप्रदेशजालमिलिकागतिना पश्चान्म्रियते तत्र व्यवस्थित इति । तथोपपातमङ्गीकृत्य जन्माभिसम्बध्यते बहिर्द्वीपसमुद्रवर्तिनाऽसुमता येन मनुष्यायुर्निबद्धमर्धतृतीयद्वीपाभ्यामन्तरे चोत्पत्स्यते वक्रगत्या, तस्य तन्मनुष्यायुर्वक्रकाले विपच्यते, तदैव चासौ मनुष्यो जातस्तदुदयवर्तीत्वात् । तथा चागमः-" मणुस्से णं भंते[3] ! मणुस्सेसु उववज्जइ अमणुस्से मणुस्सेसु उववज्जइ ? गोयमा ! मणुस्से २ सु उववज्जइ, नो अमणुस्से मणुस्सेसु उववज्जइ ॥ " एवं समुद्घातोपपातौ विरहय्य नान्येन प्रकारेण बहिर्मानुषोत्तरधरणीधरात् मरणं मनुष्याणां जन्म वा सम्भाव्यते इति । ये त्वेतद् भाष्यं गमनप्रतिषेधद्वारेण चारणविद्याधरर्द्धिप्राप्तानामाचक्षते तेषामागमविरोधः, सर्वेषां हि चारणादीनां आगमे गमनाभ्यनुज्ञानाद्, बहिर्जन्ममरणे न सम्भाव्येते इत्यवधीकृत्येदमुच्यते—अत एव मानुषोत्तर इति ।

---

१ श्रमणीमपगतवेदं परिहारं पुलाकमप्रमत्तं च ।
चतुर्दशपूर्विणमाहारकं च नैव कोऽपि संहरति ॥—भग० श० २५, उ० ६ वृत्तौ

२ ' मित्यापाद्यते ' इति क-पाठः ।

३ मनुष्यो भदन्त ! मनुष्येषु उत्पद्यते, अमनुष्यो मनुष्येषु उत्पद्यते ? गौतम ! मनुष्यो मनुष्येषु उत्पद्यते, न अमनुष्यो मनुष्येषु उत्पद्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नरलोके द्वीपसमुद्रादिसंख्या

भा०—तदेवमर्वाग्मानुषोत्तरस्यार्धतृतीया द्वीपाः, समुद्रद्वयं, पञ्च मन्दराः, पञ्चत्रिंशत् क्षेत्राणि, त्रिंशद् वर्षधरपर्वताः, पञ्च देवकुरवः, पञ्चोत्तराः कुरवः, शतं षष्ट्यधिकं चक्रवर्त्तिविजयानाम् । द्वे शते पञ्चपञ्चाशज्जनपदानाम्, अन्तरद्वीपाः षट्पञ्चाशदिति ॥ १३ ॥

टी०—तदेवमर्वाग् मानुषोत्तरस्येत्यादि भाष्यम् । व्यावर्णितलक्षणस्य मानुषोत्तरगिरेरर्वाग् जम्बूद्वीपधातकीखण्डपुष्करार्धान्यर्धतृतीया द्वीपाः; लवणकालोदौ समुद्रद्वयम्; जम्बूद्वीप एको धातकीखण्डे द्वौ, पुष्करार्धे च द्वावेव पञ्च मन्दराः;जम्बूद्वीपे भरतादीनि सप्त धातकीषण्डे चतुर्दश, पुष्करार्धे चतुर्दशैवं पञ्चत्रिंशत क्षेत्राणि; जम्बूद्वीपे षट्, धातकीखण्डे द्वादश,पुष्करार्धे द्वादशैवं त्रिंशद् वर्षधरपर्वताः;जम्बूद्वीपे एकः, धातकीखण्डे द्वौ, पुष्करार्धे द्वावेवं पञ्च देवकुरवः, एवमेव पञ्चोत्तराः कुरवः; जम्बूद्वीपे द्वात्रिंशत्, धातकीखण्डे चतुःषष्टिः, पुष्करार्धे चतुःषष्टिश्चैवं षष्ट्यधिकं शतं चक्रवर्तिविजयानाम्; पञ्चसु भरतेषु पञ्चसु चैरावतेषु प्रत्येकं पञ्चविंशतिर्जनपदा अर्धं चार्याः एते दशगुणा द्वे शते पञ्चपञ्चाशदधिके जनपदानामार्याणाम्; जम्बूद्वीप एव हिमवतः प्राक् पश्चाद् विदिक्षु सप्त सप्तान्तरद्वीपा एकत्राष्टाविंशतिस्तथा शिखरिणोऽप्यष्टाविंशतिरेवमेते षट्पञ्चाशद् भवन्ति । उत्सेधाङ्गुलं सहस्रगुणितं प्रमाणाङ्गुलं भवति, तदनुमानेन चैषां द्वीप-क्षेत्र-गिरि-कूट-सरित्-सागर-काण्ड-पाताल-भवनकल्पविमानादीनां विष्कम्भायामपरिधयो ग्राह्याः । क्षेत्रादीनि च यथावत्परिमाणतो ज्ञात्वा तत्प्रत्ययार्थं सङ्ख्यानमुक्तम्, तच्च गणितग्रन्थेभ्यः साक्षात् सम्बन्धिफलत्वादव्यभिचारि प्रत्येतव्यम्, यैश्च क्षेत्रादिपरिमाणं सङ्ख्यातं तैरवश्यं सङ्ख्यानशास्त्रं प्रमाणेयम्, प्रमेयपदार्थप्रणयने प्रमाणप्रणयनवत्, यद्यपि चेयत्ता आगममात्रप्रतिपाद्या तथाऽनु तदन्यैरपि सङ्ख्यातं तत्सङ्ख्यानलक्षणं तु नोक्तम्, यदप्युक्तम् तदपि क्षेत्रपरिक्षेपादि व्यभिचरति, सर्वभुवनकोशादिप्रक्रियान्तःपाति प्रदर्श्यं, प्रायश्च सावर्णिसांशपायनबुद्धादयः सातिशयज्योतिषक्षेत्रगणितशास्त्रानभिज्ञास्तेषामविषय एवायम् । यदि नाम मूढतया कश्चिदभिनिविशेत्, स तु प्रतिवृत्तफलकसूत्रदीपच्छायादिभिः प्रत्ययैः प्रत्याय्यः, यस्येयान् विष्कम्भस्तस्य परिक्षेपः कियान् भवतीति सङ्ख्याननियमात्, पूर्वापराविरोधि प्रत्यक्षफलं च सङ्ख्यानम्, अतः सर्वज्ञज्ञानविषयाभ्यन्तरत्वात् ज्ञानातिशयत्वाच्च महातडागोदरसंस्थितजलद्रव्यपलपरिमाणपरिज्ञानोपायोपदेशवत् तीर्थकरैः सर्वमिदमनवद्यमादर्शितं सर्वज्ञतालाञ्छनमिति ॥ १३ ॥

भा०—अत्राह—उक्तं भवता—मानुषस्य स्वभावमार्दवार्जवत्वं च (अ० ६, सू० १८) इति । तत्र के मनुष्याः क्व वेति ? । अत्रोच्यते—

टी०—अत्राह—उक्तं भवतेत्यादि पातनिकाग्रन्थः । सूत्रेषूक्तमाश्रवप्रस्तावे षष्ठेऽध्याये(सू०१८) स्वभावमार्दवार्जवं च मानुषस्येति, तत्र के मनुष्या आर्यादिभेदेन केन व्यवस्थिताः क्व वा द्वीपक्षेत्रे समुद्रे वा ? । अत्रोच्यते—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रम्-प्राङ् मानुषोत्तरान्मनुष्याः ॥ ३-१४ ॥

मनुष्याणां स्थानम्

भा०—प्राङ् मानुषोत्तरात् पर्वतात् पञ्चत्रिंशत्सु क्षेत्रेषु सान्तरद्वीपेषु जन्मतो मनुष्या भवन्ति । संहरणविद्यर्द्धियोगात् तु सर्वेष्वर्धतृतीयेषु द्वीपेषु समुद्रद्वये च समन्दरशिखरेष्विति । भारतका हैमवतका इत्येवमादयः क्षेत्रविभागेन । जम्बूद्वीपका लवणका इत्येवमादयो द्वीपसमुद्रविभागेनेति ॥ १४ ॥

टी०—मानुषोत्तरगिरिमर्यादाव्यवच्छिन्नाः, पञ्चत्रिंशत्सु भरतक्षेत्रादिषु, सान्तरद्वीपेषु, जन्मासादयन्ति मनुष्याः, एतेन भाष्येण न व्याप्तिरर्धतृतीयद्वीपानां समुद्रस्य दर्शिता । अधुना व्याप्तिमादर्शयति—संहरणविद्यर्द्धियोगात् त्वित्यादि । सर्वत्र संहरणादिभिः कारणैः सन्निधानं स्यान्मनुष्याणामिति । एवमेषां स्थानानि निरूप्य मनुष्याणां क्षेत्रादिविभागेन भेदमाख्याति—भारतका इत्यादि सुज्ञानम् ॥ १४ ॥

अधुनैषां क्षेत्रादिकृत एव विभागो विशेष्यते कर्मनिर्वृत्तिसंश्रयेण, अतस्तदाख्यानायाह—

सूत्रम्-आर्या म्लेच्छाश्च ॥ ३-१५ ॥

टी०—चशब्दोऽनेन भेदत्वमुभयोरापादयति ।

मनुष्यभेदाः क्षेत्रार्यादिकाश्च

भा०—द्विविधा मनुष्या भवन्ति—आर्या म्लेच्छाश्च । तत्रार्याः षड्विधाः—क्षेत्रार्याः, जात्यार्याः, कुलार्याः, कर्मार्याः, शिल्पार्याः, भाषार्या इति । तत्र क्षेत्रार्याः पञ्चदशसु कर्मभूमिषु जातास्तथा भरतेष्वर्धषड्विंशतिषु जनपदेषु जाताः शेषेषु च चक्रवर्तिविजयेषु । जात्यार्या इक्ष्वाकवो विदेहा हरयोऽम्बष्ठा ज्ञाताः कुरवः बुंवनाला[1] उग्रा भोगा[2] राजन्या इत्येवमादयः । कुलार्याः कुलकराः चक्रवर्तिनो बलदेवा वासुदेवा ये चान्ये आ तृतीयादा पञ्चमादा सप्तमाद् वा कुलकरेभ्यो वा विशुद्धान्वयप्रकृतयः । कर्मार्या यजनयाजनाध्ययनाध्यापनप्रयोगकृषिलिपिवाणिज्ययोनिपोषणवृत्तयः । शिल्पार्यास्तन्तुवाय-कुलाल-नापित-तुन्नवाय-देवटादयोऽल्पसावद्याः अगर्हिताजीवाः । भाषार्या नाम ये शिष्टभाषानियतवर्णं लोकरूढस्पष्टशब्दं पञ्चविधानामप्यार्याणां संव्यवहारं भाषन्ते ॥

टी०—द्विविधा इत्यादि भाष्यम् । तत्रार्धषड्विंशतिजनपदजाताः भूयसा आर्याः, अन्यत्र जाता म्लेच्छाः, तत्र क्षेत्र-जाति-कुल-कर्म-शिल्प-भाषा-ज्ञानदर्शनचारित्रेषु शिष्टलोकन्यायधर्मानपेताचरणशीला आर्याः, एतद्विपरीतास्तु म्लेच्छा भवन्त्यव्यक्तानियतभाषाचेष्टत्वात् । तत्रा-

---

१ 'बुचनाला' इति क-पाठः, 'बुंवुनाला' इति तु घ-पाठः । २ 'भोजा' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्याः षड्विधा इत्यादि। क्षेत्र-जाति-कुल-कर्म-शिल्प-भाषाभेदेन, तत्र क्षेत्रार्या इत्यादि सुज्ञानम्। जात्यार्या इक्ष्वाकव इत्यादि। सर्व एते जातिभेदाः केनचिन्निमित्तान्तरेणाध्यवसेयाः। कुलार्या इत्यादि। अत्रापि निमित्तभेदेन भिद्यन्ते। अपरे परिभाषन्ते–पित्रन्वयो जातिः, मात्रन्वयः कुलम्। कर्मार्या इत्यादि। अनाचार्यकं किल कर्म तत्रार्याः कर्मार्याः शिल्पार्या इत्यादि। आचार्योपदेशात् शिक्षितं शिल्पं तन्तुवायादि तत्रार्याः शिल्पार्याः। भाषार्या नामेत्यादि। शिष्टाः सर्वातिशयसम्पन्ना गणधरादयः तेषां भाषा संस्कृताऽर्धमागधिकादिका च, तत्र शिष्टभाषानियता अकारादयो वर्णा विशिष्टेन पौर्वापर्येण सन्निवेशिता यस्य शब्दप्रधानसंव्यवहारस्यासौ शिष्टभाषानियतवर्णस्तं लोकरूढस्पष्टशब्दं लोकरूढः-अत्यन्तप्रसिद्धः संव्यवहारेषु स्पष्टः-स्फुटो नाव्यक्तो बालभाषावत् लोकरूढः स्पष्टः शब्दो यस्मिन् संव्यवहारे तमेवंविधम्, पञ्चविधानामप्यार्याणां क्षेत्रादिभेदभाजामनन्तरोक्तानां संव्यवहारमागच्छ याहीदं कुरु मैवं कार्षीरित्येवमादिकं भाषन्ते ये ते भाषार्याः ॥

भा०—अतो विपरीता म्लिशः ॥

टी०—उक्तक्षेत्र-जाति-कुल-कर्म-शिल्प-भाषाव्यतिरिक्तक्षेत्रादिषट्कभाजः सर्वे म्लिशो भवन्ति, शक-यवन-किरात-काम्बोज-बाह्लीकादयोऽनेकभेदाः, तथाऽन्तरद्वीपकाः किल म्लेच्छा एव, क्षेत्रादिषट्कविपर्यासात्।

अन्तरद्वीपकाः

भा०—तद्यथा–हिमवतः प्राक् पश्चाच्च चतसृषु विदिक्षु त्रीणि योजनशतानि लवणसमुद्रमवगाह्य चतसृणां मनुष्यविजातीनां चत्वारोऽन्तरद्वीपा भवन्ति, त्रियोजनशतविष्कम्भायामाः। तद्यथा–एकोरुकाणां आभासिकानां लाङ्गूलिनां विषाणिनामिति १। चत्वारि योजनशतान्यवगाह्य चतुर्योजनशतायामविष्कम्भाः। [1]एवमेव हयकर्णानां गजकर्णानां गोकर्णानां शष्कुलीकर्णानामिति २। पञ्च योजनशतान्यवगाह्य पञ्चयोजनशतायामविष्कम्भा एवान्तरद्वीपाः। तद्यथा-[2]आदर्श-मेष-हय-गजमुखनामानः ३। षड् योजनशतान्यवगाह्य तावदायामविष्कम्भा एवान्तरद्वीपाः। तद्यथा-[3]अश्व-हस्ति-सिंह-व्याघ्रमुखनामानः ४। सप्त[4] योजनशतान्यवगाह्य सप्तयोजनशतायामविष्कम्भा एवान्तरद्वीपाः। तद्यथा-अश्वकर्ण-सिंहकर्ण-हस्तिकर्ण-कर्णप्रावरणनामानः ५। अष्टौ योजनशतान्यवगाह्याष्टयोजनशतायामविष्कम्भा एवान्तरद्वीपाः। तद्यथा—उल्कामुख-विद्युज्जिह्व-मेषमुख–विद्युद्दन्तनामानः ६। नव योजनशतान्यवगाह्य नवयोजनशतायामविष्कम्भा एवान्तरद्वीपा भवन्ति। तद्यथा—[5]घनदन्त-गूढदन्त-श्रेष्ठदन्त-[6]शुद्धदन्तनामानः ७।

---

१ 'एवान्तरद्वीपाः, तद्यथा' इति घ–पाठः। २ गजमुखानां व्याघ्रमुखानामादर्शमुखानां गोमुखानामिति' इति घ-पाठः। ३ ' अश्वमुखानां हस्तिमुखानां सिंहमुखानां व्याघ्रमुखानामिति' इति घ–पाठः। ४ ' सप्त शतान्यवगाह्य ' इति क–पाठः। ५ ' घनदन्त–श्रेष्ठदन्त ' इति क–पाठः। ६ ' विशिष्टदन्त ' इति घ–पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकोरुकाणामेकोरुकद्वीपः । एवं शेषाणामपि स्वनामभिस्तुल्यनामानो वेदितव्याः । शिखरिणोऽप्येवमेवेत्येवं षट्पञ्चाशदिति ॥ १५ ॥

टी०—तद्यथा-हिमवतः प्राक् पश्चाच्च विदिक्षु इत्यादि भाष्यम् । हिमवतः प्राग्भागे पश्चाद्भागे च विदिक्षु पूर्वोत्तरादिकासु चतसृषु, त्रीणि योजनशतानि लवणजलधिमवगाह्य द्वीपकाः प्रथमतः सन्निविष्टास्तासां मनुष्यजातीनामेकोरुकादिकानाम्, तत्र पूर्वोत्तरस्यां दिशि त्रीणि योजनशतान्यवगाह्य लवणसागरजलं त्रिशतायामविष्कम्भः प्रथम एकोरुकाभिधानो द्वीप एकोरुकपुरुषाणामधिवासः द्वीपनामतः पुरुषनामानि, ते तु सर्वाङ्गोपाङ्गसुन्दरा दर्शनमनोरमणाः नैकोरुका एवेत्येवं शेषा अपि वाच्याः, तथा दक्षिणपूर्वस्यां दिशि लवणजलमवगाह्य त्रीणि शतानि त्रिशतायामविष्कम्भः प्रथमो द्वीप आभासिकाभिधान आभासिकमनुष्यावासः, तथा दक्षिणापरस्यां दिशि हिमवतस्त्रीणि शतानि लवणजलमवगाह्य त्रिशतायामविष्कम्भो लाङ्गूलिकाभिधानः प्रथमद्वीपो लाङ्गूलिकमनुष्यावासः, तथोत्तरापरस्यां त्रीणि शतान्यवगाह्य लवणजलं त्रिशतायामविष्कम्भः प्रथमद्वीपो वैषाणिकाभिधानः वैषाणिकमनुष्यावासः। एवं हयकर्ण-गजकर्ण-गोकर्ण-शष्कुलीकर्णाश्चत्वारि योजनशतान्यवगाह्य हिमवतो लवणोदधिं पूर्वोत्तरादिकासु विदिक्षु चतुर्योजनशतायामविष्कम्भाश्चत्वारो द्वीपा भवन्ति, एवं शेषचतुष्काण्यपि विभजनीयानि यावत् सप्तमो द्वीपः शतानि नवावगाह्य लवणजलधिं नवयोजनशतायामविष्कम्भो विदिशि विदिशि भवतीति,आदर्शमुख-मेषमुख-हयमुख-गजमुखाः अश्वमुख-हस्तिमुख-सिंहमुख-व्याघ्रमुखाः अश्वकर्ण-सिंहकर्ण-हस्तिकर्ण-कर्णप्रावरणाः उल्कामुख-विद्युज्जिह्व-मेषमुख-विद्युद्दन्ताः घनदन्त-गूढदन्त-विशिष्टदन्त-शुद्धदन्ताख्याः।एते च युग्मप्रसवाः पल्योपमासङ्ख्येयभागायुषोऽष्टधनुःशतोच्चाः पुरुषा भवन्ति । एवमेवाष्टाविंशतिरन्तरद्वीपकानां हिमवद्गिरिप्रागपरपर्यन्तप्रवाहा भवन्त्युक्तेन न्यायेन । तथैरावतक्षेत्रविभागकारिणः शिखरिणोऽप्येवमेव पूर्वोत्तरादिविदिक्षु क्रमेणामुनैव नामकलापेन चान्तरद्वीपकानामष्टविंशतिर्भवत्येकत्र षट्पञ्चाशदन्तरद्वीपका भवन्ति । एतच्चान्तरद्वीपकभाष्यं प्रायो विनाशितं सर्वत्र कैरपि दुर्विदग्धैर्येन षण्णवतिरन्तरद्वीपका भाष्येषु दृश्यन्ते । अनार्षं चैतदध्यवसीयते जीवाभिगमादिषु षट्पञ्चाशदन्तरद्वीपकाध्ययनात्, नापि वाचकमुख्याः सूत्रोल्लङ्घनेनाभिदधत्यसम्भाव्यमानत्वात्, तस्मात् सैद्धान्तिकपाशैर्विनाशितमिदमिति ॥ १५ ॥

तदेतस्मिन्नार्यानार्यविकल्पे मनुष्यक्षेत्रे काः कर्मभूमयोऽकर्मभूमयो वेत्यत आह—

सूत्रम्—भरतैरावतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्यः ॥ ३—१६ ॥

भा०—मनुष्यक्षेत्रे भरतैरावतविदेहाः पञ्चदश कर्मभूमयो भवन्ति । अन्यत्र देवकुरूत्तरकुरुभ्यः ।

---

१ 'आभाषिक' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—मनुष्यक्षेत्र इत्यादि भाष्यम् । अर्धतृतीयद्वीपाभ्यन्तरे पञ्च भरतानि पञ्चैरावतानि पञ्च विदेहाः पञ्चदश कर्मभूमयो भवन्ति, कात्स्न्येन प्राप्ते कर्मभूमित्वे विदेहानामपवादः क्रियते—देवकुरूत्तरकुरुवर्जा विदेहाः कर्मभूमयो भवन्तीति, तदन्तःपातित्वान्निषेधः ॥

अथ कः कर्मभूमिशब्दार्थ इत्यत आह—

कर्माकर्मभूमिस्वरूपम्

भा०—संसारदुर्गान्तगमकस्य सम्यग्दर्शनज्ञानचारित्रात्मकस्य मोक्षमार्गस्य ज्ञातारः कर्तार उपदेष्टारश्च भगवन्तः परमर्षयस्तीर्थकरा अत्रोत्पद्यन्ते । अत्रैव जाताः सिद्ध्यन्ति नान्यत्र, अतो निर्वाणाय कर्मणः सिद्धिभूमयः कर्मभूमय इति। शेषास्तु विंशतिवंशाः सान्तरद्वीपा अकर्मभूमयो भवन्ति ।

टी०—संसारदुर्गान्तगमकस्येत्यादि । मोक्षमार्गो विशिष्यते, संसारो नारकादिभेदः स एव दुर्ग-गहनमनेकजातिप्रमुखत्वाद् दुःखात्मकत्वाच्च तस्यान्तः-पारः संसारदुर्गान्तस्तं संसारदुर्गान्तं गमयति—प्रापयति यस्तस्य संसारदुर्गान्तगमकस्य मोक्षमार्गस्य—सम्यक्त्वज्ञानचरणात्मकस्येति मोक्षाङ्गानामियत्तामावेदयति, एवंविधस्य मोक्षपथस्य, ज्ञातारस्तीर्थकरा यथावदवगन्तार इत्यर्थः । कर्तार इति प्रणेतारः प्रदर्शयितार इतियावत् नित्यत्वात् प्रवचनार्थस्येति, सम्यक्त्वाद्यात्मकं तीर्थं तत्प्रणयनात् तीर्थकरा भवन्ति, गणधरादिप्रव्राजनाद् वा, वाग्योगेन चोपदिशन्ति भगवन्त इत्युपदेष्टारः श्रुतज्ञानाभावादिति सूचयति, यशोलक्ष्म्यादियोगाद् भगवन्तः, परमर्षयः कृतार्थत्वे सति सन्मार्गोपदेशेन भव्यसत्त्वाभ्युद्धरणात् तीर्थकरणहेतवस्तच्छीलास्तदनुलोमवृत्तयो वा तीर्थकरा अत्रोत्पद्यन्ते पञ्चदशसु क्षेत्रेषु, एतेष्वेव च पुनः सकलकर्मक्षयं विधाय सिद्धिधामाभिधावन्ति नान्यत्र क्षेत्र इति । अतो निर्वाणाय कर्मणः सिद्धिभूमयः कर्मभूमय इति । अतः सकलकर्माग्नेर्विध्यापनाय सिद्धिप्राप्त्यै भूमयः कर्मभूमयोऽभिधीयन्त इति । परिशेषलब्धमकर्मभूमिशब्दार्थमाख्याति—शेषास्त्वित्यादि । जम्बूद्वीपे हैमवत-हरिवर्ष-रम्यक-हैरण्यवताख्याश्चत्वारो वंशाः, एत एव धातकीखण्डेऽष्टौ द्विगुणाः पुष्करार्धे चाष्टावेकत्र विंशतिर्वंशाः सहान्तरद्वीपैरेकोरुकादिभिः षट्पञ्चाशद्विरकर्मभूमयो भवन्ति, तीर्थकरजन्मादिरहितत्वात् । पूर्वापोदितमर्थमुपसंहरति—

भा०—देवकुरूत्तरकुरवस्तु कर्मभूम्यभ्यन्तरा अप्यकर्मभूमय इति ॥ १६ ॥

टी०—सर्वदाचरणप्रतिपत्तेरभावादित्यवगमयति ॥ १६ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथैते मनुष्या आर्यादिभेदवर्तिनः कियन्तं कालमनुपाल्यायुःप्राणान् विजहतीत्याह—

सूत्रम्–नृस्थिती परापरे त्रिपल्योपमान्तर्मुहूर्ते ॥ ३–१७ ॥

भा०—नरो नरा मनुष्या मानुषा इत्यनर्थान्तरम् । मनुष्याणां परा स्थितिस्त्रीणि पल्योपमानि, अपरा अन्तर्मुहूर्तेति ॥ १७ ॥

टी०—नरो नरा इत्यादि भाष्यम् । पर्यायाख्यानेन व्याख्यातमेतत् नृशब्दस्य, परा-

नरायुषोमानम्

उत्कृष्टा स्थितिरायुषोऽवस्थानं जीवितकालः त्रीणि पल्योपमानि मनुष्याणाम्, एतानि चाद्धापल्योपमेन जीवानामायूंषि गण्यन्ते, अपरा अन्तर्मुहूर्ता जघन्या स्थितिरायुषोऽन्तर्मुहूर्तपरिमाणा भवतीति ॥ १७ ॥

सूत्रम्—तिर्यग्योनीनां च ॥ ३–१८ ॥

तिर्यगायुर्मानम्

भा०—तिर्यग्योनीनां च परापरे स्थिती त्रिपल्योपमान्तर्मुहूर्ते भवतः यथासङ्ख्यमेव । पृथक्करणं यथासङ्ख्यदोषविनिवृत्त्यर्थम्, इतरथा ह्येकमेव सूत्रमभविष्यत् । उभयत्र चोभे यथासंख्यं स्यातामिति ।

टी०—तिर्यग्योनीनामप्यत्रैवोच्यते स्थितिरायुषः समानप्रक्रमत्वात् । तिर्यग्योनीनां चेत्यादि भाष्यम् । तिर्यग्योनयः–पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुःपञ्चेन्द्रियाः तेषामपि परापरे स्थिती जीवितव्यस्य त्रिपल्योपमान्तर्मुहूर्ते भवतः यथासङ्ख्यम् उत्कृष्टजघन्ये स्थिती बोद्धव्ये, पृथग्योगकरणं यथासङ्ख्यदोषविनिवृत्त्यर्थमित्यादि । नृतिर्यग्योनीनां स्थिती परापरे त्रिपल्योपमान्तर्मुहूर्ते इत्येवं न्यासे सति त्रिपल्योपमा परा स्थितिर्मनुष्याणाम्, अपरा स्थितिस्तिरश्चामन्तर्मुहूर्तप्रमाणेति एवं स्यात् सूत्रार्थ इत्याचार्याभिप्रायः। न ह्येवमपि न्यस्यमाने कश्चिद् दोषः, स्थिती परापरे इति समुदितमेवेदं समासपदत्वादभिसम्बन्त्स्यते, नृणां स्थिती परापरे त्रिपल्योपमान्तर्मुहूर्ते तिरश्चां च परापरे त्रिपल्योपमान्तर्मुहूर्ते, व्याख्यानतो वा विच्छेदः आर्षानुवादित्वाद् वाऽस्य सूत्रप्रबन्धस्येति ।

भा०–द्विविधा चैषां मनुष्यतिर्यग्योनिजानां स्थितिः–भवस्थितिः कायस्थितिश्च । मनुष्याणां यथोक्ते त्रिपल्योपमान्तर्मुहूर्ते परापरे भवस्थिती । कायस्थितिस्तु परा सप्ताष्टौ वा भवग्रहणानीति । तिर्यग्योनिजानां च यथोक्ते समासतः परापरे भवस्थिती ।

टी०–द्विविधा चैषामित्यादि भाष्यम् । नृतिरश्चां द्विप्रकारा स्थितिः–भवस्थितिः कायस्थितिश्च । तत्र भवस्थितिर्मनुष्यजन्म लब्ध्वा तिर्यग्जन्म वा कियन्तं कालं जीवति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राणी जघन्येनोत्कर्षेण वेति। कायस्थितिर्मनुष्यो भूत्वा तिर्यग्योनिर्वा मरणमनुभूय पुनर्मनुष्येष्वेव मनुष्यः तिर्यक्ष्वेव तिर्यग्योनिर्नैरन्तर्येण कतिकृत्वः समुत्पद्यते। तत्र मनुष्याणां यथोक्ते त्रिपल्योपमान्तमुहूर्ते परापरे भवस्थिती, कायस्थितिः सप्ताष्टौ वा भवग्रहणानि प्रकर्षतः सप्ताष्टौ वेति नैरन्तर्येण मानुषः स्यात्, कथं पुनरिदं भाव्यते-पूर्वकोट्यायुर्मनुष्यो मृत्वा पुनः पुनः पूर्वकोट्यायुरेव मनुष्यः सप्तकृत्वः प्रादुरस्तीति, अष्टमभवे तु देवकुरूत्तरकुरुषु उत्पद्यते पश्चाद् देवलोकं गच्छति। तिर्यग्योनिजानां चेत्यादि। उक्ते भवस्थिती सङ्ग्रहतः।

पृथ्व्यादीनामायुर्मानम्

भा०-व्यासतस्तु शुद्धपृथिवीकायस्यपरा द्वादश वर्षसहस्राणि, खरपृथिवीकायस्य द्वाविंशतिः, अपकायस्य सप्त, वायुकायस्य त्रीणि, तेजःकायस्य त्रीणि रात्रिंदिनानि, वनस्पतिकायस्य दश वर्षसहस्राणि। एषां कायस्थितिरसङ्ख्येयाः अवसर्पिण्युत्सर्पिण्यः वनस्पतिकायस्यानन्ताः। द्वीन्द्रियाणां भवस्थितिर्द्वादश वर्षाणि। त्रीन्द्रियाणामेकोनपञ्चाशद् रात्रिंदिनानि। चतुरिन्द्रियाणां षण्मासाः। एषां कायस्थितिः सङ्ख्येयानि वर्षसहस्राणि। पञ्चेन्द्रियतिर्यग्योनिजाः पञ्चविधाः। तद्यथा-मत्स्याः उरगाः परिसर्पाः पक्षिणश्चतुष्पदा इति। तत्र मत्स्यानामुरगाणां भुजगानां च पूर्वकोट्येव। पक्षिणां पल्योपमासङ्ख्येयभागः। चतुष्पदानां त्रीणि पल्योपमानि गर्भजानां स्थितिः। तत्र मत्स्यानां भवस्थितिः पूर्वकोटिस्त्रिपञ्चाशदुरगाणां द्विचत्वारिंशत् भुजगानां द्विसप्ततिः पक्षिणां स्थलचराणां चतुरशीतिर्वर्षसहस्राणि सम्मूर्च्छिमानां भवस्थितिः। एषां कायस्थितिः सप्ताष्टौ भवग्रहणानि। सर्वेषां मनुष्यतिर्यग्योनिजानां कायस्थिति रप्यपरा अन्तर्मुहूर्तैवेति ॥ १८ ॥

टी०-व्यासतस्तु शुद्धपृथिव्या द्वादश वर्षसहस्राणि खरधरणेर्द्वाविंशतिरित्यवमादि सुज्ञानम्, एषां पृथिव्यप्तेजोवायुप्रत्येकवनस्पतीनां कायस्थितिरसङ्ख्येया अवसर्पिण्युत्सर्पिण्यः साधारणवनस्पतेरनन्ता अवसर्पिण्युत्सर्पिण्यः। द्वीन्द्रियाणामित्यादि सुज्ञाना भवस्थितिः। एषां कायस्थितिः सङ्ख्येयानि वर्षसहस्राणि पञ्चेन्द्रियेत्यादि सुज्ञानम्। सप्ताष्टौ वा भवग्रहणानि मनुष्यवद् भावनीयानि। सर्वेषामित्यादि मनुष्यतिरश्चामपरा कायस्थितिर्जघन्याऽन्तर्मुहूर्तप्रमाणैव भवतीति ॥ १८ ॥

ग्रन्थाग्रमङ्कतः ८२१२ (१)

॥ इति श्रीतत्त्वार्थसूत्रेऽर्हत्प्रवचने भाष्यानुसारिण्यां टीकायां लोकप्रज्ञसिर्नामाध्यायस्तृतीयः॥ ३ ॥

॥ इति तृतीयोऽध्यायः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ श्रीपरमात्मने नमः ॥

चतुर्थोऽध्यायः ४

अध्यायोपोद्घातः

भा०—अत्राह—उक्तं भवता 'भवप्रत्ययोऽवधिर्नारकदेवानाम्' (अ० १, सू० २२) इति ॥ तथौदयिकेषु भावेषु देवगतिरिति (अ० २, सू० ६) ॥ 'केवलिश्रुतसङ्घधर्मदेवावर्णवादो दर्शनमोहस्य' (अ० ६, सू० १४) ॥ सरागसंयमादयो देवस्य (अ० ६, सू० २०) ॥ 'नारकसम्मूर्च्छिनो नपुंसकानि, न देवाः' (अ० २, सू० ५०–५१) । तत्र के देवाः कतिविधा वेति ?। अत्रोच्यते—

टी०—अत्राह—उक्तं भवतेत्यादि सम्बन्धग्रन्थः । उक्तमिदं प्रथमे (सू० २२) भवप्रत्ययोऽवधिर्नारकदेवानामिति । तथा द्वितीये (सू०६) औदयिकभावविचारप्रस्तावे देवगतिरित्युक्तम् । तथा षष्ठे(सू०१४)वक्ष्यति-केवलिश्रुतसङ्घधर्मदेवावर्णवादो दर्शनमोहस्यास्रवो भवति, तथा तत्रैव सरागसंयमसंयमासंयमाकामनिर्जरा[विरत] बालतपांसि (च) देवस्य (अ० ६, सू० २०) आयुष आस्रवो भवति, तथा द्वितीये (सू० ५०-५१) नारकसम्मूर्च्छिनो नपुंसकानि, न देवा इति, एवमनेकसूत्रोपात्तदेवशब्दश्रवणाद् आहिततद्विषयजिज्ञासः प्रश्नयति-तत्र के देवाः कतिविधा वेति । तेषु-सूत्रस्थानेषु, के देवाः प्रतिपत्तव्याः—किंस्वरूपाः ? क्रीडाद्यर्थबहुत्वादिति, निरूपितस्वभावाश्च ते किमेकरूपा उत भेदभाज इति द्वितीयः प्रश्नः प्रावृतत्, एवं प्रश्नद्वयोपन्यासानन्तरं सूरिराह—अत्रोच्यते—प्रश्नद्वयेऽप्यनुरूपं प्रतिवचनमिति, प्रश्नद्वयप्रतिवचनदिदित्सया सूत्रमुपन्यस्यति—देवाश्चतुर्निकाया इति । अथवा उक्तं लोकद्वयविधानं भूद्वीपसागरविन्यासेन । अधुनोर्ध्वलोकाभिधानावसरस्तदभिधित्सया सूत्रप्रणयनम् ।

सूत्रम्—देवाश्चतुर्निकायाः ॥ ४–१ ॥

टी०— नन्वधोलोकतिर्यग्लोकयोरपि देवाः सन्ति, तत् कथमूर्ध्वलोक एवाभिधास्यते चतुर्थाध्याय इति ?। उच्यते—वैमानिकानधिकृत्येदमुच्यते ऊर्ध्वलोकावसर इति, प्रधानत्वात्, अन्यथा भवनपतयोऽधोलोके, व्यन्तरज्योतिष्कास्तिर्यग्लोक इति ।

देवानां भेदप्रतिपादनम्

भा०—देवाश्चतुर्निकाया भवन्ति । तान् पुरस्ताद् वक्ष्यामः ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—देवाश्चतुर्निकाया इत्यादि भाष्यम्। दीव्यन्तीति देवाः, स्वच्छन्दचारित्वात्, अनवरतक्रीडासक्तचेतसः क्षुत्पिपासादिभिर्नात्यन्तमाघ्राता इति भावार्थः। द्योतन्ते वा भास्वरशरीरत्वादस्थिमांसासृक्प्रबन्धरहितत्वात् सर्वाङ्गोपाङ्गसुन्दरत्वाच्च देवाः। अथवा विना विद्यामन्त्राञ्जनादिभिः पूर्वकृततपोऽपेक्षजन्मलाभसमनन्तरमेवाकाशगतिभाजो देवाः, सा ह्यतिशयवती गतिस्तेषामनालम्बाकाशचारिणाम्, यथोक्तमाममे (भग० सू०५८४)—केमहालए[1] णं भंते! लोए पन्नत्ते? गोयमा! अयं च णं जम्बुद्दीवे दीवे सव्वदीवसमुद्दाणं मज्झे खुड्डुलए पण्णत्ते। तेणं कालेणं तेणं समएणं छद्देवा[2] महिड्ढिया जंबुद्दीवे दीवे मन्दरपव्वए मंदरचूलियं सव्वओ समन्ता संपरिक्खिवित्ताणं[3] चिट्ठेज्जा, अहे णं चत्तारिदिसाकुमारीमहयरियाओ चत्तारि बलिपिंडे गहाय जंबुद्दीवस्स दीवस्स चउसुवि दारेसु बहियाभिमुहीओ ठिच्चा ते चत्तारि बलिपिंडे जमगसमगं बहियाभिमुहे पवाहेज्ज। पभू णं गोयमा! ततो एगमेगे देवे ते चत्तारिवि बलिपिंडे धरणितलमसंपत्ते खिप्पामेव पडिसाहरित्तए। ते णं गोयमा! उक्किट्ठाए जाव देवगतीए एगे पुरत्थाभिमुहे पयाते, एवं छस्सुवि दिसासु पयाता। तेणं कालेणं तेणं समएणं वाससहस्साउए दारए पयाते, तए णं तस्स दारगस्स अम्मापियरो पहीणा भवन्ति, नो चेव णं ते देवा लोयंतं संपाउणंति, तए णं तस्स दारगस्स आउए पहीणे भवति, नो चेव णं ते देवा लोयंतं संपाउणंति, तए णं तस्स दारगस्स अट्ठिमिंजे पहीणा भवन्ति, नो चेव णं ते लोअंतं संपाउणंति, तए णं तस्स दारगस्स सत्तमेऽवि कुलवंसे पहीणे भवति, नो चेव णं ते लोयंतं संपाउणंति, तते णं तस्स दारगस्स नामगोत्तेऽवि पहीणे भवति, नो चेव णं संपाउणंति, तेसि णं भंते! देवाणं किं गए बहुए अगए बहुए? गोयमा! गए बहुए, नो अगए बहुए, गतातो से अगते असंखिज्जतिभागे, अगतातो से गए असंखेज्जगुणे, एवं महालए गोयमा! लोए पण्णत्ते"। तथा विमानमहत्त्वं प्रज्ञापना-

देवशब्दस्य व्युत्पत्त्यर्थः

---

१ कियन्महान् भदन्त! लोकः प्रज्ञप्तः? गौतम! अयं च जम्बूद्वीपो द्वीपः सर्वद्वीपसमुद्राणां मध्ये क्षुल्लकः प्रज्ञप्तः। तस्मिन् काले तस्मिन् समये षट् देवा महर्द्धिका जम्बूद्वीपे द्वीपे मन्दरपर्वते मन्दरचूलिकां सर्वतः समन्तात् संपरिक्षिप्य तिष्ठेयुः, अथ चतस्रः दिक्कुमारीमहत्तरिकाः चतुरो बलिपिण्डान् गृहीत्वा जम्बूद्वीपस्य द्वीपस्य चतुर्ष्वपि द्वारेषु बहिरभिमुख्यः स्थित्वा तान् चतुरो बलिपिण्डान् युगपद् बहिरभिमुखान् प्रवाहयेयुः। प्रभुर्गौतम! ततः एकैकः देवः तान् चतुरोऽपि बलिपिण्डान् धरणीतलमसंप्राप्तान् क्षिप्रमेव प्रतिसंहर्तुम्। ते गौतम! उत्कृष्टया यावद् देवगत्या एको देवः पूर्वाभिमुखः प्रयातः, एवं षट्स्वपि दिक्षु प्रयाताः, तस्मिन् काले तस्मिन् समये वर्षसहस्रायुष्को दारकः प्रजातः। ततः तस्य दारकस्य मातापितरौ प्रहीणौ भवतः, नैव ते देवा लोकान्तं संप्राप्नुवन्ति, ततः तस्य दारकस्य आयुः प्रहीणं भवति, नैव ते देवा लोकान्तं संप्राप्नुवन्ति, ततः तस्य दारकस्य अस्थिमज्जाः प्रहीणा भवन्ति, नैव ते (देवा) लोकान्तं संप्राप्नुवन्ति, ततः तस्य दारकस्य सप्तमोऽपि कुलवंशः प्रहीणो भवति, नैव ते लोकान्तं संप्राप्नुवन्ति, ततः तस्य दारकस्य नामगोत्रमपि प्रहीणं भवति, नैव संप्राप्नुवन्ति, तेषां भदन्त! देवानां किं गतं बहुकं अगतं बहुकं? गौतम! गतं बहुकं, न अगतं बहुकं, गतात् तद् अगतं असंख्येयभागे, अगतात् तद् गतं असंख्येयगुणं, एवंमहान् गौतम! लोकः प्रज्ञप्तः।

२ 'बलदेवा' इति क-पाठः। ३ 'वेत्ताणं' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यामुक्तम्–केमहालया णं भंते ! विमाणा पण्णत्ता ? गोयमा ! अयण्णं जंबुद्दीवे दीवे सव्वदीवसमुद्दाणं मज्झे खुड्डुलए, देवे महिड्ढिए जाव महाणुभागे जाव इणामेवत्तिकट्टु केवलकप्पं जंबुद्दीवं दीवं तिहिं अच्छराणिवातेहिं तिसत्तखुत्तो अणुपरियट्टित्ता णं हव्वमागच्छेज्जा, से णं देवे ताए उक्किट्ठाए तुरियाए चंडाए चवलाए सीहाए उद्धुताए जयणाए छेयाए दिव्वाए देवगतीए जाव एगाहं वा बियाहं वा तियाहं वा उक्कोसेणं छम्मासे वीतिवएज्जा अत्थेगइयं विमाणं वीइवएज्जा, अत्थेगइयं नो वीतिवएज्जा, एमहालया णं गोयमा ! विमाणा पण्णत्ता " । एवंविधाः किल गतयो विमध्यमा देवानाम्, अन्येषां उत्कृष्टतमाः सन्ति । एवमन्येऽपि यथासम्भवं विजिगीषादयो धात्वर्था वाच्याः । अनेन प्रथमप्रश्नार्थप्रतिवचनमादर्शितम्, यतो नामकर्मोदयजनिता देवगतयः सातिशयक्रीडागद्युतितिस्वभावाः प्रतिविशिष्टस्थानाध्यासिनः सुखप्राया देवा भवन्तीति । चतुर्निकाया देवा भवन्तीत्यनेन द्वितीयप्रश्नप्रतिवचनं प्रथयति, चत्वारो निकाया-वासा येषां ते चत्वारो वा सङ्घास्ते चतुर्निकायाः, वासो[3] द्युत्पादस्थानमेषां विभिन्नः, भवनपतयो रत्नप्रभायामासादयन्ति जन्मोर्ध्वमधश्च सहस्रमपहाय व्यन्तरास्त्वस्यामेवोपरि यत् परित्यक्तं सहस्रं तस्याध ऊर्ध्वं च योजनशतमेकैकमपहाय मध्येऽष्टासु योजनशतेषु जन्म प्रतिलभन्ते, ज्योतिष्कास्तु समतलाद् भूभागात् सप्त शतानि नवत्यधिकानि योजनानामारुह्य दशोत्तरयोजनशतपृथौ नभोदेशे लोकान्तात् किञ्चिन्न्यूने जन्मागृह्णन्ति । वैमानिका रज्जुमध्यर्धामधिरुह्यामुतः सौधर्मादिषु कल्पेषु सर्वार्थसिद्धिविमानपर्यवसानेषूत्पद्यन्ते जन्मतः । तदेवमुत्पादनिवासभेदात् चतुर्विधा निकायाः, स्वधामसूत्पन्ना भवनपत्यादयोऽन्यत्रापि लवणजलधिमन्दरवंशधराद्रिद्रुमगहनप्रभृतिषु वसन्त्युक्तस्थानव्यतिरेकेण । अत्रैषामुत्पादो न जन्मनाऽस्तीति निवासार्थः।समूहार्थोऽपि प्रकृष्टाप्रकृष्टतद्योग्यास्रवासेवनाद् बहुलीकृतकर्मोदयापेक्षः आर्यानार्यमनुष्यसमूहभेदवद्,अतः स्वधर्मापेक्षजातिविशेषसामर्थ्यान्निकाया इति ॥ तानेतान् निकायभिन्नान् देवान् पुरो वक्ष्यामः क्रमेण, अमुनाऽत्र सूत्रेण सामान्यमात्रस्वरूपाख्यानं परिस्थूरभेदकथनं च कृतमवसेयम्॥ननु च भगवत्यां(श०१२,उ०९,सू०४६१) पञ्चविधा देवा इत्युक्तम्–"कतिविधा णं भंते! देवा पण्णत्ता?गोयमा! पञ्चविधा देवा पण्णत्ता,तंजहा–भवियदव्वदेवा नरदेवा धम्मदेवा देवाहिदेवा भावदेवा य"। तत्र भव्य-

चतुर्विधदेवानां जन्मनिवासभूमयः

देवानां पञ्चविधत्वम्

---

१ कियन्महान्तो भदन्त ! विमानाः प्रज्ञप्ताः ? गौतम ! अयं जंबूद्वीपो द्वीपः सर्वद्वीपसमुद्राणां मध्ये क्षुल्लकः, देवो महर्द्धिको यावत् महानुभागो यावत् इदमेवेतिकृत्वा केवलकल्पं जम्बूद्वीपं द्वीपं त्रिभिः अक्षरनिपातैः त्रिसप्तकृत्वः अनुपरिवर्त्य शीघ्रमागच्छेत् । स देवस्तया उत्कृष्टया त्वरितया चण्डया चपलया शीघ्रया उद्धुतया यतनया छेकया दिव्यया देवगत्या यावत् एकाहं वा द्व्यहं वा त्र्यहं वोत्कृष्टतः षण्मासं व्यतिवर्तेत कियदेकं विमानं व्यतिवर्तेत कियदेकं न व्यतिवर्तेत , इयन्महान्तो गौतम ! विमानाः प्रज्ञप्ताः ।

२ 'तिहिसत्त' इति क-ख-पाठः । ३ 'निवासो' इति ग-पाठः । ४ कतिविधा भदन्त ! देवाः प्रज्ञप्ताः ? गौतम ! पञ्चविधा देवाः प्रज्ञप्ताः, तद्यथा--भव्यद्रव्यदेवा नरदेवा धर्मदेवा देवाधिदेवा भावदेवाश्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवः पञ्चेन्द्रियतिर्यग्योनिजो मनुष्यो वा देवायुषि बद्धेऽनन्तरागामिजन्मनि यो देवतयोत्पत्स्यते स त्वागामिनीवृत्तिमाश्रित्य देव इति प्रज्ञायते तद्लिकत्वाद् दारुच्छेदप्रज्ञापनवत्,नरदेवाः—चक्रवर्तिनो रत्नचतुर्दशकाधिपतयः शेषमनुजोत्कृष्टत्वात्,धर्मदेवाः—साधवो यथोक्तप्रवचनार्थानुष्ठायिनः सद्धर्मप्रधानव्यवहारत्वात्, देवाधिदेवाः-तीर्थकरनामकर्मोदयवर्तिनः कृतार्थाः सदुपदेशेन भव्यसत्त्वानामनुग्राहकत्वाच्छेषदेवपूज्यत्वाच्च, भावदेवाः पुनः भवनवनचरज्योतिष्कवैमानिका देवगतिनामकर्मोदयलक्षिताः देवायुषो वेदकाः क्रीडाद्यतिशयवर्तित्वादिति, एवं पञ्चभेदेषु सत्सु देवेषु किमर्थं चतुर्निकाया इति ? उच्यते—भावदेवानामेवात्र विवक्षितत्वाच्चतुर्निकायत्वम्, तथा च पातनिकाग्रन्थे सर्वत्र भावप्रस्तावः सूरिणा दर्शितः । अपि चाद्याश्चत्वारो मनुष्या एव कञ्चिदतिशयमङ्गीकृत्य देवा इति यथा तथा प्रतिपादितमेव, तस्माद् भावदेवाश्चतुर्निकाया इति युक्तमुक्तं आचार्येण, ऊर्ध्वलोकस्वरूपाख्यानप्रस्तावे च तदधिकारादिति ॥ १ ॥

अथ कथमेतत् प्रतिपत्तव्यं देवाश्चतुर्निकायाः सन्तीति ? उच्यते—तदेकदेशनिकायप्रत्यक्षत्वात् तत्सद्भावावगमकोऽयमनुमानभूत उपलभ्यते—

सूत्रम्—तृतीयः पीतलेश्यः ॥ ४—२ ॥

भा०—तेषां चतुर्णां देवनिकायानां तृतीयो देवनिकायः पीतलेश्य एव भवति । कश्चासौ ? ज्योतिष्क इति ॥ २ ॥

टी०—तृतीयः पीतलेश्यः, नहि प्रत्यक्षमपह्नोतुं शक्यम्, प्रमाणज्येष्ठत्वात्, चन्द्रादित्यादिविमानानि हि प्रत्यक्षप्रमाणसमधिगम्यानि, तानि च कदाचित् केनचिदधिष्ठितान्यपि कर्त्रा, निवासत्वान्नगरग्रामगेहादिवत्, ये च तेषामधिष्ठातारस्ते ज्योतिष्का देवा इति प्रतीयताम्, तच्छेषास्तु तदेकदेशदृष्टेः सेनावनादिवत् प्रतिपत्तव्या इति । तृतीय इति क्रमसन्निवेशमार्षमङ्गीकृत्येदमुच्यते, अथवा वक्ष्यमाणमिहत्यमेवाभिसन्धाय—ज्योतिष्कदेवनिकायस्तृतीय इत्युक्तम् । पीता लेश्या यस्यासौ पीतलेश्यः, इह च द्रव्यलेश्या—शरीरवर्णः प्रतिनियम्यते, नाध्यवसायविशेषः, लेश्याः षडपीष्यन्ते देवानां प्रतिनिकायमिति । **तेषां चतुर्णामित्यादि** भाष्यम् । तेषां—पूर्वसूत्रोपन्यस्तानां चतुःसङ्ख्यानियतानां देवसमूहानां **तृतीयो देवनिकायः पीतलेश्य एव भवतीति**, सामर्थ्यादवधारणोपपत्तेरेवशब्दो नोपात्तः, साक्षाद् दर्शितश्च सामर्थ्याल्लभ्यो विवृण्वतेति । **कश्चासौ** तृतीय इत्यविज्ञातक्रमसन्निवेशस्य नामग्राहमाचष्टे—**ज्योतिष्क इति ॥ २ ॥**

ते च निकाया यथासङ्ख्यं भवनपतिव्यन्तरज्योतिष्कवैमानिकाख्याः ।

सूत्रम्—दशाष्टपञ्चद्वादशविकल्पाः कल्पोपपन्नपर्यन्ताः ॥ ४—३ ॥

टी०—स्वनिकायापान्तरालभेदनियमः क्रियतेऽमुना योगेन, अमी च दशादयो भेद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वक्ष्यमाणाः भवनपत्यादीनाम्, अधिवासवाची चायं कल्पशब्दः । अन्ते परिगताः पर्यन्ताः, कल्पोपपन्नाः पर्यन्ता येषां त इमे कल्पोपपन्नपर्यन्ताः कल्पाश्च द्वादश वक्ष्यमाणाः सौधर्मादयोऽच्युतपर्यवसानाः, तत्पर्यन्तमेतच्चतुष्टयं भवतीत्यावेदयति, परे तु द्विर्विकल्पाः-ग्रैवेयकवासिनो विजयादिविमानपञ्चकनिवासिनश्च ।

भवनपत्यादि-देवानां भेदविचारः

भा०—ते च देवनिकाया यथासङ्ख्यमेवंविकल्पा भवन्ति । तद्यथा—दशविकल्पा भवनवासिनः असुरादयो वक्ष्यन्ते । अष्टविकल्पा व्यन्तराः किन्नरादयः । पञ्चविकल्पा ज्योतिष्काः सूर्यादयः । द्वादशविकल्पा वैमानिकाः कल्पोपपन्नपर्यन्ताः सौधर्मादिष्वपि[1] ॥ ३ ॥

टी०—ते च देवनिकाया इत्यादि भाष्यं सुज्ञानमेव ॥ ३ ॥

अनुधा दशादिभेदान् प्रत्येकं पुनर्विभित्सुराह—

प्रतिकल्पमिन्द्राद्या भेदाः

सूत्रम्—इन्द्रसामानिकत्रायस्त्रिंश[2]पारिषद्यात्मरक्षलोकपालानीकप्रकीर्णकाभियोग्यकिल्बिषिकाश्चैकशः॥४—४॥

भा०—एकैकशश्चैतेषु देवनिकायेषु देवा दशविधा भवन्ति । तद्यथा—इन्द्राः, सामानिकाः, त्रायस्त्रिंशाः, पारिषद्याः, आत्मरक्षाः, लोकपालाः, अनीकाधिपतयः, अनीकानि, प्रकीर्णकाः, आभियोग्याः, किल्बिषिकाश्चेति । तत्रेन्द्रा भवनवासिव्यन्तरज्योतिष्कविमानाधिपतयः । इन्द्रसमानाः सामानिकाः अमात्यपितृगुरूपाध्यायमहत्तरवत् केवलमिन्द्रत्वहीनाः । त्रायस्त्रिंशाः-मन्त्रिपुरोहितस्थानीयाः । पारिषद्याः--वयस्यस्थानीयाः । आत्मरक्षाः-शिरोरक्षस्थानीयाः । लोकपाला आरक्षि(क्ष)कार्थचरस्थानीयाः । अनीकाधिपतयो-दण्डनायकस्थानीयाः । अनीकानि-अनीकस्थानीयान्येव । प्रकीर्णकाः-पौरजनपदस्थानीयाः । आभियोग्याः-दासस्थानीयाः । किल्बिषाः[3]-अन्तस्थस्थानीया इति ॥ ४ ॥

टी०—एकैकशश्चैतेष्वित्यादि भाष्यम् । दशानामेकैकस्मिन् भेदे एकशो दश दशेन्द्रादयो भवन्ति भेदाः, एवमितरेष्वप्यष्टादिषु । तत्रेन्द्रा इत्यादि । इन्द्राः सामानिकादिभेदानां नवानामधिपतयः परमैश्वर्ययुक्ताः । सामानिकास्त्विन्द्रतुल्या भवन्त्यायुष्कादिभिः, केवलमिन्द्रत्वं सकलकल्पाधिपत्वं नास्ति, शेषं समानम्, अतः समानस्थाने भवाः सामानिकाः समानस्य तदादेश्चेति वचनादौपसङ्ख्यानिकष्ठक् । अन्यस्यानिर्देशादिन्द्रैः सह समानभावः प्रत्यासन्नै(त्ते ?)श्चेति, ते चामात्यपितृगुरूपाध्यायमहत्तरवद्

---

१ 'दिष्विति' इति घ-पाठः । २ '०शत्पा०' इति ग-पाठः । ३ 'किल्बिषिका' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रष्टव्याः, अमा सहार्थे, सह भवन्तीत्यमात्याः-कार्यालोचनसमर्थाः पिता गुरुरुपाध्यायो महत्तरश्च सर्व एते पूजनीयास्तद्वत् तेऽपि सामानिका इति। त्रयस्त्रिंशदेव **त्रायस्त्रिंशाः** स्वार्थेऽण् 'तद्धिताः' (पा० अ० ४,पा० १,सू० ७६) इति बहुवचननिर्देशादनुक्ततद्धितोत्पत्तिर्दृष्टशब्दान्वाख्यानाच्च, एते **मन्त्रिपुरोहितस्थानीयाः**,मन्त्रिणः-राज्यचिन्ताभराधिरूढमानसाः, पुरोहिताः-शान्तिकपौष्टिकाभिचारिककर्मकारिणः। **पारिषद्या वयस्यस्थानीयाः**,परिषदि साधवः पारिषद्याः मित्रसदृशाः। **आत्मरक्षाः शिरोरक्षस्थानीयाः** उद्यतप्रहरणा रौद्राः पृष्ठतोऽवस्थायिनः, अपायाभावात् कल्पनावैयर्थ्यमिति चेत्[1] तद् न स्थितिमात्रपरिपालनात् प्रीतिप्रकर्षहेतुत्वाच्च। **लोकपाला आरक्षकार्थचरस्थानीयाः** स्वविषयसन्धिरक्षणनिरूपिता आरक्षकाः, अर्थचराश्चौरोद्धरणिकराजस्थानीयादयस्तत्सदृशा लोकपालाः। **अनीकाधिपतयो दण्डनायकस्थानीयाः** दण्डनायको विक्षेपाधिपतिः सेनापतिरितियावत्, अनीकान्यनीकान्येव सैन्यानीत्यर्थः, हयगजरथपदातिवाहनस्वरूपाणि प्रतिपत्तव्यानि, सूत्रे चानीकान्येवोपात्तानि सूरिणा, नानीकाधिपतयः, भाष्ये पुनरुपन्यस्तास्तदेतदेकत्वमेवानीकानीकाधिपत्योः परिचिन्त्य विवृतमेवं भाष्यकारेण, अन्यथा वा दशसङ्ख्या भिद्येत। **प्रकीर्णकाः पौरजनपदस्थानीयाः** प्रकृतिसदृशा इत्यर्थः। **आभियोग्या दासस्थानीयाः** आभिमुख्येन योगोऽभियोगः-परारिराधयिषयाभिमुखीकृतकर्मविशेषः, अभियोगकर्म आभियोग्यं तद् येषां विद्यते ते भवन्त्याभियोग्याः-कर्मकरस्थानीयाः। **अन्तस्थस्थानीयाः किल्बिषिका** इति अन्तस्थाः-चण्डालादयस्तद्वत् किल्बिषिका देवानां मध्य इति ॥ ४ ॥

चतुर्ष्वपि निकायेषु दशविधेन्द्रादिभेदप्रसक्ताविदमपोद्यते[2]।

सूत्रम्—त्रायस्त्रिंश[3]लोकपालवर्जा व्यन्तरज्योतिष्काः ॥ ४–५ ॥

भा०—व्यन्तरज्योतिष्काश्चाष्टविधा भवन्ति, त्रायस्त्रिंशलोकपालवर्जा इति ॥ ५ ॥

टी०—न यथासङ्ख्यमत्र प्रतिपत्तव्यम्, अनन्तरसूत्रे त्वेकशो ग्रहणाद्, अतो व्यन्तराणां त्रायस्त्रिंशा लोकपालाश्च न सम्भवन्ति ज्योतिष्काणां चेत्यतोऽष्टप्रकारा एव ॥ ५ ॥

अथ य एते विकल्पा दशादयश्चतुर्षु निकायेषूक्तास्तत्र किमेकैक इन्द्र उतान्यथेत्यत आह–**पूर्वयोर्द्वीन्द्राः**। अथवा निकायपारमैश्वर्याच्चतुरिन्द्रप्रसङ्गे सतीदमुच्यते—

सूत्रम्—पूर्वयोर्द्वीन्द्राः ॥ ४–६ ॥

भा०—पूर्वयोर्देवनिकाययोर्भवनवासिव्यन्तरयोर्देवाविकल्पानां द्वौ द्वाविन्द्रौ भवतः। तद्यथा–भवनवासिषु तावद् द्वावसुरकुमाराणां इन्द्रौ भवतः–चमरो

---

१ 'चेत् न' इति क-पाठः। २ 'मापाद्यते' इति क–पाठः। ३ '०शल्लोक०' इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बलिश्च । नागकुमाराणां धरणो भूतानन्दश्च । विद्युत्कुमाराणां हरिर्हरिसहश्च । सुपर्णकुमाराणां वेणुदेवो वेणुदारी च । अग्निकुमाराणां अग्निशिखोऽग्निमाणवश्च । वातकुमाराणां वेलम्बः प्रभञ्जनश्च । स्तनितकुमाराणा सुघोषो महाघोषश्च । उदधिकुमाराणां जलकान्तो जलप्रभश्च । द्वीपकुमाराणां पूर्णो वसिष्ठश्च । दिक्कुमाराणाममितगतिरमितवाहनश्चेति ॥ व्यन्तरेष्वपि द्वौ किन्नराणामिन्द्रौ-किन्नरः किंपुरुषश्च । किंपुरुषाणां सत्पुरुषो महापुरुषश्चेति । महोरगाणामतिकायो महाकायश्च । गन्धर्वाणां गीतरतिर्गीतयशाश्च । यक्षाणां पूर्णभद्रो माणिभद्रश्च । राक्षसानां भीमो महाभीमश्च । भूतानां प्रतिरूपोऽतिरूपश्च । पिशाचानां कालो महाकालश्चेति ॥ ज्योतिष्काणां तु बहवः सूर्याश्चन्द्रमसश्च ॥ वैमानिकानामेकैक एव । तद्यथा-सौधर्मे शक्रः । ईशाने ईशानः । सनत्कुमारे सनत्कुमार इति । एवं सर्वकल्पेषु स्वकल्पाह्वाः । परतस्त्विन्द्रादयो दश विशेषा न सन्ति । सर्व एव स्वतन्त्रा इति ॥ ६ ॥

भवनपत्यादिदेवानामिन्द्राः

टी०—पूर्वयोर्देवनिकाययोरित्यादि भाष्यम् । दशाष्टसङ्ख्यापरिच्छिन्नौ पूर्वशब्देन भवनपतिव्यन्तरनिकायौ परिगृह्येते, तत्र देवविकल्पानामसुरादीनां किन्नरादीनां च प्रत्येकं द्वौ द्वाविन्द्रौ भवतः, द्वौ द्वाविन्द्रौ एषु विकल्पेषु ते द्वीन्द्राः, पूर्वयोर्निकाययोर्विकल्पा भवन्तीत्यन्तर्णीतवीप्साको बहुव्रीहिः । शेषं सुज्ञानम्, ज्योतिष्काणां त्वित्यादि । इन्द्राधिकारप्रस्तावमुपजीवल्लाँघवार्थमाह—ज्योतिष्कदेवानां सूर्याः शशिनश्चेन्द्राः, ते च बहवोऽसङ्ख्येयद्वीपसमुद्रवर्तित्वात् । वैमानिकानां सौधर्मादिष्वेकैक इन्द्रः, सौधर्मे शक्रः ऐशाने ईशानः, सनत्कुमारे सनत्कुमारः, इत्येवं सर्वविमानेषु सर्वकल्पमध्यवर्तिषु स्वकल्पाह्वा इन्द्रा भवन्ति । माहेन्द्रे माहेन्द्रः, ब्रह्मलोके ब्रह्म, लान्तके लान्तकः, महाशुक्रे महाशुक्रः, सहस्रारे सहस्रारः, आनतप्राणतयोर्द्वयोरप्येक एवेन्द्रः प्राणताभिधानः, आरणाच्युतयोर्द्वयोरपि कल्पयोरेक एवेन्द्रः अच्युतः, अच्युतकल्पात् परत इन्द्रादयो विकल्पा ग्रैवेयकेषु विजयादिषु च न भवन्ति । सर्व एव हि ते स्वतन्त्रत्वादहमिन्द्रा गमनागमनरहिताश्च प्राय इति ॥ ६ ॥

वैमानिकानां कल्पाः

अनयोस्तु खलु निर्ज्ञातदेवेन्द्रयोरुत्तरत्र देवनिकाययोर्लेश्याभिधाने ग्रहणं पुनर्मा कार्यमित्यतः पूर्वयोरित्यधिकृत्याह—

सूत्रम्—पीतान्तलेश्याः ॥ ४-७ ॥

भा०—पूर्वयोर्निकाययोर्देवानां पीतान्ताश्चतस्रो लेश्या भवन्ति ॥ ७ ॥

---

१ 'जलभवश्च' इति क-पाठः । २ 'अवशिष्टश्च' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—पूर्वयोरित्यादि भाष्यम् । शास्त्रीयमानुपूर्व्यमाश्रित्य निर्देशः, पीता अन्ते यासां लेश्यानां ताः पीतान्ताः—कृष्णनीलकापोततैजस्यः, पीतान्ता लेश्या येषां ते पीतान्तलेश्याः, पूर्वयोर्निकाययोर्देवा भवन्ति, शरीरवर्णमात्रत्वाद्[1] द्रव्यलेश्या एताः, भावलेश्यास्तु षडपि भवेयुरिति ॥ ७ ॥

देवानां त्रैविध्यम्

एते च पुनः सर्वे त्रिविधा देवा भवन्ति—सदेवीकाः सप्रवीचाराः, अदेवीकाः सप्रवीचाराः, अदेवीका अप्रवीचारा इति । तत्र ये सदेवीकाः सप्रवीचारास्तानधिकृत्येदमुच्यते—

सूत्रम्—कायप्रवीचारा आ ऐशानात् ॥ ४—८ ॥

भा०—भवनवास्यादयो देवा आ ऐशानात् कायप्रवीचारा भवन्ति । कायेन प्रवीचार एषामिति । कायप्रवीचारो नाम मैथुनविषयोपसेवनम् ।

प्रवीचारविचारः

ते हि सङ्क्लिष्टकर्माणो मनुष्यवन्मैथुनसुखमनुप्रलीयमानास्तीव्रानुशयाः कायसङ्क्लेशजं सर्वाङ्गीणं स्पर्शसुखमवाप्य प्रीतिमुपलभन्त इति ॥८॥

टी०—कायः—शरीरं, प्रवीचारो-मैथुनोपसेवा, कायेन प्रवीचार एषामिति कायप्रवीचाराः—पुरुषवन्मैथुनमासेवन्ते भवनवास्यादयः आ ऐशानात्, अभिविधावयमाङ्, न मर्यादायां, यस्माद् भवनवासिव्यन्तरज्योतिष्कसौधर्मैशानकल्पेषु जन्मनोत्पद्यन्ते देव्यः, न परत इति, भाष्यं सुज्ञानमेव ॥ ८ ॥

अथ ये अदेवीकाः सप्रवीचारास्तेषां कथं मैथुनोपसेवेत्याह—

सूत्रम्—शेषाः स्पर्श-रूप-शब्द-मनःप्रवीचारा द्वयोर्द्वयोः ॥ ४—९ ॥

भा०—ऐशानादूर्ध्वं शेषाः कल्पोपपन्ना देवा द्वयोर्द्वयोः कल्पयोः स्पर्शरूपशब्दमनःप्रवीचारा भवन्ति यथासङ्ख्यम् । तद्यथा—सनत्कुमारमाहेन्द्रयोर्देवान् मैथुनसुखप्रेप्सूनुत्पन्नास्थान् विदित्वा देव्य उपतिष्ठन्ते । ताः स्पृष्ट्वैव च ते प्रीतिमुपलभन्ते विनिवृत्तास्थाश्च भवन्ति ॥ तथा ब्रह्मलोकलान्तकयोर्देवान् एवंभूतोत्पन्नास्थान् विदित्वा देव्यो दिव्यानि स्वभावभास्वराणि सर्वाङ्गमनोहराणि शृङ्गारोदाराभिजाताकारविलासान्युज्ज्वलचारुवेषाभरणानि स्वानि रूपाणि दर्शयन्ति । तानि दृष्ट्वैव ते प्रीतिमुपलभन्ते निवृत्तास्थाश्च भवन्ति ॥ तथा महाशुक्रसहस्रारयोर्देवानुत्पन्नप्रवीचारास्थान् विदित्वा देव्यः श्रुतिविषयसुखानत्यन्तमनोहरान् शृङ्गारोदाराभिजातविलासाभिलाषच्छेदतलताला भरणरवमिश्रान् हसितकथितगीतशब्दानुदीरयन्ति । तान् श्रुत्वैव प्रीतिमुपलभन्ते निवृ-

---

१ टीकाकारमतमेतत् यदुत शरीरवर्णरूपा लेश्या, अन्ये तु योगपरिणामो लेश्या, लेश्यापुद्गलास्तु अन्य एवागमेषु निर्दिश्यन्ते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तास्थाश्च भवन्ति ॥ आनतप्राणतारणाच्युतकल्पवासिनो देवाः प्रवीचारायोत्पन्नास्था देवीः संकल्पयन्ति,सङ्कल्पमात्रेणैव च ते परां प्रीतिमुपलभन्ते विनिवृत्तास्थाश्च भवन्ति ॥ एभिश्च प्रवीचारैः(०रादिभिः) परतः परतः प्रीतिप्रकर्षविशेषोऽनुपमगुणो भवति, प्रवीचारिणामल्पसङ्क्लेशत्वात् । स्थितिप्रभावादिभिरधिका इति वक्ष्यते (अ० ४, सू० २१)॥ ९ ॥

टी०—ऐशानादूर्ध्वं शेषा इत्यादि भाष्यम् । सनत्कुमारमाहेन्द्रयोर्देवान् मैथुनप्राप्तीच्छाभिमुखीकृतानुत्पन्नास्थान् प्रादुर्भूतादरानवबुध्य सौधर्मैशानदेव्य उपतिष्ठन्ते, तत्प्रभावादेव परिज्ञाताभिप्रायाः, अपरिगृहीता गणिकास्थानीयाः अप्सरसः, तासां जघन्येन सौधर्मकल्पनिवासिनीनां स्थितिरेकं पल्योपममुत्कर्षेण पञ्चाशत् पल्योपमानि, ऐशाने त्वपरिगृहीतानां जघन्येन सातिरेकं पल्योपममुत्कर्षेण पञ्चपञ्चाशत् पल्योपमानि । तत्र सौधर्मनिवासिनीनामप्सरसां पल्योपमं समयाद्यधिकं स्थितिः यासां यावद् दश पल्योपमानि ताः सनत्कुमारकल्पवासिदेवभोग्या भवन्ति, यासां च सौधर्मे दश पल्योपमानि समयाधिकानि यावद्विंशतिपल्योपमानि स्थितिरप्सरसां ता ब्रह्मलोककल्पवासिदेवभोग्याः,तथा सौधर्म एव यासां स्थितिरप्सरसां विंशतिपल्योपमानि समयाद्यधिकानि यावत्त्रिंशत्पल्योपमानि ता देव्यो शुक्र(कल्प)वासिदेवभोग्याः, तथा सौधर्म एव यासामप्सरसां स्थितिस्त्रिंशत्पल्योपमानि समयाद्यधिकानि यावच्चत्वारिंशत्पल्योपमानि ता देव्य आनतकल्पवासिदेवभोग्याः,तथा सौधर्मे एव यासामप्सरसां स्थितिः चत्वारिंशत्पल्योपमानि समयाद्यधिकानि यावत् पञ्चाशत् ता आरणकल्पवासिदेवोपभोग्याः, ऐशानकल्पे यासां सातिरेकपल्योपमं समयाद्यधिकं स्थितिर्यावत् पञ्चदश पल्योपमानि ता माहेन्द्रकल्पवासिदेवभोग्याः, तथैशान एव यासां पञ्चदश पल्योपमानि स्थितिः समयाद्यधिकानि यावत् पञ्चविंशतिपल्योपमानि ता लान्तककल्पवासिदेवभोग्याः, अस्मिन्नेवैशाने यासां पञ्चविंशतिः पल्योपमानि समयाद्यधिकानि स्थितिः यावत् पञ्चविंशतिपल्योपमानि ताः सहस्रारकल्पवासिनां भोग्याः, तथैशान एव यासां पञ्चत्रिंशत् पल्योपमानि समयाद्यधिकानि यावत् पञ्चचत्वारिंशत्पल्योपमानि स्थितिस्ताः प्राणतकल्पवासिदेवोपभोग्याः, तस्मिन्नेवैशाने यासां स्थितिः पञ्चचत्वारिंशत्पल्योपमानि समयाद्यधिकानि यावत् पञ्चपञ्चाशत्पल्योपमानि ता देव्योऽच्युतकल्पवासिदेवोपभोग्या भवन्ति । यासां पल्योपमं स्थितिर्देवीनां समयाद्यधिकं यावत् सप्त पल्योपमानि ताः सौधर्मकल्पवासिनां परिग्रहः, ऐशानकल्पे तु यासां सातिरेकं पल्योपमं समयाद्यधिकं स्थितिर्यावन्नव पल्योपमानि तास्तन्निवासिदेवपरिग्रह इति । अत्र चापरिगृहीता वेश्यास्थानीया अधस्तनकल्पद्वयोत्पन्ना अपि उपरितनकल्पान् गच्छन्ति तद्देवप्रभावादेवेति ॥

देवीभोगाधिकारः

---

१ ' शुक्रदेवभोग्याः ' इति क-पाठः, ' महाशुक्रवासि० ' इति तु ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एभिश्च प्रवीचारादिभिरित्यादि । स्पर्शादिभिः सूत्रोपन्यस्तैरुपरिष्टात् परिहसद्भिरल्पसङ्क्लेशत्वाच्चेतसोऽनुपमः प्रीतिप्रकर्ष उपजायते, इदं हि कायादिकर्म सङ्क्लिष्टचित्तत्वाद् दुःखमावहति, यथाऽऽह—

" नग्नः प्रेत इवाविष्टः कणन्तीमुपगृह्य ताम् ।
क्लेशायासितसर्वाङ्गः, सुमुखीं रमते किल ॥ "

स्थित्यादिभिरेवोपरिष्टाद् वक्ष्यन्तेऽधिका देवाः, चित्तक्लेशेन तु परिहीयमानस्वभावा भवन्त्युपर्युपरीति । अत्र च पुनः प्रवीचारग्रहणमुत्तरसूत्रे किल विस्पष्टार्थमाश्रितं, अन्यथा तुल्यत्वात् संहितयोः सन्देहः स्यादिति ॥ ९ ॥

अदेवीकाश्चाप्रवीचाराश्चाधुनाऽभिधीयन्ते—

सूत्रम्—परे अप्रवीचाराः ॥ ४—१० ॥

कल्पातीतानामप्रवीचारत्वम्

भा०—कल्पोपपन्नेभ्यः परे देवा अप्रवीचारा भवन्ति, अल्पसङ्क्लेशत्वात् । स्वस्थाः शीतीभूताः । पञ्चविधप्रवीचारोद्भवादपि प्रीतिविशेषादपरिमितगुणप्रीतिप्रकर्षाः परमसुखतृप्ता एव भवन्ति ॥

टी०—परे अप्रवीचाराः,अविद्यमानप्रवीचाराः अप्रवीचाराः,कल्पोपपन्नेभ्यः परे ये देवा ग्रैवेयकवासिनोऽनुत्तरविमानवासिनश्चाप्रवीचारा भवन्ति, अल्पसङ्क्लेशत्वाद्धेतोरन्तः शुद्धत्वात् च, ते स्वसमाधिजमेव सुखमुपभुञ्जते, अधिकतरं चैषां तद् भवत्यल्पमोहत्वात् कायक्लेशरहितम्,स्वस्थाः प्रतनुकमोहनीयकर्मपटलानुरञ्जितस्वरूपत्वात् मन्ददेवाग्नित्वाच्छीतीभूताः, पञ्चविधाः प्रवीचारा-रूपरसगन्धस्पर्शशब्दाः प्रवीचारहेतवो मनोहराः कारणे कार्योपचाराध्यारोपादुक्ताः तत्समुदायजादपि सुखविशेषादपरिमितगुणप्रीतिप्रकर्षा बहुगुणप्रीतिप्रकर्षयुजः परमसुखतृप्ता एव भवन्ति । दुर्लभं हि तादृक् संसारे सुखमन्यनिवासेषु शब्दादिविषयनिरपेक्षत्वात् सहजम्, अतस्तेन जन्मप्रभृत्या स्थितिक्षयात् सततमेव तृप्तास्त इति । न परे इति सूत्रे कर्तव्ये यदाचार्येण पुनरप्रवीचारग्रहणमकारि तज्ज्ञापनार्थमस्यार्थस्य—अल्पः सङ्क्लेशस्तेषु, न बहुरिति । सूत्रत्रये यत् प्रवीचारग्रहणं अप्रवीचारग्रहणं च तज्ज्ञापनायामुष्यार्थस्य संसारः किल प्रवीचारसमुद्भव इति । सामान्याभिधाननिकायविकल्पसङ्ख्याविधिरुक्तः पुरस्तात्, तेषां विशेषसंज्ञानिकायविकल्पान् प्रति व्याचिख्यासुरनियमप्रसङ्गे पौरस्त्यनिकायविकल्पसंज्ञानिर्देशार्थमिदमवोचत्—भवनवासिनोऽसुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः (सू० ११) । तत्र—

---

१ ' शीतभूताः ' इति क-ख-पाठः । २ सूत्रत्रये प्रथमे तावत् कायप्रवीचारशब्दो रूढस्तादृशे मैथुने यादृशं नरतिरश्चामिति स उपात्तः, द्वितीये स्पर्शादिमात्रमेव प्रवीचारतया न विवक्षितं, किन्तु स्पर्शादिविशेषा इति ज्ञापनाय स्पर्शप्रवीचारा इत्यादि प्रतिपादितं, तृतीये तु यदि न परे इत्येवोच्येत तर्हि न ते स्पर्शादिभिः प्रवीचारका इत्येवार्थो गम्येत, परं सर्वथा भावो न ज्ञायेत इष्टं च तज्ज्ञापयितुमिति अप्रवीचारा इति सर्वथा प्रवीचारनिषेधं चक्रुः सूक्ष्मधियो वाचका इति । ३ 'विकल्पौ प्रति' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—अत्राह-उक्तं भवता—'देवाश्चतुर्निकायाः' (अ० ४, सू० १), 'दशाष्टपञ्चद्वादशविकल्पाः' (अ० ४, सू० ३) इति, तत् के निकायाः के चैषां विकल्पा इति ? । अत्रोच्यते-चत्वारो देवनिकायाः । तद्यथा-भवनवासिनो व्यन्तरा ज्योतिष्का वैमानिका इति ॥ १० ॥ तत्र-

टी०—अत्राह-उक्तं भवतेत्यादिपातनिकाग्रन्थः । देवाश्चतुर्निकाया इत्युक्तमध्यायादौ, तथा दशादिभेदाश्चाधीताः, तदेतन्निर्दिश्यतामञ्जसा के पुनस्ते निकायाः के चैषां निकायानां दशादयो विकल्पा इति ? । अत्रोच्यते-चत्वारस्तावन्निकायाः-भवनवासिनो व्यन्तरा ज्योतिष्का वैमानिका इति ॥ १० ॥

तत्र तेषु चतुर्षु निकायेषु भवनवासिनामेव तावद् भेदप्रतिपादनं क्रियते, तत्र-

सूत्रम्-भवनवासिनोऽसुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः ॥ ४-११ ॥

भा०-प्रथमो देवनिकायो भवनवासिनः । इमानि चैषां विधानानि भवन्ति । तद्यथा-असुरकुमाराः, नागकुमाराः, विद्युत्कुमाराः, सुपर्णकुमाराः, अग्निकुमाराः, वातकुमाराः, स्तनितकुमाराः, उदधिकुमाराः, द्वीपकुमाराः, दिक्कुमारा इति ।

भवनवासिनां विधानानि

टी०-भूमिष्ठत्वात् भवनानि, तेषु वस्तुं शीलं येषां ते भवनवासिनः, प्रथमो निकायोऽसुरादयो भेदाः । तत्कुमारशब्दः प्रत्येकमभिसम्बध्यते । कः पुनः कुमारशब्दार्थ इत्याह-

भा०-कुमारवदेते कान्तदर्शना असुरकुमारा[1] मृदुमधुरललितगतयः शृङ्गाराभिजातरूपविक्रियाः कुमारवच्चोद्धतरूपवेषभाषाभरणप्रहरणावरणपातयानवाहनाः कुमारवच्चोल्बणरागाः क्रीडनपराश्चेत्यतः कुमारा इत्युच्यन्ते । असुरकुमारावासेष्वसुरकुमाराः प्रतिवसन्ति, शेषास्तु भवनेषु ॥

टी०-कुमारवदेते कान्तदर्शना इति सुज्ञानम् । असुरकुमारावासेष्वसुरकुमाराः प्रतिवसन्ति, आवासाः कायमानस्थानीया महामण्डपा नानारत्नप्रभासितोल्लोचाः, तेषु तादृशेषु भूयसा वसन्त्यसुरकुमाराः कदाचित् भवनेष्वपीति । शेषास्तु नागादयो भवनेष्वेव प्रायो वसन्ति, नावासेष्विति । तानि च भवनानि बहिर्वृत्तान्यन्तश्चतुरस्राण्यधः पुष्करकर्णिकासंस्थानानि ॥ क्व पुनस्ते आवासा भवनानि चेत्याह-

भा०-महामन्दरस्य दक्षिणोत्तरयोर्दिग्विभागयोर्बहुषु योजनशतसहस्र-

---

१ 'सुकुमारा' इति घ-पाठः । २ 'प्रहरणचरणपातवाहनाः' इति क-पाठः, 'प्रहरणावरणयानवाहनाः' इति तु घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोटीकोटीषु आवासाः । भवनानि च दक्षिणार्धाधिपतीनामुत्तरार्धाधिपतीनां च यथास्वं भवन्ति ।

टी०—महामन्दरस्येत्यादि । धातकीखण्डादिमन्दरव्यावृत्त्यर्थं महामन्दरग्रहणम्, चिह्नमात्रं महामन्दरग्रहणमत्र, योजनसहस्रमात्रावगाहित्वात्, तस्य दक्षिणस्यां दिशि तिर्यग्ब्रह्मीषु योजनलक्षकोटीनां कोटीषु भवन्त्यावासाः, भवनानि च दक्षिणार्धाधिपतीनां चमरादीनामुत्तरार्धाधिपतीनां च बलिप्रभृतीनां यथायथमसुरादीनां इति । आर्षे तु रत्नप्रभाया बाहल्यात् सहस्रमुपर्यधश्च सन्त्यज्य मध्येऽष्टसप्ततिसहस्राधिकलक्षायां कुसुमप्रकरवत् प्रकीर्णानि भवनानि सर्वत्र ॥ भाष्यकाराभिप्रायस्तु—

भा०—तत्र भवनानि रत्नप्रभायां बाहल्यार्धमवगाह्य[2] मध्ये[3], भवनेषु वसन्तीति भवनवासिनः । भवप्रत्ययाश्चैषामिमा नामकर्मनियमात् स्वजातिविशेषनियता विक्रिया भवन्ति । तद्यथा—गम्भीराः श्रीमन्तः काला महाकाया रत्नोत्कटमुकुटभास्वराश्चूडामणिचिह्ना असुरकुमारा भवन्ति । शिरोमुखेष्वधिकप्रतिरूपाः कृष्णाः श्यामा मृदुललितगतयः शिरस्सु फणिचिह्ना नागकुमाराः । स्निग्धा भ्राजिष्णवोऽवदाता वज्रचिह्ना विद्युत्कुमाराः । अधिकप्रतिरूपग्रीवोरस्काः[4] श्यामावदाता गरुडचिह्नाः सुपर्णकुमाराः । मानोन्मानप्रमाणयुक्ता भास्वन्तोऽवदाताः[5] घटचिह्नाः अग्निकुमारा भवन्ति । स्थिरपीनवृत्तगात्रा निम्नोदराः[6] अश्वचिह्ना अवदाता वातकुमाराः । स्निग्धाः स्निग्धगम्भीरानुनादमहास्वनाः कृष्णा वर्धमानचिह्नाः स्तनितकुमाराः । उरुकटिष्वधिकप्रतिरूपाः कृष्णश्यामा मकरचिह्ना उदधिकुमाराः । उरःस्कन्धबाहूवग्रहस्तेष्वधिकप्रतिरूपाः श्यामावदाताः सिंहचिह्ना द्वीपकुमाराः । जङ्घाग्रपादेष्वधिकप्रतिरूपाः श्यामा हस्तिचिह्ना दिक्कुमाराः । सर्वेऽपि च विविधवस्त्राभरणा भवन्तीति ॥ ११ ॥

टी०—तत्र भवनानीत्यादि भाष्यम् । रत्नप्रभायां बाहल्यार्धमवगाह्य मध्ये भवनानि भवन्ति, तस्मिन्नेव स्थाने नवतिसहस्राण्यधोऽवगाह्य, आवासास्तु सहस्रद्वयपरिवर्जितायां रत्नप्रभायां सर्वत्रेत्यभिप्रायः । भवप्रत्ययाश्चैषामिमा नामकर्मनियमात् स्वजातिविशेषनियता विक्रिया भवन्ति । भवहेतुकास्ता जन्मतपोनुष्ठाननिरपेक्षा विक्रियाः सम्भवन्ति । नामकर्मनियमाच्च स्वजातिविशेषनियता विक्रिया भवन्ति । अङ्गोपाङ्गनामकर्मो-

असुरकुमारादीनां वर्णनम्

---

१ नावासानां स्थितौ क्रमः कोऽपि असुरादीनां यथा भवनेषु तेषामिति । २ "अर्धः खण्डेऽर्धे समांशे" इत्यनेकार्थोक्तेः तुल्यभागेऽर्ध इति अर्धसुदर्शनदेवनमिति च लिङ्गानुशासन[1]क्तेश्चे खण्डार्थोऽर्धोऽत्र । ३ 'मध्ये भवन्ति' इति घ-पाठः । ४ 'अधिकरूप' इति क-घ-पाठः । ५ 'भास्वतः' इति ग-पाठः । ६ 'निम्नोदरा' इति ग-घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दयान्निर्माणनामकर्मोदयाद् वर्णादिनामोदयाच्च प्रतिजातिविशेषकारिण्यो विक्रिया जायन्ते। गम्भीरा घनशरीराः श्रीमन्तः सर्वाङ्गोपाङ्गसुन्दराः कृष्णवर्णा महाशरीरा इत्येतत् सर्वं नामकर्मोदयजनितमेषामसुराणाम्, एवं नागादीनामपि योजनीयं स्वजातिविशेषनियतवचनात्, शेषं भाष्यमेव सुज्ञानम्। एषां च भवनसङ्ख्या सामान्यतः सप्त कोट्यः सप्ततिर्लक्षा लक्षद्वयाधिकाः, विशेषेण तु दक्षिणदिग्व्यवस्थितासुराणां चतुस्त्रिंशत् लक्षाः, उत्तरदिग्भाजां त्रिंशदेकत्र चतुष्षष्टिः,

भवनसङ्ख्या

दक्षिणदिग्नागानां चतुश्चत्वारिंशदुत्तरदिग्नागानां चत्वारिंशदेकत्र चतुरशीतिः, दक्षिणविद्युत्कुमाराणां चत्वारिंशदुत्तरवासिनां षट्त्रिंशदेकत्र षट्सप्ततिः। एषैव सङ्ख्या दक्षिणोत्तरभिन्नानामग्निस्तनितोदधिद्वीपदिक्कुमाराणामिति, दक्षिणसुपर्णानामष्टात्रिंशदुत्तरनिवासिनां चतुस्त्रिंशदेकत्र सप्ततिर्द्वयुत्तरेति। दक्षिणमरुतां पञ्चाशदुत्तरवासिनां षट्चत्वारिंशदेकत्र षण्णवतिः। लक्षाः सर्वत्र सम्बन्धनीया इति ॥ ११ ॥

अधुना भवनचरनिलयानन्तरदेवनिकायोद्देशभाजो येऽष्टविधास्तेऽभिधीयन्ते—

व्यन्तर-भेदाः

सूत्रम्—व्यन्तराः किन्नर-किंपुरुष-महोरग-गान्धर्व-यक्ष-राक्षस-भूत-पिशाचाः ॥ ४—१२ ॥

भा०—अष्टविधो द्वितीयो देवनिकायः। एतानि चास्य विधानानि भवन्ति। अधस्तिर्यगूर्ध्वं च त्रिष्वपि लोकेषु भवनेनगरेषु आवासेषु च प्रतिवसन्ति।

टी०—अथ किमर्थं व्यन्तरा उच्यन्ते, तत्र भाष्यमधस्तिर्यगूर्ध्वं चेत्यादि। रत्नप्र-

व्यन्तरशब्दार्थः

भारत्नकाण्डे योजनशतद्वयवर्जितेऽष्टासु योजनशतेषूत्पन्नाः सन्तस्त्रिलोक्यां स्वभवनेषु स्वनगरेषु स्वावासेषु च प्रतिवसन्ति बालवत् स्वभावानवस्थानात्, अतो विविधमन्तरम्—आवसनमेषामिति व्यन्तराः। एतदेव स्पष्टयति भाष्यकारः—

भा०—यस्माच्चाधस्तिर्यगूर्ध्वं च त्रीनपि लोकान् स्पृशन्तः स्वातन्त्र्यात् पराभियोगाच्च प्रायेण प्रतिपतन्त्यनियतगतिप्रचाराः, मनुष्यानपि केचिद् भृत्यवदुपचरन्ति। विविधेषु च शैलकन्दरान्तरवनविवरादिषु प्रतिवसन्ति, अतो व्यन्तरा इत्युच्यन्ते ॥

तत्र किन्नरा दशविधाः। तद्यथा—किंपुरुषाः किंपुरुषोत्तमाः किन्नराः किन्नरोत्तमा हृदयङ्गमा रूपशालिनोऽनिन्दिता मनोरमा रतिप्रिया रतिश्रेष्ठा इति ॥ किंपुरुषा दशविधाः। तद्यथा—पुरुषाः सत्पुरुषाः महापुरुषाः पुरुषवृषभाः पुरुषोत्तमाः अतिपुरुषोत्तमाः

किंपुरुषादिभेदाः

---

१ भूमिष्ठानि नगराणि भवननगराणि, यद्वा भवनानि भूमिष्ठानि नगराणि प्राकारादिविशेषरचनावन्ति तिर्यक् आवासा यथार्हं सर्वत्र योग्यस्थाने। २ 'अतिपुरुषाः' इति घ-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मरुदेवाः मरुतो मरुत्प्रभा यशस्वन्त इति ॥ महोरगा दशविधाः । तद्यथा—भुजगा भोगशालिनो महाकायाः अतिकायाः स्कन्धशालिनो मनोरमा महावेगा महेष्वक्षाः मेरुकान्ताः भास्वन्त इति ॥ गान्धर्वा द्वादशविधाः । तद्यथा—हाहा हूहू तुम्बुरवो नारदा ऋषिवादका भूतवादिकाः कादम्बा महाकादम्बा रैवता विश्वावसवो गीतरतयो गीतयशस इति ॥ यक्षास्त्रयोदशविधाः । तद्यथा—पूर्णभद्राः माणिभद्राः श्वेतभद्राः हरिभद्राः सुमनोभद्राः व्यतिपातिकभद्राः सुभद्राः सर्वतोभद्राः मनुष्ययक्षा वनाधिपतयो वनाहारा रूपयक्षा यक्षोत्तमा इति ॥ सप्तविधा राक्षसाः । तद्यथा–भीमा महाभीमा विघ्ना विनायका जलराक्षसा राक्षसराक्षसा ब्रह्मराक्षसाः ॥ भूता नवविधाः । तद्यथा—सुरूपाः प्रतिरूपाः अतिरूपाः भूतोत्तमाः स्कन्दिकाः महास्कन्दिकाः महावेगाः प्रतिच्छन्ना आकाशगा इति ॥ पिशाचाः पञ्चदशविधाः । तद्यथा–कूष्माण्ड[1]: पटका जोषा आह्नकाः कालाः महाकालाश्चौक्षा[2] अचौक्षाः तालपिशाचा मुखरपिशाचा अधस्तारका देहा महाविदेहाः तूष्णीका वनपिशाचा इति ॥

किन्नरादीनां वर्णनम्

तत्र किन्नराः प्रियङ्गुश्यामाः सौम्याः सौम्यदर्शना मुखेष्वधिकरूपशोभा मुकुटमौलिभूषणा अशोकवृक्षध्वजा अवदाताः ॥ किंपुरुषा ऊरुबाहुष्वधिकशोभा मुखेष्वधिकभास्वरा विविधाभरणभूषणाश्चित्रस्रगनुलेपनाश्चम्पकवृक्षध्वजाः ॥ महोरगाः श्यामावदाता महावेगाः सौम्याः सौम्यदर्शना महाकायाः पृथुपीनस्कन्धग्रीवा विविधविलेपना[3] विचित्राभरणभूषणा नागवृक्षध्वजाः॥गान्धर्वा रक्तावदाता गम्भीराः प्रियदर्शनाः सुरूपाः सुमुखाकाराः सुस्वरा मौलिधरा हारविभूषणाः तुम्बरुवृक्षध्वजाः ॥ यक्षाः श्यामावदाता गम्भीरास्तुन्दिला वृन्दारकाः प्रियदर्शना मानोन्मानप्रमाणयुक्ता रक्तपाणिपादतलनखतालुजिह्वोष्ठा भास्वरमुकुटधरा नानारत्नविभूषणा वटवृक्षध्वजाः ॥ राक्षसा अवदाता भीमा भीमदर्शनाः शिरःकराला रक्तलम्बौष्ठाः तपनीयविभूषणा नानाभक्तिविलेपनाः खट्वाङ्गध्वजाः ॥ भूताः श्यामाः सुरूपाः सौम्या आपीवरा नानाभक्तिविलेपनाः सुलसध्वजाः कालाः ॥ पिशाचाः स्वरूपाः[3] सौम्यदर्शना हस्तग्रीवासु मणिरत्नविभूषणाः कदम्बवृक्षध्वजाः ॥ इत्येवंप्रकारस्वभावानि वैक्रियाणि रूपचिह्नानि व्यन्तराणां भवन्तीति ॥ १२ ॥ तृतीयो देवनिकायः ।

टी०—यस्माच्चाधस्तिर्यगूर्ध्वं चेत्यादि भाष्यम् । स्वातन्त्र्यात्–स्वेच्छया, पराभियोगाच्च शक्रादिदेवेन्द्राज्ञया चक्रवर्त्यादिपुरुषाज्ञया वा प्रायोऽनियतगतिप्रचारा भव-

१ ' वैक्षाः ' इति क-पाठः , 'चौक्षाः ' इति तु घ-पाठः २ ' धातुविले० ' इति घ-पाठः । ३ ' सुरूपाः इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्तीति । तथा मनुष्यानपि केचिद् भृत्यवदुपचरन्ति चक्रधरादीनतो विगतान्तरा मनुष्येभ्योऽविशिष्टाः केचिद् व्यन्तराः। विविधेषु वा शैलकन्दरान्तरादिषु प्रतिवसन्ति तिर्यग्लोक इति व्यन्तराः, निकायद्वयान्तरस्थायित्वाद् व्यन्तराः प्रसिद्धत्वाद्, गोसंज्ञावदिति । रत्नप्रभायां त्वेषां तिर्यगसंख्येयानि भवनानि भवन्ति यथोद्दिष्टावगाहलक्षणक्रमाद् दक्षिणोत्तरदिग्भेदावस्थायिनोऽष्टास्वपि भेदेषु वक्तव्याः । भेदाश्चैषां किन्नरादीनां स्वस्थाने भाष्यकृता बहवो निदर्शितास्ते चार्षे सूचिता लेशतो न प्रतिपदमधीताः । शेषं पठितसिद्धमिति ॥ १२ ॥

अधुना तृतीयो देवनिकायोऽवसरप्राप्त उच्यते–

सूत्रम्----ज्योतिष्काः--सूर्याश्चन्द्रमसो ग्रहनक्षत्रप्रकीर्णतारकाश्च ॥४--१३॥

भा०—ज्योतिष्काः पञ्चविधा भवन्ति । तद्यथा—सूर्याश्चन्द्रमसो ग्रहा नक्षत्राणि प्रकीर्णतारका इति पञ्चविधा ज्योतिष्का इति। असमासकरणमार्षाच्च सूर्यचन्द्रमसोः क्रमभेदः कृतः, यथा गम्येत एतदेवैषामूर्ध्वनिवेशे आनुपूर्व्यमिति । तद्यथा—सर्वाधस्तात् सूर्यास्ततश्चन्द्रमसस्ततो ग्रहास्ततो नक्षत्राणि ततो विप्रकीर्णतारा: । ताराग्रहास्त्वनियतचारित्वात् सूर्यचन्द्रमसामूर्ध्वमधश्च चरन्ति, सूर्येभ्यो दशयोजनावलम्बिनो भवन्तीति । समाद् भूमिभागादष्टासु योजनशतेषु सूर्याः, ततो योजनानामशीत्यां चन्द्रमसः, ततो विंशत्यां तारा इति । द्योतयन्त इति ज्योतींषि-विमानानि तेषु भवा ज्योतिष्काः ज्योतिषो वा देवा ज्योतिरेव वा ज्योतिष्काः । मुकुटेषु शिरोमुकुटोपगूहिभिः प्रभामण्डलकल्पैरुज्ज्वलैः सूर्यचन्द्रतारामण्डलैर्यथास्वं चिह्नैर्विराजमाना द्युतिमन्तो ज्योतिष्का भवन्तीति ॥ १३ ॥

ज्योतिष्कभेदाः

टी०—ज्योतिष्काः पञ्चविधा भवन्तीत्यादि भाष्यम् । असमासकरणे पारमर्षप्रवचनक्रमभेदे च प्रयोजनमाह—असमासकरणात् तावत् तिर्यङ्मण्डलिकयाऽवस्थानं निषिध्यते, उपर्युपर्यवस्थानं कथं नाम गम्येत ? क्रमभेदोऽप्यमुनैव क्रमेणोर्ध्वमेषां सन्निवेश इत्यनेनाभिप्रायेण, आर्षे तु प्राक् चन्द्रः पठ्यते पश्चात् सूर्य इति । न चैवमुपरि सन्निवेशः । तत्र समतलाद् भूमिभागादारुह्योपरि सप्त योजनशतानि नवत्यधिकानि प्रथमो ज्योतिष्कविमानप्रस्तारः, तदुपरि दशयोजनशतान्यारुह्य भानोर्विमानप्रस्तारः, तदुपर्यशीतियोजनान्यारुह्य चन्द्रमसो विमानप्रस्तारः, तदुपरि विंशतियोजनान्यारुह्य ताराग्रहाणां विमानप्रस्तारः, एवमयं ज्योतिर्लोको दशोत्तरयोजनशतबहुल एकादश-

ज्योतिष्काणां विमानप्रस्तारः

१ ' द्योतींषि ' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिर्योजनशतैरेकविंशत्युत्तरैर्जम्बूद्वीपकमेरुमस्पृशन् सर्वासु दिक्षु मण्डलिकया व्यवस्थितः, लोकान्तं चैकादशभिरेव योजनशतैरेकादशोत्तररस्पृशन् सर्वतोऽवगन्तव्यः, ताराग्रहास्त्वनियतचारित्वादित्यादि । अनियता चैषां गतिरुर्ध्वमधस्तिर्यक् चेत्यतोऽधस्तात् तावल्लम्बन्तेऽङ्गारकादयो यावत् सूर्याद् दश योजनानि भवन्त्यनवस्थितचारित्वात्, एवं चाधस्ताद् दशयोजनावलम्बकसंयोगादष्टासु योजनशतेषु सूर्य इति । अत्र च सर्वोपरि किल स्वातिनक्षत्रं, नक्षत्रमण्डलिकायाः सर्वाधस्ताद् भरण्यः, सर्वदक्षिणतो मूलः, सर्वोत्तरतश्चाभीचिरिति । द्योतयन्त इति ज्योतींषि-विमानानीत्यादि । अत्यन्तप्रकाशकारित्वाज्ज्योतिःशब्दाभिधेयानि विमानानि तेषु विमानेषु भवा ये देवास्ते ज्योतिष्काः । द्व्यष्टगादिसूत्रात् टक् । अपरे ब्रुवते- भाष्यकृता सवृद्धिकः शब्दो नोच्चरित इत्यतः परिहारो वृद्धेः प्राप्ताया वक्तव्यः, स चायम्-एकानुबन्धकृतस्यानित्यत्वाद् दंष्ट्राशब्दे ङीप्प्रत्ययाभाववद् वृद्ध्यभावः॥ज्योतिषो वा देवाः, विमानगतज्योतिषः सम्बन्धिनो देवाः तेन दीव्यन्ति, वपुःसम्बन्धिना वा ज्योतिषा ज्वलन्तीति ज्योतिष्काः, ज्योतिरेव वा भास्वरशरीरत्वात् समस्तदिग्मण्डलद्योतनत्वादतः स्वार्थे कन् । ज्योतिष्काः । मुकुटेष्वित्यादि । मुकुटेषु चिह्नानि भवन्ति-शिरोमुकुटोपगूहीनि प्रभामण्डलस्थानीयान्युज्ज्वलानि सूर्यादीनि, सूर्यस्य सूर्याकारं चिह्नम्, एवं चन्द्रादीनामपीति ॥ १३ ॥

त एते पञ्चविधा अपि ज्योतिष्काः—

सूत्रम्—मेरुप्रदक्षिणा नित्यगतयो नृलोके ॥ ४-१४ ॥

भा०-मानुषोत्तरपर्यन्तो मनुष्यलोक इत्युक्तम् (अ० ३, सू० १४), तस्मिन् ज्योतिष्का मेरुप्रदक्षिणा नित्यगतयः भवन्ति, मेरोः प्रदक्षिणा नित्या गतिरेषामिति मेरुप्रदक्षिणानित्यगतयः । एकादशसु एकविंशेषु योजनशतेषु मेरोश्चतुर्दिशं प्रदक्षिणं चरन्ति ।

ज्योतिष्काणां गतिः

टी०-मानुषोत्तरपर्यन्त इत्यादि भाष्यम्, उक्तलक्षणो मानुषोत्तरगिरिः स पर्यन्तः-अवसानं यस्यासौ मानुषोत्तरपर्यन्तो मनुष्यलोको विष्कम्भायामाभ्यां पञ्चचत्वारिंशल्लक्षप्रमाणस्तस्मिन्नेते ज्योतिष्काः सूर्यादयो मेरुप्रदक्षिणा नित्यगतयो भवन्ति । मेरोः प्रदक्षिणा मेरुप्रदक्षिणा नापसव्येति कथयति,नित्यशब्दोऽभीक्ष्णवचनः । नित्या गतिरेषामिति नित्यगतयोऽनवरतभ्रमणा इत्यर्थः । नित्यग्रहणाद् गतेरुपरमाभावं प्रतिपादयति, साऽपि गतिः

---

१ 'एकोनविंशत्यु' इति ग-पाठः । यद्यपि सर्वेष्वादर्शेषु एकोनविंशतीत्यादिक एव पाठस्तथापि एकादशस्वेकविंशेषु इत्याद्युत्तरभाष्यात् इकारसजोयणसय इगवीसिक्कारेत्यादिवचनप्रामाण्याच्च एकविंशतीत्यादिक एव न्याय्यः' इति ग-टी-पाठः । अयं च जैनानन्दपुस्तकालयप्रतिपाठः । २ 'वमन्तव्यः ' इति ग-पाठः । ३ 'सूत्रात् क्' इति ग-पाठश्चिन्तनीयः । ४ 'भवन्ति' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रादक्षिण्येन नापसव्येन मेरोः, लोकस्थित्यनुभवाद् विमानान्येव नृलोके भ्रमणशीलानि भवन्ति, न पुनरभ्रमन्त्यपि । ये वा प्रेरयन्ति । तानि च पृथिवीकायनिर्माणान्यातपनामकर्मोदयात् स्फटिकमणिप्रकाशानि भ्राजिष्णूनि कपित्थफलार्धसंस्थानानि भवन्ति ॥ ननु च ध्रुवः सर्वदा ध्रुवस्तत्रैवोपलभ्यते, नहि तस्य मेरुप्रदक्षिणा नित्या गतिरस्ति, स च ज्योतिष्कस्तदेतत् कथमिति ? उच्यते—पञ्चप्रकारा सूर्यादयो ज्योतिष्काः, तत्रैको भेदस्तारकाख्यस्तस्याप्येकदेशो ध्रुवो यदि मेरोः प्रादक्षिण्येन (प्र)व्रज्यां न प्रतिपद्यते ततस्तदगत्या किमवशेषाणां नानुशासितव्या गतिः ? । यथा हि राजादिप्रधानपुरुषप्रयाणकप्रदाने तिष्ठत्स्वपि केषुचित् प्रयाणकं दत्तं स्कन्धावारेणेति लोकः प्रभाषते तथा प्रधानेषु सूर्यादिषु प्रयात्सु तद्भेदैकदेशागमनेऽपि ज्योतिष्का नित्यगतयोऽभिधास्यन्ते । अथवा नित्यगतय इति तत्रैव स्थाने स ध्रुवः परिभ्राम्यति, न तु मेरोः प्रादक्षिण्येन गतिं प्रतिपद्यते, तथाहि—तदद्यापि ध्रुवताराचक्रमाक्रान्तोत्तरदिक्कं परिवर्तमानमुपलभ्यते प्रत्यक्षप्रमाणेनैव, अतो मेरुप्रदक्षिणाः केचिन्नित्यगतयश्च, अपरे नित्यगतयो न मेरुप्रदक्षिणा इति । अथवा मेरुप्रदक्षिणा अनित्या गतिर्येषां ते मेरुप्रदक्षिणानित्यगतय इत्ययं वाक्यार्थो भवति, न सर्वेषामवश्यंभाविनी गतिर्मेरोः प्रादक्षिण्येन, किन्तु केषांचिद् भवति केषांचिन्न, गतिः पुनरवश्यंभाविनी तथाऽन्यथा वा, न तस्या निषेध इति । एकादशस्वेकविंशेष्वित्यादि गतार्थं प्रायः । मेरोश्चतुर्दिशमिति दिक्शब्देन समानार्थो दिशाशब्दस्तमनुसन्धाय भाष्यकारेणोक्तं चतुर्दिशमिति ।

अधुना अर्धतृतीयद्वीपान्तर्वर्तिनां सूर्यादीनामियत्तामावेदयितुमाह—

भा०—तत्र द्वौ सूर्यौ जम्बूद्वीपे । लवणे चत्वारः । धातकीखण्डे द्वादश । कालोदधौ द्विचत्वारिंशत् । पुष्करार्धे द्विसप्ततिः । इत्येवं मनुष्यलोके द्वात्रिंशत् सूर्यशतं भवति । चन्द्रमसामप्येष एव विधिः । अष्टाविंशतिर्नक्षत्राणि । अष्टाशीतिर्ग्रहाः । षट्षष्टिसहस्राणि नव शतानि पञ्चसप्ततीनि ताराकोटाकोटीनामेकैकस्य चन्द्रमसः परिग्रहः । सूर्याचन्द्रमसो ग्रहा नक्षत्राणि च तिर्यग्लोके, शेषास्तूर्ध्वलोके ज्योतिष्का भवन्ति ।

सूर्यादीनां संख्या

टी०—तत्र द्वौ सूर्यावित्यादि । एते तु स्वतापच्छेदतः प्रकाशयन्तः प्रदक्षिणं चरन्ति, तापक्षेत्रं चैषामन्तः सङ्कुटं बहिर्विशालं नालककुसुमाकृतिः सप्तचत्वारिंशद्योजनसहस्राणि त्रिषष्ट्यधिकानि शतद्वयोत्तराणि योजनैकषष्टिभागाश्चैकविंशतिः(४७२६३$\frac{२१}{६१}$) प्रत्येकं सूर्याणां, मनुष्यक्षेत्रे च द्वात्रिंशदुत्तरं सूर्यशतमवगन्तव्यं, चन्द्रमसोऽप्येतावन्त एव बोद्धव्याः । अष्टाविंशतिर्नक्षत्राण्यभिजिता सह, ग्रहाणामष्टाशीतिर्भरण्यादीनाम्, एकस्य खलु चन्द्रमसस्ताराः कोटीनां कोट्य एतावत्यो भवन्ति षट्षष्टिसहस्राणि नव च शतानि पञ्चसप्तत्यभिकानि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सवितुश्च द्वियोजनान्तरितमार्गाणां त्र्यशीतं मण्डलशतम् । तेषां हि पूर्वविदेहदिवसान्तात् पूर्वदक्षिणविदिग्भाजो मार्गान् मार्गान्तरगामिनस्त्रिषष्टिरुदयान्निषधमस्तके दक्षिणक्षेत्रवर्तिमनुष्यचक्षुर्दृश्या द्वौ हरिवर्षज्याकोट्यां, शेषमष्टादशोत्तरं शतं लवणोदधाविति, अपरविदेहान्तेऽप्येवं, द्वितीयस्य तु पश्चिमोत्तरविदिग्भाजो नीलमस्तके रम्यके लवणोदधौ चोत्तरक्षेत्रजानां दृष्टिपथस्थायिन इति, उदयविधानात् त्वस्तमयं विद्यात् । चन्द्रमसः पञ्चदश मण्डलानि । सर्वोत्तरोदयस्य सर्वदक्षिणोदयस्य चान्तरं पञ्च योजनशतानि दशोत्तराणि सवितुः, तत्राशीतं योजनशतं जम्बूद्वीपे लभ्यते, त्रीणि योजनशतानि त्रिंशदुत्तराणि लवणोदधौ लभ्यन्तेऽर्कस्य । सूर्या इत्यादि भाष्यम् । एते किल तिर्यग्लोकव्यवस्थिताः । शेषास्तु प्रकीर्णतारका ऊर्ध्वलोके भवन्ति इति । आचार्य एवेदमवगच्छति, नत्वार्षमेवमवस्थित, सर्वज्योतिष्काणां तिर्यग्लोकव्यवस्थानादिति ।

भा०—अष्टचत्वारिंशद् योजनैकषष्टिभागाः सूर्यमण्डलविष्कम्भः, चन्द्रमसः षट्पञ्चाशत्, ग्रहाणामर्धयोजनम्, गव्यूतं नक्षत्राणाम्, सर्वोत्कृष्टायास्तारायाः अर्धक्रोशः, जघन्यायाः पञ्च धनुःशतानि, विष्कम्भार्धबाहल्याश्च भवन्ति सर्वे सूर्यादयः, नृलोक इति वर्तते । बहिस्तु विष्कम्भबाहल्याभ्यामतोऽर्धं भवति ॥

सूर्यादीनां विष्कम्भः

टी०—अष्टचत्वारिंशदित्यादि । आयामविष्कम्भाभ्यामिदमादित्यमण्डलप्रमाणम्, तथा चन्द्रमसः सुज्ञानम्, अर्धयोजनप्रमाणं ग्रहविमानम्, नक्षत्रविमानं गव्यूतप्रमाणम्, आयुषा **सर्वोत्कृष्टायास्तारकाया अर्धक्रोशप्रमाणं** विमानम्, सर्वजघन्यायाः **पञ्च धनुःशतानि**, शेषा विमध्यमा प्रतिपत्तिर्वक्तव्येति । एषामेव सूर्यादिविमानानां बहलत्वनिर्दिदिक्षया आह—**विष्कम्भार्धबाहल्याश्च भवन्ति** नृलोकान्तर्वर्तिसूर्यादिविमानानि स्वविष्कम्भार्धेन बहलानि भवन्ति । तद्यथा—सवितुर्विमानमण्डलं चतुर्विंशतिरेकषष्टिभागा योजनस्य, एवं शेषाणामपि वाच्यम् । अथ मानुषोत्तरात् परतः कथमित्यत आह—**बहिस्तु विष्कम्भबाहल्याभ्यामतोऽर्धं भवति** नृलोकान्तर्वर्तिनां सवित्रादिविमानानां यो विष्कम्भोऽभिहितस्तस्यार्धं बहिर्वर्तिनामुष्णकरादिविमानानां विष्कम्भो भवति, यथाऽन्तर्वर्तिनः आदित्यस्याष्टचत्वारिंशदेकषष्टिभागा योजनस्य विमानविष्कम्भस्तदर्धं चतुर्विंशतिरेकषष्टिभागा योजनस्य बहिर्वर्तिनः सवितुर्विमानविष्कम्भ इत्येवं शेषाणामपिवाच्यम्, तथाऽन्तर्वर्तिनः सवितुश्चतुर्विंशतिरेकषष्टिभागा योजनस्य विमानबाहल्यमुक्तं बहिर्वर्तिनस्तदर्धं द्वादशैकषष्टिभागा योजनस्य विमानबाहल्यम्, एवं शेषाणा-

---

१ अशीत्यधिकाष्टाशत्यामवस्थितात् चन्द्राद् ऊर्ध्वभागीये लोके, ततः विंशत्यामवस्थानाभ्युपगमात्, नवशत्याश्च तिर्यग्लोकत्वेनास्वीकारात्, प्राक् तिर्यग्लोके इत्युक्तिस्तूर्ध्वभागे सूर्यादीनां तारादिवदनियततावारणार्थम् । २ 'वाच्या' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मपि वाच्यम्। सूर्ययोश्चन्द्रमसोश्च जम्बूद्वीपे सर्वाभ्यन्तरमण्डलस्थयोरन्तरं नवनवतिर्योजनसहस्राणि षट् च शतानि चत्वारिंशदधिकानि ।

ज्योतिष्कविमानवाहकाः

भा०—एतानि च ज्योतिष्कविमानानि लोकस्थित्यां प्रसक्तावस्थितगतीन्यपि ऋद्धिविशेषार्थमाभियोग्यनामकर्मोदयाच्च नित्यगतिरतयो देवा वहन्ति। तद्यथा-पुरस्तात् केशरिणः। दक्षिणतः कुञ्जराः। अपरतो वृषभाः। उत्तरतो जविनोऽश्वा इति ॥ १४ ॥

टी०—एतानि च ज्योतिष्कविमानानीत्यादि, नेश्वरादीच्छातः, किन्तु लोकानुभावादेव, एतानि विमानानि ज्योतिषां प्रसक्तावस्थितगतीन्यपि प्रसक्ता-सम्बद्धा अवस्थिता-आभीक्ष्ण्येन गतिर्येषां तानि प्रसक्तावस्थितगतीन्यपि सन्ति समृद्धिविशेषप्रकटनायाभियोग्यनामकर्मोदयभाजः सर्वदैव गतिरतयो गमनक्रीडाशीला देवा वहन्ति। चशब्दः समुच्चये। ऋद्धिविशेषार्थमाभियोग्यनामकर्मोदयाच्चेत्यनेनैतद् भाष्येण प्रतिपादयति—न च तेषां वोढृणां भारजनितं दुःखं समस्ति, ते हि गमनक्रीडाप्रियत्वाल्लोकानुभावादेव तेषु भ्रमत्स्वधस्तात् स्थिता नानावेषधारिणो व्रज्यां प्रतिपद्यन्ते, अवन्ध्यफलत्वादाभियोग्यकर्मणः, तद्यथा-नखदंष्ट्राटोपकेसरभासुरसटाग्रकीर्णकिरणसमूहानुरञ्जिताः कपिलनयनतारकाः केसरिणः पुरस्ताद् वहन्तीति। दक्षिणतो मदप्रसेकार्द्रगण्डा मदावघूर्णितप्रसारितकराः षड्दन्तोपशोभिताननना दन्तिनः, अपरतः प्रशस्ताङ्गोपाङ्गोपचितमूर्तयो वृषभाः, उत्तरतो जविनोऽश्वा इति। सर्वे चैते षोडशसहस्रसङ्ख्या देवाः सवितुर्विमानं वहन्ति, तथा चन्द्रमसः। ग्रहविमानमष्टौ सहस्राणि वहन्ति, नक्षत्रविमानं चत्वारि सहस्राणि, ताराविमानं सहस्रद्वयमिति। सर्वबहिर्मण्डलस्थयोरन्तरं योजनलक्षं षट् च शतानि षष्ट्यधिकानि सूर्ययोः, चन्द्रमसोरप्येतदेव बहिर्मण्डलस्थयोरन्तरं षोडशैकषष्टिभागहीनं, पञ्च शतानि नवोत्तराणि त्रिपञ्चाशच्चैकषष्टिभागाश्चन्द्रमसः काष्ठान्तरमवसेयम्, मण्डलान्तरं तु पञ्चत्रिंशद् योजनानि त्रिंशदेकषष्टिभागाश्चत्वारश्च सप्तभागा योजनस्येति ॥ १४ ॥

येयं ज्योतिषां गतिः सातत्येनैनामन्ये काल इत्यध्यवस्यन्ति, तत् कथमिति? उच्यते—न गतिशब्दवाच्यः कालः, तत्साध्यः किन्तु योऽयमतीतानागतवर्तमानभेदः सः।

सूत्रम्—तत्कृतः कालविभागः ॥ ४-१५ ॥

भा०—कालोऽनन्तसमयः वर्तनादिलक्षण इत्युक्तम् (अ० ५, सू० ३९, २२)। तस्य विभागो ज्योतिष्काणां गतिविशेषकृतश्चाराविशेषेण हेतुना। तैः कृतस्तत्कृतः।

टी०—अथवा यत एव ज्योतिष्काः सदा नियतगतयो नान्ये, अत एवायं नृलोके तत्कृतः कालविभागः। कालोऽनन्तसमय इत्यादि भाष्यम्। मुख्यवृत्तिसमाश्रयणात् सक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लमनुष्यक्षेत्रव्यापी समय एको वर्तमानकालः, स च परस्ताद् वक्ष्यते स्वरूपतः। अत्र च प्रवचने सङ्ग्रहव्यवहारापेक्षयोभयथा प्रस्थानम्। एके मन्यन्ते–जीवाजीवद्रव्ययोरेव पर्यायः कश्चिद् विशिष्टो वर्तनापरिणामक्रियापरापरत्वलक्षणः काल इति व्यपदिश्यते, न पुनर्जीवाकाशधर्माधर्मपुद्गलद्रव्यव्यतिरिक्तोऽतिस्पष्टलिङ्गः कश्चिद् द्रव्यविशेषः समस्ति, यमुररीकृत्येदमभिधानं प्रवर्तिष्यते–कालोऽयमिति। अपि च–पञ्चास्तिकाया उक्ताः प्रवचने, यदि कालोऽपि पृथक् स्यात् षडस्तिकायाः प्रसज्येरन्, अनिष्टं चैतत्। आगमश्च—"किमिदं भंते! कालेत्ति वुच्चति?। गोयमा! जीवा चेव अजीवा चेव"[1] (भग०)। अपरे मन्यन्ते–पञ्चास्तिकायव्यतिरिक्तं कालद्रव्यं षष्ठमस्ति कार्यानुमेयत्वादण्वादिवत्, असति हि नियामकद्रव्ये किसलयकलिकाफलप्रसवपरिणतयः सहकारतरोर्युगपदाविर्भवेयुः, क्रमभाविनी चैषां किसलयादिपरिणतिरुपलभ्यते, ततः शक्यमनुमातुं–यदनुरोधादेताः कार्यव्यक्तयस्तारतम्येनात्मातिशयमासादयन्ति सोऽस्त्यत्र कोऽपि कालः। तथादृष्टस्य सतरोरेव कार्याविर्भाव इति चेन्न सततसन्निहितत्वात् समकमेव सकलकार्याविर्भावप्रसङ्गः स्यात्॥ ननु यस्यापि कालद्रव्यमेकं विविक्तं तस्यापि ततसन्निधानात् सर्वाः कार्यावस्थाः किमिति युगपन्नानुवर्तन्ते?। उच्यते–तद्धि शिशिरवसन्तादिभेदेन भिद्यमानमनेकधा कार्यव्यक्तीः सृजति, ते च भेदाः प्रतिविशिष्टपरिणतिमनुरुध्यमाना विविक्तकार्यहेतवस्तस्मादस्तु द्रव्यान्तरं कालः। तथा चागमः–"कइ णं भंते! दव्वा पण्णत्ता? गोयमा! छ दव्वा पण्णत्ता, तंजहा–धम्मत्थिकाए अधम्मत्थिकाए आगासत्थिकाए जीवत्थिकाए पुग्गलत्थिकाए अद्धासमए"[2] (भग०)। तथा निर्युक्तिकारेणाप्याचख्यके द्रव्याद्धायथायुष्कादिभेदं कालं व्याचक्षाणेन पृथग्द्रव्यादिभ्यः कालो व्याख्यात इति। पञ्चमेऽध्याये च यदत्र वक्तव्यं तद् वक्ष्यामः। सम्प्रति प्रकृतमनुस्रियते। स एष कालोऽनन्तसमय इति समूहाध्यारोपादुच्यते—वर्तनादीनि लक्षणानि यस्यासौ वर्तनादिलक्षण इत्युक्तं (२२) सूत्रमात्रेण पञ्चमेऽध्याये, तस्यैवंविधस्य कालस्य, विभागाः समयावलिकादयो ज्योतिष्काणां गतिविशेषकृताः स्वतः सोऽभिन्नः परोपाधिकं भेदमापद्यते, ते चास्य भेदाः सवितृगतिविशेषेणोपलक्ष्यन्ते, चारविशेषेण हेतुना नक्तंदिवादयः परिस्थूराः, न तु समयादयोऽत्यन्तसूक्ष्माः। केन ह्याकारेण समयप्रज्ञापनायामादित्यगतिरुपलक्षणं स्यात्। तस्मादतिस्थूलः कालः कालभेदेन भिद्यमानो भिद्यमानः परां काष्ठामनुप्राप्तः समय उच्यते। तैर्ज्योतिष्कचारविशेषैः कृतः–उपलक्षितस्तत्कृतः कालस्यायं विभागकलापः परिज्ञेयः, तत्र समयस्यैकत्वाद् विभागाभावः, समूहस्य चामुख्यत्वादेव न विभागः, तस्माद् विभागशब्द उपचारार्थः[3] कल्पितो विभाग इत्यर्थः॥

कालस्य द्रव्यता-विचारः

---

१ कोऽयं भदन्त! काल इत्युच्यते? गौतम! जीवाश्चैव अजीवाश्चैव। २ कति भदन्त! द्रव्याणि प्रज्ञप्तानि? गौतम! षड् द्रव्याणि प्रज्ञप्तानि, तद्यथा–धर्मास्तिकायः अधर्मास्तिकायः आकाशास्तिकायः जीवास्तिकायः पुद्गलास्तिकायः अद्धासमयः।

३ 'उपचारः' इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—तद्यथा–अणुभागाश्चारा अंशाः कला लवा नालिका मुहूर्ता दिवसा रात्रयः पक्षा मासा ऋतवः अयनानि संवत्सरा युगमिति लौकिकसमो विभागः । पुनरन्यो विकल्पः प्रत्युत्पन्नोऽतीतोऽनागत इति त्रिविधः । पुनस्त्रिविधः परिभाष्यते—सङ्ख्येयोऽसङ्ख्येयोऽनन्त इति ॥

लौकिकसम-कालविभागः

टी०–तद्यथा अणुभागाश्चारा अंशाः कला लवा इत्यादि । सर्व एते कालविशेषाभिधायिनः शब्दा इति, एष च लौकिकैः समः–तुल्यो विभागः कालस्य, वैशेषिक-पौराणिकादिनिरूपितकालविभागसदृश इत्यर्थः । पुनरन्यो लौकिकसम एव विभागः प्रत्युत्पन्नोऽतीतोऽनागत इति त्रिविधः । प्रत्युत्पन्नो-वर्तमानः, समय एव निश्चयात्, स चातीतानागताभ्यां विना वर्तमानव्यपदेशमेव नाश्नुत इत्यवश्यं तौ तदवधिभूतावेषितव्यौ, सम्बन्धिशब्दत्वादिति । व्यावहारिकस्तु स्वपरिकल्पवशात् प्रत्युत्पन्नादिस्त्रिविधः, प्रत्युत्पन्नो मुहूर्तादिरनेकभेदः, अनागतो द्विधा–भावतो विषयतश्च, भावतो घटाद्यनुत्पादकालः, अप्राप्तदर्शनो विषयतः, अतीतोऽपि द्विधा-भावविषयभेदतः, भावतः कुम्भादिविलयः, दर्शनादूर्ध्वं विषयत इति, भावो विषयो वाऽत्रोपलक्षणमात्रमवगन्तव्यमिति । पुनस्त्रिविधः स्वसमये परिभाष्यते–सङ्ख्येयोऽसङ्ख्येयोऽनन्त इति ॥ तत्र सङ्ख्येयादित्रिविधकालस्वरूपपरिज्ञानाय सकलकालभेदादित्वात् समय एव तावत् प्रज्ञाप्यत इत्याह—

प्रत्युत्पन्नादीनां भेदान्तरम्

भा०–तत्र परमसूक्ष्मक्रियस्य सर्वजघन्यगतिपरिणतस्य परमाणोः स्वावगाहनक्षेत्रव्यतिक्रमकालः समय इत्युच्यते परमदुरधिगमोऽनिर्देश्यः । तं हि भगवन्तः परमर्षयः केवलिनो विदन्ति, न तु निर्दिशन्ति, परमनिरुद्धत्वात्, परमनिरुद्धे हि तस्मिन् भाषाद्रव्याणां ग्रहणनिसर्गयोः करणप्रयोगासम्भव इति ।

समयस्य स्वरूपम्

टी०–तत्र परमसूक्ष्मक्रियस्येत्यादि । तत्र-एतस्मिन् त्रिविधकालव्याख्याप्रस्तावे समयस्तावदयं भवति, परमसूक्ष्मा क्रिया-गतिपरिणामो यस्य, अत्यन्तजघन्य इति प्रसिद्धतरेण ध्वनिना विवृणोति, परमाणोर्निर्विभागस्य पुद्गलद्रव्यस्य, स्वावगाहनक्षेत्रव्यतिक्रमकाल इति स्वावगाहक्षेत्रम्-आकाशपरमाणुस्तस्य व्यतिक्रमो-लङ्घनं परित्यागस्तदनन्तरप्रदेशसङ्क्रान्तिरित्यर्थः, स्वावगाहक्षेत्रव्यतिक्रमस्तस्य यः कालः स समय उच्यते । एतदुक्तं भवति–परमाणोः स्वावगाहक्षेत्रात् तदनन्तरवर्तिस्वावगाहक्षेत्रसङ्क्रान्तिक्रियोपलक्षितः कालः समयोऽभिधीयते, स चाविभागः परमनिरुद्धोऽत्यन्तसूक्ष्मत्वात् परमदुरधिगमः परमैरप्यतिशयसम्पन्नैः दुःखेनाधिगम्यते इति । अनिर्देश्यश्चासौ–न स कालो निर्देष्टुं शक्यते, परमर्षीणां तु स्वप्रत्यक्षत्वात् स्वसुखादिवत्, न निर्लुठितस्वरूपः परेभ्यः प्रतिपादयितुं शक्यते घटादिवत्,

१ 'स च सुखादिविनिर्लुठित' इति क–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतः कयाऽपि काक्का निदर्शनरूपया प्रज्ञाप्यत इत्यावेदयति, तमेवंप्रकारं समयं यस्मादनुपमलक्ष्मीप्रयत्नभाजः परमर्षयः परिहीणच्छद्मानः समस्तज्ञेयग्राहिणा केवलज्ञानेनावगच्छन्ति स्वरूपतो न पुनर्निर्दिशन्त्यन्यस्मै, परमनिरुद्धत्वादिति अल्पत्वादित्यर्थः । यावत् तत्स्वरूपप्रतिपादनाय भाषाद्रव्याण्यादीयन्ते तावदसङ्ख्येयास्तेऽतिक्रामन्तीत्यर्थः । परमनिरुद्धे हि तस्मिन् भाषाद्रव्याणां ग्रहणनिसर्गयोः करणप्रयोगासम्भव इति । कायकरणप्रयोगेण भाषाद्रव्याण्यादाय वाक्पर्याप्तिकरणव्यापारेण निसृजति, तयोश्च निसर्गग्रहणविषययोः करणं व्यापारयितुं न शक्यतेऽत्यल्पत्वात्, अतः परमनिरुद्धे तस्मिन् भाषाद्रव्याणां ग्रहणनिसर्गासम्भवादवगतिरेव केवला न प्रज्ञापनमस्तीति । अथवाऽऽर्षप्रसिद्धचा तुन्नागदारकपट्टशाटिकापाटननिदर्शनात् समयप्रज्ञापना कार्या । एवं तावत् समयः सर्वकालभेदादिरवसेयः ।

भा०–ते त्वसङ्ख्येया आवलिका । ताः सङ्ख्येया उच्छ्वासः, तथा निःश्वासः । तौ बलवतः पट्विन्द्रियस्य कल्पस्य मध्यमवयसः स्वस्थमनसः पुंसः प्राणः । ते सप्त स्तोकः । ते सप्त लवः । तेऽष्टात्रिंशदर्धं च नालिका । ते द्वे मुहूर्तः । ते त्रिंशदहोरात्रम् । तानि पञ्चदश पक्षः । तौ द्वौ शुक्लकृष्णौ मासः । तौ द्वौ मासावृतुः । ते त्रयोऽयनम् । ते द्वे संवत्सरः । ते पञ्च चन्द्रचन्द्राभिवर्धितचन्द्राभिवर्धिताख्या युगम् । तन्मध्येऽन्ते चाधिकमासकौ । सूर्यसावनचन्द्रनक्षत्राभिवर्धितानि युगनामानि । वर्षशतसहस्रं चतुरशीतिगुणितं पूर्वाङ्गम् । पूर्वाङ्गशतसहस्रं चतुरशीतिगुणितं पूर्वम् । एवं तान्ययुतकमलनलिनकुमुदतुट्यडडाववाहाहाहूहूचतुरशीतिशतसहस्रगुणाः सङ्ख्येयः कालः ।

आवलिकादिविचारः

टी०– ते चासङ्ख्येयाः समया आवलिका भण्यते, सा च जघन्ययुक्तासङ्ख्येयकसमयप्रमाणा भवति । ताः सङ्ख्येयाः $(४४४६\frac{२४५८}{३७७३})$ सत्य आवलिका एक उच्छ्वासो निःश्वासो वा ऊर्ध्वाधोगमनभेदात् । तावुच्छ्वासनिःश्वासावित्थंप्रमाणौ शारीरबलयुक्तस्यानुपहतकरणग्रामस्य नीरुजस्य मध्यंवयोऽनुप्राप्तस्य मनोदुःखेनानभिभूतस्य पुरुषस्य प्राणो नाम कालविशेषो भवति, बलवदादिविशेषणानि च प्रतिविशिष्टोच्छ्वासपरिग्रहणाय, अन्यथा कर्तृभेदादनेकरूपाः सप्तोच्छ्वासनिःश्वासा इति न शक्येत प्राणस्वरूपं निरूपयितुमनवस्थितत्वात्, अत एवंप्रकारस्य पुंसो यावुच्छ्वासनिःश्वासाविति । उक्तलक्षणाः प्राणास्ते सप्तसङ्ख्याकाः स्तोको नाम कालविशेषः । ते स्तोकाः सप्त लवोऽभिधीयते । लवानामष्टाधिका त्रिंशल्लवार्धं च नालिका भवति । नालिकाद्वयं मुहूर्तः । त्रिंशन्मुहूर्तमहोरात्रम् । पञ्चदशभिरहोरात्रैः पक्षः । शुक्लकृष्णौ द्वौ पक्षौ मासः । मासद्वयमृतुर्वसन्तादिभेदः । ऋतुत्रयमयनम् । अयनद्वयं संवत्सरः । ते

---

१ 'तुशगदारुक् पदशाटिका' इति क–पाठः । २ 'ऽष्टाधिकात्रिंश' इति क–पाठः ।

३ जघन्यमध्यमोत्कृष्टपरीत्तयुक्तासंख्यातासंख्यातभेदेनाऽसंख्यातस्य नवविधत्वात्, चतुर्थं चैतत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संवत्सराः पञ्च चन्द्रचन्द्राभिवर्धितचन्द्राभिवर्धिताख्या युगम्। तत्र चन्द्रसंवत्सरपरिज्ञानाय चन्द्रमासपरिमाणमेव तावदाख्यायते–एकोनत्रिंशद् दिनानि द्वात्रिंशच्च द्विषष्टिभागा (२९$\frac{१२}{६२}$) दिवसस्य चन्द्रमासः। एवंप्रकारेण मासेन द्वादशमासपरिमाणश्चान्द्रः संवत्सरः। स चायं–त्रीणि शतान्यष्टां चतुष्पञ्चाशदुत्तराणि द्वादश द्विषष्टिभागा (३५४$\frac{१२}{६२}$) इति। एतेन शेषाणि चन्द्रसंवत्सराणि व्याख्यातानि॥ अधुनाऽभिवर्धितसंवत्सरपरिज्ञानायाभिवर्धितमासोऽभिधीयते–एकत्रिंशद् दिनानि एकविंशत्युत्तरशतं चतुर्विंशत्युत्तरशतभागा (३१$\frac{१२१}{१२४}$) नामभिवर्धितमासः। एवंविधेन मासेन द्वादशमासप्रमाणोऽभिवर्धितसंवत्सरः, स चायं–त्रीणि शतान्यष्टां त्र्यशीत्यधिकानि चतुश्चत्वारिंशच्च द्विषष्टिभागाः (३८३$\frac{४४}{६२}$)। एतैश्चान्द्रादिभिः पञ्चभिः संवत्सरैरेकं युगं भवति। तन्मध्येऽन्ते चाधिकमासकौ तेषां पञ्चानां संवत्सराणां मध्येऽभिवर्धिताख्ये संवत्सरेऽधिकमासकः पतति, अन्ते च अभिवर्धित एव, सूर्यमासस्त्वयमवगन्तव्यः–त्रिंशद् दिनान्यर्धं च(३०$\frac{१}{२}$), एवंविधद्वादशमासनिष्पन्नः संवत्सरः सावित्रः, स चायं–त्रीणि शतान्यष्टां षट्षष्ट्यधिकानि(३६६), अनेन च मानेन सर्वकालः सर्वायूंषि समा विभागाश्च गण्यन्ते। सावनमास स्त्रिंशदहोरात्र एव, एष च कर्ममास ऋतुमासश्चोच्यते, एवंविधद्वादशमासनिष्पन्नः सावनसंवत्सरः, स चायं–त्रीणि शतान्यष्टां षष्ट्यधिकानि (३६०)। चन्द्राभिवर्धितावुक्तौ। नक्षत्रमास स्त्वयं–सप्तविंशतिदिनान्येकविंशतिः सप्तषष्टिभागाः (२७$\frac{२१}{६७}$), एवंविधद्वादशमासनिष्पन्नो नक्षत्रसंवत्सरः। स चायं–त्रीणि शतान्यष्टां सप्तविंशत्युत्तराण्येकपञ्चाशच्च सप्तषष्टिभागा (३२७$\frac{५१}{६७}$) इत्येवं स्वस्वमासनामनिष्पन्नानि युगनामानि भवन्ति। विंशतिभिर्युगैर्वर्षशतं भवति। दशभिर्वर्षशतैर्वर्षसहस्रम्। वर्षसहस्रं शतगुणं वर्षशतसहस्रम्। तच्चतुरशीतिगुणितमेकं पूर्वाङ्गम्। पूर्वाङ्गलक्षाः चतुरशीतिगुणिताः पूर्वम्। पूर्वतः पूर्वतो विकल्पात् परः परो विकल्पश्चतुरशीतिलक्षगुणो वेदितव्यः तुट्यङ्गाद्यावच्छीर्षप्रहेलकेति, तुट्यङ्गं तुटिका, अडडाङ्गं अडडा, अववाङ्गं अववा, (हाहाङ्गं हाहा), हूहूङ्गं हूहुका, उत्पलाङ्गं उत्पलम्, पद्माङ्गं पद्मम्, नलिनाङ्गं नलिनम्, अर्थनियूराङ्गं अर्थनियूरम्, चूलिकाङ्गं चूलिका, शीर्षप्रहेलिकाङ्गं शीर्षप्रहेलिका, प्रावचनक्रमोऽयम्, आचा-

चन्द्रमासादीनां तन्नामसंवत्सराणां च स्वरूपम्

पूर्वाङ्गादिस्वरूपम्

१ 'तिलक्षगु०' इति ग-पाठः, स च चिन्तनीयः।

२ शीर्षप्रहेलिकानुपादनात् उपलक्षणं, वाचनाभेदेनाभिधानभेदस्तु नासंभवी।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्येण त्वन्यथोपात्तः स्वल्पस्थानश्चेति, सर्वथा शीर्षप्रहेलिकान्तः सङ्ख्येयः कालो भवति समयादिरिति । सूर्यप्रज्ञप्तौ तु पूर्वादुपरि लताङ्गादिक्रमः शीर्षप्रहेलिकान्त इति, एतावान् गणितशास्त्रविषयोऽपीति ।

भा०—अत ऊर्ध्वमुपमानियतं वक्ष्यामः । तद्यथा हि नाम योजनविस्तीर्णं योजनोच्छ्रायं वृत्तं पल्यमेकरात्राद्युत्कृष्टसप्तरात्रजातानामङ्गलोम्नां गाढं पूर्णं स्याद्, वर्षशताद् वर्षशतादेकैकस्मिन्नुद्धियमाणे शुद्धिनियमतो यावता कालेन तद् रिक्तं स्यादेतत् पल्योपमम् । तद् दशभिः कोटाकोटिभिर्गुणितं सागरोपमम् । तेषां कोटाकोट्यश्चतस्रः सुषमसुषमा । तिस्रः सुषमा । द्वे सुषमदुष्षमा । द्विचत्वारिंशद् वर्षसहस्राणि हित्वा एका दुष्षमसुषमा । वर्षसहस्राणि एकविंशतिर्दुष्षमा । तावत्येव दुष्षमदुष्षमा ॥

पल्योपमादिविचारः

टी०—अत ऊर्ध्वमुपमानियतं वक्ष्याम इति । सङ्ख्येयादनन्तरमसङ्ख्येयः कालो भण्यते । स च गणितविषयातीतत्वादुपमया कयाचिन्नियम्यते, सर्वश्चैष बौद्धो व्यवहारः परप्रतिपत्तयेऽभ्युगम्यते, बाह्यार्थशून्यत्वात्, अन्यथा परमार्थविचारणायामतिदुष्करं स्यादिदं सर्वम्, तद्यथा हीत्यादि यावदेतत् पल्योपममिति सुज्ञानम्, तच्च त्रिविधम्—उद्धारपल्योपममद्धापल्योपमं क्षेत्रपल्योपमं चेति । पुनर्बादरसूक्ष्मभेदादेकैकं द्विधा, तत्रोक्तलक्षणं भाष्ये बादराद्धापल्यं सङ्ख्येयवर्षकोटिव्यतिक्रान्तिसमकालम् । तान्येव वालाग्राण्येकैकशोऽसङ्ख्येयान्यदृश्यानि खण्डानि कृत्वा बुद्ध्या स एव पल्यो भ्रियते ।

पल्योपमस्यावान्तरभेदाः, तेषां प्रयोजनानि च

ततः प्रतिवर्षशतमेकैकवालाग्रोद्धारे वर्षाण्यसङ्ख्येयानि व्यतिक्रामन्त्येतत् सूक्ष्माद्धापल्योपमम्। अस्य च प्रयोजनमुत्सर्पिण्यादिविभागपरिज्ञानम्, ज्ञानावरणादिकर्मस्थितयः कायभवस्थितयश्च पृथिव्यादिकायानां निरूप्यन्त इति । उद्धारपल्योपमं तु बादरं स्थूलवालाग्रापहारे प्रतिसमयमेकैकस्मिन् सति भवति, तच्च सङ्ख्येयसमयपरिमाणं वेदितव्यम् । एतान्येव वालाग्राण्येकैकशोऽसङ्ख्येयखण्डीकृतानि । ततः प्रतिसमयमेकैकवालाग्रोद्धारे वर्षकोटिभिः सङ्ख्येयाभिः सूक्ष्मोद्धारपल्यं भवति । अस्य च प्रयोजनमर्धतृतीयसागरोपमोद्धारसमयराशिप्रमाणतुल्या द्वीपसमुद्रा इति । क्षेत्रपल्योपममपि बादरसूक्ष्मभेदाद् द्विविधम्, बादरलोमखण्डभृतक्षेत्रप्रदेशराश्यपहारे प्रतिसमयं बादरक्षेत्रपल्योपमम्, सूक्ष्मलोमखण्डभृतक्षेत्रप्रदेशराश्यपहारे प्रतिसमयं सूक्ष्मक्षेत्रपल्योपमम्, असङ्ख्योत्सर्पिणीभिश्च परिनिष्ठानमस्य भवति। एतेन च पृथिव्यादिजीवपरिमाणमानीयत इति प्रवचनविदो वर्णयन्ति प्रयोजनम् । एषां च त्रयाणामपि पल्योपमानां प्रत्येकं कोटीनां कोटी दशगुणिता सती सागरोपममिति व्यपदिश्यते त्रिविधमेव । एषां सागरोपमाणां चतस्रः कोटीकोट्यः सुषमसुषमानामकालविशेषः । तिस्रः कोटीकोट्यः सागरोपमाणां

१ इतः परं सद्भावेऽपि गणितस्य न तद्व्यावहारिकमिति नोक्तम् । २'माणे यावता' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुषमा। द्वे सागरोपमकोटीकोटयौ सुषमदुष्षमा। द्विचत्वारिंशद् वर्षसहस्राणि हित्वा चैका कोटीनां कोटी दुष्षमसुषमा। एकविंशतिर्वर्षसहस्राणि दुष्षमा। तावत्येव दुष्षमदुष्षमा, एकविंशतिवर्षसहस्राणीत्यर्थः।

भा०—एताः[1] अनुलोमप्रतिलोमा अवसर्पिण्युत्सर्पिण्योर्भरतैरावतेष्वनाद्यनन्तं परिवर्तन्ते अहोरात्रवत्। तयोः शरीरायुःशुभपरिणामानामनन्तगुणे[2] हानिवृद्धी। अशुभपरिणामानां[3] वृद्धिहानी। अवस्थिताऽवस्थितगुणाश्चैकैकाऽन्यत्र। तद्यथा—कुरुषु सुषमसुषमा, हरिरम्यकवासेषु सुषमा, हैमवतहैरण्यवतेषु सुषमदुष्षमानुभावः, विदेहेषु सान्तरद्वीपेषु दुष्षमसुषमा इति, एवमादिमनुष्यक्षेत्रे पर्यायापन्नः कालविभागो ज्ञेय इति ॥ १५ ॥

क्षेत्रापेक्षया कालविचारः

टी०—एताः सुषमदुष्षमाद्या यथोपन्यस्ता आनुलोम्येन षड्व्यवसर्पिणीनामकालः शरीरोच्छायायुष्ककल्पवृक्षादिपरिहाणेर्दशसागरोपमकोटीकोट्यः परिमाणतः। तथा प्रातिलोम्येनोत्सर्पिणीनामकालः शरीरोच्छ्रायादिपरिवृद्धेर्दशसागरोपमकोटीकोट्य एव परिमाणतः। एतच्चोत्सर्पिण्यवसर्पिणीकालचक्रकं पञ्चसु भरतेष्वैरावतेषु पञ्चस्वनाद्यन्तं परिवर्तते, यथाऽहोरात्रे-वासरो रजनी वा न शक्यते निरूपयितुमादित्वेनान्तत्वेन वाऽनादित्वादहोरात्रचक्रकप्रवृत्तेस्तथैतदपीति। तत्रावसर्पिण्यां शरीरोच्छ्रायादेरनन्तगुणपरिहाणिः परतः परतः। सुषमसुषमायां गव्यूतत्रितयं शरीरोच्छ्रायो मनुष्याणामायुस्त्रीणि पल्योपमानि शुभपरिणामोऽपि कल्पवृक्षादिरनेकः। सुषमायां गव्यूतद्वयं पल्योपमद्वयं कल्पवृक्षादिपरिणामश्च शुभो हीनतरः। सुषमदुष्षमायामेकं गव्यूतमेकं पल्योपमं हीनतरश्च कल्पवृक्षादिपरिणामः। दुष्षमसुषमायां पञ्चधनुःशतप्रभृति सप्तहस्तान्तं शरीरप्रमाणमायुरपि पूर्वलक्षपरिमाणं परिहीनश्च कल्पवृक्षादिपरिणामः। दुष्षमायामनियतं शरीरप्रमाणमायुरप्यनियतं वर्षशतादर्वाक् पर्यन्ते विंशतिवर्षाणि परमायुः शरीरोच्छ्रायो हस्तद्वयं औषधिवीर्यपरिहाणिरनन्तगुणेति। अतिदुष्षमायामप्यनियतं शरीरोच्छ्रायादि सर्वं पर्यन्ते तु हस्तप्रमाणं वपुः परमायुः षोडश वर्षाणि निरवशेषौषधिपरिहाणिश्चेति, एवं वृद्धिः प्रातिलोम्येन वक्तव्या। अशुभानां परिमाणविशेषाणामवसर्पिण्यां वृद्धिरुत्सर्पिण्यां हानिरिति। अवस्थिता स्वरूपेण न भ्रमति। ये च गुणास्तस्यां ते चावस्थिताः कल्पवृक्षादिपरिणामविशेषाः अतोऽवस्थिता (वस्थितगुणा) चान्यत्रैकैका सुषमसुषमादिर्भवति, तद्यथा—देवकुरूत्तरकुरुषुसुषमसुषमानुभावाःसर्वदावस्थिताः, हरिरम्यकवास्येषु सुषमानुभावोऽवस्थितः, हैमवतहैरण्यवतेषु सुषमदुष्षमानुभावोऽवस्थितः, विदेहक्षेत्रेषु षट्पञ्चाशत्सु चान्तरद्वीपेषु दुष्षमसुषमानुभावोऽवस्थितः। एवमादिर्मनुष्यक्षेत्रे पर्यो-

कालचक्रे शरीरोच्छ्रायादिविचारः

१ 'ताः' इति घ-पाठः। २ 'ºगुण' इति घ-पाठः। ३ 'ºणामवृद्धि०' इति घ-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यापन्नः कालविभागो ज्ञेय इति । एवमादिरित्यनेनानेकभेदत्वमादर्शयति । कालस्य पुद्गलपरावर्तादेः, सर्वाद्धादिश्चानन्तः काल इति । मनुष्यक्षेत्रपर्यायापन्न इति परिमितदेशवर्तित्वं कालस्यावगमयति। इह प्रसिद्धेनान्यत्रापि वर्तमाना देवतादयो व्यवहरन्ति, कालस्य समूहबुद्ध्याऽङ्गीकृतस्य समयादिर्विभागो वेदितव्यः इति, असङ्ख्येयत्वमनन्तत्वं च कालस्य भाष्यादेव परिगन्तव्यम् । गणितविषयातीतोऽसङ्ख्येयः, अविद्यमानोऽन्तोऽनन्त इति ॥१५॥

अत्राह–यदि ज्योतिष्का मेरुप्रदक्षिणा नित्यगतयो नृलोके (अ० ४, सू० १४) भवन्ति अथ ये बहिर्नृलोकात् ते कथमित्यत्रोच्यते—

सूत्रम्—बहिरवस्थिताः ॥ ४–१६ ॥

नृलोकबहिर्ज्योतिष्कविचारः

भा०—नृलोकाद् बहिर्ज्योतिष्काः अवस्थिताः, अवस्थिता इत्यविचारिणः, अवस्थितविमानप्रदेशा अवस्थितलेश्याप्रकाशा इत्यर्थः । सुखशीतोष्णरश्मयश्चेति ॥ १६ ॥

टी०—नृलोकाद् बहिरवस्थिता ज्योतिष्का इत्यादि भाष्यम् । नृलोकादित्यर्थवशाद् विभक्तिपरिणतिः। मानुषोत्तरगिरेर्बहिर्ये सूर्यादयस्तेऽवस्थिताः–न परिभ्रमन्ति स्वभावादेवाविचारिणो देवाः। अवस्थितविमानप्रदेशा इति विमानानां प्रदेशा–बुध्नाः प्रतिष्ठास्थानानि, अवस्थिता विमानप्रदेशा येषां तेऽवस्थितविमानप्रदेशाः निश्चलत्वान्न देवाः परिभ्रमन्त्येवं न विमानानि यथा नृलोक इति प्रतिपादयति, अवस्थितलेश्याप्रकाशा इत्यर्थः । अवस्थितौ लेश्याप्रकाशौ येषां तेऽवस्थितलेश्याप्रकाशाः, लेश्या-वर्णः,स नृलोकान्तर्वर्तिनामुपरागादिभिरन्यत्वमपि प्रतिपद्यते, तद्बहिर्वर्तिनां तु तदभावादवस्थितपीतवर्णत्वम्, प्रकाशोऽप्यवस्थितस्तेषां योजनशतसहस्रपरिमाणो निष्कम्पत्वादस्तमयोदयाभावाच्चेति, अवस्थितशब्दव्याख्यानाविच्छेदाभिप्रायेण सूरिरित्यर्थ इति प्रयुक्तवान् । सुखशीतोष्णरश्मयश्चेति । सुखाः शीतोष्णरश्मयो येषां ते सुखशीतोष्णरश्मयः चन्द्राः सवितारश्च, नात्यन्तशीताः शिशिरत्विषः, नात्यन्तोष्णाः किरणमालिनः किरणाः, किन्तु द्वयोरपि साधारणाः स्वभावादेवेत्यतः सुखहेतुत्वात् सुखाः, सर्वशशाङ्काश्च बहिरभिजिता युक्ताः, सवितारश्च पुष्यैरिति ॥ १६ ॥

उक्ता ज्योतिष्काः स्थानादिप्रक्रमेण । अथ तुरीयो देवनिकायः किंनामा कतिभेदो वेत्यत्रोच्यते–वैमानिकाः । अथवा तत्राभिहितलक्षणाधिवासविशेषेभ्यस्तुर्यो देवनिकायो यस्तस्य विकल्पव्याख्याप्रसङ्गे लघ्वर्थमादितः प्राक् स्थितेः प्रतिसूत्रमिदमवोचमित्यध्यकार्षीत्, स्थानसम्बन्धेन यानुपदेक्ष्यामः, सर्व एवैते—

सूत्रम्—वैमानिकाः ॥ ४–१७ ॥

भा०–चतुर्थो देवनिकायो वैमानिकाः,तेऽत ऊर्ध्वं वक्ष्यन्ते । विमानेषु भवा वैमानिकाः ॥ १७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०-चतुर्थो देवनिकाय इत्यादि भाष्यम् । चतुर्णां पूरणश्चतुर्थः देवनिकायः-सुरसमूहः नामतो वैमानिकाः,तेऽतः-इतः प्रभृत्यूर्ध्वं प्राक् स्थितेः वक्ष्यन्ते, विशेषेण सुकृतिनो मानयन्ति विमानानि तेषु भवा वैमानिका देवा इत्यतः प्रतिसूत्रमवचनमधिकारात्, अथवा परस्परस्य भोगातिशयं तत्रस्थं मिमत इति मन्यते वा हिताहितविज्ञानात्, तानि च त्रिविधान्येव भवन्ति-इन्द्रकश्रेणिपुष्पप्रकीर्णकानि । सर्वत्रान्वर्था पारिभाषिकी व्याख्या, तेषु भवा वैमानिका इति ॥ १७ ॥

ते पुनरनेकविशेषर्द्धियुक्ता विमानवासिनो देवा मूलभेदतो द्विविधाः—

सूत्रम्-कल्पोपपन्नाः कल्पातीताश्च ॥ ४-१८ ॥

वैमानिकानां द्वैविध्यम्

भा०-द्विविधा वैमानिका देवाः-कल्पोपपन्नाः कल्पातीताश्च । तान् परस्तात् वक्ष्याम इति ॥ १८ ॥

टी०-कल्पोपपन्नाः इन्द्रादिदशतया कल्पनात् कल्पाः-सौधर्मादयोऽच्युतान्ताः तेषूपपन्नाः कल्पोपपन्नाः, कल्पानतीताः कल्पातीताः उपरिष्ठाः सर्वे ग्रैवेयकविमानपञ्चकाधिवासिनः । द्विविधा वैमानिका इत्यादि भाष्यं सुज्ञानं प्रायः । तान् द्विप्रकारानपि परस्तात् प्रभेदतो वक्ष्याम इति ॥ १८ ॥

एतेषु पुनः कल्पाः कथं सन्निविष्टा इत्याह—

सूत्रम्-उपर्युपरि ॥ ४-१९ ॥

भा०—उपर्युपरि च यथानिर्देशं वेदितव्याः । नैकक्षेत्रे नापि तिर्यगधो वेति ॥ १९ ॥

टी०—उपर्युपरि चेत्यादि भाष्यम् । कल्पाः सम्बध्यन्ते, न देवा विमानानि वा, योऽयं निर्देशः करिष्यते सौधर्मादिस्तदङ्गीकरणेन वेदितव्याः यथानिर्देशं, नैकक्षेत्रे वर्तिनः कल्पाः, नैकस्मिन् प्रदेशे वर्तन्त इत्यर्थः । नापि तिर्यक् प्रतिसन्निवेशेन व्यवस्थिताः, नाधस्तादिति ॥ १९ ॥

ते चामी क्रमात्—

सूत्रम्—सौधर्मैशान-सनत्कुमार-माहेन्द्र-ब्रह्मलोक-लान्तक-महाशुक्र-सहस्रारेष्वानतप्राणतयोरारणाच्युतयोर्नवसु ग्रैवेयकेषु विजय-वैजयन्त-जयन्तापराजितेषु सर्वार्थसिद्धे च ॥ ४-२० ॥

भा०—एतेषु सौधर्मादिषु कल्पविमानेषु वैमानिका देवा भवन्ति । तद्यथा-

१ ' उपर्युपरि न तिर्यग् नाप्यसमञ्जसं ज्योतिष्कविमानवत् ' इति ग-टी-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सौधर्मस्य कल्पस्योपरि ऐशानः कल्पः । ऐशानस्योपरि सनत्कुमारः । सनत्कुमारस्योपरि माहेन्द्र इत्येवमा सर्वार्थसिद्धादिति ॥

टी०—एतेषु **सौधर्मादिष्वित्यादि** भाष्यम् । **कल्पः** समुदायः सन्निवेशो विमानमात्रपृथिवीप्रस्तारः, स निमित्तभेदाद् द्वादशधा उपर्यवस्थितः । तद्यथा—ज्योतिष्कोपरितनप्रस्तारादसङ्ख्येययोजनमध्वानमारुह्य मेरूपलक्षितदक्षिणभागार्धव्यवस्थितः प्राक् तावत् सौधर्मः कल्पः प्राचीप्रतीच्यायत उदग्दक्षिणविस्तीर्णोऽर्धचन्द्राकृतिरर्चिर्मालीव भास्वरोऽसङ्ख्येययोजनकोटीकोट्य आयामविष्कम्भाभ्यां परिक्षेपतश्च सर्वरत्नमयो लोकान्तविस्तारो मध्यव्यवस्थितसर्वरत्नमयाशोकसप्तपर्णचम्पकचूतसौधर्मावतंसकोपशोभितशक्रावासः, तस्यैवंरूपस्योपरि सौधर्मस्य ऐशानकल्पः । सोऽप्येवंविध एवोदग्व्यवस्थितः ईषदुपरितनकोट्या समुच्छ्रिततरो मध्यव्यवस्थिताङ्कस्फटिकरजतजातरूपेशानावतंसकविभूषितः । सौधर्मस्योपरि बहूनि योजनान्यतिक्रम्य समश्रेणिव्यवस्थितः **सनत्कुमारः** कल्पः सौधर्मवद् द्रष्टव्यः, एवमैशानस्योपरि माहेन्द्रसमुच्छ्रिततरोपरितनकोटिरैशानवदवगन्तव्यः । सनत्कुमारमाहेन्द्रकल्पयोरुपरि बहूनि योजनान्यतीत्य मध्यवर्ती सकलनिशाकराकृतिर्ब्रह्मलोकनामकल्पः । अत्र लोकग्रहणं लोकान्तिकदेवप्रतिपत्त्यर्थम् । ते हि किल भक्तिप्रवणीकृतचेतसः सर्वदा जिनेन्द्रजन्मादिप्रलोकनपराः शुभाध्यवसायप्रायाः परिवसन्तीति । एवमुपर्युपरि लान्तकमहाशुक्रसहस्रारास्त्रयः कल्पाः प्रतिपत्तव्याः । अत्र च सूत्रे सूरिणा सप्त सप्तम्य उपात्ताः, ताश्च लघीयस्त्वावस्थितेरधःक्रमप्रदर्शनार्था इति, तत उपरि बहूनि योजनान्यतिलङ्घ्य सौधर्मैशानकल्पद्वयवदानतप्राणतनामानौ द्वौ कल्पावव्यवस्थिताविति, तदुपरि समश्रेणिव्यवस्थितौ सनत्कुमारमाहेन्द्रवदारणाच्युतावित्येवं द्वादश कल्पाः । तत उपरि ग्रैवेयकानि नवोपर्युपरि, तदुपरि च पञ्च महाविमानानि, इत्येष वैमानिकदेवानामवच्छेद इति ॥

सौधर्मकल्पादीनां वर्णनम्

भा०—सुधर्मा नाम शक्रस्य देवेन्द्रस्य सभा, सा तस्मिन्नस्तीति सौधर्मः कल्पः । ईशानस्य देवराजस्य निवास ऐशानः, इत्येवमिन्द्राणां निवासयोगाभिख्याः सर्वे कल्पाः । ग्रैवेयकास्तु लोकपुरुषस्य ग्रीवाप्रदेशविनिविष्टा ग्रीवाभरणभूता ग्रैवा ग्रीव्या ग्रैवेया ग्रैवेयका इति ॥

टी०—कल्पमध्यवर्तिनी **सुधर्मा नाम शक्रस्य** तन्निवासिसुराधिपतेः **सभा, सा तस्मिन्** कल्पेऽस्तीति **सौधर्मः**, चातुरर्थिकोऽण् । **ईशानस्य देवराजस्य निवासः ऐशान** इति, तस्य निवाससम्बन्धेनाण् । एवमुपरितनाः **सर्वेऽपीन्द्राणां निवासयोगाभिख्याः कल्पाः । ग्रैवेयकास्तु लोकपुरुषस्य ग्रीवाभरणभूताः** उपचारालोक एव पुरुषस्तस्य ग्रीवेव ग्रीवा तस्यां भवा **ग्रैवा ग्रैवेया** च ' ग्रीवाभ्योऽण्च' (**पा०** अ०४, पा०३, सू०५७) इति । तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु' (पा० अ०४, पा०२, सू० ९६) वदत्र ग्रीवायां प्रायो भवा ग्रैवेयकाः, तथा ग्रीव्या इति भाष्यकृतोपन्यस्तं ग्रीवायां साधवो ग्रीव्या इति स्याद् व्युत्पत्तिः ॥

भा०—अनुत्तराः पञ्च देवनामान एव । विजिता अभ्युदयविघ्नहेतवः एभिरिति विजयवैजयन्तजयन्ताः । तैरेव विघ्नहेतुभिर्न पराजिता अपराजिताः । सर्वेष्वभ्युदयार्थेषु सिद्धाः सर्वार्थैश्च सिद्धाः सर्वे चैषामभ्युदयार्थाः सिद्धा इति सर्वार्थसिद्धाः । विजितप्रायाणि वा कर्माण्येभिरुपस्थितभद्राः परीषहैरपराजिताः सर्वार्थेषु सिद्धाः सिद्धप्रायोत्तमार्था इति विजयादय इति ॥ २० ॥

अनुत्तराणां पञ्चविधत्वम्

टी०—अनुत्तराः पञ्चेत्यादि । विमानविशेषाः पञ्च सर्वोपर्यनुत्तराः अविद्यमानमुत्तरमन्यद् विमानादि येषां तेऽनुत्तराः देवनामान एव ते विमानविशेषाः । विजिता अभिभूताः, अभ्युदयः—स्वर्गस्तस्य विघ्नहेतवो निरस्ता एभिर्देवैरिति विजयवैजयन्तजयन्ताः, ते हि सकलानभ्युदयविघातहेतूनपास्य हस्तेकृत्य स्वर्गसुखसन्दोहरसमुपभुञ्जते । तैरेव चाभ्युदयविघातहेतुभिर्न पराजिता इत्यपराजिताः । सर्वेष्वभ्युदयार्थेषु सिद्धाः सर्वार्थसिद्धाः आभ्युदयिकसुखप्रकर्षवर्तित्वात् सर्वप्रयोजनेष्वव्याहतशक्तयः सर्वार्थसिद्धाः । अथवा सर्वार्थैश्च सिद्धाः । चशब्दो वाशब्दार्थः । सर्वैर्वाऽतिशयवद्भिः शब्दादिभिरतिमनोहरैः सिद्धाः—प्रख्याताः सर्वार्थसिद्धाः, सर्वे चैषामभ्युदयार्थाः सिद्धाः सर्वार्थसिद्धा इति निरवशेषमभ्युदयप्रयोजनप्रतिष्ठत्वाद् वा सर्वार्थसिद्धा इति । अयमपरः कल्पः—विजितप्रायाणि वेत्यादि, प्रतनुकर्मपटलावच्छन्नत्वात् प्रत्यासन्नानवद्यसुखनिर्भरसिद्धिवधूसमागमत्वादुपस्थितपरमकल्याणाः साधुजन्मनि परीषहैरपराजिताः सन्तो मरणादुत्तरमपराजिता एव देवाः समुत्पन्नाः, तत्र वा सतततृप्तत्वान्न क्षुदादिभिः पराजीयन्त इत्यपराजिताः, तथा सर्वकर्तव्यतायाः परिसमाप्तेः सांसारिक्याः सर्वार्थसिद्धाः, सिद्धप्राय उत्तमार्थो येषां सकलकर्मक्षयलक्षणो मोक्षोऽनन्तरागामिजन्मभावित्वात् ते सर्वार्थसिद्धाः । एवं विजयादय इति । एवम्-एतेन प्रकारेण विजयादयोऽपि सर्वार्थसिद्धा एव । तथापि तु काचित् कचित् प्रसिद्धतरा भवति गमनाद् गौर्यथेति ॥ २० ॥

तत्राधिगतानुपूर्वीकाः दिवौकसः प्रकृताः—

सूत्रम्—स्थितिप्रभावसुखद्युतिलेश्याविशुद्धीन्द्रियावधिविषयतोऽधिकाः ॥ ४—२१ ॥

भा०—यथाक्रमं चैतेषु सौधर्मादिषु उपर्युपरि देवाः पूर्वतः पूर्वत एभिः स्थित्या

---

१ 'स्वास्यलङ्कारेवुढ्वुञ्' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिभिरर्थैरधिका भवन्ति। तत्र स्थितिरुत्कृष्टा जघन्या च परस्ताद्(सू०२९-४२) वक्ष्यते। इह तु वचने प्रयोजनं येषामपि समा भवति तेषामप्युपर्युपरि गुणतोऽधिका भवतीति यथा प्रतीयेत ॥ प्रभावतोऽधिकाः। यः प्रभावो निग्रहानुग्रहविक्रियापराभियोगादिषु सौधर्मकाणां सोऽनन्तगुणाधिक उपर्युपरि, मन्दाभिमानतया तु अल्पतरसंक्लिष्टत्वादेते न प्रवर्तन्त इति ॥ क्षेत्रस्वभावजनिताच्च शुभपुद्गलपरिणामात् सुखतो द्युतितश्चानन्तगुणप्रकर्षेणाधिकाः ॥ लेश्याविशुद्ध्यधिकाः।लेश्यानियमः परस्तादेषां वक्ष्यते(सू०२३)। इह तु वचने प्रयोजनं यथा गम्येत यत्रापि विधानतस्तुल्यास्तत्रापि विशुद्धितोऽधिका भवन्तीति। कर्मविशुद्धित एव वा अधिका भवन्तीति ॥

स्थितिप्रभावादिभिरुत्तरोत्तरदेवानामाधिक्यम्

टी०—यथाक्रमं चैतेष्वित्यादि भाष्यम्। येन क्रमसन्निवेशेन वैमानिकाः सौधर्मादिषु कल्पेषु व्यवस्थिताः उपर्युपरि तेनैव क्रमसन्निवेशविशेषेण पूर्वस्माद् पूर्वस्माद् विमानप्रस्तारात् कल्पाद् वा एभिः स्थित्यादिभिः सप्तभिरर्थैरधिका भवन्ति। तत्र स्थितिरापुषो द्विविधाऽप्युपरिष्टाद् (सू० २९-४२) वक्ष्यते। इहोपन्यासे तु प्रयोजनं येषामप्यधस्तनैरुपरिष्ठानां तुल्यास्थितिर्भवति तेषामप्युपर्युपरि गुणतोऽधिका भवतीति यथा प्रतीयेत,गुणाः सुखाहारग्रहणाल्पशरीरत्वादयस्तैरुपरितनानामधिका अवगन्तव्याः। अचिन्त्या शक्तिः प्रभावः, सोऽधिको भवत्युपरीति,निग्रहानुग्रहौ प्रसिद्धौ विक्रिया-अणिमादिपरिणामशक्तिः,पराभियोगो यदाक्रम्य बलात् परः कारयितव्य इति। प्रतनुकर्मत्वादल्पाभिमाना अक्लिष्टा अक्लिष्टचित्ताश्चोपरितना इति। अनादिपारिणामिकशुभपुद्गलपरिणामात् क्षेत्रस्वभावजनितादुपर्युपरि सुखोदयेनानन्तगुणप्रकृष्टेनाधिकाः,द्युतिर्विग्रहमृजा तयाप्युपरितनाः समभ्यधिकाः। शरीरवर्णो लेश्या तद्विशुद्धया चोपरिष्टादधिकाः, तं च लेश्यानियममेषामग्रे (सू० २३) वक्ष्यामः। इह तु वचने प्रयोजनं यत्रापि तुल्यभेदत्वमुपरितनानामाधस्त्यैर्लेश्याभिस्तत्रापि विशुद्धित उपर्युपरि समधिका भवन्ति, प्रतनुकर्मत्वात् शुभबहुलत्वाच्च ॥

भा०-इन्द्रियविषयतोऽधिकाः। यदिन्द्रियपाटवं दूरादिष्टविषयोपलब्धौ सौधर्मदेवानां तत्प्रकृष्टतरगुणत्वादल्पतरसङ्क्लेशत्वाच्चाधिकमुपर्युपरीति ॥ अवधिविषयतोऽधिकाः सौधर्मैशानयोर्देवाः अवधिविषयेणाधो रत्नप्रभां पश्यन्ति तिर्यगसङ्ख्येयानि योजनशतसहस्राणि[3] ऊर्ध्वमास्वभवनात्। सनत्कुमारमाहेन्द्रयोः शर्कराप्रभां पश्यन्ति तिर्यगसङ्ख्येयानि योजनशतसहस्राणि ऊर्ध्वमास्वभवनात् इति, एवं शेषाः क्रमशः। अनुत्तरविमानवासिनस्तु कृत्स्नां लोकनाडीं

इन्द्रियावधिविषयाधिकतोत्तरोत्तरदेवानाम्

१ 'गुणाधिका' इति घ–पाठः। २ 'रिष्ठातृतना०' इति ग-पाठः। ३ 'जनसहस्राणि' इति घ–पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पश्यन्ति । येषामपि क्षेत्रतस्तुल्योऽवधिविषयस्तेषामप्युपर्युपरि विशुद्धितोऽधिको भवतीति ॥ २१ ॥

टी०—इन्द्रियाणि श्रोत्रादीनि तेषां विषयः—शब्दादिर्योग्यदेशव्यवस्थितस्तद्ग्रहणप्रवृत्तावुपर्युपर्याहितपाटवा भवन्ति, अवधिविषयेण चोपर्युपरि समधिकाः, अधस्ताद् रत्नप्रभां पृथिवीं पश्यन्ति सौधर्मेशानयोर्देवास्तिर्यगसङ्ख्येयान् द्वीपसागरान्, ऊर्ध्वमास्वभवनस्तूपिकाग्रात् सर्व एवोपरि देवाः पश्यन्ति । सनत्कुमारमाहेन्द्रयोरवधिना शर्कराप्रभामधस्तिर्यग् बहुतरकानसङ्ख्येयान् द्वीपसमुद्रान् । एवं सर्वत्र वक्तव्यमिति । ब्रह्मलान्तकयोर्वालुकाप्रभां पश्यन्ति, शुक्रसहस्रारयोः पङ्कप्रभां, आनतप्राणतयोरारणाच्युतयोश्च धूमप्रभां, अधस्तात्तनमध्यमग्रैवेयकास्तमःप्रभां, उपरितनग्रैवेयकास्तु महातमःप्रभामिति । अनुत्तरविमानपञ्चकनिवासिनस्तु समस्तां लोकनाडीं पश्यन्ति लोकमध्यवर्तिनीं, न पुनर्लोकमिति । येषामपि देवानां तुल्यविषयमवधिज्ञानमुपर्युपरि तेषामप्युपरिष्टाद् विशुद्धतरमवसेयमिति ॥ २१ ॥

एते चोपर्युपरि वैमानिकाः—

सूत्रम्—गतिशरीरपरिग्रहाभिमानतो हीनाः ॥ ४-२२ ॥

भा०—गतिविषयेण शरीरमहत्त्वेन महापरिग्रहत्वेनाभिमानेन च उपर्युपरि हीनाः । तद्यथा—द्विसागरोपमजघन्यस्थितीनां देवानामासप्तम्यां गतिविषयः तिर्यगसङ्ख्येयानि योजनकोटीकोटीसहस्राणि, ततः परतो जघन्यस्थितीनामेकैकहीना भूमयो यावत् तृतीयामिति । गतपूर्वाश्च गमिष्यन्ति च तृतीयायां देवाः, परतस्तु सत्यपि गतिविषये न गतपूर्वा नापि गमिष्यन्ति । महानुभावक्रियातः औदासीन्याच्चोपर्युपरि देवा न गतिरतयो भवन्ति ॥

गत्यादिभिरुत्तरोत्तरदेवानां हीनत्वम्

टी०—गतिशरीरपरिग्रहाभिमानतो हीनाः, द्वन्द्वात् तृतीयार्थे तसिः । गतिविषयेणेत्यादि भाष्यम् । गतिर्देशान्तरगमनम्, येषां द्वे सागरोपमे जघन्या स्थितिस्ते किल देवाः सप्तमधरां प्रयान्ति, ते च सनत्कुमारकल्पात् प्रभृति लभ्यन्ते, शक्तिमात्रं चैतद् वर्ण्यते, न पुनः कदाचिदगमन् तिर्यगसङ्ख्येयानि योजनकोटीनां कोटीसहस्राणि, ततः परत इत्यादि सागरोपमद्वयादधो जघन्या स्थितिर्येषां न्यूनतरा न्यूनतमा चेति, ते त्वेकैकहीनां भुवमनुप्राप्नुवन्ति यावत् तृतीया पृथिवी, तां च तृतीयां पूर्वसङ्गतिकाद्यर्थं गता गमिष्यन्ति, परतस्तु सत्यामपि शक्तौ न गतपूर्वा नापि गमिष्यन्ति, औदासीन्यात्—माध्यस्थ्यादुपर्युपरि न गतिरतयो देवा जिनाभिवन्दनादीन् मुक्त्वेति ॥

---

१ 'तृतीयेति' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—सौधर्मैशानयोः कल्पयोर्देवानां शरीरोच्छ्रायः सप्त रत्नयः । उपर्युपरि द्वयोर्द्वयोरेकैका रत्निर्हीना आ सहस्रारात् । आनतादिषु तिस्रः । ग्रैवेयकेषु द्वे । अनुत्तरे एका इति ॥

टी०—सौधर्मैशानयोः सप्तहस्तवपुषो देवाः, उपर्युपरि द्वयोर्द्वयोरेकैका रत्निर्हीना आ सहस्रारात् द्वयोः कल्पयोरेकैकः शयोऽपैति, सनत्कुमारमाहेन्द्रयोः षड् रत्नयः, ब्रह्मलोकलान्तकयोः पञ्च रत्नयः, महाशुक्रसहस्रारयोश्चतुर्हस्ताः, आनतप्राणतारणाच्युतेषु हस्तत्रयोच्छ्रिताः, ग्रैवेयकेषु हस्तद्वयम्, अनुत्तरविमानवासिनामेका रत्निरिति ॥

वैमानिकदेवानां शरीरोच्छ्रायः

अधुना परिग्रहहानिरुपदिश्यते । तत्र सौधर्मैशानयोर्विमानप्रस्तारास्त्रयोदश, सनत्कुमारमाहेन्द्रयोर्द्वादश, ब्रह्मलोके षट्, लान्तके पञ्च, महाशुक्रे चत्वारः, सहस्रारेऽपि चत्वारः, आनतप्राणतयोश्चत्वारः, आरणाच्युतयोश्चत्वारः, अधस्तनग्रैवेयकेषु त्रयः, मध्यमग्रैवेयकेषु त्रयः, उपरितनग्रैवेयकेषु त्रयः, उपरि पञ्चसु विमानेष्वेकः, वृत्तास्तत्र द्विषष्टिर्विमानेन्द्रकास्तानङ्गीकृत्यैव दिक्ष्वावलिकाः प्रवृत्ताः, न विदिक्षु, सौधर्मैशानयोश्च त्रयोदशानां प्रस्ताराणामधस्तनप्रस्तारे द्विषष्टिविमानप्रमाणैवावलिका, त्र्यस्रचतुरस्रक्रमेण चतुर्दिक्षु, ततः परमुपर्युपरि प्रतिप्रस्तारं सर्वत्र विमानचतुष्कहान्या तावदारुह्यते यावत् पञ्च विमानानि सर्वोपरीति, यावन्ति च लोके सम्भवन्तीष्टनामानि वैमानिकानामेतेषु प्रस्तारेषु भवन्ति । तेषां परिसङ्ख्यानमिदम्—

सौधर्मादीनां प्रस्ताराः

भा०—सौधर्मे विमानानां द्वात्रिंशच्छतसहस्राणि । ऐशानेऽष्टाविंशतिः । सनत्कुमारे द्वादश । माहेन्द्रेऽष्टौ । ब्रह्मलोके चत्वारि शतसहस्राणि । लान्तके पञ्चाशत् सहस्राणि । महाशुक्रे चत्वारिंशत् । सहस्रारे षट् । आनतप्राणतारणाच्युतेषु सप्त शतानि । अधो ग्रैवेयकाणां शतमेकादशोत्तरम् । मध्ये सप्तोत्तरं शतम्, उपर्येकमेव शतम् । अनुत्तराः पञ्चैवेति ॥

टी०—सौधर्मे त्वावलिकाप्रविष्टानां सप्तदश शतानि सप्तोत्तराणि, पुष्पावकीर्णानामेकत्रिंशल्लक्षाः सहस्राण्यष्टानवतिः द्वे शते त्रिनवत्यधिके, एकत्र द्वात्रिंशल्लक्षाः[1], ऐशाने द्वादश शतान्यष्टादशोत्तराण्यावलिकाप्रविष्टानां, पुष्पावकीर्णानां सप्तविंशतिर्लक्षाः सहस्राण्यष्टानवतिः सप्त शतानि व्यशीत्यधिकानि, एकत्राष्टाविंशतिर्लक्षाः[2], सनत्कुमारे त्वावलिकाप्रविष्टानां द्वादश शतानि षड्विंशत्युत्तराणि, पुष्पावकीर्णानामेकादश लक्षाः सहस्राण्यष्टानवतिः सप्त शतानि चतुःसप्तत्यधिकानि, एकत्र द्वादश लक्षाः[3], माहेन्द्रेऽष्टौ शतानि चतुःसप्तत्यधिकान्याव-

१ १७०७+३१९८२९३=३२०००००. २ १२१८+२७९८७८२=२८०००००.
३ १२२६+११९८७७४=१२०००००.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सौधर्मादिष्वावलिकाप्रविष्टानां पुष्पावकीर्णानां च विमानानां सङ्ख्या

लिकाप्रविष्टानां, पुष्पावकीर्णानां सप्त लक्षा नवनवतिसहस्राणि शतं च षड्विंशत्युत्तरम्, एकत्रा[1]ष्टौ लक्षाः, ब्रह्मलोकेऽष्टौ शतानि चतुस्त्रिंशदुत्तराण्यावलिकाप्रविष्टानां, पुष्पावकीर्णानां तिस्रो लक्षा नवनवतिसहस्राणि चत्वारि शतानि पञ्चदशोत्तराणि(?), एकत्र च[2]तस्रो लक्षाः, लान्तके पञ्च शतानि पञ्चाशीत्यधिकान्यावलिकाप्रविष्टानां, पुष्पावकीर्णानामेकोनपञ्चाशत्सहस्राणि चत्वारि शतानि पञ्चदशोत्तराणि,एकत्र प[3]ञ्चाशत् सहस्राणि, महाशुक्रे त्रीणि शतानि षण्णवत्यधिकान्यावलिकाप्रविष्टानां, पुष्पावकीर्णानामेकोनचत्वारिंशत्सहस्राणि षट् च शतानि चतुरुत्तराणि, एकत्र च[4]त्वारिंशत् सहस्राणीति, सहस्रारे त्रीणि शतानि द्वात्रिंशदधिकान्यावलिकाप्रविष्टानां, पुष्पावकीर्णानां षट्पञ्चाशच्छतान्यष्टषष्ट्यधिकानि, एकत्र ष[5]ट् सहस्राणि, आनतप्राणतयोरावलिकाबद्धानां शतद्वयमष्टषष्ट्यधिकं, पुष्पावकीर्णानां द्वात्रिंशदुत्तरं शतम्, एकत्र च[6]त्वारि शतानि, आरणाच्युतयोरावलिकाबद्धानां द्वे शते चतुरुत्तरे,पुष्पावकीर्णकानां षण्णवतिः, एकत्र त्री[7]णि शतानि, अधस्तनग्रैवेयकेष्वावलिकाप्रविष्टानामेकादशोत्तरं शतं, पुष्पावकीर्णानि तु न सन्त्येव, मध्यमग्रैवेयकेषु पञ्चसप्ततिरावलिकाप्रविष्टानि, पुष्पावकीर्णानि द्वात्रिंशद्, एकत्र स[8]प्तोत्तरं शतम्, उपरितनग्रैवेयकेष्वेकोनचत्वारिंशदावलिकाप्रविष्टानि, पुष्पावकीर्णकानामेकषष्टिः, एकत्र श[9]तं च, अनुत्तरविमानानि तु पञ्चैव ॥

इदानीं सकलवैमानिकविमानपरिसङ्ख्या—

भा०—एवमूर्ध्वलोके वैमानिकानां सर्वविमानपरिसङ्ख्या चतुरशीतिः शतसहस्राणि सप्तनवतिश्च सहस्राणि त्रयोविंशानीति (८४९७०२३) ॥ स्थानपरिवारशक्तिविषयसम्पत्स्थितिष्वल्पाभिमानाः परमसुखभागिन उपर्युपरीति॥२२॥

टी०—चतुरशीतिर्लक्षाः सप्तनवतिः सहस्राणि त्रयोविंशतिश्च विमानानीत्येवमुपर्युपरि हीनतरपरिग्रहा भवन्ति ॥ अधुनाऽभिमानतो हीना इति प्रतिपादयति–अहंकारपर्ययोऽभिमानः, स्थानं कल्पादि, परिवारो देवाः देव्यश्च, शक्तिः सामर्थ्यमचिन्त्यम्, विषयोऽवधेरिन्द्रियाणां वा, सम्पद्–विभूतिः, स्थितिरायुष इयत्ता, अथवा विषयसम्पत्–शब्दादिसमृद्धिः, इत्येतासु परिपेलवगर्वाः परमसुखभाजः उपर्युपरीति ॥ २२ ॥

सूत्रेणानुपात्तमुपर्युपरिहीनमुच्छ्वासाद्युपन्यस्यति भाष्यकारः—

भा०—उच्छ्वासाहारवेदनोपपातानुभावतश्च साध्याः । उच्छ्वासः सर्वजघ-

---

१ ८७४ +७९९१२६=८००००० . २ ८३४+३९९१६६ (टीका-पाठश्चिन्तनीयः)=४००००० .
३ ५८५ +४९४१५=५०००० . ४ ३९६ +३९६०४ =४००००.
५ ३३२ +५६६८=६०००. ६ २६८ +१३२=४००. ७ २०४+९६=३००.
८ ७५+२२=१०७. ९ ३९+६१=१००.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्यस्थितीनां देवानां सप्तसु[1] स्तोकः आहारश्चतुर्थकालः । पल्योपमस्थितीनामन्तर्दिवसस्योच्छ्वासो दिवसपृथक्त्वस्याहारः । यस्य यावन्ति सागरोपमाणि स्थितिस्तस्य तावत्सु अर्धमासेषु उच्छ्वासः, तावत्स्वव वर्षसहस्रेष्वाहारः ॥

देवानामुच्छ्वासाहारौ

टी०—दश वर्षसहस्राणि येषां स्थितिस्तेषां स्तोकसप्तकातिक्रान्तावुच्छ्वासः एकदिवसान्तरितश्चाहाराभिलाषः, पल्योपमस्थितीनां दिवसाभ्यन्तरे समुच्छ्वासो दिवसपृथक्त्वस्याहारः, द्विप्रभृत्यानवभ्यः पृथक्त्वसंज्ञा पारिभाषिकी । यस्य यावन्तीत्यादि सुज्ञानम् ॥

भा०–देवानां सद्वेदनाः प्रायेण भवन्ति, न कदाचिदसद्वेदनाः । यदि चासद्वेदना भवन्ति ततोऽन्तर्मुहूर्तमेव भवन्ति, न परतः, अनुबद्धसद्वेदनास्तूत्कृष्टेन षण्मासान् भवन्ति ॥ उपपातः । आरणाच्युतादूर्ध्वमन्यतीर्थानामुपपातो न भवति । स्वलिङ्गिनां भिन्नदर्शनानामा ग्रैवेयकेभ्य उपपातः । अन्यस्य सम्यग्दृष्टेः संयतस्य भजनीयं आ सर्वार्थसिद्धात्[2] । ब्रह्मलोकादूर्ध्वमा सर्वार्थसिद्धाच्चतुर्दशपूर्वधराणामिति[3] ॥ अनुभावो विमानानां सिद्धक्षेत्रस्य[4] चाकाशे निरालम्बस्थितौ लोकस्थितिरेव हेतुः । लोकस्थितिर्लोकानुभावो लोकस्वभावो जगद्धर्मोऽनादिपरिणामसन्ततिरित्यर्थः । सर्वे च देवेन्द्रा ग्रैवेयादिषु च देवा भगवतां परमर्षीणामर्हतां जन्माभिषेकनिष्क्रमणज्ञानोत्पत्तिमहासमवसरणनिर्वाणकालेष्वासीनाः शयिताः स्थिता वा सहसैवासनशयनस्थानाश्रयैः प्रचलन्ति, शुभकर्मफलोदयाल्लोकानुभावत एव वा । ततो जनितोपयोगास्तां भगवतामनन्यसदृशीं तीर्थकरनामकर्मोद्भवां धर्मविभूतिमवधिनाऽऽलोक्य[5] सञ्जातसंवेगाः[6] सद्धर्मबहुमानाः[7] केचिदागत्य भगवत्पादमूलं स्तुतिवन्दनोपासनहितश्रवणैरात्मानुग्रहमवाप्नुवन्ति । केचिदपि तत्रस्था एव प्रत्युत्थानाञ्जलिप्रणिपातनमस्कारोपहारैः परमसंविग्नाः सद्धर्मानुरागोत्फुल्लनयनवदनाः समभ्यर्चयन्ति ॥ २२ ॥

देवानां वेदनोपपातानुभावविचारः

अत्राह–त्रयाणां देवनिकायानां लेश्यानियमोऽभिहितः । अथ वैमानिकानां केषां का लेश्या इति? । अत्रोच्यते—

टी०—देवानां सद्वेदना इत्यादि भाष्यम् । यदा नाम केनचिन्निमित्तेनाशुभा वेदना देवानां प्रादुरस्ति तदाऽन्तर्मुहूर्तमेव स्यात्, ततः परं नानुबध्नाति, सद्वेदनाऽपि सन्ततं

---

१ 'सप्तसु स्तोकेषु' इति घ–पाठः । २ ' भजनीयः ' इति क-पाठः । ३ '०द्धि०' इति घ-पाठः । ४ '०च्य०' इति घ-पाठः । ५ ' तसवेगाः' इति घ-पाठः । ६ ' मानात् ' इति घ-पाठः । ७ ' त्युपस्थापना ' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षाण्मासिकी भवति, ततः परं विच्छिद्यन्तेऽन्तर्मुहूर्तं, ततः पुनरनुवर्तते । उपपातोऽधुना, अच्युतात् परमन्यलिङ्गेन नोपपातोऽस्ति मिथ्यादृष्टेः, स्वलिङ्गिनामिति साधुवेषधारिणां भिन्नदर्शनानां मिथ्यादृशां यावदुपरितनग्रैवेयाणि तावदुपपातः, सम्यग्दृशस्तु साधोः सौधर्मादारभ्य यावत् सर्वार्थसिद्धविमानं तावदुपपातः । अयं चापरो नियमः–ब्रह्मलोकादधश्चतुर्दशपूर्वधरो नोपपद्यते, परतस्तु सर्वार्थसिद्धविमानावधिक उत्पादः । शेषं सुज्ञानम् ॥ २२ ॥

अत्राह–त्रयाणामित्यादिसम्बन्धग्रन्थः । भवनवासिव्यन्तरज्योतिष्काणां द्रव्यलेश्यानियमोऽभिहितः, वैमानिकानां तु केषां का द्रव्यलेश्या ? तत आह—

सूत्रम्—पीतपद्मशुक्ललेश्या द्वित्रिशेषेषु ॥ ४–२३ ॥

भा०—उपर्युपरि वैमानिकाः सौधर्मादिषु द्वयोस्त्रिषु शेषेषु च पीतपद्मशुक्ललेश्या भवन्ति यथासङ्ख्यम् । द्वयोः पीतलेश्याः सौधर्मेशानयोः, त्रिषु पद्मलेश्याः सनत्कुमारमाहेन्द्रब्रह्मलोकेषु । शेषेषु लान्तकादिषु आ सर्वार्थसिद्धाच्छुक्ललेश्याः । उपर्युपरि तु विशुद्धतरेत्युक्तम् ॥ २३ ॥

वैमानिकानां लेश्याः

अत्राह–उक्तं भवता–द्विविधा वैमानिका देवाः–कल्पोपपन्नाः कल्पातीताश्च (सू० १८) इति । ततः के कल्पा इत्यत्रोच्यते—

टी०—पीतपद्मशुक्ललेश्या द्वित्रिशेषेषु । पूर्वत्र बहुव्रीहिरुत्तरत्र द्वन्द्वः, यथासङ्ख्यं चाभिसम्बन्धः कार्यः । उपर्युपरि वैमानिका इत्यादि भाष्यम् । समानत्वे सत्यप्युपर्युपरि विशुद्धिप्रकर्षः, सौधर्मेशानयोः कनकवच्छुचयः सुराः, सनत्कुमारमाहेन्द्रब्रह्मलोकेषु पद्मदलत्विषः । लान्तकादिषु धवलरुचयः[1] सर्वार्थसिद्धपर्यवसानेषु, भावलेश्याः पुनरध्यवसायरूपत्वात् षडपि वैमानिकानां सन्तीत्यवगन्तव्यम् । अपरे वर्णयन्ति–भावलेश्यानियमोऽयम्, स तु न सुष्ठु सङ्गच्छत इति नाद्रियते, एकप्रदेशे सर्वदेवानां लेश्याविधानं किमिति न कृतं चेत्, तन्न, सुखप्रबोधत्वाद् व्यतिकरनिवृत्त्यर्थत्वाच्चेति ॥ २३ ॥

अत्राह–उक्तं भवतेत्यादिपातनिकाग्रन्थः । द्विविधा वैमानिका इति प्रागभिहितं–कल्पवासिनः कल्पातीताश्च, तत् के पुनः कल्पा इति ? अत्रोच्यते—

सूत्रम्–प्राग् ग्रैवेयकेभ्यः कल्पाः ॥ ४–२४ ॥

भा०—प्राग् ग्रैवेयकेभ्यः कल्पा भवन्ति, सौधर्मादय आरणाच्युतपर्यन्ता इत्यर्थः । अतोऽन्ये कल्पातीताः ॥ २४ ॥

टी०—विविधविमानाश्रया व्याख्यातसङ्ख्याविशेषा ग्रैवेयकेभ्य आरात् कल्पा भवन्ति, शेषविषयसम्बन्धे दिग्लक्षणा पञ्चमी, कल्पशब्द उक्तार्थः । इन्द्रादिदशकल्पनात्मकत्वात् कल्पाः, सौधर्मादयोऽच्युतपर्यवसाना इति ॥ शेषाः कल्पातीता इति ॥ २४ ॥

१ 'रुचः' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—अत्राह–किं देवाः सर्व एव सम्यग्दृष्टयो यद् भगवतां परमर्षीणामर्हतां जन्मादिषु प्रमुदिता भवन्तीति? । अत्रोच्यते—न सर्वे सम्यग्दृष्टयः, किन्तु

देवानां दृष्टिः

सम्यग्दृष्टयः सद्धर्मबहुमानादेव तत्र प्रमुदिता भवन्त्यभिगच्छन्ति च । मिथ्यादृष्टयोऽपि च लोकचित्तानुरोधादिन्द्रानुवृत्त्या परस्परदर्शनात् पूर्वानुचरितामिति च प्रमोदं भजन्तेऽभिगच्छन्ति च । लौकान्तिकास्तु सर्व एव विशुद्धभावाः सद्धर्मबहुमानात् संसारदुःखार्तानां च सत्त्वानामनुकम्पया भगवतां परमर्षीणामर्हतां जन्मादिषु विशेषतः प्रमुदिता भवन्ति । अभिनिष्क्रमणाय च कृतसङ्कल्पान् भगवतोऽभिगम्य प्रहृष्टमनसः स्तुवन्ति सभाजयन्ति चेति ॥ २४ ॥

अत्राह–के पुनर्लोकान्तिकाः कतिविधा वेति? अत्रोच्यते—

टी०—अत्राह–किं देवाः सर्व एवेति भाष्यम् । कल्पवासिनस्तावत् सुखासक्ता अपि सन्तो भगवतां त्रिलोकबन्धूनामर्हतां जन्मनिष्क्रमणज्ञानोत्पत्तिमहासमवसरणनिर्वाणकालेष्वनुभावतो ज्ञानाच्चासीनाः शयिताः स्थिताः प्रस्थिता वा सहसैवासनचलनाद् दर्शनविशुद्धिभक्त्यनुवृत्त्यनुरागानन्यसदृशतीर्थकरनामकर्मोदयविभूतिजनितकुतूहलसद्धर्मबहुमानसंशयच्छेदापूर्वप्रश्नानुभावाद्यनेककारणनोदिताः प्रायस्तीर्थकरपादान्तिकमत्यन्तैकान्तहितमभ्येत्य स्तुतिवन्दनपूजनोपासनधर्मश्रवणैः स्वपरश्रद्धासंवेगजननैरात्मानमपनीतकल्मषं कुर्वन्ति । ग्रैवेयकादयस्तु यथावस्थिता एव कायवाङ्मनोभिरभ्युत्थानाञ्जलिप्रणिपाततथागुणवचनैकाग्र्यभावनाभिर्भगवतोऽर्हतो नमस्यन्ति । न च सर्वे देवाः सम्यग्दृष्टयः, किन्तु मिथ्यादृष्टयोऽपि वि(अभि)हितानेककारणाः पूजामर्हतां विदधत इति । लौकान्तिकास्तु सर्वे सम्यग्दृष्टयोऽवश्यं चार्हच्चरणमूलमायान्त्यर्हदादिसंवेगप्रशंसार्थमात्महितार्थं चेति ॥ २४ ॥

अत्राहेत्यादिपातनिकाग्रन्थः । कस्मिन् पुनः कल्पे विमाने वा लोकान्तिका देवाः प्रतिवसन्ति कतिविधा [भेदा] वा इति ? । अत्रोच्यते—

सूत्रम्—ब्रह्मलोकालया लोकान्तिकाः ॥ ४--२५ ॥

भा०—ब्रह्मलोकालया एव लोकान्तिका भवन्ति नान्यकल्पेषु, नापि परतः । ब्रह्मलोकं परिवृत्याष्टासु दिक्षु अष्टविकल्पा भवन्ति ॥ २५ ॥ तद्यथा—

टी०—ब्रह्मलोकालया एव लोकान्तिका भवन्तीत्यादि भाष्यम् । सामर्थ्यलभ्यमेवकारं दर्शयति, अवधारणफलं च, नान्यकल्पेषु नापि परतो ग्रैवेयकादिष्विति । लोकान्ते भवाः लोकान्तिकाः, अत्र प्रस्तुतत्वात् ब्रह्मलोक एव परिगृह्यते, तदन्तनिवासिनो लोकान्तिकाः, सर्वब्रह्मलोकदेवानां लोकान्तिकत्वप्रसङ्ग इति चेत्, न, लोकान्तोपश्लेषात्, जराम-

१ 'लौका०' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रणाग्निज्वालाकीर्णो वा लोकस्तदन्तवर्तित्वात् लोकान्तिकाः कर्मक्षयाभ्यासभावाच्च । ब्रह्मलोकं परिवृत्याष्टासु दिक्ष्वष्टविकल्पा भवन्ति । अत्र दिग्ग्रहणं सामान्येन दिग्विदिक्प्रतिपत्त्यर्थम् । ब्रह्मलोकाऽधोव्यवस्थितरिष्टविमानप्रस्तारवर्तिन्योऽक्षपाटकसंस्थिता अरुणवरसागरे समुद्भूता अतिबहलतमःकायप्रभवाः कृष्णराज्योऽष्टौ भवन्ति, यासां मध्येन प्रयान् देवोऽप्येकः सङ्क्षोभमापद्येतेति । तत्र द्वयोर्द्वयोः कृष्णराज्योर्मध्यभाग एते भवन्ति । स्थापना ॥ २५ ॥

तद्यथा—

सूत्रम्-सारस्वतादित्यवह्न्यरुणगर्दतोयतुषिताव्याबाधमरुतोऽरिष्टाश्च ॥ ४-२६ ॥

भा०—एते सारस्वतादयोऽष्टविधा देवा ब्रह्मलोकस्य पूर्वोत्तरादिषु दिक्षु प्रदक्षिणं भवन्ति यथासङ्ख्यम् । तद्यथा-पूर्वोत्तरस्यां दिशि सारस्वताः, पूर्वस्यामादित्या इत्येवं शेषाः ॥ २६ ॥

टी०—विमानसाहचर्याद् देवानां सारस्वतादिसंज्ञाः । एते सारस्वतादयोऽष्टविधा देवा इत्यादि सुगमम् । पूर्वोत्तरस्यां दिशि सारस्वताः, पूर्वस्यामादित्याः, पूर्वदक्षिणस्यां वह्नयः, दक्षिणस्यामरुणाः, दक्षिणापरस्यां गर्दतोयाः, अपरस्यां तुषिताः, अपरोत्तरस्यामव्याबाधाः, उत्तरस्यां मरुतः, मध्येऽरिष्टाः ॥

लोकान्तिकानां व्यवस्था

नन्वेवमेते नव भेदा भवन्ति, भाष्यकृता चाष्टविधा इति मुद्रिताः । उच्यते-लोकान्तवर्तिन एतेऽष्टभेदाः सूरिणोपात्ताः, रिष्टविमानप्रस्तारवर्तिभिर्नवधा भवन्तीत्यदोषः । आगमे तु नवधैवाधीता इति ॥ एवमयं कार्मणशरीरप्रणालिकयास्रवापेक्षयाऽऽपादितसुखदुःखानां भव्याभव्यभेदाहितद्वैविध्यानां प्राणिनां संसारोऽनादिरपर्यवसानः, अन्येषां मोहोपशमनक्षपणं प्रत्यादृतानामप्रतिपतितसम्यग्दर्शनानां परीतविषयत्वात् सप्ताष्टानि भवग्रहणान्युत्कर्षेणानुबन्धीनि, जघन्येन द्वित्राण्यतिवाह्योच्छिद्यते, इत्यविशेषे सत्यन्ये भाज्याः ॥ २६ ॥

अमी पुनरुत्कर्षेण—

सूत्रम्-विजयादिषु द्विचरमाः ॥ ४-२७ ॥

टी०—द्वौ चरमावेषां द्विचरमाः । चरमशब्द उक्तार्थः, चरमद्विदेहा इतियावत् । चरमत्वमेकस्मिन्निति चेत्, न, औपचारिकत्वात् ।

भा०—विजयादिष्वनुत्तरेषु विमानेषु देवा द्विचरमा भवन्ति । द्विचरमा इति ततश्च्युताः परं द्विर्जनित्वा सिध्यन्तीति । सकृत् सर्वार्थसिद्धमहाविमानवासिनः, शेषास्तु भजनीयाः ॥ २७ ॥

---

१ 'व्याबाधारिष्टामरुतः' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुत्तरदेवानां भवोच्छेदः

टी०—विजयादिष्वित्यादि भाष्यम्। विजयादिषु चतुर्षु विमानेषु, अन्यविजयादिव्यावृत्त्यर्थमनुत्तरग्रहणम्, अनुत्तरशब्दस्पर्शादियोगादनुत्तरविमानानि तेषु देवा द्विचरमा भवन्ति, द्विचरमत्वं स्पष्टयति—ततो विजयादिभ्यश्च्युताः परम्—उत्कर्षेण द्विर्जनित्वा मनुष्येषु सिद्धिमनुगच्छन्ति, विजयादिविमानाच्च्युतो मनुष्यः पुनरपि विजयादिषु देवस्ततश्च्युतो मनुष्यः सन् सिध्यतीति। अपरे वर्णयन्ति—विजयादिभ्यश्च्युताः परतो मनुष्याः सर्वार्थसिद्धजन्मलाभं लब्ध्वा तृतीये भवे सिध्यन्तीति द्विचरमाः। एतच्चयुक्तं व्याख्यानम्। सर्वार्थसिद्धविमानोत्पादे सति तत्प्रच्युतिसमनन्तरजन्मनि सिद्धिगतिश्रवणात् कोऽतिशयस्तत्र विजयादीनामिति?। सर्वार्थसिद्धविमानवासिनस्तु सकृज्जनित्वा मनुष्येषु सिद्धिमधिगच्छन्ति—मुक्तिमासादयन्ति, सर्वे चानुत्तरोपपातिनः किल देवाः प्रतनुकर्माणो भवन्तीति। यथाऽऽहागमे—"अणुत्तरोववाइयाणं देवाणं[1] ! भंते ! केवइएणं कम्मावसेसेणं अणुत्तरोववाइयत्तेणं उववन्ना ? गोयमा ! जावतिअन्नं छट्ठभत्तीए समणे निग्गंथे कम्मं निज्जरेइ एवतिएणं कम्मावसेसेणं अणुत्तरोववाइयत्ताए उववन्ना"[2]। शेषास्तु भजनीयाः। वैमानिकप्रतिपत्त्यर्थं वा शेषग्रहणम्। अथवा समस्तदेवप्रतिपादनार्थमध्यवसातव्यम्, अतः शेषाः कदाचित् क्वचित् सकृद् द्वित्रिचतुःप्रभृति वा मनुष्येषु जन्मासाद्य सिद्ध्यन्तीति ॥ २७ ॥

तिर्यक्प्रस्तावः

भा०—अत्राह उक्तं भवता—जीवस्यौदयिकेषु भावेषु तिर्यग्योनिगतिरिति, तथा स्थितौ 'तिर्यग्योनीनां च' (अ० ३, सू० १८) इति, आस्रवेषु 'माया तैर्यग्योनस्य' (अ० ६, सू० १७) इति। तत् के तिर्यग्योनय इति ?। अत्रोच्यते—

टी०—अत्राह—उक्तं भवतेत्यादिसम्बन्धग्रन्थः। द्वितीयेऽध्याये (सू० ६) औदयिकभावव्याख्याप्रस्तावे तिर्यग्योनिगतिरुक्ता, तृतीयाध्यायपरिसमाप्तौ (सू० १८) तिर्यग्योनिजानां चेति स्थितिरायुषोऽभिहिता, षष्ठे चास्रवप्रस्तावे (सू० १७) माया तैर्यग्योनस्येति वक्ष्यते, तत् के तिर्यग्योनय इति ?। अत्रोच्यते—

सूत्रम्—औपपातिकमनुष्येभ्यः शेषास्तिर्यग्योनयः ॥ ४—२८ ॥

तिरश्चां निर्देशः

भा०—औपपातिकेभ्यश्च नारकदेवेभ्यो मनुष्येभ्यश्च यथोक्तेभ्यः शेषा एकेन्द्रियादयस्तिर्यग्योनयो भवन्ति ॥ २८ ॥

टी०—औपपातिकेभ्यश्चेत्यादि भाष्यम्। औपपातिका[3] नारकदेवास्तेभ्यो मनुष्ये-

---

१ अनुत्तरोपपातिका देवा भदन्त ! कतिपयेन कर्मावशेषेण अनुत्तरोपपातिकत्वेन उपपन्नाः ? गौतम ! यावत् षष्ठभक्तिकः श्रमणः निर्ग्रन्थः कर्म निर्जरयति एतावता कर्मावशेषेण अनुत्तरोपपातिकतया उपपन्नाः (भग०)।

२ 'उपपातिका' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भ्यश्च गर्भव्युत्क्रान्तिभ्यः सम्मूर्च्छनजेभ्यश्च ये शेषाः एकद्वित्रिचतुष्पञ्चेन्द्रियास्ते सर्वेऽपि तिर्यग्योनिव्यपदेशभाजो भवन्ति । देवादिवत् तदाधारनिर्देश इति चेत्, न, सर्वलोकव्यापित्वात्, तिर्यग्लोके चैते भूयांस इति तिर्यग्योनिसंज्ञा प्रतिपत्तव्येति ॥ २८ ॥

भा०—अत्राह–तिर्यग्योनिमनुष्याणां स्थितिरुक्ता । अथ देवानां का स्थितिरिति ? । अत्रोच्यते—

टी०—अत्राह–तिर्यग्योनिमनुष्याणामित्यादिपातनिकाग्रन्थः । तृतीयाध्यायपरिसमाप्तौ नृतिरश्चां परापरस्थिती गदिते । अथ देवानां भवनवासिप्रभृतीनां का स्थितिरायुष इति ? । अत्रोच्यते—

सूत्रम्–स्थितिः ॥ ४–२९ ॥

भा०—स्थितिरित्यत ऊर्ध्वं वक्ष्यते ॥ २९ ॥

टी०—स्थितिरित्यत ऊर्ध्वं वक्ष्यत इति भाष्यम् । इतः प्रभृति स्थितिरित्यधिक्रियते, सा तु द्वयी जघन्योत्कृष्टभेदादिति, यद्येवमुभयसम्भवे भवनवासिनामेव तावदादिनिर्देशभाजामुच्यतां का परा स्थितिरिति, इमेऽभिदध्महे-सत्यपि तेषां विकल्पबहुत्वे महामन्दरावधेर्दक्षिणोत्तरार्धाधिपतिविभाग एवाद्रियते ॥ २९ ॥

सूत्रम्–भवनेषु दक्षिणार्धाधिपतीनां पल्योपममध्यर्धम् ॥ ४–३० ॥

भवनवासिनां स्थितिः

भा०—भवनेष तावद् भवनवासिनां दक्षिणार्धाधिपतीनां पल्योपममध्यर्धं परा स्थितिः, द्वयोर्यथोक्तयोर्भवनवासीन्द्रयोः पूर्वो दक्षिणार्धाधिपतिः पर उत्तरार्धाधिपतिः ॥ ३० ॥

टी०—भवनेष दक्षिणार्धाधिपतीनां पल्योपममध्यर्धम्, चमरं विहायासुरनिकायपरिवृढं शेषभवनवासिदक्षिणार्धाधिपतीनामर्धाधिकं पल्योपमं स्थितिरायुषो वेदितव्या, उक्तलक्षणं पल्योपमम्, अधिकमर्धमस्मिंस्तदिदमध्यर्धम्, बहुव्रीहिणा पल्योपमाभिसम्बन्धः, सन्देहापनोदनायेदमाख्यायते–पूर्वनिर्दिष्टयोर्द्वयोर्भवनवासीन्द्रयोः प्रथमनिर्दिष्टो यः स दक्षिणार्धाधिपतिरवसेयः, पश्चान्निर्दिष्ट उत्तरार्धाधिपतिरिति ॥ ३० ॥

अथोत्तरार्धाधिपतीनामायुषः का स्थितिरित्याह—

सूत्रम्—शेषाणां पादोने ॥ ४–३१ ॥

भा०—शेषाणां भवनवासिष्वधिपतीनां (शेषाणां) द्वे पल्योपमे पादोने परा स्थितिः । के च शेषाः? उत्तरार्धाधिपतय इति ॥ ३१ ॥

---

१ ' द्वयोः ' इत्यधिको घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—दक्षिणार्धाधिपतीनां व्यतिरिक्ता उत्तरार्धाधिपतयः शेषा बलिव्यतिरिक्ताः तेषां पादोने द्वे पल्योपमे स्थितिरायुषः, पादश्चतुर्थभाग इति ॥ ३१ ॥

अथ किमेषां भवनवास्यधिपतीनां सर्वेषामियं परा स्थितिः ? नेत्युच्यते, किन्त्वाधिपत्यसामान्ये विशेषेणानयोः प्रतिपत्तव्या ॥ ३१ ॥

सूत्रम्—असुरेन्द्रयोः सागरोपममधिकं च ॥ ४--३२ ॥

भा०—असुरेन्द्रयोस्तु दक्षिणार्धाधिपत्युत्तरार्धाधिपत्योः सागरोपममधिकं च यथासङ्ख्यं परा स्थितिर्भवति ॥ ३२ ॥

टी०—पूर्वा(दक्षिणा ?)र्धाधिपतेश्चमरस्योत्तरार्धाधिपतेश्च बलिराजस्य यथासङ्ख्यमेव, सागरोपमं चमरस्य बलेस्तदेवाधिकं कियताऽपि विशेषेण सागरोपमस्थितिरायुषो भवतीति, । उक्तं च सागरोपमं लक्षणतः प्रागिति, असुरकुमारीणां चत्वारि पल्योपमानि सार्धानि परा स्थितिः, शेषाणां नागवधूप्रभृतीनां सर्वभवनवासिनीनां देशोनं पल्योपममुत्कृष्टा स्थितिरिति ॥ ३२ ॥

आद्यदेवनिकायस्थितिव्याख्यानानन्तरं व्यन्तरज्योतिष्कानवसरप्राप्तानतिलङ्घ्योपरिष्टादेव तावल्लाघवार्थिना वैमानिकनिकायस्थितिराख्यायते—

वैमानिकस्थितिप्रस्तावः

सूत्रम्—सौधर्मादिषु यथाक्रमम् ॥ ४--३३ ॥

भा०—सौधर्ममादिं कृत्वा यथाक्रममित ऊर्ध्वं परा स्थितिर्वक्ष्यते ॥ ३३ ॥

टी०—सौधर्ममादिं कृत्वा यावत् सर्वार्थसिद्धविमानं तावद् यथाक्रममिति ऊर्ध्वं स्थितिर्वक्ष्यते देवानामायुष इति ॥ ३३ ॥

सूत्रम्—सागरोपमे ॥ ४--३४ ॥

भा०—सौधर्मे कल्पे देवानां परा स्थितिर्द्वे[1] सागरोपमे इति ॥ ३४ ॥

टी०—इन्द्रसामानिकानां सागरोपमद्वयं सौधर्मे स्थितिरुत्कृष्टा लभ्यत इति ॥ ३४ ॥

सूत्रम्—अधिके च ॥ ४--३५ ॥

भा०—ऐशाने द्वे सागरोपमे अधिके परा स्थितिर्भवति ॥ ३५ ॥

टी०—अधिके च यथाक्रमग्रहणादैशानोऽभिसम्बध्यते । द्वे सागरोपमे कियताऽपि विशेषेणाधिके ऐशाने कल्पे परा स्थितिरिन्द्रादीनामिति ॥ ३५ ॥

सूत्रम्—सप्त सनत्कुमारे ॥ ४--३६ ॥

भा०—सनत्कुमारे कल्पे सप्त सागरोपमाणि परा स्थितिर्भवति ॥ ३६ ॥

---

१ 'द्वे' इत्यधिको ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—सनत्कुमारे सप्त सागरोपमाणि परा स्थितिरिन्द्रादीनामिति ॥ ३६ ॥

सूत्रम्–विशेषत्रिसप्तदशैकादशत्रयोदशपञ्चदशभिरधिकानि च ॥४–३७॥

भा०—एभिर्विशेषादिभिरधिकानि सप्त माहेन्द्रादिषु परा स्थितिर्भवति । सप्तेति वर्तते । तद्यथा–माहेन्द्रे सप्त विशेषाधिकानि, ब्रह्मलोके त्रिभिरधिकानि सप्त, दशेत्यर्थः । लान्तके सप्तभिरधिकानि सप्त, चतुर्दशेत्यर्थः । महाशुक्रे दशभिरधिकानि सप्त, सप्तदशेत्यर्थः । सहस्रारे एकादशभिरधिकानि सप्त, अष्टादशेत्यर्थः । आनतप्राणतयोस्त्रयोदशभिरधिकानि सप्त, विंशतिरित्यर्थः । आरणाच्युतयोः पञ्चदशभिरधिकानि सप्त, द्वाविंशतिरित्यर्थः ॥ ३७ ॥

माहेन्द्रादीनां परा स्थितिः

टी०—सप्त सागरोपमाणि विशेषेणाधिकानि माहेन्द्रे परा स्थितिः, ब्रह्मलोके सप्त त्रिभिरधिकानि परा स्थितिः, दश सागरोपमाणीत्यर्थः । लान्तके सप्त सागरोपमाणि सप्तभिरधिकानि परा स्थितिश्चतुर्दशसागरोपमेतियावत् । महाशुक्रे सप्त सागरोपमाणि दशभिरधिकानि परा स्थितिः, सप्तदश सागरोपमाणीत्यर्थः । सहस्रारे सप्त सागरोपमाण्येकादशभिरधिकानि परा स्थितिरष्टादशसागरोपमेतियावत् । आनतप्राणतयोः सप्त सागरोपमाणि त्रयोदशभिरधिकानि परा स्थितिर्विंशतिसागरोपमेत्यर्थः । एकेन्द्रोपभोग्यत्वान्न पृथक् कल्पद्वयेऽभिहिता । आरणाच्युतयोः सप्त सागरोपमाणि पञ्चदशभिरधिकानि परा स्थितिर्द्वाविंशतिसागरोपमेत्यर्थः । अत्राप्येकेन्द्रोपभोग्यत्वादेव न विवेकेनाभिधानमिति ॥ ३७ ॥

सूत्रम्–आरणाच्युतादूर्ध्वमेकैकेन नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धे च ॥ ४–३८ ॥

भा०—आरणाच्युतादूर्ध्वमेकैकेनाधिका स्थितिर्भवति नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धे च । आरणाच्युते द्वाविंशतिर्ग्रैवेयकेषु पृथगेकैकेनाधिकास्त्रयोविंशति(प्रभृति)रित्यर्थः । एवमेकैकेनाधिकाः सर्वेषु नवसु यावत् सर्वेषामुपरि नवमे एकत्रिंशत् । सा विजयादिषु चतुर्ष्वप्येकेनाधिका द्वात्रिंशत् । साऽप्येकेनाधिका, सर्वार्थसिद्धे त्वजघन्योत्कृष्टा त्रयस्त्रिंशदिति ॥ ३८ ॥

टी०—आरणाच्युतादिति कृतैकवद्भावो निर्देशः, आरणोपलक्षितो वाऽच्युतः, ऊर्ध्वमेकैकेन सागरोपमेणाधिका नवस्वपि ग्रैवेयकेषु विजयादिषु च चतुर्षु सर्वार्थसिद्धे च परा स्थितिर्वेदितव्येति । शेषं भाष्यं सुज्ञानमेव ॥ ३८ ॥

भा०—अत्राह–मनुष्यतिर्यग्योनिजानां परापरे स्थिती व्याख्याते, अथौपपातिकानां किमेकैव स्थितिः परापरे न विद्यते इति ? । अत्रोच्यते—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—अत्राहेत्यादिसम्बन्धग्रन्थः । नृतिरश्चां परापरे स्थिती व्याख्याते, औपपातिकानां पुनर्नारकदेवानां किमेकैवोत्कृष्टा स्थितिरितरा नास्ति ? । अस्तीत्याह—

सूत्रम्—अपरा पल्योपममधिकं च ॥ ४—३९ ॥

भा०—सौधर्मादिष्वेव यथाक्रममपरा स्थितिः पल्योपममधिकं च । अपरा जघन्या निकृष्टेत्यर्थः । परा प्रकृष्टा उत्कृष्टेत्यनर्थान्तरम् । तत्र सौधर्मेऽपरा स्थितिः पल्योपमम्, ऐशाने पल्योपममधिकं च ॥ ३९ ॥

टी०—सौधर्मादिषु यथाक्रममित्येतदनुवर्तते, अपरा जघन्या, सौधर्मे कल्पे पल्योपममायुषः स्थितिर्भवति, ऐशाने तदेव पल्योपममधिकं कियतापि विशेषेण जघन्या स्थितिरिति ।

सूत्रम्—सागरोपमे ॥ ४—४० ॥

भा०—सनत्कुमारे अपरा स्थितिर्द्वे सागरोपमे ॥ ४० ॥

टी०—सनत्कुमारे द्वे सागरोपमे जघन्या स्थितिः ॥ ४० ॥

सूत्रम्—अधिके च ॥ ४—४१ ॥

भा०—माहेन्द्रे जघन्या स्थितिराधिके द्वे सागरोपमे ॥ ४१ ॥

टी०—द्वे सागरोपमे अधिके जघन्या स्थितिर्माहेन्द्रे ॥ ४१ ॥

सूत्रम्—परतः परतः पूर्वा पूर्वाऽनन्तरा ॥ ४—४२ ॥

भा०—माहेन्द्रात् परतः पूर्वा परा(पूर्वा)ऽनन्तरा जघन्या स्थितिर्भवति । तद्यथा—माहेन्द्रे परा स्थितिर्विशेषाधिकानि सप्त सागरोपमाणि सा ब्रह्मलोके जघन्या स्थितिर्भवति । ब्रह्मलोके दश सागरोपमाणि परा स्थितिः सा लान्तके जघन्या । एवमा सर्वार्थसिद्धादिति । [विजयादिषु चतुर्षु परा स्थितिस्त्रयस्त्रिंशत् सागरोपमाणि, साऽजघन्योत्कृष्टा सर्वार्थसिद्ध इति] ॥ ४२ ॥

टी०—परतः परतः पूर्वा पूर्वानन्तरा ब्रह्मलोकादिषु पूर्वकल्पस्थितिरुत्कृष्टा सोपरितनानन्तरकल्पे जघन्या वेदितव्या । तद्यथा—माहेन्द्रे सप्त सागरोपमाणि विशेषाधिकानि परा स्थितिः सा ब्रह्मलोके जघन्या । ब्रह्मलोके दश सागरोपमाणि परा सा लान्तके जघन्येत्येवं शेषेष्वप्यायोजनीया यावत् सर्वार्थसिद्धविमानम्।तत्र विजयादिषु चतुर्षु जघन्येनैकत्रिंशदुत्कर्षेण द्वात्रिंशत्, सर्वार्थसिद्धे त्रयस्त्रिंशत् सागरोपमाण्यजघन्योत्कृष्टा स्थितिः। भाष्यकारेण तु सर्वार्थसिद्धेऽपि जघन्या द्वात्रिंशत् सागरोपमाण्यधीता, तन्न विद्मः

१ यद्यपि वर्जनप्रसङ्गे प्राक् चतुर्थ्याः प्राक् ग्रैवेयकेभ्य इत्यादिवत् प्राक्शब्दः प्रयुज्यते, समादानप्रसङ्गे आचतुर्भ्य इत्यादिवत् आङा निर्देश इत्यत्र आङा निर्देशात् सर्वार्थसिद्धस्यापि ग्रहणमापन्नमिति वृत्त्यभिप्रायः, परं प्राग्अजघन्योत्कृष्टतया त्रयस्त्रिंशतः सागरोपमाणां कथनात् न तत्र जघन्यस्थितिरन्या भाष्यकृतोऽभिप्रेता । एकपुत्रस्य ज्येष्ठकनिष्ठतावत् तु अत्राङोक्तिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केनाप्यभिप्रायेण । आगमस्तावदयम्-"सव्वट्ठसिद्धदेवाणं भंते ! केवतियं कालं ठिई पण्णत्ता ? गोयमा ! अजहण्णुक्कोसेणं तित्तीसं सागरोवमाइं ठिई पन्नत्ता" (प्रज्ञा० प० ४, सू० १०२)। सौधर्मे देवीनां परिगृहीतानां जघन्येन पल्योपममुत्कर्षेण सप्त पल्योपमानि, अपरिगृहीतानां जघन्येन पल्योपममुत्कर्षेण तु पञ्चाशत् पल्योपमानि, ऐशाने तु परिगृहीतदेवीनां सातिरेकं पल्योपममुत्कर्षेण नव पल्योपमानि, अपरिगृहीतानां जघन्येन सातिरेकं पल्योपममुत्कर्षेण पञ्चपञ्चाशत् पल्योपमानीति ॥

परतः परतः पूर्वा पूर्वानन्तरेत्यभिसम्बन्धुकामोऽत्राप्रकृतानामपि लघ्वर्थं पुनर्वक्तव्यगौरवभीत्याऽवतारयति-

सूत्रम्—नारकाणां च द्वितीयादिषु ॥ ४-४३ ॥

भा०—नारकाणां च द्वितीयादिषु भूमिषु पूर्वा पूर्वा परा स्थितिरनन्तरा परतः परतोऽपरा भवति । तद्यथा-रत्नप्रभायां नारकाणामेकं सागरोपमं परा स्थितिः, सा जघन्या शर्कराप्रभायाम् । त्रीणि सागरोपमाणि परा स्थितिः शर्कराप्रभायां, सा जघन्या वालुकाप्रभायामित्येवं सर्वासु । तमःप्रभायां द्वाविंशतिः सागरोपमाणि परा स्थितिः सा जघन्या महातमःप्रभायामिति ॥ ४३ ॥

नारकाणां स्थितिः

टी०—सुज्ञानमेव भाष्यं प्रायः, सप्तम्यां चतुर्षु नरकेषु जघन्या द्वाविंशतिसागरोपमा स्थितिरुत्कृष्टा त्रयस्त्रिंशत् सागरोपमाणि, अप्रतिष्ठाने तु त्रयस्त्रिंशत् सागरोपमाण्यजघन्योत्कृष्टेति ॥ ४३ ॥

अथ प्रथमायां कथं जघन्या प्रतिपत्तव्येत्याह-

सूत्रम्—दश वर्षसहस्राणि प्रथमायाम् ॥ ४-४४ ॥

भा०—प्रथमायां भूमौ नारकाणां दश वर्षसहस्राणि जघन्या स्थितिः ॥४४॥

टी०—दश वर्षसहस्राणि प्रथमायां प्रथमवसुधानारकाणां स्थितिर्जघन्यैतावतीति ४४

सूत्रम्—भवनेषु च ॥ ४-४५ ॥

भा०—भवनवासिनां दश वर्षसहस्राणि जघन्या स्थितिरिति ॥ ४५ ॥

टी०—भवनवासिनामप्येषैव जघन्येति ॥ ४५ ॥

सूत्रम्—व्यन्तराणां च ॥ ४-४६ ॥

भा०—व्यन्तराणां च देवानां दश वर्षसहस्राणि जघन्या स्थितिः ॥ ४६ ॥

टी०—एषामपि जघन्या भवनवासिदेववद् द्रष्टव्येति ॥ ४६ ॥

---

१ सर्वार्थसिद्धदेवानां भदन्त ! कियन्तं कालं स्थितिः प्रज्ञप्ता ? गौतम ! अजघन्योत्कर्षेण त्रयस्त्रिंशत् सागरोपमाणि स्थितिः प्रज्ञप्ता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ व्यन्तराणां परा स्थितिः कीदृशीत्याह—

सूत्रम्—परा पल्योपमम् ॥ ४–४७ ॥

भा०—व्यन्तराणां परा स्थितिः पल्योपमं भवति ॥ ४७ ॥

टी—व्यन्तरदेवानां पल्योपममुत्कृष्टा, व्यन्तरीणामुत्कर्षेण पल्योपमार्धमिति ॥ ४७॥

अथ ज्योतिष्काणामुत्कृष्टस्थित्यभिधित्सया प्राह–

सूत्रम्—ज्योतिष्काणामधिकम् ॥ ४–४८ ॥

भा०—ज्योतिष्काणां देवानामधिकं पल्योपमं स्थितिर्भवति ॥ ४८ ॥

टी०—पल्योपममित्यनुवर्तते, तदधिकं ज्योतिष्कदेवानामुत्कृष्टा स्थितिः सूर्यदेवस्य वर्षसहस्राधिकं पल्योपमम्, चन्द्रमसो वर्षलक्षाधिकं तदेव, ज्योतिष्कदेवीनामुत्कर्षेण पल्योपमार्धं पञ्चाशार्द्धवर्षसहस्रैरभ्यधिकमिति ॥ ४८ ॥

सूत्रम्—ग्रहाणामेकम् ॥ ४–४९ ॥

भा०—ग्रहाणामेकं पल्योपमं परा स्थितिर्भवति ॥ ४९ ॥

टी०—पल्योपममभिसम्बन्ध्यते, अङ्गारकादीनामिति ॥ ४९ ॥

सूत्रम्—नक्षत्राणामर्धम् ॥ ४–५० ॥

भा०—नक्षत्राणां देवानामर्धपल्योपमं परा स्थितिर्भवति ॥ ५० ॥

टी०—अश्विन्यादीनां पल्योपमार्धं स्थितिः परेति ॥ ५० ॥

सूत्रम्—तारकाणां चतुर्भागः ॥ ४–५१ ॥

भा०—तारकाणां च पल्योपमचतुर्भागः परा स्थितिर्भवति ॥ ५१ ॥

टी०—परा स्थितिः पल्योपमचतुर्भागस्तारकाणामिति ॥ ५१ ॥

सूत्रम्—जघन्या त्वष्टभागः ॥ ४–५२ ॥

भा०—तारकाणां तु जघन्या स्थितिः, पल्योपमाष्टभागः ॥ ५२ ॥

टी०—तारकाणां पल्योपमाष्टभागो जघन्येति ॥ ५२ ॥

सूत्रम्—चतुर्भागः शेषाणाम् ॥ ४–५३ ॥

भा०—तारकाभ्यः शेषाणां ज्योतिष्काणां चतुर्भागः पल्योपमस्यापरा स्थितिरिति ॥ ५३ ॥

टी०—तारकव्यतिरिक्तज्योतिष्काणां ग्रहनक्षत्राणां जघन्या स्थितिः पल्योपमचतुर्भागो वेदितव्येति ॥ ५३ ॥

॥ इति श्रीतत्त्वार्थसङ्ग्रहे अर्हत्प्रवचने भाष्यानुसारिण्यां टीकायां देवगतिप्रदर्शनो नाम चतुर्थोऽध्यायः ॥

॥ इति चतुर्थोऽध्यायः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चमोऽध्यायः ५

टी०—निर्देशस्वामित्वादिभिरनुयोगद्वारैर्लक्षणविधानभाजो जीवानभिधायोद्देशसूत्रे तत्समनन्तरोपदिष्टानजीवान् विवक्षुः पञ्चमाध्यायसम्बन्धाभिप्रायेणाह—

भा०—उक्ता जीवाः, अजीवान् वक्ष्यामः ॥

टी०—अभिहिता यथाशक्ति द्रव्यभावप्राणकलापवर्तिनो जन्तवः सुरतिर्यङ्मनुष्यनारकविधानतस्तथा साकारानाकारोपयोगद्वयलाञ्छनाविच्छिन्नचैतन्यशक्तितश्च ।

सूत्रोपन्यासः

अधुना तु लक्षणविधानाभ्यामजीवान् धर्मादींश्चतुरः सहकालानभिधास्याम इति प्रत्यज्ञायि वाचकमुख्येन, अतः प्रकृतप्रतिज्ञास्वतत्त्वप्रचिकाशयिषयेदमाह—

सूत्रम्—अजीवकाया धर्माधर्माकाशपुद्गलाः ॥ ५–१ ॥

टी०—उक्तलक्षणा जीवाः, 'उपयोगो लक्षणम्' (अ० २, सू० ८) इति न जीवा अजीवाः द्रव्यभावप्राणानभिसम्बन्धादनात्तचैतन्यशक्तयः, वैशेषिकं जीवलक्षणमनुसन्धाय प्रतिषेधः क्रियते, न सत्त्वज्ञेयत्वप्रमेयत्वादि, 'नञ्युक्तमिवयुक्तं चे'त्यादिन्यायात्, अन्यथा व्योमोत्पलादिकल्पाः स्युरजीवा इत्यतो जीवद्रव्यविपर्यया भवन्त्यजीवाः । न चात्र द्रव्यवस्तुतयोर्विपर्यास इष्टः, यस्माद् द्रव्यत्वमेवात्रानुशास्ति शास्त्रकारः, तथा वस्तुताविपर्यासे

प्रतिषेधस्य द्वैविध्यम्

गगनेन्दीवरसमानताऽनुषज्येत धर्मादीनाम्, अतः पारिशेष्याच्चैतन्यगुणविपर्ययः, स च विपर्यासरूपः प्रतिषेधो द्विधा–प्रसज्यपर्युदासभेदात्, तयोर्मूलल क्षणमिदम्—

"प्रतिषेधोऽर्थनिर्दिष्ट, एकवाक्यं विधेः परः ।
तद्वानस्वपदोक्तश्च, पर्युदासोऽन्यथेतरः ॥"

जीवादन्योऽजीव इति पर्युदासः सत एव वस्तुनोऽभिमतः, विधिप्रधानत्वात्, अतस्तुल्यास्तित्वेषु भावेषु चैतन्यनिषेधद्वारेण धर्मादिष्वजीवा इत्यनुशासनम् ॥ अपरे वर्णयन्ति–जीवनामकर्मणः प्रतिषेधोऽत्र विवक्षितः, तच्च जीवनाम जीवनात् किल भवति, अतोऽचेतनेष्वकर्मसु च वस्तुषु तुल्येऽस्तित्वे धर्मादिष्वजीवत्वमिति । अत्र द्वयं दुष्यति, प्राक् तावद् वाचोयुक्तिरेवानुपपन्ना जीवनामकर्मेति, नहि किञ्चिज्जीवनामकर्म प्रसिद्धमागमे, आयुर्हि जीवनमुच्यते, न पुनर्नामेति, तथा यद्यकर्मसु वस्तुष्वजीवत्वविधिः, सिद्धानामप्यजीवत्वप्रसङ्गः, ततश्चाजीव-

---

१ '०तिप्रतिज्ञास्य तत्त्व०' इति ग–पाठः ।

२ अजीवन् जीवन्ति जीविष्यन्ति चेति जीवा इतिव्युत्पत्तिर्द्रव्यभावप्राणधारणमाश्रित्य न कर्मणः प्रतिषेधोऽजीवे, यदा च केवलद्रव्यप्राणापेक्षया जीवनं तदा गोशब्दवत् वाच्यनियमनं वाच्यं पारिणामिकं जीवत्वं, तच्च सिद्धेऽपि, ततो नासावजीवः ऋजुसूत्राद्यपेक्षया तस्याजीवत्वेऽपि नैगमाद्यपेक्षया तथात्वात् नात्र तस्याजीवत्वविवक्षा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कायाः धर्माधर्माकाशसिद्धपुद्गला इति षडस्तिकायाः प्रसज्येरन् । अथ मतमचेतनेष्वकर्मस्वजीवत्वम्, एवं तर्हि चैतन्यप्रतिषेध एव ज्यायान्, किं जीवनप्रतिषेधेनेति ? । जीवो न भवतीत्यजीव इति प्रसज्यप्रतिषेधः, स च प्रसक्तस्य भवति भूयसेति, अत्र च न कथञ्चित् प्रसक्तश्चैतन्यधर्म इत्यत उपेक्ष्यते । अजीवानां कायाः अजीवकायाः, शिलापुत्रकस्य शरीरमित्यभेदेऽपि षष्ठी दृष्टा, तथा सुवर्णस्याङ्गुलीयकम्, अन्यत्वाशङ्काव्यावृत्त्यर्थो वा कर्मधारय एवाभ्युपेयते, अजीवाश्च ते कायाश्चेत्यजीवकायाः । कायशब्दः उपसमाधानवचनः । प्रदेशानामवयवानां च सामीप्येनान्योन्यानुवृत्त्या सम्यग्मर्यादया धारणमवस्थानमुपसमाधानम् । अथवा काया इवैते कायाः, शरीराणि यथा प्रदेशावयवित्वात् कायशब्दवाच्यान्येवमेतेऽपीति । कृतद्वन्द्वाश्चैते धर्मादयो निर्दिष्टाः,तत्र धर्मो वक्ष्यमाणगत्युपग्रहकार्यानुमेयः,स्थित्युपग्रहकार्यानुमेयश्चाधर्मः।।अथादृष्टौ धर्माधर्मौ शुभाशुभफलदायिनौ कस्मान्न गृह्येते?।।

धर्मादीनां विचारः

उच्यते–द्रव्यप्रस्तावापास्तत्वाद्, गुणत्वे सति तयोरप्रसङ्गः । अपि च–जैनानां धर्माधर्मौ शुभाशुभफलप्रसवसमर्थौ मूर्तावेव पुद्गलात्मकत्वादतः पुद्गलग्रहणेनैव तयोर्ग्रहणमिति नास्ति तद्विषया मनागप्यारेका । अवगाहोपकारानुमेयमाकाशम् । अलोकाकाशं कथमिति चेत् अनवगाह्यत्वादिति, उच्यते–तद्धि व्याप्रियेतैवावकाशदानेन यदि गतिस्थितिहेतू[1] धर्माधर्मौ तत्र स्याताम्, न च तत्र स्तस्तौ, तदभावाच्च विद्यमानोऽप्यवगाहनगुणो नाभिव्यज्यते किलालोकाकाशस्येति । पूरणाद् गलनाच्च पुद्गलाः, संहन्यमानत्वाद् विसंहतिमत्त्वाच्च । पुरुषं वा गिलन्ति पुरुषेण वा गीर्यन्ते इति पुद्गलाः, मिथ्यादर्शनादिहेतुवर्तिनं पुमांसं बध्नन्ति वेष्टयन्तीति गिरणार्थः, इतरत्रादानार्थो गिरतिः, पुरुषेणादीयन्ते कषाययोगभाजा कर्मतयेति पुद्गलाः । सत्यजीवत्वे कालः कस्मान्न निर्दिष्ट इति चेत् उच्यते—स त्वेकीयमतेन द्रव्यमित्याख्यास्यते द्रव्यलक्षणप्रस्ताव एव, अमी पुनरस्तिकायाः व्याचिख्यासिताः, न च कालोऽस्तिकायः, एकसमयत्वादिति ।

अजीवकायभेदाः

भा०—धर्मास्तिकायोऽधर्मास्तिकाय आकाशास्तिकायः पुद्गलास्तिकाय इत्यजीवकायाः । तान् लक्षणतः परस्ताद् वक्ष्यामः । कायग्रहणं प्रदेशावयवबहुत्वार्थमद्धासमयप्रतिषेधार्थं च ॥ १ ॥

टी०—धर्मास्तिकाय इत्यादि भाष्यम् । सूत्रे धर्मादयः कायग्रहणं च साक्षात्कृतं तदप्यजीवपदसम्बद्धं भाष्यकारः सामानाधिकरण्यनिर्देशे सति धर्मादिभिः सह संघटयति प्रत्येकं–धर्मास्तिकाय इति ।। ननु च धर्मकाय इति भाव्यम्, एवमस्तिशब्दोऽन्तरालवर्ती कुतोऽतर्कितः

---

१ स्वरूपविशेषणमेतत्, तेन नात्र गत्यादिना विशिष्टप्रतिषेधः, तत्त्वतः जीवपुद्गलानां गतिस्थितिहेतू धर्माधर्मौ न तत्र, तथा च शेषचतुष्टयास्तित्वाभावस्तत्रेति मनस्याधायैव वक्ष्यति तदभावेत्यादि ।

२ अजीवकाया इति सुवचम् । यद्वा अस्तीत्यस्योभयत्रापि अव्ययीभूताख्यातता । यद्वा पदैकदेशे पदसमुदायोपचार इति मूले कायशब्देनास्तिकायग्रहणं, तथा च भाष्ये धर्मास्तीत्यादिव्याख्या न विरोधिनी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पतित इति ? । उच्यते—ज्ञानशब्दयोर्निबन्धमुभयमर्थविदः प्रचक्षते स्वभावरूपमापत्तिरूपं च, तत्र प्रत्यस्तमितनिरवशेषविशेषणः स्वभावरूपः सर्वदाऽप्यविकार्यो येनांशेन ध्रौव्यपदव्यपदेशमश्नुतेऽसौ, यथा चैतन्यमात्मनोऽकृत्रिमम्, मूर्तत्वं वा पुद्गलद्रव्यस्य, धर्मादीनाममूर्तत्वं सकललोकव्यापिता गत्याद्युपग्रहादिलक्षणानि च ध्रुवाण्येतानि । आपादनमापत्तिः -आविर्भावतिरोभावौ, वस्तुनः उत्पादविनाशावितियावत्, तत्र मृन्मूर्तिरूपादिस्वभावमजहद् वस्तु घटकपालशकलाकारमास्कन्दन्न)दु?)त्पद्यत इति व्यपदिश्यते, यथा हि महतः सरसस्तरङ्गमालाः पटुमारुतवेगायासिताः प्रादुष्यन्ति जलद्रव्यात्मिकाश्च ताः, एवं घटादयोऽपीति । तथा विनाशोऽपि घटाद्याकारप्रलयः कारणापेक्षः स्थूलतरङ्गसन्ततीनामिव स्तिमितवारितयाऽवस्थानमुज्झितसमीरणप्रबलवेगसम्पर्काणामित्येवमुत्पादप्रलयध्रौव्यलक्षणः प्रवचनेऽस्त्यर्थः प्रासिधत् । तत्रैतत्त्रितयदिदर्शयिषयाऽऽचार्येणास्तिशब्दोऽव्ययसंज्ञः सकलधर्मादिद्रव्यध्रौव्यप्रतिपादनायाकारि, कायशब्दस्तु सूत्रेऽपात्त आपत्त्यर्थः । एवं तर्हि सूत्र एवोपादानमस्तिशब्दस्य न्याय्यम्, विशिष्टार्थप्रतिपत्त्यर्थत्वात्, कायशब्दवत्, कायशब्दो वा नोपादेयस्तत एव हेतोरस्तिशब्दवदिति । उच्यते—अन्यतरोपादाने ह्यत्रान्यतरसम्प्रत्ययो भवतीत्यभिप्रायः सूरेः, संसर्गादीनि कारणानि शब्दस्यान्यस्य सन्निधाने भवन्ति व्यवच्छेदे च—

"संसर्गो विप्रयोगश्च, साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं, शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः, कालो व्यक्तिः स्वरादयः ।
शब्दस्यार्थव्यवच्छेदे, विशेषस्मृतिहेतवः ॥" (श्रीहेमचन्द्रकृतकाव्यानुशासनवृत्तौ पृ० ३९)

एषामनन्तरोक्तानां मध्ये संसर्गो गृह्यते, अत्र संसर्गमङ्गीकृत्य ध्रौव्यार्थप्रतिपत्तयेऽस्तिशब्दप्रक्षेपः, उत्पादविनाशौ हि ध्रौव्याविनाभूतौ संसृष्टौ ध्रौव्येण, अन्यथा हि ध्रौव्यात्मकताभावेऽन्वयिशून्यत्वादसन्निहितभवितृकत्वादुत्पादविनाशौ निर्बीजौ न स्याताम् । नापि ध्रुवता आविर्भावतिरोभावरहिता, ततस्त्र्यात्मकं वस्तु जैनेन्द्राणां बुद्धिव्यवस्थापितप्रविभागं प्रज्ञापनोपायत्वान्नरसिंहादिवत्, अतः कायशब्देनापत्तिरभिधित्सिताऽस्तिशब्देन ध्रौव्यमिति । कथं पुनः कायग्रहणादापत्तिरुद्भवप्रलयात्मिका प्रतीयत इति ? । उच्यते—प्रचीयमानाकारता हि कायः समुदायः, स च विभागे सति भवति, विभक्ताश्च धर्मादिद्रव्यप्रदेशाः, न

१ कायशब्दस्तावत् निरुपचारेण कायादेरुपचारेण चास्तिकायस्य वाचकः, अत्र धर्मादिना संसर्गादस्तिकायार्थस्य ग्रहः, यद्वा धर्मादिशब्दा एव धर्मास्तिकायाद्यर्थाः, पञ्चमांगे तदनेकार्थेषु धर्म इत्यादेर्निर्देशात्, अजीवतायाः कायतायाश्च व्यक्तये अजीवकाया इति, आद्येन जीवास्तिकायस्य परेण कालस्य च व्यवच्छेदः ।

२ 'तत्रोपात्त' इति क-पाठः । ३ 'वा' इति क-पाठः ।

४ पुद्गलपरमाणूनामप्यस्त्येव विभागः, पूरणगलनधर्मत्वात्, नेत्यादि तु विशिष्टविभागताख्यापनाय ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्रैकः स्थितो धर्मप्रदेशः तत्रापरोऽपि तत्प्रदेशः प्रतिष्ठित इति, तेषां विभक्तप्रदेशानां योऽसौ परस्पराविच्छेदलक्षणः समुदायः सोऽवश्यंतया तथोत्पन्नः समुदायशब्दवाच्यत्वात् ॥ नन्वेवमादिमत्त्वं धर्मादीनां प्रसज्यते तन्त्वादिसमुदायवत् । उच्यते—तेऽपि हि नादिमन्तः पुद्गलद्रव्यस्यानेकशक्तित्वात्, सा च शक्तिः शक्तिमतो भेदाभेदाभ्यां त्रिसूत्र्यामेव वक्ष्यते, यत्र चोत्पादस्तत्रावश्यं विनाशेन भवितव्यम्, तत्सहचारित्वात्, स च विनाशः पूर्वावस्थाप्रच्युतिलक्षणः समुदायादेवोन्नीयत इति । अथवाऽधुना गतिपरिणतिभाजश्चैत्रस्य धर्मद्रव्यमुपग्रहं कुरुते, तच्चोपग्रहकारितया प्रागजिगमिषति चैत्रे न व्यापारमगमत्, उत्तरकालं तु कोऽप्यतिशयः समुदपादि येन गतेरुपग्रहकृद् भवति कयाऽपि विक्रियावस्थयेत्यतस्तेनाकारेणोत्पादः समुपरतगतिव्यापारे च चैत्रे तया गत्युपग्रहव्यापारावस्थया तत्पुनरपैत्यतो विनाश एव । अधर्माकाशयोरपि स्थित्यवगाहनामुखेनोत्पादविनाशौ वाच्यावतः कायग्रहणात् सुगम आपत्तिशब्दार्थ इत्यतोऽस्ति चासौ कायश्चेत्यस्तिकायः, ध्रुवश्चासावुत्पादविनाशवांश्चेत्यर्थः, धर्मश्चासावस्तिकायश्च धर्मास्तिकायः, एवमधर्माकाशावपीति । पुद्गलास्तिकाये तूत्पादव्ययध्रुवताः प्रकाशा एव प्रायः ॥ एवमेतांश्चतुरोऽप्यजीवान्[1] सूत्रेण परिगणय्याह—**तान् लक्षणतः परस्ताद् वक्ष्यामः** । तान् धर्मादीनेतावतः परस्ताद्—उपरि लक्षणतो गतिस्थित्युपग्रहावगाहशरीराद्युपकाररूपाद् वक्ष्यामः, इदं तूद्देशमात्रमारचितममुना सूत्रेण, अवश्यंतया च पदार्थभेदमभ्युपयता विविक्तमेव लक्षणमासञ्जनीयम्, अन्यथा भेद एव दुरुपपादः स्याद्, अतस्तान् प्रत्येकं लक्षणभेदेनाग्रे प्रतिपादयिष्याम इति ॥ अथ कायग्रहणं किमर्थमित्यत आह—**कायग्रहणं प्रदेशावयवबहुत्वार्थमद्धासमयप्रतिषेधार्थं चेति** ॥ ननु च कायग्रहणस्य प्रयोजनं वर्णितमापत्तिः कायशब्दार्थ इति, सत्यमुक्तं भाष्याक्षरानपेक्षम्, अधुना तमेवार्थं भाष्याक्षरैर्दर्शयति, विनाऽपि कायग्रहणेन धर्मादीनामजीवता गम्यत एव, तस्मात् तस्योपादाने प्रयोजनमेषां धर्माधर्माकाशानां प्रदेशबहुत्वमिष्यते, प्रकृष्टो देशः प्रदेशो निर्विभागः खण्डमनपायि स्वस्थानाद् अनादिकालपरिणामापादिततथास्थितिः, तेषामेवंविधप्रदेशानां बहुत्वं धर्माधर्मयोरसङ्ख्येयप्रदेशता प्रत्येकम्; आकाशस्यानन्तप्रदेशता बहुत्वार्थः, एवंविधासङ्ख्येयप्रदेशसमुदायो धर्मास्तिकायस्तथैवाधर्मास्तिकायः, आकाशमपि लोकपरिमाणमेतावत्प्रदेशसङ्ख्यम्, समस्ताकाशं त्वनन्तप्रदेशमित्येवं समुदितिरूपत्वाद् गत्याद्युपग्रहविक्रियापत्तिद्वारेण स्फुटैवापत्तिरिति । पुद्गलद्रव्यमङ्गीकृत्यावयवबहुत्वमुक्तम्, अवयूयन्त इत्यवयवाः परमाणुद्व्यणुकादयः, परमाणवो हि समुदायपरिणतिमनुभूय भेदमपि प्रतिपद्यन्ते, ततश्चैककाऽपि भवन्ति, न त्वेवं धर्मादिप्रदेशाः, अत एव च नावयवास्तेऽभिधीयन्ते, तस्माद् भेदेनोपादानं प्रदेशावयवयोः, बह्ववयवं हि पुद्गलद्रव्यमवगन्तव्यम्, सङ्ख्येयप्रदेशः स्कन्धोऽसङ्ख्येयप्रदेशोऽनन्तप्रदेशोऽनन्तानन्तप्रदेशश्चेति ॥ ननु चैकोऽपि परमाणुः पुद्गलद्रव्यमेव स कथं बह्ववयवो भवेत् ? किमत्र प्रतिपाद्यम् ? ननु प्रसिद्धमेवेदमेकरसगन्धवर्णो द्विस्पर्शश्चाणुर्भवति, भा-

१ अजीवप्रकरणायाजीवशब्द इत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वावयवैः सावयवो द्रव्यावयवैर्निरवयव इति। आगमश्च-"कइविहे णं भंते! भावपरमाणू पण्णत्ते? गोयमा! चउव्विहे भावपरमाणू पण्णत्ते, तंजहा-वण्णमंते रसमंते गंधमन्ते फासमन्ते इति"[1]। (भग० सू० ६७०) मतुबिह संसर्गे द्रव्यपरमाण्वपेक्षो वा तस्माद् वर्णाद्यवयवैर्बहुत्वं द्रव्याणोः। यच्च तत् तथा प्रयतते संयुज्यते वियुज्यते श्वेत इत्यादिकारणं तत् परमाणुद्रव्यम्, अत्राप्यापत्तिः स्पष्टा। तथा द्वितीयं कायग्रहणे प्रयोजनमद्धासमयः कायो न भवति, अद्धा चासौ समयश्चाद्धासमयः, स चार्धतृतीयद्वीपान्तर्वर्ती समय एकः परमसूक्ष्मो निर्विभागस्तस्य न कायता, समुदायश्च कायशब्दवाच्य इति, वक्ष्यत्यस्य द्रव्यप्रस्तावे द्रव्यतामेकीयमतानुसारिणीम्, द्रव्यं च प्रदेशप्रचितमवयवप्रचितं वा स्याद् आशङ्कमानो न्यषेधीत् कायग्रहणात् कायतामद्धासमयस्य। एवं तर्हि कायप्रतिषेधादनुत्पादविनाशः स्यात् समयः, तदभावाच्च ध्रौव्यमप्यपेयात्, ततश्च मण्डूकजटाभारकृतकेशालङ्कारवन्ध्यापुत्रखपुष्पमुण्डमालाख्यानवत् सकलमिदमनालम्बनं समयव्यावर्णनं स्यादिति। उच्यते-नायं नियमो यत्कायशब्देनाक्षिप्यते तदेवोत्पादविनाशवदितरन्न, कथं तर्हि प्रतिपत्तव्यमेवम्? ननु यत्र कायशब्द उपात्तस्तत्रायमर्थोऽस्य यदुतोत्पादविनाशौ स्वरससिद्धावेव च कायशब्देन प्रकाश्येते, न पुनरभूतावपि शब्दसामर्थ्यात् सन्निधानं कल्पयतः, यत्र तु कायग्रहणं नास्ति तत्र स्वरससिद्धावेवोत्पादविनाशौ तत्सहचरितत्वाच्च ध्रौव्यमपीत्येतत् समस्तमेव द्रव्यप्रस्तावे भावयिष्यामः। कारणसमुच्चयार्थश्चशब्दो भाष्ये प्रतिपत्तव्यः। प्रशस्ताभिधानाद् धर्मग्रहणमादौ लोकव्यवस्थाहेतुत्वाद् विपरीतत्वादेकद्रव्यत्वाद् वाऽधर्मग्रहणमनन्तरं, तत्परिच्छेद्यमाकाशं लोकत्वात् तदनन्तरममूर्तसाधर्म्याच्च, तदवगाढत्वात् तदनन्तरं पुद्गला इति विशिष्टक्रमसन्निवेशप्रयोजनमेतदेवमवसेयमिति॥ १॥

धर्मादीनां द्रव्यगुणपर्यायत्वेनानुपदेशे सति सन्देहः स्यात्, अतः सन्देहव्यावृत्त्यर्थमिदमुच्यते-

सूत्रम्—द्रव्याणि जीवाश्च॥ ५-२॥

टी०—उपरिष्टाद् वक्ष्यते लक्षणं 'गुणपर्यायवद् द्रव्यम्' (अ० ५, सू० ३७) इति। तत्र द्रव्याणीति सामान्यसंज्ञा, धर्मादिका च विशेषसंज्ञा, अतः सामान्यविशेषसंज्ञाभाञ्जि धर्मादीनि, द्रव्यसंज्ञा च द्रव्यत्वनिमित्ता द्रव्यास्तिकनयाभिप्रायेण जातिश्च शब्दार्थः, तच्च द्रव्यत्वं परमार्थविचारणायां व्यतिरिक्ताव्यतिरिक्तपक्षावलम्बि, नैकान्तेनान्यद्धर्मादिभ्यो नान्यदिति पुरो वक्ष्यते त्रिसूत्र्याम्, अत एतानि धर्मादीनि मयूराण्डकरसवत् संमूर्च्छितसर्वभेदप्रभेदबीजानि देशकालक्रमव्यङ्ग्यभेदसमरसावस्थैकरूपाणि द्रव्याणि गुणपर्यायकलापपरिणामयोनित्वाद् भेदप्रत्यवमर्शेनाभिन्नान्यपि भिन्नानीव भासन्ते, "द्रव्यं च भव्ये" (पा० अ०५, पा०३, सू० १०४) इति वचनाद् भावे कर्तरि च निपात्यते। इह तु भावे, द्रव्यं भव्यं भवनमिति, गुणाः पर्यायाश्च भवनसमवस्थानमात्रका

द्रव्यशब्दार्थः

१ कतिविधो भदन्त! भावपरमाणुः प्रज्ञप्तः? गौतम! चतुर्विधः भावपरमाणुः प्रज्ञप्तः। तद्यथा—वर्णवान्, रसवान्, गन्धवान्, स्पर्शवान् इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवोत्थितासीनोत्कुटकशयितपुरुषवत्; तदेव च वृत्त्यन्तरव्यक्तिरूपेणापदिश्यते जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति, पिण्डातिरिक्तवृत्त्यन्तरावस्थाप्रकाशतायां तु जायत इत्युच्यते, सव्यापारे च भवनवृत्तिः, अस्तीत्यनेन निर्व्यापारात्मसत्ताख्यायते भवनवृत्तिरुदासीना, अस्तिशब्दस्य निपातत्वात्, विपरिणमत इत्यनेनापि तिरोभूतात्प्ररूपस्यानुच्छिन्नतयाऽनुवृत्तिकस्य रूपान्तरेण भवनम्, यथा क्षीरं दधिभावेन परिणमते विकारान्तरवृत्त्या भवनमवतिष्ठते, वृत्त्यन्तरव्यक्तिवृत्तिर्हेतुभाववृत्तिर्वा विपरिणामः । वर्धत इत्यनेन तु स एव परिणामः उपचयरूपः प्रवर्तते, यथाऽङ्कुरो वर्धते, उपचयवत्परिणामरूपेण भवनवृत्तिर्व्यज्यते, अपक्षीयत इत्यनेन तु तस्यैव परिणामस्यापचयवृत्तिराख्यायते दुर्बलीभवत्पुरुषवदपचयरूपेभवनवृत्त्यन्तरव्यक्तिरुच्यते, विनश्यतीत्यनेनाविर्भूतभवनवृत्तितिरोभवनमुच्यते, यथा विनष्टो घटः प्रतिविशिष्टसमवस्थानात्मिका भवनवृत्तिस्तिरोभूता, न त्वस्वभावतैव जाता, कपालाद्युत्तरभवनवृत्त्यन्तरक्रमावच्छिन्नरूपत्वादित्येवमादिभिराकारैर्द्रव्याण्येव भवनलक्षणान्यपदिश्यन्ते । अपरे सूत्रद्वयमेतदधीयते—"द्रव्याणि, जीवाश्च", तदयुक्तम्, अस्तिकायता द्रव्यता च प्रतिपिपादयिषिता जीवानाम्, सा चैकयोगेऽपि सति प्राणिनामव्याहतैव चशब्दोपादानसामर्थ्यादतः क एष निर्विशेषो योगद्वयादरः? । सम्प्रति भाष्यमनुस्रियते—

भा०—एते धर्मादयश्चत्वारो[1] जीवाश्च[2] पञ्च द्रव्याणि च भवन्तीति । उक्तं हि—'मतिश्रुतयोर्निबन्धा द्रव्येष्वसर्वपर्यायेषु, सर्वद्रव्यपर्यायेषु केवलस्य' (अ० १, सू० २७, ३०) इति ॥ २ ॥

टी०—एते धर्मादय इत्यादि । एत इति प्रथमसूत्रोपदिष्टाः धर्मादयश्चतुःसङ्ख्यावच्छिन्नाः प्राणिनश्चास्तिकायाः द्रव्याणि, चशब्दादुभयमभिसम्बध्यते प्राणिषु, द्रव्यता चैषां स्वपरनिमित्तद्वयोपलक्षिता, तत्र स्वनिमित्तं स्वधर्मव्याप्तिर्यायाऽसाववष्टब्धस्तथा गृह्यते स्वधर्मव्याप्त्यैव द्रव्यं, प्रतिपिप्यते प्रत्याय्यते च, यथाभूतं वा ज्ञायते । स्वधर्मप्राप्तिश्च व्याप्तिलक्षणा तादात्म्येन व्यवस्थानम्, ततश्च स्वभावावस्थानमेव द्रव्यलक्षणम् । परनिमित्तं चक्षुर्ग्राह्यं रूपमित्यादि योज्यम् । द्रव्यमेव हि तत् तथा व्यपदिश्यते रूपादितया गत्याद्युपग्रहकृत्तया च विशेषणापेक्षम्, पितापुत्रभ्रातृभागिनेयमातुलादिसम्बन्धिदेवदत्तवत् परनिजनिमित्तोपलक्षणदर्शनाभिप्रायेण चाह—उक्तं हीत्यादि । प्रथममभिहितं मतिज्ञानश्रुतज्ञानयोर्ग्रहणता द्रव्येषु धर्मादिष्वसकलपर्यायेषु, चक्षुरादिभिरिन्द्रियैस्तान्युपलक्ष्यन्ते, श्रुतेन चेत्यविशुद्धग्रहणमेतद्, विशुद्धं तु सर्वद्रव्यपर्यायेषु केवलस्येति, तेनापास्तसकलविशेषणेन केवलज्योतिषा द्रव्याणां याथात्म्यं स्वनिमित्तलक्षितमागृह्यते, अतः स्वपरनिमित्तोपलक्षितानि धर्मादीनि द्रव्याणि द्रव्यास्तिकायाभिप्रायवशात् प्रतिपत्तव्यानीति ॥ २ ॥

---

१ 'भवनरूप' इति क-पाठः । २ 'प्राणिनश्च' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथैतानि पञ्चसङ्ख्यावच्छिन्नानि धर्मादीनि द्रव्याणि किं कदाचित् स्वभावात् प्रच्यवन्ते ? पञ्चत्वसङ्ख्यां वा व्यभिचरन्ति ? मूर्तान्यमूर्तानि वेति प्रश्नत्रितयम् । अतः संशीतिव्यवच्छेदायेदमुच्यते—

सूत्रम्—नित्यावस्थितान्यरूपाणि च ॥ ५–३ ॥

टी०—यथासङ्ख्यमनेन सूत्रेण प्रश्नत्रितयं प्रत्युच्यते । नित्यग्रहणाद् धर्मादीनां स्वभावादप्रच्युतिराख्यायते, अवस्थितग्रहणादन्यूनानधिकत्वमाविर्भाव्यते, अनादिनिधनेयत्ताभ्यां न स्वतत्त्वं व्यभिचरन्ति ॥ ननु च पृथिव्यादीनि नव द्रव्याणि, तत् कथं पञ्चत्वसङ्ख्यां न व्यभिचरन्तीति ? । उच्यते—पृथिव्यप्तेजोवायुमनांसि तावत् पुद्गलद्रव्यमेव मूर्तक्रियावत्त्वाद् आत्मपरिणमिता वा वसुधादयः पुद्गला जीवा एव मनुष्यादिवत्, कालश्चैकीयमतेन द्रव्यमिति वक्ष्यते, वाचकमुख्यस्य पञ्चैवेति । दिशश्चाकाशान्न द्रव्यान्तरम्, आकाशप्रदेशा एव विशिष्टरचनाभाजो दिग्व्यपदेशमवरुन्धन्ति, न च तद्व्यतिरेकेण तत्स्वरूपोपलब्धिर्दिशामस्तीति । अरूपिग्रहणाद् धर्माधर्माकाशजीवानाममूर्ततामाविष्करोति, रूपरसगन्धस्पर्शपरिणामबहिर्वर्तित्वादमूर्तान्युच्यन्ते । अपरे द्विधा भिन्दन्ति सूत्रम्, 'नित्यावस्थितानि' पञ्चापि धर्मादीनि नित्यावस्थितानि भवन्ति, ततो'ऽरूपाणि', एतान्येव धर्मादीन्यविद्यमानरूपरसादीनि द्रष्टव्यानि, चत्वारीति पृथग्योगकरणात् किल पञ्चानामप्यवस्थितत्वमरूपत्वं चतुर्णामिति । एतच्च शक्यमेकयोगेऽपि हि, अरूपग्रहणात् सम्भवतो धर्मादय एव सम्भत्स्यन्ते, न पुद्गलाः । अथवाऽप्यरूपग्रहात् पञ्चानामपि प्रसङ्गे अपवदिष्यते ' रूपिणः पुद्गला ' (अ० ५, सू० ४) इति । न च पृथग्योगेऽप्येषोऽर्थः शक्यो लब्धुमतो वृथा वाञ्छेति । अपरे वर्णयन्ति—एकयोग एव नित्यावस्थितान्यरूपाणि, अत्राद्ययोः समस्तपदयोः पाठः कृतः, अरूपग्रहणं तु न समस्तमाभ्यां सहार्हति विभक्तिद्वयश्रवणमेतस्मादुन्नीयते—नित्यावस्थितग्रहणं समस्तद्रव्यविशेषणमरूपग्रहणमेककं पुद्गलद्रव्यव्युदासेन धर्मादिचतुष्टयविशेषणम् ॥ अत्रापरे व्याचक्षते-यत्किञ्चिदेतत् नित्यावस्थितारूपाणीत्येवमपि पाठे लभ्यत एवाभिलषितोऽर्थ उत्तरसूत्रोपादानात्, तस्मात् समस्तैव त्रीण्यपि पदानि सूत्रमध्येयम् । अस्मिन् पक्षे सूरिविरचितसूत्रविन्यासभङ्गापत्तिन तु प्रक्रिया दुष्यति । अपरे नित्यग्रहणमवस्थितविशेषणं कल्पयन्ति, नित्यमवस्थितानि नित्यावस्थितानि, " सह सुपा " (पा० अ० २, पा०, १ सू० ४) इति समासो नित्यप्रजल्पितवत्, अस्मिन् विकल्पे भाष्यमगमितं स्यात्, भाष्यकारेण त्वेतानि त्रीण्यपि स्वतन्त्राण्येव व्याख्यातानि, तत् कथं नित्यग्रहणमवस्थितविशेषणं स्यात् ? भाष्यभेदे

सूत्रपाठविचारः

---

१ नैतानि कदाचिदपि न सन्ति, न चान्ये तत्तया परिणमन्ति ।

२ 'अरूपीणि' इति क–पाठः । ३ 'अरूपिग्रहणात्' इति क–पाठः । ४ 'अतो भक्तिद्वय' इति ग–पाठः ।

५ विधाय अपवादनापेक्षया विभक्तेर्गौरवतामपेक्ष्य सूरिविन्यासः, एवमेवासर्वपर्यायः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सतीति ॥ अपरे त्वाहुः–किलाचार्येण सूत्रमेवमधीतम्–नित्यावस्थितान्यरूपीणीति, अत्र च बहुव्रीहिणोक्तत्वान्मत्वर्थीयानुपपत्तिरिति । अत्रोच्यते–क्वचिद् बहुव्रीहिं बाधित्वा तत्पुरुषवृत्तौ मत्वर्थीयो भवति, तद्यथा–"इड्धार्योः शत्रकृच्छ्रिणि" (पा० अ० ३, पा० २, सू० १३०), तथा अनरवन्ति चक्राणि, सर्वधनादित्वाद् वा ॥ अपरे ब्रुवते–भवतु मत्वर्थीयोऽत्राहेः, स च मतुरेव रसादिपाठान्नत्विनिरिति, उक्तं तत्रान्यतरस्यांग्रहणं समुच्चयार्थमित्यदोषः ॥

भाष्यमधुनाऽऽश्रियते—

भा०—एतानि द्रव्याणि नित्यानि भवन्ति । 'तद्भावाव्ययं नित्यम्' (अ० ५, सू० ३०) इति च वक्ष्यते । अवस्थितानि च, न हि कदाचित् पञ्चत्वं भूतार्थत्वं च व्यभिचरन्ति ॥ अरूपाणि च, नैषां रूपमस्तीति । रूपं मूर्तिः, मूर्त्याश्रयाश्च स्पर्शादय इति ॥ ३ ॥

टी०—एतानि द्रव्याणि नित्यानीत्यादि भाष्यम् । एतानि-अनन्तराविष्कृतानि पञ्चापि धर्मादीनि, द्रव्याणीति द्रव्यास्तिकनयाभिप्रायेण, न तु पर्यायसमाश्रयणात्, द्रव्यास्तिको हि ध्रौव्यमेवेच्छति,नोत्पादविनाशौ,अतः तदभिप्रायेणैषामाचार्यः शास्ति नित्यताम्,अन्यथा द्रव्यास्तिकनयनिरपेक्षनिरूपणायामेकान्तवादः स्यात्, स च बहुविधदोषाघ्रातत्वात् सामीक्षिकाभिप्रायवदसमञ्जसः स्यात् ॥ ननु चैवमेकनयनिरूपणा न जैनेन्द्रदर्शनप्रतिपूरणायालम्, सत्यमेतत्, किन्तु द्रव्यास्तिकपर्यायास्तिकयोः प्रधानगुणभावविवक्षावशाद् वस्तुतत्त्वमुपनीयते ज्ञातपुत्रीयैः, अन्यथा हीत्थं वस्तुप्रज्ञापनाऽतिदुष्करा स्यात्, अतः प्रज्ञापनेयमभिन्नांशस्य वस्तुनो नरसिंहस्येव नरकेसरिशब्दभेदेन । तत्र हि द्रव्यास्तिकस्य प्राधान्यमाश्रित्येतरस्य च गुणभावं नित्यता प्रज्ञाप्यते, यथा चैतानि नयद्वयोपसंगृहीतानि तथा प्रथमसूत्रेऽभिहितमभिधास्यते च त्रिसूत्र्यामिति । तमेव च ध्रौव्यांशं द्रव्यास्तिकनयप्रज्ञाप्यमादर्शयितुमाह–नित्यानि भवन्ति 'नेर्ध्रुवे त्यब्' (सिद्ध० अ० ६, पा० ३, सू० १७) इति नित्यानि ध्रुवाणि, नोत्पादविनाशवन्तीतियावत्, भवन्तीत्यनेन सकलकालाविकारिणी सत्ताऽऽख्यायते धर्मादीनाम्, तच्च नित्यलक्षणं वक्ष्यमाणमुद्घट्टयति–तद्भावाव्ययं नित्यमिति । यत् सतो भावात् न व्येति न व्येष्यति तन्नित्यमिति भवतीति भावः । योऽसौ भवति स कर्ता द्रव्यम्, स च तस्मात् स्वरूपान्न विगमेन युज्यते योक्ष्यते वाऽतो नित्य उच्यते, न कदाचित् सद्रूपतां परित्यक्ष्यतीत्यर्थः ॥ अधुनाऽवस्थितशब्दार्थं निरूपयति नित्यावस्थितयोरभेदभ्रान्तिमपनयन्–मा भूत् सङ्करोऽनयोः, अन्यन्नित्यलक्षणमन्यच्चावस्थितलक्षणमिति, अवस्थितानि च, न हि कदाचित् पञ्चत्वं भूतार्थत्वं च व्यभिचरन्ति । नित्यत्वानुज्ञापेक्षया चशब्दोपादानम्, अवस्थितानि भवन्ति धर्मादीनि द्रव्याणि, तच्चावस्थानमेषां वाक्यान्तरेण निरूप्यते–न कदाचित् पञ्चत्वं व्यभिचरन्ति, तद्भावाव्ययतायां सत्यामियत्तैषां निर्धार्यतेऽवस्थितशब्दोपादानात्,

१ 'इन्द्रार्योः शक्रकृच्छ्रीणि' इति ग–पाठः । २ 'अरूपाणि' इति घ–पाठः, 'अरूपीणि' इति तु ख–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चैव भवन्त्येतानि न न्यूनान्यधिकानि वेति सङ्ख्यानियमोऽभिप्रेतः, सर्वदा पञ्चास्तिकायात्मकत्वाज्जगतः, कालस्य चैतत्पर्यायत्वादिति। नापि भूतार्थत्वं व्यभिचरन्त्येतानि, अतोऽत्रस्थितान्युच्यन्ते। अन्योन्यावबन्धितायां सत्यामपि धर्मादीनि न स्वतत्त्वं भूतार्थत्वं वैशेषिकं लक्षणमतिवर्तन्ते, तच्च धर्माधर्मयोर्गतिस्थित्युपग्रहकारिता, नभसोऽवगाहदानव्यापारः, स्वपरप्रकाशिचैतन्यपरिणामो जीवानाम्, अचैतन्यशरीरवाङ्मनःप्राणापानसुखदुःखजीवितमरणोपग्रहमूर्तत्वादयः पुद्गलानाम्। अथवाऽसङ्ख्येयादिप्रदेशानादिपरिणामस्वभावता वा भूतार्थता मूर्तताऽमूर्तता चेति, तां न जातुचिदनादिकालप्रसिद्धिवशोपनीतां मर्यादामतिक्रामन्ति, स्वलक्षणव्यतिकरो हि निर्भेदताहेतुः पदार्थानाम्, अतः स्वगुणमपहाय नान्यदीयगुणसम्परिग्रहमेतान्यातिष्ठन्ते, तस्मादवस्थितानीति। **अरूपाणि च, नैषां रूपमस्तीति**। न समुदायविशेषणमेतदरूपाणीत्यसम्भवाद् धर्माधर्माकाशजीवेषु चतुर्ष्वेव सम्भवत्यमूर्तत्वं, न पुनः पुद्गलेषु, अत एव प्रसक्तौ सत्यामुत्तरसूत्रेण निषेधः करिष्यते, चक्षुर्ग्रहणलक्षणं रूपं तदविद्यमानं येषां तान्यरूपाणीत्यरूपत्वाच्चक्षुषा नैतानि गृह्यन्ते, न तु चक्षुषैषामगृह्यमाणत्वमरूपत्वे कारणमुच्यते, परमाण्वादिभिरनेकान्तात्, तस्मादरूपिग्रहणं द्रव्यस्वतत्त्वनिर्ज्ञापनार्थं मूर्तिमत्त्वनिवृत्तिप्रकाशनाय, प्रात्ययिकोत्पादवत्त्वे तु भाज्यमङ्गुल्याकाशादिवत्, स्वतस्तु नैषां रूपमस्तीति। किं पुना रूपं नामेत्यत आह—**रूपं मूर्तिः**, मूर्तिर्हि रूपादिशब्दाभिधेया, सा च रूपादिसंस्थानपरिणामा, नासर्वगतद्रव्यपरिमाणलक्षणा, व्यभिचारदर्शनात्, सर्वतः परिमितत्वे लोकस्य आत्मनोऽपि मूर्तिमत्त्वप्रसङ्गः, काणभुजानां (?) परिमितत्वं चावश्यमभ्युपेयं विशिष्टसंस्थानत्वादिभिर्लोकस्य, अतो रूपमेवाव्यभिचारित्वान्मूर्तिरुच्यते। अपरेऽभिदधति—रूपशब्दो नीलादिवर्णाभिधायी समस्ति, अस्ति च दीर्घादिसंस्थानप्रतिपादनपरः, तद् यः संस्थानप्रतिपत्तिमाविष्करोति रूपशब्दस्तमुररीकृत्यावोचदाचार्यो रूपं मूर्तिरिति, एवंविधमूर्त्याश्रिताश्च स्पर्शादयः किल सर्वदा न कदाचिदसंस्थाना भवितुमर्हन्ति, अन्यथा वान्ध्येयव्योमकुसुममण्डूकशिखण्डकल्पाः स्युरिति। अत्र पक्षे धर्माधर्मसिद्धसंस्थानैरनेकान्तः। तस्माद् रूपमेव मूर्तिरस्तु। एवं तर्हि गुणमात्रं मूर्तिशब्दस्य विषयः प्रसक्तः, न च रूपमेव मूर्तिरिति, उच्यते—द्रव्यास्तिकनयावष्टम्भात् सकलमिदं निरूप्यते, तत्र किमाश्चेव विस्मृतं भवतः, न खलु रूपादयस्तस्य केचिन्मूर्त्या विविक्ताः सन्ति, सैव हि मूर्तिर्द्रव्यस्वभावा चक्षुर्ग्रहणमासाद्य रूपमिति व्यपदिश्यते, अत एव पुनराह सहचराव्यभिचारप्रदिदर्शयिषया—**मूर्त्याश्रयाश्च स्पर्शादय** इति। न खलु मूर्तिं स्पर्शादयो व्यभिचरन्ति, सहचरितत्वात्, यत्र रूपपरिणामः तत्रावश्यन्तया स्पर्शरसगन्धैरपि भाव्यम्, अतः सहचरमेतच्चतुष्टयम्, अतः परमाणावपि विद्यते, न च परमाणवश्चतुर्गुणादिजातिभेदभाजः, सर्वेषामेकरूपत्वात्, इयांस्तु विशेषः—किञ्चिद् द्रव्यमुत्कटं गुणपरिणाममासाद्य तमेव त्यजति, यथा लवणहिङ्गुनी संहतिपरिणामसामर्थ्यवती लोचनस्पर्शनग्रहणगोचरतामुपेत्य जले विलीने सति रसनघ्राणग्रहणयोग्यतामागच्छतः, न च वर्णस्पर्शौ तत्र

रूपविचारः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्भवन्तावपि पुनर्ग्रहीतुं शक्यौ, परिणामविशेषवत्त्वात्, एवं पार्थिवाप्यतैजसवायवीयाणवोऽप्येकजातीयाः कदाचित् काश्चित् परिणतिं बिभ्रतो न सर्वेन्द्रियग्राह्या भवन्ति, अतो रूपरसगन्धस्पर्शा एव विशिष्टपरिणामानुगृहीताः सन्तो मूर्तिव्यपदेशभाजो भवन्ति ॥ अपरेऽन्यथा वर्णयन्ति भाष्यम्–मूर्तिशब्देन रूपमेवाभिधीयते, ये च रूपमाश्रित्य वर्तन्ते स्पर्शादयस्तेऽपि मूर्तिशब्दवाच्याः, तदेतदयुक्तम्, 'द्रव्याश्रया निर्गुणा गुणाः' (अ० ५, सू० ४०) इति वक्ष्यते, द्रव्यमाश्रयो भवति स्पर्शादीनां, न पुना रूपमुपपन्नतयेष्यत इति। अथापि पर्यायनयसमाश्रयणादुच्येते न द्रव्यमस्ति रूपादिग्रहे द्रव्यबुद्ध्यभावादतो रूपादय एव परस्परसमाश्रयेण वर्तमानाः सेनावनादिवन्मूर्तिशब्दवाच्या इति, तथापि भाष्यं न सङ्गच्छते, रूपं मूर्तिर्मूर्त्याश्रयाश्च स्पर्शादय इति, न ह्येकः पदातिः करी वा सेना, किन्तु परस्परसमाश्रयेण वर्तमानास्तुरगकरिरथपदातयः सेनेत्येवं न रूपमेव मूर्तिः किन्तु समुदाय इत्यतो यथावर्णितमेवास्तां भाष्यमिति ॥ ३ ॥

नित्यावस्थितान्यरूपाणीत्यविशेषविधाने केषांचिदपवादार्थं लक्षणमारभ्यते—

सूत्रम्—रूपिणः पुद्गलाः ॥ ५–४ ॥

टी०—विशेषश्रुतेः सामान्यश्रुतिनिषेधमुखेनात्मलाभादागृहीतविशेषत्वादपवादस्य नित्यत्वावस्थितत्वाभ्यनुज्ञानद्वारेणारूपत्वमात्रप्रतिषेधोऽत्र विवक्षितः, अरूपाः पुद्गला न भवन्ति, किं तर्हि ? रूपिणः, तत्स्वभावाव्ययत्वाच्च नित्यता सदा समस्त्येव, रूपादिमत्तया चाव्यतिकीर्यमाणस्वभावतयाऽवस्थितत्वं पुद्गलानाम् ॥ ननु चोत्पादविनाशवत्त्वादनित्यतैवातिस्पष्टैषा, तत् कथं तद्विरोधिनी नित्यतानुबु(ब ?)ध्यत इति ? । अत्रोच्यते–द्विविधा हि नित्यता प्रवचनविद्भिराख्यायते–अनाद्यपर्यवसाननित्यता सावधिनित्यता च, तत्राद्या लोकसन्निवेशवदनासादितपूर्वापरावधिविभागा सन्तत्यव्यवच्छेदेन स्वभावमजहती तिरोहितानेकपरिणतिप्रसवशक्तिगर्भा भवनमात्रकृतास्पदा प्रतीतैव, अपरा श्रुतोपदेशनित्यतावदुत्पत्तिप्रलयवत्त्वेऽप्यवस्थानात् पर्वतोदधिवलयाद्यवस्थानवच्च सावधिका। अनित्यताऽपि द्विविधा–परिणामानित्यता उपरमानित्यता च, तत्र परिणामानित्यता नाम मृत्पिण्डो हि विस्रसाप्रयोगाभ्यामनुसमयमवस्थान्तरं प्रागवस्थाप्रच्युत्या समश्नुते, उपरमानित्यता तु भवोच्छेदवदपास्तगतिचतुष्टयपरिभ्रमक्रियाक्रमपर्यन्तवर्तिनी परिप्राप्तावस्थानविशेषरूपा, नात्यन्ताभावभाविनीति, तत्र परिणामानित्यतया पुद्गलद्रव्यमनित्यमित्याचक्ष्यते, तद्भावाव्ययतया च नित्यम्, उभयथा हि दर्शनात्। न च विरोधोऽस्ति कश्चिदित्येतत् प्रपञ्चतः प्रतिपादयिष्यते परस्तात्, उभयीमेव वाऽवस्थामास्थाय वस्तु सकलां वास्तवीं धियमाधिनोति, अन्यथाऽङ्गारकितमात्रनियतपलाशस्वतत्त्वग्राहिवन्न प्रधानाराधनसाधीयसीं बुद्धिमा-

नित्यताया द्वैविध्यम्, अनित्यतायाश्च

१ 'नुभव' इति क–पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दध्यादतिविकलत्वात्, प्रधानोपसर्जनतया तु कदाचित् किञ्चिद् विवक्ष्यते शिबिकावाहकयानेश्वरयानवत्, अतः प्रत्यक्षप्रमाणप्रसिद्धपदार्थस्वरूपे नातीवायासयति बुद्धिमात्मवन्तः, तस्मान्नित्यानित्ययोरास्पदमेकममी पुद्गला इति न किञ्चित् कस्यचिद् बाध्यते, ते च रूपवन्त इति ॥

अधुना भाष्यमनुश्रियते—

भा०—पुद्गला एव रूपिणो भवन्ति । रूपमेषामस्त्येषु वाऽस्तीति रूपिणः ॥४॥

टी०—पूरणाद् गलनाच्च पुद्गलाः—परमाणुप्रभृतयोऽनन्तानन्तप्रदेशस्कन्धपर्यवसानास्त एव रूपवत्तामनन्यसाधारणीमनेकरूपपरिणतिसामर्थ्यापादितसूक्ष्मस्थूलविशेषाविशेषप्रकर्षाप्रकर्षवर्तिनीं बिभ्रति, न धर्मादिद्रव्यविशेषा इति रूपवत्त्वं, मत्रावधार्यते, तद्धि न जातुचिदतिचिरपरिचितपरमाणुद्व्यणुकादिक्रमवृद्धद्रव्यकलापमुज्झति सामर्थ्याच्च पुद्गला अपि न तां विहाय वर्तन्ते, अतः पुद्गला एव रूपिण इति सुष्ठूच्यते । रूपं मूर्तिरिति च प्राक् (सू० ३) प्रतिपादितम्, अतस्तदनुसन्धानाभिप्रायेणाह—**रूपमेषामस्त्येषु वाऽस्तीति रूपिण इति** । एषामिति पुद्गलानां परमाणुद्व्यणुकादिक्रमभाजाम्, उक्तलक्षणं रूपं मूर्तिः सा विद्यत इति रूपिणः, षष्ठीप्रदर्शनात् तु भेदविवक्षावशपरिप्रापितं द्रव्यगुणयोर्नानात्वमध्यवसातव्यम्, अभेदविवक्षोपनीतं च द्रव्यपर्याययोरैक्यम्, अतस्तत्प्रदर्शनाय व्यापकाधिकरणलक्षणा सप्तमी विगृह्णता आचार्येणोपात्ता । अथवा तुल्य एव मत्वर्थोऽयमुभयत्राभेदो भेदश्च पर्यायनयापेक्षो द्रव्यास्तिकनयापेक्षश्च योजनीयः । न मूर्तिव्यतिरेकेण पुद्गलाः सन्ति, भिन्नदेशसम्बन्धित्वेनानुपलब्धेः, व्यतिरेकिणोऽपि गमकत्वादसन्निहितविपक्षकस्येत्यभेदः, तथा यदिदं चन्दनमुपलभ्यते तस्य श्वेतं रूपं, तिक्तो रसः, पटुर्गन्धः, शीतलः स्पर्श इति; यश्चैष प्रत्यक्षेण प्रत्यक्षस्य व्यपदेशः सोऽर्थान्तरे दृष्टः, तद्यथा—अस्य ब्राह्मणस्यायं कमण्डलुरिति ॥ ननु चोपन्यस्तनिदर्शनबलेन द्रव्यमेव द्रव्यादर्थान्तरमिति न गुणेभ्यो द्रव्यमिति, उच्यते—योऽयमुपलभ्यस्य समस्तैरुपलब्धैर्व्यपदेशः सोऽर्थान्तरं गमयति, तच्च द्रव्यं गुणः क्रिया वा स्यादिति कोऽपरितोषः ? । सेनावनादिवदनेकान्त इति चेत्, दृष्टो ह्यनर्थान्तरेऽपि व्यपदेशः सेनायाः कुञ्जरः सहकारः काननस्येति । अत्रोच्यते—न खलु प्रसिद्धमनर्थान्तरत्वं सेनाकाननयोर्यस्मादनियतदिग्देशसम्बन्धिषु करिपुरुषतुरगस्प(स्य?)न्दनेषु परस्परप्रत्यासत्तिजनितोपकारेष्ववधारितानवधारितेयत्तेषु बहुत्वसङ्ख्यैव सेना, तथा काननमपि, एतच्च द्वयमप्यर्थान्तरमेव, यूषपङ्क्त्यादयोऽपि ह्यर्थान्तरतयैवं वक्तव्याः, यूषो ह्युत्पन्नपाकजानां द्रव्याणां कालविशेषानुग्रहे सति द्रव्यान्तरसम्पृक्तानां पाकजोत्पत्तौ यः संयोगः स यूष इत्याख्यायतेऽर्थान्तरभूतश्च, पङ्क्तिरप्येकदिग्देशसम्बन्धिषु परस्परप्रत्यासत्त्युपकृतेष्ववधारितानवधारितेयत्ताकेषु भिन्नाभिन्नजातीयेष्वाधारेषु वर्तमाना बहुत्वसङ्ख्यैवाभिधीयत इति । तस्मात् सापेक्षमिदं नयद्वयं वस्तुनः सद्भावमापादयति नैकान्त इत्यस्यार्थस्योद्भासनार्थमकरोद् भाष्यकारो विभक्तिद्वयेन विग्रहम्, अतोऽयं वाक्यार्थः—पुद्गलेषु मूर्तिर्भेदाभेदवर्तिनी, विवक्षावशादिति ॥ ४ ॥

पुद्गललक्षणम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनरेषां विशेषाभिधित्सया सूत्रमाह—

सूत्रम्—आकाशादेकद्रव्याणि ॥ ५–५ ॥

टी०—अथवा पुद्गलद्रव्यं परमाणुभेदेनानेकधा जीवद्रव्यं च नारकादिविशेषेण, तत् किमेवं धर्मादिद्रव्याण्यपीत्यारेकानिराकरणायेदमुच्यते—

धर्मादीनां सङ्ख्या

भा०—आ आकाशाद् धर्मादीन्येकद्रव्याण्येव भवन्ति । पुद्गलजीवास्त्वनेकद्रव्याणीति ॥ ५ ॥

टी०—आ आकाशादित्यादि भाष्यम् । अभिविधिग्राचित्वादातो द्वित्वं ततश्च संहितया सूत्रपाठस्तं विवृणोति भाष्येण–आ आकाशात् अध्यायादिसूत्रोपात्तक्रममुद्दिश्याकाशाभिव्याप्तिप्रचिकाशयिषया आ आकाशादित्युवाच । **धर्मादीनीति** प्रथितप्रतिविशिष्टानुपूर्वीप्रदर्शनं धर्माधर्माकाशानि एकद्रव्याण्येवेति, नैषां समानजातीयानि द्रव्यान्तराणि सन्तीति, अविलक्षणोपकारात्, धर्माधर्माकाशानां हि गतिस्थित्यवगाहोत्पत्त्या प्रभावित उपकारः, स्थित्यादित्रययुक्तं हि वस्त्वर्थक्रियासमर्थमभ्युपेयतेऽनेकान्तज्ञादिभिः, धर्मादिद्रव्याणां च गत्याद्य उपकाराः स्वस्थाने युक्त्या प्रतिपादयिष्यन्ते, एकशब्दोऽसहायार्थमभिधत्ते, यथा परमाणुः परमाण्वन्तरेण सद्वितीयः, आत्मा आत्मान्तरेण ज्ञानसुखदुःखजीवनादिभेदभाजा, न धर्मद्रव्यं धर्मद्रव्यान्तरेण ससहायम्, अधर्मव्योमनी चैवमाविष्कार्ये, **द्रव्यं गुणपर्यायवद्** (सू० ३७) वक्ष्यते, तदनेन स्वगतधर्मपरिणामप्राप्तिरापाद्यते मुक्तस्येव, अन्यथा गुणपर्यायशून्यं द्रव्यमेव न स्याद् व्योमोत्पलादिवत्, एवशब्देन नियम्यते एकद्रव्याण्येवैतानि, तुल्यजातीयद्रव्याभावात्, नियमेन चेष्टार्थसिद्धिं प्रदर्शयति—**पुद्गलजीवास्त्वनेकद्रव्याणीति**, सम्भाव्यानेकतया पुद्गलात्मानो विशेष्यन्ते तुशब्देन, इतिकरणं यस्मादर्थे, यस्मात् तुल्यजातीयभूयस्त्वमेषां तस्मादनेकद्रव्याणि परमाणुप्रभृतीन्यनन्ताणुकस्कन्धावसानानि क्षितिजलज्वलनानिलतरुद्वित्रिचतुष्पञ्चेन्द्रियात्मानश्चेति भावनीयम् ॥ ५ ॥

अयमपरो विशेषस्तेषामेवाभिधीयते—

सूत्रम्—निष्क्रियाणि च ॥ ५–६ ॥

टी०—अथवा एवं तावदरूपित्वैकद्रव्यत्वे विभज्याख्याते इदमपि विभज्याख्यायत इत्याहचार्थमावष्टे भाष्यकारः—

धर्मादिषु क्रियाविचारः

भा०—आ आकाशादेव धर्मादीनि निष्क्रियाणि भवन्ति । पुद्गलजीवास्तु क्रियावन्तः । क्रियेति गतिकर्माह ॥ ६ ॥

टी०—आ आकाशादेव धर्मादीनीत्येतावता भाष्येण कथं भाव्यते ? । अनन्तरसूत्रे सामर्थ्यपरिप्रापितानि धर्मादीन्यनुकृष्यन्ते, धर्मादीन्याकाशान्तानि **निष्क्रियाणि भवन्ति,**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपेतक्रियाणि निष्क्रियाणि, करणं क्रिया-द्रव्यस्य भावस्तेनाकारेण, स चैषां न समस्ति, यस्माद् धर्माधर्माकाशान्यनासादितातिशयान्येव सर्वदा पूर्वापरावस्थाभेदमनाजिहानानि किल लक्ष्यन्ते, तदेतदपव्याख्यानमवधीरितसमयसद्भावैरकारि, यतः सर्वमेव सदुत्पादव्ययध्रौव्य-धर्मात्मव्यवस्थां नातिक्रामति, तदेतेऽपि धर्मादयो यदि सत्तां नातिलङ्घयन्ति भवितव्यं तदा तर्हि क्रियया[1]मुत्पादविगमलक्षणया जीवानामिव। अथ सत्तातिक्रमेणाभ्युपेयन्ते तदानीं द्रव्य-तैवावहीयते गगनेन्दीवरादिवत्, भगवानपि व्याजहार प्रश्नत्रयमात्रेण द्वादशाङ्गप्रवचनार्थं सकलवस्तुसङ्ग्राहित्वात् प्रथमतः किल गणधरेभ्यः-"उप्पण्णेति वा विगमेति वा धुवेति वा"। तदेतदशेषं विशीर्यते । तस्माद् द्रव्यत्वान्मुक्तात्मवदुत्पादव्ययस्थितिमत्त्वमनुमिमते हैतुकाः। तथा चावधृतसिद्धान्तहृदयेन विशेषावश्यककारेण नमस्कारनिर्युक्तौ शब्दानि-त्यत्वप्रतिपादनेच्छयाऽवाचि—

"अवगाहणादओ नणु गुणत्तओ चेव पत्तधम्मव्व।
उप्पादादिसभावा तह जीवगुणावि को दोसो? ॥
अवगाढारं च विणा कत्तोऽवगाहोत्ति तेण संजोगो।
उप्पत्ती सोऽवस्सं गच्चुवकारादओ चेवं ॥
ण य पज्जयतो भिण्णं दव्वमिहेगं ततो जतो तेण।
तण्णासंमि कहं वा नभादओ सव्वहा णिच्चा? ॥" (गा० २८२१-२८२३)

अयमासामर्थोऽवधार्यः-गुणत्वात् पत्रनीलतावन्नभोऽवगाहोऽप्यनित्यः, नभसोऽवगाहः स्वलक्षणमुपकारः, स चावगाढारमन्तरेण जीवादिकं नाभिव्यज्यत इति अवगाढजीवादिसंयो-गमात्रमवगाह इति, संयोगश्चोत्पादी संयुज्यमानवस्तुजन्यत्वाद् द्व्यङ्गुलसंयोगवत्, यथा चावगाह आकाशस्यैवं गतिस्थित्युपकारावपि धर्माधर्मयोर्गतिमदादिद्रव्यसंयोगमात्रत्वादुत्पादादिस्वभावा इति। कथं तर्हि निष्क्रियत्वमेषामत आह—पुद्गलजीवास्तु क्रियावन्तः, क्रियेति गति-कर्माह सूत्रकारः, पुद्गलजीववर्तिनी या विशेषक्रिया देशान्तरप्राप्तिलक्षणा तस्याः प्रतिषेधोऽयम्, नोत्पादादिसामान्यक्रियायाः, पुद्गलास्त्विवतो देशान्तरमास्कन्दन्तः समुपलभ्यन्ते जीवाश्चेत्यतस्ते क्रियावन्तः, अमुमेवार्थं धात्वन्तरेण प्रसिद्धदेशान्तरप्राप्त्यर्थेन प्रकाशयति-गतिः क्रियाशब्दे-

---

१ उत्पन्न इति वा विगत इति वा ध्रुव इति वा।

२ अवगाहनादयो ननु गुणत्वतश्चैव पत्रधर्म इव।
उत्पादादिस्वभावास्तथा जीवगुणा अपि को दोषः? ॥ १ ॥
अवगाढारं च विना कुतोऽवगाह इति तेन संयोगः।
उत्पादी सोऽवश्यं गत्युपकारादयश्चैवम् ॥ २ ॥
न च पर्यायतो भिन्नं द्रव्यमिहैकान्ततो यतस्तेन।
तन्नाशे कथं वा नभआदयः सर्वथा नित्याः? ॥ ३ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाभिधित्सिता विशिष्टैव, न क्रियासामान्यम्, धर्मादयः पूर्वावष्टब्धप्रदेशात् प्रदेशान्तरमपि विचलितुमनुत्सहमानाः कथमेवैवंविधक्रियाधारतां प्रतिपत्स्यन्ते ? तस्मान्निष्क्रियाणीति निरवद्यं दर्शनम् ॥ ६ ॥

अधुनाऽधिकृतधर्मादिद्रव्याणां सर्वेषामेव प्रदेशावयवेयत्ताविष्करणार्थमिदमुच्यते—

भा०—अत्राह-उक्तं भवता-प्रदेशावयवबहुत्वं कायसंज्ञमिति। तत् क एष धर्मादीनां प्रदेशावयवनियम इति ?। अत्रोच्यते—

टी०—अत्राह-उक्तमित्यादिना सम्बन्धयति, अध्यायादिसूत्रे यस्मादजीवकाया इत्यत्र कायग्रहणं प्रदेशावयवबहुत्वार्थमिति व्याहृतम्, तस्मात् क एषां धर्मादीनां जीवान्तानां **प्रदेशावयवनियम इति, अत्रेति** प्रदेशावयवनियमप्रश्ने यथागममभिधीयते मया, एषोऽभिप्रायः प्रश्नयितुः-अमूर्तेषु धर्मादिष्ववयवव्यवहारो नास्ति, मूर्तेषु चान्त्यभेदावस्थेषु परमाणुषु, अवयवव्यवहारो हि मूर्तेष्वेव प्रतीयत इत्यतो नियमोऽभिधेयः के एषामवयवा इति।

भा०—सर्वेषां प्रदेशाः सन्ति, अन्यत्र परमाणोः। अवयवास्तु स्कन्धानामेव। वक्ष्यते हि-'अणवः स्कन्धाश्च, सङ्घातभेदेभ्य उत्पद्यन्ते' (अ० ५, सू० २५-२६) ॥

टी०—सर्वेषामित्यादि भाष्यम्। मूर्तानाममूर्तानां च **प्रदेशाः सन्ति**-विद्यन्ते, संव्यवहारार्थं प्रदिश्यन्त इति प्रदेशाः, तत्र धर्माधर्माकाशजीवानां द्रव्यपरमाणुमूर्तिव्यवच्छिन्नाः प्रदेशाः, यथाऽऽह-"निरवयवः खलु देशः, खस्य क्षेत्रप्रदेश इति दृष्टः"। पुद्गलद्रव्यस्य तु निरंशो द्रव्यात्मना भागः प्रदेश इत्युच्यते, न तु तस्यान्यः प्रदेशोऽस्ति, अतः परमाणोरन्यत्रेत्युक्तम्, इदं च द्रव्यांशं प्रदेशध्वनिवाच्यमाधाय चेतसि भाष्यकारेणोक्तमन्यत्र परमाणोः प्रदेशाः सन्ति, न पर्यायांशं रूपादिलक्षणम्। यतः **प्रशमरतौ** (श्लो०२०८) अनेनैवोक्तं-"परमाणुरप्रदेशो, वर्णादिगुणेषु भजनीयः"। अत एव च भेदः प्रदेशानामवयवानां च, ये न जातुचिद् वस्तुव्यतिरेकेणोपलभ्यन्ते ते प्रदेशाः, ये तु विशकलिताः परिकलितमूर्तयः प्रज्ञापथमवतरन्ति तेऽवयवा इत्यत आह—**अवयवा** इत्यादि। विशेषार्थस्तुशब्दः। विस्रसाप्रयोगाभ्यामवयूयन्त इत्यवयवाः पृथक् क्रियन्त इतियावत्, ते च **स्कन्धानामेव** द्व्यणुकादिक्रमवतामनतिक्रान्तरूपादिभेदानाम्, एवशब्दो नियामकः। धर्माधर्माकाशजीवाणूनां न सन्त्यवयवाः, स्कन्धानामेव भवन्ति। कुत एतदेवमित्याह-**वक्ष्यत** इत्यादि। यस्माद् वक्ष्यते सूत्रकारः-संघातभेदजाः स्कन्धाः (सू० २६)। वियुतानामवयवानां संहतिपरिणतौ स्कन्धा जायन्ते, संहतानां च भेदपरिणतौ द्व्यणुकादयः सम्भवन्ति, परमाणवस्तु भेदादेवावयूयमाना अवयवास्तस्मादवयवव्यवहारः पुद्गलद्रव्यविषय एवाध्यवसेयः ॥

---

१ 'तस्मात् क एषां धर्मा०' इति घ-पाठः।

२ एवं च सति स्कन्धादिरूपभेदचतुष्टयं पुद्गलास्तिकाये न स्यात् तत्त्वतः स्पष्टोपलभ्याः स्नेहादिकृतसंयोगवियोगभाजः अंशा अवयवास्ते यैः द्रव्यमन्यत् क्रियते भवन्ति वा ते स्कन्धेष्वेव, परेष्वप्रसिद्धत्वादवयवप्रहो न।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधुनाऽवसितप्रदेशावयवनियमो धर्मादिद्रव्यप्रदेशानामियत्तामाविष्करोति, तत्र—

धर्माधर्मयोः प्रदेशसङ्ख्या

सूत्रम्—असङ्ख्येयाः प्रदेशा धर्माधर्मयोः ॥ ५-७ ॥

टी०—तत्रेत्यादि । तेषु धर्मादिषु द्रव्येषु पञ्चसङ्ख्यावच्छिन्नेषु **धर्माधर्मयोरसङ्ख्येयाः प्रदेशा** धर्माधर्मयोः प्रत्येकमसङ्ख्येयाः प्रदेशा भवन्ति, ते च लोकाकाशप्रदेशमानाः सङ्ख्येयानन्तसङ्ख्याद्व्यवुदासेनासङ्ख्येयाः कथ्यन्ते ।

प्रदेशस्वरूपनिर्दिधारयिषुराह—

भा०—प्रदेशो नामापेक्षिकः सर्वसूक्ष्मस्तु परमाणोरवगाह इति ॥ ७ ॥

टी०—**प्रदेशो नामेत्यादि**। प्रकृष्टो देशः प्रदेशः परमनिरुद्धो निरवयव इतियावत्, नामशब्दः किलार्थे, परोक्षत्वात् तस्य, एवं हि सर्वज्ञाः प्रत्यक्षेणोपलभ्य कथयन्ति, अपेक्षाप्रयोजनः अपेक्षानिर्वृत्तो वा **आपेक्षिकः**, स च स्वसिद्ध एवार्वागुदर्शनैरस्मदादिभिरनेनाभ्युपायेन प्रज्ञाप्यमान आपेक्षिक उच्यते, सर्वेषां धर्माधर्माकाशजीवानामापेक्षिकत्वे सत्यपि सूक्ष्म एव, न स्थूलः । तुशब्दोऽवधारकः । आपेक्षिकत्वं निरूपयति—**परमाणोरवगाह इति** । द्रव्यपरमाणुपरिग्रहेण, प्रदेशपरिमाणोरवगतिः क्रियते, तदेतदुक्तं भवति—तन्मूर्तिमात्राक्रान्तो देशः प्रदेश उच्यते, अवगाहो व्यवस्थानमाक्रान्तिरध्यासनमिति पर्यायाः, न पुनरिहावगाहो गतिः । नन्वेवमाकाशस्यैव प्रदेशो निरूपितः स्यात्, नो धर्मादीनाम्, यतोऽवगाह आकाशस्य लक्षणम् । अस्तु, को दोषः? प्रदेशलक्षणं तावन्निर्ज्ञातम्, लोकाकाशे च यत्राकाशप्रदेशः स च यावांस्तत्रैव धर्मास्तिकायप्रदेशोऽवगाढः स च तावानेवेति, एवमधर्मप्रदेशोऽपि तत्र वाच्योऽतस्तुल्यप्रमाणत्वादेकेनैव प्रयत्नेन प्रदेशनिरूपणम्, तत्राकाशमवकाशदाने व्याप्रियते, गतिपरिणतौ धर्म उपकारकः, स्थितिपरिणामे चाधर्मद्रव्यमुपकरोति, तस्मात् सर्वप्रदेशानामिदमेवापेक्षणीयमव्याहतं लक्षणम् । इतिशब्देनोपसंहरन्ति—धर्माधर्मयोरियती प्रदेशसङ्ख्येति ॥ ७ ॥

अधुना त्वसङ्ख्येयप्रदेशे प्रस्तावमुपजीवन् जीवस्य तत्तुल्यप्रदेशनियतत्वात् प्रदेशनियमं विधत्ते—

जीवस्य प्रदेशसङ्ख्या

सूत्रम्—जीवस्य च ॥ ५-८ ॥

भा०—एकजीवस्य चासङ्ख्येयाः प्रदेशा भवन्तीति ॥ ८ ॥

---

१ यथा हि स्कन्धेषु संबद्धः प्रदेशः कदाचिदपि आगत्य संलग्नो नैवमयमिति भावः । २ निश्चयपरमाणुज्ञापनाय सर्वेत्यादि, अन्यथा तु एकस्मिन्नपि परमाणुसमूहस्य तन्मयस्य च स्कन्धस्य चावगाहात्, तथापि नैकः परमाणुः प्रदेशद्वयावगाहीति सुष्ठूक्तमिदं, सूक्ष्मावगाहस्य तस्यैव भावात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—एकजीवस्य चेत्यादि भाष्यम्। जीवो ज्ञानदर्शनोपयोगस्वभावः स कदाचित् सामान्येन निर्दिश्यते जीव इत्याक्षिप्तसकलनारकादिभेदो गोशब्दवत् समस्तस्वभेदाक्षेपी, कदाचित् प्रतिविशिष्टोपाधिव्यवच्छिन्नो व्यक्तिपदार्थाश्रयणेन, तत्रैकशब्देन सर्वजीवराशिव्यवच्छेदमादर्शयति, एकजीवस्य एकस्या व्यक्तेरिति, चशब्देनासङ्ख्येयप्रदेशतामात्मन्यनुसन्धत्ते, प्रसिद्धधर्मादिक्रमोल्लङ्घनाभिधानं तुल्यप्रदेशाख्यानलाघवार्थम्। एकयोगाकरणाच्चोन्नीयते सूत्रकाराभिप्रायः सङ्कोचविकासस्वभावास्तुल्येऽप्यसङ्ख्येयप्रदेशत्वे जीवप्रदेशाश्चर्मादिवत्, धर्माधर्मयोस्तु सततमेव विततावस्थिताः, ते च सङ्कोचविकासस्वाभाव्याज्जातुचिन्निकृष्टकुन्थुविग्रहग्राहिणः कदाचित् तामेव सङ्ख्यामजहन्तः स्थूलं करिणः शरीरमाददते विकाशित्वादिति ॥८॥

आकाशस्यापि यथोक्तद्रव्यवत् प्रदेशनियममभिधित्सुराह—

सूत्रम्—आकाशस्यानन्ताः ॥ ५—९ ॥

टी०—अगवाहदानादाकाशमित्येवं न गृह्यते लोकाकाशमात्रसिद्धेः, नह्यलोकेऽवगाढमस्ति किञ्चिज्जीवपुद्गलादि, तदभावादनाकाशमेव तत् स्यात्, इष्यते च, अतः संज्ञैवेयमनादिकालीना द्रव्यान्तरस्य धर्मादिसंज्ञावत् ॥ अन्ये मन्यन्ते—तस्याप्यवगाहदानशक्तिरस्ति, सा त्ववगाहकाभावान्न व्यज्यते, यदि स्यादवगाहकं तत्र व्यापारं यायात् तदवगाहपरिणत्या, न त्वस्ति, तस्मात् तदप्यवगाहदानशक्तियुक्तत्वादाकाशम् ॥ अपरे पुनरुपचारमाचरन्ति—आकाशवदाकाशं शुषिरदर्शनादिति, एतदप्यसत्, सिद्धान्तापेतत्वात्। अथ ये व्याचक्षते—व्ययोत्पादौ न स्वतो व्योम्नः, किन्तु परप्रत्ययाज्जायेते, अवगाहकसन्निधानासन्निधानायत्तावुत्पादव्ययाविति, तेषां कथमलोकाकाशे? अवगाहकाभावाद्, अर्थवैशसं च सतो लक्षणं स्याद्, व्यापि चेष्यते स्थित्युत्पादव्ययत्रयमिति। अत्रोच्यते—य एवं महात्मानस्तर्कयन्ति स्वबुद्धिबलेन पदार्थस्वरूपं तेऽत्र निपुणतरमनुयोक्तव्याः—कथमेतत्? वयं तु विस्रसापरिणामेन सर्ववस्तूनामुत्पादादित्रयमिच्छामः प्रयोगपरिणत्या च जीवपुद्गलानाम्, इत्थं तावदस्मद्दर्शनमविरुद्धसिद्धान्तसद्भावम्, अस्मदुक्तार्थानुगुणमेव च भाष्यकारेणाप्युच्यते ॥

अलोकेऽवगाहदातृतायां विचारः

भा०—लोकालोकाकाशस्यानन्ताः प्रदेशाः। लोकाकाशस्य तु धर्माधर्मैकजीवैस्तुल्याः ॥ ९ ॥

आकाशस्य प्रदेशसङ्ख्या

टी०—लोकेत्यादि। यद्याकाशशब्देनाकाशमविशिष्टमभिधित्सितं ततोऽनन्तप्रदेशता समीचीना भवेद्, विभागव्याख्यानं च जीवाजीवाधारक्षेत्रं लोकस्ततः पर-

---

१ एकयोगकरणे हि जीवास्तिकायस्य जीवसमूहमयस्यासंख्येयप्रदेशत्वं स्यात्, न तु प्रतिजीवं सांकर्यात्, एकजीवेति प्राक्सूत्रे न प्रवेशितम्, यथा दश वर्षसहस्राणि प्रथमायां भवनेषु व्यन्तराणां चेत्यत्र, अन्यथा तत्रापि दश वर्षसहस्राणि रत्नप्रभाव्यन्तरेष्वित्येवं वक्तुं शक्यत्वात्, यथा वा रूपिजीवयोगोपयोगेष्वादिमानित्यपि नोक्तमिति। २ आकाशस्यावगाह इति सिद्धस्याकाशस्योपकाराख्यानं; न तु तेनैव सिद्धिः, तस्य साधनत्वेऽपि च व्याप्यत्वात् न तदभावे आकाशाभावः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मलोकः, अतः सर्वाकाशस्यानन्ताः अपर्यवसाना इत्यर्थः । अथ योऽयं जीवाजीवाधारावधिना कृतो लोकाकाशविभागस्तत्र कियन्तः प्रदेशा इत्याह–लोकाकाशस्येत्यादि । अन्यूनानधिकप्रतिपत्त्यर्थस्तुशब्दः । धर्माधर्मैकजीवैस्तुल्या एव नोनाधिकभावभाज इति ॥ ९ ॥

अथ पुद्गलानां का प्रदेशसङ्ख्येत्युच्यते—

सूत्रम्-सङ्ख्येयासङ्ख्येयाश्च पुद्गलानाम् ॥ ५–१० ॥

टी०—सङ्ख्येया इत्यादि सूत्रम् । पूरणगलनपरिणतिलब्धसंज्ञकाः पुद्गलाः परमाणूपक्रमा अचित्तमहास्कन्धपर्यवसाना विचित्ररूपादिपरिणतयस्तेषां प्रदेशाः सम्भवतः सङ्ख्येया असङ्ख्येया अनन्ताश्च भवन्ति, सङ्ख्येयपरमाणूपचितः स्कन्धः सङ्ख्येयप्रदेशः, एवमितरावपि स्वसङ्ख्यावच्छिन्नाणुघटितावसङ्ख्येयानन्तप्रदेशौ वाच्यौ, अनुपात्तानन्तप्रदेशता सूत्रे न लभ्यते, तल्लाभाय यत्नश्चशब्दोपादानं, तदर्थदर्शनार्थमिदमाह—

पुद्गलानां प्रदेश-संख्या

भा०—सङ्ख्येया असङ्ख्येया अनन्ताश्च पुद्गलानां प्रदेशा भवन्ति–अनन्ता इति वर्तते ॥ १० ॥

टी०—अनन्ता इति वर्तते, तदेतदुक्तं भवति–अनुवर्तन्ते च नाम वि(ध)धेयो न चानुवर्तनादेव भवन्ति, किं तर्हि ? यत्नादिति । नन्वणुरपि पुद्गलशब्देनाक्षिप्तः पूरयति गलति च यतः तस्य चानन्तरसूत्रेण सङ्ख्येयासङ्ख्येयानन्तप्रदेशविकल्पानामन्यतमेन विकल्पेन भवितव्यम्, पुद्गलत्वाभावो वा परमाणोः, यदि च सङ्ख्येयादिप्रदेशभागिष्यते ततोऽणुरेव न स्याद् घटादिवत्, अथाप्रदेशस्ततोऽसन्नसौ गगनोत्पलादिवदिति, अत्रोच्यते–द्वये प्रदेशाः द्रव्यरूपाः पर्यायरूपाः, पर्यायस्वभावाश्च रूपादयस्तदङ्गीकरणेन सप्रदेशः परमाणुः ॥१०॥

अथ यथा द्रव्यात्मकैरणुप्रदेशैः सप्रदेशो घटस्तथाऽणुरित्येवमसिद्धार्थताप्रचिकाशयिषया आह—

सूत्रम्—नाणोः ॥ ५–११ ॥

भा०—अणोः प्रदेशा न भवन्ति ॥

टी०—अणोरापूरकाः परिणामिकारणभावभाजो द्रव्यरूपाः प्रदेशा न भवन्ति । अथ सप्रदेशत्वेन परमाणुत्वाभावः साध्यते, ततः स तादृशोऽन्त्यः प्रदेशः परमाणुर्न भवतीति प्रतीतिविरोधः, सप्रदेशत्वं चाव्यापकासिद्धदोषाघ्रातं वनस्पतिचैतन्ये स्वापवत् । नहि पक्षीकृतेऽणौ सर्वत्र सप्रदेशत्वमस्ति, क्षेत्रकालभावाख्ये द्रव्यपरमाणावेव तत् । येऽपि प्रमाणयन्ति मध्यविभागादिरहितत्वाद्व्योमोत्पलादिवदसन्नसौ तद्वत्त्वाद् वा नाणुर्घटादिवदित्यत्रापि पूर्वके प्रमाणे विज्ञानक्षणेनानेकान्तः, दिग्विभागकल्पनाऽप्यनेन प्रत्युक्ता, पाश्चात्त्यप्रयोगे हेत्वसिद्धतोद्विभावयिषया भाष्यकार आह—

---

१ परमाणुरपि संयुज्य पूरयति वियुज्य गालयतीति, कश्चिदपि नानादिपरमाणुः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—अनादिरमध्योऽप्रदेशो हि परमाणुः ॥ ११ ॥

परमाणोः स्वरूपम्

टी०—यस्मादादिमध्यान्त्यप्रदेशैः परिहीण एव परमाणुरिष्यते, अप्रदेशग्रहणादन्तपरिग्रहः, अथवाऽऽदिमध्यग्रहणादर्थप्राप्तमेवान्त्यग्रहणम्, अस्मिन् पक्षे अप्रदेश इति प्रतिविशिष्टप्रदेशनिराकरणमेव कृतं भवति, आदिमध्यान्तप्रदेशैरप्रदेशो न रूपादिभिरिति। न चादिमध्यान्तावयवनिबन्धनं वस्तुत्वं प्रतीतम्, विनाऽपि तैर्विज्ञानाद्युपलब्धेः, अविभागत्वादेव च व्योमानुप्रवेशोऽपि प्रत्याख्यातः, न च सर्वगतत्वव्याघातो व्योम्नः, सकलवस्तुसम्बन्धित्वेनाभ्युपगम्यमानत्वात् प्रसिद्धविज्ञानक्षणवत्, अतः स्वयमेव प्रदेशोऽसौ, न तस्यापरे प्रदेशाः सन्ति द्रव्यस्वभावाः, सर्वं च साधनं तन्निराकरणेऽभिधीयमानमनुपासितयथार्थगुरुवचसा परेणैवमधिगतद्रव्यपर्यायनयद्वयसद्भावेन स्याद्वादिना विघटनीयमागमयुक्त्यनुसारिणेति॥११॥

अथैतानि धर्माधर्मपुद्गलजीवद्रव्याणि किं व्योमवत् स्वात्मप्रतिष्ठान्याहोस्विज्जलादिवदाधारान्तरप्रतिष्ठानीति ?। उच्यते—निश्चयनयाभिप्रायात् सर्वमेव वस्तु स्वात्मप्रतिष्ठं व्योमवत्, व्यवहाराभिप्रायाद् धर्माधर्मपुद्गलजीवानाम्—

सूत्रम्—लोकाकाशेऽवगाहः ॥ ५–१२ ॥

अवगाहविचारः

भा०—अवगाहिनामवगाहो लोकाकाशे भवति ॥ १२ ॥

टी०—अवगाहिनाम्-अनुप्रवेशवतामवगाहः-प्रवेशः प्रतिष्ठा पुद्गलादीनां धर्माधर्मद्रव्यद्वयावगाढे व्योम्नि भवति, धर्माधर्मयोश्चाकाशेऽवगाहोऽनादिकालीनः, परस्पराश्लेषपरिणत्या तथासन्निवेशात्, इतरत्राकाशेऽवगाहो नास्ति जीवादीनाम्, धर्माधर्माभावात्, गतिस्थित्युपग्रहकारित्वात् धर्माधर्मयोः, तावेव तत्र कस्मान्न स्तः ? न हि स्वभावे पर्यनुयोगोऽस्तीत्युपेक्ष्य लोकाकाशेऽवगाहो धर्मादीनामेतावदुक्तम्॥१२॥

इदं त्वधुना वाच्यं—किं सर्वात्मनाऽवगाहः सर्वलोकाकाशप्रदेशव्याप्त्या क्षीरोदकविषरुधिरादिवदुत पुरुषहृदवदिति ?। एतद् विभज्योच्यते—

सूत्रम्—धर्माधर्मयोः कृत्स्ने ॥ ५–१३ ॥

भा०—धर्माधर्मयोः कृत्स्ने लोकाकाशेऽवगाहो भवतीति ॥ १३ ॥

टी०—सर्वत्र लोकाकाशे धर्माधर्मयोरयुतसिद्धावपि चन्द्रमण्डलाधेयचन्द्रिकावदवगाहो न परतः, चेतनावच्छरीर एवोपकारदर्शनाद् बहिरदर्शनाच्च तन्मात्रवर्तित्वमध्यवसीयते, अतः क्षीरोदकवदन्योन्यावगाहपरिणत्या व्यवस्थानं, न पुरुषहृदवदिति व्यवच्छिनत्ति कृत्स्नशब्दोपादानादिति ॥ १३ ॥

---

१ 'धर्मादीनां' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ पुद्गलानां कथमवगाहो लोकाकाश इत्युच्यते—

सूत्रम्—एकप्रदेशादिषु भाज्यः पुद्गलानाम् ॥ ५–१४ ॥

टी०—एकप्रदेशादिष्वित्यादि सूत्रम् । एकप्रदेशादिष्विति समानाधिकरणगर्भो बहुव्रीहिः, एकश्चासौ प्रदेशश्चेति, प्रदेश उक्तलक्षणः, एकप्रदेश आदिर्येषां तेष्वेकप्रदेशादिषु प्रदेशेषु पुद्गलानामणुप्रभृतीनामवगाहो व्याख्येयः ।

पुद्गलानामवगाहः

भा०—अप्रदेशसङ्ख्येयासङ्ख्येयानन्तप्रदेशानां[1] पुद्गलानामेकादिष्वाकाशप्रदेशेषु भाज्योऽवगाहः । भाज्यो विभाष्यो विकल्प्य इत्यनर्थान्तरम् । तद्यथा—परमाणोरेकस्मिन्नेव प्रदेशे, द्व्यणुकस्यैकस्मिन् द्वयोश्च, त्र्यणुकस्यैकस्मिन् द्वयोस्त्रिषु च, एवं चतुरणुकादीनां सङ्ख्येयासङ्ख्येयप्रदेशस्यैकादिषु सङ्ख्येयेषु असङ्ख्येयेषु च, अनन्तप्रदेशस्य च ॥ १४ ॥

टी०—अप्रदेशेत्यादि भाष्यम् । अविद्यमानद्रव्यान्तरप्रदेशः परमाणुरप्रदेशः, स्वयं च प्रदेशः, प्रचयविशेषात् सङ्ख्येयपरमाणुघटितः सङ्ख्येयप्रदेशः पुद्गलः, एवमसङ्ख्येयानन्तप्रदेशावपि स्कन्धौ पुद्गलाविति वाच्यौ, एकादिष्वाकाशप्रदेशेष्विति सूत्रावयवं स्पष्टतरेण वृत्तिवाक्येन व्याचष्टे—एक आदिर्येषामाकाशप्रदेशानां तेषु भाज्योऽवगाहः अप्रदेशादीनाम्, अनेकार्थत्वाद् धातूनां विभाष्यो विकल्प्य इत्याह, विशेषेणातिशयेन परमाणूपक्रमेण भाषणीयो व्याख्येयः, विकल्पस्तु[3] भेदसम्भवे, यथा द्व्यणुकस्यैकस्मिन् प्रदेशे द्वयोश्चेत्यादि भाष्यं सुज्ञानमेव, परमाणोस्तु भेदाभावादेकस्मिन्नेव प्रदेशेऽवगाह इति विकल्पाभावः, कथं पुनरेकत्रैकाशप्रदेशेऽत्यन्तसूक्ष्मेऽसङ्ख्येयादिप्रदेशाः स्कन्धाः प्रतिष्ठां प्रतिपद्यन्ते ? न हि घटे चतुरुदधिजलावस्थानमस्ति, अतिबहुत्वादल्पावकाशत्वाच्च घटस्येति । अत्रोच्यते—ननु प्रचयविशेषाद् दन्तिदन्तशकलमल्पप्रदेशावगाहि दृष्टम्, भेण्डखण्डं तु तावत्परिमाणमेव बहुतराकाशप्रदेशव्यापि दृष्टम्, अथ च बहुतरावयवता कुञ्जरदन्तशकले, तस्माद् परिणतिविशेष एवासौ तादृशः परमसूक्ष्मो येनानन्ता अपि परमाणवः स्कन्धीभूताः प्रदेशमेकमाश्रित्य विहायसो वर्तन्ते, यथा वाऽतिनिबिडेनायस्पिण्डेन व्याप्ते नभोदेशे निरन्तरे भस्त्रासमीरणसमीरिताः पुनर्विभावसोरवयवास्तत्रानुमज्जन्ति, विध्याप्यमाने च विगतरन्ध्रेऽयसि प्रतप्ते वारिलेशाः सूक्ष्मपरिणामवर्तिनो निर्व्यूहति प्रविशन्त्येवेत्येवमागोपालाङ्गनादिजनप्रतीतमाकाशस्य दुर्भरत्वमिति मा मुहः, सिकताकणनिकरेण वा परिपूरिते प्रस्थके प्रस्थ एवापरोऽपां[5] विशन् दृष्टः, एकप्रदीपप्रभावितानकावभासिते च गर्भगृहकादौ प्रदीपसहस्रप्रभाजालाकारपरिणतपुद्गलानुप्रवेशः प्रत्यक्षप्रमाणसमधिगतस्तद्वदेवैकाकाशदेशे घनपरिणतिविशेषाभ्युपगमादनन्तपरमाणुघटनाविनिर्मितस्कन्धावस्थानमवसेयमिति ॥ १४ ॥

---

१ 'नन्तानां' इति क-ख-पाठः । २ एकः संख्येयशब्दोऽधिकः ग-पाठः । ३ 'विकल्प्यस्तु' इति ग-पाठः । ४ ' रेकाकाश ' इति ग-पाठः । ५ ' एवापरः पयसां प्राविशन् ' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ जीवानां कियति क्षेत्रेऽवगाह इति उच्यते—

सूत्रम्–असङ्ख्येयभागादिषु जीवानाम् ॥ ५–१५ ॥

टी०—असङ्ख्येयभागादिष्वित्यादि सूत्रम् । असङ्ख्येयभागादिष्विति समानाधिकरणगर्भो बहुव्रीहिः, लोकाकाश इत्यनुवर्तते सप्तम्यन्तम्, अर्थवशाच्च विभक्तेः परिणाम इति लोकाकाशस्यासङ्ख्येयभागादिष्वित्यभिसम्बन्धनीयम्, असङ्ख्येयश्चासौ भागश्च स आदिर्येषां तेऽसङ्ख्येयभागादयस्तेऽसङ्ख्येया एव भागाः, तत्र कदाचिदेकस्मिन् लोकाकाशप्रदेशासङ्ख्येयभागे कदाचिद् द्वयोरसङ्ख्येयभागयोः कदाचित् त्रिष्वित्यादि जीवानामवगाहो भवति ॥

जीवानामवगाहः

भा०—लोकाकाशप्रदेशानामसङ्ख्येयभागादिषु जीवानामवगाहो भवति, आ सर्वलोकादिति ॥ १५॥

अत्राह–को हेतुरसङ्ख्येयभागादिषु जीवानामवगाहो भवतीति ? । **अत्रोच्यते**–

टी०—लोकाकाशेत्यादि भाष्यम् । अमुना भाष्येणाधिकारानुवृत्तिं दर्शयति विभक्तिपरिणतिं च । लोकाकाशप्रदेशाः सर्व एवासङ्ख्येयास्ते पुनरसङ्ख्येयैर्भागैर्धिया विभज्यन्तेऽङ्गुलासङ्ख्येयभागप्रमाणैः, तत्रैकस्मिन्नसङ्ख्येयप्रदेशे वियत्खण्डे जघन्यत एकजीवस्यावगाहो भवति कार्मणशरीरानुविधायित्वात्, कश्चित् पुनस्तादृशं खण्डद्वयमाक्रम्य वर्तते, कश्चित् त्रीणि तादृशं, परश्चत्वारीत्यादि यावत् सकललोकाकाशमन्यो व्याप्यावतिष्ठते, समुद्घातकाले केवल्येव, नापरः, लोकमर्यादया, न पुनरलोकाकाशस्यैकमपि देशमाक्रामतीति दर्शयति ॥ १५ ॥

अत्राहेत्यादि सम्बन्धग्रन्थः । एवं मन्यतेऽवधृतासङ्ख्येयप्रदेशपरिमाणस्य कार्मणशरीरापादितौदारिकादिशरीरसम्बन्धादल्पबहुप्रदेशव्यापितायां **को हेतुरसङ्ख्येयभागादिष्वित्यादि** । नहि तुल्यपरिमाणानां पटादीनामवगाहे वैषम्यं दृष्टम्, अस्यापि तुल्यप्रदेशत्वात् किमिति तथा नाभ्युपेयत इत्याक्षिप्ते, **अत्रोच्यत** इत्याह । अत्र प्रश्ने प्रतिविधीयते—

सूत्रम्–प्रदेशसंहारविसर्गाभ्यां प्रदीपवत् ॥ ५–१६ ॥

टी०—प्रदेशलक्षणमुक्तम्, एकस्यात्मनः प्रदेशा लोकाकाशप्रदेशराशिमानाः तेषां संहारः–सङ्कोचः विसर्गो–विकासस्ताभ्यां संहारविसर्गहेतुभ्यामेतदेवं वैषम्यं **प्रदीपवत्**, यथा प्रदीपास्तेजोऽवयवा यथावकाशानुविधायिनः स्वल्पेऽवकाशे सङ्कोचमास्थायासते, महति चोपन्ने विकाशं भजन्ते, तथात्मनोऽपि प्रकर्षप्राप्तसङ्कोचस्यैकस्मिन्नसङ्ख्येयभागे लोकस्यावस्थानमुत्कृष्टविकाशप्राप्तस्य च केवलिनः सर्वलोकेऽवगाहोऽन्या मध्यमावस्थानेकभेदेति । एतदेव विस्तरेण दर्शयति भाष्यकारः–

आत्मप्रदेशानां सङ्कोचविकासौ

भा०—जीवस्य हि प्रदेशानां संहारविसर्गावित्थं प्रदीपस्येव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—जीवस्य हीत्यादि। यस्माज्जीवस्य प्रदेशानां सङ्कोचविकासाविष्येते, पटस्येव पिण्डितवितातावस्थायिता, प्रदीपप्रकाशस्येव सङ्कुचनप्रसारणे, चर्ममण्डलस्येव संहारविसर्गाविति ॥ ननु च तद्वदेवानित्यः स्यात्, असाम्प्रतमिदम्, नहि स्याद्वादिभिः प्रदीपादीनामनित्यत्वमेकान्ततोऽभ्युपगम्यते, द्रव्यपर्यायनयद्वयाविष्टत्वात् सर्वस्य वस्तुन इत्यतो नित्यानित्यादिविकल्पभाजः सर्वे पदार्था इति सङ्गरो जैनानाम्। आत्माऽप्येवंधर्मक एवेति चेत्, सिद्धसाध्यता। एतेनैतदपि प्रत्युक्तम्—

"वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलम्।
चर्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फलः ॥"

न व्योमैकान्तेन नित्यं नापि चर्मानित्यमुत्पादादित्रययुक्तत्वाद् विश्वस्य वस्तुनः, तच्चोक्तं वक्ष्यते च, एकान्तनित्यानित्ययोश्च कर्मफलसम्बन्धाभावः ॥

दीपस्य सङ्कोचविकासप्रदिदर्शयिषया आह—

भा०—तद्यथा—तैलवर्त्यग्न्युपादानप्रवृद्धः प्रदीपो महतीमपि कूटागारशालां प्रकाशयति, अण्वीमपि, माणिकावृतो माणिकां, द्रोणावृतो द्रोणं, आढकावृतश्चाढकं, प्रस्थावृतः प्रस्थं, पाण्यावृतः पाणिमिति ॥

टी०—तद्यथा—तैलवर्तीत्यादि। भास्वत्किरणनिकरः प्रदीपो माणिकाढकप्रस्थाद्यधिकरणसम्बन्धी निरावरणव्योमसमन्धकारावधृतप्रमाणः तेजोऽवयवसंहारादल्पोऽल्पतरोऽल्पतमो वाऽन्यतमश्च लक्ष्यते, स एव चापनीतसकलस्थगनको विद्योतमानमूलमूर्तिरदभ्रं व्योमदेशमवभासयति, तैलवर्त्यग्न्युपादानप्रवृद्ध इत्यनेनाविकलां कारणसामग्रीमाचष्टे, कूटागारशालादिभिरनेकामवस्थामादर्शयति, अपरित्यक्तस्वात्मावयवोऽप्यनेकमाकारमादत्ते प्रदीपः ॥

भा०—एवमेव प्रदेशानां संहारविसर्गाभ्यां जीवो महान्तमणुं वा पञ्चविधं शरीरस्कन्धं धर्माधर्माकाशपुद्गलजीवप्रदेशसमुदायं व्याप्नोतीति, अवगाहत इत्यर्थः ॥

टी०—एवमेव प्रदेशानामित्यादि भाष्यम्। दार्ष्टान्तिके दृष्टान्तार्थमुपसंहरति—पञ्चविधमौदारिकादिशरीरसङ्घातं धर्माधर्माकाशपुद्गलजीवप्रदेशसमुदायम्, अवश्यमेव हि लोकाकाशे धर्माधर्माकाशपुद्गलाः सन्ति, जीवप्रदेशाश्च भजनीयाः, यत्रैकोऽवगाढो जीवस्तत्रान्यस्याप्यवगाहो न विरुद्ध्यत इति, एवं धर्मादिसमूहं व्याप्नोति, अवगाहत इत्यर्थः ॥

भा०—धर्माधर्माकाशजीवानां परस्परेण पुद्गलेषु च वृत्तिर्न विरुद्ध्यते, अमूर्तत्वात्।

---

१ 'असत्फलं' इति क-ख-पाठः। २ '०शयति अथो (?) मणिका०' इति क-ख-पाठः, तत्र अण्वीमपीति नास्ति।

३ अनावृतस्तु स्वावयवमानमाकाशं व्याप्नोति, न तु सर्वं जगत्, आत्मा तु समुद्घातकाले लोकव्यापी, सिद्धिकाले तु त्रिभागोनावशिष्टः, अशुषिरसंभृतशरीरानुकार्यवगाहादनन्तरं निष्प्रयोजनत्वेन अवगाहसंकोचाभावः।

४ एकस्मिन्नाकाशदेशे अनेकजीवानेकप्रदेशावगाहात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—धर्माधर्माकाशेत्यादि । धर्मादीनाममूर्तत्वात् परस्परेण वर्तनं न विरोधकारि, नापि पुद्गलविषया वृत्तिर्धर्मादीनां विरुद्ध्यते, तद्बलेन गतिस्थित्यवगाहदर्शनादात्मनश्च कर्मपुद्गलव्याप्तेः, सिद्धमिदं जीवो महान्तमणुं वा संहारविसर्गाभ्यां विग्रहं गृह्णाति ॥

भा०—अत्राह—सति प्रदेशसंहारविसर्गसम्भवे कस्मादसङ्ख्येयभागादिषु जीवानामवगाहो भवति नैकप्रदेशादिष्विति ? । अत्रोच्यते—

टी०—अत्राहेत्यादि । इदमिदानीं चोदयति-प्रदेशसंहरणसामर्थ्यमस्त्यात्मनः, तत् किमित्यविकलकारणकलापः सर्वान् प्रदेशानुपसंहृत्य एकस्मिन्नाकाशदेशे नावस्थानं कल्पयति प्रतिबन्धकवस्त्वभावात् ? **कस्मादसङ्ख्येयभागादिष्ववगाह** इष्यते, **नैकप्रदेशादिष्विति** निरुपपत्तिकमित्याशङ्क्यते, **अत्रोच्यत** इत्याह, न वयमनुपपत्तिकमर्थं प्रतिजानीमहे, किन्तु ।

भा०—सयोगत्वात् संसारिणां, चरमशरीरत्रिभागहीनावगाहित्वाच्च सिद्धानामिति ॥ १६ ॥

टी०—**सयोगत्वात् संसारिणामित्यादि** । योगाः प्रथिता एव औदारिकविग्रहाः[1], सत्यपि च सामान्योपादाने व्यापित्वात् कार्मणयोग एव परिगृह्यते[2], सह योगेन सयोगः-कार्मणशरीरीतियावत्, सर्वस्य संसारिणो भवितव्यमवश्यं कार्मणेन वपुषा, ततश्चानन्तानन्तपुद्गलप्रचितसर्वसंसारिकार्मणशरीरोपश्लेषादसङ्ख्येयप्रदेशावगाहितैव नैकादिप्रदेशावगाहितेति[3] । **चरमशरीर** इत्यादि । चरमशरीरं त्रिभागहीनमवगाहन्ते सिद्धा इति च, अनेनैतद् दर्शयति-देहे त्रैभागः शुषिरस्तत्पूरणात् त्रिभागहीनावगाहः, स च योगनिरोधकाल एव भवति, अतः सिद्धोऽपि तदवस्थप्रमाण एवेति सामर्थ्याभावान्नातः परमस्ति संहरणमनावरणवीर्यस्यापि भगवतः, किं पुनः शेषसंसारिणः ? स्वभावश्चायमेतावानेवोपसंहारः, न चास्ति स्वभावे पर्यनुयोगः । अपि च-सकर्मासौ, ततश्च नास्त्युपसंहृतिरल्पतरा । कर्मवियुक्तः कस्मान्नोपसंहरतीति चेत्, प्रयत्नाभावात्, प्रयत्नाभावश्च करणाभावात्, अनवद्यं दर्शनम् । इदमुक्तं भवति-सङ्क्षिपतो विकसनसङ्कोचनधर्मत्वादात्मप्रदेशसन्तानः पद्मनालतन्तुसन्तानवदविच्छेदेन विकासमासादयति, अविच्छेदश्च प्रदेशानाममूर्तत्वाद् विकासधर्मत्वादेकत्वपरिणतेः जीवाभिवृद्धेर्विकासश्च सिद्धः, छेददर्शनात् सक्रियत्वाच्चारविन्दनालतन्तुसन्तानवदेव च जीवप्रदेशाः सकलमितरद् विशन्त्यल्पमपहाय, छिन्ने तर्हि मूर्धन्यपविध्य शिरः किमिति स प्रदेशसन्तानस्तनुं नाविशतीति चेत्, असदेतत्, वेदनायुषोर्भेदात्, बहवो हि जीवदेशाः समुदायीभूयासते यत्र तदाचक्षते मर्म, बहुमर्मकश्च मूर्धा, महती च वेदना भवति मर्मदेशेषु, आयुर्भेदश्चाध्यवसानादिनिमित्तः सप्तधा प्रसिद्धः,

---

१ 'प्रदेशेष्विति' इति क-ख-पाठः ।

२ शरीरमात्रे व्यापनात् कार्मणावव्याप्तेः औदारिकादिविग्रहा इति योगव्याख्यायां शरीरमात्राख्यानम् ।

३ औदारिकादिस्थूलशरीराणां कार्मणावगाहानुसारित्वात् कार्मणस्यैव ग्रहः ।

४ असंख्याकाशप्रदेशावगाढस्यैव कार्मणादेर्ग्रहात् आरात् अयोगत्वाद् अग्रहः, एकाकाशप्रदेशावबोधस्तु न केवलमन्तरम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मात् संहारविसर्गावात्मनः कर्मानुभावजनितौ, न च नाशः सत्यपि संहारे विकासे वाऽमूर्तत्वात्, न च स्वतत्त्वनाशोऽस्ति वस्तुनः कस्यचित् सर्वथा स्याद्वादिनं प्रति, प्रदेशसङ्ख्यायाश्चात्मनः सङ्कोचविकासयोः सतोरपि ह्रासो वृद्धिर्वा न समस्ति, क्षेत्रतस्तु तावात्मनः स्यातामिति प्रतिपद्यध्वम् ॥ १६ ॥

भा०—अत्राह—उक्तं भवता (अ० ५, सू० १)—धर्मादीनस्तिकायान् परस्ताल्लक्षणतो वक्ष्याम इति । तत् किमेषां लक्षणमिति ? । अत्रोच्यते—

टी०—अत्राह—उक्तं भवतेत्यादिसम्बन्धग्रन्थः । अस्यैवाध्यायस्य प्रथमसूत्रे ताँल्लक्षणतः परस्ताद् वक्ष्याम इत्युक्तं तदिदानीमवकाशप्राप्तमभिधीयते—

सूत्रम्—गतिस्थित्युपग्रहौ धर्माधर्मयोरुपकारः ॥ ५-१७ ॥

टी०—गतीत्यादि सूत्रम् । अथवा तुल्येऽसङ्ख्येयप्रदेशत्वे सति कृत्स्नलोकव्यापित्वमेव धर्माधर्मयोर्न पुनरसङ्ख्येयभागादिषु वृत्तिरित्येतत् कथमनपदिष्टहेतुकमवसातुं शक्यमित्यत्र भ्रमो वयमवसीयतामसंशयम्, यस्मात् प्रयोगविस्रसापरिणामजनितामनेकप्रकारां सार्वलौकिकीमन्यद्रव्येष्वसम्भवन्तीमात्मपुद्गलानां क्रियामारभमाणानां चक्षुषो दर्शनशक्तेरुपग्राहकादित्यादिरश्मिवद् गतिस्थित्योरुपग्राहकौ धर्माधर्माविति कार्यतो निश्चीयते सकलजगद्व्यापिनाविति, तच्चासाधारणं कार्यं सूत्रेण दर्शयति ॥

भा०—गतिमतां गतेः स्थितिमतां च स्थितेरुपग्रहो धर्माधर्मयोरुपकारो यथासङ्ख्यम् । उपग्रहो निमित्तमपेक्षाकारणं हेतुरित्यनर्थान्तरम् । उपकारः प्रयोजनं गुणोऽर्थ इत्यनर्थान्तरम् ॥ १७ ॥

टी०—गतिमतामित्यादि भाष्यम् । देशान्तरप्राप्तिहेतुः परिणामो गतिः, तद्विपरीतः परिणामः स्थितिः, तद्वन्तस्तादृशा परिणामेनाविष्टा इति, अत एवंविधक्रियापरिणतद्रव्यमेव गतिस्थितिशब्दाभ्यामुच्यते, तद्व्यतिरेकेण गतिस्थितिक्रियानुपलब्धेः, एकस्यैवोपग्रहद्वयनिवृत्त्यर्थं यथासङ्ख्यकमुपन्यस्यति—गतिमतामित्यादिना भाष्येण । जीवपुद्गलाः क्रियावन्तो यत्र च गतिः तत्रावश्यंतया स्थित्याऽपि भवितव्यम् । अथवा धर्मद्रव्यस्य सन्निहितत्वात् किमित्यव्याहता गतिरेव सततं न भवत्यविकलकारणकलापसन्निधाववश्यंभाविनी कार्योत्पत्तिरेवं स्थितिरपि वाच्येत्याक्षिप्ते गतिमतामित्याह । स्वत एव गतिपरिणतिर्येषां द्रव्याणां स्थितिपरिणतिश्च तेषामुपग्राहकौ धर्माधर्मावपेक्षाकारणमाकाशकालादिवन्न निर्वर्तकं कारणम्, निर्वर्तकं हि तदेव जीवद्रव्यं पुद्गलद्रव्यं वा गतिस्थितिक्रियाविष्टम्, धर्माधर्मौ पुनरुपग्राहकावनुपघातकावनुग्राहकावित्यर्थः । स्वभावत एव हि गतिस्थितिपरिणतानि द्रव्याणि तावुपगृह्णीतः,

---

१ 'वृद्धिर्न समस्ति' इति क-ख-पाठः । २ '०पग्रहो धर्मा०' इति घ-पाठः । ३ ' निवर्तकं ' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा च सरित्तडागह्रदसमुद्रेष्वेवगाहित्वे सति मत्स्यस्य स्वयमेव सञ्जातजिगमिषस्योपग्राहकं जलं निमित्ततयोपकरोति, दण्डादिवन्मृदः परिणामिन्याः, नभोवद् वा, अपेक्षाकारणं हेतुरिति कारणसामान्यप्रतिपत्तिकारि, एते हि शब्दा नार्थान्तराभिधायितया प्रवर्तन्ते । तथा चोक्तम्—

"निर्वर्तको निमित्तं, परिणामी च त्रिधेष्यते हेतुः ।
कुम्भस्य कुम्भकारो, वर्ता मृच्चेति समसङ्ख्यम् ॥"—आर्या

न पुनस्तज्जलद्रव्यं गतेः कारणभावं बिभ्राणमगच्छन्तमपि झषं बलात् प्रेर्य गमयति, क्षितिर्वा स्वयमेव तिष्ठतो द्रव्यस्य स्थानभूयमापनीपद्यते, न पुनरतिष्ठद् द्रव्यं बलाद्वनिरवस्थापयति, व्योम वाऽवगाहमानस्य स्वत एव द्रव्यस्य हेतुतामुपैत्यवगाहं प्रति, न पुनरनवगाहमानमवगाहयति स्वावष्टम्भात्; स्वयमेव च कृषीवलानां कृष्यारम्भमनुतिष्ठतां वर्षमपेक्षाकारणं दृष्टं, न च नूनकुर्वतस्तांस्तदर्थमारम्भयद्वर्षवारि भ्रमितम्, प्रावृषि वा नवाम्भोधरध्वनिश्रवणनिमित्तोपाधीयमानगर्भा प्रसूते स्वत एव बलाका, न चाप्रसूयमानां तामभिनवजलधरनिनादः प्रसभं प्रसावयति, प्रतिबुध्य वा पुरुषः प्रतिबोधनिमित्तां विरतिमातिष्ठमानोऽवद्याद् दृष्टः, न च पुमांसमविरमन्तं विरमयति बलात् प्रतिबोधः । यदि तर्हि निमित्तकारणं धर्माधर्मौ दण्डादिवदेवं सत्यपेक्षाकारणतैव हीयते, यतो निर्व्यापारमपेक्षाकारणमुच्यते, नैतदेवम्, अपेतयुक्तित्वात्, नहि निर्व्यापारं कारणं, किं तर्हि ? कुर्वत् कारणम्, अपेक्षाकारणं चैतावतोच्यते, धर्मादिद्रव्यगतक्रियापरिणाममपेक्षमाणं जीवादिगत्यादिक्रियापरिणतिं पुष्णाति, एवं तर्हि निमित्तापेक्षाकारणयोर्न कश्चिद् विशेषः, अस्ति विशेषः, दण्डादिषु प्रायोगिकी वैस्रसिकी च क्रिया, धर्मादिषु वैस्रसिक्येवेति, भाष्यकारेण कारणसामान्यप्रतिपिपादयिषयोपन्यस्तो निमित्तशब्दः, यावता चांशेन स्वतो व्यापारपरिणतिर्दण्डादीनां तदंशप्रदर्शनपरतया निमित्तशब्दोपादानमिति, न च गत्युपकारोऽवगाहलक्षणाकाशस्योपपद्यते, किं तर्हि? धर्मस्यैवोपकारः स दृष्टः, स्थित्युपकारश्चाधर्मस्य, नावगाहलक्षणस्य व्योम्नः, अवश्यमेव हि द्रव्यस्य द्रव्यान्तरादसाधारणः कश्चिद् गुणोऽभ्युपेयः, द्रव्यान्तरत्वं च युक्तेरागमाद् वा निश्चेयं, युक्तिर्वक्ष्यते । आगमस्तु सर्वज्ञदत्तस्वहस्तः प्रकाशत एवाव्याहतः—"कइ[३] णं भंते! दव्वा पण्णत्ता? गोयमा! छ दव्वा पण्णत्ता, तंजहा—धम्मत्थिकाए, अधम्मत्थिकाए, आगासत्थिकाए, पुग्गलत्थिकाए, जीवत्थिकाए, अद्धासमये" ॥ ननु धर्मद्रव्योपकारनिरपेक्षमेव शकुनेरुत्पतनमूर्ध्वज्वलनमग्नेर्मरुतश्च तिर्यग्गमनं स्वभावादेवानादिकालीनादिति, उच्यते—प्रतिज्ञामात्रमिदं, नार्हतं प्रति हेतुदृष्टान्तावनवद्यौ स्तः, स्वाभाविक्यां गतौ धर्मद्रव्योपकारनिरपेक्षायां, यतः सर्वेषामेव जीवपुद्गलानामासादितगतिपरिणतीनामुपग्राहकं

१ 'ष्वेवगवाहित्वे' इति ग-पाठः । २ 'प्रतीतं' इति क-ख-पाठः ।

३ कति भदन्त! द्रव्याणि प्रज्ञप्तानि? गौतम! षड् द्रव्याणि प्रज्ञप्तानि, तद्यथा—धर्मास्तिकायः, अधर्मास्तिकायः, आकाशास्तिकायः, पुद्गलास्तिकायः, जीवास्तिकायः, अद्धासमयः । ४ 'तिर्यग्वलनं' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्ममनुरुध्यन्तेऽनेकान्तवादिनः, स्थितिपरिणामभाजां चाधर्मम्[1], आभ्यां च न गतिस्थिती क्रियेते, केवलं साचिव्यमात्रेणोपकारकत्वं यथा भिक्षा वासयति, कारीषोऽग्निरध्यापयतीति ॥ ननु तवापि लोकव्यापिधर्मद्रव्यास्तित्ववादिनः सन्धामात्रमेव तदुपकारो गत्युपग्रह इति स्थित्युपग्रहश्चाधर्मद्रव्योपकारस्तन्मात्रत्वादिति, अत्र जागर्यते युक्तिरस्माभिरवधत्तां भवान्- गतिस्थिती ये जीवानां पुद्गलानां च ते स्वतः परिणामाविर्भावात् परिणामिकर्तृनिमित्तकारण-त्रयव्यतिरिक्तोदासीनकारणान्तरसापेक्षात्मलाभे, अस्वाभाविकपर्यायत्वे सति कदाचिद् भावात्, उदासीनकारणपानीयापेक्षात्मलाभझषगतिवत्, तद् यद्येतयोरमूर्तयोरपि सतोर्गमकमेकैकस्या-भावे न भवति, न चान्येनोपक्रियते, तल्लक्षणमुपकारः **प्रयोजनं सामर्थ्यं गुणोऽर्थ इत्य-नर्थान्तरमित्यत्यन्तप्रसिद्धा** एवोपकारादयः समानार्थाभिधायित्वेन, उपकारो-गतिस्थिति-परिणतद्रव्यसामीप्येन व्याप्रियमाणता, तदुपग्राहितयाऽनुष्ठानमिति प्रयोजनमतिशयेनोपकारि गुणः सामर्थ्यमात्मीयशक्तिप्रभावः[2], अर्थस्तु द्रव्यान्तरासम्भवि प्रयोजनमेवेति ॥ १७ ॥

यद्यतीन्द्रिययोर्धर्माधर्मयोरुपकारसम्बन्धेनास्तित्वमवधृतम्, अनन्तरोद्दिष्टस्य नभसो-ऽतीन्द्रियस्याधिगमे क उपकार इति ? । उच्यते—

आकाशस्योपकारः

सूत्रम्-आकाशस्यावगाहः ॥ ५-१८ ॥

टी०—ननु च लोकाकाशेऽवगाह इति प्राग् निरूपितमेव लक्षण-माकाशस्य, पुनः किमयमारम्भो लक्षणाभिधित्सया ? । सत्यमुक्तं, प्रागवगाहिनां जीवपुद्ग-लानां प्राधान्यप्रचिकाशयिषया, इह तु तत्स्वरूपमेव निर्धार्यते, इहैव स्वरूपसिद्धिं बुद्धौ सन्निवेश्य नभसस्तदुक्तं प्राक्, अतोऽवश्यं स्वरूपव्यावर्णनं पदार्थस्य कार्यमिति ॥

भा०—अवगाहिनां धर्मपुद्गलजीवानामवगाह आकाशस्योपकारः ॥

टी०—**अवगाहिनामित्यादि** भाष्यम् । विहितनिर्वचनं प्रागाकाशं तस्य लक्षणमवगा-हः—अनुप्रवेशनिष्क्रमणस्वभावः, अवगाहस्य सम्बन्धिशब्दत्वात् सम्बन्धिनामुपादानमवगाहिनां धर्मादीनाम्, **आकाशस्यावगाह उपकारो** लिङ्गं स्वतस्त्वमेव, एषामवकाशदायित्वेनोपकरोति, स चोपकार आत्मभूतोऽस्य लक्षणमुच्यते । एतदुक्तं भवति-अवगाहमानद्रव्याणामवगाहदायि भवति, न पुनरनवगाहमानं पुद्गलादि बलादवगाहयति, अतो निमित्तकारणमाकाशमम्बुवन्मक-रादीनामित्युक्तं प्राग्, अनेकमुदाहरणमिहावर्तनीयम् ॥ नन्वयमवगाहः पुद्गलादिद्रव्यसम्बन्धी व्योमसम्बन्धी चेति उभयोर्धर्मः, स कथमाकाशस्यैव स्वतस्त्वमुभयजन्यत्वात् द्व्यङ्गुलसंयो-

अवगाहगुणत्वम्

गवत्, न खलु द्रव्यद्वयजनितसंयोगो द्रव्येणैकेन व्यपदेष्टुं पार्यते लक्षणं वैकस्येति वक्तुम्, सत्यमेतत्, तथापि लक्ष्यमाकाशमवगाह्यं प्रधानम्, अवगाहनमनुप्रवेशो यत्र तदाकाशमवगाहलक्षणं विवक्षितम्, इतरत् त्ववगाहकं पुद्गलादि

---

१ 'चाधर्मः' इति क-पाठः । २ 'शक्तिः प्रभावः' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्यपि संयोगजन्यत्वे न विवक्ष्यते, अत एव च तल्लक्षणमाकाशस्य, यस्माद् व्योमैवासाधारणकारणतया तथोपकरोति,अतो द्रव्यान्तरसम्भविनोपकारेणातीन्द्रियमप्यनुमेयमात्मवद् धर्मादिवद् वा, यथा पुरुषहस्तदण्डसंयोगभेर्यादिकारणः शब्दो भेरीशब्द इति व्यपदिश्यते यवाङ्कुरश्चासाधारणकारणत्वादेवमवगाहोऽप्यम्बरस्य प्रतिपत्तव्यः । यदप्याहुः–अवगाहतेऽणुरवगाहते जीव इति सामानाधिकरण्यदर्शनादवगाहकद्रव्यविषय एवावगाह इति आस्ते देवदत्त इत्यासनवत्, एतदप्येतेनैव प्रत्युक्तं वेदितव्यम् ॥ ननु प्रागिदमुक्तमलक्षणमवगाहः स्वस्याव्याप्तेरिति, उच्यते–नैवेदमशेषाकाशलक्ष्म प्रतिजानते समयवेदिनः, किं तर्हि ? लोकाकाशस्य, अत एवोक्तं–लोकाकाशेऽवगाह इति, आकाशं शुषिरलक्षणमेकरूपं तस्य धर्मादिद्रव्यैरवगाहिभिर्विभागः कृत इत्यतो लोकाकाशमुच्यते, अन्यथा तुल्ये शौषिर्ये निर्लक्षणमेव लोकाकाशं स्यादितरद् वा। कथं केषामुपकरोतीति व्याख्यायते–

भा०—धर्माधर्मयोरन्तःप्रवेशसम्भवेन पुद्गलजीवानां संयोगविभागैश्चेति॥१८

टी०—धर्माधर्मयोरित्यादि । धर्माधर्मप्रदेशा ह्यालोकान्ताल्लोकाकाशप्रदेशनिर्विभागवर्तित्वेनावस्थितास्तस्मादन्तरवकाशदानेन धर्माधर्मयोरुपकरोति, आकाशप्रदेशाभ्यन्तरवर्तित्वात् धर्माधर्मप्रदेशानाम्, अलोके तदसम्भवादिति, स्वल्पतरासङ्ख्येयप्रदेशव्यापित्वात् क्रियावत्त्वाच्च पुद्गलजीवानां संयोगैर्विभागैश्चोपकरोति, अन्यत्रावगाढाः सन्तो मृन्मनुष्यलोष्ठशकलादयः पुनरन्यत्रोपलभ्यन्ते,सर्वत्र चाभ्यन्तरेऽवकाशदानादेकोऽप्यवगाहोऽवगाह्योपाधिभेदान्नानैव लक्ष्यते, चशब्दादन्तःप्रवेशसम्भवेनोपकारः संयोगविभागैश्चेति योजनीयम्, न चाभाव उपकारको दृष्टः शशविषाणादिवदित्यनावरणमात्रताव्युदासोऽवगाह्यत्वाज्जलादिवल्लोकसंव्यवहारप्रतीतेः । अथाविद्यमाना आवृतिर्यस्य यत्रेति वा बहुव्रीहावन्यपदार्थप्रधानत्वाद् भावरूपतैव, आवरणादन्यदनावरणं चेत् आवरणं न भवतीति वा पर्युदासप्रसज्यप्रतिषेधान्यतराभ्युपगमे च सदोषतैवानिच्छतोऽपि बलात् पदार्थान्तरत्वप्राप्तेः ॥

आकाशालिङ्गसम्बन्धिमन्तातरम्

अपरे शब्दलिङ्गमाकाशं सङ्गिरन्ते, गुणगुणिभावेन व्यवस्थानात्, तदयुक्तं, रूपादिमत्त्वाच्छब्दस्य, प्रतिघाताभिभवाभ्यां च रूपादिमत्ता विनिश्चेया। अन्ये प्रधानविकारमाचक्षते, तदप्यसमीचीनम्, असिद्धत्वात् प्रधानस्य, कथं वा प्रधानं नित्यनिरवयवनिष्क्रियत्वादिस्वभावं सद् अनित्यादिभिराकारैः परिणंस्यत इति ?। अथैवं मन्येथाः–प्रधानविकारो विज्ञानं दृष्टं सक्रियं, न चापह्नवः प्रत्यक्षसमधिगते समस्तीति, सत्यमिदं दृष्टं, न तु प्रधानविकारतया, न च सत्त्वं प्राधान्येन

---

१ आकाशस्य द्रव्यत्वेऽपि शुषिरतया प्रतिपादनं परप्रसिद्धेः अवगाहकतागुणप्राधान्यता ।

२ नहि तेषां कुतोऽपि प्रवेशः किन्तु सदा अरूपितया तदनतिरिक्तवृत्तितयावस्थानं, जीवादीनां विभुत्वाभावात् संयोगादिभावः, चकारो जीवपुद्गललक्षणोपकार्यसंग्रहार्थं, अन्वयश्चोपकारेण, अन्तःप्रवेशस्यान्यूनानतिरिक्तवृत्त्यर्थत्वात्, जीवादीनां प्रतिप्रदेशसमानावगाहाभावात् न स तेषाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानाधि(नवि ?)कारेण परिणमते गुणत्वात् तमोवत्, अभेद एव वा चैतन्यविज्ञानयोश्चेतयते जानीते बुध्यते इति च प्रयोगदर्शनात्, तच्च चैतन्यं विज्ञानरूपमात्मनः स्वभावः, न च मूर्तादिधर्मरहितत्वान्मुक्तात्मन इव परपरिकल्पितात्मान्तः करणयोः प्रतिबिम्बोदयहेतुतेत्यलं प्रसङ्गेन ॥ १८ ॥

परपरिकल्पितप्रधानादिपरिणामप्रतिषेधार्थमुपकारप्रकरणाभिसम्बन्धेनेदमुच्यते—

पुद्गलानामुपकारः

सूत्रम्—शरीरवाङ्मनःप्राणापानाः पुद्गलानाम् ॥५-१९॥

टी०—शरीरे सत्युत्तरेषां प्रवृत्तिदर्शनादादौ तद् वचनं, तदनन्तरं वागभिधानं, द्वीन्द्रियादिषु दर्शनान्न सर्वशरीरिषु । अन्येन्द्रियग्रहणमपि तर्हि कर्तव्यं चेत्, न आत्मप्रदेशत्वात् तेषाम्, अयं तु पुद्गलजनितोपकारप्रख्यापनायारम्भः, तदनन्तरं मनः पञ्चेन्द्रियविषयत्वात्, अन्ते प्राणापानाभिधानं सकलसंसारिप्राणिकार्यत्वात्, शरीरादीनामितरेतरयोर्द्वन्द्वः, प्राण्यङ्गत्वान्नपुंसकलिङ्गैकवद्भावप्रसङ्ग इति चेत्, न, अङ्गशब्दस्यावयवाभिधायित्वे सति अङ्गाङ्गिद्वन्द्वे तस्यासम्भवात्, पुद्गलानामित्युपग्रहप्रकरणात् कर्तरि षष्ठी, पौद्गलिकत्वाच्छरीरादिचतुष्टयं गमनादानव्याहरणचिन्तनप्राणनादिभावेन परिणामविशेषाहितमनुग्राहकं शरीरादिभाजाम् ॥

भा०—पञ्चविधानि शरीराण्यौदारिकादीनि वाङ्मनः प्राणापानाविति पुद्गलानामुपकारः ॥

टी०—पञ्चविधानीत्यादि भाष्यम् । पञ्चप्रकाराणि शरीराणि विशरारूण्यौदारिकवैक्रियाहारकतैजसकार्मणाख्यानि पुद्गलानामुपकाराः, तथा वाङ्मनः प्राणापानौ च, इतिकरणश्चार्थे गदितः, उच्यत इति वाक्, असावपि पौद्गलिकी, सा च भाषापर्याप्तिभाजां वीर्यान्तरायज्ञानावरणक्षयोपशमाङ्गोपाङ्गनामनिमित्तारणनस्वभावा, भाषायोग्यान् स्कन्धान् कायव्यापारेणादाय वीर्यवानात्मा भाषात्वेन परिणमय्य वाक्पर्याप्तिकरणेन निसृजति स्वपरात्मोपकाराय, सत्यपि च मूर्तत्वे न चक्षुर्ग्राह्या, जलमध्यप्रकीर्णलवणशकलवत्, न चावश्यं रूपादिमत् समस्तमेव चक्षुरादिग्राह्यं, परमाण्वादिविचित्रपरिणामावेशात्[6] पुद्गलानाम्, तस्मान्नामूर्ता वाक् पौरस्त्यसमीरणवेगाभ्याहता परदिग्भागावस्थितश्रवणपरिणतोपलभ्यत्वात् प्रतिघाताभिभवसद्भावाच्च, मनश्चानन्तपुद्गलस्कन्धमनोद्रव्यप्रायोग्योपचितमूर्तित्वात् पौद्गलिकं, तच्च मनः पर्याप्तिभाजां पञ्चेन्द्रियाणामेव,

वाङ्मनआदीनां पौद्गलिकत्वम्

---

१ कार्मणे औदारिकादौ वा । २ कपिलमतेनाशङ्का, तन्मते तस्या इन्द्रियत्वात्, पञ्चेन्द्रियाणीति सूत्रे च तत्प्रत्युक्तमेवेति नात्रायासः । ३ स्पर्शनघ्राणादीनामिति । ४ स्पर्शादयः सर्व एव विषया अस्य । ५ कर्मबन्धनिर्जरादिहेतुतया शरीरादीनभिधाय तदितरकाययोगविशेषाभिधानं प्राणापानेत्यादि, प्राणापाना इति प्रथमान्ततयाऽभिधानं तु पुद्गलानामेव एतत्तया परिणमनात्, नैते धर्मादिवत् औदासीन्येनोपकारका इति भावः ।

६ 'वेशाः' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छद्मस्थानां श्रुतज्ञानावरणक्षयोपशम(जन)नाय करणं तदवष्टम्भजनितं च गुणदोषविचारणात्मकं सम्प्रधारणं संज्ञाज्ञानं धारणाज्ञानं तद्भावमनः ॥ तथा चाह—

"चित्तं चेतो योगोऽध्यवसानं चेतना परीणामः ।
भावो मन इति चैते ह्युपयोगार्था जगति शब्दाः ॥"

अत्र त्वेवंविधभावमनोनिमित्तेन पौद्गलिकेन सर्वात्मप्रदेशवर्तिना मनसाऽधिकारः, कोष्ठ्यो वायुरुच्छ्वासलक्षणः प्राणस्तद्विधपरिणामापत्तेः, तथा बाह्यो वायुरभ्यन्तरीक्रियमाणोऽपानसंज्ञितः, एतावप्यात्मनोऽनुग्राहकौ, रूपिद्रव्यपरिणामात् प्रतिघातदर्शनाद् द्वारानुविधायित्वाच्च मूर्तिमत्ताऽवसेया ॥

भा०—तत्र शरीराणि यथोक्तानि (अ० २, सू० ३७) । प्राणापानौ च नामकर्मणि व्याख्यातौ (अ० ८, सू० १२) ॥

टी०—द्वितीयाध्याये **शरीराण्यौदारिकादीनि** यथा व्याख्यातानि तथैवेह प्रतिपत्तव्यानि, **प्राणापानावष्टमेऽध्याये नामकर्मणि** गतिजात्यादिसूत्रे पञ्चप्रकारपर्याप्तिकर्मणि प्राणापानक्रियायोग्यद्रव्यग्रहणशक्तिः निर्वर्तनक्रियापरिसमाप्तिः प्राणापानपर्याप्तिरित्यत्र भाष्ये व्याख्यास्येते, कथं तर्हि **व्याख्यातौ** आशंसायामर्थे भूतवद् वर्तमानवच्च प्रत्यया भवन्ति, उपाध्यायश्चेद् आगमिष्यति तद्व्याकरणमधीतमेवमिहापि नामकर्माशंसितमित्यदोषः ॥

भा०—द्वीन्द्रियादयो जिह्वेन्द्रियसंयोगाद् भाषात्वेन गृह्णन्ति नान्ये, संज्ञिनश्च मनस्त्वेन गृह्णन्ति, नान्य इति ।

टी०—**द्वीन्द्रियादि** भाष्यम् । द्वित्रिचतुःपञ्चेन्द्रियाः पर्याप्तरसनेन्द्रियसम्बन्धतो भाषात्वेनेति भाषापरिणामयोग्याननन्तप्रदेशान् स्कन्धानाददते काययोगेन, भाषापर्याप्तिकरणेन निसृजति, अनेनैतद् दर्शयति—यत्रैव जिह्वेन्द्रियसंयोगस्तत्रैव भाषापर्याप्तिः जिह्वाश्रयत्वाद्,अतोऽन्ये व्यवच्छिद्यन्ते पृथिव्यादयो वायुपर्यन्ता एकेन्द्रियाः, तेषां रसनेन्द्रियसंयोगाभावादजिह्वत्वाद् भाषाभावः, द्वीन्द्रियादयश्च तद्युक्ताः सन्तः स्वभाषात्वेन तान् पुद्गलान् परिणमय्यार्यम्लेच्छवत् प्रतिनियता एव भाषाः प्रयुञ्जते, **संज्ञिनश्चेत्यादि** गुणदोषविचारणात्मिका सम्प्रधारणा संज्ञा तद्योगात् संज्ञिनः, चशब्द एवार्थे, त एव मनःपरिणामेन मनोवर्गणायोग्यान् स्कन्धाननन्तान् मन्तुकामाः सर्वाङ्गीणानाददते, ततस्तद्बलेन पुनर्गुणदोषविचारणाभावेन परिणमन्ते, ये त्वेवंविधसंज्ञाभाजो न भवन्त्येकेन्द्रियादयोऽसंज्ञिपञ्चेन्द्रियान्तास्ते नैव मन्यन्ते,मनःपर्याप्तिकरणाभावात्,

---

१ 'धारणसंज्ञानं' इति क-ख-पाठः ।

२ प्राणापानरोधेन मरणादिभावात्, अत एव च कायोत्सर्गेऽपि नोच्छ्वासादिरोधानुज्ञा, आकारता च तत्र तेषाम् ।

३ सूत्रावतरणेष्वनेकेषु वक्ष्यते इत्यादिकथनं मूलसूत्रविषयतयोक्तं, अत्र तु व्याख्याताविति कथनं तयोरसिद्धतां कथयति, नहि क्वापि कर्मण्येते श्रूयेते, ततः पारमार्षसिद्धं विषयं मनसिकृत्याहैतत् ।

४ नापर्याप्ते वाग्योग इति पर्याप्तेति, तथा च पर्याप्तस्य यद् रसनेन्द्रियं तस्य संबन्धत इत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतो व्यवच्छिनत्ति नान्य इति। यत् तु तेषां स्वनीडाभिसर्पणं कृमिपिपीलिकादीनां तण्डुलकण-श्यामाकबीजादिसंग्रहणवन्मनोव्यापारमन्तरेणैव तदवग्रहपाटवात्, तादृशी लब्धिरेव सा, न पुनरीहादिज्ञानभेदविचारयोग्यो द्वीन्द्रियादिः।

कथं पुनरात्मा शरीरादियोग्यान् पुद्गलानादत्ते कथं वा परस्परेण ते संहतास्तिष्ठन्ति न विशीर्यन्ते इत्याक्षिप्ते आह—

भा०—वक्ष्यते हि—सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्त इति (अ० ८, सू० २) ॥ १९ ॥ किञ्चान्यत्—

टी०—वक्ष्यते हीत्यादि। यस्मादभिधास्यतेऽष्टमेऽध्याये बन्धलक्षणं **सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्त इति,** कषायाः क्रोधादयः सह तैः सकषायस्तस्मात् प्रत्ययात् कषायाख्यादात्मा ज्ञानावरणादिकर्मयोग्यान् सर्वात्मप्रदेशैर्नोकर्मयोग्यांश्च पुद्गलानादत्ते, आह च—

"ऊष्मगुणः सन्दीपः, स्नेहं वर्त्या यथा समादत्ते।
आदाय शरीरतया, परिणमयति चापि तं स्नेहम् ॥
तद्वद् रागादिगुणः, स्वयोगवर्त्यात्मदीप आदत्ते।
स्कन्धानादाय तथा, परिणमयति ताँश्च कर्मतया ॥"

तस्मात् शरीराद्याकारेणोपकारिणः प्राणिनां पुद्गला एव, न प्रधानविज्ञानस्वभावेश्वरनियतिहठपुरुषकालादयः शरीराद्याकारपरिणतिभाजो, निर्युक्तिकत्वादिति ॥ १९ ॥

एष तावत् पुद्गलकृत उपकारो जीवानां शरीरादि, अधुना निमित्तमात्रताप्रदर्शनार्थं सम्बध्नाति—**किञ्चान्यदिति,** पूर्वोपकारापेक्षमुच्यते। आकारान्तरेणापि पुद्गलानामुपकारकत्वं निमित्तमात्रतयेत्याह—

सूत्रम्—सुखदुःखजीवितमरणोपग्रहाश्च ॥ ५—२० ॥

टी०—चशब्देन पुद्गलानामुपकार इत्यनुकृष्यते। शरीरादिसूत्रविन्यासं कृत्वा प्राक् किमर्थमिदं विभागेनाधुना भण्यते ?। उच्यते-सुखादीनामुदयापेक्षत्वात् प्राच्यानां ग्रहणमात्रविषयत्वाद् विभक्तिरिति, द्वन्द्वपूर्वः समानाधिकरणस्तत्पुरुषः, सुखग्रहणं प्राक् तदर्थं चेष्टादर्शनात्, तदनन्तरं दुःखवचनं तत्प्रतिपक्षत्वात्, जीवतस्तदुभयदर्शनात् तदन्ते जीवितग्रहणं, कर्मोपभोग-

---

१ 'संग्रहं तन्मनो' इति क-पाठः।

२ विशिष्टमनोव्यापारमपेक्ष्यैतत्, हेतुवादसंज्ञा तु तेषामस्त्येव तत्प्रयोजिका। ईहादि चात्र संप्रधारणरूपं दीर्घकालीनस्मरणादिरूपं वा, प्राप्तेन्द्रियोहादेस्तु तेषां सद्भावोऽविरुद्धः।

३ सिद्धालयेऽपि पुद्गलसद्भावात् किं न सिद्धानां शरीरादितया पुद्गलोपकार इत्याह—

४ सातवेदनीयोदयादौ अपेक्षाकारणत्वात् इति भावः। ५ शरीरादौ तु परिणामिकारणं पुद्गला इति ग्रहणेत्यादि।

६ 'ग्रहणविषयत्वाद्' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिसमाप्तौ तदसम्भवान्मरणवचनम्, प्रकृतमुपग्रहवचनमनादृत्य यत् पुनरुपग्रहग्रहणं तद् विशिष्टार्थप्रतिपत्त्यर्थं, शरीराद्याकारेण साक्षात् कुर्वन्त्युपकारमात्मनः पुद्गलाः, अत्र पुनरात्मनः सुखाद्याकारेण परिणममानस्योपग्रहे वर्तन्ते पुद्गला इति ।

भा०—सुखोपग्रहो दुःखोपग्रहो जीवितोपग्रहश्च मरणोपग्रहश्चेति पुद्गलानामुपकारः ॥

टी०—सुखोपग्रह इत्यादि भाष्यम् । बाह्यद्रव्यसम्बन्धापेक्षसद्वेद्योदयात् संसार्यात्मनः प्रसादपरिणामः सुखम्, इष्टदारापत्यस्रगनुलेपनान्नपानादिद्रव्योपजनितमिति विस्तरः, तदेव च सुखमुपग्रहोऽनुग्रहः पुद्गलानां निमित्ततया परिणतावात्मनः, एवं दुःखादिष्वपि योजनीयम्, असद्वेद्योदयादात्मपरिणामो बाह्यद्रव्यापेक्षः सङ्क्लेशप्रायो दुःखं, भवस्थितिनिमित्तायुर्द्रव्यसम्बन्धभाजः पुरुषस्य प्राणापानलक्षणक्रियाविशेषाव्युपरमो जीवितं, तदशेषोपरतिर्मरणम्, कथं मरणमात्मोपग्रह इति चेत्, निर्विण्णस्य पुरुषस्य तत्प्रियत्वाद् विषादिद्रव्यसम्बन्धे सत्यायुषो यौगपद्येनोपभोगोदयात् कण्टकवेदनावत् ॥

भा०—तद्यथा—इष्टाः स्पर्शरसगन्धवर्णशब्दाः सुखस्योपकाराः । अनिष्टा दुःखस्य । स्थानाच्छादनानुलेपनभोजनादीनि विधिप्रयुक्तानि जीवितस्यानपवर्तनं चायुष्कस्य । विषशस्त्राग्न्यादीनि मरणस्य, अपवर्तनं चायुष्कस्य ॥

टी०—तद्यथेत्यादिना प्रत्येकमुदाहरणं सुखादीनां दर्शयति—स्पर्शादयः केचित् कदाचिदाशयवशाज्जन्तूनां वल्लभाः सन्तः सुखमात्मपरिणामस्वभावमुपकुर्वन्ति । कर्मणि षष्ठी द्रष्टव्या । त एव चानिष्टा द्वेष्याः सन्तः स्वाशयोत्प्रेक्षया दुःखस्योपकुर्वन्ति । तथा चाह—

"तानेवार्थान् द्विषतस्तानेवार्थान् प्रलीयमानस्य ।
निश्चयतोऽस्यानिष्टं न विद्यते किञ्चिदिष्टं वा ॥"—**प्रशम० श्लो० ५२**

अतः स्वचेतोविकल्पापेक्षमिष्टत्वमनिष्टत्वं वा स्पर्शादीनाम्, तथा स्नानादयो विधिप्रयोगाज्जीवितस्य प्राणधारणलक्षणस्योपकारकाः, विधिप्रयोगो देशकालमात्रासात्म्यद्रव्यगुरुलाघवस्वबलापेक्षः, जन्मान्तरप्रतिबद्धस्य चायुषोऽनपवर्तनम्, अपवर्तनं तु दीर्घस्यायुषोऽध्यवसायादिविशेषसाचिव्यादल्पतापादनं जीवितसंवर्तनमित्यर्थः । अनुग्राहकहेतुसन्निधानात् तु तावन्मात्रतैव, सुबद्धत्वात्, पवनश्लेषवत्, **अनपवर्तनमिति**, बद्धस्पृष्टनिहितनिकाचितचतुष्करण-

---

१ 'मरणं' इति क-पाठः ।

२ विप्रियस्य दुःखमरणकारितया पुद्गलानामुपयोजनमध्यक्षसिद्धमेव, स्वरूपख्यापनमेतत्, तेन नैतत्कार्यता ।

३ गतिस्थित्युपग्रहावित्यत्र समस्तत्वादुपग्रहस्य न तस्यानुवृत्तिः सन्नियोगेतिन्यायात्, उपकारशब्दस्त्वत्रापि पुद्गलानामुपकार इति अनुवर्त्यत एव, तत आवश्यकं उपग्रहग्रहणं, अन्यच्च सुखादीनि न पुद्गलरूपाणि किन्तु तज्जन्यानीति युक्तमुपग्रह इति, भावि भाष्यमपि तथैव ।

४ तस्यापि पौद्गलिकत्वात् तद्धारणावधिकत्वादेव जीवितस्येति ।

५ पवनेन-वायुना शुष्यमाणः श्लेषः पवनश्लेषः, स हि गाढतमो न च शक्यते उद्वेष्टयितुम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्गृहीतकर्मणामुपक्रमाभावाज्जीवितसंवर्तनाभाव इत्यर्थः । विषशस्त्राग्निमन्त्रप्रहरणादयो मरणस्य-जीवितोच्छेदलक्षणस्योपकारकाः पूर्वोपात्तायुषश्चापवर्तनकारिणः, कर्म हि पौद्गलिकमिष्टं भेत्तुं बहिः पौद्गलं (पुद्गलैः ?) शक्यम् । आह च—

"सोपक्रममायुष्कं, वेदनयाऽऽर्तस्य मूर्च्छतो जन्तोः ।
बन्धप्रायोग्याभ्यां, विगच्छति स्नेहरौक्ष्याभ्याम् ॥ १ ॥—आर्या
निरुपक्रमं तु न तथा-ऽऽयुष्कं दृढसंहितं यदिष्टं तत् ।
नन्वग्न्याद्यैरनुप-क्रम्यं कंकटुकमपरान्नम् ॥ २ ॥
आयुष्कस्यावयवा, बन्धनमुक्ता जटन्ति ते तस्मात् ।
आर्द्राद् वस्त्राद् यद्वत्, प्रशोष्यमाणाज्जलावयवाः ॥ ३ ॥
प्राणाहारनिरोधा-ध्यवसाननिमित्तवेदनाघाताः ।
स्पर्शाश्चायुर्भेदे, सप्तैते हेतवः प्रोक्ताः ॥ ४ ॥"

भा०—अत्राह-उपपन्नं तावदेतत् सोपक्रमाणामपवर्तनीयायुषाम् । अथानपवर्त्यायुषां कथमिति ? । अत्रोच्यते—

टी०—अत्राहेत्यादिना ग्रन्थेनाशङ्कते. सोपक्रमायुषामनशनरोगादिबाधाभिरुपक्षीणायुषामपवर्तनीयायुषां च भृगुपतनोद्बन्धनादिभिरपवर्तमानायुषामुपकुर्वन्तु नाम पुद्गलाः, ये पुनरनपवर्तनीयायुषो भवन्त्यौपपातिकचरमदेहोत्तमपुरुषासङ्ख्येयवर्षायुषस्तेषां कथं जीवितमरणोपग्रह इत्याक्षिप्ते अत्रोच्यत इत्याह—

भा०—तेषामपि जीवितमरणोपग्रहः पुद्गलानामुपकारः । कथमिति चेत्, तदुच्यते ॥

टी०—तेषामपीत्यादि । तेषामप्यनपवर्तनीयायुषां जीवितोपग्रहो मरणोपग्रहश्च पुद्गलजालायत्त एव, पुद्गलकृत एवोपकार इतियावत्, कथमिति चेत्, आशङ्कते, केन प्रकारेणानपवर्त्यायुषामुपकुर्वन्ति पुद्गलाः, एवं मन्यते—न तेषामायुर्वर्धयितुं शक्यम्, न ह्रासयितुम्, अतः कमुपकारं पुद्गलाः कुर्युरिति तदुच्यते इत्याह—

भा०—कर्मणः स्थितिक्षयाभ्याम् । कर्म हि पौद्गलमिति । आहारश्च त्रिविधः सर्वेषामेवोपकुरुते । किं कारणम् ? । शरीरस्थित्युपचयबलवृद्धिप्रीत्यर्थं ह्याहार इति ॥ २० ॥

---

१ अपवर्तनीयायुषां निरुपक्रमत्वाभावात् सोपक्रमेत्यादि । २ आयुषः परानुपग्राह्यत्वात् स्वभावतस्तेषां मरणं, न जातु तेषां पुद्गलोपग्रहो नामेति शङ्कते । ३ शीघ्रमायुःक्षयप्रतिपादनाय भेद इत्याशयः । ४ कर्मशब्देनायुःकर्मैव ग्राह्यं, प्रकरणात् जीवितमरणयोः, अनपवर्तनीयायुषामपि नायुरन्तरेण जीवितं तत्क्षयमन्तरा च मरणमिति युक्तमुक्तं तेषामपीत्यादि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—कर्मण इत्यादि । यस्मात् सकलमेव ज्ञानावरणादि कर्म पुद्गलात्मकम्-अनन्तप्रदेशात्मकस्कन्धविकारः, कर्मनिमित्ता च तेषां स्थितिस्तद्द्वारेण जीवितोपग्राहिणः, त एव च कर्मपुद्गलाः क्षीयमाणा मरणोपग्राहिणः सम्पद्यन्त इति, तस्मात् सुष्ठूच्यते-**तेषामपि जीवितमरणोपग्रहः पुद्गलानामुपकारः । आहारश्च त्रिविध**

पुद्गलेषु सर्वोपकारिता

इत्यादि । समुच्चयार्थश्चशब्दः, ओजोलोमप्रक्षेपलक्षणस्त्रिप्रकार आहारोऽभ्यवहरणम्, तत्रौजआहारः सर्वप्रदेशैरात्मनः सर्वस्यापर्याप्तकावस्थायां जन्मकाले[1] घृतमध्यप्रक्षिप्तापूपवत्, पर्याप्तकावस्थायां[2] तु लोमाहारस्त्वगिन्द्रियग्रहणलक्षणः, प्रक्षेपाहारस्तु कावलिकः, सोऽपि पर्याप्तकानामेव पृथिवीकायाद्येकेन्द्रियनारकदेववर्जानामसुमताम्, सर्वेषामित्यनेन[3] संसारिणः परिगृह्यन्ते ॥ ननु[4] संसारिणोऽपि केचिदन्तर्गतावनाहारकाः, केवलिनस्तु समुद्घातकाले शैलेश्यवस्थायां चेति, अतः कथं **सर्वेषामुपकुरुत** इत्युच्यते ? बाहुल्यमङ्गीकृत्येदमुक्तमल्पकालत्वाच्च नापेक्षितं भाष्यकारेण । **किं कारणमेतदेवमिति** प्रश्नयति, **शरीरेत्यादिनोपपादयति** । यस्मादाहाराधीनाः शरीरस्य स्थित्यादयोऽनपवर्त्यायुषाम्, आहारश्च पुद्गलविकारः, ततः पौद्गलिकत्वादुपकुरुते, तत्र **स्थितिः** सन्धारणमन्यथा नावँतिष्ठेत, **उपचयः** परिपोषो मांसमज्जादीनाम्, **बलं** शक्तिः, **प्राणः** सामर्थ्यम्, **वृद्धिरारोहपरिणाहलक्षणा, प्रीतिश्चित्तधर्मः** परितोषरूपः, एवमनेकप्रयोजननिवर्तनसामर्थ्यादाहार उपकारक **इति** ॥ २० ॥

भा०—अत्राह-गृहीमस्तावद् धर्माधर्माकाशपुद्गलजीवद्रव्याणामुपकुर्वन्तीति । अथ जीवानां क उपकार इति ? । अत्रोच्यते—

टी०—अत्राहेत्यादिसम्बन्धग्रन्थः । सर्वैर्धर्मादिभिरुपकृतं निमित्तव्यापारविशेषेण जीवानाम्, अथात्मानः किमन्येषामात्मनामेवोपकुर्वन्तीत्युपकारं जीवसम्बन्धिनं पृच्छति । अथवा धर्माधर्माकाशपुद्गलानां परानुग्रहः सान्ततिक उक्तः, किमेवमात्मनामप्युतान्यो विधिरिति प्रश्नयति । तत्र **जीवद्रव्याणामिति** । जीवानां सर्वे धर्मादय उपकुर्वन्ति, **धर्माधर्माकाशाः** पुद्गलद्रव्याणामुपकारकाः, आकाशं धर्माधर्मपुद्गलानामुपकारकम्, इत्थमेतेऽनुग्रहकारिणः प्रसिद्धा धर्मादय इति बुद्ध्यामहे । **अथ जीवानामुपकारः** क इत्यनवबोधात् प्रश्निते **अत्रोच्यते** इत्याह ।

सूत्रम्—परस्परोपग्रहो जीवानाम् ॥ ५-२१ ॥

जीवोपकारः

भा०—परस्परस्य हिताहितोपदेशाभ्यामुपग्रहो जीवानामिति ॥ २१ ॥

---

१ जन्मशब्देन नात्र प्रसवः, किन्तु गर्भावतारः । २ शरीरपर्याप्त्यैव पर्याप्तका ग्राह्याः, अन्यथा अपर्याप्तानां लोमाहारस्याप्यभावसंभवात् । ३ अपवर्तनीयेतरायुष्मतामित्यर्थः, अत एव शरीरेत्यादिहेतुः संगतः ।

४ 'ननु च संसा०' इति ग-पाठः । ५ 'नावतिष्ठते' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—परस्परशब्दः कर्मव्यतिहारविषयः । अन्योन्योपग्रहो जीवानामुपकारः । नन्वपरस्परेति भवितव्यमित्यत्र परस्परा क्रिया सातत्येनेत्यत्रैके व्याचक्षते, वर्णलोपं कृत्वा निरदिक्षदाचार्यः परस्परोपग्रह इति कात्यायनवचनाद् वा 'इतरेतरान्योन्योपपदाच्च (पा० अ० १, पा० ३, सू० १६) इत्यत्रोक्तं 'परस्परोपपदाच्चेति (वक्तव्यं)' (वार्तिके ९००) परस्परस्य व्यतिलुनन्ति । हिताहितोपदेशाभ्यामिति । हितमायत्यां वर्तमाने च यत् क्षमं युक्तं न्याय्यं वा, तद्विपरीतमहितम्, हितप्रतिपादनेनाहितप्रतिषेधेन चोपग्रहं कुर्वन्ति, पुनरुपग्रहवचनमाभिप्रायिकं दर्शयति, जीवाः परस्परहिताहितोपदेशदायित्वेनानुगृह्णन्ति, न त्वेवं पुद्गलाः । अथवा सुखादीनामेकैकोऽप्यनुग्राहको जन्तोर्भवति समुपजातः, इह तु पुनरुपग्रह[1]माणोपग्राहकयोः परस्परेण स्त्रीपुंसवदनुग्रहे यौगपद्यार्थं पुनरुपग्रहवचनं प्रतिपत्तव्यम्, सर्वदैव द्वित्रभृतीनामुपकारो नैककानाम्, उपसर्जनं चोपग्रहः पूर्वसूत्रे, इह तु स्वतन्त्रः, जीवानामुपदेशस्य भूयस्त्वेनोपकारकत्वाद् ग्रहणम्, न तथा प्राणिनो वित्तादिभिरुपकुर्वन्ति यथोपदेशेनेति, अहितोपदेशोऽहितानुष्ठानं वा कथमुपकारः, न, उपकारवचनस्य निमित्तार्थत्वात्, अन्यथा हीष्टोपग्रह एवोपकारः स्यात्, नानिष्टोपग्रह इत्यव्यापिता भवेत् ॥ ननु जीवानामुक्तं लक्षणमुपयोग इति किं पुनरारम्भेण ? नैतत्, तदस्त्यन्तरङ्गं लक्षणमिदं तु बहिरङ्गम्, एवं तर्हि धर्मादित्रयस्य लक्षणं नास्ति । अत्रोच्यते—गतिस्थित्यवगाहानां स्वाभाव्याद्, यो हि यत्रासाधारणो धर्मः स एव तस्य लक्षणम्, इतिशब्दोऽधिकारपरिसमाप्त्यर्थ इति ॥ २१ ॥

भा०—अत्राह—अथ कालस्योपकारः क इति ? । अत्रोच्यते—

टी०—अत्राहेत्यादिना सम्बध्नाति—अत्रेति पञ्चास्तिकायपरिसमाप्तिप्रस्तावे पर आह—अथ कालस्योपकारः क इति ? ॥ ननु च पूर्वोपन्यस्तेषु धर्मादिषु[2] द्रव्येषूपकारविषयः प्रश्नो घटमानः कालद्रव्यं तु नैवोपन्यस्तम्,अतः कथं तत्कृतोपकारविषयः प्रश्नः सङ्गच्छेत ? । सत्यम्, नोक्तं कालद्रव्यं, किन्तु कालश्चेत्येके (अ० ५, सू० ३८) इति वक्ष्यत्येकीयमतेन स कदाचिद् धर्मास्तिकायादिद्रव्यपञ्चकान्तर्भूतस्तत्परिणामत्वात्, कदाचित् पदार्थान्तरं धर्मादिवत्, सर्वथा लक्षणं वक्तव्यमेतच्चेतसि संनिवेश्य प्रश्नयति—अथ कालस्योपकारः क इति । असाधारणलक्षणविषयः प्रश्नः । कथं पुनर्धर्मादिपरिणाममात्रं काल इति चेत्, यतस्तद्धर्मविशेषा एवातीतानागतवर्तमाना आख्यातशब्दवाच्याः, ते च बुद्ध्यर्थशब्दास्त्रयः, सर्वं च वस्त्वर्थाभिधानप्रत्ययसङ्गृहीतं, तुल्यव्यपदेशत्वात् शब्दार्थबुद्धीनाम्, तत्रार्थलक्षणः कालोऽर्थवृत्तिभिरेवावध्रियते इत्यत्रोच्यत इत्याह ॥

---

१ ' अन्यस्योपग्रहः ' इति ग–पाठः ।

२ एकेन जीवेन द्वितीयस्य तेन तृतीयस्येत्येवं परम्परार्थं परस्परशब्दः, यथा च धर्मादीनां स्वभावेनैवोपकर्तृता नैवमेषां, किन्तु अनुग्रहधियैव, यद्वा इन्द्रियादिकायाण्याश्रित्य परस्परेषामुपग्राहकता, तच्छक्तीनां कार्यद्वारावस्थितेः ।

३ ' धर्मादिद्रव्येषु ' इति क–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रम्—वर्तना परिणामः क्रिया परत्वापरत्वे च कालस्य ॥ ५—२२ ॥

कालस्योपकारः

टी०—यदा तु पृथक् कालद्रव्यं धर्मादिभ्यस्तदाऽप्यवश्यं सतोपकारिणा भवितव्यम् । संश्च कालोऽभिमतः स किमुपकार इति तस्य खलु वक्ष्यमाणस्वतत्त्वमूर्तेः वर्तना परिणाम इत्यादिनाऽविनाभूतं लिङ्गमुपदर्श्यते । यच्च प्राङ् नोपन्यासि[1] सूत्रकारेण कालस्तद्वस्तिकायत्वप्रतिषेधाय । आह च—

"तस्मान्मानुषलोक-व्यापी कालोऽस्ति समय एक इह ।
एकत्वाच्च स कायो, न भवति कायो हि समुदायः ॥"

स चैकः समयो द्रव्यपर्यायावबद्धवृत्तिरेव द्रव्यार्थरूपेण प्रतिपर्यायमुत्पादव्ययधर्माऽपि स्वरूपानन्त्यभूतक्रमाक्रमभाव्यनाद्यपर्यवसानोऽनन्तषड्ख्यापरिणामः, अत एव पर्यायप्रवाहव्यापिनमेकमात्मानमातनोति, अतीतानागतवर्तमानावस्थास्वपि कालः काल इत्यविशेषश्रुतेः सर्वदा ध्रौव्यांशावलम्बनात्, सामान्यः परमार्थत्वात् सन्नेव न कदाचिदप्यसत्त्वं भजत इति यद्यर्धतृतीयद्वीपसमुद्रद्वयाक्रान्तक्षेत्रपरिणामस्तिर्यग्मानेन पञ्चचत्वारिंशद्योजनलक्षप्रमाणः (ऊर्ध्वमधश्चाष्टादशयोजनप्रमाणः) कालो नाम द्रव्यमिति निरूप्यते वर्तनादिलिङ्गसद्भावात्,

कालस्य नृलोकवृत्तिता

ततः किमिति मनुष्यलोकादपि परतो नाभ्युपेयते, तल्लिङ्गोपपत्तेः, इह वर्तनालक्षणः कालः उच्यते, सा चास्ति तत्र वृत्तिः, तथा प्राणापाननिमेषोन्मेषायुःप्रमाणादि परत्वापरत्वादिलिङ्गं चेति। अत्रोच्यते—सत्यामपि भावानां वृत्तौ तस्यास्त्वविशेषेण काललिङ्गत्वं नेष्यते, सन्तो हि भावाः स्वयमेवोत्पद्यन्ते व्ययन्त्यवतिष्ठन्ते[2] च, अस्तित्वं च भावानां वस्त्वन्तरापेक्षम्, न च तत्रत्याः प्राणादिवृत्तयः कालापेक्षास्तुल्यजातीयानां सर्वेषां युगपद्भवनात्, कालापेक्षा ह्यर्थास्तुल्यजातीयानामेकस्मिन् काले भवन्ति, न विजातीयानाम्, ताश्च प्राणादिवृत्तयस्तद्वतां नैकस्मिन् काले भवन्त्युपरमन्ति चेति, तस्मान्न कालापेक्षास्ताः, न च परत्वापरत्वे तत्र कालापेक्षे, स्थितिविशेषापेक्षे हि परत्वापरत्वे, षष्टिवर्षाद् वर्षशतिकः परोऽपरः षष्टिवर्ष इति षष्टिवर्षाणां शतं वर्षाणामिति स्थितिरेषा, सा च सत्त्वापेक्षास्तित्वादेव, भावानामस्तित्वं चानपेक्षमित्युक्तम् ॥ नन्वेवमेव मनुष्यलोकेऽपि कालनिरपेक्षा वर्तनादयो भविष्यन्ति, किं कालकल्पनयेति चेत्, उच्यते—यदि निर्वर्तककारणं परिणामकारणं वा कालोऽकलयिष्यताऽभविष्यदेतदेवम्,अपेक्षाकारणं हि सः । न ह्यसावधिष्ठाय स्वातन्त्र्येण कुलालवत् करोति। न च मृत्तिकावत् परिणामिकारणं, किन्तु सम्भवतां स्वयमेवार्थानामस्मिन् काले भवितव्यम्, नान्यदेति अपेक्षाकारणं धर्मद्रव्यमिव गता-

---

१ 'नोपन्यासि' इति क-ख-पाठः । २ 'पर्यवसाने' इति ग-पाठः । ३ चिह्नान्तर्गतो भागो नास्ति क-ख-योः । ४ 'वियत्यव०' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विति न दोषः, सुखादिदृष्टान्ताश्च पूर्ववद् वाच्याः ॥ अत्र च केचिदाचक्षते—विरोधासम्भवाद् वर्तनादिपदत्रयसमासः, अपरे पुनरसमस्तान्येवाधीयते, परत्वापरत्वयोः पुनः समास एव, अन्योन्यापेक्षत्वात्, वर्तनाग्रहणमादौ पूर्वापरनिरपेक्षप्रत्ययाभिधानहेतुत्वान्निदर्शनार्थत्वात् । तदनु परिणामग्रहणं, क्रियाग्रहणं वर्तनादीनां तज्जातीयत्वात् । तदनु परत्वापरत्वे विशिष्टलिङ्गत्वात् प्रशंसाक्षेत्रकृतव्युदासार्थम् । उपकारानुकर्षणार्थश्चशब्दः ॥

भा०—तद्यथा—सर्वभावानां वर्तना कालाश्रया वृत्तिः । वर्तना उत्पत्तिः, स्थितिरथ गतिः प्रथमसमयाश्रयेत्यर्थः[2] ॥

टी०—तद्यथा—सर्वभावानामित्यादि भाष्यम् । तद्यथेत्यनेन वर्तनादीनां सकलभावव्यापितां दर्शयति । तत्र वर्तनैव तावद् भाव्यते—

वर्तनास्वरूपम्

वर्तना कालाश्रया वृत्तिरिति, वर्तन्ते स्वयमेव पदार्थास्तेषां वर्तमानानां प्रयोजिका कालाश्रया वृत्तिः, वर्त्यन्ते यया सा वर्तना । 'ण्यासश्रन्थो युच्'[3] (पा० अ० ३, पा० ३, सू० १०७) । अथवा सैव कालाश्रया वृत्तिर्वर्तनशीलेति, 'अनुदात्तेतश्च हलादेः' (पा० अ० ३, पा० २, सू० १४९) इति युच् । वृत्तिर्वर्तनं तथाशीलतेति, सा च वर्तना प्रतिद्रव्यपर्यायमन्तर्णीतैकसमयस्वसत्तानुभूतिलक्षणा उत्पाद्यस्येतरस्य वा भावस्य प्रथमसमयसंव्यवहारोऽनुमानगम्यस्तण्डुलादिविकारवदग्न्युदकसंयोगनिमित्ता विक्रिया प्राथमिक्यतीतानागतविशेषविनिर्मुक्ता, वर्तते पाकः अस्य वा भावाऽनुसमयस्थितेर्वर्तना प्रतीता, सा चातिनिपुणपुरुषबुद्धिगम्या । यथाऽऽह—

"बिसस्य बाला इव दह्यमाना, न लक्ष्यते विकृतिरिहाग्निपाते ।
तां वेदयन्ते मितसर्वभावाः, सूक्ष्मो हि कालोऽनुमितेन गम्यः ॥"

ननु च सवितुरुदयेन वर्तमानेनोपलक्षिता भावानां प्रतिविशिष्टा क्रियैव वर्तते इत्यावेद्यते[4] कोऽन्यस्तद्व्यतिरिक्तः काल इति, तथा ह्यः श्व इत्यतीतानागतोदयलक्षणा ब्रध्नमण्डलभ्रमणानुमेया वस्तुक्रियैवोच्यतेऽवृतद् वर्तिष्यत इति । यथा चोक्तम्—नृलोके, तत्कृतः कालो विभागः (अ० ४, सू० १४, १५) इति, अत्रोच्यते, प्रागुत्पतद्भिरेवास्माभिरिदमुक्तम्—धर्मादिद्रव्यपरिणतिमात्रं कालस्तदन्यो वा, तत्र प्रथमपक्षे सिद्धसाध्यता, तदन्यपक्षेऽपि न दोषः, आदित्यगत्युपलक्षिता नैषा वस्तुक्रिया वर्तत इति, तद्गतावपि सद्भावाद्, वर्तते व्रज्या सवितुर्यथा आकाशप्रदेशनिमित्तेति चेत्, तदप्यसमञ्जसम्, तां प्रत्यधिकरणभावात् स्थालीवत्, कथं पुन-

---

१ यदि च तिर्यग्लोकवृत्तिपदार्थानां चन्द्रसूर्यादिगतिक्रिययोपकृतिः तदा स्पष्ट एवोपकारस्तस्य तिर्यग्लोके, सुरलोकादौ न सूर्यादेर्गतिक्रिया न च तया तस्योपकार इति स्पष्ट एवान्यत्र तदनुपकारः, प्रागुक्तमपि च यदुतात्रत्येनैव कालेनान्यत्र व्यवहारः, परमनिरुद्धः समयोऽपि सूर्यादिक्रियाव्यङ्ग्यदिनादेः परमो लव एव, सूर्यादिगतावपि प्राचीना तद्गतिर्हेतुरेव, एवंच तिर्यग्लोक एव तस्य वृत्तिर्युक्ता, कथमन्यथा लोकालोकयोर्वर्तनादिसद्भावात् न स सर्वत्र, एवं च पर्यायताऽपि तस्य युज्यत एव ।

२ 'प्रथमसमाश्रयेत्यर्थः' इति क-ख-पाठः । ३ 'ण्याश्रयो युच्' इति ग-पाठः । ४ 'वेद्यन्ते' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रिदमभिधातुं पार्यते—कालाश्रया वृत्तिरिति? अवधृते हि काले तदाश्रया वृत्तिर्युज्येत ॥ ननु चात्मादयोऽप्यनवधृतस्वरूपा एव साक्षाद् बुद्धिसुखदुःखादिभिः कार्यैरुभयनिश्चितैरधिगम्यन्ते, दृश्याश्चामी, न चान्यथोपपद्यन्ते, तद्वदेव वर्तना सकलवस्तुव्युपाश्रया, अतोऽस्ति कार्यानुमेयः कालः पदार्थपरिणतिहेतुः, लोकप्रसिद्धाश्च कालद्रव्याभिधायिनः शब्दाः सन्ति, न वस्तुक्रियामात्राभिधायिनः । यथाऽऽह—"युगपदयुगपत् क्षिप्रं चिरं चिरेण परमिदमपरमिदमिति च, वर्त्स्यति नैतद् वर्त्स्यति वर्तते तद् वृत्तमपि वर्तत इदमन्तर्वर्तत" इति, कालापेक्षमेव आप्ता यत् सर्वे ब्रुवन्ति, तस्मान्नु सर्वेषां मतः कालः, ह्यः श्वोऽद्य सम्प्रति परुत् परारि नक्तं दिवैषमः प्रातः सायमिति कालवचनानि कथं युक्तान्यसति काले? । तस्याश्च वृत्तेः कालापेक्षायाः कालस्वरूपाया वा भाष्यकारः शब्दानेकार्थान् कथयति—**वर्तनेत्यादि** ॥ **वर्तनोक्तलक्षणा, उत्पत्तिरात्मलाभः, स्थितिरप्रच्युतिरिति किञ्चिद्भेदा वर्तनैवोच्यते, निर्विभागः कालः समयः** स च प्रथम इति वस्तूत्पत्त्या व्यवच्छिन्नस्तदाश्रया समयपरिणतिस्वभावेत्यर्थः ॥

भा०—परिणामो द्विविधः—अनादिरादिमांश्च । तं परस्ताद् (अ० ५, सू० ४२) **वक्ष्यामः** ॥

टी०—परिणामो द्विविध इत्यादि । द्रव्यस्य स्वजात्यपरित्यागेन परिस्पन्देतरप्रयोगजपर्यायस्वभावः परिणामः, तद्यथा—अङ्कुरावस्थस्य वनस्पतेर्मूल-काण्ड-त्वक्-पत्र-स्कन्ध-शाखा-विटप-पुष्प-फलसद्भावलक्षणः परिणामः, आसीदङ्कुरः सम्प्रति स्कन्धवानैषमः पुष्पिष्यतीति, पुरुषद्रव्यस्य वा बाल-कुमार-युव-मध्यमावस्थापरिणामसद्भावलक्षणः, स द्विविधः, अविद्यमानादिरनादिरमूर्तेषु धर्मादिषु, मूर्तेषु पुनरादिमानभ्रेन्द्रधनुरादिषु स्तम्भकुम्भादिषु च । चशब्दोऽवधारणार्थः । परिणामो द्विविध एव, तं चाध्यायपरिसमाप्तौ (सू० ४१) वक्ष्यामः—**तद्भावः परिणाम** इति, स च वस्तूनामृतुविभागवेलानियमकृतः, तत्रर्तवो हेमन्त १ शिशिर २ वसन्त ३ ग्रीष्म ४ वर्षा ५ शरत्संज्ञाः ६ कालस्यैकस्य शक्तिभेदाः प्रतिविशिष्टकार्यप्रसवानुमेयाः । तद्यथा—हेमन्ते हिमानीनिपातप्रम्लानानि वृन्ताक[3]कार्पासीवनानि । पथिकाः सङ्कोचितपाणयः कँणद्[4]न्तवीणिकाः कम्पमानगात्रयष्टयः प्रत्यग्निशलभा इवापतन्तो लक्ष्यन्ते । वायवश्च तुषारलेशसँसृ[5]क्ततोऽतिशयशिशिराः शरीराण्यायँसयन्तः[6] प्राणभाजामावान्ति । प्रियतमापरिष्वङ्गदुर्ललितेषु युवसु प्रसरमलभमानाः कुङ्कुमारुणाः प्रियतामुपनमन्त्यंशवः सहस्रर[7]श्मेर्जीवलोकस्य । अनवरतशीतपातजनितव्यथाः काष्ठशकलानि डिँम्भाः समाहृत्यैकतो हुतभुजमादीप्य तापमासेवन्ते प्रसारितपाणयः सहःसहस्यसंज्ञयोर्मासयोः ॥

हेमन्तवर्णनम्

---

१ 'युज्यते' इति क-ख-पाठः । २ 'सर्वेषामभिमतः' इति ग-पाठः । ३ 'कर्पासी' इति क-ख-पाठः । ४ 'कणद्ववदन्त' इति ग-पाठः । ५ 'सङ्गिनोऽतिशय' इति क-ख-पाठः । ६ 'ण्यावासर्यतः' इति ख-ग-पाठः । ७ 'ोभामिः समा' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा शिशिरे—अतिदुर्भगशशाङ्ककिरणे परिपाकसुरभिफलसम्पद्विनम्यमानशाखाभराः फलार्थिभिः शिशुकदम्बकैरनुगततला बदरीतरवः, तुहिनशिलाशकलविशदकुन्दमालतीकुसुमवासवाहिनो मारुताः, प्रियङ्गुरोध्रप्रसवसनाथानि दिङ्मुखानि, प्रलीनाः पङ्कजाकराः सायामा यामिन्यः, कश्मीरजागुरुगन्धाढ्यगर्भगेहशायिनः सुखिनस्तपस्तपस्यनाम्नोर्मासयोः ॥

शिशिरवर्णनम्

तथा वसन्ते—समन्ततः किञ्चिद्विभाव्यमानकुसुमाः कुन्दयष्टयः केसरतिलककुरबकशिरीषकोल्लप्रसूनजृम्भमाणपरागभाजः समीरणाः तरुणजनहृदयहारिणः, सहकारमञ्जरीरजःपुञ्जपिञ्जरितविग्रहाः कुसुमासवपानवशगताः सहचरीपक्षपातैराच्छुरन्तः कलगिरो बद्धमण्डलाः कातरजनान् रागपरिवृतः कुसुमधनुषो गोचरीकुर्वन्तः परिपतन्ति वनानि मधुपाः, परभृतकुलकलनिनादकोलाहलप्रतिबध्यमानगमनाः पदे पदे प्रस्खलन्तः पलाशवनानि कुसुमभरभाञ्जि ज्वलदनलकूटानीव पुरः प्रेक्ष्यमाणा मलयवायुवेगावधूतचम्पकरजःपटलैरवकीर्यमाणलोचनपुटाः प्रत्यावर्तन्त एव पथिकसार्थाः, परिणतबिम्बफलच्छविभिरशोकपुष्पप्रकरैरुपशोभिताश्च सर्वतो दिशां भागा मासयोर्मधुमाधवाभिधानयोः ॥

वसन्तवर्णनम्

तथा निदाघसमये—दहनमिव किरणनिकरैः किरन् किरणमाली भुवस्तलमास्तीर्णाङ्गारप्रकरमिव करोति, चीरीविरावद्राघीयांसो दिवसाः कथञ्चिदपवाह्यन्ते पथिकजनैः, आवाहोपकण्ठप्ररूढद्रुमच्छायाधिश्रयितश्रान्तकार्पटिकधोरणध्वानपरिपूरिता दिगाभोगाः, चन्दनपङ्काङ्गरागपरिपाण्डुराः किङ्करकरोत्क्षिप्ततालवृन्तश्वसनशीतलितशरीराः शिशिरेषूपवनेषु सरित्सरसीतीरेषु च विविधधारागृहान्तर्गता भोगिनो निरस्तघर्मप्रसरमभिरमन्ते, करिदशनशकलधवलमल्लिकाकोरकबहलपरिमलहारिणः परिमलितपाटलप्रसवाः सायं प्रातश्च पवना विलासिनां मदनमादीपयन्तः सुरभयो विचरन्ति, अरण्यान्यः कठोरकठिनकन्धरवराहदंष्ट्राकोटिविलेखोत्खातमुस्तादलसुगन्धयः करिमहिषयूथावगाढपल्वलाः कलभचीत्कारपूरितदशदिशो मृगतृष्णाभिरारचितसरस्तरङ्गमालाभिरिव विप्रलब्धमुग्धहरिणव्रजाः शुचिशुक्राभिख्ययोर्मासयोः ॥

ग्रीष्मवर्णनम्

तथा वर्षासु—सौदामिनीवलयविद्योतितोदराभिनवजलधरपटलस्थगितमम्बरमारचितपाकशासनचापलेखमासारधाराप्रपातशमितधूलिजालं च विश्वम्भरामण्डलम्, अङ्गसुखाः समीराः कदम्बकेतकरजःपरिमलसुरभयः, स्फुरदिन्द्रगोपकप्रकरशोभिता शाद्वलवती भूमिः, कूलङ्कषजलाः सरितः, विकासिकुटजप्रसूनकन्दलीशिलीन्ध्रभूषिताः पर्वतोपत्यकाः, पयोदनादाकर्णनोपजाततीव्रोत्कण्ठाः परिम्लुषितमनीषा इव प्रवासिनः, चातकशिखण्डिमण्डलमण्डूकध्वनिविषमविषवेगमोहिताः पथिक-

वर्षावर्णनम्

---

१ 'कश्मीरगुरु' इति क-ख-पाठः । २ 'केलगिरौ' इति क-ख-पाठः । ३ 'परिवृतः' इति ग-पाठः । ४ 'अरणान्यः' इति ग-पाठः । ५ 'चितस्तरङ्ग' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जायाः, क्षणं क्षणद्युतिदीपिकाप्रकाशिताशामुखासु क्षणदासु परिभ्रमत्खद्योतकीटकासु सञ्चरन्ति मसृणमभिसारिकाः, पङ्कबहुलाः पन्थानः क्वचिज्जलाकुलाः क्वचिदविरलवारिधाराधौतहारिसैकताः नभोनभस्ययोर्मासयोः ॥

शरद्वर्णनम्

तथा शरदि–दिनकृतो मयूखाः पङ्कमाश्यानयन्तः प्रतापमुग्रतरमातन्वते, विनिद्राम्भोजकुमुदवनानि सरांसि सहंससारसानि स्फटिकमणिभित्तिविमलवारिपूर्णानि, कल्हारकुवलयामोदवाहिनो गन्धवाहाः सप्तच्छदकुसुमरजोधूलिधूसरितवपुषः कलगुञ्जिनो मधुलेहिनः काष्ठाः कृतबन्धुजीवकावतंसाः, सञ्जातदर्पास्तथोक्षाणो मत्तध्वानगम्भीरमुन्नदन्तः श्लिष्टमृत्तिकाखण्डमण्डितशृङ्गकोटयः परिष्वष्कन्ते, कृषीवलहृदयहारीणि हरिणकदम्बकदशनालूनतटस्तम्बाग्राणि कैदार्याणि समधिगतपाककलमानि कलमगोपिकाच्छूत्कारवित्रासितशुकमण्डलानि नितरां चकासति, तुषारदीधितेर्धवलयन्तो मुखानि हरितामभीशवः कामिनां प्रमोदमन्तःकरणेषु शनकैः समेधयन्ति प्रसभमिषोर्जयोर्मासयोः ॥

वेलानियमः

तथा वेलानियमसमधिगतपाटवानि प्रातः कुशेशयकोशजालानि भास्वत्करसम्पर्कादविकासमाददते, कुमुदवतीनाथकिरणकलापपरामृष्टानि च कुमुदकुवलयकुड्मलानि निष्ठ्यूतसुरभिपरिमलं दलन्ति, कोशातकीपुष्पपटप्रावरणाः सन्ध्यासु ग्रामवृत्तयः सुरभिगन्धोद्गारिणः[3] कामिजनजनितसम्मदास्तरुण्य इव बहलाङ्गरागा विराजन्ते, जलधिरपि वेलानियममनुवर्तमानः शिशिरकिरणोदये वलिततुङ्गवीचिबाहुभिरम्भोधरध्वानगम्भीरव्याहारमेलाफलपरिमलपिशुनामालम्बते वेलावधूम्, काशिकशकुन्तयश्च रजनीषु द्राघीयसा भयानकध्वनिना स्थायं स्थायमारटन्ति, प्रतानितग्रीवाः कृकवाकवोऽपि वेणुपर्यन्तन्यस्तच्छित्वरकृताधिवसतयो दीर्घैः कलगम्भीरध्वनिभिरावेदयन्ते यामच्छेदान्, वनस्पतयश्च केचिदाबद्धपत्रसङ्कोचाश्चिराय नियतवेलासु निद्रां भजन्ते ॥

सोऽयमृतुविभागो वेलानियमश्च चित्रपरिणामः कारणं नियामकमन्तरेणानुपपन्नः सकलकारणकलापसन्निधाने[4] सत्यप्यनासादितोपजनत्वात्, अनेकशक्तियुक्तकालद्रव्यापेक्षस्तु प्रादुरस्ति, तस्मात् प्रतिविशिष्टकार्यानुमेयः कालोऽणुवत्, अन्यथा नियामकहेत्वभावे युगपदेते भावा भवेयुरपरायत्तत्वात्, अतः प्रतिनियतकालभावित्वादमीषां परिणामानामस्त्येकमनेकशक्तिकलापान्वितं कारणम्, ताश्च शक्तयः कदाचिदेव स्वकार्यनिष्पादनाय प्रवर्तन्ते समासादितपरिपाका न सर्वदेति । अथ कदाचिदेवमधिगच्छेत् कश्चित् खरविषाणशक्तिरसौ तादृशीति, तदयुक्तम्, अवस्तुत्वापत्तेः, प्रतिवाद्यप्रसिद्धेश्चेति ॥

भा०—क्रिया गतिः । सा त्रिविधा–प्रयोगगतिः विस्रसागतिः मिश्रिकेति ॥

---

१ ' धारधौत ' इति क-ख-पाठः । २ ' मभीषवः ' इति ग-पाठः । ३ ' ०द्गारिण्य ' इति क–पाठः । ४ ' गभीर' इति क–ख–पाठः । ५ ' धानेन ' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—क्रिया गतिरित्यादिभाष्यम् । करणं क्रिया—द्रव्यपरिणामस्तस्यानुग्राहकः कालः, तद्यथा—आकाशदेशावल्यामङ्गुली वर्तते अतीताऽनागतेति च, अन्यथाऽतीत एव वर्तमानोऽनागतश्च स्यात्, एवमनागतो वर्तमानश्च सङ्कीर्येत[1], अनिष्टं चैतत्, तस्मादस्ति कालो यदपेक्षयाऽतीतादिव्यपदेशाः परस्परासङ्कीर्णाः संव्यवहारानुगुणाः प्रथन्ते, तत्रातीतो द्विविधः भाव-विषयभेदात्, विनष्टो घट इति भावातीतः, विषयातीतश्चक्षुरादिग्रहणानन्तरमद्राक्षं घटम्, तथानागतदिदृक्षाभ्यर्णो घटो विषयानागतः, अलब्धात्मभावो भावानागत इति । तत्र प्रयोगगतिः जीवपरिणामसम्प्रयुक्ता शरीराहारवर्णगन्धरसस्पर्शसंस्थानविषया, विस्रसागतिः प्रयोगमन्तरेण केवलाजीवद्रव्यस्वपरिणामरूपा, परमाण्वभ्रेन्द्रधनुःपरिवेषादिरूपा विचित्रसंस्थाना, मिश्रिका प्रयोगविस्रसाभ्यामुभयपरिणामरूपत्वाज्जीवप्रयोगसहचरिताचेतनद्रव्यपरिणामात् कुम्भस्तम्भादिविषया, कुम्भादयो हि तेन तादृशा परिणामेनोत्पत्तुं स्वत एव शक्ताः कुम्भकारसाचिव्यादुपजायन्ते, वर्तनापरिणामयोः क्रियाजातीयत्वादेव[2] पर्यन्ते क्रियोपादानम्, परिणामश्चात्र प्रधानमित्यतो वर्तनाक्रिययोः स मध्येऽधीतः सूत्रकारेण, परिणतिविशेषा एव वर्तनाक्रियाभेदा इति ॥

गति-विचारः

प्रयोगगत्यादिविचारः

भा०—परत्वापरत्वे त्रिविधे—प्रशंसाकृते क्षेत्रकृते कालकृते इति । तत्र प्रशंसाकृते परो धर्मः[3] परं ज्ञानमपरोऽधर्मः अपरमज्ञानमिति । क्षेत्रकृते एकदिक्कालावस्थितयोर्विप्रकृष्टः परो भवति, सन्निकृष्टोऽपरः । कालकृते द्विरष्टवर्षाद् वर्षशतिकः परो भवति, वर्षशतिकाद् द्विरष्टवर्षोऽपरो भवति । तदेवं प्रशंसाक्षेत्रकृते परत्वापरत्वे वर्जयित्वा वर्तनादीनि कालकृतानि कालस्योपकार इति ॥ २२ ॥

परत्वापरत्वविचारः

टी०—परत्वापरत्वे इत्यादि । प्रशंसाक्षेत्रकालभेदात् त्रैविध्यम्, तत्र प्रशंसायाम्, परो धर्मः सर्वोत्तमत्वात् प्रशस्तः सकलमङ्गलनिलयत्वात् प्रकर्षकाष्ठागत इति, अपरोऽधर्मो जघन्यः स्वल्पगुणत्वात् निकर्षावस्थाप्राप्तः, तथा परं ज्ञानं यथावस्थितवस्तुवेदित्वात्, अपरमन्यथा, तच्चाज्ञानमेवाप्रशस्तत्वात् कुत्सितमसम्यग्दृष्टेरिति । क्षेत्रकृते इत्यादि, एकस्यां दिश्येकदा विप्रकृष्टो दूरवर्ती परः प्रत्यासन्नोऽपरः सन्निकृष्ट इत्यर्थः, दिशः प्राधान्यमविनाभावित्वात् कालोऽप्यत्राक्षिप्यते, कालैकत्वेऽप्यपदेशो भवत्येकदिग्व्यवस्थितयोः परोऽपर इति । कालकृते इत्यादि, व्यतिकरेणापरस्मिन् परं परस्मिँश्चापरमिति यन्निमित्ते प्रत्ययाभिधाने स कालः । तद्यथा—षोडशवर्षात् परो वर्षशतायुः वर्षशतायुषोऽपरो द्विरष्टवर्षायुः, प्रशंसाक्षेत्रकृतपरत्वापरत्वे चैते न भवतः, लुब्धकादावपि दर्शनात्, यस्माल्लुब्धकेऽपि देशकुलजातिविद्या-

---

१ 'सङ्कीर्णतोऽनिष्टं' इति क-ख-पाठः । २ 'जातीयकत्वादेव' इति ग-पाठः । ३ 'धर्मः अपरं ज्ञानमिति' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिहीणे परत्वापरत्वप्रत्ययाभिधानसम्भवात्, न च बन्धुजनापेक्षे, एकाकिन्यपि भावात्, न तपश्चरणालम्बने, अतपस्केऽपि दर्शनात्, न कर्मसंस्कारापेक्षे, तयोरनधिकारात्, न चादित्यनिमित्ते, तत्रापि दृष्टत्वात्, परोऽभियोग्यः अपर आदित्यः परः सविताऽपरोऽभियोग्य इति, अतः सामर्थ्यात् कालकृते, तयोर्विशेषणार्थमिदमुच्यते—**प्रशंसाक्षेत्रकृतेऽपि परत्वापरत्वे वर्जयित्वेति**, वर्तनादयः सर्वे कालकृताः **कालस्यापेक्षाकारणस्यानुग्रह उपकार** इति सूत्रार्थः ॥ एवं चायं यत्परत्वापरत्वे सूत्रभेदेन समस्य निर्दिष्टे सूरिणा तदवगमकं-न प्रशंसाक्षेत्रकृतयोरत्र परिग्रहः, वर्तना परिणामः क्रियाश्च द्रव्यस्वभावः कालापेक्षो निरदेशि, परत्वापरत्वे चावधित्वेन काललिङ्गमिति ॥ २२ ॥

भा०—अत्राह—उक्तं भवता (अ० ५, सू० १९ भाष्ये)—शरीरादीनि पुद्गलानामुपकार इति । पुद्गला इति च तन्त्रान्तरीया जीवान् परिभाषन्ते । स्पर्शादिरहिताश्चान्ये । तत् कथमेतदिति ? । अत्रोच्यते ॥

टी०—अत्राह—उक्तं भवतेत्यादिसम्बन्धग्रन्थः । अत्र प्रस्तावे परोऽभिधत्ते—प्रतिपादितं भवता शरीरादयः सुखादयश्च **पुद्गलानामुपकार** इति । **तन्त्रान्तरीयाश्च** मायासूनवीयाः **पुद्गला** इत्यनेन शब्देन **जीवान् परिभाषन्ते**—पुद्गलशब्दं जीवेषु सङ्केतयन्ति व्यवहारसिद्ध्यर्थमिति ॥ ननु च तेषां जीव एव नास्ति, कथं तद्विषयं पुद्गलध्वनिं परिभाषेरन्निति ? । उच्यते—अस्त्यार्यसम्मितीयानामात्मा, सौत्रान्तिकानां तु चित्ततद्युक्तसन्ततौ तत्पुद्गलप्रज्ञप्तिः, चित्तसन्ततौ वेदनासंज्ञा चेतनादिधर्मयुक्तायां चक्षुरादिसहितायां च चित्तेनान्योन्यानुविधानात्, इत्येषा चित्ततद्युक्तानां धर्माणां सन्ततिरहङ्कारवस्तुत्वादात्मेत्युपचर्यते, तथा पुनः पुनर्गत्यादानात् पुद्गल इत्युपचर्यते, **योगाचारणां तु** विज्ञानपरिणामः पुद्गलः ॥ यथाऽऽह—

पुद्गलशब्दार्थः

"आत्मधर्मोपचारो हि, विविधो यः प्रवर्तते ।
विज्ञानपरिणामोऽसौ, परिणामः स च त्रिधा ॥"

एवं तन्त्रान्तरीयैः पुद्गलो जीव उक्तः, त्वया पुनः शरीराद्युपकारिणः पुद्गला इत्युच्यते तदेतत् कथं विप्रतिषिद्धत्वादिति प्रश्नयति ॥ नन्वनुपपन्नः संशयः, पूर्वमुक्तमेव—रूपिणः पुद्गलाः (अ० ५, सू० ४) इति, न च रूप्यात्मा प्रतीत इति, उच्यते—रूपशब्देन तत्र मूर्तिरुक्ता, सा च मूर्तिरन्यैरसर्वगतद्रव्यपरिमाणमिष्यते, यथा मनः, तच्च स्पर्शादिरहितम्, एतन्निरासार्थमिदमवश्यं वक्तव्यं भवति सूत्रं—स्पर्शादियुक्ता मूर्तिः, तथा चतुस्त्रिद्वे-

---

१ धर्मादयस्तावदरूपिणो लक्ष्याश्च गत्यादिद्वारेण जीवानां च लक्षणमुपयोग इति प्रागेवोक्तमिति पुद्गललक्षणानि वक्तुकामः परविप्रतिपत्तिनिरासाय शङ्कते, यद्वा संघातभेदौ वक्तुकाम आरभते हेतूनाख्यातुं तत्राह ।

२ ' चित्तेऽन्योन्या ' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कगुणानि पृथिव्यादीनि कणभुजोक्तानि, तत्प्रतिषेधार्थं चावश्यंतया विधेयं सर्वाण्येतानि चतुर्गुणानीति, एता विप्रतिपत्तीः सर्वाश्चैतस्याधायात्रोच्यत इत्याह ॥

भा०—एतदादिविप्रतिपत्तिप्रतिषेधार्थं विशेषवचनविवक्षया चेदमुच्यते—

टी०—एतदादीत्यादि । एषा आदिर्यासां ता एतदादयः, पुद्गलशब्देनात्मोच्यत इत्येषा विप्रतिपत्तिराद्या, कुत्सिता प्रतिपत्तिर्विप्रतिपत्तिः, तथा सर्वगतं द्रव्यं स्पर्शादिरहितं चेति द्वितीया विप्रतिपत्तिः, तन्निषेधाय सूत्रारम्भः, तथा च पृथिव्यादिद्रव्याणि विशेषवचनैर्वक्तुमिष्टानि पृथक् पृथक् चतुर्गुणानीत्येतदभिधीयते—

पुद्गललक्षणम्

सूत्रम्—स्पर्शरसगन्धवर्णवन्तः पुद्गलाः ॥ ५—२३ ॥

टी०—प्राङ्निर्दिष्टेन्द्रियक्रमापेक्षः स्पर्शादिविन्यासः, विषयबलवत्त्वात् स्पर्शग्रहणमादौ, सति च तस्मिन् रसादिसद्भावात् । एतदुक्तं भवति—स्पर्शित्वादवादीनि चतुर्गुणानि पृथिवीवत्, तथा मनः स्पर्शादिमदसर्वगतद्रव्यत्वात् पार्थिवाणुवत्, कृतद्वन्द्वानां मत्वर्थीयः, स च सम्बन्धापेक्षः, सम्बन्धश्च स्पर्शनादिप्राप्ताः पुद्गलाः स्पर्शाद्याकारेणोपपद्यन्त इति, अथवा सर्वदैव स्पर्शादियुक्ताः पुद्गला इति नित्ययोगे मतुप् विहितः, यस्मादिन्द्रियसम्बन्धात् प्रागपि स्पर्शाद्याकारभाजस्त इति ॥

भा०—स्पर्शः रसः गन्धः वर्ण इत्येवंलक्षणाः पुद्गला भवन्ति ॥

टी०—स्पर्श इत्यादि भाष्यम् । कर्मसाधनाः सर्वे स्पर्शादयः । इतिशब्दो यस्मादर्थे । यस्मादित्थंलक्षणाः पुद्गला भवन्ति तस्मान्न जीवाः पुद्गलशब्दवाच्या इति, यथा चैते परमाण्वादिगताः स्पर्शादयो गुणाः परमाण्वादिभ्यो भिन्नाश्चाभिन्नाश्च तथा 'गुणपर्यायवद् द्रव्यम्' इत्यत्र (३७) सूत्रे प्रतिपादयिष्यामः ॥ ननु च नैव केचन विज्ञानाद् बहिः स्पर्शादिमन्तः पुद्गला विद्यन्ते, विज्ञानमेव तथा प्रत्यवभासते, बाह्यार्थनिरपेक्षस्वप्नादाविवेति । अयुक्तमेतत्, अनुभवविरोधात्, यस्माद् देशविच्छेदेन स्वान्तर्वर्तिनोऽनुभवाद् बहिरवभासमानो दृश्यते नीलपीतादिरर्थः । स्वसंवेद्यो हि बुद्धिसन्निवेशी बाह्यार्थाकारानुकारो द्योतते स निह्नोतुमशक्यः, यदा चार्थस्य ज्ञानग्राह्यं स्वरूपं तद् द्योतते कथं सोऽर्थो नास्तीत्युच्यते, स्वप्ने च विपर्ययदर्शनाद्विपर्ययदर्शनाच्च जाग्रदवस्थायामित्यसमञ्जसमुदाहरणम्, प्रमाणप्रमाणाभासाविशेषाच्च । बाह्यार्थशून्यतायां हि वस्तुस्वलक्षणग्राहि ज्ञानं प्रमाणं प्रत्यक्षमर्थान्तरविकल्पमुखेन प्रवर्तमानं प्रत्यक्षाभासमित्येष विशेषो न स्यात्, तस्माद् विज्ञानं बहिरर्थस्वरूपानुकारितया साकारम्, अनाकारत्वे प्रत्यासत्तिविप्रकर्षाभावात् सर्वार्थग्रहणमग्रहणं वा स्यात्, अतो ग्राहकविशेषादेव ग्राह्यदृष्टिनिबन्धनम्, अन्यथाऽर्थज्ञानमित्येतदपि न स्यात्, व्यपदेशस्यापकारप्रभावितत्वात्, उपकारस्य च जन्यजनकभावनान्तरीयकत्वात्, अलमतिप्रसङ्गेन, प्रकृतमुच्यते—

---

१ 'पृथग्गुणानी०' इति क-ख-पाठः । २ 'बाह्यार्थाकारो' इति ग-पाठः । ३ 'भावाना०' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्पर्शादीनां प्रकाराः

भा०—तत्र स्पर्शोऽष्टविधः—कठिनो मृदुर्गुरुर्लघुः शीत उष्णः स्निग्धो रूक्ष इति । रसः पञ्चविधः—तिक्तः कटुः कषायोऽम्लो मधुर इति । गन्धो द्विविधः—सुरभिरसुरभिश्च । वर्णः पञ्चविधः—कृष्णो नीलो लोहितः पीतः शुक्ल इति ॥ २३ ॥ किञ्चान्यत्—

कठिनप्रमुखस्पर्शादीनां लक्षणानि

टी०—तत्रेत्यादि । स्पर्शादीनामनन्तपर्यायत्वेऽपि मौलभेदप्रसिद्ध्यर्थमिदं प्रक्रियते, कठिनादयो विद्वदङ्गनाबालादिप्रतीतास्तथापि सुप्रयुक्तकारिभिरमूनि लक्षणानि प्रत्येकं प्रकाश्यन्ते, अनमनात्मकः कठिनः, सोन्नतिलक्षणो मृदुः, अधोगमनहेतुर्गुरुः, प्रायस्तिर्यगूर्ध्वगमनहेतुर्लघुः, वैशद्यकृत् स्तम्भनस्वभावः शीतः, मार्दवपाककृदुष्णः, संयोगे सति संयोगिनां बन्धकारणं स्निग्धः, तथैवाबन्धकारणं च रूक्षः, इतिशब्दः परिस्थूरस्पर्शभेदेयत्ताप्रतिपादनार्थः । अत्र च स्निग्धरूक्षशीतोष्णाश्चत्वार एवाणुषु सम्भवन्ति, स्कन्धेष्वष्टावपि यथासम्भवमभिधानीयाः । श्लेष्मशमनकृत् तिक्तः, श्लेष्मभेदपाटवकृत् कटुः, अन्नरुचिस्तम्भनकर्मा कषायः, आश्रवणक्लेदनकृदम्लः, ह्लादनबृंहणकृन्मधुरः, लवणो मधुरान्तर्गत इत्येके, संसर्गज इत्यपरे । सुरभिश्चन्दनोशीरकश्मीरजादीनाम्, असुरभिर्लसुनविष्ठादीनाम्, सौमुख्यवैमुख्यकारित्वात् साधारण इत्येके, तन्न, उभयोरन्तर्गीतविषयत्वात् । कृष्णादयो वर्णाः क्रमेणाञ्जनशुकपत्ररुधिरकाञ्चनशङ्खादिषु विभावनीयाः, संसर्गजाः सारङ्गादयः । एवमेतद् द्रव्यमेव स्पर्शादिभेदेन भिद्यते त्वगादीन्द्रियग्राह्यमनेकशक्तियुक्तत्वाद् द्रव्यनयाभिप्रायः, पर्यायस्य तु स्पर्शादय एव, न द्रव्यं, तदग्रहे तद्बुद्ध्यभावादिति ॥ २३ ॥

किञ्चान्यदित्यनेन सम्बन्धयति । असकलरूपद्रव्यधर्मनिर्देशादनेनेदमुच्यते—किञ्चान्यदिति । पुद्गलानां न केवलं स्पर्शादयो धर्माः, शब्दादयश्चेति दर्शयति—

पुद्गलानां शब्दादिधर्माः

सूत्रम्—शब्द-बन्ध-सौक्ष्म्य-स्थौल्य-संस्थान-भेद-तमश्छाया-तपोद्योतवन्तश्च ॥ ५—२४ ॥

टी०—शब्दादयः कृतद्वन्द्वा मतुपा निर्दिश्यन्ते पुद्गलपरिणामप्रदर्शनाय । चशब्दः पुद्गलानुकर्षणार्थः ॥

भा०—तत्र शब्दः षड्विधः—ततो विततो घनः शुषिरः[1] संघर्षो भाषा इति ॥

टी०—तत्र शब्द इत्यादि भाष्यम् । तत्रेति तेषु शब्दादिषु पुद्गलपरिणामेषु शब्दस्तावदेवंस्वरूपः, विवक्षावशादन्वयव्यतिरेकाभ्यां प्रधानगुणभावतया सामान्यविशेषवतोऽर्थस्याभि-

१ 'सुरभिश्चासुरभिश्च' इति क-ख-पाठः । २ '०रो घर्षो भाष इति' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धायकः प्रत्यर्थनियतसङ्केतवर्णादिविभागवान् ध्वनिरेव शब्दः, न स्फोटः, अनादिवृद्धपरम्परासङ्केतप्रसिद्धिवशात् प्रत्यर्थनियतत्वम्, परस्परापेक्षातः स्वाभिधेयैकार्थकारितया शिबिकोद्वाहकवत् सङ्गतत्वम्, वर्णपदवाक्यानि विभागः, तद्वान् ध्वनिरेव च शब्दः—श्रोत्रग्रहणः, न स्फोटः शालातुरीयमतानुसारिवैयाकरणनिकायपरिकल्पितः, तेषां हि ध्वनिरुच्चरितः स्फोटं किलाभिव्यनक्ति, तस्मादभिव्यक्तादर्थप्रतीतिरिति, असम्बन्धमेतत्, अनित्यत्वापत्तेः, स्फोटस्य अभिव्यज्यमानत्वान्मूलकीलोदकादिवत्, अर्थप्रतीतिहेतुत्वात्, प्रदीपादिवत्, प्रदीपादिनित्यत्वे वा दृष्टान्ताभावः, न च स्फोटमभिव्यञ्जन्ति ध्वनयः, अचाक्षुषप्रत्यक्षत्वात् गन्धवदित्यतो ध्वनिरूपः शब्दः स्मृतेः कारणम्, सर्वस्य शब्दस्य प्राग्व्युत्पन्नसङ्केतवशादर्थप्रत्यायनम्, ततश्च पूर्वोपलब्धार्थानुस्मरणात् स्मार्तं शब्दविज्ञानम्, न चान्यापोहमात्रं शब्दार्थः, विधिनिरपेक्षस्य व्यतिरेकस्यात्राप्रसिद्धेरन्वयस्य च व्यतिरेकशून्यस्यानुपलब्धेः, परस्परापेक्षाभ्यामन्वयव्यतिरेकाभ्यां सर्वत्रार्थाधिगतेः व्यतिरेकस्यैव प्राधान्यमित्ययुक्तम्, तथाचाह दत्तकभिक्षुरेव—"अर्थान्तरापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्त इत्युच्यते" । हिशब्दो यस्मादर्थे । यथा वृक्षशब्दोऽवृक्षशब्दनिवृत्तिं स्वार्थे कुर्वन् स्वार्थं वृक्षलक्षणं प्रत्याययतीत्युच्यते, एवं च निवृत्तिविशिष्टं वस्तु शब्दार्थः, न निवृत्तिमात्रम्, अलक्षणीयमेव च स्यान्निवृत्तिमात्रमवस्तुत्वात् खरविषाणकुण्ठतीक्ष्णतादिवर्णनावत्, अत्र च न प्राग् विधिना घटं गृहीत्वा पश्चादन्यापोहं करोति, नाप्यन्यापोहं कृत्वा पश्चाद् घटं कालभेदेन गृह्णाति, क्रमेण हि ग्रहणे ह्यसिष्ठत्वात् क्षणिकत्वाच्च सर्वभावानां ध्वनेर्ज्ञानस्य च न युक्तं व्यापारद्वयानुष्ठानम्, सन्तानाच्चेत् तदयुक्तमवस्तुत्वात्, एवं तर्हि घटग्रहणमन्यापोहश्च युगपदुभयं सिद्धम्, यथा सवितुरुदये सन्तमसविदलनं स्वरूपप्रकाशनं च स्वभावात्, एवं सत्युभयमभिधेयं सामान्यं विशेषश्चेत्यवशेनापि प्रतिपत्तव्यमन्यापोहशब्दार्थवादिना, अन्वयव्यतिरेकयोस्तुल्यकक्षत्वाद् विधेयमपि प्रधानमेवास्तु, नहि द्वयोरर्थयोर्धवखदिरवद् युगपदुपात्तयोरेकस्य गुणभावकल्पना श्रेयसी ॥ ननु चान्वयस्य प्राधान्येऽभ्युपेयमाने प्रयत्नानन्तरीयकत्वमव्याप्तसपक्षं सत्त्वानित्यत्वं गमयेत्, केन चेदमुक्तं—व्याप्तसपक्षं गमयति अव्याप्तसपक्षं न गमयतीति, एतावत्तु उच्यते—अन्वयनिरपेक्षो न गमयति व्यतिरेकः, नापि व्यतिरेकनिरपेक्षोऽन्वयः प्रतिपादकोऽर्थस्य, परस्परापेक्षतायां च शिबिकोद्वाहकादिवत् सर्वत्र प्राधान्यं, क्वचिद् विवक्षावशात् वाऽन्यतरस्य गुणप्रधानकल्पनेति । यथाऽऽह—द्वादशशतिकायाम् "यदप्युक्तमप्रसक्तस्य किमर्थं प्रतिषेध इति, नैवैतत्, प्रतिषेधमात्रमुच्यते, किन्तु तस्य वस्तुनः कश्चिद् भोगार्थान्तरनिवृत्त्या लोके गम्यते यथा विषाणित्वादनश्च इति, न चार्थाक्षिप्तो विशेषः, साक्षादभिधीयमानत्वात्", यथैव सामान्यमुच्यते तथा विशेषोऽपीत्युभयमत्र मुख्यं वाच्यमित्यतः सामान्यविशेषात्मकमेवाभिधेयम् । शब्दश्च

शब्दस्य स्फोटाद् भिन्नत्वम्

१ 'वृक्षशब्दः' क-ख—योर्नास्ति । २ 'वर्णनवत्' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुद्गलद्रव्यपरिणामः, तत्परिणामता चास्य मूर्तत्वात्, मूर्तता च द्रव्यान्तरविक्रियापादनसामर्थ्यात् पिप्पलादिवत्, ताड्यमानपटहतलस्थकलिंचादिप्रकम्पनात्, तथा शङ्खादिशब्दानामतिमात्रप्रवृद्धानां श्रवणबधिरीकरणसामर्थ्यम्, तच्च नाकाशादावमूर्तेऽस्ति, तथा प्रतीपयायित्वात् पर्वतप्रतिहताश्मवत्, द्वारानुविधायित्वादातपवत्, संहारसामर्थ्यादगुरुधूपवत्, वायुना प्रेर्यमाणत्वात् तृणपर्णादिवत्, सर्वदिग्ग्राह्यत्वात् प्रदीपवत्, अभिभवनीयत्वात् तारासमूहादिवत्, अभिभावुकत्वात् सवितृमण्डलप्रकाशवत्, महता हि शब्देनाल्पोऽभिभूयते शब्द इति प्रतीतम्, तस्मात् पुद्गलपरिणामः शब्दः ॥

शब्दस्य पुद्गलत्वे हेतवः

ननु चाकाशस्य गुणाः—शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागाः, आकाशस्य गुणः शब्द इति कणभुङ्मतम्, एकद्रव्यवत्त्वाद्[1], एकेनाश्रयद्रव्येण द्रव्यवत्त्वमेकद्रव्यवत्त्वम्, अथवा एकं च तत् द्रव्यं चेत्येकद्रव्यं तदस्याश्रयोऽस्तीत्येकद्रव्यवांस्तद्भाव एकद्रव्यवत्त्वं तस्मादेकद्रव्यवत्त्वान्न द्रव्यम्, न च कर्माचाक्षुषप्रत्यक्षत्वात्, अतः परिशेषाद् गुणः, स च क्षणिकः प्रागूर्ध्वं चोच्चारणात् सत्त्वे लिङ्गाभावात्, कारणसामग्र्याः प्रागभूतात्मलाभत्वात्, शब्दाभिव्यञ्जकवस्त्वभावात्, सति चाभिव्यञ्जके कारणजो[2] विकारो न स्यात्, नहि घटस्य प्रदीपादिदिव्यमणिव्यञ्जकसन्निधाने परिमाणानुविधानं दृष्टम्, तावानेव हि घटकोऽभिव्यञ्जकभेदे सत्यपि, अयं त्वल्पमध्यादिभेद उपलभ्यते, तथा—भेर्यादिसंयोगान्निष्पत्तेर्वेणुपर्वविभागाच्छब्दाच्च शब्दनिष्पत्तेः वीचिसन्तानवत्, न चायं विशेषगुणः स्पर्शवतां द्रव्याणां भूजलानलानिलानामकारणगुणपूर्वत्वात्, यथा शुचौ शङ्खे कारणगुणपूर्वं धवलं रूपमालक्ष्यते, विनष्टेऽपि तस्मिन् जलजे तथालक्षणमेव रूपं शकलेषु गृह्यते, न त्वेवं भेर्यादिशब्दाः प्रध्वस्तेषु भेर्यादिषु तदवयवेषूपलभ्यन्ते, शरीरे वा सामश्लोकादिशब्दाः शरीरावयवेषु वोपलक्ष्यन्ते, तस्मान्न कारणगुणपूर्वः शब्दः, तथा यदि स्पर्शवतो गुणः स्यात् शब्दस्ततो यावत् तानि स्पर्शवद् द्रव्याणि तावद् भवेद् रूपादिवत्, न चैवमुपपद्यते, तस्मादयावद्द्रव्यभावित्वान्न पृथिव्यादिगुणः शब्दः, इतश्च न स्पर्शवद्द्रव्यगुणः शब्दः, आश्रयादन्यत्रोपलब्धेः, अन्यत्र हि शङ्खमुखसंयोगोऽन्यत्र दिगन्तरेऽवस्थितैः श्रोतृभिरुपलभ्यते शब्दः, स्पर्शवद्गुणास्तु रूपादयोऽन्यत्राश्रयान्न गृह्यन्ते, तस्मान्न शब्दः स्पर्शवतां गुणः, बाह्येन्द्रियप्रत्यक्षत्वाच्च नात्ममनोदिकालानाम्, पारिशेष्यादाकाशगुणः, लिङ्गमाकाशस्यानुपलभ्यमानस्येति । तदेतदघटमानकमेव वैशेषिकैर्वाचालतया स्वमतिविकल्पशिल्परचनामात्रमाविष्क्रियते गगनमहार्शिखरवर्णनवत्[3], मूर्तत्वं हि प्रत्यपादि प्रागस्यास्माभिर्युक्तितः, तत् कथं मूर्तस्य व्योमगुणत्वोपपत्तयः सङ्क्रस्यन्ते? नहि रूपादयो व्योमगुणा इति व्याहारः शोभते, पुद्गलानामेव हि

शब्दस्य गुणत्वे वैशेषिकविचारः

शब्दस्य गुणत्वनिरासः

---

१ 'कलिम्बादीप्र' इति ग-पाठः । २ 'द्रव्यवन्त्वात्' इति क-ख-पाठः । ३ 'कारणतो' इति ग-पाठः । ४ 'शिखरवत्' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाविधः परिणामः शब्दव्यपदेशभागित्येकद्रव्यवत्त्वाभावः, ततश्च स्याद् द्रव्यं स्याद् गुणः, परिणामस्य परिणामिनोऽर्थान्तरानर्थान्तरत्वेनाभ्युपेतत्वात्, एतेनानित्यत्वैकान्तः प्रत्युक्तः, सर्ववस्तूनां द्रव्यपर्यायात्मकत्वात्, एवं तर्ह्याकाशस्यापि केनचिदाकारेण गुण एवेति चेत्, नामाकाशादिविवक्षावशाददोषोऽयमनेकान्तवादिनः, द्रव्यपरिणाममात्रत्वाच्च कर्मणोऽचाक्षुषप्रत्यक्षताऽप्यसिद्धा, यदि कथञ्चित् क्षणिकत्वम्, सिद्धमाध्यता, सर्वात्मना चेत्, दृष्टान्ताभावः, सत्त्वमपि केनचित् पुद्गलरूपाद्याकारेणेत्यतः सत्त्वे लिङ्गाभावादित्यसम्बद्धम्, कारणसामग्र्या चाकारान्तरावस्थानमापद्यत इत्युत्थितासीनशयितपुरुषवदित्यभूतात्मलाभत्वमसिद्धम्, शब्दपर्यायेणाभूत इति चेत्, उक्तमसकृन्न वस्तु पर्यायमात्रं, किं तर्हि ? द्रव्यं पर्यायश्चेत्युभयम्, अभिव्यक्तिदूषणान्यप्येकान्तावस्थितवस्तुपक्षेऽवतरीतुमुत्सहन्ते, न तु परिणामा यस्य कथञ्चिदनित्यं कथञ्चिन्नित्यमिति, दण्डादिताडनोत्थितभेर्यादिपुद्गलाश्च समासादितशब्दरूपादिमन्तः सन्तोऽपि सूक्ष्मत्वात् कारणगुणपूर्वका अपि नोपलक्ष्यन्ते[1], विध्यातदीपशिखारूपादिवद् गन्धपरमाणुव्यवस्थितरूपादिवद् वा, न च सर्वदा स पर्यायः शब्दाख्यः प्रादुरस्ति, द्रव्यक्षेत्रकालभावापेक्षत्वात् पित्तादिप्रकोपवत्, भेर्याद्याश्रयाश्च निश्च(स्स)रन्तः स्कन्धाः शब्दपर्यायमजहतो दिगन्तरस्थितैरपि गृह्यन्त इति नाश्चर्यम्, नैव चोपलभ्यते स्वोपघ्नादन्यत्र शब्दपरिणामः, तादृग्विधाकारेषु परमाणुष्वेवावतिष्ठते, आध्यात्मिकश्च शब्दः काययोगात्तशब्दवर्गणायोग्यस्कन्धपरिणतिर्वाग्योगः, प्रयोगविक्षिप्तो रूपादिमत्पुद्गलसङ्घात एवेति, बाह्यस्त्वनेकाकारः सङ्घर्षजादिः । अपि च–शब्दत्वं नित्यमभ्युपयन् कणादः पर्यनुयुज्यते श्रावणत्वान्नित्यः शब्दत्ववच्छब्दः, कृतकत्वस्यानित्यत्वेन व्याप्तेर्विरुद्धाव्यभिचारित्वमिति चेत्, नित्यानित्यस्वभावसर्वपदार्थवादिनस्तन्न बाधायालम्, अनेकान्तवादिना च न नित्यत्वानित्यत्वयोर्विरोधोऽभ्युपगम्यते, विरोधलक्षणासम्भवात्, एकस्तावद् विरोधोऽहिनकुलाग्निजलादीनामेकस्मिन् काले सति संयोगे द्वित्ववदनेकाश्रयत्वाद् वध्यघातकलक्षणः, नह्यसंयुक्तमुदकमग्निं विध्यापयति, त्रैलोक्येऽप्यग्न्यभावप्रसङ्गात्, संयोगेन तु क्षणमात्रावस्थितत्वात् पश्चादेकस्याऽबलता द्वितीयस्य बलीयस्त्वम्, न चैवं नित्यानित्यत्वयोः क्षणमात्रमप्येकस्मिन् वृत्तिरेकान्तवादिनाऽभ्युपेयते, अतो न वध्यघातकलक्षणो विरोधः समस्ति, नाप्यसहावस्थानलक्षणः, तत्र हि शीतोष्णयोः फले वृन्तसंयोगविभागयोराम्रफले च श्यामतापीततयोर्नैकस्मिन् वस्तुनि एककाला वृत्तिरस्ति, किन्त्वेकस्य प्राग्विद्यमानता द्वितीयस्य चोत्पद्यमानतास्वभाव इत्यसावुत्पद्यमानः पूर्वं विरुणद्धि, यथा सहकारफले पीतता श्यामताम्, न चैवमवस्थितं प्राग्नित्यत्वमनित्यत्वेनोपजायमानेन नाश्यते, तद्धि नित्यमेव न स्यादध्रुवत्वादिति, न च प्रतिबध्यप्रतिबन्धकलक्षणो विरोधः स्याद्वादिनं प्रति घटते, यत एकस्मिन्नात्मद्रव्ये युगपद् धर्माधर्मावुभौ सम्भवतः, तत्र

नित्यानित्यत्वयोर्विरोधाभावः

---

१ ' लभ्यन्ते ' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वेकस्य गुणभूतत्वमन्यस्य प्रधानत्वमेवं चेत्, इष्यते एव द्रव्यपर्याययोरन्यतरस्य गुणप्रधानभावः, त्वयाऽप्येकस्मिन् काले द्रव्ये च धर्माधर्माववश्यमभ्युपगन्तव्यौ, अन्यथा प्रतिबन्ध्यप्रतिबन्धकभाव एव न स्यात्, अतो वाङ्मात्रमेव विरोध इति । न च सामान्यादत्यन्तभिन्ना व्यक्तिरिति जैनसिद्धान्तः । एतेन नादवृद्धिः परेति प्रत्युक्तम्, नादो महान् मध्योऽल्पश्च, न शब्द इति शबरेणोक्तम्, तदसत्, शब्दस्यैव तथाविध्यात्, तीव्रमन्दमध्यप्रयत्नभेदान्महाञ्छब्दोऽल्पो मध्यश्चेति सामानाधिकरण्येन शब्द एव व्यपदिश्यते, न च शब्दव्यतिरिक्तं श्रोत्रस्य ग्राह्यमस्ति, शब्दधर्म एव नाद इति चेत्, स ततोऽन्योऽनन्य इति वाच्यम्, उभयथा च दोष इति । येऽपि प्रधानपरिणाममुशन्ति शब्दं तैरपि सामान्यविशेषवान् मूर्तश्चाभ्युपेयः, अन्यथा तत्कृतव्यवहारो विच्छिद्येत, येऽपि सङ्गिरन्ते श्रोत्रेन्द्रियविषयमुपात्तानुपात्तोभयमहाभूतहेतुकं शब्दम्, तैरपि न विशेषमात्रमुत्खातसामान्यमूलमवलम्बनीयम्, अयोनयो हि विशेषाः खपुष्पसौरभवदनासादितात्मलाभा एव स्युः, एकान्तक्षणिकता च दृष्टान्ताभावादेवातिदुर्लभेति । तस्मादवस्थितमेतत्—पुद्गलद्रव्यमेव प्रतिविशिष्टपरिणामानुगृहीतं शब्द इति । स द्विधा विस्रसाप्रयोगभेदात्, तत्र वस्रसिको जलधरध्वानादिः, प्रयोगजो जीवव्यापारनिष्पन्नः षोढा तताद्यः, ततो मृदङ्गपटहादिसमुद्भवः, विततो वीणात्रिसरिकादितन्त्रीप्रभवः, कांस्यभाजनकाष्ठशलाकादिजनितो घनः, वेणुकम्बुवंशविवराद्युद्भवः शुषिरः, ककचकाष्ठादिसङ्घर्षप्रसूतः सङ्घर्षः, व्यक्तवाग्भिर्वर्णपदवाक्याकारेण भाष्यत इति भाषा, प्रतिनियतसंस्थानान्यक्षराणि वर्णाः, वर्णसमुदायः पदम्, पदसमुदायो वाक्यमर्थविशेषप्रतिपत्तिहेतुः, इतिशब्दः शब्दभेदेयत्तापरिसमाप्तिप्रदर्शनपरः ॥

अन्यमतपूर्वकं शब्दस्वरूपम्

शब्दस्य भेदप्रभेदाः

भा०—बन्धस्त्रिविधः—प्रयोगबन्धो विस्रसाबन्धो मिश्रबन्ध इति । स्निग्धरूक्षत्वाद् भवतीति वक्ष्यते (अ० ५, सू० ३२) ॥

बन्धस्य त्रैविध्यम्

टी०—बन्धस्त्रिविध इत्यादि । बन्धनं बन्धः—परस्पराश्लेषलक्षणः, प्रयोगो—जीवव्यापारस्तेन घटितो बन्धः प्रायोगिकः—औदारिकादिशरीरजतुकाष्ठादिविषयः, विस्रसा—स्वभावः प्रयोगनिरपेक्षो विस्रसाबन्धः, स द्विधा आदिमदनादिमद्भेदात्, तत्रादिमान् विद्युदुल्काजलधराग्नीन्द्रधनुःप्रभृतिर्विषमगुणविशेषपरिणतपरमाणुप्रभवः स्कन्धपरिणामः, अनादिरपि धर्माधर्माकाशविषयः, प्रयोगविस्रसाभ्यां जीवप्रयोगसहचरिताचेतनद्रव्यपरिणतिलक्षणः स्तम्भकुम्भादिर्मिश्रः, अत्र चोभयमपि प्राधान्येन विवक्षितम्, सामान्यलक्षणं च बन्धस्य स्निग्धरूक्षत्वादित्युपरि व्याख्यास्यते, एतच्च बन्धलक्षणमनादौ वैस्रसिके न सम्भवत्यन्यत्र तु सङ्गच्छते, 'सामान्योक्तो विधिर्विशेषेऽवस्थानं लभत' इति वचनात् ॥

---

१ पौद्गलिकबन्धस्यैव लक्ष्यत्वात् नोपयोगोऽस्य, बन्धसामान्याधिकारे एव विस्रसाबन्धस्यानादितया यामः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—सौक्ष्म्यं द्विविधम्-अन्त्यमापेक्षिकं च। अन्त्यं परमाणुष्वेव, आपेक्षिकं च द्व्यणुकादिषु सङ्घातपरिणामापेक्षं भवति। तद्यथा-आमलकाद् बदरामिति ॥

सौक्ष्म्यस्य द्वैविध्यम्

टी०—सौक्ष्म्यं द्विविधमित्यादि। सूक्ष्मता सौक्ष्म्यं-पुद्गलपरिणामः, तद् द्विधा, अन्ता-विभागाः परमाणवस्तद्भवमन्त्यमन्यत्रासम्भवात् परमाणुष्वेवेत्युच्यते, अपेक्षा-प्रतीत्यबुद्धिस्तत्प्रयोजनमापेक्षिकम्, द्व्यणुकस्कन्धस्त्र्यणुकाद्यपेक्षया सूक्ष्मः चतुरणुकादीन् प्रतीत्य त्र्यणुकस्कन्धः सूक्ष्म इत्यादि बहुभेदम्, सङ्घातपरिणामः-स्कन्धपरिणामस्तदपेक्षं भवति। तद्यथेत्यनेन निदर्शनोपन्यासं सूचयति, आमलकं प्रतीत्य बदरं सूक्ष्मम्, आदिशब्दार्थ इतिशब्दः ॥

भा०—स्थौल्यमपि द्विविधम्-अन्त्यमापेक्षिकं च। सङ्घातपरिणामापेक्षमेव भवति। तत्रान्त्यं सर्वलोकव्यापिनि महास्कन्धे भवति। आपेक्षिकं बदरादिभ्य आमलकादिष्विति ॥

स्थौल्यस्य द्वैविध्यम्

टी०—स्थौल्यमपीत्यादि। स्थूलभावः स्थौल्यं-परमाणुप्रचयपरिणामः, तत्रान्त्यमशेषलोकव्यापिन्यचित्तमहास्कन्धे, इह चावयवविकासः स्थौल्यं विवक्षितम्, प्रवचने त्वयं सूक्ष्मपरिणाम एवाधीतः[1], यदि च बादरः स्थूलपरिणामः स्यात् ततो महामहीध्रवत् समस्तं लोकमुत्सादयेदतः स्थौल्यं विकासितावयवानामचक्षुर्गम्यम्, आपेक्षिकं तु बदरादामलकं स्थूलमामलकाद् दाडिमम्, इह तु विकासे सत्यप्यवयवानां बादरः परिणामः, ततश्चामलकादिर्नियनोपलभ्यम्[2] ॥

भा०—संस्थानमनेकविधम्। दीर्घह्रस्वाद्यनित्थन्त्वपर्यन्तम् ॥

टी०—संस्थानमित्यादि। आकृतिः संस्थानं रचना सन्निवेशः, तद् द्विविधमात्मानात्मपरिग्रहात्, तत्रात्मानः पृथिव्यप्तेजोवायुवनस्पतयः द्वित्रिचतुरिन्द्रियाः पञ्चेन्द्रियाश्च, क्रमेणैषां मसूरस्तिबुकसूचीकलापपताकानित्थन्त्वसंस्थानानि, पुद्गलकृतानि शरीराणीतियावत्, विकलेन्द्रियाणां हुण्डकं त्रयाणामपि वपुः, पञ्चेन्द्रियाणां षोढा शरीरसन्निवेशो यथासम्भवं नामकर्मोदयनिर्वृत्तः समचतुरस्र-न्यग्रोधपरिमण्डल-सादि-कुब्ज-वामन-हुण्डलक्षणोऽनया गाथया विभावनीयः—

"तुल्लं वित्थडबहुलं, उस्सेहबहुं च मडहकोट्ठं च।
हिट्ठिल्लकायमडहं, सव्वत्थासंठियं हुंडं ॥"[4]—आर्या

अथाजीवपरिगृहीतं वृत्त-त्र्यस्र-चतुरस्रायत-परिमण्डलभेदात् पञ्चधा, तत्र वृत्तं द्विविधं युग्मायुग्मभेदात्, युग्ममपि द्विविधं प्रतरघनभेदात्, तत्र प्रतरयुग्ममिदं जघन्येन द्वादशप्रदेशम्, इदमेव च युग्मं घनवृत्तं भवति द्वादशभिरन्यैः प्रक्षिप्तैर्मध्यमेषु च चतुर्षु घरकेषूपर्य-

१ अचित्तमहास्कन्धः स्थूलताऽभावात् अपर उत्कृष्टप्रदेशिको ग्राह्यः, यतस्तस्याष्टस्पर्शवत्ता, न त्वचित्तमहास्कन्धस्य।
२ प्रचयविशेषेण स्थूलरूपेण धूमादिवत् व्यापकत्वेऽपि नोत्सादनम्। ३ '०कादि नियतोपलभ्यम्' इति क-ख-पाठः।
४ तुल्यं विस्तृतबहुलं, उत्सेधबहुलं च मडभकोष्ठं च।
अधस्तनकायमडभं, सर्वत्रासंस्थितं हुण्डम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धश्चतुर्भिः प्रक्षिप्तैर्द्वात्रिंशत्प्रदेशमिदम्, विषमप्रतरवृत्तं तु जघन्येन पञ्चप्रदेशमिदम्, एतदेव मध्यगेहे प्रदेशद्वयक्षेपादुपर्यधश्च विषमघनवृत्तं सप्तप्रदेशमिति, उत्कर्षेणानन्तप्रदेशमसङ्ख्येयप्रदेशावगाढम्, अधुना त्र्यस्रं द्विधा युग्मायुग्मभेदात्, युग्मं द्विधा प्रतरघनभेदात्, युग्मप्रतरत्र्यस्रं जघन्येन षट्प्रदेशमिदम्, उत्कर्षेणानन्तप्रदेशम्, युग्मघनत्र्यस्रं जघन्येन चतुःप्रदेशम्, उत्कर्षेणानन्तप्रदेशम्। अयुग्ममपि द्विधा प्रतरघनभेदात्, ओजप्रतरत्र्यस्रं जघन्येन त्रिप्रदेशम्, उत्कर्षेणानन्तप्रदेशम्, घनत्र्यस्रं जघन्येन पञ्चत्रिंशत्प्रदेशम्, अत्रैव चान्त्यान्त्यप्रदेशानुज्झित्वा दश षट् त्रय एकश्च क्षेप्यः, उत्कर्षेणानन्तप्रदेशम्, एतदेव प्रदेशचतुरस्रमपि द्विधा युग्मायुग्मभेदात्, युग्मं द्विधा प्रतरघनभेदात्, युग्मप्रतरचतुरस्रं जघन्येन चतुःप्रदेशम्, उत्कर्षेणानन्तप्रदेशम्, एतदेव प्रदेशचतुष्टयक्षेपाद् युग्मघनचतुरस्रं भवत्यष्टप्रदेशम्, उत्कर्षेणानन्तप्रदेशम्, ओजचतुरस्रमपि द्विधा प्रतरघनभेदात्, ओजप्रतरचतुरस्रं जघन्येन नवप्रदेशम्, इदमुत्कर्षेणानन्तप्रदेशम्, एतदेवौजघनचतुरस्रं भवत्युपर्यधश्च नवभिर्नवभिः प्रक्षिप्तैः सप्तविंशतिप्रदेशम्, उत्कर्षेणानन्तप्रदेशम्, आयतमपि द्विधा युग्मायुग्मभेदात्, युग्मं द्विधा श्रेणिप्रतरभेदात्, तत्र युग्मश्रेण्यायतं जघन्येन द्विप्रदेशम्, उत्कर्षेणानन्तप्रदेशम्, युग्मं प्रतरायतं जघन्येन षट्प्रदेशम्, उत्कर्षेणानन्तप्रदेशम्, एतदेव च युग्मघनायतं भवति यथान्यासमुपरिषट्प्रदेशक्षेपाज्जघन्येन द्वादशप्रदेशम्, उत्कर्षेणानन्तप्रदेशम्, अयुग्मायतमपि द्विधा श्रेणिप्रतरभेदात्, तत्रौजश्रेण्यायतं जघन्येन त्रिप्रदेशम्, उत्कर्षेणानन्तप्रदेशम्, ओजप्रतरायतं जघन्येन पञ्चदशप्रदेशम्, उत्कर्षेणानन्तप्रदेशमिदम्, एतदेवौजघनायतं भवत्युपर्यधश्च पञ्चदशभिः क्षिप्तैः जघन्येन पञ्चचत्वारिंशत्प्रदेशम्, उत्कर्षेणानन्तप्रदेशम्, परिमण्डलं द्विधा प्रतरघनभेदात्, तत्र प्रतरपरिमण्डलं जघन्येन विंशतिप्रदेशमिदम्, एतदेव घनपरिमण्डलं भवत्यन्यैर्विंशतिसंख्यैः प्रदेशैर्निहितैर्जघन्येन चत्वारिंशत्प्रदेशम्, उत्कर्षेणानन्तप्रदेशम् ॥ अत्र च भाष्ये दीर्घहस्वग्रहणादायतमेव परिगृहीतमादिशब्दाच्छेषाणि, उक्तेन प्रकारेण वृत्तादिना निरूपयितुं यन्न शक्यं तदनित्थं तद्भावोऽनित्थन्त्वं तत्पर्यन्तमनेकधा संस्थानमिति ॥

वृत्तादिसंस्थानानां तद्भेदपूर्विका व्याख्या

भा०—भेदः पञ्चविधः—औत्कारिकः चौर्णिकः खण्डः प्रतरः अनुतट इति ॥

टी०—भेदः पञ्चविध इत्यादि। एकत्वद्रव्यपरिणतिविश्लेषो भेदः, स च पुद्गलपरि-

---

१ ०० ०। २ मध्याणोरुपर्यधश्च एकैकाणुन्यासात्। ३ चतुर्ष्वपि वृत्तभेदेषु समन्वाख्येतत्। ४ ०० ०००।

५ ०० अत्र यस्य कस्यचिदुपरि न्यस्योऽन्योऽणुः। ६ ००। ७ ०००० ०००० ००। ८ ००। ९ ००० ०००।

१० ००। ११ ००० ०००। १२ ०००। १३ ०००० ०००० ०००००।

१४ व्यवहारानुसार्युपदेशात् न कतिपयपरमाणुजन्यसंस्थानोपदेशः, अनित्थं तु संस्थानं दीर्घादिना व्यपदेष्टुं यन्नार्हं नाधिकारश्च जीवसंस्थानैरपि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णामो भिद्यमानवस्तुविषयत्वात्, तद्व्यतिरेकेणानुपलब्धेर्भिन्नद्वयमेव भेदः, तत्रौत्कारिकः समुत्कीर्यमाणदारुप्रस्थकभेरीबुन्दाघर्षादिविषयः, अवयवशश्चूर्णनं चौर्णिकः क्षिप्तपिष्टमुष्टिवत्, खण्डशो विशरणं खण्डभेदः क्षिप्तमृत्पिण्डवत्, प्रतरभेदोऽभ्रपटलभूर्यपत्रादिषु बहुतिथपुटोच्छोटनलक्षणः, अनुतटभेदस्तु वंशेक्षुयष्टित्वगुत्पाटनम्, इतिशब्देन भेदेयत्तामवधारयति ॥

भेदानां पञ्चविधत्वम्

भा०—तमश्छायातपोद्योताश्च परिणामजाः ॥ सर्व एवैते स्पर्शादयः पुद्गलेष्वेव भवन्तीत्यतः पुद्गलास्तद्वन्तः ॥

टी०—तमश्छायेत्यादि भाष्यम् । समानविचारत्वादेकप्रघट्टेन निर्देशः, एते च तमश्छायादयः पुद्गलद्रव्यपरिणामजा इति प्रतिपादयति । तमस्तावत् पुद्गलपरिणामो दृष्टिप्रतिबन्धकारित्वात् कुड्यादिवद् आवारकत्वात् पटादिवत्, छायाऽपि शिशिरत्वादाप्यायकत्वाज्जलवातादिवत्, आतपोऽपि तापकत्वात् स्वेदहेतुत्वादुष्णत्वादग्निवत्, उद्योतश्च चन्द्रिकादिराह्लादकत्वाज्जलवत् प्रकाशकत्वादग्निवत्, तथाऽनुष्णाशीतत्वात् उद्योतः पद्मरागोपलादीनाम्, अतो मूर्तद्रव्यविकारस्तमश्छायादिः ॥

तमश्छायादीनां मूर्तद्रव्यविकारता

ननु च द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद् भावाभावस्तमः, यदि चेदं द्रव्यं भवेदनित्यत्वाद् घटादिद्रव्यवत् निष्पद्येत, न च द्रव्यवन्निष्पद्यते, अमूर्तत्वादस्पर्शत्वात् प्रकाशविरोधादणुभिरकृतत्वाच्च, नापि गुणः, तदाधारानुपलब्धेः प्रकाशविरोधाच्च, कर्मापि न भवति, तदाश्रयानुपलब्धेः संयोगविभागसंस्काराहेतुत्वात्, अतस्तेजसो यत्राभावस्तत्र तमः, तथा तेजसो द्रव्यान्तरावरणाच्च तमो भवतीति । अत्रोच्यते—व्यवधानक्रियासामर्थ्यात् कुड्यादिवत् तमः पौद्गलम्, अमूर्तत्वास्पर्शत्वपरमाण्वकृतत्वान्यसिद्धानि मूर्तत्वादियोगात् तमसः, सत्यपि च मूर्तत्वादिमत्त्वे न स्पर्शादयोऽस्मदादिभिर्लक्ष्यन्ते, तमसस्तथाविधपरिणतिभाक्त्वाद् वातायनदृश्यरेणुस्पर्शादिवत् । यत् तूक्तं—'प्रकाशविरोधात्' इति, न किल किञ्चित् कार्यद्रव्यं तैजसेन प्रकाशेन विरुध्यते, तमस्तु प्रकाशविरोधि, तस्मान्न पृथिव्यादिकार्यं तम इति, एतदयुक्तम्, तेजःप्रकाशयोरेकत्वाभ्युपगमात्, जलद्रव्यं च विरोधकमित्यसिद्धार्थतैव, स्यादारेका—निरन्तरधारं वर्षति बलाहके प्रदीपोऽलिन्दकादिव्यवस्थापितः प्रद्योतत एव बहिः, यदि च विरोधः स्यान्न बहिः प्रकाशो विभाव्येत, जलपातेनापनीतत्वादिति । अत्रोच्यते—प्रादीपाः पुद्गलास्ताथात्म्यमपरित्यजन्तो निःसृताः तथाविधताम्रदबिन्दुसम्पर्कात् विजहति, तत्समकालं चापरे प्रदीपशिखया विकीर्णाः कृशानुपुद्गलास्तमाकाशमश्नुवते, न च ते जलपातेन विध्यापयितुं शक्याः, परिणामवैचित्र्याद् वडवानलावयवा इवेति, स्याद्वादिनां च

तमसः पुद्गलत्वम्

---

१ 'कभदीबुन्दाघ' इति क-ख-पाठः । २ 'भावस्तमः' इति क-ख-पाठः ।

३ प्रदीपरश्मीनां पुष्करावर्तधाराभिरप्यनुपघातात्, न सर्वथा जलानलयोर्विरोध एव, उत्पत्तिस्थान एव विरोधः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्चिद् द्रव्यं केनचित् सह विरुध्यते दध्यादि तैलादिना न तु गुडादिना, न च किञ्चिन्न विरुध्यते तैलं दध्यादिना, न च तस्य द्रव्यता हातुं पार्यते, अतः परिणतिक्रमविशेषात् तथाविधं परिणाममपहाय पुद्गलाः परिणामान्तरेण वर्तन्ते पृथिव्यादिपरमाणुजातिनियमश्चासिद्धः, सर्वेषां स्पर्शत्वे सति रूपादिमत्त्वात्, गुणक्रिययोश्च द्रव्यपरिणाममात्रत्वात् तदाधारानुपलब्ध्याद्यप्यसिद्धम्, एतेन छायादयो व्याख्याताः। कथं पुनर्दर्पणतलादिषु प्रतिबिम्बं मुखादीनां सम्मुखमेव छायाकारेण परिणमते न पराङ्मुखम्? कथं वा कठिनमादर्शमण्डलं प्रतिभिद्य मुखतो विनिर्गताः पुद्गलाः प्रतिबिम्बमाजिहत इति?। यत् तावदुच्यते सम्मुखमेव प्रतिबिम्बमुदेति नान्यतोमुखमिति तत्र परिणामः स तादृशः पुद्गलानाम्, नहि तद्विषयः पर्यनुयोगः कर्तुं शक्यः, को हि नामाभिदध्यात् प्रेक्षापूर्वकारी पयः किमिति दध्यादित्वेन परिणमते तृणगोभक्ष्यादयो वा क्षीरादित्वेनेति, किमत्र युक्त्या? तथा हि तं पश्यामः, न च दृष्टे किञ्चिदनुपपन्नम्, उपहास्यश्चैवमाचक्षाणो भवति, केन हेतुना वा चक्षू रूपं गृह्णाति? तस्मान्न परिणामः पर्यनुयोगार्हः, येषामपि न परिणामस्तेषामपि मुखाद्याश्रित्यानेकं कारणं प्रतिबिम्बोत्पादः सप्रतिघस्तेनाकारेण भवति नान्येनेति तुल्यः पर्यनुयोगो विधेयः, प्रतिभेदः पुनः कठिनशिलातलपरिश्रुतजलेनायस्पिण्डेऽग्निपुद्गलप्रवेशेन शरीरात् प्रस्वेदवारिलेशनिर्गमनेन च व्याख्येयः प्रतिबिम्बोदयः शुचौ दर्पणेऽन्यत्र वा, तमश्छायादयः पुद्गलपरिणतिविशेषाः ॥

प्रतिबिम्बस्य पर्यालोचना

सम्प्रति निगमयति सूत्रद्वयोपात्तमर्थं **सर्व एवैत** इत्यादिभाष्येण। स्पर्शरसगन्धवर्णशब्दादयः **पुद्गलेष्वेव भवन्त्यतः पुद्गलाः** स्पर्शादिमन्त इति नित्ययोगार्थं विहितस्तत्परिणामविशेषाविष्कारी मतुप्प्रत्ययः, स्पर्शादिशब्दादिपरिणामो येषामात्मभूतो येषु वा ते तद्वन्त इत्यनन्यत्वं प्राक्तनपरिणामापेक्षया चान्यत्वमिति।

भा०—अत्राह—किमर्थं स्पर्शादीनां शब्दादीनां च पृथक्सूत्रकरणमिति? ॥ **अत्रोच्यते—स्पर्शादयः परमाणुषु स्कन्धेषु च परिणामजा एव भवन्ति। शब्दादयश्च स्कन्धेष्वेव[1] भवन्त्यनेकनिमित्ताश्चेत्यतः पृथक्करणम्** ॥ २४ ॥

टी०—अत्राहेत्यादि भाष्यम्। गरीयस्त्वात् पृथग्योगस्य एकयोगप्रतिबन्धाच्चाभिलषितप्रसिद्धेः प्रश्नयति, आचार्यस्तु विवक्षितार्थप्रतिपत्तेरभावादेकयोगसङ्ग्रहव्युदासायाह—**स्पर्शादय** इत्यादि। प्राक्तनसूत्रोपन्यस्ताः स्पर्शादयः **परमाणुषु स्कन्धेषु** च द्व्यणुकादिषु नानाविधपरिणामोत्पत्तेः प्रादुर्भवन्ति, **शब्दादयः** पुनः स्कन्धविषया एव, नाणुविषयाः, द्व्यणुकादिस्कन्धविषयत्वप्राप्तौ नियमेन विकल्पयति, **च**शब्देनानेकनिमित्ताश्चेति, शब्दो न द्व्यणुकादिविषयोऽनन्ताणुकस्कन्धविषयत्वात्, एवमन्यदप्यायोज्यं सम्भवात्, अतः पृथग्योगकरणं विवक्षितमर्थं पुष्णाति नैकयोग इति ॥ २४ ॥

---

१ ' भवन्तीति' इति **घ**-पाठः।

२ अन्ययोगव्यवच्छेदफलोऽयं तेन न सर्वस्कन्धविषयाः शब्दादय इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—त एते पुद्गलाः समासतो द्विविधा भवन्ति ॥ तद्यथा—

टी०—त एते पुद्गला इत्यादिसम्बन्धग्रन्थः । सत्यपि पुद्गलजातीयत्वे निरवयवसावयवभेदात् परिप्राप्तानन्त्या अपि आहितद्वैविध्या वेदितव्या इत्यभिप्रायः, य एते स्पर्शादिशब्दादिपरिणतिभाजः पुद्गलास्ते संक्षेपाद् द्विविधा भवन्ति, द्वैविध्योपन्यासाय तद्यथेत्याह—

पुद्गलानां द्वैविध्यम्

सूत्रम्—अणवः स्कन्धाश्च ॥ ५-२५ ॥

टी०—अण्यन्त इत्यणवोऽस्मदादीन्द्रियव्यापारातीतत्वात् केवलसूक्ष्मशब्दनसमधिगम्याः सौक्ष्म्यात्, स्थौल्याद् ग्रहणादानादिव्यापारसमर्थाः प्रायः स्कन्धाः सङ्घाताः इति, चशब्दः समुच्चेता, समस्तपुद्गला एव द्विविधाः—परमाणवः स्कन्धाश्चेति, तत्र परमाणोर्लक्षणमाचार्यैः पूर्वकैरेवावाचि तदुपन्यासाय उक्तं चेत्याह—

भा०—उक्तं च—

"कारणमेव तदन्त्यं, सूक्ष्मो नित्यश्च भवति परमाणुः ।
एकरसगन्धवर्णो, द्विस्पर्शः कार्यलिङ्गश्च ॥"—आर्या

इति ।

टी०—कारणमेव तदन्त्यमित्यादि । करोतीति कारणं सकलभेदपर्यन्तवर्तित्वादन्त्यं, द्व्यणुकस्कन्धप्रभृति स्थूलसूक्ष्मभेदं कार्यं यावदचित्तमहास्कन्धः, स एष कारणकार्यविभागः कारिकया निरूप्यते—मूर्तस्य वस्तुनः कारणं परमाणवो द्व्यणुकादेः, अमूर्तस्य ज्ञानादेरात्मादयः, तच्चोभयमपि कारणं न सर्वथा नष्टम्, असत्त्वापत्तेः, न च तादृगवस्थं किञ्चिज्जनयति व्योमपुष्पादिवत्, नानष्टमेकान्तेनैवाविकृतत्वात् प्रागवस्थावत्, न चान्यावस्थाऽस्त्येकान्तवादिनः कार्यकारणाभ्युपगतौ ॥ ननु चावक्तव्यपक्षः प्रज्वलति पक्षान्तरत्वात्, इत्ययुक्तम्, अवक्तव्यतायाः सुदुःस्थितत्वात्, वक्तुमशक्यत्वात् तावदवक्तव्यं न भवति, लोके तथा प्रतीतत्वात्, नाज्ञानात्, आप्तस्य तदनुपपत्तेः, नाभावाद् वस्तुनः, तथादृष्टत्वात्, एवं तर्ह्ययमन्यः पक्षः कारणकार्ययोर्नाशोत्पादसमकालत्वात्, एषाऽपि हि व्यवस्था नातिक्रामति पूर्वं विकल्पद्वयम्, यतः कारणं नष्टं कार्यं चोत्पन्नम् । अनष्टे तावत् कारणे न कार्योत्पादः । अथैवं मन्येत—कारणं च विनश्यति कार्यं चोत्पद्यते, तदपि विचाराक्षमम्, तत्र विनश्यतीत्यनेन विनाशक्रियाविष्टमेकं वस्तूच्यते स्वरसभङ्गुरं वर्तमानकालावधिकमनासादितसमस्तनाशमर्धनष्टम्, तोऽयं बाह्यार्थः किंचिन्नष्टं किञ्चिच्चानष्टमुभयधर्माघ्रातं विनश्यतीत्यनेन[1] प्राप्तक्रियापवर्गमार्गमभिधीयते वस्तु, न चैवमसम्बद्धबुद्ध्याहारोपहतचेतसः सौगताः सङ्गच्छन्ते, अभिन्नैकतुलादण्डकद्रव्यप्रतिबद्धान्तद्वयस्य वा युक्ते नतोन्नती समकमत्र तु विनश्यति वस्तुनि नैकं किञ्चिदभिन्नमस्त्यन्वयि प्रदीर्घतुलादण्डकाकृति कारणं यत्प्रतिबद्धौ नाशोत्पादौ युगपद् भवेताम्, पूर्वोत्तरक्षणयोश्चात्यन्तभेदे सभागसन्ततिरियं विसभागसन्ततिरेषेति व्यपदेशाभावात् स्वसन्ततौ फलाधानमसाम्प्रतम्, नहि बुद्धसन्तानोऽस्मत्सन्ताने फलमाधातुमुत्सहते, तस्माद् यत् किञ्चिदेतत् ॥ प्रकृतमनुश्रियते—तत्र परमाण्वात्मादि परिणामिकारणम्, तस्मिन्

---

१ 'विनश्यतीत्यप्राप्तः' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सति भवत्येव कार्यं द्व्यणुकादि ज्ञानादि वा, अन्यथा तु न भवत्येव, यतो[1] यस्मिन् सति भवत्येव यस्य सद्भावस्तदभावे च न भवत्येव यत् तत् कारणमितरत् कार्यम्, एवं च यदृच्छया प्राप्तानां व्योमाराममहीध्रादीनां कारणभावोऽन्यत्र निराकृतोऽवसेयः। एवमप्यनुपपन्नमवधारणं यस्मिन् सति भवत्येव कार्यं न भवत्येव चान्यथेति, यतः करवीरजन्मारुणोत्पलफलात् स्वकाण्डात् स्वबीजाच्च दृष्टम्, दूर्वा च गोलोमाविलोमादिभ्यः, सरस्तु शृङ्गादिति, अत्रोच्यते—परमाणुषु सत्सु भवत्येवेदमात्मनि चेत्यदोषः, सङ्क्षेपात् परिणामिकारणापेक्षाः परिणामाः प्रतिस्वमासादयन्त्युपजननं कारणवैकल्ये तु न प्रादुष्यन्ति मन्त्रप्रतिबद्धविषमारणशक्तिवत्। इत्थं निरवद्यं कार्यकारणलक्षणम्। यान्यपि कर्तृनिमित्तापेक्षाख्यानि कुम्भकारदण्डाकाशादीनि तान्यप्यनयैव दिशा योजनीयानीति न कश्चिद् विरोध इति सूचनीयः सूक्ष्म आगमसमधिगम्योऽस्मदादिभिः, नित्यश्चेति द्रव्यास्तिकनयापेक्षयाऽनुज्झितमूर्तिः, पर्यायापेक्षया तु नीलादिभिराकारैरनित्य एवेति, न ततः परमणीयोऽस्ति द्रव्यमिति परमाणुः, पञ्चानां रसानां द्व्योर्गन्धयोः पञ्चविधस्य वर्णस्यान्यतमेनैकेन रसादिना युक्तः, चतुर्णां स्पर्शानां मध्ये स्पर्शद्वयेनाविरुद्धेन युक्तः कार्येणास्मदादिप्रत्यक्षदृश्येन बादरपरिणामभाजाऽनेकविधेन लिङ्ग्यते—समधिगम्यत इति। अणुस्कन्धभेदप्रतिपादनायेदमाह—

कार्यकारणलक्षणम्

भा०—तत्राणवोऽबद्धाः, स्कन्धास्तु बद्धा एवेति ॥ २५ ॥

टी०—तत्राणव इत्यादि। अबद्धाः—परस्परेणासंयुक्ताः परमाणवः, स्कन्धाः पुनर्बादरपरिणामपरिणता अष्टस्पर्शा बद्धा एवाणुसञ्ज्ञाताः, सूक्ष्मपरिणामभाजस्तु चतुःस्पर्शा एव भवन्ति बद्धाश्चे(एवे)ति परस्परसंहत्या व्यवस्थिता इति ॥ २५ ॥

भा०—कथं पुनरेतद् द्वैविध्यं भवतीति ?। अत्रोच्यते—स्कन्धास्तावत् ॥ अत्राह—

टी०—अत्राहेत्यादिसम्बन्धग्रन्थः। अज्ञः प्रश्नयति—परमाणवः स्कन्धाश्चेति किंकृतोऽयं विशेषस्तुल्ये पुद्गलद्रव्यत्वे ? सूरिराह—स्कन्धास्तावदित्यादि। क्रमप्राप्तेषु परमाणुषु वक्तव्येषु स्कन्धास्तावद् बहुवक्तव्यत्वात् प्रथममुच्यन्ते, तावच्छब्दः क्रमभेदावद्योतनार्थः, यथा[2] च ते स्कन्धाः समुद्भवन्ति तथा सूत्रऽत्र दर्शयति—

सूत्रम्—सङ्घातभेदेभ्य उत्पद्यन्ते ॥ ५—२६ ॥

सङ्घातोद्भवे त्रिकारणता

भा०—सङ्घाताद् भेदात् सङ्घातभेदादित्येभ्यस्त्रिभ्यः कारणेभ्यः स्कन्धा उत्पद्यन्ते द्विप्रदेशादयः।

टी०—सङ्घातादित्यादि भाष्यम्। एतदुक्तं भवति—संहतत्वाद् भिन्नत्वात् सङ्घातभेदाच्च स्कन्धानामुद्भवः। इतिशब्दः कारणेयत्ताप्रकाशनार्थः, द्विप्रदेशादय इति सकलस्कन्धराशेराद्यस्कन्धोपन्यासभावनयाऽशेषस्कन्धविषयः सङ्घातः सुज्ञान इत्यादिग्रहणमुदचीचरत् ॥

---

१ 'ततो यस्मिन्' इति क-पाठः। २ 'गोलोमानुलोमा' इति क-पाठः। ३ 'यथा वा' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—तद्यथा—द्वयोः परमाण्वोः सङ्घातात् द्विप्रदेशः, द्विप्रदेशस्याणोश्च सङ्घातात् त्रिप्रदेशः, एवं सङ्ख्येयानामसङ्ख्येयानां च प्रदेशानां सङ्घातात् तावत्प्रदेशाः ॥

टी०—तद्यथेत्यादिना सङ्घातादित्रितयं भावयति, स्कन्धोत्पादकारणं त्रिविधम्, प्रकारान्तराभावप्रदर्शनपरमिदं वचनं मुनेः, द्वयोरित्यादि द्वयोरणुकयोः सङ्घातादन्योन्याश्लेषपरिणामात् द्व्यणुकस्कन्धो निष्पद्यते, वक्ष्यत्युपरिष्टात्(अ०५,सू०३२)-'स्निग्धरूक्षत्वाद् बन्धः' इति, कथं पुनर्निरवयवयोर्द्वयोरणुकयोः संहतौ द्व्यणुकः स्कन्धो निष्पद्यते, एवं मन्यते—तयोर्हि संश्लेषः परस्परेण सर्वात्मनैकदेशेन वा भवेत्? यदि च सर्वात्मना ततः सकलमपि जगदेकपरमाणुमात्रं स्यात्, एकदेशेन चेत् सावयवोऽणुः प्रसज्यते, सैषोभयतःपाशा रज्जुरिति दुर्घटः सङ्घातः, तस्मात् परमाणवः परस्परेणानाश्लिष्टा एव प्रत्यासत्तिभाजः केशा इवाकाशे समुदिता एवोपलभ्यन्ते न विदूरवर्तिन इति प्रतीतं तथा दर्शनमाविद्वद्दङ्गनाबालम्, परस्परसङ्घट्टस्वसम्बध्यमानकत्वादुपेक्षणीय इति। अयुक्तमेतदुच्यते परेणाप्रेक्षितवस्तुयाथात्म्येनेति यथा तथा विभाव्यते, परमाणवो हि रूपरसगन्धस्पर्शात्मकत्वात् सप्रतिघाः संयोगकाले सव्यवधयो न परस्परव्याप्त्या वर्तन्ते रूपाद्यवयवत्वात्, स्तम्भकुम्भादिवत्[2], प्रतिपादितश्चायमर्थः प्राक्—स्यान्निरवयवः स्यात् सावयवः परमाणुर्द्रव्यभावभेदात्, अपि च द्रव्यात्मनाऽणुरेकः प्रत्यस्तमितसकलभेदस्तत्र कथं सर्वशब्दः प्रयुज्यमानोऽनेकवस्तुविषयो निरवशेषाभिधायितया लोकेऽविगानेन रूढो नासम्बन्धार्थो भवेत्? कथं वा नानाध्यवसितस्य वस्तुनः कस्यचिदेवाभिधाय्येकदेशशब्दो निर्भेदपरमाणुविषये प्रसज्यमानः साध्यमानं प्रतिपत्स्यते? सोऽयमेवंविकल्पद्वयानुसारी वचनप्रयोगः शब्दार्थानभिज्ञानानामत्यन्तप्रसिद्धलोकव्यवहारपराङ्मुखानां जडिमानमातनोति क्षुद्रसत्त्वानाम्। आशङ्कते चैवंप्रकारान् कातरपुरुष एवैकान्तवादी, न पुनः सकलवादपरमेश्वरस्याद्वादसमाश्रयोपपन्नातुलसामर्थ्यः स्याद्वादीति। न च परमाण्वन्तरेण सह घटमानोऽसौ[3] केनचिद् देशेन युज्यते निरवयवत्वात्, किन्तु स्वयमेवावयवो द्रव्यान्तरावयवद्रव्यरहितः परमाणुना सह भेदेन योगमायाति, न चाण्वन्तरमाविशति, स हि सक्रियः परमाणुस्थमाकाशमेवाविशति, अणुस्तिष्ठत्यस्मिन्नित्यणुस्थं करणाधिकरणयोर्घञर्थे कविधानम्। स्थास्नापाव्यधिहतिबुध्यर्थमणौ वा तिष्ठतीति विवक्षावशादणुसम्बद्धमुच्यते। यद्यावेशो नास्ति देशे न तर्हि योगः प्रसक्तः, परस्परमनाश्लिष्टत्वाद् द्व्यङ्गुलवदिति, अयमनपदेशः, न वयमावेशतो योगं सञ्जिरामहे, किन्तु निरवयवत्वात्, तस्य द्रव्यप्रदेशान्तरं द्व्यङ्गुलस्येव संयुक्तं नास्ति, स्वयमेवासौ युक्त इत्येतावदभिदध्महे, हेतोश्चानैकान्तिकता, सूक्ष्मक्षेत्रच्छेदप्रविभक्तद्व्यङ्गुलपर्यन्तवर्तिनौ प्रदेशौ निरन्तरावस्थितावनाविशन्तावेव संयुक्तौ, न च देशेन, सूक्ष्मत्वादन्यस्य देशान्तरस्यासम्भवात्, न च नाङ्गुल्यौ युक्ते, निरन्तरत्वात्, न चान्योन्यावेशः प्रदेशानाम्, द्व्यङ्गुलाभावप्रसङ्गादिति॥ ननु च संस्थानित्वात् सावयव एवाणुः किमिति निरवयवता अभ्युपेयत इति? उच्यते—द्रव्यावयवकृतं संस्थानम्, तच्चावयविनो घटादेरवयवेषु सत्सु भवति, ते

---

१ 'अनन्तानामनन्तानन्तानां' इत्यधिको घ-पाठः। २ 'स्तम्भादिवत्' इति क-ख-पाठः। ३ 'संघटमानो' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चाणोर्न सन्त्यतो निरवयवत्वात् संस्थानित्वासिद्धिः, एवं तर्ह्यसंस्थानित्वादसत्परमाणुरिति, उच्यते—व्योमासंस्थानमपि सदेवेत्यनेकान्तः, न च कन्दुकादिवद् दृष्टपरिधित्वेनाभ्युपगम्यते विहायः, सर्वलोकशास्त्रानुमानविरोधादिति । योऽप्याशङ्कते अभूतान्तर्बहिर्भावान्यदेशत्वेन युष्माभिरभ्युपगतत्वान्नास्ति परमाणुः, तस्यापि हेतोर्निरंशैकक्षणवृत्तिविज्ञाने वर्तमानत्वादनैकान्तता । अपि च -योगः सम्प्राप्तिलक्षणः न चासौ प्रदेशैरेव क्रियते, निष्प्रदेशस्यापि स्वयं प्राप्तिरस्त्येवेति । एतेन नास्तित्वं प्रतिषिद्धमप्यवसातव्यम्, अवयवैरकृतत्वात् तस्येति, पिष्टपेषणं चैतत् कार्यो(रया)महे वयम्, उक्तं प्राक्—सर्वमेवं हि स्थूलं प्रविभज्यमानमवश्यन्तया निरवयवनिष्टमुपजायते द्रव्यं, सूक्ष्मपूर्वकत्वात् स्थूलस्येति । आह च—" सर्वं सविभागमविभागप्रविष्टम्," यत् पुनस्तेषामेकस्मिन्नेवाकाशप्रदेशेऽनन्तानामप्यवगाढत्वं तदप्रतिघातपरिणामपरिणतत्वात् व्याप्तैकापवरके प्रदीपप्रभयेवान्यप्रदीपप्रभाणाम्, शीततमःशब्दत्वपरिणतपुद्गलानां चाप्रतिघातित्वदर्शनात्, तद्वत् परमाणुरेकस्मिन् व्योमप्रदेशे व्यवस्थितोऽन्येषामपि परमाणूनां भूयसामवगाहमानानां विघातं प्रति न निवर्तितुमुत्सहते, कथं तर्हि असति प्रतिघाते महतो द्रव्यस्य निष्पत्तिः ? सङ्घातस्तु सति संयोगे सम्भवति, संयोगश्चाप्राप्तयोः प्राप्तिमात्रं, नान्योन्यावेश इति, उच्यते—महतो द्रव्यस्यारम्भकाले परमाणूनामप्रतिघातित्वमस्मान् प्रत्यसिद्धम्, यतस्त्रिविधं प्रतिघातमामनन्ति भगवन्तः परमाणूनां—बन्धपरिणामोपकाराभाववेगाख्यम्, तत्र बन्धपरिणामप्रतिघातः स्निग्धरूक्षत्वाद् बन्ध इत्यत्र (सू० ३२) वक्ष्यमाणः, उपकाराभावलक्षणप्रतिघातो गतिस्थित्युपग्रहो धर्माधर्मयोरुपकार इत्यत्र (अ० ५, सू० १७) सूत्रेऽर्थाक्षिप्तः प्रेक्षणीयः, लोकादन्यत्र जीवानामजीवानां च गतेः प्रतिघातो गत्युपग्रहहेतुरहितत्वाज्झषमकरादेरिवाम्भसोऽन्यत्र, अन्वयः सामान्येन सुशक्यः कर्तुम्, अतः परमाणुर्लोकान्ते प्रतिहन्यत इति उपकाराभावात् प्रतिघातितेति, तथाऽणोरण्वन्तरेणापतता विस्रसासमुद्भूतगतिरंहसा प्रतिघातो दृष्टः, प्राप्तवेगगतिर्हि परमाणुरापतन् जविनमेव परमाणुं प्रतिहन्ति, वेगवत्त्वे सति स्पर्शवत्त्वान्मूर्तिमत्त्वाच्च प्रबलवेगः प्रभञ्जनो वाद्यान्तरमिवेति प्रतिघातित्वं वेगादध्यवसीयत इति, एवमनेकयोपपत्त्या प्रतिघातित्वाप्रतिघातित्वे परमाणुविषये प्रसाधिते, सम्प्रति तेषामेकव्योमप्रदेशास्कन्दिनामणूनामनन्तानामपि कदाचित् संयोगवृत्त्यावस्थानमनारब्धस्कन्धकार्याणामेव जातुचिद् बन्धाकारेण घटितकार्याणाम् । कः पुनरनयोः संयोगबन्धयोर्विशेष इति ?।

परमाणूनां प्रतिघातस्य त्रैविध्यम्

उच्यते—नैरन्तर्येणावयवप्राप्तिमात्रं संयोगः, बन्धः पुनरन्योन्याङ्गाङ्गिभावपरिणाम इति, विरोधोद्विभावयिषया कश्चिदाचक्षीताविचक्षणः—कथमेकस्यैवाणोः प्रतिघातित्वाप्रतिघातित्वे परस्परविरुद्धे स्त इति ? उच्यते—

संयोगबन्धयोर्विशेषता

विरोधाभावः प्रागुक्तः, अपि च—परिणामविशेषादुभयमपि सम्भाव्यते पुद्गलेषु, शब्दस्तावत् तिरस्कृतोऽपि कुड्यादिभिरप्रतिहन्यमानः श्रवणपथमभ्युपैति, स एव कदाचिदुह्यमानत्वाद् वायुना प्रतिहन्यते, प्रतिवातस्थितेनानुपलभ्यमानत्वादनुवातस्थितेन चोपलभ्यमानत्वाद् गन्धवत्, उह्यते च वायुना शब्दो मा स्म संशयिष्ठाः, तस्मात् सुष्ठूच्यते—सङ्घातादुत्पत्तिः स्कन्धानाम्,

१ ' व्योमदेशे ' इति क-ख-पाठः । २ ' वाद्यन्तरमिवेति ' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकदेशयोगस्तु दूरादुत्सारितः, कृत्स्नसंयोगस्तु कदाचिदुपचारवशादिष्येताप्यनवयवत्वात् कृत्स्नो योगो नावेशतो ह्येषामिति ॥ अथ यदुक्तमनाश्लिष्टा एवाणवः प्रत्यासत्तिभाजः समुदिता विभाव्यन्ते, तदतितरामसमञ्जसम्, अणुत्वमवस्थानानामसंहतत्वाच्च दर्शनं न स्यात्, कस्तेषामतिशयोऽतीन्द्रियाणामुपाजनि प्रत्यासत्तावसंहतानां येन ते लोचनादीन्द्रियगोचरतामापद्यन्ते, नहि पूर्वावस्थायामेककाः सन्तोऽदृष्टास्तद्वदुत्तरावस्थायामपि न दृश्येरन्, नहि शक्या विच्छिन्ना अणवोऽनन्ता अपि द्रष्टुम् । केशनिदर्शनादेवं प्रतीयत इति चेत्, तदयुक्तम्, केशा ह्येकका अपि कदाचिद् दृश्या भवन्ति, न कदाचिद् अणवः प्रत्येकं चक्षुरादिग्राह्याः, परस्परमनाश्लिष्टेषु चाणुषु भूयांसो दोषाः सम्भवन्त्यमी, देशे च धार्यमाणे घटस्य कृत्स्नस्य धारणं न स्यात्, उत्क्षेपावक्षेपाकर्षाश्च तथैव न भवेयुः, तस्मादङ्गाङ्गिभावरूपेणाणूनां बन्धपरिणामाभ्युपगमात् सकलस्य संहतस्य महतो द्रवस्याकर्षणादीन्येकदेशेऽपि वर्तमानानि सिद्धान्यतोऽन्यथा न स्युः । संयोगमात्रत्वे बालिकापुरुषादिवदिति बहुलोकसिद्धं विघटेत । तच्च महद् द्रव्यं कणभुक्परिकल्पितावयवीव नास्ति मौनीन्द्रदर्शने, द्रव्यास्तिकनयाभिप्रायान्मुञ्जेषिकावद् भेदेनाग्रहणात्, अतो नावयवी स्वदेशेभ्योऽन्यो भिन्नोऽक्षसा प्रत्यक्षेणानुमानेन वा ग्रहीतुं शक्येतेत्यर्थान्तरभूतावयविनो निषेधः, नान्यो देहादिरवयवी स्वावयवकलापादबद्धत्वे सक्रियत्वे च सति विभागेनागृह्यमाणत्वादवयवस्वरूपवत् स्थानासनशयनादिक्रियावान् देहस्तदवयवाश्चादानविहरणादिक्रियया सचेष्टाः । परस्परप्रतिबद्धपुरुषद्वयव्यभिचारनिरासार्थमबद्धग्रहणम् । तथा धर्माधर्माकाशानां नानात्वेऽपि विभागेनागृह्यमाणत्वमस्तीत्यनैकान्तिकारेकाव्युदासाय सत्क्रियत्वविशेषणम्, तस्मादवयवव्यतिरेकेणासन्परिकल्पितोऽवयवी कन्दलीदलव्यतिरिक्तकदलीदलसारवत् । यदपि लोके तस्य दर्शनं तदपि देशेष्वेव, तदेकदेशदृष्टौ सर्वो दृष्ट इति व्यवहारात्, अत्यन्तव्यतिरेकपक्षे चावयविनः प्रत्यवयववृत्तित्वादयोऽप्युद्ग्राहणीया दोषाः, सर्वथा चानुपपद्यमानवृत्तित्वात् खपुष्पवत् असन्नवयवी, उपलब्धिकारणसन्निधाने सत्यवयवरूपादिव्यतिरेकेणानुपलभ्यमानरूपादिगुणत्वात्[1], हस्त्याद्यवयवव्यतिरेकेण[2] सेनावत्, व्यतिरेके घटबदरादयः, पर्यायनयाभिप्रायेण तु नानात्वमवयविनोऽवयवेभ्यः, अवयवगुणेभ्योऽन्योऽवयविगुणो व्यस्तेषु तेष्ववयवेषु तत्प्रमाणवर्णाकृतिरूपेणादृश्यमानत्वात्, अनेकरत्नसंघातनिष्पन्नरत्नावलीवत् रत्नेभ्यः, येन तेषु देशेषु व्यस्तेषु न चतुर्हस्तः पटश्चित्रः पटः समचतुरस्रः पट इत्यादिविशेषोपलब्धिः. एवं द्रव्यपर्यायनयैकान्ते बहवो दोषाः, स्याद्वादिनस्तु यथापरिणामर्पणानर्पणविशेषोपनिपातिस्याच्छब्दोपपदप्रतिपिपादयिषितधर्मस्वरूपाभिनिवेशादशेषधर्मकलापोपसङ्ग्रहणात् सर्वैकान्तधर्मविनिवृत्त्या सर्वैकान्तवाक्यसमवतारणात् स्यादन्यः स्यादनन्यः स्यादन्यानन्यः स्यादवक्तव्य इत्यादिसप्तभङ्गीप्रतिज्ञानाद् दोषाणामनवकाश एव, यस्मादर्पितानर्पितनयद्वयविवक्षाऽविवक्षाभ्यामन्यत्वानन्यत्वे भाज्ये, पर्यायनयोऽर्पितस्तन्मतेन त्ववयवावयविनोर्भेदः, अनर्पितो द्रव्या-

१ ' मानत्वावृत्तित्वात् ' इति क-पाठः । २ ' हस्ताद्यवयव ' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तिकः तदभिप्रायादैक्यम्, एवं विश्वपरिणामप्रपञ्चस्थितिभाञ्जि द्रव्याणि स्वात्मन्यविद्यमानैरेव पर्यायतः कैश्चिद् धर्मैरुत्पद्यन्ते कैश्चिद् विद्यमानैरपि धर्मैर्विनश्यन्ति, कैश्चित्पुनरन्वयिभिः पर्यायैर्नित्यानि ध्रुवाण्येव सर्वद्रव्याणीति मौनीन्द्रदर्शनमनवद्यम् ॥

सम्प्रति प्रस्तुतमनुश्रियते । द्विप्रदेशस्य स्कन्धस्य परमाण्वन्तरेण योगे त्रिप्रदेशस्कन्धोत्पादः, चशब्दात् त्रयाणां च परमाणूनां सङ्घातपरिणामे त्र्यणुकस्कन्धस्योपजननम्। एवमित्यादिनाऽतिदेशं करोति ॥ शीर्षप्रहेलिकास्थानपर्यन्तवर्ति द्विसङ्ख्योपक्रमं गणितम्, तत्राप्युक्तेन न्यायेन भावना कार्या, ततः परं गणितविषयातिक्रमादसङ्ख्येयो राशिः, तत्रापि संघातपरिणामभावना तुल्यैव, ततोऽप्यसङ्ख्येयादुपरि बहुबहुतरबहुतमपरमाणुप्रचयोऽनन्तकराशिः, तस्मिन्नपि संहतिपरिणतिभावना सदृश्येव, अनन्तानन्तानां चेत्यनेनानन्तकराशेरनन्तानि स्थानानि भवन्तीति प्रदर्शयति। एवं तावत् संघातात् परस्य प्रदेशाः स्कन्धतयोपजायन्त इति ॥

अधुना द्वितीयं प्रकारं वक्तुकाम आह—

भा०—एषामेव भेदाद् द्विप्रदेशपर्यन्ताः ॥

टी०—द्व्यणुकादिक्रमेणानन्तानन्तपरमाणुकपर्यवसानाः स्कन्धाः संघाताद् ये समुत्पन्नास्तेषां पर्यन्तवर्तिनः स्कन्धादेकोऽणुर्यदा भिन्नः पृथग् भवति तदैकाणुभेदात् तन्न्यूनः स्कन्धः समुत्पद्यते, एवं द्वित्र्यादिपरमाणुभेदक्रमेणाधोऽधो यावत् द्विप्रदेशस्कन्धोत्पाद इति भावनीयम्।

भा०—एत[1] एव च संघातभेदाभ्यामेकसामयिकाभ्यां[2] द्विप्रदेशादयः स्कन्धा उत्पद्यन्ते । अन्यसंघातेनान्यतो भेदेनेति[3] ॥ २६ ॥

अत्राह—अथ परमाणुः कथमुत्पद्यते इति ?। अत्रोच्यते—

टी०—एत एव चेत्यादिना तृतीयविकल्पभावना, बहुवचननिर्देशात् कृतैकशेषो निर्देशः, संघातश्च भेदश्च संघातभेदौ संघातभेदौ च संघातभेदौ च संघातभेदाः, एत एव ह्यनन्तरोक्ता द्व्यणुकादयः स्कन्धाः सङ्घातभेदाभ्यामेकसामयिकाभ्यां उद्भवन्ति, अविभागीयः कालः परमनिरुद्धश्च समयः स तत्रैकस्मिन् समये अभिन्नकाले द्व्यणुकस्कन्धादेकोऽणुर्भिद्यते परः संहन्यते समकमेवेत्यतः सङ्घातभेदाभ्यामुत्पद्यन्ते, समये भवः सामयिकः, एकशब्दः समानार्थाभिधायी, एकशब्दः समानार्थे, तद्यथा—'तेनैकदिक्' (पा० अ० ४, पा० ३, सू० ११२) सुदाम्ना पर्वतेनैकदिगित्यण् । सौदामिनीति विद्युदेकदिक् समानदिगित्यर्थः । समानः समयो ययोः सङ्घातभेदयोस्ताभ्यामेककालाभ्यामिति यावदिति, पाठान्तरं वा एकसामयिकाभ्यामिति, एवं द्व्यणुकादयोऽपि भाव्याः, अन्यस्य परमाणोः सङ्घातेनान्यतः स्कन्धाद् भेदेनेत्येवं स्कन्धात् कारणादुत्पद्यत इति प्रतिपादितम् ॥२६॥

---

१ 'एतदेव च' इति क-ख-योर्भाष्ये टीकायां च पाठः । २ 'सामायिकाभ्यां' इति क-ख-पाठः । ३ 'अन्यस्य संघा०' इति घ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं स्कन्धानामुत्पत्तौ व्याख्यातायामजानानः संशयानो वाऽत्रावसरे परमाणूत्पादविषयेण प्रश्नेनोपक्रममाण आह-कथं परमाणुरित्यादि ॥ एवं मन्यते स्कन्धानामविशेषेण सङ्घाताद् भेदाद् सङ्घातभेदाच्चोत्पत्तिरवधृता, तत्र किं परमाणूनामप्येवमाहोस्विदन्यथेति ? । अत्रोच्यते-उत्पत्तिकारणत्रैविध्याविशेषे सति ॥

सूत्रम्—भेदादणुः ॥ ५-२७ ॥

भा०—भेदादेव परमाणुरुत्पद्यते, न सङ्घातादिति ॥ २७ ॥

टी०—सामर्थ्यादवधारणप्रतीतिमादर्शयति, यदि भेदादणुरित्युक्तेऽपि सङ्घातादेरप्युत्पद्यतेऽणुस्ततः सूत्रारम्भो निष्फलः स्यात्, अतो भेदादेव द्रव्याणुरुत्पद्यते न सङ्घातादिति, इतिशब्दः समुच्चितौ वर्तते, नापि सङ्घातभेदात्, प्रस्तुते विकल्पत्रये भेदादेवोत्पद्यतेऽणुरिति विकल्पद्वयपरित्यागः फलम् ॥ ननु च स्नेहरौक्ष्यविगमात् स्थितिक्षयाद् द्रव्यान्तरेण भेदात् स्वभावगत्या च द्व्यणुकादिस्कन्धभेदादुपजायमानोऽणुः कार्यमपि, द्व्यणुकादिस्कन्धेषु सङ्घातपरिणतौ सत्यां नाणोरणुभावेनावस्थानमस्ति, स्थूलद्रव्यत्वेन, शेषपर्यायैश्च विद्यत एव "तद्भावः परिणामः" (अ०५, सू०४१) इति वचनात्. तस्य भावः सम्भवतीति कर्तृषष्ठ्यां पूर्वपरिणामोपमर्देन उत्तरपरिणामभवनम्, तस्मिंश्चोत्तरपरिणामे पूर्वपरिणामस्यासम्भव एव, भावान्तरापत्तिफलत्वात् परिणामस्येत्यतः सूक्ष्मपरिणामाद् बादरपरिणामस्यार्थान्तरत्वात् तत्राणुपरिणामाभाव इति, यथा गुडोदकधातकीद्रव्यसंयोगविशेषात् सरकद्रव्यपरिणामः सम्भवति, तदेव हि तत्तद्द्रव्यत्रयसंयोगविशेषात् कालान्तरापेक्षं भावान्तरमन्यदेव प्रतिपत्तव्यं यत्र तेषां विवेको दुःशकः[2] कर्तुम्, अथ च तानि द्रव्याण्यन्तरेण स परिणामो नास्ति, न च तदानीं तानि प्राक्तनरूपेण सन्ति, यदि च स्युस्ततस्तत्परिणामासम्भव एव पूर्वकाल इव । प्रयोगश्च-बादरपरिणामपरिणतमहाद्रव्ये परमाणवः स्वेन रूपेण न सन्ति, परिणामान्तरापन्नत्वात्, यथा सीधुपरिणतौ गुडादय इति, ततश्च कारणमेव तदन्त्यं द्व्यणुकादीनामिति अवधारणविरोधः. न विरोधः यतः सर्वमेव मूर्तद्रव्यं स्थूलं विदार्यमाणमशक्यभेदपरमाणुपर्यवसानं जायते, न पुनरत्यन्ताभावरूपं निरुपाख्यमिति, द्रव्यनयापेक्षया वा कारणमेवेत्यवधारणं सर्वेषां द्व्यणुकादिद्रव्याणां तदेव कारणमिति, पर्यायनयाभिप्रायेण तूत्पद्यत इति उक्तमुपजायमानत्वाच्च कार्यं भवत्येवेत्यविरोधः । स चाणुः स्वतो द्रव्यावयवद्वारेणाभेद्यः, रूपादिभिस्तु स्याद् भेदवान्, न चासावप्रदेशत्वाद् गगनकुसुमादिवदसन्नित्याशङ्कनीयः, सावयवद्रव्याभावात्, सावयवप्रतिपक्षेण चावश्यमनवयवेन सता वस्तुनैव भवितव्यम्, स चादिमप्रदेशोऽणुरिति युक्त्याऽऽगमेन च द्रव्यपरमाणुप्रसिद्धिः तत्सिद्धौ च क्षेत्रकालभावपरमाणुसिद्धिरवश्यंभाविनीति विस्तरो द्रष्टव्य इति ॥

---

१ ' स्कन्धसङ्घात ' इति क-ख-पाठः । २ ' दुःशक्यः ' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रागुपदिष्टमणुवर्जानां त्रिहेतुकोत्पत्तिः सङ्घातभेदेभ्य उत्पद्यन्त इत्यत्र सूत्रे, स एष द्व्यणुकादिष्वचाक्षुषेषु क्रमस्तद्विपर्ययभाजस्त्वेकान्तेनैव स्कन्धाः समुपजायन्ते ॥ २७ ॥

सूत्रम्—भेदसङ्घाताभ्यां चाक्षुषाः ॥ ५–२८ ॥

भा०—भेदसङ्घाताभ्यां चाक्षुषाः स्कन्धा उत्पद्यन्ते । अचाक्षुषास्तु यथोक्तात् सङ्घाताद् भेदात् सङ्घातभेदाच्चेति ॥ २८ ॥

टी०—चक्षुष इमे गोचरीभूता इति 'तस्येदं' (पा० अ० ४, पा० ३, सू० १२०) इत्यण् । चक्षुर्ग्राह्याश्चाक्षुषाः प्रयोगविस्रसाजनितात् साङ्गत्यादायत्या स्कन्दनात् स्कन्धाः ते त्वीदृश्या उत्पद्यन्ते, ये च चक्षुषा गृह्यन्त इति, न त्वयं नियमो भेदसङ्घाताभ्यामुत्पन्नाः सर्वे चाक्षुषा भवन्ति, यतो भेदसङ्घाताभ्यामचाक्षुषाणामप्युत्पत्तिः, अत एवं व्याख्येयम्—स्वत एव परिणतिविशेषाच्चाक्षुषत्वपरिणामभाजो बादराः स्कन्धाः सङ्घातभेदाभ्यामुत्पद्यन्ते इत्येतन्नियम्यते ॥ अपरे वर्णयन्ति—सङ्घातादेव स्कन्धानामात्मलाभसिद्धेर्भेदसङ्घातग्रहणमनर्थकम्, नैतदेवम्, तद्विशेषज्ञापनार्थत्वात्, न सर्व एव सङ्घातश्चक्षुषा ग्राह्यः, यतोऽनन्तानन्ताणुसंहतिनिष्पाद्योऽपि स्कन्धो बादरपरिणतिमानेव नयनादिगोचरतां प्रतिपद्यते, न शेष इति । एवं च व्याचक्षाणानां भेदग्रहणमनर्थकमेव स्यात् तच्चायुक्तम्, यतः सूक्ष्मपरिणामोपरतौ स्थौल्यपरिणामः, तत्र च यथा संहन्यन्ते परमाणवस्तथा भिद्यन्तेऽपि च केचनेत्यतः सङ्घातभेदाभ्यामेव चाक्षुषा निष्पद्यन्ते, न सङ्घातादेवेति ॥ ननु चाचाक्षुषाणामणूनां समुदायस्तन्मात्रः, स कथमनाहितातिशयश्चाक्षुषः स्यात् ? । उच्यते—सर्वस्य वस्तुनः सतः परिणामात् परिणामान्तरं कथञ्चिद् भिद्यत एवेत्यणुत्वपरिणामाच्चक्षुर्विषयपरिणामो भिन्नः, परमाणवो हि अणुत्वपरिणामपरिणतत्वमपहाय बादरपरिणाममागृह्णते रौक्ष्यस्नेहविशेषात्, अष्टविधः स्पर्शो भगवद्भिरुक्तः स्कन्धेषु यथासम्भवम्, परमाणुषु पुनश्चतुर्विधः स्पर्शो नान्यः, स च शीतोष्णस्निग्धरूक्षाख्यः, तत्राप्येकपरमाणौ परस्पराविरोधिद्वयं समस्ति, अत्र च बन्धपरिणामे स्पर्शद्वयमुपयुज्यते स्निग्धरूक्षलक्षणम्, केचित् स्निग्धपरिणामपरिणताः केचिद् रूक्षपरिणतिभाज इति, उभयस्य तु विरुद्धत्वादेकस्मिन् परमाणावसम्भवः, तत्राप्येकगुणस्निग्धत्वपरिणता इत्यादि यावदनन्तगुणस्निग्धत्वपरिणतास्तथा रूक्षत्वेऽपि । परमाणवश्च सर्वेऽपि सजातीया एव, न केचिद् विजातीयाः, रूपादिचतुर्गुणत्वं सर्वेषां स्पर्शवत्त्वादिति द्रष्टव्यम्, एवं च तेषां रौक्ष्यस्नेहविशेषाद् भवति द्रव्यान्तरेण बन्धपरिणामस्तादृशो येन प्रचयविशेषान्महत् स्थूलं घटाद्यभिनिवर्त्यते. श्लेषमृद्रजःसम्बन्धितृणादिवदित्यतस्तन्मात्रत्वमनाहितातिशयत्वं न सङ्गच्छते, एवं चोपवर्णितस्वगतभेदाभ्युपगमान्निरतिशयत्वं सर्वथा सर्वप्रकारं न केषांचिदुपपद्यते पदार्थानाम्, न चात्यन्तिक एव भेदः, किन्तु किंचित् सामान्यमप्यस्त्येव, न च केवलः परिणाम एवैन्द्रियकत्वे कारणं भवति, किन्तु प्रतिविशिष्टानन्तसङ्ख्यासङ्घातापेक्षः परिणामः स्थूलः प्रतीन्द्रियनियतविषयतामास्कन्दति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मान्नैन्द्रियकत्वे सङ्घातः केवलो हेतुर्भवति, नापि परिणामः, किं तर्हि? उभाभ्यां भेदसङ्घाताभ्यामेककालाभ्यां चाक्षुषा भवन्ति, चक्षुर्ग्रहणाच्च समस्तेन्द्रियपरिग्रहः, पश्यति-उपलभते इति चक्षुः, स्पर्शरसगन्धशब्दा अप्येवंविधपरिणामभाज एव निजोपलम्भनैरुपलभ्यन्त इति ॥ **अचाक्षुषास्त्वित्यादि** । ये पुनरतीन्द्रिया द्व्यणुकादयोऽनन्ताणुकपर्यवसानाः स्कन्धाः सूक्ष्मास्ते यथाभिहितात् त्रिविधात् कारणात् सङ्घातादेरुत्पद्यन्ते। न चेदमाशङ्कनीयम्—त एव बादरास्त एव च पुनः सूक्ष्मा इति, यतो विचित्रपरिणामाः पुद्गलाः कदाचिद् बादरपरिणाममनुभूय जलधरशतक्रतुचापसौदामिनीलवणसकलादिकमथ पश्चादलक्षणीयपरिणाममात्मस्वरूपावस्थानस्वभावमतिसूक्ष्ममाददते करणान्तरग्रहणलक्षणतां वा भजन्ते लवणहिङ्गुप्रभृतयः, सूचनीयपरिणामश्च जनित्वा पुनरपि वियति परितः सकलदिगन्तरावरोधिवारिधरत्वादिना स्थूलेनाकारेण परिणमन्ते। तुशब्दः पुनःशब्दार्थे, चशब्दः समुच्चये, इतिशब्दः प्रकृतपुद्गलप्रकरणपरिसमापनार्थः ॥ २८ ॥

भा०—अत्राह—धर्मादीनि सन्तीति कथं गृह्यत इति ?। अत्रोच्यते-लक्षणतः। किञ्च सतो लक्षणमिति ?। अत्रोच्यते—

टी०—अत्राहेत्यादिसम्बन्धग्रन्थः। धर्मादीनां द्रव्याणां यथासम्भवं गतिस्थित्युपग्रहादिलक्षणमुक्तं वैशेषिकम्, अधुनाऽन्तरङ्गव्यापिलक्षणजिज्ञासया सन्दिहानः प्रश्नयति—**धर्मादीनि सन्तीति कथं गृह्यत इति**। अस्ति चात्र सन्देहबीजम्—किं विकारग्रन्थिरहितं सत्तामात्रमेते धर्मादयः आहोस्विद् विकारमात्रमुत्पादविनाशलक्षणमथोभयम् ? इत्येवमनेकप्रकारसम्भवे सन्देहः, **कथं**—केन प्रकारेण, **धर्मादीनि सन्ति**—विद्यन्त इति। **इतिशब्दो** हेतौ। येन हेतुना सत्त्वमेषां निश्चीयते तद्विषयत्वमितिकरणस्य, वाक्यपर्यन्तवर्तीतिशब्दः प्रष्टव्यार्थेयत्ताख्यापनार्थः। **गृह्यत** इति ग्राह्य, निश्चेयमित्यर्थः। किं तदस्तित्वमेषामिति। अथवा धर्मादीनि सन्तीत्यस्तित्वमेव सन्दिग्धे परः ॥ ननु च येषां गत्याद्युपकारेणानुमितमस्तित्वं प्राक् ते प्रसिद्धसत्ताका एव, कुतः सन्देहः ? अयमभिप्रायः प्रष्टुः—गत्याद्युपग्रहकारिणः किल धर्मादयः केऽपीत्यप्रसिद्धसत्ताकेनैव प्रपत्त्राभ्युपेतम्। इदानीं तु प्रश्नयति—कथं पुनरेषां धर्मादीनां विद्यमानत्वं निश्चेयमिति ?। आचार्य आह—**अत्रोच्यते—लक्षणतः** ॥

सल्लक्षणसूत्रावतरणम्

आचार्यस्यायमभिप्रायः, सङ्ग्रहादेकीभावादुत्पादादयः सल्लक्षणमस्तिशब्दविषयः, एवंविधाश्चैत उपलभ्यन्त इत्यतः सामान्येन तावदुपन्यस्यति—**लक्षणत** इति। पुनरपि सामान्याभिधाने सन्दिहान आह—**किञ्च सतो लक्षणमिति ?**। किं पुनः सतो लक्षणं, लक्ष्यते येन लक्षणेन प्रमाणानि तद्विषयश्च, लक्ष्यते येन सदेतदिति। **अत्रोच्यते**—इत्याचार्यः प्रतिजानीते, सत्त्वलक्षणम्, तेषां धर्मादीनामस्तित्वाव्यभिचारिलिङ्गमिदमुच्यते ॥ एतदुक्तं भवति—धर्माधर्माकाशपुद्गलजीवाः पञ्चास्तिकाया जगतः स्वतत्त्वम्, तत्र जीवद्रव्यं धर्मादीनां ग्राहकं स्वरूपस्य चेति, सङ्क्षेपतः शब्दार्थज्ञानानि सत्त्वलक्षणलक्ष्याणीति, अतः सकलाधि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गम्याभिगमोपायविषयेण प्रश्नेनोपक्रान्तं चोदयित्वाऽतः प्रतिवचनमपि तथैवाचार्येणोच्यते, येन लक्षणेन प्रमाणानि तद्विषयश्च लक्ष्यते तद्यापि लक्षणमभिधीयत इति। तच्चेदं सूत्रम्—

सूत्रम्—उत्पादव्ययध्रौव्ययुक्तं सत् ॥ ५–२९ ॥

भा०—उत्पादव्ययाभ्यां ध्रौव्येण च युक्तं सतो लक्षणम्; यदुत्पद्यते, यद् व्येति, यच्च ध्रुवं तत् सत्; अतोऽन्यदसदिति ॥ २९ ॥

टी०—उत्पादव्ययाभ्यामित्यादि। समासतश्चायं सूत्रार्थः—स्थित्युत्पत्तिविनाशस्वभावं सद्, अवश्यन्तयैव स्थित्युत्पादविनाशाः समुदिता एव सत्त्वं गमयन्ति। स्थित्यादयो हि सत एव भवन्ति, न जातुचिन्निरुपाख्यस्य, केनचिदप्याकारेणानुपाख्यायमानत्वादिति। यत् कथंचिन्न ध्रुवं न चोत्पद्यते न च व्येति तन्न सदिति। इदं च सूत्रं द्रव्यपर्यायनयद्वयगर्भम्, यतो द्रव्यास्तिकपर्यायास्तिकावुत्सर्गापवादस्वभावौ मूलं सङ्ग्रहादिप्रपञ्चस्य, तन्निरूप्यं च सर्वं वस्तु, ते च सङ्ग्रहादयः प्रथमाध्याये विध्यपवादस्वरूपतया निरूपिताः, विशेषविवक्षया तु किञ्चिदुच्यते—उत्सर्गो विधिर्व्यापित्वमप्रतिषेधः, न ह्यसौ द्रव्यनयो विशेषमिच्छति, विशेषो ह्यन्यप्रतिषेधेनात्मानं प्रतिपादयति भावान्तरत्वात्, न चाभावः प्रतिषेधमात्रम्। प्रागभावो हि घटस्य मृत्पिण्डः प्राग्घटोत्पादाद् घटस्याभावः पिण्ड एवानाविर्भूतघटाकारः १; प्रध्वंसाभावोऽपि कपालाद्यवस्थाप्रध्वंसो विनाशः, स चावस्थान्तररूपत्वाद् वस्तुस्वभावं न जहाति, वर्णकविरचनामात्रप्रापितनटान्यत्ववदुत्फणविफणादिसंस्थानमात्रत्यागिसर्पवद् वा २; इतरेतराभावोऽपि स्तम्भकुम्भादीनां परस्परव्यतिरेकरूपत्वान्नावस्तु, घटो हि घटसंस्थानादिव्यतिरेकापेक्षस्वरूप एवाभावशब्दवाच्यः, समस्तवस्तुनश्च तथाविधत्वाभ्युपगमाद् वस्त्वेव भवतीतरेतराभावः ३;

अभावस्याप्रतिषेधात्मकता

न चात्यन्ताभावः कश्चिदनुपाख्योऽस्ति, सर्वप्रकारमनुपाख्यायमानस्वरूपानधिगमात्, शशविषाणादेर्वस्त्ववस्थान्तरत्वादुपलब्धिविषयत्वम्, शशविषाणाभावो हि मौण्ड्यं समतलमस्तकस्वरूपोपलब्धिर्नात्यन्ताभावः, विषाणसद्भावादन्यत्र शशकमस्तकसद्भावाच्चेतरेतराभाव एव, समवायसम्बन्धप्रतिषेधमात्रत्वाद्, वा अन्यत्र च तस्य सत्त्वान्नात्यन्ताभावः, नामकर्मपरिणामवशाच्चापत्यवत्त्वे वन्ध्यायाः केन तद्वत्ता निवार्यते, नहि पूर्वोपात्तकर्मविपरिणामव्यतिरेकेण तज्जीवतथाविधपरिणत्यभावे वा उत्तरजन्मप्रतिपत्तिरमूलत्वात् ४; अतः सर्व एव पदार्था द्रव्यक्षेत्रकालभावभेदापेक्षाः कदाचिदुपलभ्यन्ते प्रत्यक्षादिना, प्रमाणेनावधार्यन्ते, कदाचिदुपलब्धाः सन्तोऽपि भूयो नोपलभ्यन्ते, द्रव्यादिविप्रकर्षात्, सत्यपि मतिज्ञानावरणीयकर्मक्षयोपशमकारणसाकल्ये

---

१ 'उत्पादव्ययौ ध्रौव्यं च युक्तं' इति घ-पाठः। २ सामान्यविशेषोभयाग्राहित्वान्नैगमस्य संग्रहव्यवहारयोरन्तर्भावात्। ३ पूर्वैःपूर्वो विधिः परःपरोऽपवाद इति। ४ 'प्रतित' इति क-ख पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपयोगे च किञ्चिद् द्रव्यमन्यात्मपरमाणुद्व्यणुकादि वैक्रियशरीरादि च सदपि नोपलभ्यते, तस्य च द्रव्यस्य तथाविधपरिणामात्, आदिशब्दाद् दिवा तारकादयो माषश्च माषराशावुपक्षिप्तः, किञ्चित् क्षेत्रविप्रकर्षाद्धि दूरत्यासन्नसव्यवधानवर्ति विद्यमानमेव नोपलम्भविषयभूयमास्कन्दति, तथाऽपरं कालविप्रकर्षादनाविर्भूतं तिरोभूतमुपलब्धेरगोचरः, तथाऽन्यद्भावविप्रकर्षात् परकीयात्मवर्तिमतिज्ञानविकल्पजालमण्वादिपरिवर्ति च संस्थानरूपादिपर्यायकलापजातं सदप्यनुपलभ्यम्, विवक्षितोपलब्धेश्चान्या उपलब्धिरनुपलब्धिः, पर्युदासवृत्तेरभ्युपगमात्, न पुनरुपलब्ध्यभावोऽनुपलब्धिः, अनुपाख्यस्याभावस्य प्रत्याख्यानात्, भावस्यैव चाभावशब्देन कथञ्चिदभिधेयत्वात्, तस्मादुपलम्भकारणभाज एवानुपलब्धिर्नान्यथा, व्यवस्थितमिदं नाभावः प्रतिषेधमात्रमिति। एवं च ध्रौव्यं द्रव्यास्तिकः, अस्तीति मतिरस्येत्यास्तिकः द्रव्य एवास्तिको द्रव्यास्तिकः, सकलभेदनिरासादकृतलक्षणस्य च तत्पुरुषस्य मयूरव्यंसकादिप्रक्षेपात् समसनम्, तच्च द्रव्यं भवनलक्षणं मयूराण्डकरसवदुपारूढसर्वभेदबीजं निर्भेदं देशकालक्रमव्यङ्ग्यभेदं समरसावस्थमेकरूपं भेदप्रत्यवमर्शेनाभिन्नमपि भिन्नवदाभासते, तदाश्रयाच्च भवितरि विशेषे भवति भावता, अन्यथा तु भाव एव न स्यात् भविता विशेषो, भवनव्यतिरेकित्वात्, तदव्यतिरिक्तरूपत्वाच्च भवितुर्विशेषस्य तत्स्वरूपवद्भावता, तदव्यतिरिक्तरूपता च। एवं सति भवनमात्रमेवेदं कृत्स्नं भेदाभिमतास्त्वेता वृत्तयस्तस्यैव न जात्यन्तराणीति ॥ पर्यायः पुनरपवादस्वभावाऽन्यपरिवर्जनमपवदनमपवादः स ह्यन्यपरिवर्जनेनान्यं प्रतिपादयति, प्रतिषेधरूपत्वाद्, अघटो न भवतीति घटः, पर्याया एव सन्ति न पुनर्द्रव्यं नाम किञ्चिदेकं पर्यायार्थान्तरभूतमस्ति, द्रव्यास्तिकावधारितध्रौव्यवस्तुप्रतिक्षेपेण भेदा एव वस्तुत्वेन प्रतिज्ञायन्तेऽतः पर्याये आस्तिकः पर्यायास्तिकः, समुपलभ्यमानायःशलाकाकल्पभेदकलापव्यतिरेकेण द्रव्यस्यानुपलम्भात् ॥ ननु च रूपादिव्यतिरेकेण मृद्द्रव्यमित्येकवस्त्वालम्बनश्चाक्षुषः प्रत्ययः प्रत्याख्यातुमशक्यः सन्तमसपटलावच्छादितप्रदेशवर्तिनि वा मृद्द्रव्ये स्पर्शनज्ञानमभिन्नमृद्द्रव्यमात्रालम्बनमसत्यमिति वा भाषितुं न पार्यत इत्यस्त्यभिन्नमेकं द्रव्यमभेदज्ञानविषयत्वात्, न चायमभेदप्रत्ययो भ्रान्तः, पुनः पुनः प्रेक्षापूर्वकारिभिस्तथैवोपलभ्यमानत्वात्, नैतदेवम्, अन्यविषयत्वाद् रूपस्पर्शविषयाच्चक्षुःस्पर्शनज्ञानाद् भिन्नविषयोपलम्भिनोऽन्यदेव रूपादिसमुदयविषयं स्मार्तमभेदज्ञानमुत्पद्यते—स एवायं घटो यमहमद्राक्षमहनि रात्रौ वा यं चास्प्राक्षम्, अतो रूपाद्यग्रहे तस्या अभेदबुद्धेरनुत्पादात् ॥ एतदुक्तं भवति—दृष्ट्वा स्पृष्ट्वा वा स एवायं घट इति यदभेदज्ञानं तद् रूपादिसमुदयविषयं स्मार्तम्, तदग्रहे सत्यनुत्पत्तेः, यथा विज्ञानं धवाद्यग्रहे सत्यनुत्पद्यमानं धवादिविषयमिति ॥ नन्वालोकाग्रहणे शुक्लबुद्धिर्न भवति, न चालोकविषया शुक्लबुद्धिरित्येवमन्यत्वेऽपि साध्ये, न चालोकाद् रूपं नान्यदित्यनेकान्तः, नैतदेवम्, हेत्वर्थापरिज्ञानात्, रूपाद्यग्रहे तद्बुद्ध्यभावादित्यनेन तदभावाभावमुखेन रूपादिग्रहे सत्येव भावादि-

केषांचिद् द्रव्याणामनुपलब्धेर्हेतवः

द्रव्यपर्यायास्तिकौ

द्रव्यस्यापलापः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्याख्यायते, न चालोकग्रहणे सति रूपबुद्धिर्भवति चित्ररूपवत् सालोकस्य रूपस्य ग्रहणात्, आलोके तु सति स्याद् रूपबुद्धिः ॥ पुनराशङ्कते-प्रत्यक्षानुमानाभ्यामननुभूते समुदाये कथं स्मृतिरुत्पद्यत इति, न, अनेकान्तात्, विकल्पितेऽपि ह्यर्थे स्मृतिर्दृष्टा **बन्धुमत्याख्यायिकादौ**। अस्ति च घटादिसङ्केतप्रभवः समुदाये विकल्पो वनादिविकल्पवत्, अन्यथा वनसेनास्मरणमपि न स्यात्, एवं च न रूपादिव्यतिरिक्तं द्रव्यं समस्तीति व्यवस्थितम् ॥ पुनरप्याह-अस्त्येवान्यद् द्रव्यम्, बुद्धिभेदात्, अन्यैव हि रूपाधीरन्या च घटबुद्धिः। अयं च बुद्धिभेदोऽन्यत्वे सति भवति, नान्यथा, तस्माद् रूपादिद्रव्ययोरन्यत्वं बुद्धिभेदाद् गवादिवदिति, अयुक्तमेतदपि, यदि तावदुभयोरन्यत्वं साध्यते, द्रव्याभावादेकदेशाश्रयासिद्धः, नहि सतोऽसतश्चैकमेव विशेषणं न्याय्यम्। अथ रूपादिभ्यो द्रव्यस्यान्यत्वं साध्यते, तदसमञ्जसम्, नहि द्रव्यं नाम किञ्चिदस्ति स्वरूपेण यस्यान्यत्वं साध्येत, सिद्धे धर्मिणि धर्मविप्रतिपत्तौ साधनसद्भावात्, अनैकान्तिकश्च पानकादिभिर्बुद्धिभेदादिति, विनाऽप्यर्थान्तरभूतद्रव्यकल्पनया मनीषाभेदस्य सद्भावात्, रूपाद्यवयवानां सन्निवेशविशेषाद् बुद्धिभेदः, यथा गुडोदकाभ्यां पानकं नार्थान्तरमथ च बुद्धिभेदः, एवं विषङ्क्त्यादिष्वपि द्रष्टव्यम्। तस्मान्नोत्पादव्ययव्यतिरिक्तः कश्चिदस्ति ध्रौव्यांशो यमाश्रित्य प्रज्ञाप्येत द्रव्यमेकमभेदप्रत्ययहेतुरिति। स्वात्मव्यतिरिक्तावयव्यारम्भकास्तन्तव इति चेत्, अयुक्ततरमिदं तुलानतिविशेषाभावात्, यस्य ह्यवयवगुणा गुणान्तराण्यारभन्तेऽवयविनि "द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरम्" इति वचनात् तस्य दशपलपरिमाणभाजस्तन्तवः पटे गौरवान्तरमारभेरन्, अतस्तुलानतिविशेषाग्रहणान्नान्योऽवयव्यवयवेभ्य इति धर्माविशेषनिराकरणात् पक्षापवादो वाक्यार्थः, पटश्च तन्तुषु समवयन् प्रतितन्तु वर्तेत कात्स्न्र्येन देशेन वा? न तावदेकत्र तन्तौ कृत्स्नः समवेतः, सन्निकृष्टेऽपि तन्तावग्रहणात्, स्तम्भादिसन्निकर्षे मेर्वाद्यग्रहणवत्, यश्च यस्मिन् समवेतः स तत्सन्निकर्षे गृह्यते, यथा रूपादिः, अवयविबहुत्वप्रसङ्गश्च, अथ तन्तौ पटस्य प्रदेशो वर्तते, न तर्हि क्वचिदेकः पटो वर्तत इति प्राप्तम्, न च तन्तुव्यतिरेकेणान्यः पटस्य देशोऽस्ति येन देशेनासौ तन्तौ वर्तेत, तन्तुरेव च तस्य देश इष्यते **वैशेषिकैः**, न च तस्यैव तस्मिन् वृत्तिर्युज्यते, सावयवश्चावयवी स्यादिति। एवमवस्थितैकद्रव्याभावात् सर्वमुत्पादविनाशलक्षितमर्थक्रियासमर्थं वस्तु, उत्पादविनाशशून्याश्च शशविषाणादयो न वस्तुव्यपदेशभाज इति प्रतीतम्। न च परमार्थतः कारणप्रकृतिरस्ति द्रव्यसत्ता यत्रावगम्यते भव्यत्वात्, कारणं कार्यमिति कल्पनामात्रमेतत्, प्रतीत्यप्रत्ययमात्रवृत्तित्वाद् दीर्घत्वह्रस्वतावत्, तन्तुपटयोर्मृद्घटयोर्वा न किञ्चित् स्वसिद्धं रूपमस्ति, तन्तुषु मृदि वा यः कारणप्रत्ययः स पटकुम्भाद्यशेषार्थान्तरापेक्षया न स्वसिद्धः, तस्मात् तन्तुपटयोर्यस्तन्तुपटप्रत्ययः स इतरेतराश्रयत्वादसदर्थविषयः, तथा मृद्घटयोरतत्कारणकार्ययोरभाव एव स्वरूपस्यासिद्धत्वाद् व्योमोत्पलादिवदिति। अत्रोच्यते—प्रागुत्पत्तद्भिरेवास्माभिरभ्यधायि स्थित्युत्पत्तिविनाशस्वभावं सकलमेव सद्, एतौ च द्रव्यपर्यायौ

द्रव्यस्यान्यत्वम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परस्परनिरापेक्षौ न सतो लक्षणम्, द्रव्यास्तिकस्य ध्रौव्यमात्रवृत्तित्वात्, पर्यायस्योत्पत्तिव्ययमात्रवृत्तित्वात् परस्परापेक्षौ तु वस्तुस्वतत्त्वम्, न च द्रव्यांशः पर्यायांशो वा परमार्थतः कश्चिदस्ति परिकल्पितत्वात् ॥ यथाऽऽह—

द्रव्यपर्यायवादः

"नान्वयो भेदरूपत्वा–न्न भेदोऽन्वयरूपतः ।
मृद्भेदद्वयसंसर्ग–वृत्तिर्जात्यन्तरं घटः ॥"

अत एकान्तवादपरिकल्पिताद् वस्तुनोऽनेकान्तवादिनः संमतं वस्तु जात्यन्तरमेवाविभक्तरूपद्वयसंसर्गात्मकत्वात् नरसिंहादिवत्, यथा—

"न नरः सिंहरूपत्वा–न्न सिंहो नररूपतः ।
शब्दविज्ञानकार्याणां, भेदाज्जात्यन्तरं हि तत् ॥"

तदेवं घटाद्यपि कल्पिताद् द्रव्यार्थरूपात् पर्यायार्थरूपाच्च जात्यन्तरमित्येवंविधप्रक्रियाभ्युपगमेन च सर्वमेकनयमतानुसारि दूषणमुपन्यस्यमानमसम्बद्धमेवापनीपद्यते, यतश्चैवमतो भेदाभेदस्वभावेऽपि वस्तुनि कदाचिदभेदप्रत्ययः स्ववासनावेशात् केवलमन्वयिनमंशमुपगूहमानः प्रवर्तते, कदाचिद् भेदमात्रवादिनो भेदावलम्बनः प्रत्ययः प्रादुरस्ति, स्याद्वादिनस्तु जिज्ञासितविवक्षितार्थायत्तज्ञानाभिधानस्य द्रव्यपर्याययोः प्रधानोपसर्जनभावापेक्षया समस्तवस्तुविषयव्यवहारप्रवृत्तिर्वस्तुत्वमनेकाकारमेव ॥ यथाऽऽह–

"सर्वमात्रासमूहस्य, विश्वस्यानेकधर्मणः ।
सर्वथा सर्वदाभावात्, क्वचित् किञ्चिद् विवक्ष्यते ॥"

इति । भवतु नाम विवक्षावशाद् वचनव्यवहारः, चक्षुरादिज्ञानं पुनः प्रवर्तमानं न सहते कालान्तरम्, प्रथमसम्पात एव स्वविषयग्रहणात्, तद् यदि भेदाभेदस्वभावं वस्तु किमिति प्रथमत एव तदुल्लेखमिन्द्रियज्ञानं नोत्पद्यते, अतो मनोविज्ञानविकल्पमात्रं द्रव्यपर्यायाविति ? । अत्रोच्यते–चक्षुरादिविज्ञानान्यवग्रहादिक्रमेणोत्पद्यन्ते, अर्थावग्रहश्चैकसामयिकः[2] प्राक्, ततो मुहूर्ताभ्यन्तरवर्तीहाज्ञानं, ततोऽपायज्ञानमनन्तरं प्रमाणमिन्द्रियमेव व्यापारयतो निश्चिताकारमुपजायते, तद्भावे भावात् तदभावे चाभावात्, निश्चयश्चक्षुरादिविषयोऽप्यस्ति मनोविषयश्चाष्टाविंशतिविधत्वान्मतेर्बह्वादिभेदेन वा बहुतरविकल्पत्वाद् अस्त्येवेदं निश्चिताकारमिन्द्रियस्य ग्रहणं द्रव्यपर्यायाविति, मानसमपि यदि भवति, भवतु नाम को दोषः ? सर्वथा मनोविज्ञानमेवेदं तच्चाभूतं विकल्पमात्रमित्येतदसत्, अतो यदवाचि–ननु रूपादिव्यतिरेकेण मृद्द्रव्यमित्येकवस्त्वालम्बनश्चाक्षुषः प्रत्ययः प्रत्याख्यातुमशक्य इति तत्स्वमतिजृम्भितसमुत्थापितविकल्पमात्रम्, स्याद्वादिप्रक्रियानवबोधात्, यतो न रूपादिभ्योऽत्यन्त-

द्रव्यव्यतिरिक्तता

१ 'वादि' इति क-पाठः । २ 'समयिक' इति ग–पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यतिरिक्तं किञ्चिद् द्रव्यमस्ति, कथञ्चिद् भेदे वा परस्याभ्युपेतबाधा स्यात्कारलाञ्छनार्थज्ञानवचसो वा वादिनः सिद्धसाध्यतासमास्कन्दनात् सर्वमसमीचीनम् । न चान्धतमसादौ केवलमृद्द्रव्यग्रहणमस्त्यभिहितन्यायात्, अपि च—

" द्रव्यं पर्यायवियुक्तं (तं ?), पर्याया द्रव्यवर्जिताः ।
क्व कदा केन किंरूपा, दृष्टा मानेन केन वा ? ॥"

नहि विशेषनिरपेक्षो ध्रौव्यांशः सामान्यलक्षणः कश्चिद् विद्यते यो गृह्येत केवलः, न च सामान्यनिरपेक्षः कश्चिद् विशेषो नाम विद्यते य इन्द्रियाणां गोचरतामापद्यते ॥ अथैवमाशङ्क्येथाः—न ब्रूमो नास्ति सामान्यांशः, स हि विद्यमानोऽपि ग्रहणकाले ग्रहीतुमशक्य इति विशेषमात्रग्रहणमेवेति, एवं तर्हि सामान्यांशः स्वशरीरविरहाद् विभावत्वाद् व्योमोत्पलादिवत् कुतो विशेषग्रहणम् ? । सामान्योपलम्भानुभवविरोधश्च सामान्यशून्यविशेषमात्रग्रहणवादिनः । नापीन्द्रियविषयसङ्करः, चक्षुरादिज्ञानावरणकर्मक्षयोपशमविशेषात् तादृश एवासौ क्षयोपशमो येन समस्तान्येवेन्द्रियाण्येकसामान्यग्रहणे व्याप्रियन्ते, न पुनर्विशिष्टान्यान्यार्थग्रहणे, तथादृश्यमानत्वात्। न चास्ति काचिद् युक्तिर्यद् विवक्षितं वस्तु सर्वथा वस्त्वन्तरेणासदृशं स्वरूपेऽवस्थास्यते, सर्वप्रकारमतुल्यत्वाद् वन्ध्यासुतादिवत्, अतो भवान्तरेण तुल्यताऽवश्यमभ्युपेया विवक्षितस्य वस्तुनः सत्त्वमिच्छता। तच्च सामान्यं ध्रौव्यलक्षणम्। न चैतद् बुद्धिपरिकल्पनामात्रे सामान्ये घटते, परिकल्पस्य वस्त्वसंस्पर्शात् तादवस्थ्यं दोषाणाम्, परिकल्पश्चाभूतोऽपि तत्त्वतो वस्तुष्वेव तादृशीं धियमुत्पादयति, नावस्तुषु वाजिविषाणादिष्विति। किमत्र कारणमुपादाय वस्तुविकल्पः प्रवर्तत इति चेत्, तदसत्, तस्य वस्तुनो वस्तुत्वेनानिर्धारितत्वान्नोपादानकारणता, न च सर्वथा वस्तुनः तुल्यतैव, यदि स्यात् ततो वैरूप्यशून्यत्वाद् विवक्षितं वस्तु वस्त्वन्तरादन्यदित्येष प्रत्ययो न स्यात्, केनचिदप्याकारेण भेदाभावात्, अतो भेदमभिलषता प्रेक्षापूर्वकारिणा वैरूप्यमपि केनचिदाकारेणाभ्युपेयम्, एवं चेत् सामान्यविशेषस्वभावं सर्वदा सर्वमेव वस्त्विति प्रतिपत्तव्यम् । न च सामान्यविशेषयोः स्वलक्षणभेदेऽप्यत्यन्तभेदः, शबलरूपत्वात् वस्तुनश्च वस्तुतयाऽपि वस्त्वन्तरातुल्यत्वेऽन्यतरस्यावस्तुत्वप्रसङ्गात् तदविनाभावाच्च द्वितीयस्याप्यभाव इति सर्वं शून्यं स्यात्, इष्यत एवेति चेत्, तदयुक्तम्, प्रमाणप्रमेयप्रतिपाद्यप्रतिपादकसद्भावात् । सांवृत एष व्यवहार इति चेत्, तदप्यसत्, संवृतिः प्रमाणमप्रमाणं वा स्यात् ? यदि प्रमाणं ततो बाधकप्रमाणाभावात् परमार्थसत्त्वं प्रत्यक्षादिवत्, अथाप्रमाणं संवृतिः ततो देवानांप्रियस्य व्यर्थः प्रयासः, प्रमाणप्रतीतिनिबन्धत्वात् प्रेक्षापूर्वकारिव्यवहाराणाम्। अथ सकलशून्यताप्रसङ्गभीत्या सामान्यविशेषयोस्तुल्यत्वमेव वस्तुतयाऽभ्युपेयते ततः सामान्यविषयस्वभावं सर्वमिति व्यपेतशङ्कं प्रतिपद्यस्व, परस्परं वा स्वभावविरहाभावात् सामान्यविशेषयोः सङ्कीर्णतायां

सामान्यसिद्धिः

सामान्यविशेषरूपता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्यामपि धर्मभेदप्रसिद्धेः समस्तव्यवहारसम्प्रसिद्धिः, कारकशक्तिवत् । कारकशक्तयो ह्येकद्रव्यातिरिक्तत्वात् सङ्कीर्णा अपि कार्यभेदाद् भेदमनुपतन्त्य एवोपलभ्यन्ते विशिष्टव्यवहारहेतवः तद्वदत्रापि द्रष्टव्यम् । न च सामान्यविशेषव्यतिरिक्तः कश्चिदनयोः सामान्यविशेषयोराधारभूतो द्रव्यांशोऽपरः समस्ति परपरिकल्पितः, तुल्यातुल्यांशव्यतिरेकेणानुपलभ्यमानत्वाद् द्रव्यांशस्य, यदि तावदसावन्यस्माद् व्यावृत्ततयाऽवगम्यते ततो विशेष एव, अथानुवृत्तिद्वारेण परिच्छिद्यते सामान्यांशः स्यात्, न चान्यथा प्रत्ययप्रवृत्तिर्या द्रव्यमालम्बेत, अतो वस्त्वेकमनेकाकारम्, आकाराश्चानुवृत्तिप्रत्ययावसेयाः केचिदपरे तु व्यावृत्त्याकारबुद्ध्याऽध्यवसातव्या इति ॥ न चावश्यं सतो भवितव्यमाधारेण, परिकलय तावत् तस्यैव त्वत्परिकल्पितद्रव्यांशस्य क आधारः ? को वा व्योमादेरित्यलं प्रसङ्गेन । व्यवस्थितमिदमुभयस्वभावं सकलम् । तस्मान्न केवलस्य क्वचिदस्ति मृद्द्रव्यस्य ग्रहणम्, उपपद्यते चायमभेदप्रत्ययः, न च भ्रान्तः, सामान्यांशालम्बनत्वाद्, अतः सर्वं साधु स्याद्वादप्रक्रियायाम् । एतेन रूपादिसमुदयविषयं स्मार्तमभेदज्ञानमिति प्रत्युक्तम्, उभयस्वभावत्वाद् वस्तु सत् सामान्यांशालम्बनभेदज्ञानम्, न पुनः सामान्यशून्यरूपादिभेदसमुदयमात्रालम्बनम्, समुदायस्य तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वेनानिर्धार्यमाणस्वभावस्यापारमार्थिकत्वात् । यदप्युक्तं—"तेष्वेव हि तन्त्वादिषु तथासन्निविष्टेषु पट इत्यादिबुद्धिः प्रवर्तते, यथा भक्तसिक्थोदकेषु तथासन्निविष्टेषु काञ्जिकबुद्धिः" इति, कथं पुनः सन्निविष्टेष्विति निरूप्यम् ॥ ननु च पटाद्याकारेणेति किमत्र निरूप्यते ? क पुनरसावन्यत्र पटः प्रसिद्धो यस्याकारेण तन्तवः सन्निविशन्ते, यथा पार्थोकारोऽभिमन्युरिति, कश्चायं सन्निवेशः ? यदि संस्थानमेव वृत्त-त्र्यस्र-चतुरस्रा-यत-परिमण्डलभेदमिष्यते युग्मा-युग्म-प्रतर घनविकल्पकम्, एवं सति प्रागस्माभिः प्रत्यपादि प्रपञ्चतः सङ्घातभेदेभ्य उत्पद्यन्ते स्कन्धास्तद्भावलक्षणपरिणामवशात्, स च तादृशः परमार्थतोऽस्त्येव समुदायः, अथान्यः कोऽपि समुदायः, स निरूपणीयः, काञ्जिकाद्यपि परिणामान्तरापत्त्यैव सिद्धमार्हतानाम्, न भक्तसिक्थादिमात्रतया । यच्चोक्तम्—'रूपाद्यग्रहे घटादिबुद्धेरभावात्" इति, एतदपि जैनान् प्रति न किञ्चित्, उभयस्वभावत्वाद् वस्तुनो विभागाभावात्, रूपादिस्वरूपोल्लेखेनैव सामान्यांशः प्रतीयते, वह्निरूपस्पर्शपरिणतायोगोलकवत्, तथा वनविपङ्क्त्यादयोऽपि सन्निवेशविशेषाः पुद्गलानां सामान्यविशेषस्वभावाः समासादितक्रमपरिणतयः तत्त्वतोऽभ्युपेयन्ते, नोपादायप्रज्ञप्तिमात्रम्, यदि च संस्थानमर्थान्तरं रूपादिभ्यस्तदपि परमार्थसत् ततो रूपादिवदन्यानपेक्षमेव गृह्येत, अथ रूपस्पर्शमात्रम्, एवं तर्हि तदनेकं रूपस्पर्शवत् प्रसक्तम्, एवं चानिष्टप्राप्तेरसमञ्जसता, यदि रूपसन्निवेशविशेषो वृत्तं स्पर्शनेन न गृह्येतातिविषयत्वाद् रूपवत्, न वा स्पर्शावशेषचक्षुषा गृह्येतोक्तन्यायात्, भेदे च द्वे वृत्ते गृह्येयातामन्यत्वाद् रूपस्पर्शवत्, एवं तन्त्वादिषु तथास्थितेत्यादि विचार्यमाणं विशी-

---

१ 'प्रसिद्धेः' इति क-ख-पाठः । २ 'मालम्बतो वस्तु' इति क-पाठः । ३ 'क्वचिदपरे' इति क-ख-पाठः । ४ 'नोपादेय' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्यते, तस्मादस्ति द्रव्यं तद्भावाव्ययलक्षणं स्थित्यात्मकमन्वयिरूपत्वात् स्वभेदानां प्राक् तदान्वयिन्योश्च(?) मृदन्वयाविच्छेदादेकम्, न पुना रूपादिपमुदायमात्रम्, अतः सर्वैकान्तध्वंसविधायिनि स्याद्वादे दूरमपास्तमसद्विकल्पचतुष्टयम्, किं तत्, एवं समूहिनः परिणामिनो वा तत्कार्यमुत नैव तत्कार्यमथ कार्यमेवास्ति न कारणं कारणमेव वा विद्यते न कार्यमिति, एष च

कार्यकारणानेकान्तत्वम्

सामूहिकः समस्तोऽपि रत्नावलीपटस्तम्भकुम्भसेनावनयूथादिरर्थः स्वसमये पारिणामिक एव, भिन्नाभिन्नदेशानां परिणामिनां परिणामाभ्युपगमात्, तथापि भेदेनोपन्यासो लोकव्यवहारानुवृत्त्या, पूर्वधर्मोपमर्देनोत्तरधर्मोत्पादः परिणामो लोके क्षीरदध्यादिवत् समूहिषु पारिणामिषु चानैकान्तव्याप्तिप्रपञ्चप्रदर्शनार्थः। तथाहि—आलोकविशिष्टरूपग्रहणमपि नात्यन्तभेदप्रतिपत्तये, विशेषणविशेष्यभावश्चैकान्तभेदविषयो न कश्चित् प्रसिद्धः, दण्डयादावपि सामान्यविशेषभावे सति विशेषणविशेष्यभावात्। यच्चोक्तमवधारणं रूपादिग्रहे सत्येव भावात्, तदप्युभयस्वभाववस्त्वभ्युपगमे न कञ्चनापक्षा(?)लमावहति। यदप्यारेकां प्रमाणानुभवमन्तरेण स्मृतिरनुपपन्नेति पश्चात् परिजिहीर्षताऽभ्यधायि विकल्पितेऽपि ह्यर्थे स्मृतिर्दृष्टेति, तदप्यसत्, अर्थाभिधानप्रत्ययानां वस्तुत्वाभ्युपगमादत्यन्ताभावस्य च निरुपाख्यस्य[1] प्रतिषिद्धत्वात्, सर्वप्रकारमसतः संव्यवहारायोग्यत्वात्, बभूवुरनादौ संसारे बन्धुमत्यादयः प्राणिविशेषास्तदभिधानानि तदालम्बनाश्च प्रत्ययाः, ततश्च प्रमाणानुभवपूर्विकैव स्मृतिः सर्वत्र नान्यथा, समुदायस्य च प्रतिपादितवस्तुत्वान्न निर्मूलविकल्पत्वम्, बुद्धिभेदाच्चान्यत्वमेकान्तत एवेति पूर्वमेव प्रत्यस्तम्। नहि बुद्धिभिदा सर्वप्रकाराऽस्ति जनेन्द्राणां द्रव्यास्तिकनयाभिप्रायेण ग्रहणात्, सद्द्रव्यतया भेदाभावात्, पर्यायतः सङ्ख्यापरिमाणाकारभेदसद्भावात् भिन्नाभिन्नस्वभावैव शेमुषी, सा च भेदाभेदस्वभाव एव वस्तुनि व्यापारमासादयन्ती स्वात्मप्रतिष्ठां प्रतिलभत इति न किञ्चिदनिष्टम्। यच्चोक्तम्—"तुलानतिविशेषाग्रहणादनन्योऽवयव्यवयवेभ्य" इति, तदिष्टमेव, अन्यत्वस्य सर्वथा निषिध्यमानत्वात्, यतो विनाऽप्यवयविना संयोगमात्रे तदर्थान्तरभूतसङ्घातपरिणामाद् दशपलपरिमाणत्वमस्त्येवेति अतो नावयविकृतं पलदशकस्य दशपलपरिमाणत्वं, विनाऽपि तेनोपलभ्यमानत्वादेकादशपलेनेव, इतश्चावयवव्यतिरेकेणासन्नवयवी, अनभिभूतगुणत्वे सत्यवयवरूपादिव्यतिरेकेणानुपलभ्यमानरूपादिगुणत्वात्, तुरगवारणाद्यवयवव्यतिरेकेण सेनावत्। यदि च स्याद् रूपादयोऽपि च गुणा गृह्येरन्नवयविनः पृथक्त्वेन, घटबदरादिवदिति व्यतिरेकः, विशेषणोपादानाद् विद्यमानेष्वभिन्नादनुपलभ्यमानगुणत्वं तारकादिषु दृष्टमित्यनैकान्तिकत्वव्यावृत्तिः, द्रव्यात्मना च तन्तुपरिणतौ पटपरिणामोऽस्त्येव, सुचिरादपि तत्र भावात्, पर्यायात्मना चाभावाद्, अतीतानागतपरिणामानामसच्चाद्व्यवहार्यत्वाद् वर्तमानपर्याय एव परमार्थतोऽस्त्युपयु-

अवयविनोऽनन्यत्वम्

---

१ 'निरूपाख्य' इति क-पाठः। २ 'ग्रहणान्नान्या' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्यमानत्वात्, पटपरिणामकाले च द्रव्यात्मना तन्तुसद्भावात् पर्यायात्मना चाभावात्, सर्वेषामवयवावयविसमुदायसमुदायिगुणगुणिनामन्यत्वानन्यत्वमुभयनयापेक्षमेवाभिरूपधियो धिनोति, तस्मादनेकान्तवादिनः सूक्ष्मबादरप्रतिघाताप्रतिघातभेदसङ्घातकार्यकारणैकत्वान्यत्वादिविश्वप्रकारपरिणाममभ्युपयतो[1] न किञ्चिदवद्यमाढौकते ॥ एतेन द्रव्यपर्यायनयद्वयव्यावर्णनेन किमेकोऽवयवी स्वारम्भकावयवेषु प्रत्यवयवं वर्तते आहोस्विद् एकदेशेनेत्येषोऽपि विकल्पः सिद्धसाध्यतादिबहुदोषत्वादपास्तो वेदितव्यः, तस्मान्न व्यतिरिक्तोऽवयव्यस्ति निभाल्यमानः, समस्ति च द्रव्यांशः स्थितिलक्षणोऽन्वयी, तदपेक्षावुत्पादविनाशौ स्तः, अतः स्थित्युत्पादविनाशस्वभावमेव सर्वमर्थक्रियासमर्थं,न स्थितिनिरपेक्षावुत्पादविनाशाविति । यदप्युक्तम्—कल्पनामात्रं कारणं कार्यमिति प्रतीत्य प्रत्ययमात्रत्वात्, तदप्ययुक्तम्, करोतीति कारणं कार्यान्तरनिवर्तनसमर्थम्, क्रियायाः कारणान्तरापेक्षात्, कल्पना च बहिरङ्गार्थशून्यं विज्ञानमात्रं शब्दमात्रं वा, न च तस्य घटादिकार्यान्तरनिष्पादने शक्तिरस्ति, न च विज्ञानमात्रमेव ग्राह्यग्राहकलक्षणमर्थशून्यमस्तीति प्रतिपत्तुं शक्यम्, प्रमाणाभावात्, न च भ्रान्तिमात्रं कार्यकारणव्यवस्था, भ्रान्तिबीजाभावात्, नापि शून्यता, प्रतिषेधप्रतिषेध्यादिसद्भावात् । व्यवहारतः सत्त्वमर्थानां न परमार्थत इति चेत् प्रतिषेधोऽपि तर्हि व्यवहारमात्रत्वादसन्नित्यप्रतिहतसद्भावात् कथं न भावा भवेयुः? न च रासभशृङ्गमसत् स्वतः परिकल्पितेन रूपेण मृत्खननादिकार्यार्थमाचेष्टमानमिष्टं दृष्टं वा ॥

दीर्घता च यदि स्वतोऽसती ह्रस्वबुद्धेः कारणं भवत्येवं सति व्योमारविन्दकर्णिकाऽपि हेतुरसत्त्वात् स्याद् ह्रस्वताबुद्धेः, यदि चासत्प्रतीत्याऽसदेवोत्पद्येत तथा सति शशविषाणं प्रतीत्य खरविषाणमपि स्यात्, अथास्त्येव वस्तुनो दीर्घता, न तर्हि प्रतीत्यप्रत्ययमात्रं सर्वम्, सतीमेव दीर्घतामाश्रित्य ह्रस्वताधियोऽभ्युपगमात् दीर्घह्रस्वबुद्धयोश्चायौगपद्यादयुक्ता प्रतीत्यसमुत्पत्तिः, न चासतः कारणभावः, यदि च सर्वं प्रतीत्यैव सिद्ध्यति नाप्रतीत्य, ततः प्रतीत्यसिद्धिरपि प्रतीत्यसिद्धिप्रभावाऽभ्युपेया, तथा चाभ्युपगमविरोधः, तस्मादस्ति ध्रौव्यांशलक्षणात् द्रव्यसत्ता, नापेक्ष्यसिद्धा, कारणमिति या व्यपदिश्यते, कारणसिद्धौ च कार्यसिद्धिरपि तदविनाभावात्, अन्यथा कारणतैव न स्यादसम्भावितदुद्गत्वात्, पर्यायास्तूत्पादादयः केचिदपेक्ष्यसिद्धाः प्रयोगजाः पटादयः, केचिदनपेक्ष्यसिद्धाः स्वाभाविकाः परमाणुनीलताभ्रेन्द्रचापविद्युदादयः, एवं च स्वरूपसिद्धेः कारणकार्यप्रत्ययावसदर्थविषयौ न भवत इति सिद्धम् ॥

दीर्घह्रस्वत्वसिद्धिः

भाष्याक्षरानुसरणमधुना समातन्यते—उत्पादश्च व्ययश्च उत्पादव्ययौ, समस्यैकत्वेन निर्दिष्टौ, ध्रुवतीति ध्रुवं—शाश्वतं तद्भावो ध्रौव्यं-स्थिरता, उत्पादव्ययध्रौव्याणि, युक्तं योगः—समुदायः सत् अस्तीति सद्, विद्यमानमित्यर्थः । एतदुक्तं भवति—उत्पादादयो नैककाः सत्, किं तर्हि? युक्तं

उत्पादादिपदानामर्थः

---

१ 'पभ्युपेयते' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योगः—परस्परापेक्षः समुदाय एवोत्पादादीनां, न सदित्यस्य ध्वनेर्विषयः, यथा वृक्षा वनं समुदिता एव नैककाः, एवमुत्पादव्ययध्रौव्याणि योगः सदिति, अथवा समाध्यर्थस्य युजेर्युक्तं—समाहितं त्रिस्वभावं सत् उत्पादव्ययध्रौव्याण्येव त्रयः स्वभावाः सम्यगाहिताः—परस्परप्रतिबद्धाः सदिति। अन्ये तूत्पादव्ययध्रौव्यैर्युक्तमिति गृह्णते, किं पुनस्तदुत्पादादिभिर्युक्तमिति निरूपणीयम्, उत्पादादित्रयव्यतिरेकेण द्रव्याभावान्न विद्मः किं तद् युज्यमानमुत्पादादिभिः। अपरे समाधानमाक्षेपस्याभिदधते ॥ युक्तं विशेष्यते उत्पादव्ययध्रौव्यैः समुदितैर्यो योगस्तद् युक्तं सत्, नान्याभ्यामुत्पादव्ययाभ्यामित्यादिको योगः सदिति, योगश्च सामान्येनोत्पादादीनामनादिर्विशेषविवक्षया सादिः, ध्रौव्यं चेति पृथक् प्राधान्यख्यापनाय सामान्यस्य भाष्यकृतोदचारि, यतः सत्यन्वयांशे तदाश्रयावुत्पादविनाशौ सङ्गच्छेते, अन्यथा कस्योत्पादः ? कस्य चानुत्पन्नस्य तेनाकारेण व्ययः ? ॥ अपरे तु ध्रौव्यं चेत्यसमस्तामन्यथा वर्णयन्ति—

त्रैलक्षण्ये सतः सादिः, कथं सन्न त्रिलक्षणम्।
ध्रौव्यं तल्लक्षणत्वेन, द्रव्यार्थेन त्रिषूदितम् ॥ १ ॥
अत एव पृथग् वृत्तौ, ध्रौव्यं चेति प्रदर्शितम्।
सत त्रिरूपं त्रयं त्वेतत्, सम्भवेन विकल्पते ॥ २ ॥
आद्ययोर्नियमादन्त्य—मन्त्ये तु भजनाऽऽद्ययोः।
स्वतः परनिमित्तौ तु, स्यातामप्युपचारतः ॥ ३ ॥
अस्ति नोत्पद्यते चैक—मेकमुत्पद्यतेऽस्ति च।
नास्ति चोत्पद्यते चैकं, नास्ति नोत्पद्यते परम् ॥ ४ ॥
आकाशपरमाणू च, प्रदीपान्त्यशिखादि च।
आकाशकुसुमं चेति, चतुष्टयमुदाहृतम् ॥ ५ ॥

सङ्क्षेपतः कारिकापञ्चकस्यायमर्थः—पुद्गलजीवेषूत्पादव्ययोरन्यादृशत्वाद् ध्रौव्यस्य पञ्चत्वेऽप्यविशेषाद् वृत्तौ पृथग् विवरणम्, अन्यथा धर्माधर्माकाशेष्वधिगमोपायविषयत्वेनोत्पादप्रच्युती, अन्यथा च जीवपुद्गलेष्विति द्रव्यक्षेत्रकालभावापेक्षात्, अन्यथा प्रयोगजावुत्पादव्ययौ, अन्यथा च धर्मास्तिकायादिषु द्रव्यस्वभावापेक्षमप्रयोगजौ ज्ञानविषयत्वोत्पादप्रच्युतिमात्रलक्षणौ, नहि तेषु पौरुषेयो विस्रसा वा प्रयोगः क्रमत इति, अतः परप्रत्ययावुत्पादविनाशौ त्रयाणाम्, जीवपुद्गलानां तु प्रयोगविस्रसाभ्यामुत्पादव्ययौ सम्भवतः, ध्रौव्यं तु सर्वेष्वविशिष्टम्, एतत् सतो लक्षणं क्वचिदुपचारतः क्वचित् परमार्थत इति, तदेतत् पौर्वापर्येणालोच्य कृतप्रज्ञैरागमज्ञैरेव व्याख्यास्यते निर्विरोधं, वयं तत्रानिपुणाः किञ्चिदेवस्थूलकुशलतयाऽभिदध्महे—चशब्दः समुच्चितौ वर्तते, तेनोत्पादादयः प्रत्येकं सतो लक्षणं, किं तर्हि ? समुदिता एव वस्तुतत्त्वं भवन्तीति, एनमेवार्थमुत्तरेण भाष्येण प्रदर्शयति—यदुत्पद्यते यद् व्येति यच्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्रुवं तत् सत्। अतोऽन्यदसदिति ॥ यदुत्पद्यते इत्यादि। यदिति सामान्यमात्राभिधायिना सर्वनाम्ना धर्मास्तिकायादिपञ्चकपरिग्रहः, परस्परापेक्षाः समुदिता एवोत्पादादयः सल्लक्षयन्ति, तत्र द्रव्यनयाभिप्रायेणाकारान्तराविर्भावमात्रमुत्पाद औपचारिकः, परमार्थतो न किञ्चिदुत्पद्यते सततमवस्थितद्रव्यांशमात्रत्वात्, तथा व्ययः—तिरोभावलक्षणः, पूर्वावस्थायास्तिरोधानं विनाशः, यतो द्रव्यमेव तथा तथा विवर्तमानमुत्पादविनाशव्यवस्थया व्यपदिश्यते, प्रज्ञायते च पूर्वक्षणोच्छेदेन क्षणान्तरात्मलाभ उत्पादपर्यायस्य, तस्यैव क्षणस्य निरन्वयोच्छेदिता विनाशः, द्रव्यास्तिकस्य ध्रौव्यमन्वयी सामान्यांशः, पर्यायस्योपचारात्, सन्तानमात्रं ध्रौव्यशब्दाभिधेयमेकः सन्तानस्तद्भेदेन च प्रत्यभिज्ञादिप्रसिद्धिः, तदेतत् त्रितयमपि प्रतिपादयत्युभयनयसङ्गत्या वस्तुसद्भावप्रतिपत्तये, न ध्रौव्यमुत्पादव्ययशून्यं केनचित् प्रमाणेन गोचरीकर्तुं शक्यते, नाप्युत्पादव्ययौ सामान्यांशवियुताविति, यदुत्पद्यते यद् व्येति यच्च ध्रुवं तत् सद् विद्यते तदस्तीति, सामर्थ्यादिदमापन्नम्—अतोऽन्यदसदिति, अत इत्युत्पादादिसमुदितस्वभावाद् यदन्यत् तदसत्, तच्च किं? समुदायादपकृष्ट एकक उत्पादो वा विनाशो वा ध्रौव्यं वा उत्पादविनाशौ वा उत्पादध्रौव्ये वा, विनाशध्रौव्ये वा, इतरनिरपेक्षस्य तादृशांशस्याभावादसद्विषयत्वमसद्व्यवहारप्रतिबन्धिता चेति नानुपाख्योऽसच्छब्दवाच्यः, शब्दव्यवहारायोग्यत्वात् ॥ ननु च द्रव्यपर्यायनयौ स्वतन्त्रत्वात् द्वावपि विजिगीषू स्वविषयोपमर्दं परस्परं न सहेते, ततश्च पुनरपि सीमन्तिततमेव वस्तु न वस्तुतायामवतिष्ठेतेति। उच्यते—पर्यायनयस्य तावदुत्पादव्ययलक्षणस्य स्वातन्त्र्यं नास्ति द्रव्यास्तिकेनाङ्कुशितत्वात्। ननूत्पादो नाम कश्चिद् धर्मोऽस्त्यभूतभवनात्मकः, स चोत्पादो द्विधा कल्प्येत—प्रायोगिको वैस्रसिकश्च, प्रायोगिकः पुरुषकारनिर्वर्त्यः, सोऽपि द्विधा—अनभिसन्धिकृतोऽभिसन्धिकृतश्च, तत्राद्यः कायवाक्स्वान्तभेदेन पञ्चदशप्रकारः, ते च कायादयः समुदायात्मकाः, समुदायश्चासन् सार्थरथचक्रादिवत्, स्वाङ्गसमुदायमात्रत्वान्न सार्थो नाम कश्चित् परमार्थतोऽस्ति, रथो वा पुरुषकूवरादिव्यतिरिक्तः, स चाभावत्वात् सार्थरथादिः कथमुत्पद्येत? एवं कायादयोऽपि पुद्गलसमुदायरूपाः, समूहश्च समूहिमात्रमतस्तत्रापि न कस्यचिदुत्पादः, कायादेः परमार्थतोऽसत्त्वात्, अभिसन्धिपूर्वकस्तूत्पादः कायादियोगात् समग्रवास्यादिकरणापेक्षात् स्तम्भकुम्भादीनां प्रेक्षापूर्वकारिपुरुषक्रियाजन्यत्वात् प्रयोगजः, सोऽप्येवमेव समुदायविषयः समुदायश्चासत्त्वादेव नोत्पद्यत इत्युत्पादाभाव एव, अन्वयांशनिरपेक्षत्वान्न प्रायोगिक उत्पादः सम्भवतीत्यर्थः। वैस्रसिकोऽपि नास्त्युत्पादः, विस्रसेति स्वभाववचनसंज्ञाशब्दः, स्वाभाविको वैस्रसिकः, तत्र धर्माधर्मव्योमात्मपुद्गलद्रव्याणामिमा वृत्तयो यथाक्रमं स्थितिगत्यवगाहोपयोगस्पर्शशब्दादिलक्षणाः स्वसद्भावाः, नहि तेषां धर्मादीनां गत्यादयो धर्माः पर्याया वा भवन्ति, यदि भवेयुस्त-

उत्पादादेर्भेदाः

---

१ 'वासादि' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्तेषामेतद् विलक्षणमन्यदेव रूपं स्याद् गत्याद्युत्पादसद्भावे, न चान्यद् रूपं लक्ष्यते भुजगप्रसारणाकुण्डलि[1]कृतोत्फणविफणादिवत्, फणिनो हि स्वभावभूताकृतकसंस्थानान्तराभिव्यक्तिमात्रत्वात् प्राच्यफणिरूपानन्यत्वात्[2] तद् द्रव्यावस्थानात् कुत उत्पादः ? किं हि तत्रोत्पन्नं विद्यमानं वा नाभिव्यक्तमित्यत उत्पादाभाव एव, इत्येवं धर्मादीनामपि गत्यादीनामुत्पादाभावः स्वरूपावस्थानान्तरमात्रत्वाज्जलतरङ्गतुहिनपटलादिवत्, कुतः स्वाभाविक उत्पादः ? । न चोत्पादस्यान्यः प्रकारो विद्यत इति, तस्मान्नास्त्युत्पादः । एवं द्रव्यपर्यायनयद्वयापेक्षमस्तित्वमुत्पादस्य नास्तित्वं च भावितमात्मपुद्गलद्रव्यविषयम् ॥ अथाकाशधर्माधर्मेष्वविक्रियात्मकेषूत्पादस्याभावात् कुतस्तत्रोत्पादानेकान्त इति ? । उच्यते–तेष्वपि स्वाभाविक उत्पादः समुदायजनितः एकत्विकश्च द्विप्रकारोऽप्यस्ति भजनया । यथैव ह्यात्मन्यौपशमिकादीनां भावानामात्मन एव तेन तेनाकारेण वृत्तिरुत्पादः, स्पर्शादीनामणुषु, स्पर्शशब्दादीनां च स्कन्धेषु स्वाभाविक उत्पादस्तथा व्योमादिष्ववगाहगतिस्थितयो व्योमादिस्वभावास्तेषां परिणामाः, त एव ह्याकाशादयोऽवगाह्याकारेणोत्पन्नाः, तस्य चावगाहादेरुत्पादस्य प्रदेशरूपता यथाऽऽत्मनोऽसङ्ख्याताः प्रदेशास्तत्समुदायश्चात्मा भवति, आकाशस्य चाकाशत्वं स्वाभाविकमकृत्रिम[3]मेव, यस्तस्यावगाहोत्पादोऽसावप्यकृत्रिमत्वात् स्वाभाविक एव, यस्मादाकाशं शुषिरमवकाशदातृत्वस्वभावम्, तथा धर्माधर्मौ गतिस्थित्यनुग्रहहेतुस्वभावौ, आत्माऽपि ज्ञानात्मकत्वादुपयोगस्वभावः, पुद्गलाश्च मूर्तित्वात् स्पर्शादिस्वभावाः । एवमवगाहादेरुत्पादस्य स्यात् स्वाभाविकत्वम्, तथा स्यादस्वाभाविकत्वं समुदायकार्यत्वात् । यथा पटो भूयसां तन्तूनां समुदायेन जन्यते, अवगाहादेरपि यथोक्त उत्पादः समुदायजन्यत्वादस्वाभाविकः । यस्मादवगाहोऽवगाह्यावगाहकद्वयसमुदायात्मकः, गतिरपि गन्तृधर्मद्रव्यद्वयसमुदायात्मिका, स्थितिरपि स्थात्रधर्मद्रव्यद्वयसमुदायस्वभावा, उपयोगो विज्ञातृज्ञेयसमुदायात्मकः, स्पर्शादयोऽपि स्पर्शनादिस्पृश्यादिसमुदायात्मकाः, तस्मात् समुदायात्मकत्वात् स्यादस्वाभाविकः, समुदायनिरपेक्षाणामेषामवगाहादीनामभावादेवं स्यात् समुदायकृतः स्यादेकत्विकः, कथम् ? उत्पादो ह्यवगाहस्याकाशेऽवगाहकानुप्रवेशे व्यक्तिः, सा च व्यक्तिर्व्योमन्येव नान्यत्रापि, तस्य तु व्यञ्जकमेवावगाहकं नोत्पादकम्, व्यञ्जकं चाकाशादन्यदेव भवति, व्यङ्ग्यादू घटादेरिव प्रदीपादि, ततश्चावगाहस्यैकत्विक उत्पादः, स्यादनैकत्विकः प्राक् प्रतिपादितवत्, ततश्च नभोऽवगाहोऽप्यनित्य एव गुणत्वात् पत्रनीलतावत्, नभसोऽवगाहत्वलक्षणमुपकारः, स चावगाढारमन्तरेण जीवं पुद्गलं वा नाभिव्यज्यत इति अवगाढजीवादिसंयोगमात्रमवगाह इति सिद्धम् । संयोगश्चोत्पादी संयुज्यमानवस्तुजन्यत्वात् द्यङ्गुलसंयोगवत्, यथा चावगाह आकाशस्यैवं गतिस्थित्युपयोगरूपादयो गतिमदादिद्रव्यसंयोगमात्रत्वादुत्पादादिस्वभावा इति सर्वेऽप्युत्पादविगमध्रुवस्वभावा इत्यर्थः । न च पर्यायादात्मीयात् किञ्चिद् द्रव्यमेकान्तभिन्नमुपलभ्यते, यत् सम्भाव्येत तस्मिन् पर्याये परस्वभावभूते

---

१ 'कुण्डलिकाता' इति क-ख-ग-पाठः । २ 'त्वादद्रव्यां' इति क-ख-पाठः । ३ 'विकं न कृत्रिम' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विनष्टेऽप्यविनष्टमेकान्ताविष्कृतं नित्यमिति, यस्माच्च पर्यायादनन्यद् द्रव्यं तस्मात् तत्पर्यायनाशे तेनात्मना तद् द्रव्यं नश्येत् नान्यपर्यायात्मना, अनेकपर्यायानन्यरूपत्वादनेकात्मकत्वादेकेनात्मना नश्यत्यन्येनात्मनोत्पद्यतेऽन्येन चात्मना ध्रुवमङ्गुलित्ववक्रत्वर्जुत्ववद् बहुत्वाच्चात्मनामेकवस्तु विषयाणामेकस्य वस्तुनः,तस्मात् कथमिवैकान्तेनाकाशादयो नित्याः प्रतिपत्तुं शक्याः? स्याद्वादस्य देशवर्तित्वप्रसङ्गात्, आकाशादिष्वौपचारिकावुत्पादविनाशौ स्यातामिति चेत्, तदयुक्तम्, उपचारो यद्यलीकत्वम्, एवं सति ध्रौव्यमेवाकाशादिष्ववशिष्यते, न च ध्रौव्यं परमार्थरूपोत्पादविनाशशून्यम्।अपिच-आकाशादिध्रौव्यं पारमार्थिकानुपचरितोत्पादविनाशसम्बन्धि ध्रुवत्वात् पुद्गलजीवध्रुवत्ववत्। अथ व्यवहार उपचारः तथापि स व्यवहारः आगमपूर्वको वा स्याल्लोकप्रसिद्धिपूर्वको वा ?। तद् यदि तावदागमपूर्वकस्ततो भगवताऽऽख्यातं जगत्स्वरूपं प्रभृत्रितयेनोत्पादादिना, न च क्वचिदुपचारेण क्वचित् परमार्थत इत्यनागममाकाशादौ ध्रौव्यमेवेति, लोकप्रसिद्धयङ्गीकरणे धर्मादिद्रव्याप्रसिद्धिरेव कुतस्तदाश्रयावुत्पादविनाशाविति दूरापास्तं धर्मादिद्रव्यध्रौव्यम्। एवमुत्पादव्ययध्रौव्ययुक्तं सत्सर्वमिति व्यवस्थितं लक्षणम्॥

ध्रौव्यसिद्धिः

एवमुत्पादमभिधाय सम्प्रपञ्चमधुना विनाशविचारः क्रियते। विनाशोऽपि द्विविधः-समुदायविभागमात्रमर्थान्तरभावगमनं च, तत्र समुदायविभागलक्षणो द्विधा-स्वाभाविकः प्रायोगिकश्च, स्वाभाविको जीवव्यापारनिरपेक्षः, प्रायोगिकस्त्वात्मव्यापारादुपजातः। तत्र स्वाभाविको धर्माधर्माकाशजीवपुद्गलद्रव्याणां द्रव्यात्मनाऽवस्थितानामेव, यथा गतेरधोगतिपरिणामविशेषनाशादूर्ध्वगतिपरिणामे नोत्पादः, तथा क्वचिद् देशेऽवस्थितस्य तद्देशावस्थानविनाशेऽन्यदेशावस्थानोत्पादः, स्वस्यापि क्वचिद् देशेऽवगाहस्य तद्देशावगाहविनाशे देशान्तरावगाहोत्पादः, तथाऽऽत्मनः केनचिदुपयोगेनोपयुक्तस्य तदुपयोगविनाशादुपयोगान्तरेणोत्पादः, पुद्गलद्रव्यस्यापि वर्णान्तरेण प्राक् परिणतस्यापि तद्विनाशे वर्णान्तरेणोत्पादः, स चैषां पूर्वावस्थाविनाशः, समवस्थानान्तरस्योत्पादसंज्ञकस्याभिव्यक्तिकारणं, समवस्थानान्तरमेव हि तिरोभूतं विनाश उच्यते, नहि तत्र किञ्चिद् विद्यमानमभावीभूतमतो द्रव्यात्मस्थिततायामेवोत्पतनव्यक्त्यर्थं सर्पनिपतनविनाशवद्, उत्पतनव्यक्तये सर्पस्य निपतनमेव विनाशः, तस्माद् द्रव्यस्वतत्त्वोत्पादाविनाभूत एव विगमः, नार्थान्तरम्, यथा पटे तन्तूनां विभागेन पटकार्योत्पत्तावविनष्टं तन्तुद्रव्यत्वम्, तदेव प्रत्यक्षीक्रियते यत् तेन पृथक् तन्तुभावेन प्राग् नासीत्, एवं समुदायविभागमात्रं विनाशः। तथाऽर्थान्तरभावगमनमन्यो विनाशः, यदा मनुष्यजन्मन्यात्मपुद्गलसमुदायो विनश्यति तदाऽर्थान्तरभूतेन देवत्वादिना वर्तते, नात्यन्ताभावतया, यथाऽर्हद्दत्तस्य स्थातृक्रियाविशिष्टस्य तत्क्रियाविनाशे गन्तृतयोत्पादोऽर्थान्तरगमनं विनाशः, यथा

विनाशे भेदाः

१ 'दनेकश्चावेकेना' इति क-पाठः। २ 'गन्तृत्वेनार्थान्तर' इति क-पाठः।

४९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा घटोपयुक्तस्यात्मनस्तदुपयोगविनाशे पटोपयोगोऽर्थान्तरभावगमनम्, अण्वादेश्च शुक्लवर्णविनाशे कृष्णतयोत्पादो विनाशः, तथाऽऽकाशादीनां पूर्वावगाहगतिस्थितिविनाशेऽवगाहान्तराऽर्थान्तरभावलक्षणो विनाशः, अत एव भावान्तरोत्पत्तितो न विगमो विगम एवैकान्तेन, नाप्युत्पद एवोत्पादः । इत्थमुत्पादविगमौ तत्त्वेनानेकान्तात्मकेन निरूपितावन्वयांशापेक्षावेवात्मलाभं प्रतिपद्येते प्रायोगिकस्वाभाविकौ नान्यथेत्येवमुक्ते कश्चिन्मृषाभिमानी महानिबिडबृद्धबुद्धविप्रलब्धबुद्धिराचक्षीत–अस्तु स्वाभाविक एव विनाशो निर्हेतुकः, प्रायोगिकस्तु नोपपद्यते, विनाशहेत्वयोगात्, विनश्यतां हि घटादीनां विनाशस्य हेतुर्न युज्यते, यस्मात् स्वरूपत एव भावा नश्वराः स्वहेतुभ्यो यथास्वमुपजायमाना भङ्गुरप्रकृतय उपजननक्षणानन्तरकालानवस्थाना एव जायन्ते, नैषां स्वकारणसामग्रीतः प्रतिलब्धात्मनां सतां प्रकृतिभङ्गुरभावमपहायान्यस्मान्मुद्गरादेः कारणविशेषान्नाशस्य वस्तुन इवोत्पत्तिः, न चेदं स्वप्रक्रियाप्रकाशमात्रम्, किं तर्हि? उपपत्त्या निभाल्यते विनाशहेतुत्वेनाभिमतस्य नाशकरणं प्रति मुद्गरादेरसामर्थ्यम्, कथं पुनरसामर्थ्यमिति? उच्यते–विनाशकरणे हि विनाशस्य त्रयी गतिः–विनश्यमानभावस्वभावं वा कुर्यादथवा स्वभावान्तरमभावं वा, तत्राव्यतिरेकपक्षस्तावदतिस्थूल एव, नहि विनाशहेतुर्मुद्गरादिः घटादिकं भावस्वभावमेव करोति, स्वकारणेभ्य एव कुलालादिभ्यस्तस्य प्रथममेव निर्वृत्तत्वात् निष्पन्नस्य चाकिञ्चित्कार्यत्वात्, नापि स्वभावान्तरे कर्तव्ये तदवस्थस्य घटादेरविचलस्य विनशितुर्विकारोऽपि सम्भाव्यते, कुत एव तत्स्वभावप्रच्युतिः? तदवस्थश्च घटः पूर्ववदुपलभ्येत, अर्थक्रियां च जलहरणादिकां कुर्वीत ॥ ननु चानित्याद् घटादेरर्थान्तरं कपालाद्येव विनाशस्तेन च विनाशहेतुनिष्पादितेन भावस्यावृत्तत्वान्न तथोपलब्ध्यादिप्रसङ्ग इति, उच्यते– न स्वभावान्तरं कपालादिकं विनाशहेतुना क्रियमाणमस्यानित्यस्य घटादेरावरणं युज्यते, कृतेऽपि तस्मिन् कपालादिके विनाशहेतुना घटे च तदवस्थ एव दृश्यात्मनि कुतस्त्य आवरणसम्भवः? न चैकत्रैकदा युज्येते दर्शनादर्शने, विरुद्धत्वात् । नापि विनाशहेतुना तृतीयपक्षापतितो भावाभावः क्रियते, तत्र यद्येवं विकल्प्यते न विवक्षितो भावः अभाव इति ततोऽन्यः स्याद् भाव एव, एवं चाभावस्य विधिना पर्युदासरूपेण कार्यत्वाभ्युपगमे व्यतिरेकाव्यतिरेकविकल्पानतिक्रमः सम्भाव्यते, यदि व्यतिरिक्तमन्यं भावं करोति ततस्तथोपलब्ध्यादिप्रसङ्गस्तदवस्थः, अथाव्यतिरिक्तं तमेव भावं करोतीति तदप्ययुक्तम्, तस्य प्रथमतरमेव स्वकरणैर्निर्वर्तितत्वात् ॥ अथ क्रियाप्रतिषेधमात्रमालम्ब्यते, एवं सति अभावस्य भावप्रतिषेधरूपत्वेऽभ्युपेयमाने अभावं करोतीत्यसमर्थसमासेनोक्तं भावं न करोतीत्ययमर्थः सम्पद्येत, तथा च सति अकर्तुर्नाशहेत्वभिमतस्याहेतुत्वमकारकत्वमिति न विनाशहेतुर्नाम कश्चन सम्भवत्यन्यत्र विनष्टुस्तद्धर्मताया इत्युपसंहारः, वैयर्थ्याच्च न विनाशहेतुरस्ति, यस्य भावस्य विनाशाय विनाशहेतुः कल्प्यते स भावः स्वभावतो नश्वरः स्यान्न

निर्हेतुकनाशपक्षः

१ 'निभाज्यते' इति क-ख-पाठः । २ 'लभ्यार्थक्रिया' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा ? यदि नश्वरः स्वभावत एव भावस्तन्न किञ्चिद् विनाशहेतुनाऽस्य प्रयोजनम्, स्वयं तत्स्वभावतयैव नाशात्, यस्य हि घटादेर्यः स्वभावः स स्वहेतोरेव मृदादिसामग्र्यादिकादुपजायमानस्तादृशो विनाशस्वभावो भवति, न जातुचिद् विनाशे हेत्वन्तरमपेक्षते मुद्गरादिकम्, तत्स्वभावो ह्यात्मलाभानन्तरं स्वयमेव भवत्यन्यथा तत्स्वभाव एव न स्यात्, यश्च यत्स्वभावः स स्वनिष्पत्तिहेतुमपहाय हेत्वन्तरं नापेक्षते प्रकाशादिवत्, प्रकाशादयो हि प्रकाशादिस्वभावाः स्वहेतोरुत्पन्नाः सन्तः पुनरुत्पत्तेः पश्चात् प्रकाशादिस्वभावतायां स्वजन्मव्यतिरिक्तं न हेत्वन्तरमपेक्षन्ते ॥ अथ नैव स्वभावतो नश्यति भाव उत्पन्नः ततः पश्चादपि न नश्येदनश्वरस्वभावत्वात् । न च तादृशोऽर्थक्रियासु सामर्थ्यं सम्भाव्यते । तदेतदयुक्तं स्वगोष्ठरमणीयं प्रकाशनमात्रत्वात्, न ह्यनुपपत्तिकमभिधीयमानं विचित्रमपि प्रतिपत्तुमुत्सहन्ते विद्वांसः, प्रकृत्यैव भङ्गुराः सर्वभावा विनाशहेत्वयोगादित्यसिद्धता हेतोः, यस्मादयं विनाशः कदाचिदेव भवत्युपजननक्षणोत्तरकालं नोपजननक्षण एव, उपजननक्षणश्चात्मलाभकालस्तत्र विनाशाभावात् कादाचित्कत्वं विनाशस्य निर्हेतुकविनाशवादिनोऽपि प्रसिद्धम्, न ह्यलब्धात्मलाभं वस्तु विनश्यति, व्योमकुसुमादीनामपि विनाशप्रसङ्गात्, ये च कादाचित्काः पटादयस्ते प्रतिविशिष्टहेतुजन्या एव दृष्टास्तथा विवादास्पदास्कन्दी विनाशोऽपि प्रागविद्यमानः पश्चादात्मलाभहेतुमपेक्षमाण एवात्मानमासादयति ॥ ननु चैवमभ्युपेयमाने विनाशस्यापि हेतुमत्त्वात् पटादेरिव विनाशेन भवितव्यम्, असत्त्वाच्च निष्कारणो विनाशः खकुसुमादिवदित्यनुमानविरोधिनी प्रतिज्ञेयं कारणवान् विनाश इति । अत्रोच्यते—पूर्वावस्थाप्रच्युतिरुत्तरावस्थोत्पत्तिः उत्तरावस्थापत्तिश्च पूर्वावस्थाप्रच्युतिः, अयमेव विनाशशब्दवाच्योऽर्थो नात्यन्ताभाव इति प्राक् प्रत्यपादि प्रपञ्चेन, ततश्च विनाशस्यापि विनाश इति प्रसिद्धमेव प्रसाध्यते, विनष्टे च विनाशे पुनरवस्थान्तरोत्पत्तिक्रमवृत्त्या न किञ्चिदनिष्टमस्ति स्याद्वादप्रक्रियायाम्, अत एव चासत्त्वान्निष्कारणो विनाश इत्येतदप्यपास्तमेव, असत्त्वस्यासिद्धतादिदोषाघ्रातत्वात्, न चावश्यं सर्वेणैव हेतुमता विनष्टव्यम्, अस्मत्पक्षे स्वात्मावस्थानलक्षणस्य मोक्षस्य सम्यग्ज्ञानादिहेतुकस्याप्यविनाशाभ्युपगमात् । यद्यपि सम्यग्ज्ञानादिर्हेतुः[1] कर्मक्षपणाभ्युपायस्तथापि स्वात्मावस्थानस्य कर्मक्षयरूपत्वाददोषः, विनाशवान् विनाश इति चाभ्युपयतः सौगतस्याभ्युपगमविरोधः । निष्कारणविनाशवादी चेदं प्रष्टव्यः—किं निष्कारणत्वान्नित्यो विनाशः उतासन्निति ? । तत्र यदि नित्यः, कार्योत्पादाभावप्रसङ्गः, द्वितीयविकल्पे विनाशाभावात् सर्वपदार्थानां नित्यत्वप्रसङ्गः । न चासन् सर्व एव निष्कारणः, स्तम्भकुम्भादीनामसत्त्वेऽपीतरेतरात्मना[2] हेतुमत्त्वमस्तीत्यनेकान्तात्, यथा[3] चानादित्वात् प्रागभावो निर्हेतुकोऽपि विनश्यत्येवं विनाशोऽसन्नपि हेतुमान् किमिति नेष्यते ? । एवं द्रव्यपर्यायात्मकप्रक्रियाप्रपञ्चे विश्वमुखे सर्वमेवैकान्तवाद्युत्प्रेक्षितमसाधनमेव जायते स्या-

सहेतुकता नाशस्य

---

१ 'दिहेतुः' इति ग-पाठः । २ ' पीतरात्मना' इति ग-पाठः । ३ ' यथा वा' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वादिनं प्रति, विनाशे च सहेतुके प्रतिपादिते यदुक्तं–मुद्गरादेरसामर्थ्यं विनाशकरणं प्रति तदयुक्तम् । अस्त्येव हि सामर्थ्यं तद्भावभावितया कपालाद्युत्पत्तेः, विकल्पत्रयं च सुकुमारप्रज्ञेन प्रमाणविचारपरिक्लेशासहिष्णुना यथाकथञ्चिदुपन्यस्य प्रथमविकल्पोऽतिस्थूल इत्येवोपेक्षितो मनागागतत्रपेण, तथा द्वितीयविकल्पः स्वभावान्तरं किल क्रियते विनाशहेतुना, घटतादवस्थ्ये तु सकलघटनिष्पाद्यजलधारणादिक्रियाप्रसङ्ग इति शापदानमुद्घोषि। एतच्च विकल्पद्वयं न जाने किं प्रथमतरमेव मायासूनुनोत्खातमुत्पन्नसर्वार्थज्ञानेनाहोस्विद् भिक्षुवरधर्मकीर्तिनैव स्वयमुत्प्रेक्षितमिति यत् सत्यं विस्मिताः स्मोऽनया वाचोयुक्त्या, किं विनाशहेतुर्घटमेव करोति उत स्वभावान्तरमिति ? यद् विनाशहेतुना क्रियते तदेवैकं न व्यपादेशि गलितधिषणेन, घटविनाशहेतुर्घटविनाशमेव करोति, स चोक्तोऽवस्थान्तरापत्तिलक्षणः[1] प्रथममेव, अभावविकल्पेऽपि पर्युदासाभ्युपगमे किल विवक्षिताद् भावादन्यं भावमेव करोति, ततश्च पूर्ववद् व्यतिरेकाव्यतिरेकविकल्पानतिक्रमः, व्यतिरेकाव्यतिरेकविकल्पौ च विहितप्रतिक्रियौ प्राग् विकल्पाभासत्वाच्चायुक्तौ, प्रसज्यप्रतिषेधपक्षे त्वभावं करोति, भावं न करोतीति वाक्यार्थः, तदेतदयुक्तम्, असत्प्रक्रियानवबोधात्, जैनी प्रक्रिया द्रव्यपर्यायावुभौ वस्तु भावाभावस्वभावं, न चाभावः कश्चिद् भावान्निर्लुठितः सम्भवति यं विनाशहेतुः करिष्यति, न चास्ति काचित् क्रिया द्रव्यादत्यन्तव्यतिरिच्यमानस्वभावा यस्याः प्रसज्यप्रतिषेधेन निवारणा क्रियेत, द्रव्यमेव हि तथोद्भूतपरिणामं क्रियाव्यपदेशमश्नुते द्रव्यनयस्य, पर्युदासो हि विधिरूपत्वाद् द्रव्यास्तिकः, इतरः पर्यायनयः प्रतिषेधमात्रत्वात्, एतौ च परस्परापेक्षावेव च वस्तु नैककौ, ततश्च विभागाभावादसद्विकल्पता[2] । अपिच भावो वस्तु परिनिष्पन्नं, तस्य कुतः कारणेनाभिसम्बन्धः ? पूर्वोत्पादार्थत्वात् करोतेः, अथ प्रेष्टुं[4] कुर्वित्युपचारः, तथापि यत् किञ्चिद् भावस्य करणम्[5], अभावश्चापरिनिष्पन्नमवस्थान्तररूपं वस्तु, तन्निष्पादनाय यत्नः क्रियते, तच्च नात्यन्तमसन्न सर्वथा सदित्यभावविशिष्टस्यैव वस्तुनो वस्तुत्वात् । यदप्युक्तं–वैयर्थ्याच्च न विनाशहेतुरिति तदप्यसमीक्षिताभिधानम्, असत्प्रक्रियानवगमात् । वैस्रसिकः प्रायोगिकश्च द्विधा विनाशः, तत्र प्रायोगिकः कादाचित्कत्वात् पटादिवत् सहेतुकः, न च दृष्टमपह्नोतुं शक्यं, प्रमाणतः पदार्थस्वरूपावबोधात्, आत्मलाभसमनन्तरमेव च सर्वथा विनश्यन्ति पदार्था इति न किञ्चिदस्मिन्नर्थे प्रमाणमस्ति, कालान्तरावस्थायिनि च विनाशे प्रत्यक्षबुद्धेर्व्यापारः । यच्चावाचि–प्रकाशादयो लब्धात्मलाभाः प्रकाशादिस्वभावतयां स्वजन्मैवापेक्षन्ते, नापरं हेत्वन्तरम्, एतदप्यसङ्गतम्, यदि प्रकाशादय उत्पन्नाः पुनरुत्पत्तौ हेत्वन्तरं नापेक्षन्त इति वाक्यार्थः ततः किं केन सङ्गतम् ? न ह्युत्पन्नः पदार्थस्तेन रूपेण पुनर्हेतुमभिलषति, लब्धात्मलाभः कालान्तरे हेतुमपेक्ष्य विनश्यतीति जागर्[6]द्यामहे ॥ ननु च स स्वहेतोरेवोत्पद्यमानस्तादृशो भवति येनोत्पत्तिसमन-

---

१ ' लक्षणात् प्रथम' इति क-ख-पाठः । २ ' कल्पासत्वात्' इति क-ख-पाठः । ३ ' कल्पना ' इति क-पाठः । ४ ' पृष्टं ' इति ग-पाठः । ५ 'कारणं' इति क-ख-पाठः । ६ 'जगद्यामहे ' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्तरमेव विनश्यतीति, अयुक्तमिदम्, प्रतिज्ञामात्रत्वात्, वयमपि ब्रूमः—स स्वहेतुरेव तादृश उपजायते येन कालान्तरमवस्थाय विनश्यतीति, अत्र च पक्षे प्रत्यक्षाद्यपि प्रमाणं सहायीभवति ॥ ननु च निष्कारणविनाशवादिनामियं युक्तिः—" नष्टा चेन्नाशविघ्नः कः ? न चेन्नैव विनङ्क्ष्यति" इति, प्रतिकृतविधानैषा युक्तिः, "प्रागभूतात्मलाभत्वान्नाशः कारणवान् भवेत्" इति । स्वभावश्च वस्तुनो धर्मः परिणतिविशेषः, स च कश्चित् सादिवर्णादिपरिणामः, कश्चिदनादिः सत्तामूर्तत्वामूर्तत्वापरिणाम इति, अतोऽनेकान्तेनैव यो यत्स्वभावः स सर्वदा तत्स्वभाव एव कदाचिन्नश्यति कदाचिदवतिष्ठते कदाचिदुत्पद्यत इत्यलमतिप्रसङ्गेन । स्थितमिदम्—प्रायोगिकोऽप्यस्ति विनाश इति । एतेऽवस्थित्युत्पादविनाशास्त्रयोऽप्येककालाः विभिन्नकालाश्च परस्परतोऽनर्थान्तरमर्थान्तरं च, तत्रोत्पादविनाशयोरेककालतायां सिषाधयिषितायां स्वात्मत्वापृथग्भावः कारणम्, नहि उत्पादविनाशयोः स्वात्मा भिद्यते, यथैकस्मिन्नेकक्षणवर्तिनि रूपे विभागाभावात् स्वात्मलाभकाल एवैकः कालो नान्यः समस्ति, यच्चैककालं न भवति तदेकमपि नियमेन न भवति, यथा गवाश्वयोर्जन्मविनाशाविति । एवमुत्पादविनाशयोरेककालता, एवमुत्पादविनाशाभ्यां द्रव्यमभिन्नकालं साध्यम्, तथोत्पादविनाशौ द्रव्यादभिन्नकालौ ताभ्यामेव हेतुदृष्टान्ताभ्यां वाच्यौ ॥ ननु चैकान्तवादी स्वात्मत्वापृथग्भूतत्वमुत्पादविनाशयोर्न प्रतिजानीते, तत्प्रसाधनाय परिकरः सर्पद्रव्यस्यात्मन्युत्पतनाकारेणोत्पादः, तस्यैवात्मनि पतनाकारेण विगमः, सर्पद्रव्यात्मैवोभयाकारः नहि सर्पात्मा भिद्यते, न चेद् भिद्यते ततः सर्पस्वभावतैव, अत एवानर्थान्तरताऽपि ग्राह्या, अनर्थान्तरमुत्पादविनाशौ परस्परावधिकौ, तत्प्रतिपत्तेरभिन्नकालत्वात्, तस्योत्पादस्यारम्भो विशिष्यते अभिन्नकालत्वेन। केन सहाभिन्नकाल इति चेत्, सामर्थ्याद् विनाशेन,यस्माद् विनश्यतो हि योऽन्त्यक्षणो यश्चोत्पादस्याद्यक्षणस्तदेतावुत्पादविनाशावेककालावनर्थान्तरं च, यदि चान्यो विनाशकालः स्यात् पूर्वस्यान्यश्चोत्पादकालः स्यादुत्तरस्य, ततः प्रागेतनं विनष्टमुत्तरमनुत्पन्नम्, एवं च वस्तुशून्यः कालो भवेन्निर्बीजं चोत्तरमुत्पद्येत, तस्मादभिन्नकालावनर्थान्तरं च ताविति । यथैकक्षणवर्तिनो रूपस्यैकत्वादेव तत्प्रतिपत्त्यभिन्नकालतेत्येतत् प्रतिपादयति । अन्यस्य ह्यन्येन भिन्नकालता सम्भाव्येत, न पुनस्तस्य तेनैवेति वाक्यार्थः । एवमितरत्रापि द्वयेऽनर्थान्तरता भावनीया, हेतुदृष्टान्तौ तु तावेव । नैगमनयाभिप्रायेण तूत्पादविनाशद्रव्याणां भिन्नकालता, उत्पादो हि प्रागभावः, स च द्रव्यधर्मत्वाद् द्रव्यवृत्तिः, प्रध्वंसाभावोऽपि विनाशः सोऽपि द्रव्यधर्म एव, द्रव्यमपि द्रव्यात्मरूपमजहत् स्वात्मनि वर्तते, ततश्चोत्पद्य कञ्चित् कालं स्थित्वा प्रध्वंसाभावाद् विनश्यति, एवं भिन्नकालाः प्रत्येकात्मकालवृत्तित्वात् परस्परविभिन्नात्मानोऽर्थान्तरभूता इतियावत्, पटव्योमादीनां चात्यन्त-

---

१ ' सादिपरिणामः ' इति क-पाठः । २ ' एतेन च ' इति क-ख पाठः । ३ ' स्वत्मतत्वा ' इति क-पाठः । ४ ' रूपेण ' इति क-पाठः । ५ ' प्रध्वंसद् ' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृथग्भूतरूपाणामत्यन्तभिन्नकालानां च नैकत्वं दृष्टम्, यो वाऽद्य जनित्वा म्रियते यश्च वर्षशतं जीवित्वा मरणमनुभवति न तयोस्तुल्यकालता युक्ता, तथा न घटोत्पादकाल एव विनाशकालः, क्रियाफलानाश्वासप्रसङ्गात्, यदि घटरूपनिर्वृत्त्यनन्तरमेव घटस्य विनाशः ततः क्रियाफले घटे स्यादनाश्वासः, विनष्टेन तेन घटकार्याकरणात्, तस्माद् भिन्नकालावुत्पादविनाशौ। तथाऽर्थान्तरमुत्पादस्थितिभङ्गाः परस्परतः स्वलक्षणभेदात्, आत्मलाभात्मावस्थानात्महानिस्वभावाः खल्वेते, यत्र च स्वलक्षणभेदस्तत्रार्थान्तरता दृष्टा घटपटादिषु, यत्र चानर्थान्तरता न तत्र स्वलक्षणभेदः, यथैकलक्षणवर्तिनि रूप इति। एवं भिन्नाभिन्नकालतोत्पादादीनामर्थान्तरत्वमनर्थान्तरता च स्याद्वादप्रक्रियायां सकलप्रमाणाविरोधिनी सिध्यति, नैकान्तवादेषूत्पादादयः सम्भवन्ति, भेदाभेदादिलक्षणानभ्युपगमात्। तस्मादवस्थितमिदम्—उत्पादव्ययध्रौव्ययुक्तं सदिति ॥ २९ ॥

एवं प्रपञ्चतः सल्लक्षणमुपपाद्योत्तरसूत्रसम्बन्धाय ग्रन्थमुपचिक्षेप भाष्यकारः—

भा०—अत्राह—गृहीमस्तावदेवंलक्षणं सदिति, इदं तु वाच्यं—तत् किं नित्यमाहोस्विदनित्यमिति ?। अत्रोच्यते—

टी०—अत्राहेत्यादि। अत्रावसरे परः प्रश्नयति, प्रतिपादितसल्लक्षणानुमोदनाद्वारेण गृहीमस्तावदेवंलक्षणं सदित्येवंविधस्य सत्त्वमनुमन्यामहे युक्त्यागमभाजः, तावच्छब्दः प्रक्रमावद्योतनार्थः, पूर्वमेव सत्त्वं निश्चेयम्, निश्चिते सत्त्वे पश्चान्नित्यताऽनित्यता च चिन्त्या, एवं लक्षणमस्येत्युत्पादादित्रययोगमुल्लिङ्गयति। इतिशब्दो हेत्वर्थः। यस्मात् सत् तस्मात् इदं तु वाच्यं—तत् किं नित्यमाहोस्विदनित्यमिति ? तुशब्दस्तस्मादित्यस्यार्थमभिधत्ते, तदिति सतः परामर्शः, तत् सत् किं नित्यमनित्यमिति, सप्तसु विकल्पेषु सति सम्भवत्सु प्रश्नद्वयोपन्यासः किमर्थ इति चेत्, उच्यते—द्रव्यास्तिकनयपर्यायास्तिकसम्परिग्रहार्थः, तत्सम्परिग्रहाच्च शेषविकल्पसूचनमवसेयम्, कुतः पुनरियमारेका प्रष्टुः ? उच्यते—सतां नित्यानित्यत्वदर्शनात्, सद् व्योमादि नित्यं दृष्टं सच्च घटादि अनित्यमतः सन्देहः। अथवा आदाविदमुक्तम्—"नित्यावस्थितान्यरूपाणि" (अ० ५, सू० ३) इति तत्रैवं मन्यते—न सर्वं सन्नित्यमरूपग्रहणात् रूपवतस्त्वनित्यत्वमर्थादतो न सत् सर्वं नित्यं नाप्यनित्यमितीष्यतेऽवस्थित्यंशाङ्गीकरणेन रूपवदपि नित्यम्। यथाऽऽह भगवान्—"से[2] जहा णामए पंचत्थिकाया सिया" इत्यादि सूत्रम् ॥ अन्यथा तूत्पादव्ययध्रौव्ययुक्तं सदित्यव्यापि सल्लक्षणं स्यात्, अत इदं तु वाच्यम्—तत् किं सर्वथा नित्यमाहोस्वित् स्थित्यंशसमाश्रयणेनैव नित्यमिति ?। आचार्यस्तु स्थित्यंशमभिप्रेत्याह—अत्रोच्यते ॥

उत्पादादेर्नित्यानित्यत्वे

---

१ 'सल्लक्षण' इति ग-पाठः।

२ अथ यथा नाम पञ्चास्तिकायाः स्यात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रम्—तद्भावाव्ययं नित्यम् ॥ ५–३० ॥

टी०—तदित्यनेनाभिसम्बध्यते सत्, तस्य–सतो भवनं–भावस्तद्भावः, कर्तरि षष्ठी, तदेव हि सत् तथा तथा भवति जीवादि देवादिरूपेण, न जातुचित् सत्त्वत्यागेनान्यथा भवति, तद्भावादव्ययं तद्भावाव्ययम् अविनाशि नित्यं, नित्यग्रहणात् ध्रौव्यांशपरिग्रहः, " नेर्ध्रुवे त्यप् " (सिद्ध० अ० ६, पा० ३, सू० १७) इति वचनात्, स ह्यन्वयी द्रव्यास्तिकांशः सर्वदा सर्वत्र न विच्छिद्यते, सदाकारेणानुत्पत्तेरविनाशाच्च, भावशब्दोपादानात् परिणामनित्यता गृह्यते, कूटस्थनित्यता त्यज्यते, अन्यथा 'तदव्ययं नित्य'मिति सूत्रं स्यात् । यत् तु न केनचिदाकारेण विक्रियते तदनुपाख्यमेव भवेत्, सत्त्वं च सर्वेषामन्वयिनां धर्माणां सूचकम्, पञ्चास्तिकायव्यापित्वात् तु सत्त्वपरिग्रहः, साक्षाज्जीवस्तावत् सत्त्वं चैतन्यममूर्तत्वमसङ्ख्येयप्रदेशत्वं चाजहत् तथातथापरिणामान्न व्यगात् न व्येति न व्येष्यत्यविनाश्यव्ययो नित्य उच्यते, न पुनर्देवादिपर्यायेणाप्यनन्वयिना नित्यता ध्रौव्यमस्य विद्यते, तथा परमाणुद्व्यणुकादिपुद्गलद्रव्यं सत्त्वमूर्तत्वाजीवत्वानुपयोगग्राह्यादिधर्मानपरित्यजद् विवर्तते, न घटादिपर्यायविवक्षया ध्रौव्यम्, धर्मद्रव्यमपि सत्त्वामूर्तत्वासङ्ख्येयप्रदेशवत्त्वलोकव्यापित्वादिधर्मात्यागेनावतिष्ठते, न तु परमाणुदेवदत्तादीनां प्रत्येकं गन्तृत्वस्य विवक्षायां गत्युपकारित्वेन नित्यत्वम्, गन्तृभेदाद्धि गत्युपकारित्वं भिद्यते अन्यादृशाकारेण पूर्वः परिणामोऽन्यादृशेनाकारेण पाश्चात्यः, नहि प्रथमतरमुत्पन्नो गत्युपकारित्वपरिणामः सर्वदाऽवतिष्ठते, स्वरूपव्यतिरिक्तवस्तुसम्बन्धितयोपजायमानत्वाद् घटादिवत्, एवमधर्मद्रव्यमपि द्रष्टव्यम्, स्थित्युपकारितया चानित्यत्वभावना, आकाशं तु सत्त्वामूर्तत्वानन्तप्रदेशवत्त्वादिधर्मद्वारेण नित्यम्, अवगाहकापेक्षयाऽवगाहदातृत्वेनानित्यम्, यत्राप्यवगाहकं जीवपुद्गलं नास्ति तत्राप्यगुरुलघ्वादिपर्यायवत्तयाऽवश्यंतयैवानित्यताऽभ्युपेया, ते त्वन्ये चान्ये च भवन्ति, अन्यथा तत्र न स्वत उत्पादव्ययौ नाप्यापेक्षिकाविति न्यूनमेव सल्लक्षणं स्यात्, इमामेव परिणामनित्यतां भाष्येण दर्शयति—

द्रव्यस्य नित्यता

भा०—यत् सतो भावान्न व्येति न व्येष्यति तन्नित्यमिति ॥ ३० ॥

टी०—यत् सत इत्यादि । सत्त्वादेरन्वयिनोंऽशान्न व्येति न विनश्यति नापि विनङ्क्ष्यति तन्नित्यम्, किं पुनः कारणमप्रवृत्तः कालो नोदाहृतः ? । एवं मन्यते भाष्यकारः—नातीतप्रत्याख्याने वर्तमानः सम्भवति, वर्तमानावधिकमेवातीतत्वम् अतीतासत्त्वे निर्मूलस्य वस्तुनोऽनुत्थानप्रसङ्गात्, तस्मादनादि जीवादि सत्त्वादि, एवं तर्हि भविष्यतो ग्रहणं किमर्थम् ? अत्राप्येवं मन्यते–केचिदविविक्तबुद्धयः प्रत्याख्यापयन्ति न वर्तमानकालावच्छिन्नस्य वस्तुनः कदाचिद् भविष्यत्कालाभिसम्बन्ध इति, तन्निषेधार्थं भविष्यद्ग्रहणम्, अथवा तद्भावेनाव्ययं,

१ 'रिक्तसम्बन्धि' इति क-ख-पाठः । २ 'पुद्गलाद्यनादि तत्रा०' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेन सदात्मना स्थित्यंशेनाविगतं परिणामापत्तौ सत्यामपि स्वभावाप्रच्युतेर्नित्यमुच्यते । तमेव च ध्रौव्यांशमाश्रित्य समस्तास्तिकायेषु नित्यताव्यवहारः प्रतीयते, अथवा भूतिर्भावः स्वात्मेत्यर्थः । स चासौ भावश्च तद्भावः कश्चासौ ? यः सर्वास्ववस्थासु निर्विकारः, शुद्धा द्रव्यास्तिकनयप्रकृतिरविवक्षितसकलभेदग्रन्थिः, अयो-गमनं विरुद्धोऽयो व्ययस्तद्भावस्य च विरुद्धगमनमभावापत्तिः, न व्ययोऽव्ययः, न जातुचित् तद्भावोऽभावो भवतीति वाक्यार्थः, ध्रौव्याभिसम्बन्धाच्च नपुंसकनिर्देशः, तद्भावश्चासावव्ययं च तद्भावाव्ययम्, किं तत् ? प्रकृतत्वादेवंविधविशेषणसामर्थ्याद् ध्रौव्यं नित्यशब्देनाभिधीयते, भाष्ये च यद्यपि भाष्यकृता पञ्चमी प्रदर्शिता विवक्षावशात् तथापि विवक्षितस्यार्थस्याभिन्नत्वात् तृतीयाषष्ठ्योर्न दोषः ॥ ननु च प्रागपि नित्यावस्थितान्यरूपाणीत्यत्र (तृतीये) सूत्रे नित्यग्रहणं ध्रौव्यार्थमेव व्याख्यायि भवता, तत् किमर्थमिदमुच्यते 'तद्भावाव्यये नित्यम्' इति ? अत्रोच्यते—इह नित्यस्य लक्षणमभिधित्सितं, लक्षितेन चेह नित्यत्वेन तत्र व्यवहारः प्रदर्शितः । अपरे त्वेवं वर्णयन्ति—द्वे नित्यते, तत्रैका स्वभावाप्रच्युत्या कालत्रयाव्यभिचारिणी नित्यता, अपरा पारम्पर्यप्रवृत्तिनित्यता, तत्र च प्राच्यां नित्यतामाश्रित्य नित्यावस्थितान्यरूपाणीति पठितम्, परम्परावृत्त्यवच्छेदमधिकृत्योत्पादव्ययध्रौव्यसूत्रमध्यगायीति, एतदपि यत्किञ्चित्, यतस्तद्भावाव्ययं नित्यमित्येकमेव नित्यलक्षणं लक्षणान्तरानभिधानाच्च कथं द्वे नित्यते ? नित्यप्रहसितादिषु दृष्टेति चेत्, तदयुक्तम्, अभीक्ष्णार्थाभिधायित्वादर्थान्तरवृत्तिस्तत्र नित्यशब्दः, तत्त्वविचारप्रस्तावे च न किञ्चिदुपचारेण प्रयोजनम्, अतो व्यवस्थितमेव लक्षणं तद्भावाव्ययं नित्यमिति ॥ एवमन्वय्यंशो नित्यत्वेन लक्षितो द्रव्यनयस्वभावः । पर्यायनयस्वभावौ तूत्पादविनाशावभूतभावभूताभावलक्षणावुक्तन्यायेन स्थित्यंशप्रतिबद्धौ । स्थितिरपि पर्यायप्रतिबद्धा, सर्वदा संसर्गरूपत्वाद् वस्तुनः, एवमेकाधिकरणावुत्पादविनाशौ जैन एव शासने साङ्गत्यमनुभवतोऽन्यत्र तु व्यधिकरणावेवोत्पादविनाशौ नियतौ वेति ॥ नन्वेवमपि यथा तद् द्रव्यमात्मापरित्यागात् तथोत्पादविनाशलक्षणः पर्यायोऽपि आत्मभूतो द्रव्यस्येत्यतः पर्यायनिवृत्तिवद् द्रव्यनिवृत्तिप्रसङ्ग इति । अत्रोच्यते—स्यादेतदेवं, यदि घटादिनिवृत्तौ मृन्निवृत्तिर्दृश्येत, मृन्निवृत्तौ वा पुद्गलनिवृत्तिः, न च दृश्यते मृदोऽन्वयिन्याः पुद्गलजातेर्वा कस्यांचिदवस्थायां निवृत्तिस्तदभिधानप्रत्ययव्यवहार्यत्वात्, घटादिनिवृत्तौ वा यदि न किञ्चित् पश्चादुपलभ्येत श्रद्दधीत विद्वज्जनः पर्यायनिवृत्तौ द्रव्यांशनिवृत्तिः, न च प्रत्यक्षविरोधे तर्कः क्रमत इत्यपकर्ण्यमेतत्, एवमुपपत्त्यागमाभ्यामवस्थितं तद्भावाव्ययं नित्यमिति ॥ ३० ॥

नित्यसूत्रफलम्

द्रव्यपर्यायाभ्यां नित्यानित्यत्वे

एवं सूत्रद्वयेन निरूपिते समस्ते वस्तुन्यर्थाभिधानप्रत्ययरूपे स्थित्युत्पत्तिव्ययस्वभावे पुनर्विस्तरविशेषार्थी पर आरेकते, यद् व्येत्युत्पद्यते च तत् सन्नित्यं चेत्यतिसाहसम्, अथवा न किञ्चिदसदनित्यं वा, सन्नित्यत्वाभ्यां निराकृतत्वात्, ततो लोकव्यवहारोच्छेदः, तदेतद्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुरुपपादत्वात् दुःश्रद्धानत्वाच्चासङ्गतम्, नित्यता ह्युत्पादव्ययौ विरुणद्धि, उत्पादव्ययौ च नित्यतां विरुन्धाते, सोऽयं छायातपवदसहावस्थानलक्षणविरोधाघ्रातपक्षो न विद्वज्जनमनांसि प्रीणयतीति, अत्रोच्यते—श्रद्धत्तां भवानुपपाद्यमानं यथा न कश्चिद् विरोधः समस्ति, यथा चात्रैव लोकव्यवहारसङ्गतिर्द्रव्यास्तिकपर्यायास्तिकनयसम्भवेऽन्यतरप्रधानगुणभावविवक्षाप्रापिते उभे अपि सन्नित्यत्वे तत्प्रतिपक्षभूते वाऽसदनित्यत्वे ॥

सूत्रम्—अर्पितानर्पितसिद्धेः ॥ ५-३१ ॥

टी०—अपरेऽन्यथाकारं सूत्रसम्बन्धमभिदधते, ध्रौव्यस्य नित्यपर्यायत्वेन लक्षणमुक्तमुत्पादव्ययौ रुच्यताम्, नोच्यते, तयोर्लोकप्रतीतत्वात्, सामर्थ्यगतेश्चासदनित्यत्वादीनाम्, अतस्तल्लक्षणं न साक्षाद् वाच्यम्, किं कारणम् ?

भा०—अर्पितानर्पितसिद्धेः ॥

टी०—अर्पितं निदर्शितमुपात्तं, तद्विपरीतमनर्पितम्, सिद्धिः—ज्ञानम्, अर्पितेनानर्पितपरिज्ञानमर्पितानर्पितसिद्धिस्तस्याः—ततो हेतोरर्पितानर्पितसिद्धेः, विशेष्यं हि वस्तु नीलोत्पलादिवदुपादीयमानं नियमकारिविशेषणधर्मप्रत्यनीकपर्यायाश्रयतामनुभवत्येवेति न्यायात्, एवमिहापि ध्रौव्यलक्षणेऽर्पितेऽनर्पितावपि साक्षात् तद्विपरीतावुत्पादव्ययौ सङ्गंस्येते, पूर्वमुत्तरं च पर्यायं ध्रौव्यमासादयति, न तूत्पादलक्षणः पर्यायो विनाशलक्षणो वा पूर्वोत्तरपर्यायानुभावी, तस्माद् विलक्षणावुत्पादव्ययाविति सुज्ञानम्, एवं सम्बन्धद्वयमभिधाय सूत्रार्थोऽभिधीयते, पूर्वकं सम्बन्धमाश्रित्येदं भाष्यम्—

अर्पितानर्पितस्वरूपम्

भा०—सच्च त्रिविधमपि नित्यं चोभे अपि अर्पितानर्पितसिद्धेः ॥

टी०—चशब्दः समुच्चये, अपिः सम्भावने । सत् त्रिविधमुत्पादव्ययस्थितिलक्षणम्, नित्यं च द्वितीयसूत्रोक्तमुभयमप्येतदर्पणानर्पणाभ्यां सिद्धमव्याहतम् अनेकधर्माधर्मी, तत्र प्रयोजनवशात् कदाचित् कश्चिद् धर्मो वचनेनार्प्यते—विवक्ष्यते, सन्नपि च कश्चिन्न विवक्ष्यते प्रयोजनाभावात्, न पुनः स धर्मी विवक्षितधर्ममात्र एव । इत्यतः सत्पर्यायविवक्षायां सदुत्पादादिस्थित्यंशविवक्षायां नित्यमसदप्युत्पादाद्यनित्यं च, सत्त्वासत्त्वविशिष्टग्रहणात् सर्वदा वस्तुनः येन प्रमाणेन यद् वस्तु सद्विशिष्टं गृह्यते, तेनैव प्रमाणेन तदेव तदैव वाऽसद्विशिष्टमपि गृह्यते, अन्यथा त्वविविक्तग्रहणमेव स्यात्, विविक्ताश्च चक्षुरादिबुद्धयोऽनुभूयन्ते । यथैव हि स्वास्तित्वात् सद्विशेषणोल्लेखेन सद्बुद्धिरभिधावति, एवं असद्विशेषणावष्टम्भजनिताऽपीति ॥ न चोपहतेन्द्रियस्याव्यापृतेन्द्रियस्य वा वस्त्वन्तराभाववविशिष्टं ग्रहणमुपजायते तत इन्द्रियव्यापारे सति भावादसद्विशिष्टस्य ग्रहणस्य नापह्नवो यु-

विवक्षामुख्यता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्यते, यथा प्रकाशकाः कृशानुभास्करादयः प्राकाश्यं वस्त्वन्तराभावविशिष्टमेव प्रकाशयन्ति, एवं प्रमाणमपि वस्तुपरिच्छेदहेतुत्वेन व्याप्रियमाणं वस्त्वन्तराभावविशिष्टमेव प्रकाशयति । प्रमाणं च यथावस्थितवस्तुस्वभावग्राहि । ततः प्रमाणपरिच्छिन्नेनार्थेन यथाप्रयोजनमर्पणादिव्यवहारः । तस्मात् सच्चासच्चैकमेव वस्तु, स्वरूपार्पणयोत्पादः सन् स्थितिविनाशाभावविशिष्टग्रहणादसन्, एवं स्थितिविनाशावपि वाच्यौ । एवं हि त्रिविधग्रहणं समर्थितं भवति ॥ तथा स्वात्मापरित्यागार्पणान्नित्यम्, उत्पादव्ययार्पणात् तदेवानित्यम्, स्थित्यादयश्च सङ्ग्रहादेकीभावाद् वस्तु, न स्थितिरहितावुत्पादविनाशौ, नाप्युत्पादव्ययशून्या स्थितिः, अतः संसर्गलक्षणं वस्त्वेकमेव नित्यं चानित्यं च ॥ ननु चोत्पादव्ययध्रौव्ययुक्तं सदिति त्रिस्वभावमेव सत्त्वेनावधृतम्, भाष्यकारस्तु सच्च त्रिविधमपीत्येव विवृण्वन्नेकैकस्य सत्त्वं प्रतिपादयति, नैष दोषः, अविभक्तेऽपि वस्तुनि स्वभावत्रयाख्यानमन्योन्यापरित्यागद्वारेणैव क्रियते, अन्यथा कथं कथ्येत प्रज्ञापनागोचरः ? । स्थित्यादयो हि परस्परावियोगिनः सर्वदा सदसदात्मका भेदाभेदलक्षणास्तेषु सत्त्वप्रज्ञापना न विरुध्यते, न ह्येकदेशोऽसद्वस्तुनो भवति पटादेस्तन्त्वादिः, अथ नित्यं चेति किमर्थमुच्यते, सद्ग्रहणादेव तद्गृहीतेः पुनर्न किञ्चित् फलमस्ति सद्ग्रहणेनैव ध्रौव्यांशस्य लक्षितत्वात्, सच्च त्रिविधमपीत्येतावदेवाभिधेयमिति, अत्रोच्यते—सत्यमेतदेवम्, तथाऽप्यर्थविशेषप्रतिपिपादयिषया पुनर्नित्यग्रहणं, स विशेषो भाव्यते यदि ध्रौव्यांश एव नित्यः स्यात् न समस्तं वस्तु तत उत्पादव्ययावप्यनित्यौ न वस्तु सकलम्, एवं चान्याधारं नित्यत्वमन्याधारं चानित्यत्वं स्याद् अनिष्टं चैतद् व्यधिकरणत्वात्, यथा प्रवचनबाह्यानां नित्यं व्योमाऽनित्यो घट इति, अत्राप्येवं स्यादन्यन्नित्यमन्यच्चानित्यम्, इष्यते तु यदेव नित्यं तदेवानित्यमिति, तत्राऽमुना पुनर्नित्यग्रहणेन निरंशं वस्त्वपर्यंत एतद्विपक्षेण चानित्यं समस्तमेव वस्तूच्यते निर्विभागत्वात्, एवं हि तत् प्रज्ञाप्यते केवलं श्रोतृबुद्धिव्युत्पत्तये स्थित्यंशोऽयमिमावुत्पादव्ययांशाविति बुद्ध्या विभज्यते, न तु परमार्थतोऽस्ति विभाग इत्येवमैकाधिकरण्यम् । यथाऽऽह—

" अभिन्नांशं मतं वस्तु, तथोभयमयात्मकम् ।
प्रतिपत्तेरुपायेन, नयभेदेन कथ्यते ॥ १ ॥"

यत् तूक्तं नित्यता ह्युत्पादव्ययौ विरुणद्ध्युत्पादव्ययौ च नित्यतां विरुन्धाते, तत् प्रपञ्चयापोद्यते, कः पुनर्विरोधशब्दार्थः ? । किं ययोरेकत्रावस्थानं न दृश्यते तौ विरुद्धावथ यावेकत्र कालान्तरं स्थितौ पश्चादन्यतरविनाश उभयविनाशो वा तौ विरुद्धाविति ? किञ्चातः, यदि प्राच्यः पक्षः कदाचिदपि यावेकत्र न दृष्टाविवं सति वध्यघातकभावलक्षणस्तावदहिनकुलयोरग्न्युदकयोर्वा न विरोधः, यतः संयोगे सत्येककालयोरहिनकुलयोरग्निजलयोर्वा स्थितयोर्वि-

१ ' सत्त्वासत्त्वैकमेव ' इति क-ख-पाठः । २ ' सर्वात्मका ' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रोधः, संयोगस्यानेकाश्रयत्वात् द्वित्वादिवत्, न चासंयुक्तो नकुलः सर्पविनाशे प्रभुः, यदि स्यात् ततः समस्तत्रैलोक्योदरवर्तिसर्पाभावप्रसङ्गः, अग्निजलयोरप्येवमेव भावना, वाडवाग्नेर्वारिधिवारिणश्चैकत्रावस्थानं दृष्टमिति चेत्, हन्त हतस्तर्हि विरोधः, प्रकृतमुच्यते—संयोगे पुनः क्षणमात्रावस्थायिनोरुत्तरकालमेकस्य बलवत्वाद् घातकत्वे सतीतरस्य दुर्बलत्वाद् वध्यत्वे स्याद् विरोधः, न चैवं सदसतोर्नित्यानित्ययोर्वा क्षणमात्रमप्येकत्र वृत्तिस्त्वयाऽभ्युपेयते, गुणविषये संयोगाभावान्नापि समवायवृत्तिर्विरोधाभावप्रसङ्गात्, तस्मान्न नित्यानित्यसदसदादीनामेकवस्त्वाश्रयतायां वध्यघातकभावलक्षणो विरोधः समस्ति, नाप्यसहावस्थानलक्षणो विरोधः, सहि शीतोष्णवत् फलवृन्तसंयोगविभागवदाम्रफलादिषु श्यामतापीततावद् वा, तथाहि शीतपर्यायोऽश्मादीनां प्राग् वा विद्यमानः पश्चादुपजायमानेनोष्णपर्यायेण सह नावतिष्ठते, तथोष्णः शीतेनोपजायमानेन सह विरुध्यते, न चैवं प्रागवस्थितं नित्यत्वमनित्यत्वेन पश्चात्कालभाविना विनाश्यते, तद्धि नित्यत्वमेव न स्यादध्रुवत्वात्, नापि नित्यत्वेनोत्पत्तिभाजा पूर्वावस्थितमनित्यत्वं विनाश्यते, तत् तु नित्यत्वमेव न स्यादुत्पद्यमानत्वात्, अपिच क्षणनश्वरेषु भावेषु न कदाचिदयं विरोधः समस्ति, नहि तत्रानित्यत्वस्य पूर्वमवस्थानम्[1], तेन ह्यनित्यत्वेन नाशिते वस्तुनि निराधारस्य नित्यत्वस्याभाव एव, अवश्यंतयाऽसहावस्थानलक्षणविरोधवादिना तत्रान्यतरस्योत्पद्यमानता अन्यतरस्य च पूर्वावस्थितिरभ्युपेया, अन्यथाऽसहावस्थानलक्षणविरोधवाद्येव न स्यात्, येषामपि किञ्चित् कालं स्थित्वा घटो विनश्यति तैरपीदं वक्तव्यम्—यावदसौ न विनश्यति तावत् किं नित्यः उतानित्य इति ?। नित्यश्चेद् व्योमादिवदनुच्छेदप्रसङ्गः, इतरत्र त्वभावप्रसङ्गः, अवश्यमेव सता नित्येनानित्येन वा भवितव्यमेकान्तवादिनाम्, अनेकान्तवादिनां तूभयस्वभावत्वाद् वस्तुनो न किञ्चिदघटमानकम्, एवमेव फलवृन्तयोः संयोगविनाशे विभाग उपजायते फलादिषु श्यामताऽपैति पीततोत्पद्यत इति विकल्प्य निरसनीयम्, एवमेते विकल्पाः पूर्वकेण विरोधलक्षणेन सङ्गता अपीह स्यात्कारोपलाञ्छनप्रक्रियायां न सम्भवन्ति । अपिचैकत्रावस्थानं न दृश्यत इति किमेकस्मिन् धर्मिणि नास्ति, यद्येवं ततोऽसिद्धता, दृष्ट एक एवाश्मा शीतश्चोष्णश्च । अथ यत्र देशे शीतो न तत्रैवोष्ण इति, एतदप्यसत्, नहि शिशिरस्पर्शमुदकं भिन्नदेशवर्त्यसंयुक्तमेवाग्निं विध्यापयति, संयोगश्चैकदेशवर्तित्वे जलानलपरमाणूनां सिद्ध्यति, अन्यथा च त्रैलोक्येऽप्यन्यभावप्रसङ्गः, सति च संयोगे क्षणमात्रावस्थानमेकत्र दृष्टमेव तदा कुतो विरोधः ?। उत्तरकालमदर्शनाद् विरोध इति चेत्, अत एव कदाचिद् विरोधः कदाचिदविरोध इति स्याद्वादाश्रयणमपदोषम् ॥ अथैकस्मिन्नेवाग्निद्रव्ये उष्णतानुष्णते युगपन्न स्तः, इत्येतदप्यसारम् । यतः स्पर्शपर्यायेणाग्निरुष्णोऽभिधीयते रूपपर्यायेण त्वनुष्ण

नित्यानित्यत्वयोः सहावस्थानविरोधाभावः

---

१. 'पूर्वावस्थानम्' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एव । अथोष्णस्य प्रतियोगी शीत एवानुष्ण इति गृह्यते, रिक्तं शक्यमेतदपि, अनुष्णाशीतस्याप्युष्णग्रहणे प्रतिक्षिप्यमाणत्वात्, तस्मादुष्णपर्यायोऽनुष्णपर्यायेण प्रतिपक्षेण सहैकत्रैकदा च दृष्ट इति । न च वध्यघातकासहावस्थानविरोधयोर्विशेषः कश्चिदस्ति, अहिनकुलयोर्हि संयोगे योऽहेर्[1]जीवनपर्यायः स मरणपर्यायेण सह नावतिष्ठते इत्यसहावस्थानलक्षण एव विरोधः, तथाऽग्निजलयोः सति संयोगे कदाचिदुष्णपर्यायस्य शीतपर्यायेण सहानवस्थानं बहुजलमध्यप्रक्षिप्तस्यैकस्याङ्गारशकलस्य, कदाचिच्छीतस्यानवस्थानं प्रवृद्धज्वलनज्वालाप्रतप्तवारिणीति । वध्यघातकलक्षणः प्राणिविषय इति चेत्, न, असहावस्थानलक्षणस्यापि कस्यचित् प्राणिविषयत्वेन दर्शनात् ॥ अथैककालविषययोर्वध्यघातकविरोध इति चेत्, न, असहावस्थानलक्षणेऽपि विरोधे यदा श्यामताऽपैति पीतता चोत्पद्यते तदा विगमप्रतिपत्त्योरेकः कालोऽतः शब्दार्थोऽपि न सङ्गच्छते सहानवस्थानमिति, तस्मान्नास्ति विरोधः ॥

अथ द्वितीयपक्षमाश्रयते—कालान्तरावस्थायित्वे सति दृष्टयोरेकत्रान्यतरस्यानवस्थानमुभयानवस्थानं वा विरोध इति, सोऽप्यसङ्गतः, कालान्तरावस्थायितायामेकत्र तावन्न विरोधः । उत्तरकालमनवस्थानोपलब्धेर्विरोध इति चेत्, एवं सति न कस्यचित् स्त्रीमनुष्यबलीवर्दादेर्विरोधः स्यात्, तस्मादुपेक्ष्यः । नापि प्रतिबन्ध्यप्रतिबन्धकभावलक्षणो विरोधः सदसतोर्नित्यानित्ययोर्वा, अभिन्नकालमेकत्रात्मद्रव्ये किल धर्माधर्मावुभावपि स्तः, तयोश्चैकस्य प्रधानभावोऽन्यस्य गुणभावः, प्रधानगुणभावे चैकत्र द्वयमप्यस्तीति को विरोधः ? ॥ अथैवं मन्येथाः—धर्मस्य फलमधर्मफलेन प्रतिबद्धमधर्मफलं च धर्मफलेन प्रतिबद्धमेष विरोध इति, यदैकस्य प्रधानभावस्तदैव न तस्य गुणभावः, प्रधानता चोद्भूतविपाकावस्थया गुणभावोऽप्यनुद्भूतविपाकावस्थयेति, एतदप्ययुक्तम्, यस्मादेकत्रात्मन्येकदा धर्माधर्मफलोपभोगोऽभ्युपगम्यत एव जैनेन्द्रैः, धर्माधर्मौ पुण्यापुण्यलक्षणौ, पुण्यापुण्ये च पुद्गलात्मके, पुद्गलाश्च ज्ञानावरणादिभेदेन परिणताः, कर्म चतुर्विंशत्युत्तरप्रकृतिशतभेदम्, तत्र कर्मप्रकृतीनामशीतिर्[2]व्यधिका पापमपुण्यमधर्म इति संज्ञाता, चत्वारिंशत् द्व्यधिका तु पुण्यं धर्म इति, तत्र कासाञ्चित् प्रकृतीनां पुण्याख्यानां पापप्रकृतीनां च युगपद् विपाकाभ्युपगमे कुतः प्रतिबन्ध्यप्रतिबन्धकभावलक्षणो विरोधः ? । अथापि स्यात् कासाञ्चित् प्रकृतीनां प्रतिबन्ध्यप्रतिबन्धकभावो यथा नरायुषः सुरायुषश्चैकदैकत्र विपाकाभावः, तत्रापि न कर्मणः सहावस्थानमनिष्टम्, किं तर्हि ? विपाकपर्याययोरसहावस्थितिः, नरायुर्विपाकपर्यायः सुरायुषो विपाकेन सह नावतिष्ठत इत्यसहावस्थानलक्षण एव, विगम[3]प्रतिपत्त्योश्चैककालत्वाज्जातुचित् सहावस्थानमपीति । उपेत्य वा ब्रूमः—अस्त्वयं विरोधः प्रस्तुते वस्तुनि, न कश्चिद् दोषः, इष्यत एव

एकत्रानवस्थानादिविरोधखण्डनम्

१ योऽहिर्जीवन' इति क-पाठः ।

२ बन्धे विंशत्युत्तरशतभावेऽपि प्रशस्तेतरवर्णचतुष्कप्रहात् अधिकाश्चतस्रोऽत्र ।

३ नरायुषो विगमः सुरायुषः प्रतिपत्तिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यपर्याययोरन्यतरस्य गुणप्रधानभावः, कदाचिद् द्रव्यं विवक्ष्यते, न पर्यायः, कदाचित् पर्यायो विवक्ष्यते, न द्रव्यम्, उभयं तु सम्भवति, त्वयाऽप्येककालयोरेव प्रतिबन्ध्यप्रतिबन्धकभावोऽभ्युपेयते, अन्यथा स एव न स्यात् प्रतिबन्धः, अतो न कश्चिद् विरोधः । सदसतोर्नित्यानित्ययोर्वा भिक्षुवरधर्मकीर्तिनापि विरोध उक्तः **प्रमाणविनिश्चयादौ** स पुनरयं विरोधः कथं गम्यते, क्वचिदविकलकारणस्य भवतोऽन्यभावेऽभावाद् विरोधगतिर्भवति, यथा शीतोष्णस्पर्शयोरसहावस्थानम्, अन्योन्यपरिहारस्थितिलक्षणतया वा विरोधो नित्यानित्यवत्

धर्मकीर्तिमतखण्डनम्

अन्योन्यं परस्परं व्यवच्छेदः—परिहारस्तेनान्योन्यपरिहारेण स्थितिर्लक्षणोऽन्योन्यव्यवच्छेदरूपः, परस्परपरिहारस्थितिलक्षणतया च विरोधिनोर्नित्यनित्ययोरेकपरिग्रहोऽपरत्यागनान्तरीयकः एकत्यागोऽप्यपरपरिग्रहाविनाभावी, तथा भावाभावयोरेकत्राभावः, एष च प्रतियोगिव्यवच्छेदरूपः सामयिकोऽसहावस्थानभेद एव, पूर्वकस्तु शीतोष्णस्पर्शयोश्छायातपयोः प्रकाशतमसोश्च दृश्यात्मनोः परिनिष्पन्नयोरेकत्राभावादनुपलब्धिलक्षण इत्येतावान् विशेष इति । अत्रोच्यते—तार्किकापशब्देन न किञ्चिदत्रातिरिक्तमपदिष्टम् ॥ यदप्यपादेशि तदप्यसमीचीनम्, यतोऽसहावस्थानलक्षण एव विरोधो द्विधा कल्प्यते, नामैव च लक्षणं, न सहावस्थानं लक्षणं यस्य विरोधस्येत्यनेनैव शीतोष्णस्पर्शयोरिव नित्यानित्यविरोधस्यापि सङ्गृहीतत्वाद्[3] भेदेनाभिधाने प्रयोजनाभावाद् दुर्विदग्धतामात्रमेवावशिष्यते भिक्षुवरस्य । स्यादियमारेका, दृश्यपरिनिष्पन्नयोः प्राच्यः, इतरः परिकल्पितरूपयोः स्वसामान्यलक्षणविषयत्वेन भेदप्रकाशनमिति, एतदप्यसङ्गतम्, स्वलक्षणभेदानामानन्त्यात् परिकल्पबहुत्वाच्च कुतो द्वैविध्यम् । अपिच नित्यता भवतु परिकल्पः, अनित्यता पुनः संस्कृतलक्षणम्, " उत्पत्तिः स्थितिर्जराऽनित्यते"ति वचनात् । दिग्नागेनाप्युक्तम्, "नित्यसमायां जातौ स एव तु भावोऽभूत्वा भवन् भूत्वा वाऽभवन्नित्य इत्युच्यते, सा चावस्था भावप्रत्ययेनानित्यते"ति, एवं च न नित्यानित्ययोः सामान्यलक्षणयोर्विरोधः, नापि स्वलक्षणासामान्यलक्षणयोः, स्वलक्षणोपादानत्वात् सामान्यलक्षणस्य, परिकल्पितयोश्च खरतुरगविषाणयोर्विरोध इत्यद्भुतमपश्यद् भिक्षुवरः, तस्मात् स्वलक्षणविषय एव विरोधोऽस्तु, तत्रापि न स्वलक्षणमित्येव विरोधः, किन्तु द्रव्याणां द्विविधाः पर्यायाः—क्रमभुवः सहभुवश्च, युगपदवस्थायिनोऽयुगपदवस्थायिनश्च, सूक्ष्माः स्थूलाश्च, साध्याः साधनानि चेति, व्यापृताश्चाव्यापृताश्च, यथा घटे सद्द्रव्यमूर्तचेतनरूपरसगन्धस्पर्शसङ्ख्यासं-

---

१ लक्षणाऽन्योन्यव्यवच्छेदरूपाः ' इति क-ख-पाठः । २ स्पर्शयोर्नित्यानित्य ' इति क-ख-पाठ ।

३ नित्यमित्युक्तेऽनित्यतापरिहारस्यावश्यकत्वात् शीतोष्णसमानता तत्त्वतस्तु अवयवभेदेन कालादिभेदेन वा न क्वापि विरोधः ।

४ ' वा ' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्याणां पर्यायाणां द्वैविध्यम्

स्थानादयः सहभुवो युगपदवस्थायिनः, स्थूलाः सूक्ष्माश्च साधनानि साध्यानि च कार्यवशाद् व्यापृताश्चोदकाद्याहरणादिषु मृत्पिण्ड-शिवक-स्थासक-कोशक-कुशूल-घट-कपाल-शकल-शर्करा-पांशुत्रुटिपरमाणवः क्रमभुवः, नहि मृदादिसामान्यव्यतिरेकेण पिण्डादिधर्मा भवितुमुत्सहन्ते, न ह्यङ्गुलिभेदेनर्जुकुटिलतयोः सम्भवः, सैव हि साङ्गुलिः स्वाँस्तु धर्मान् पारम्पर्यमात्रप्रतिलब्धवृत्ती क्रमेणोन्नमयति, मयूराण्डकरसवदुपारूढस्वरूपाख्येति वचनात् । एत एवासहावस्थायिनः सूक्ष्माः स्थूलाश्चापेक्षया नित्यानित्यादयः साध्याः साधनानि चाव्यापृता उदकाद्याहरणादिषु, तेषां को नामायं विरोधः ? ॥ ननु सहानवस्थानम्, तन्न, सहोत्पादावस्थानदर्शनादेकद्रव्यवृत्तित्वाच्च, द्रव्यमेव चक्षुरादिग्रहणापदेशविशेषाद् रूपादिव्यपदेश्यमेकपुरुषपितृपुत्रत्वादिवत्, न च रूपादीनां समुदायैकरूपताऽभ्युपगमनीया, रूपग्रहणे रसादिग्रहणप्रसङ्गादिन्द्रियान्तरवैयर्थ्यसङ्करादिदोषप्रसङ्गाच्च । न चाभावता, प्रमाणाभावात् प्रसिद्धिविरोधाच्च। स्वलक्षणविरोधोऽपि नास्त्येव, सामान्यविशेषात्मैकलक्षणत्वात् स्याद्वादिपरिगृहीतस्य वस्तुनः, जात्यन्तरत्वाच्च नरसिंहवदेकान्तवादिपरिकल्पिताद् वस्तुन इति । स्यात् तु क्रमजन्मनां धर्माणामसहावस्थायिनां देवमनुष्यादीनां मृत्पिण्डशिवकादीनां च विरोधोऽसहावस्थानलक्षणः, सोऽपि द्रव्यास्तिकनयप्राधान्यादभेदे विवक्षिते पर्यायाणां द्रव्यव्यतिरेकेणानभ्युपगमान्नास्तीति न कश्चिद् विरोधोऽस्ति स्याद्वादिनः, तमःप्रकाशच्छायातपशीतोष्णविरोधोदाहरणनिरास उक्तविधिनाऽवगम्यः, द्रव्यार्थतो नित्याः पुद्गलाः तमस्तया च क्रमजन्मानः परिणमन्ते पर्यायाः, सामान्यस्याभिन्नत्वादेकरूपा एवेति कः केन विरुध्यते ? । इत्थमर्थस्य सामान्यविशेषात्मैकरूपत्वेऽन्योन्यापेक्षित्वेऽनेकान्तात्मकत्वे एकान्तवादिपरिकल्पिताज्जात्यन्तरत्वे च न कश्चिद् दोषः, तथा स्थित्यंशस्य नित्यत्वादुत्पादव्ययानित्यत्वादुभयस्याभिन्नस्वभाववस्तुतायां कथमिदं घटते नित्यानित्ययोरेकपरिग्रहोऽपरत्वागमनान्तरीयकः एकत्यागश्चापरपरिग्रहाविनाभावीति, प्रत्यक्षादिप्रमाणबाधितत्वादुन्मत्तकप्रलापमात्रमेतदवसीयत इति, तस्मान्न परिकल्पितविषयो विरोधो (न परिकल्पितापरिकल्पितविषयो) न सकलस्वलक्षणविषयो नापि सामयिकः, किं तर्हि ? पर्यायनयाभिप्रायेण क्रमजन्मपर्यायविषयः, स चैक एवासहावस्थानलक्षणः, सोऽपि द्रव्यार्थनयाभिप्रायेण नैवास्तीति भावितम्। एवं चैकवस्तुविषये सदसती नित्यानित्ये च अर्पितानर्पितसिद्धेरिति व्यवस्थितम् ॥ द्वितीयसम्बन्धाभिधानेऽपि सङ्गत्यर्थमेव भाष्यमुक्तेन विधिना, एतमेवार्थमधुना भाष्येण प्रपञ्चयति—

भा०—अर्पितव्यावहारिकमनर्पितव्यावहारिकं चेत्यर्थः ॥

टी०—अर्पितव्यावहारिकमित्यादिना, प्रक्रान्तं त्रिविधं सन्नित्यं च, तदपेक्षया

---

१ चिह्नितो भागः क-ख-योर्नास्ति.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नपुंसकलिङ्गनिर्देशः, आदिमदनादियुगपदयुगपद्भावित्रिकालविषयपर्यायार्पणभजनानेकान्तप्ररूपणो हि परिणामार्थः, तैः पर्यायैः प्रतिषेधसमग्रादेशविकलादेशैः, स्वपरार्थशब्दपर्यायभजनया च स्वं स्वं तत्त्वं पुष्णातीति विस्तरेण चरितार्थमेतत्, तत्र स्थितिलक्षणोऽन्तरङ्गस्तत्परिणामरूपत्वात् तत्सहावस्थायित्वात्, बहिरङ्गावुत्पादव्ययौ विस्रसाप्रयोगेण च कादाचित्कौ द्रव्यादिभेदात् प्रतिपन्नानन्तभेदौ, एवं चार्थोऽर्पितानर्पितधर्मात्मकस्तद्विषयः शब्दो व्यवहाराङ्गमतः शब्दव्यवहार एव प्राधान्येनाङ्गीक्रियते, अत्र प्रत्यर्थं च प्रतिपत्तिः शब्दात् साक्षाद् गम्यमानार्थतया च सर्वत्रैव, यतः सदेकनानानित्यानित्यादिधर्मकलापपरिकरमशेषमस्तिकायजालम्, तत्रान्यतमैकधर्मार्पणे शेषधर्माणां गम्यमानता, यतो न सद् असत्त्वादिभेदविविक्तम्[1], असद् वा सदादिविकल्पशून्यम्, अन्योन्यापेक्षसत्ताकत्वात् सदादीनाम्, एवं वस्तुनिश्चयः, अर्पितमुपनीतं वस्तु विवक्षितेन धर्मेण साक्षाद् वाचकेन शब्देनाभिहितं व्यवहारः प्रयोजनमस्येति व्यावहारिकम्, अर्पितं च तद् व्यावहारिकं चेत्यर्पितव्यावहारिकम्। एतदुक्तं भवति—किञ्चिद् वस्तु विशिष्टाभिधानार्पितं सद् व्यवहारं साधयत्यपरमनर्पितमेव साक्षाद् वाचकेन शब्देन प्रतीयमानं सद्व्यवहाराय व्याप्रियत इत्यत आह—**अनर्पितव्यावहारिकं चेत्यर्थः**। अथवाऽर्पितविषयो व्यवहारोऽर्पित व्यवहारः शब्दपरिग्रापितव्यवहार इत्यर्थः। सोऽस्य सतोऽस्ति नित्यस्य चेत्यर्पितव्यावहारिकं सन्नित्यं च, एवमनर्पितव्यावहारिकमपि द्रष्टव्यमसदनित्यं च यदा चासदनित्ये शब्देन साक्षात् प्रतिपिपादयिषिते तदाऽर्पिते ते, इतरे तु सन्नित्ये गम्यमाने तत्रानर्पिते भवतः, तस्मादेकत्र वस्तुन्यर्पितधर्मपरिग्रहोऽनर्पितधर्मसत्तानान्तरीयकः, यथा कृतकत्वधर्माभ्युपगमोऽनित्यत्वसत्तानान्तरीयकः, एकत्यागश्चापरपरित्यागाविनाभावी, यथा अनित्यत्वपरित्यागे कृतकत्वपरित्यागोऽवश्यंभावीति, **चशब्दः** समुच्चिनोति सर्वान् विकल्पान्, **इतिशब्दो** हेतौ, यस्मादर्पितधर्मविषयः शब्दव्यवहारस्तस्मादर्पितानर्पितसिद्धेः सन्नित्ये असदनित्ये च विवक्षावशात्, अवधारणे वा, एतावानेव शब्दव्यवहारो यदुतार्पितानर्पितधर्मविषयो नान्य इति, अर्थ इत्यभिधेयप्रतिपत्तिमाचष्टे, समासत एषोऽर्थः सूत्रस्येतियावत्। धर्मार्थकाममोक्षलक्षणः सकलः पुरुषार्थस्तद्योग्य व्यवहारार्पणाभ्यां यथावदधिगम्यत इति ॥

भा०—तत्र सच्चतुर्विधम्, तद्यथा—द्रव्यास्तिकं, मातृकापदास्तिकं, उत्पन्नास्तिकं, पर्यायास्तिकमिति।

टी०—तत्र सच्चतुर्विधमित्यादि। **तत्र**—तेषु सन्नित्यासदनित्येषु सतो भेदानाचष्टे, सच्चतुर्विधमेव, न त्रिधा न च पञ्चधा, तदुद्देशार्थमाह—**द्रव्यास्तिकमित्यादि**। उत्पादादिमूलभेदान्तःपात्येव, सविपर्ययद्रव्यादिभेदप्रपञ्चस्त्रैरूप्येऽप्येकस्य धर्मिणः परिणामसमूहस्वभावस्योत्तरोत्तरभेदप्रदर्शनार्थः, एवंविधोपन्यासे च सर्वतत्पर्यायाकाङ्क्षा, तावत्परिणा-

---

१ 'विक्तम्' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मानुयायित्वात् तत्संज्ञासम्बन्धादीनाम्, तत्रादिमद्भिः पर्यायैरर्प्यमाणं सतो भावाद् व्येति व्येष्यतीति चानित्यम्, अनाद्यैः पर्यायैरादिश्यमानं सत्त्वद्रव्यत्वसंज्ञित्वप्रमेयत्वचेतनत्वमूर्तामूर्तत्वभौतिकत्वेतरत्वग्राह्यत्वादिभिरविनाशधर्मकत्वान्नित्यम्, तद्धि सूक्ष्मोत्पादभङ्गसन्ततिसम्भवेऽपि सत्त्वादिभिराकारैर्नोत्पद्यते नापि विनश्यति। तत्र द्रव्यास्तिकं मातृकापदास्तिकं च द्रव्यनयः, उत्पन्नास्तिकं पर्यायास्तिकं च पर्यायनयः। अस्ति मतिरस्येत्यास्तिकं, सतः प्रस्तुतत्वात् तदभिसम्बन्धे नपुंसकलिङ्गता, द्रव्ये आस्तिकं द्रव्यास्तिकम्, मयूरव्यंसकादावकृतलक्षणतत्पुरुषप्रक्षेपात्। अथवाऽधिकरणशेषभावविवक्षायां द्रव्यस्यास्तिकं द्रव्यास्तिकम्, अथवा आस्तिकमस्तिमति, किं तत्? नयरूपं प्रतिपादयितृ, कस्य प्रतिपादकम्? द्रव्यस्य,

द्रव्यास्तिक-स्वरूपम्

अतः प्रतिपाद्यप्रतिपादकभावलक्षणसम्बन्धविवक्षायां षष्ठीसमासश्च। एवं मातृकापदास्तिकादिष्वपि योज्यम्। द्रव्यमेवाभेदं भिद्यते न पर्यायः, द्रव्यं भवनलक्षणं मयूराण्डकरसवदुपारूढसर्वभेदबीजं देशकालक्रमव्यङ्ग्यभेदसमरसावस्थमेकरूपं भवनं—भूतिः सत्त्वमाश्रितसत्तातिरिक्तं भेदप्रत्यवमर्शेनाभिन्नमपि भिन्नवदाभासते, तदेव चास्तीति मन्यते, तच्च द्रव्यास्तिकमसङ्कीर्णस्वभावं शुद्धप्रकृतिरूपमेकं प्रत्याख्याताशेषविशेषकदम्बकं द्रव्यात्मकं द्रव्यमात्रं सङ्ग्रहप्ररूपणाविषयमभिहितम्, अपरं नैगमव्यवहारविषयमशुद्धप्रकृति, यस्माद् द्रव्यपर्यायावुभाविच्छति नैगमः स्वतन्त्रौ, सामान्यमर्थान्तरभूतमन्यदेवाश्रितं सदभिधानप्रत्ययहेतुस्तयोर्निर्निमित्तयोः सर्वथाऽनुपाख्ये प्रवृत्त्यभावात्, व्यावृत्तिबुद्धिहेतुर्भेदकरोऽन्य एव विशेष इति भेदाभ्युपगतेरशुद्धप्रकृतित्वम्, व्यवहारोऽप्यशुद्धप्रकृतिरेव, परस्परविभिन्नरूपैरर्थैः संव्यवहारः सिध्यतीत्यभिप्रायात्, नैगमस्य वा सङ्ग्रहव्यवहारानुप्रवेशाच्छुद्धाशुद्धप्रकृतित्वं द्रव्यास्तिकस्य, तत्र सङ्ग्रहाभिप्रायानुसारि द्रव्यास्तिकम्, व्यवहारनयानुसारि मातृकापदास्तिकम्, शुद्धाशुद्धप्रकृतिद्वयसन्दर्शनार्थं द्विधोपादानम्, सर्ववस्तुसल्लक्षणत्वादसत्प्रतिषेधेन सर्वसङ्ग्रहादेशो द्रव्यास्तिकम्, नहि सता किञ्चिदनाविष्टमस्ति द्रव्येण वा, तच्च निर्भेदत्वाल्लोकयात्राप्रवृत्तिबहिर्मुखम्, अत एव व्यवहारप्रवृत्तिस्त्यागोपादानोपेक्षारूपेण वस्तुषु प्रायो भेदसमाश्रया, स च भेदो मातृकापदास्तिकनिबन्धनः, व्यवहारस्याशुद्धप्रकृतित्वाल्लोकव्यवहारप्रसाधनाय द्रव्यास्तिकं भिनत्ति व्यवहारनयः, किमन्यद्धर्माधर्माकाशपुद्गलजीवास्तिकायेभ्यस्तद्द्रव्यास्तिकं नाम? ते चास्तिकायाः परस्परं भिन्नस्वभावास्तुल्येऽपि हि द्रव्यत्वे न धर्मास्तिकायो भवत्यधर्मास्तिकायः, पक्वापक्ववत्, तथेतरेऽपि विविक्ता एव लोकयात्रां वर्तयन्ति, सन्मात्रं शुद्धद्रव्यमात्रं वा विद्यमानमपि न जातुचिद् व्यवहारक्षमम्, अतः स्थूलकतिपय-

मातृकापदास्तिकम्

व्यवहारयोग्यविशेषप्रधानं मातृकापदास्तिकम्, एते च धर्मास्तिकायादयः समस्तसामान्यविशेषपर्यायाश्रयत्वान्मातृकापदशब्दवाच्याः, मातृका ह्यशेषवर्णपदवाक्यप्रकरणादिविकल्पानां योनिः, इत्थं धर्मादयोऽपि व्यवहारनिबन्ध-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नानेकपर्यायोपघ्नास्तद्विपरीतपर्यायाश्रयाश्च तत्र तत्र व्यवह्रियन्ते व्यवहारार्थिभिः, अतो मातृकापदमेवास्ति व्यवहारयोग्यत्वात्, न शेषमिति व्यवहारनयाभिप्रायः । सङ्ग्रहव्यवहारौ च प्रत्येकं शतभेदत्वादनेकमुखौ, व्यवहार इति चान्वर्थसंज्ञत्वादेवास्य नयस्य, अवहरणमवहारः, कस्य ? एकसत्त्वस्य, केन ? विशेषेण–घटादिना, नानासत्त्वेन लोकयात्रासिद्धेः ॥

अधुना द्रव्यास्तिकमातृकापदास्तिकाभिहितावशिष्टवस्तुप्रतिक्षेपेण भेदा एव वस्तुत्वेनावधियन्ते पर्यायनयेन, अनवरतोत्पादविनाशप्रवाहमात्रमेव वस्तु सकलव्यवहारनिबन्धनम्, न तु स्थितमस्ति किञ्चित्, आत्मभावलक्षणानन्तरविनाशित्वान्न किञ्चित्

पर्यायवादिमतम्

केनचिदेकेनाभिन्नेन स्थित्यंशेनावबध्यमानं सम्भाव्यते, तत्राशेषस्थूलसूक्ष्मोत्पादकलापस्य प्रतिपादकमुत्पन्नास्तिकमुत्पन्नोऽस्तिमति, नानुत्पन्नेवान्ध्येयव्योमोत्पलादाविति, योऽप्यात्मलाभक्षणोऽस्ति सन्नित्येवंविधशब्दवाच्यः सोऽप्यभूतप्रादुर्भावः प्राग् नासीत् पश्चाल्लब्धात्माऽस्ति सन्नित्यादिशब्दव्यपदेश्यः, न तु भूत्वाऽस्तिमनुभवन्नस्तीत्याख्यायते[3], क्रियायाः कृतकत्वात् पचत्यादिवत्, कर्तुश्च तत्सम्बन्धेन कर्तृत्वप्रतिलम्भस्य कृतकत्वान्न स्थितसत्ताकमेकमस्ति किञ्चित्, प्रथमक्षणविलक्षणाश्चोत्तरोत्तरक्षणाः सन्तानाकारेणोपजनमासादयन्ति । तथा पर्यायास्तिकमित्युत्पत्तिमतोऽवश्यं विनश्वरत्वाद् यावन्त उत्पादास्तावन्त एव विनाशा इति विनाशेऽस्तिमति पर्यायास्तिकम्, पर्यायो भेदो विनाशलक्षणः सोऽस्त्येवोत्पन्नस्येति, पर्यायो हि विनाशपर्यायः, यथा प्राप्तपर्यायो देवदत्त इति, समस्तविस्रसाप्रयोगापादितविनाशसूचनाकारि च पर्यायास्तिकम् । अपरे तु वर्णयन्त्यन्यथा उत्पन्नास्तिकं पर्यायास्तिकं च, तत्र सामग्रीग्रहणादेकद्रव्यभाविनां पर्यायाणां कालतोऽर्थतो वाऽव्यव्यभिचारिणां यत्र व्यपदेशस्तदुत्पन्नास्तिकं सिध्यमानसिद्धवत्, यथा सिध्यमानः सिद्ध इति कालतोऽर्थतश्चाव्यभिचारी शब्दः, तथैकद्रव्यभाविनां पर्यायाणामयुगपद्वृत्तीनां युगपदग्रहणात् सामग्रीग्रहणाच्च यत्र व्यपदेशः स पर्यायदेशः, यथा स्पर्शादिमतां पुद्गलानामिन्द्रियैर्युगपदग्रहणादपि व्यपदेशः क्रियते स्पर्शरसगन्धवर्णवन्तः पुद्गला इति । अपरे व्याचक्षते—

" तेषामुत्पादसम्भक्ते—रुत्पन्नास्तिकदेशना ।
उत्पद्यमानाः पर्यायाः, पर्यायास्तिकमुच्यते ॥ "

तेषामिति । द्रव्यमातृकापदास्तिकभेदानामुत्पादयोगादुत्पन्नास्तिकदेशना, पर्यायनयस्यानुत्पन्नेन व्यवहाराभावात् तदानीमेव सन्, न ह्यनुत्पन्नाः केचिद् द्रव्यादयः सन्ति, अतीतानागतवर्तमानेष्वविशेषात्, यदा पुनरुत्पादसमावेशिनो वर्तमानकालावच्छिन्नाः पर्याया विवक्ष्यन्ते तदोत्पद्यमानावस्थायां पर्यायास्तिकमुच्यते । अन्ये त्वभिदधति—न मातृकापदास्तिकं द्रव्यास्तिकाद् भिद्यत इति द्रव्यनयपरिग्रहः, पर्यायास्तिकं च नोत्पन्नास्तिकाद् विविच्यत इति

---

१ ' लाभे क्ष० ' इति क-पाठः । २ ' भूयांसि म० ' इति क-ख-पाठः । ३ अत्र 'क्रियते' इत्यधिकः क-पाठः । ४ ' णादिक' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्यायनयपरिग्रहः, तदेवं चतुर्भिरपि विकल्पैर्नैयद्वयी प्रतिपिपादयिषिता, एवं तर्हि द्रव्यादिचतुष्टयी किमर्थेति चेत्, तदुच्यते—उभयनयस्वभावप्रदर्शनार्था चतुष्टयी। एवमेतान्यन्यव्याख्यानान्यालोच्य भाष्यं कथमपि गमनीयम्, स्वव्याख्यानानुसारेण तावदुच्यते पर्यायनयश्चोत्पादविनाशाद् द्वैविध्यप्रदिदर्शयिषया भाष्यकारेणोपचक्रमे, उत्पन्नास्तिकं पर्यायास्तिकमिति। स एष पर्यायनयमहाविटपी प्रौढदृढानवद्यर्जुसूत्रनयादभ्रस्कन्धः सुप्रतिष्ठिताधारनानागमगहनशब्दनयशाखस्तदाश्रयसमभिरूढैवंभूतविविधविकल्पप्रशाखोऽर्थशब्दज्ञानशून्यताङ्कुरपत्रपुष्पफलोपशोभितः पर्यायप्रधानत्वादुत्पादविनाशमात्रजलावसेकसंवर्धनीयः

ऋजुसूत्रादिभिः पर्यायपक्षः

प्रतन्यते, तत्रर्जुसूत्रः कुटिलातीतानागतपरिहारेण वर्तमानक्षणावच्छिन्नवस्तुसत्तामात्रमृजुं सूत्रयति—अन्यतो व्यवच्छिनत्ति सूत्रपातवत्, न ह्यतीतमनागतं वाऽस्ति, यदि स्यातामतीतानागते न तर्हि मृतपुत्रिका युवतिः पुत्रकमुद्दिश्य रुद्यात्, न च पुत्रार्थिनी योषिदौपयाजिकादिविशिष्टदेवतासन्निधौ विदध्यात्, तद्धि वस्तु वर्तमानक्षणावस्थाय्येव, न जातुचित् ततः परं सत्तामनुभवति, नाप्यतीतकालासादितात्मलाभं किञ्चित् तत्रान्वेति, स्वकारणकलापसामग्रीसन्निधावुत्पाद्य स्वरसभङ्गुरतामवलम्बन्ते तत्क्षणमात्रावलम्बिनः सर्वसंस्काराः। एवं च सति य एते कर्तृभूतद्रव्यशब्दसन्निधौ क्रियाशब्दाः प्रयुज्यन्ते यथा देवदत्तः पचति पठति गच्छतीति कर्मभूतद्रव्यशब्दसन्निधौ वा यथा घटो भिद्यते घटं वा भिनत्तीत्येवमादयो न यथार्थाः, कथम् ? यतो नामशब्देनाविकृतरूपस्य द्रव्यस्याभिधानात्, क्रियाशब्देन च विकारस्य प्रतिपाद्यत्वात्, न च विकाराविकारयोरैकाधिकरण्यमस्ति, विरुद्धत्वात्, अर्थप्रत्यायनाय हि प्रयुक्तः शब्दो विरुद्धमर्थं प्रतिपादयन्नैव सम्यग्ज्ञानमाधत्ते, अयथार्थत्वात्, मृगतृष्णायां सलिलशब्दवदिति उक्तार्थसंवादी च श्लोको गीतः पुराविदा—

"पलालं न दहत्यग्नि-र्भिद्यते न घटः क्वचित्।
नासंयतः प्रव्रजति भव्यो-ऽसिद्धो न सिद्ध्यति[1]॥

पलालं दह्यत इति यद् व्यवहारस्य वाक्यं तद् विरुध्यते, अत्र वाक्ये वाक्यार्थप्रतिपत्तये पदार्थप्रविभागकाले पलालशब्दो विशिष्टाकारद्रव्यवचनो नाम शब्दः तद्धि द्रव्यं यावत् तस्मिन्नेवाकारे वर्तते तावदेव पलालशब्दवाच्यम्, अन्यदा तु पलालभावेन तस्याभाव एव, तद्भावेनाभावात् पटवत्, तस्मात् स्थिररूपमव्यापारमुदासीनमविकृतं पलालशब्देन वस्तु प्रतिपादितम्, कथं तदेव दह्यत इत्यनेन शब्देनोच्येत ? क्रियाशब्दस्य विकाराभिधायित्वात्, न हि स एवार्थो विकारश्चाविकारश्च भवितुमुत्सहते, यदि हि तत् पलालं न तर्हि तदेव दह्यते, अविपरिणतत्वात्, प्रागवस्थावत्, विपरिणममानं च पलालमेव तन्न भवति, विपरिणामशब्दस्य भावान्तरवाचित्वात्, तस्माद् यावत् तत् पलालं तावन्न दह्यते, यदा दह्यते

१ 'सिद्धयते' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदा पलालं न भवतीत्यतो नैतावेकस्यार्थस्य प्रत्यायनाय सम्यग्ज्ञानोपजनकारणम्, शब्दान्तरापत्त्यसहिष्णुत्वात् प्रमत्तगीतावेताविति ॥

एवं घटाद्युदाहरणभावना कार्या, एवं च सदेकक्षणवृत्त्येत्र, नित्यं पुनर्नैवास्ति वस्तु किञ्चिदिति। एवमृजुसूत्रनयेन निरूपिते वस्तुनि शब्दनयस्तद्व्यावृत्त्यर्थमाह—शब्दप्रयोगोऽर्थगत्यर्थः, तत्र वक्तुरर्थानुविधायी शब्दोऽर्थवशात् तस्य[1] शब्दप्रयोगः, श्रोतुः पुनः शब्दवशादर्थप्रतिपत्तिरिति शब्दानुविधाय्यर्थः, शब्दनयाश्च शब्दानुरूपमर्थमिच्छन्ति, यथा शब्दस्तथाऽर्थोऽपि प्रतिपत्तव्यः, समनन्तरनयप्रतिपादितं वर्तमानरूपप्रवृत्तं वस्तु सूक्ष्मतरेण शब्देन भिद्यते, ऋजुसूत्रस्तु वर्तमानानेकधर्मरूपमपि घटशब्देनाभिधीयमानं सम्यगभ्युपैति, यथा मृद्घटोऽस्ति घटो द्रव्यं घट इति, यद्यसौ मृद्रूपेण द्रव्यतया च न स्यादमृद्द्रव्यं च घटः स्यात्, अतः सोऽसौ तेन रूपेण वृत्तत्वाद् वर्तमानरूपवदिति। शब्दनयस्तु वर्तमानकालेवृत्तमपि लिङ्गसङ्ख्यापुरुषकालादिभिन्नमवस्त्वेव मन्यते, स्त्रीपुंनपुंसकलिङ्गानां गुणानां भिन्नत्वात्, मृद्घटो द्रव्यमिति न सामानाधिकरण्यम्, यथा गौरश्वः, संस्त्यानप्रसवस्थितिलक्षणाः परस्परविरुद्धाः खल्वेते गुणाः शीतोष्णादिवत्, मृदादिशब्दाच्च भिन्नरूपप्रत्ययप्रसवो दृष्टः, पटकुटादिभिन्नध्वनिवत्, तस्माल्लिङ्गादिभिन्नमसम्यगभिधानम्, तस्यार्थस्य तेन रूपेणाभूतत्वात्, कातरे शूरशब्दप्रयोगवदिति, एवं चाभिन्नलिङ्गसङ्ख्याद्युच्यमानं वस्तु वस्तुतामधिवसति, तेन रूपेण वृत्तत्वात्, यथा शूरे शूरशब्दप्रयोगः, समानलिङ्गशब्दाभिधेयतायां च वस्तुनः पर्यायान्तरैः सामानाधिकरण्यं सिध्यति, घटः कुटो हस्ती दन्ती चेति ॥

एवं शब्दनयेनर्जुसूत्रे व्यावर्तिते वस्तुनि चाभिन्नलिङ्गादिशब्दवाच्ये प्रतिष्ठापिते वर्तमानस्याभिन्नलिङ्गादिकस्य वस्तुनः सूक्ष्मतरं भेदमभिधत्ते समभिरूढनयः[2]। न जातुचित् पर्यायान्तरैकाधिकरण्येन शब्दैरुच्यमानं वस्तु यथावस्थितमुक्तं भवति, संज्ञानिमित्तभेदाद्। द्विविधा संज्ञा—पारिभाषिकी नैमित्तिकी च, तत्र पारिभाषिकी नार्थतत्त्वं ब्रवीति, यदृच्छामात्रप्रवृत्तत्वात्, नैमित्तिकी तु सर्वैव संज्ञा युक्ता, यथाऽऽह—

"नाम च धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम्।
यन्न विशेषपदार्थसमुत्थं, प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥"

एवं च सर्वे क्रियानिमित्ताः शब्दाः धातुजत्वान्निमित्तभेदाच्चार्थभेदो दृष्टश्छत्रिदण्ड्यादिवत्, अतो यां यां संज्ञामभिधत्ते तां तां समभिरोहतीति समभिरूढस्तामेवैकामारोहति, द्वितीयां निमित्तान्तरवृत्तां न क्षमते, तस्माद् वर्तमानेनाभिन्नलिङ्गादिनाऽप्येकेनैव ध्वनिनाभिधीयमानोऽर्थः सम्यगुक्तो भवति, नान्यथेति ॥

क्रियाभेदादित्थं समभिरूढनयेन प्रतिपादिते वस्तुन्येवंभूतनयः तद्वस्तु सूक्ष्मतरभेदं प्रति-

---

१ 'तस्य प्रयोगः' इति क-ख-पाठः। २ 'लमपि' इति क-पाठः। ३ 'रूढो नयः' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पादयितुमुपक्रमते—यदि घटत इति घटः क्रियानिमित्तशब्दवाच्योऽभ्युपेतस्त्वया ततो यत् तन्निमित्तं सा क्रिया यदैव वर्तमाना तदैव नैमित्तिकः शब्दो युक्तश्चित्रकारादिवत्, तस्माद् यदैव घटते—चेष्टते तदैव घटः, तन्निमित्ताभावे पटादिवदेवासौ न घटः, न चातीतानागतनिमित्तसम्बन्धः, तयोरभावात्, न ह्यतीतं भावि वा छत्रदण्डादि छत्रिदण्ड्यादीनां निमित्तं युज्यते, यदि स्यात्, त्रैलोक्यस्य छत्रिदण्डित्वप्रसङ्गः, अतो घटमान एव घटः, क्रियाविशिष्टस्यैव घटता, ततश्च घटशब्देनापि नैवासौ सर्वदा वाच्य इति, एवमेष पर्यायनयः (सूक्ष्म)सूक्ष्मतरभेदस्तावदाधावति यावज्ज्ञानमात्रमवशिष्यते शून्यता वा, न त्विह सकलक्रमभेदाख्यानं क्रियतेऽन्यत्र प्रपञ्चितत्वात्। एवमेतयोर्द्रव्यास्तिकपर्यायास्तिकयोर्वचनचतुष्टयोपात्तयोः परस्परापेक्षयोरर्पणानर्पणविशेषतः सम्भवद्भिर्विकल्पैर्भाष्यकृत् स्वयमेव सन्नित्यादिभेदभावनां करोति—

भा०—एषामर्थपदानि द्रव्यं वा द्रव्ये वा द्रव्याणि वा सत्। असन्नाम नास्त्येव द्रव्यास्तिकस्य।

टी०—एषामर्थपदानीत्यादि। एषां—द्रव्यपर्यायनयभेदानां द्रव्यास्तिकादीनां चतुर्णाम् अर्थानि पदानि **अर्थपदानि द्रव्यं वा द्रव्ये वा** इत्यादीनि,

द्रव्यमतनिरूपणम् द्रव्यास्तिकादीनां योऽर्थोऽभिधेयो—वाच्यस्तत्प्रतिपादनप्रयोजनान्येकत्वादीनि युक्तानि द्रव्यादीनि, एभिर्हि द्रव्यास्तिकादीनि व्याख्यायन्ते विकल्पैस्तेषां चार्थाभिधानप्रत्ययभेदेन भिन्नानामन्तरङ्गाभिधानप्रत्ययपदापेक्षया बहुतिथविद्वज्जनाभिमतबहिरङ्गार्थपदचिन्ता क्रियते, तिष्ठतां तावदभिधानप्रत्ययावित्यर्थपदमेव प्राक् प्रदर्श्यत इत्यर्थः। तत्र द्रव्यं भव्यं योग्यं स्वपर्यायपरिणतेः सर्वं धर्मादि भेदवाद्यभिमतमभिन्नलक्षणार्पणयैकत्वेन विवक्ष्यते द्रव्यमिति द्रव्यस्वभावात्यागात्, न च द्रव्यव्यतिरिक्तं गुणकर्मादि किञ्चिदस्ति, रूपरसादयस्तद्द्रव्यद्वारेणैवोपलब्धिमार्गमवतरन्तो द्रव्यवृत्तिमात्रत्वेनावधार्यन्ते, न भिन्नजातीयत्वेन, चक्षुरादिग्रहणभेदात् तु वृत्तयस्तास्तस्य भिद्यन्ते, पितृपुत्रमातुलत्वाद्यनेकसम्बन्धिसम्बन्धविशिष्टपुरुषवत्, अभिन्नस्यैकस्य जिनदत्तादेर्जन्यजनकाद्यनेकसम्बन्धापेक्षाः पित्रादिव्यपदेशाः प्रवर्तन्ते, न तु तस्मात् पुरुषवस्तुनोऽर्थान्तरभूतं पितृत्वं नामार्थो जात्यन्तरमस्ति, पुरुषवृत्तिमात्रत्वात्, तथा द्रव्यमपि चक्षुर्ग्रहणादिविषयभूयमासादयद् रूपादिव्यपदेशमनेकमासादयति, अतोऽनर्थान्तरं रूपरसादयो द्रव्यादिति, कर्मापि विस्रसाप्रयोगसापेक्षो द्रव्यपरिणामस्तद्भावलक्षणो द्रव्यादव्यतिरिच्यमानो द्रव्यमेव, सामान्यविशेषयोरपि तदग्रहे तद्बुद्ध्यभावात् द्रव्यमात्रतैवेति, एवमेकमेव द्रव्यं शुद्धप्रकृतेर्द्रव्यार्थस्य। अविशुद्धद्रव्यार्थभेदनैगमस्त्वभिन्नद्रव्येण व्यवहाराभावाद् भेदनि-

---

१ 'नास्ति' इति ग-पाठः। २ 'बहुविध' इति क-ख-पाठः। ३ 'भूयसा यद्रूपादि' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बन्धनद्वित्वादिसङ्ख्याव्यवहारः सकललोकयात्राक्षमः सिद्ध्यतीति द्रव्ये वा द्रव्याणि वेत्याह, अन्यथैकसङ्ख्याऽपि न स्याद्, व्यवहारस्य वा शतभेदत्वात् कश्चिदंशः

द्रव्यास्तिके नैगमः

प्रतिपन्नदेशकालसङ्ख्याभेदः प्रतिमन्यते द्रव्ये वा द्रव्याणि वेति विकल्पसम्भवः, सच्च त्रिविधमुत्पादादि, तच्च द्रव्येणार्प्यमाणमङ्गीकृतसङ्ख्याभेदमेवात्मलाभं प्रतिपद्यते, द्रव्यं वा द्रव्ये वा द्रव्याणि वेति, न तु कदाचिद् वचनत्रयप्रतिपाद्यद्रव्यव्यतिरेकेणान्यत् किञ्चित् सदस्ति, यतो द्रव्यमित्यपदिष्टे सत् प्रतीयते, द्रव्ये इत्यपि सती, द्रव्याणि च सन्तीत्येवं व्यस्तेषु समस्तेषु च प्रतीयते द्रव्येष्वेव सत्, द्रव्यमात्रे नियतवृत्तित्वात्, द्रव्यव्यतिरिक्तपदार्थाभावाच्चान्यत्र नोपलभ्यते, यदि स्यादद्रव्यं किञ्चिद् गुणः कर्मादि वा तत्राप्याशङ्क्येत सतो वृत्तिः, तत् तु नैवास्तीत्ययमर्थोऽनेन भाष्यवचनेन प्रत्याय्यते—**असन्नाम नास्ति,** असदिति यस्य नाम संज्ञिनस्तत्संज्ञिरूपमसन्नामकं नास्ति, संज्ञिरूपाभावाद् वा संज्ञा नास्ति, परस्परापेक्षत्वात् संज्ञासंज्ञिनोः, एवं चासच्छब्देन गुणाद्यभाव एवोच्यते, स च गुणाद्यभावो द्रव्यमात्रमेव द्रव्यास्तिकस्येत्युक्तेन प्रकारेण द्रव्यार्थिकस्यार्थपदभावना । अन्ये भाष्यमेवं पठन्ति—**असन्नाम नास्त्येव** सावधारणोऽसतः प्रतिषेधः,

द्रव्यास्तिके संग्रहः

सर्वं द्रव्यमिति सञ्जिघृक्षतो द्रव्यास्तिकस्य हि मातृकापदास्तिकाद्यपि सर्वमन्तर्वसतीति, तस्मात् सदित्युक्ते एषामेकत्वद्वित्वबहुत्वानामन्यतमोक्तौ तदवरोधः सन्मात्रत्वादिति । एवं सङ्ग्रहनयेन स्वाभिप्राये द्रव्यास्तिकमात्रतया प्रकाशिते व्यवहारनयः स्वाभिप्रायमाविष्करोति मातृकापदास्तिकोपन्यासेन—

भा०—मातृकापदास्तिकस्यापि मातृकापदं वा मातृकापदे वा मातृकापदानि वा सत्। अमातृकापदं वा अमातृकापदे वा अमातृकापदानि वाऽसत्।

टी०—मातृकापदास्तिकस्यापीत्यादि । धर्मास्तिकायादीनामुद्देशमात्रं मातृकापदास्तिकलक्षणम्, एवं मन्यते व्यवहारः—न द्रव्यमात्रमभेदं सत् संज्ञास्वालक्षण्यादिशून्यं व्यवहर्तॄणां लौकिकपरीक्षकाणां धियं धिनोति, व्यवहारार्थश्च वस्त्वभ्युपगमः, स च भेदेन प्रायः साध्यते, त्वयाऽपि च भेद एव प्रदर्शितो द्रव्यं वा द्रव्ये वा द्रव्याणि वेति, एकस्मिन्नर्थे एकवचनं द्वयोरर्थयोर्द्विवचनं बहुष्वर्थेषु च बहुवचनमित्येवं सतो भेदिका सङ्ख्या, न च द्रव्यसतोर्भेदस्तद्द्रव्यमेव सत्सदेव द्रव्यम्, यच्चैकसङ्ख्यावच्छिन्नं सत् तन्न द्वित्वा-

द्रव्यास्तिके व्यवहारः

दिसङ्ख्ययाऽऽश्रयितुं शक्यम्, न ह्येको द्वौ, द्वौ वा एक इत्येवं लोकव्यवहारप्रवणेन भेदोऽभ्युपेयः, किं तद् द्रव्यं धर्माधर्माकाशपुद्गलजीवभेदं गतिस्थित्यवगाहशरीरादिपरस्परोपग्रहणाद्युपकारि संज्ञास्वलक्षणादिविविक्तं संव्यवहारप्रापणप्रत्यलं भवति ? निर्भेदं पुनर्वस्तु न काञ्चिद् व्यवहारमात्रामभिमुखीकरोति, भेदप्रधानतायां तु

---

१ ' मातृकाद्यपि' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मादीनामन्यतमैकविवक्षायां सत् मातृकापदम्,द्वित्वविवक्षायां सती मातृकापदे,त्रित्वादिविवक्षायां सन्ति मातृकापदानीति प्रतिविशिष्टव्यवहारप्रसिद्धिः, अतो धर्मादयः परस्परव्यावृत्तसत्त्वस्वभावार्पणयैव सन्ति, नान्यथा। धर्मास्तिकायस्वलक्षणं य(त् त)न्न जातुचिदधर्मास्तिकायलक्षणं भवति, अतो यदस्ति तन्मातृकापदं वेत्यादिना विकल्पत्रयेण सङ्गृहीतं धर्मादि पञ्चविधम्, सकलभेदजालप्रसूतिहेतुत्वान्मातृकापदं मातृकास्थानीयमुच्यते धर्मादि, नातोऽन्यदस्तीति, अमातृकापदं वेत्यादिना तामेव परस्परव्यावृत्तिमभिव्यनक्ति, यदि धर्मादिपञ्चकव्यतिरेकि किञ्चिद् भवेत् ततस्तन्मातृकापदं वेत्यादिव्यपदेशो युज्येत, संज्ञास्वालक्षण्याद्यभावात् तच्चासत्, तस्मात् धर्म एवाधर्मलक्षणाद् व्यावर्तमानस्तेनाधर्मस्वलक्षणरूपेणासन्नित्युच्यते । एवं शेषेष्वपि भावना विधेया ॥

सर्वसद्गतिविशेषाणां प्रसवहेतुत्वाद् धर्मास्तिकायो मातृकापदम्, स एव च सर्वसत्स्थितिविशेषप्रसवव्यावृत्त्यपेक्षया अमातृकापदम्, एवं द्विवचनबहुवचने विभावनीये । तस्मान्न द्रव्यास्तिकादि किञ्चिन्मातृकापदव्यतिरेकि विद्यते, स्वभावासंक्रान्त्या तु परस्परापोहभावतः पदार्थव्यवस्थानम्, स चापोहः सल्लक्षणव्यवच्छेदेनैको यथा प्रमाणं प्रमेयं च सद्, यन्न प्रमाणं न प्रमेयं तदसदेव, अपरो धर्म्यन्तरस्य धर्म्यन्तरोत्पन्नवैशिष्ट्येनापोहः, तद्यथा—जीवोऽजीवो न भवत्यश्वो गौर्न भवतीति, तथाऽनपोहश्चेतनाचेतनयोर्द्रव्यादेशात्, परस्परापोहे च द्रव्यादेशात् सर्वेषां धर्मादीनामनपोह इत्येवं सामान्यविशेषानेकधर्मत्वाद् धर्मादयोऽपोहानपोहरूपाः सर्वे मातृकापदास्तिकम्, एवं द्रव्यार्थनयाभिप्रायो द्रव्यास्तिकमातृकापदास्तिकाभ्यामाख्यातः । पर्यायार्थनयावसरे त्विदमुच्यते—

भा०—उत्पन्नास्तिकस्य उत्पन्नं वा उत्पन्ने वा उत्पन्नानि वा सत्। अनुत्पन्नं वाऽनुत्पन्ने वाऽनुत्पन्नानि वाऽसत् ॥

टी०—उत्पन्नास्तिकस्येत्यादि । पर्यायार्थस्य मूलसूत्रः, स च प्रत्युत्पन्नं वर्तमानक्षणमात्रं सर्वमेव धर्मादिद्रव्यं प्रतिजानीते, क्षणं क्षणं प्रत्युत्पन्नं पूर्वपूर्वक्षणविलक्षणम्, इदमेव च सतो लक्षणं यदुत्पद्यते प्रतिक्षणम्, उत्पादो हि वस्तुनो लक्षणम्, अनुत्पादाश्च व्योमोत्पलादयो न कथञ्चिल्लक्ष्यन्ते, तत्रात्मनां तावत् प्रतिक्षणमपरापरज्ञानदर्शनक्रियाद्युत्पादो लक्षणम्, पुद्गला वर्ण-गन्ध-रस-स्पर्श-शब्द-संस्थान तम-श्छायाद्युत्पादल-

पर्यायास्तिके उत्पन्ना० क्षणाः, धर्माधर्माकाशास्तु गन्तृस्थात्रवगाहमानगतिस्थित्यवगाहाका-

ऋजुसूत्रः रोत्पादतः प्रतिक्षणमन्ये चान्ये च भवन्तीति, एषां च वर्तमानक्षण एव सत्यः, तस्मादेकमभिन्नं सकलभेदहेतुर्मातृकापदं नाम किञ्चिन्नास्ति व्यवहारनयपुरस्कृतम् । अपि च—व्यवहारोऽपि लौकिकः प्रत्युत्पन्नक्षणसाध्य एव, सतोऽर्थक्रियासामर्थ्यात् सँश्च वर्तमानक्षणः, क्रान्तानागतक्षणयोरसत्त्वान्नार्थक्रियासामर्थ्यं सम्भाव्यते,

---

१ 'अलोकाकाशेऽपि अगुरुलघुपर्यायाणामनुसमयमुत्पादोऽस्त्येव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मादुत्पन्न एवास्ति क्षणः, तस्मिँश्च नान्वयि किञ्चिद् द्रव्यत्वादि विद्यते, ततश्च भूतान्वेषिणो न द्रव्यास्तिकं न मातृकापदास्तिकं किञ्चिदस्ति, उत्पन्नास्तिकमेव तु सत् सन्तत्या द्रव्यं वा धर्मादि वाऽभिधीयते, न भूततस्तदस्ति, सन्तानस्य सांवृतत्वात्, ते च वर्तमानक्षणा भूयांसः, तत्रैकक्षणविवक्षायामुत्पन्नास्तिकं सदिति विकल्पः, द्वित्वविवक्षायामुत्पन्नास्तिके वा[1] सती, त्रित्वादिविवक्षायामुत्पन्नास्तिकानि वेति, यत् तत् सदेवं विवक्षया नियम्यते सङ्ख्याभेदेन व्यवहारार्थम्। यच्च परेण द्रव्यास्तिकं मातृकापदास्तिकं वाऽभ्युपेतं तदुत्पन्नमनुत्पन्नं वा स्यात्? यदि पूर्वः कल्पः असत्समीहितसिद्धिः, अथोत्तरस्ततोऽसदेव द्रव्यास्तिकादि, कथञ्चिदप्युत्पादनेनायोगादत आह—**अनुत्पन्नं वाऽनुत्पन्ने वाऽनुत्पन्नानि वा सर्वमसत्** स्वलक्षणस्योत्पादस्याभावादिति। एवमुक्तेन प्रकारेण धर्मादि द्रव्यं स्यात् सत् स्यादसत् स्यान्नित्यं स्यादनित्यमिति प्रतिपाद्यत्वेन सूचितम्, अधुना विपच्यते। तत्र द्रव्यार्थनयप्रधानतायां पर्यायनयगुणभावे च प्रथमविकल्पः, प्राधान्यं शब्देन विवक्षितत्वाच्छब्दाधीनम्, शब्दानुपात्तस्यार्थतो गम्यमानस्याप्रधानता १। पर्यायनयप्रधानतायां द्रव्यनयगुणभावे च द्वितीयः २। **अर्पितेऽनुपनीते न वाच्यं सदित्यसदिति वेत्यनेन** भाष्यवचनेन तृतीयविकल्पो विवक्ष्यते **स्यादवक्तव्यमिति** ३। एते त्रयः सकलादेशाः। यदा त्वभिन्नमेकं वस्त्वनेकेन गुणरूपेणोच्यते, गुणिनां च गुणरूपमन्तरेण विशेषप्रतिपत्तेरभावादिहात्मादिरेकोऽर्थः सत्त्वादेरेकस्य[2] गुणस्य रूपेणाभेदोपचारतो मतुब्लोपेन वा निरंशः सकलो व्याप्तो वक्तुमिष्यते, विभागनिमित्तस्य प्रतियोगिनो गुणान्तरस्यासत्त्वादेस्तत्रानाश्रयणात्, तत्र द्रव्यार्थाश्रयं सत्त्वगुणमाश्रित्य तदा स्यात् सन्नित्युच्यते सकलादेशः, गुणद्वयं तु गुणिनो भागवृत्ति भवत्युभयात्मकत्वाद् गुणिनः, न त्वेको गुणो भागवृत्तिरिति। एवं स्यान्नित्य इत्यपि वाच्यम्। तथा पर्यायनयाश्रयमसत्त्वमनित्यत्वं चाङ्गीकृत्य स्यादसत् स्यादनित्य आत्मेति वाच्यम्। युगपत् भावादुभयगुणयोरप्रधानतायां शब्देनाभिधेयतयाऽनुपात्तत्वात् स्यादवक्तव्यः॥ का पुनर्भावना स्याद् सन्निति? किमत्र भाव्यम्? एकं द्रव्यमनन्तपर्यायमतीतानागतानन्तकालसम्बन्ध्यनेकार्थव्यञ्जनपर्यायात्मकतया विश्वरूपम्, तदेवंविधावस्थं वस्तु वर्तमानपर्यायवृत्तमपि येन येन शब्देनोच्यते तेन तेन रूपेण तदभिसम्बद्धम्, द्रव्यस्य पर्यायसचिवत्वात् पर्यायाणां च द्रव्यसहायत्वात्, अतोऽनेकान्तवादसामर्थ्याद् वस्तुनो यदुक्तसूक्तिका, न च व्यवहारविरोधिनी, यथा घटः पटादिरपि भवति स्यात्कारसंलाञ्छनशब्दाभिधेयतायामिति जैनेन्द्रो न्यायः। एवं न्यायव्यवस्थायामनन्तपर्याये पुरुषादौ सप्तधा वाचकः शब्दः प्रवर्तते स्यादस्त्येवेत्यादिः, यथा युवत्ववृत्तिः, पुरुषः पुरुषत्वेनास्ति न तु बालवृत्त्या, ततः स्यादस्त्येव न पुनः सर्वात्मनैव पुरुषः द्रव्या-

सदादिभङ्गाः

---

१ 'द्वित्वादिविवक्षायामुत्पादास्तिके वा सती सन्त्युत्पन्नास्तिकानि वेति' इति ग-टी-पाठः। २ 'चेति' इति क-पाठः। ३ '०कस्य रूपेण' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्थेनान्वयिना वर्तमानेन यौवनेन विद्यते, न तु तत्र सम्भविनान्येनापि पर्यायेण बालादिना, यदि पुनरस्त्येवेति नियमेनैवोच्यते तत आमरणकालवृत्तत्वात् पुरुषशब्दपुरुषार्थयोर्नास्तित्वनिरवकाशास्तित्वप्रतिज्ञावशात् यथा पुरुषत्वयौवनाभ्यां विद्यते तथा बालपुरुषतयाऽपि स्यादन्याभिश्च वृत्तिभिः सत्सङ्कीर्णवृत्तिर्भवेत्, नियतवृत्तिश्च दृश्यते, न वा बालता पुरुषस्वभाव एव भवतीत्यभ्युपेयम्, ततश्चावस्थाहानेः पुरुषाभावप्रसङ्गः, अतो बालापेक्षया स्यादस्त्येवेति भवति, तथैकान्तवादिनो नास्त्येवात्मेत्यवधारणेनोक्ते यथैवान्वयिना द्रव्यार्थपुरुषतया स नास्ति, एवमुत्पादविनाशप्रवाहरूपपर्यायात्मिकयाऽपि बालादिवृत्त्या न स्यात्, एवं चात्मनास्तित्वमस्तित्वनिरवकाशं भवेत्,ततश्चान्वयिना नैमित्तिकेन वा रूपेण नास्तित्वमात्मनो वान्ध्येयस्येव सर्वप्रकारमनुषक्तम्, अतस्तद्दोषापाकरणेन स्यान्नास्त्येवेत्युच्यते, स ह्यन्वयिन्या वृत्त्या न (१) विद्यते, न सर्वात्मनैव, यतो वर्तमानपर्यायः स्वात्मना बालादिरूपेणास्त्येव, पर्यायपरम्परायामपि वर्तमानपर्यायेणैवास्ति नातीतानागतपर्यायापेक्षणेनेत्यतः स्यान्नास्त्येवेति । ये त्वस्तित्वनास्तित्वैकान्तवादिनोऽवधारणमिष्टतः प्रयुञ्जतेऽस्त्येवात्मा नास्त्येव चात्मेति, तेषां शब्दशक्तिप्रापितत्वात् सर्वथाऽस्तित्वनास्तित्वप्रसङ्गः । प्रथमविकल्पे तावत् सर्वप्रकारास्तित्वमात्मनः प्रसजति, प्रतिषेधनिरपेक्षत्वादस्तित्वेन स्ववशे व्यवस्थापितत्वादस्तित्वाभावे चात्माभावात्, नास्तित्वस्यापि स्वविषयेऽवधृतत्वात् सति घटे तदप्रसङ्गात्, एकाधिकरणयोश्च सदसतोर्विरोधात् परस्परविषयानाक्रान्तिः, अतः समस्तवस्तुरूपेणास्त्यात्मा नास्तित्वनिरवकाशास्तिशब्दवाच्यत्वादस्तित्वे स्वात्मवत्, अस्तित्वसामान्येन व्याप्तो न त्वस्तिविशेषैः पटादिभिरिति चेत्, यथाऽनित्यमेव कृतकमनित्याभावे तदभावात्, साध्यधर्मसामान्येनेति वचनात्, अनित्यत्वसामान्यमनित्यव्यक्तिश्चेति द्विरूपः साध्यधर्मः, साधनधर्मोऽपि हि द्विप्रकारः, तत्तुल्योऽपि हितानामे(१)त्यादिवचनात्, तथास्वं येन रूपेणेत्याद्यभिधानात् सामान्यानित्यतया व्याप्तिर्न विशेषानित्यतया, हन्त भवतैव तर्हि प्रतिपन्नः साध्यधर्मभेदस्तथा चावधारणवैयर्थ्यम्, अनित्यत्वे हि सर्वप्रकारे सत्यवधारणसाफल्यं स्यात्, यदा तु विशेषानित्यतया न भवत्यनित्यं वस्तु तदा व्यर्थमवधारणम् । स्वगतेनापि विशेषेणानित्यं भवत्येवेति चेत्, तन्न, तत्रापि स्वगतेनेति विशेषेणसामर्थ्यात् परगतविशेषानित्यत्वाभावः, पुनरप्यफलमेवावधारणम् । न चानवधारणो वाक्यप्रयोगः पण्डितजनमनःप्रीतिहेतुः, सर्ववाक्यानां सावधारणत्वादिष्टतश्चावधारणप्रकल्पनादवश्यंतयाऽवधारणमभ्युपेयम्, अन्यथा त्वनित्यं कृतकमनित्यत्वस्यानवधृतत्वान्नित्यत्वप्रसक्तिरपि ॥ अपरे त्वेवंविधप्रसङ्गभीत्या त्रिधाऽवधारणफलं वर्णयन्ति अयोगान्ययोगात्यन्तायोगव्यवच्छेदद्वारेण, क्वचिदेवकारप्रयोगादयोगव्यवच्छेदः, क्वचिदन्ययोगनिरासः, क्वचिदत्यन्तायोगव्यु-

---

१ 'वेति तथैकान्त' इति क-पाठः । २ 'सतो वर्त' इति ग-पाठः । ३ 'निषेध' इति क-पाठः । ४ 'धर्मो हि' इति-क-ख पाठः । ५ 'तथाङ्गं' इति ग-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दासः, तत्रायोगोऽसम्बन्धस्तदवच्छेदफलं विशेषणमस्त्येव घट इत्यादाव-
एवकारस्यार्थ- स्तिना सह घटस्यायोगो-नास्त्ययोगमात्रं व्यवच्छिद्यते, यथा चैत्रो धनु-
त्रैविध्यम् र्धरः, चैत्रे हि धनुर्धरतायामाशङ्क्यमानायां चैत्रो धनुर्धर एवेत्यवधार्यमाणेनान्येभ्यो धनुर्धरता व्यावर्तते, तद्वदिहापि प्रकृतवस्तुनीति, स्यात् त्वेष दोषो यद्यन्ययोगव्यवच्छेदेन विशेषणं क्रियेत, यथा पार्थो धनुर्धरः पार्थे धनुर्धरतायां प्रतीतायां तादृशी किमन्यत्राप्यस्तीति चिन्तायां पार्थ एव धनुर्धरो नान्य इति प्रतिविशिष्टधनुर्धरतायां सहान्यैर्योगो व्यवच्छिद्यत इति । क्वचिदत्यन्तायोगव्यवच्छेदो नीलमेव सरोजमित्यत्र, न सरोजं सकलद्रव्यभाविनीलगुणमात्मसात्करोति, तथा नीलत्वमपि न समस्तसरोजाक्षेपि, अत एवोभयव्यभिचारादुभयविशेषणत्वम्, अत्र च नीलतायाः किलात्यन्तमयोगो व्यवच्छिद्यते, नात्यन्तमयोगः—असम्बन्धः सरोजेन सह नीलतायाः । सर्वत्र चैवकारस्य विवक्षावशात् साक्षादप्रयोगेऽपि व्यवच्छेदार्थप्रतीतिरतो निरन्वयदोषाभावस्तदयोगव्यवच्छेदेन विशेषणादिति । अत्रोच्यते—सर्वमेतद् व्यामोहभाषितं दुर्बुद्धेरुद्धरतः परप्रयुक्तदूषणानि, यस्मादयोगे व्यवच्छिन्नेऽपि प्रागेतन(?)दोषसम्पातो न निवर्तते, अयोगव्यवच्छेदेन ह्यस्तिना योग इष्यते, स च योगः किं सामान्यरूपेणास्तिना प्रत्याय्यतेऽथ विशेषरूपेण उतोभयरूपेणेति सर्वथा प्राक्तनदोषप्रसङ्गः, व्यवच्छेदोऽप्यस्तित्वसामान्यायोगस्य वाऽस्तित्वविशेषायोगस्य वा उभयायोगस्य वा ? यद्यस्तित्वसामान्यायोगव्यवच्छेदः, ततोऽस्तित्वविशेषायोगव्यवच्छेदाभावप्रसङ्गस्तस्मिंश्चाव्यवच्छिन्ने सर्वास्तित्वविशेषस्वभाव आत्मादिः प्रसक्तः, अथास्तित्वविशेषायोगव्यवच्छेद इष्टः, एवं तर्ह्यस्तित्वसामान्ययोगव्यवच्छेदाभावप्रसङ्गः, ततः प्रागेतन-
व्यवच्छेदेऽपि स्याद्वादः दोषव्रातस्तदवस्थः, अथोभयायोगव्यवच्छेदः, तथापि सामान्यविशेषास्तित्वोभयस्वभावः आत्मादिरभ्युपेतः स्यात्, ततश्च निष्फलमवधारणं, सामान्यास्तित्वेन चास्त्यात्मादिर्विशेषास्तित्वेन च, ततश्च स्वगतविशेषास्तित्वेनास्ति परगतविशेषास्तित्वेन नास्ति वस्तु, स्यादस्ति स्यान्नास्तीति सिद्धम्, अनेकान्तरूपमेव समस्तवस्तुव्यवहारास्पदतामानयन्तस्तत्कारिणस्तद्द्वेषिणश्च केचिज्जायन्ते जगत्यकारणाविष्कृतमत्सरप्रसराः खलु दुर्जनाः । यत्राप्यन्ययोगव्यवच्छेदोऽभिप्रेतस्तत्रापि योगविशेषो व्यवच्छिद्यते न योगसामान्यम्, यादृक् पार्थे धनुर्धरता तादृगन्यत्र नास्तीति । अत्यन्तायोगव्यवच्छेदेऽपि अत्यन्तमयोगो नास्ति योग एव सर्वथा, अथवा कदाचिदस्ति कदाचिन्नास्तीत्येवं च विकल्पद्वयेऽपि प्राच्य एव प्रसङ्गो योज्यः ॥ प्रकृतमनुस्रियते—सर्वथा सामान्यविशेषरूपत्वात् प्रकारवदस्तित्वमतः सामान्यास्तित्वेनास्ति विशेषास्तित्वेन नास्त्यात्मा स्यादस्ति स्यान्नास्तीति,तथा यदस्ति तन्नियमेन द्रव्यक्षेत्रकालभावरूपेणैवात्मलाभं लभते, यथा—आत्मा जीवद्रव्यतया, क्षेत्रत्व इह क्षेत्रतया, कालतो वर्तमानकालसम्बन्धितया, भावतो ज्ञानदर्शनोपयोगमनुष्यगतितयेति

१ ' इति विशिष्ट. ' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपादिते गम्यत इदं—द्रव्यक्षेत्रकालभावान्तरसम्बन्धितया नास्त्यात्मा। यदि च सर्वद्रव्यतयाऽऽत्मा स्याद्, आत्मैवासौ न भवेत्, द्रव्यत्ववत्, सर्ववृत्तितया वा, तद्रूपतया च सर्वकालसम्बन्धित्वाद् व्योमवन्मनुष्यभावे वा समस्तनारकादिभावप्रसङ्ग एकान्तवादिनाम्, अतोऽवश्यं स्वद्रव्यादित्वेनैवास्तित्वमभ्युपेयम्, नान्यद्रव्यादित्वेन ॥ ततश्च स्वैरस्तित्वात् परैश्च नास्तित्वात् स्यादस्ति स्यान्नास्तीति, स्वपरमात्रभावाभावोभयाधीनत्वादात्मास्तित्वस्य, यथैव स्वास्तित्वादस्तीत्युच्यते, तथैव परनास्तित्वान्नास्तीत्यपि वाच्यम्, न च प्रकारान्तरमस्ति किञ्चिदेकान्तवादिनां यदाश्रयणेनावष्टम्भो दृढप्रतिबन्धः स्यादिति नास्तित्वमस्तित्वानपेक्षमत्यन्तशून्यं वस्तु प्रतिपादयेदन्वयाप्रतिलम्भाद् अस्तित्वमपि नास्तित्वानपेक्षं सर्वरूपं वस्तु गमयेत् व्यतिरेकाप्रतिलम्भात्, न च सता सर्वभावरूपेण सकलभावरूपेण वा भूयते, अतः सर्वदाऽस्तित्वं नास्तित्वसापेक्षं नास्तित्वं चास्तित्वापेक्षमेवात्मलाभमासादयति, एवं चात्मनि नाप्रसक्ता घटादिसत्ता निषिध्यते अर्थात् प्रकरणाद् वा, घटादिसत्तानिषेधश्चात्मनो धर्मस्तदधीनत्वादात्मस्वभावस्य, स एव च परेण विशेष्यमाणत्वात् परपर्याय उच्यते, गव्यनश्वत्ववत्, आत्मना विशेष्यमाणत्वादात्मपर्यायः, स्वपरविशेषणायत्तं हि वस्तुस्वरूपप्रकाशनम्, अनेकान्तवादे च स्यादस्त्यात्मेत्यादिभिः सप्तभिर्वाक्यैरभिधीयते वस्तु प्रत्येकक्रियापदप्रयोगेणार्थपरिसमाप्तेः, आत्मेति द्रव्यवाची विशेष्यत्वात्, अस्तीति गुणाभिधायी विशेषणत्वात्, शब्दशक्तिस्वाभाव्याच्च तथा प्रतीतेः, बुद्ध्यारूढस्योपचरितसत्ताकस्य मुख्यसत्त्वविशेषणत्वेनोपात्तस्य धर्मिण उपादानादसत्त्वे इव, स्याच्छब्दस्तु द्रव्यधर्मलिङ्गसङ्ख्याभेदवियुक्तत्वादसिप्रकृतिर्विध्यादिविषयस(म ?)द्विभक्तिप्रथमपुरुषैकवचनान्तप्रतिरूपको निपातो विधिविचारणास्तित्वविवादानेकान्तसंशयाद्यर्थवृत्तिः, तस्य चानेकान्तावद्योतनमेवार्थो विवक्षितः, केवलस्य च सामान्यविषयत्वावद्योतकत्वाद् विवक्षितार्थप्रतिपादनाय द्रव्यधर्मविशेषोपादानं, तन्नान्तरीयकत्वात्, निपातानां चापरिमितत्वादनेकान्तद्योतकतया विवक्षितत्वादिति, स्याच्छब्देनानेकान्ताभिधानादाक्षेपेऽपि सप्तभङ्ग्याः पुनर्भेदेनोपादानं विशिष्टार्थप्रतिपादनाय, यथा वृक्षशब्देन सामान्यविषयेणाक्षेपेऽपि धवादीनां विशेषप्रतिपिपादयिषया धवादिशब्दोपादानम्, एवमेतदपि द्रष्टव्यम्, भेदाप्रतिपत्तेर्विवक्षितभेदप्रतिपादनाय भेदपरिमाणनियमाभिधानाय वा सामान्यलक्षणप्रपञ्चव्याख्यानाय वा सङ्क्षेपव्यासाभिधानम्, तत्रास्तित्वनास्तित्वैकान्तनिवारणाय प्रथमद्वितीयौ, एकान्तरूपस्यार्थस्यावस्तुत्वादिति। तृतीयविकल्पाभिधित्सया भाष्यकृदाह—

स्वद्रव्यादिना सत्त्वम्

अस्तिनास्तिरूपता

भा०—अर्पितेऽनुपनीते न वाच्यं सदित्यसदिति वा।

टी०—युगपदात्मन्यस्तित्वनास्तित्वधर्माभ्यामर्पिते विवक्षिते क्रमेण चानुपनीते क्रमेणाभिधातुमविवक्षिते वाच्यं न जातुचित् सदात्मतत्त्वमसदात्मतत्त्वमिति वा। वाशब्दो विकल्पार्थः,

---

१ 'कादिप्रसङ्ग' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्पितं विशेष्यते, कीदृशेऽर्पिते ? अनुपनीते, कथमनुपनीते ? सामर्थ्यात् क्रमेणाविशेषिते, क्रमेण त्वर्पणे प्राच्यविकल्पावेव स्याताम्, अतोऽवश्यंतया युगपदभिन्ने काले द्वाभ्यां गुणाभ्यामेकस्यैवार्थस्याभिन्नस्य प्रतियोगिभ्यामभेदरूपेणैकेन शब्देनावधारणात्मकाभ्यां वक्तुमिष्टत्वादवाच्यम्, तद्विधस्यार्थस्य शब्दस्य चाभावात्, अयं च विकल्पस्तत्त्वान्यत्वसत्त्वासम्भवात् किलावक्तव्यमेवेत्येवंविधैकान्तव्यावर्तनार्थः स्यादवक्तव्य एवात्मा, अवक्तव्यशब्देनान्यैश्च षड्भिर्वचनैर्द्रव्यपर्यायविशेषैश्च वक्तव्य एव, अन्यथा सर्वप्रकारावक्तव्यतायामवक्तव्यादिशब्दैरप्यवाच्यत्वादनुपाख्यः स्यात्, अतीतविकल्पद्वयं त्वेकान्तास्तित्वैकान्तनास्तित्वप्रतिपक्षनिराकरणद्वारेण स्यादस्ति स्यान्नास्तीति स्वपरपर्यायान्यतरैकधर्मसम्बन्धार्पणात् कालभेदेनोक्तम्, अधुना युगपद् विरुद्धधर्मद्वयसम्बन्धार्पितस्य च वस्तुरूपस्याभिधानात् कीदृशः शब्दप्रयोगो भवतीति ? उच्यते—न खलु तादृशः शब्दोऽस्ति यस्तादृशीं विवक्षां प्रतिपूरयेत्, यतोऽर्थान्तरवृत्तैः पर्यायैरवर्तमानमननुभवंस्तान् पर्यायान् द्रव्यं ब्रवीतीत्येका विवक्षा, अपरा तु विवक्षा निजैः पर्यायैः स्वात्मनि वृत्तैर्वर्तमानमनुभवन् स्वान् पर्यायान् द्रव्यमभिदधातीति, एवमेतयोर्विवक्षयोः परस्परविलक्षणत्वाद् विरुद्धत्वाच्च द्वाभ्यामपि युगपदादेशे पुरुषस्यैकस्यैकत्र द्रव्ये नास्ति सम्भवो वचनविशेषातीतत्वाच्चावक्तव्यं वाचकशब्दाभावात्। एतदुक्तं भवति—अस्तित्वनास्तित्वयोर्विरुद्धयोरेकत्राधिकरणे काले च सम्भव एव नास्तीत्यतस्तद्विधस्यार्थस्याभावात् तस्य वाचकः शब्दोऽपि नास्त्येवेति १ ॥ तथा कालाद्यभेदेन वर्तनं गुणानां युगपद्भावस्तच्च यौगपद्यमेकान्तवादे नास्ति, यतः कालात्मरूपार्थसम्बन्धोपकारगुणिदेशसंसर्गशब्दद्वारेण गुणानां वस्तुनि वृत्तिः स्यात्, तत्रैकान्तवादे विरुद्धानां गुणानामेकस्मिन् काले न क्वचिदेकत्रात्मनि वृत्तिदृष्टा, न जातुचित् प्रविभक्ते सदसत्त्वे स्त एकत्रात्मन्यसंसर्गरूपे येनात्मा तथोच्येत, ताभ्यां विविक्तश्च परस्परगुणानामात्मस्वभावो नान्योन्यात्मनि वर्तते, ततश्च नास्ति युगपदभेदेनाभिधानम् २ ॥ न चैकत्रार्थे विरुद्धाः सदसत्त्वादयो वर्तन्ते, यतोऽद्यभिन्नैकात्माधारत्वेनाभेदे सति सदसत्त्वे युगपदुच्येयाताम् ३ ॥ न च सम्बन्धाद् गुणानामभेदः, सम्बन्धस्य भिन्नत्वात्, छत्रदेवदत्तसम्बन्धाद्धि दण्डदेवदत्तसम्बन्धोऽन्यः, सम्बधिनोः कारणयोर्भिन्नत्वात्, न तावेकेन सम्बन्धेनाभिन्नावेव, सदसतोरात्मना सह सम्बन्धस्य भिन्नत्वात्, न सम्बन्धकृतं यौगपद्यमस्ति, तदभावाच्च नैकशब्दवाच्यत्वम् ४ ॥ न चोपकारकृतो गुणानामभेदः, यस्मान्नीलरक्ताद्युपकर्तृगुणाधीन उपकारः, ते च स्वरूपेण भिन्नाः सन्तो नीलनीलतररक्तरक्ततरादिना द्रव्यं रञ्जयन्ति विविक्तोपकारभाजः। एवं सदसत्त्वयोर्भेदात् सत्त्वेनोपरोक्तं सत्, असत्त्वोपरक्तमसदिति दूरापेतमुपकारसारूप्यम्, यत-

अवक्तव्यत्वम्

कालादयो वृत्तिहेतवः

---

१ 'सत्त्वान्यत्व' इति क-पाठः।

२ 'युगपत्तया विवक्षितादन्यैः द्रव्यविशेषपर्यायविशेषवाचकैः शब्दैः।

३ 'स्यादस्तीत्यादिरूपैरेतद्वक्तव्यव्यतिरिक्तैः। ४ 'मनुभवन्' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तदभेदेन शब्दो वाचकः स्यादिति ५ ॥ नाप्येकदेशे गुणिन आत्मन उपकारः समस्ति, येनैकदेशोपकारेण सहभावो भवेत्, गुणगुणिनोरुपकारकोपकार्यत्वे नीलादिगुणः सकल उपकारकः समस्तश्च घटादिरूपकार्यः, न चैकदेशे गुणो गुणी वा, यतो देशसहभावात् कश्चित् शब्दो वाचकः कल्प्येत ६ ॥ न चैकान्तवादिनां सदसत्त्वयोः संसृष्टमनेकान्तात्मकं रूपमस्ति, अवधृतैकान्तरूपत्वात्, यथैव हि शबलरूपव्यतिरिक्तौ शुक्लकृष्णावसंसृष्टौ नैकस्मिन्नर्थे वर्तितुं समर्थौ, एवं सदसत्त्वाभ्यां संसर्गाभावान्न युगपदभिधानमस्ति, नाप्येकशब्दः शुद्धः समासजो वाक्यात्मको वाऽस्ति गुणद्वयस्य सहवाचकः, क्रमेण सदसच्छब्दयोः प्रयोगे यद्यसच्छब्दः सदसत्त्वे यौगपद्येन ब्रवीति, एवं तर्हि स्वार्थवत् सत्त्वमप्यसत् कुर्यात्, तथैव सच्छब्दोऽपि स्वार्थवदसदपि सत् कुर्यात्, विशेषशब्दत्वाच्च सदित्युक्ते नासदभिधीयते, न चासदित्युक्ते सदित्युक्तं भवति, अतो युगपदवाचक एकशब्दः । अथ युगपत् सदसच्छब्दौ गुणद्वयस्य वाचकाविष्येते, ततः समासवाक्यमाख्यातादिपदसमुदायवाक्यं वा भवेत् तत्र च समासवाक्यं न वाचकम्, द्वन्द्वस्तावदुभयपदार्थप्रधानः प्लक्षन्यग्रोधवद्, अस्त्यादिभिः क्रियाभिस्तुल्ययोगित्वात्, क्रियाश्रयत्वाच्च द्रव्यस्य प्राधान्यं न गुणत्वम्, यश्च गुणक्रियाशब्दानां द्वन्द्वो रूपरसादीनामुत्क्षेपणावक्षेपणादीनां च, तत्रापि गुणाः शब्दशक्तिस्वाभाव्याद् द्रव्यरूपा एवोच्यन्तेऽस्त्यादिक्रियायोगित्वात्, अन्यथा द्वन्द्वाभावात् । अत्र चात्मा विशेष्यद्रव्यं सदसतोर्गुणवचनत्वमतो गुणस्य गुण्यभेदोपचारेणाभिधानम्, सन्नात्माऽसन्नात्मेत्यतो न द्वन्द्वः ॥ ननु च द्रव्येऽपि स्याद्वादोऽस्ति, न गुणविषय एव, यथा स्याद् घटः स्यादघट इति, अत्रापि हि द्रव्यं गुणरूपोपपन्नमेवोच्यते, शब्दशक्तिस्वाभाव्याद् विशेषणविशेष्यभावापत्तेर्द्रव्यस्य विशेष्यत्वात्, स्याद् घट इदं वस्त्विति वाक्यं च वृत्तेरभिन्नार्थं केवलं विभक्तिश्रवणाद् रूपेण भिद्यते, अतो वाक्येनापि युगपत् प्रयोगासम्भवः । समानाधिकरणसमासवाक्यमपि न सम्भवति, तत्र हि द्रव्यगुणयोः सामान्यविशेषभावे सति द्रव्यशब्दतायां सामानाधिकरण्यं नीलोत्पलादिवत्, अत्र च सदसतोर्गुणत्वात् परस्परं भेदे सति न सामानाधिकरण्यमद्रव्यशब्दत्वात् सामान्यविशेषरूपेणास्थितत्वान्नास्तिविशेषणविशेष्यसमानाधिकरणसमासः कर्मधारयश्चार्थयोरिष्यते, न चान्यत् प्रतिपदविहितं समासलक्षणमस्ति, तस्मात् समासाभावाद् युगपत् प्रयोगाभावस्तद्वाक्येऽपि सामर्थ्याभावाद् वृत्त्यनुरोधिवाक्यत्वाच्चातो न कर्मधारयः । नाप्याख्यातादिपदसमुदायो वाक्यं संश्चासंश्चात्मेति, भवत्यादिक्रियासम्बन्धात्, तत्र सामान्यशब्दो युगपदनेकमर्थमभिदध्यात् न चाभिदधीत, " अभिहितानां सामान्यशब्देन विशेषाणां नियमार्था पुनः श्रुतिः " इति न्यायात्, न वा ब्रूयादनेकमर्थमभिधानोपायासम्भवात्, " तन्मात्राकाङ्क्षणाद् भेदः स्वसामान्येन चोज्झितः " इति न्यायात्, सामान्यशब्देष्वेवं न विशेषशब्देषु धवखदिरादिषु, विशेषशब्दास्तु वाक्ये प्रयुज्यमानाः केवलाः

युगपदवाच्यता

---

१ ' त्वसदित्युक्ते ' इति क-पाठः । २ ' अथवा ' इति क-पाठः । ३ ' रूपापन्न ' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वार्थमेव ब्रुवते संश्चासंश्चेति, न त्वनेकमर्थं स्वार्थमात्राभिधानान्न सद्गुणद्वयाभिधायिता ॥ ननु च वाक्ये द्वयोरपि शब्दयोरेकतया युगपद्भावः, तन्न, पदेभ्यो वाक्यशब्दस्य शब्दान्तरत्वात्, एक एव हि शब्द इष्यते वाक्यम्, तस्य चार्थान्तरेणैकेनैव प्रतिभारूपेण भाव्यम्, अतोऽत्रापि गुणद्वयवचनस्य युगपच्छब्दद्वयस्यासम्भव इति। एवमुक्तात् कालादियुगपद्भावासम्भवात् समासवाक्यलौकिकवाक्ये युगपच्छब्दयोर्द्वयोरर्थयोश्च वृत्त्यसम्भवाद् युगपद्विवक्षायामवाच्य इत्येवं सर्वैकान्तावक्तव्यप्रतिषेधद्वारेण भाष्यकृता तृतीयविकल्पप्रणयनमकारि प्रेक्षापूर्वकारिणा कथञ्चिदवक्तव्यः, कथञ्चिद् वक्तव्योऽवक्तव्यादिशब्दैरात्मेति निरूपितम्। एतदेव च विकल्पत्रयमधुना भाष्यकारः स्फुटतरं भाष्येण दर्शयति। स्याद्वादो हि धर्मसमाश्रयः स्वसिद्धसत्ताकस्य च धर्मिणः सत्त्वासत्त्वनित्यत्वानित्यत्वाद्यनेकविरुद्धाविरुद्धधर्मकदम्बकाभ्युपगमे सति सप्तभङ्गीसम्भवः, तत्र सङ्ग्रहव्यवहाराभिप्रायात् त्रयः सकलादेशाः, चत्वारस्तु विकलादेशाः समवसेयाः ऋजुसूत्रशब्दसमभिरूढैवंभूतनयाभिप्रायेण। तत्रातीतविकल्पत्रयस्वरूपभावनायेदमुच्यते—

प्रथमो विकल्पः

भा०—पर्यायास्तिकस्य सद्भावपर्याये वा, सद्भावपर्याययोर्वा, सद्भावपर्यायेषु वा आदिष्टं द्रव्यं वा, द्रव्ये वा, द्रव्याणि वा सत्।

टी०—पर्यायास्तिकस्येत्यादि। पर्यायास्तिकग्रहणं धर्मविषयस्याद्वादप्रतिपत्त्यर्थम्, धर्मास्वरूपित्वसत्त्वमूर्तत्वादिरूपा धर्मिणः परिणामिनो नात्यन्तव्यतिरिक्ता इत्यतस्तत्प्रणाडिकया धर्मिविषयत्वमपि द्रव्यपर्याययोः संसृष्टत्वादेवं (देवमेव), अत्र च द्रव्यास्तिकपर्यायास्तिकनयद्वयमात्रवस्तुसमाश्रयः सिद्ध्यति स्याद्वादः, अन्यथा पर्यायनयाश्रय एव विकल्पसप्तकेन सकलवस्तुव्यापी स्यात् स्याद्वादः, सतो भवनं भावस्तद्भावलक्षणः परिणामः,

धर्मधर्मिस्याद्वादः

स चानेकरूपः क्रमयुगपद्भावित्वात्, सुरमनुष्यादेर्ज्ञानदर्शनादेश्चात्मनः सद्भावपर्यायत्वं, शेषधर्मादिद्रव्यवृत्ताः पुनरसद्भावपर्यायाः, वर्तमानकालावधिकाः पर्यायाः सद्भावलक्षणाः, ततोऽन्येऽतीतानागतवर्तमानकालविशिष्टास्त्वसद्भावपर्यायाः, तावत् परिणामपर्यायकलापाश्चात्मादयः पदार्थाः, स्वपरपर्यायानन्तस्वभावमेकं द्रव्यं सत्तारूपेण विवक्षितम्, चेतनाचेतनाहं महासामान्यमुत्सर्गः, पर्यायाः शक्तयोऽनन्ताः, तत्र स्वपर्यायान्वयवत् परपर्यायव्यतिरेकोऽपि वस्तुस्वभावावगतेरङ्गम्, तन्निवृत्त्यग्रहणे वस्तुसद्भावाग्रहणाद् विनिवृत्तिद्वारेणैवासद्भावपर्यायोपयोगः, न निवृत्तिरभावः, स एव हि तथा स्वभावो विनिवृत्ताशेषान्यविशेषलक्षणो निवृत्तिशब्दवाच्यः, तदेवमन्वयव्यतिरेकयोर्विधिप्रतिषेधविषययोरनियमातिप्रसङ्गपरिहारार्थं चिदुत्तरकिंवृत्तावद्योत्यविषयं स्याच्छब्दाग्रेसरमपि शब्दसहितं तथाविधान्यतमशब्दविशिष्टं वा धर्मधर्मिनिर्देशवाक्यं प्रयुज्यतेऽन्तर्भूतैवकारं गुणप्रधानभावव्यक्ति-

१ 'नेकविरुद्धधर्म' इति क-पाठः। २ ' रूपे विव० ' इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकृत्यर्थं प्रयुक्तान्यतरैवकारं वा परप्रतिपन्नैकान्तधर्मविशिष्टं वस्तु कथञ्चित् नियमकारिधर्मप्रत्यनीकपर्यायधर्मसम्बन्धीति स्यात् सत् स्यादनित्यनित्यादिधर्मात्मकमित्थं धर्म्यपीति वा स्याद्वादिभिः प्रतिज्ञायते, सुलभहेतुदृष्टान्तत्वात्, अतो द्रव्यास्तिकनयार्पणात् सोऽयं धर्म्यभेदेनैव व्यपदेशः प्रत्यभिज्ञाप्रधानत्वात्, पर्यायार्थिकनिर्देशादस्येदमिति भेदभाक्त्वम्, एकवचनादिप्रदर्शनं चैकस्यैव सत्त्वस्यासत्त्वस्य वा भजनाप्रभावितमनेकत्वमिति प्रतिपादनार्थम्, तत्र सद्भावपर्यायनिमित्तेनादेशेनार्पितमात्मरूपद्रव्यमित्येव सद्द्रव्यत्वमेव हि **सद्भावपर्यायः**, तद्धि द्रवति पर्यायान् द्रूयते वा तैर्द्रव्यमनेनाकारेणार्पितं स्यादस्तीत्युच्यते, तस्य द्रव्यत्वादेः पर्यायस्यात्मपरिणामिकारणप्रभावितत्वात् तद्भूयाच्च, तच्चास्तित्वं शेषषड्विकल्पापेक्षमेव सङ्गतिमनुभवति, सद्भावपर्यायद्वयनिमित्तादेव ज्ञानदर्शनोपयोगद्वयकारणक आदेशो द्रव्यम्, वक्ष्यत्युपरि—**द्रव्याश्रया निर्गुणा गुणाः** (अ०५,सू०४०) इति। तथा गणतिथसद्भावपर्यायकारणो वाऽयमादेशश्चैतन्यज्ञानदर्शनोपयोगाश्रयो द्रव्यमिति, एवं द्वे द्रव्ये बहूनि वाऽप्युक्तेन प्रकारेणार्पितानि सद्भावपर्यायापेक्षया सद्व्यपदेशभाञ्जि भवन्ति, अथवैकस्मिन् सद्भावपर्यायविषयेऽर्पितमादिष्टं द्रव्यं वा द्रव्ये वा द्रव्याणि वा सत् तथा द्वयोर्बहुषु विभाव्यम्, अविशिष्टस्य वा द्रव्यपदार्थस्यैकत्वद्वित्वबहुत्वपर्यायाः, तथा च तदर्प्यमाणं स्यादस्त्येकत्वेनार्पितमेकसङ्ख्याविशेषरूपतयैवास्ति न द्वित्वबहुत्वाकारेण, अनेकधर्मिणो हि वस्तुनः कदाचित् किञ्चिद् विवक्ष्यते, युगपद्भूरिवक्तृविवक्षायामप्येकत्वादयो यौगपद्येनार्पणावशादुपलभ्यन्ते, सकलपर्यायशक्तिसङ्गतेः परिणामिनः, एकपुरुषाधारमातुलभ्रातृभागिनेयादिशक्तिवत्, एकेन वक्त्रा विवक्षिते प्रयोजनवशादेकत्वद्वित्वादि च सम्भवदप्युपेक्षितं प्रयोजनाभावात्, अतस्तस्य तेनैव विवक्षिताकारेण कार्यसिद्धेः स्यादस्त्यात्मेत्युच्यते, न सर्वपर्यायार्पणया तदा तदस्ति तस्य वक्तरिति प्रथमविकल्पभावना ॥

सद्भावासद्भावापेक्षया द्रव्यस्यैकत्वादिविचारः

द्वितीयो विकल्पः

भा०—असद्भावपर्याये वा, असद्भावपर्याययोर्वा, असद्भावपर्यायेषु वा, आदिष्टं द्रव्यं वा, द्रव्ये वा, द्रव्याणि वाऽसत्।

टी०—असद्भावपर्याये वेत्यादिना द्वितीयविकल्पं भावयति। आत्मनो ज्ञानदर्शनादिव्यतिरिक्ता गतिस्थित्यवगाहोपकारस्पर्शादयोऽसद्भावपर्याया वर्तमानजन्मनो वाऽतीतानागतास्तज्जन्मनि वाऽतिक्रान्तागामिनः सर्वेऽप्यसद्भावपर्यायाः तदर्पणया स्यान्नास्त्येवात्मेति, न सर्वथा नास्तित्वप्रतिपत्तिः, यदाऽऽत्मा गत्युपकारकपर्यायेणार्पितस्तदाऽऽत्मद्रव्यमसत्, तत्स्वभावकत्वेन तस्याद्रवणात्, सद्भावपर्यायप्रभावितं वा द्रव्यं स्वपरिणामिप्रभाविता वा पर्यायास्तत्र चैकमपि नास्तीत्यतोऽसदित्युच्यते, परपर्यायार्पणया नास्ति तदित्यर्थः। शेषं पूर्ववद् विभाव्यम् ॥

---

१ ' तद्भावभाव ' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदानीमवक्तव्यताविभावनायाह—

तृतीयो विकल्पः

भा०—तदुभयपर्याये वा, तदुभयपर्याययोर्वा, तदुभयपर्यायेषु वा, आदिष्टं द्रव्यं वा, द्रव्ये वा, द्रव्याणि वा, न वाच्यं सदसदिति वा ।

टी०—तदुभयपर्याये वेत्यादि । तदित्यतिक्रान्तद्वयपरामर्शः, सद्भावासद्भावपर्यायद्वयसम्परिग्रहार्थः, उभयश्चासौ पर्यायश्च उभयपर्यायोऽस्तित्वनास्तित्वलक्षणः स चासावुभयपर्यायश्च तदुभयपर्यायस्तदुभयपर्यायनिमित्तस्तद्विषयो वाऽप्यादेशस्तेनार्पितमात्मतत्त्वमस्तिनास्तिरूपेण युगपद्विवक्षायामुक्तप्रकारभावनया न शक्यं वक्तुमित्यवाच्यम्, ताभ्यामुभयपर्यायाभ्यामादिष्टं युगपदात्मरूपं द्रव्यं वेत्यादि विकल्प्यते, **न वाच्यं सदित्यसदिति वा** सद् द्रव्यमसद् वा द्रव्यं न वक्तव्यम्, क्रमेण त्वादेशे भवत्येतदेवम्, सहभावार्पणायां तु न सच्छब्दवाच्यं नासच्छब्दाभिधेयम्, एकस्मिन् काले तादृग्विधवाचकशब्दाभावात् ॥ ननु च तदुभयपर्याये वेत्येकवचनमनुपपन्नम्, एकपर्यायविवक्षायामवक्तव्याभावात् । अत्रोच्यते—उभयग्रहणाद् द्वयमत्र गृह्यते । एवं तर्हि तदुभयपर्याययोर्वेत्यस्मादविशेषः, नैतदेवम्, यतस्तदुभयपर्याये विशेषविवक्षयाऽस्तित्वं हि स्वपर्यायविषयं परपर्यायविषयं चेत्युभयपर्यायस्तत् तु स्वपर्यायेणावच्छिद्यमानमिहास्तीति गृह्यते, तदेव च परपर्यायेणावच्छिद्यमानमात्मनि नास्तीति ग्राह्यमिदानीमुभयपर्यायो युगपदर्पणायां भवत्यवक्तव्यः, इतरत्र तु प्रधानभेदव्याख्यायां द्विवचनादिनिर्देशः समीचीनः, जातिविवक्षायां वा जातेरेकत्वादेकवचनसिद्धिरिति ॥

एवमेते त्रयः सकलादेशा भाष्येणैव विभाविताः सङ्ग्रहव्यवहारानुसारिण आत्मद्रव्ये, सम्प्रति विकलादेशाश्चत्वारः पर्यायनयाश्रया वक्तव्यास्तत्प्रतिपादनार्थमाह भाष्यकारः—

भा०—देशादेशेन विकल्पयितव्यमिति ।

टी०—इतिकरणो विकल्पेयत्ताप्रतिपादनार्थः । पर्यायास्तिकमिति नपुंसकलिङ्गप्रक्रान्तेर्विकल्पयितव्यमित्याह, किं[1] पुनः कारणं भाष्यकृता सकलादेशत्रयवदितरेऽपि चत्वारो विकलादेशा भाष्येण नोक्ता इति ? । अयमभिप्रायो भाष्यकारस्य लक्ष्यते—सकलादेशसंयोगाच्चतुर्णां निष्पत्तिरिति सुज्ञानाः, तत्राद्यद्वितीयविकल्पसंयोगे तुर्यविकल्पनिष्पत्तिः—स्यादस्ति च नास्ति चेति । प्रथमतृतीयविकल्पसंयोगे पञ्चमविकल्पनिष्पत्तिः—स्याद-

पर्यायादेशविकल्पाः

स्ति चावक्तव्यश्चेति । द्वितीयतृतीयविकल्पसंयोगे षष्ठविकल्पनिष्पत्तिः—स्यान्नास्ति चावक्तव्यश्चेति । प्रथमद्वितीयतृतीयविकल्पसंयोगे सप्तमविकल्पनिष्पत्तिः—स्यादस्ति च नास्ति चावक्तव्यश्चेति । तत्राद्येषु त्रिषु विकल्पेषु सकलमेव द्रव्यमादिश्यते, चतुर्थादिषु पुनर्विकल्पीकृतं खण्डश आदिश्यते । तदाह—**देशादेशेनेत्यादि** ।

---

१ ' किं कारणं पुनर्भाष्यकृता ' इति क-ख-पाठः । २ ' विकलीकृतं ' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सकलस्य वस्तुनो बुद्धिच्छेदविभक्तोऽवयवो देशस्तस्मिन् देशे आदेशो देशादेशस्तेन देशादेशेन विकल्पनीयं—व्याख्येयम्,आत्मादितत्त्वमित्येवं विकल्पचतुष्टयस्यापि ग्रहणम् । तत्र चतुर्थ उभयप्रधानो विकल्पः, क्रमेणोभयस्यापिशब्देनाभिधेयत्वात्, देशादेशो हि विकलादेशस्तस्य वस्तुनो वैकल्यं, स्वेन तत्त्वेनाप्रविभक्तस्यापि विविक्तं गुणरूपं स्वरूपेणोपरञ्जकमपेक्ष्य प्रतिकल्पितमंशभेदं कृत्वाऽनेकान्तात्मकैकत्वव्यवस्थायां नरसिंहनरसिंहत्ववत् समुदायात्मकमात्मरूपमभ्युपगम्याभिधानं विकलादेशः, न तु केवलसिंहसिंहत्ववदेकात्मकैकत्वपरिग्रहात्, यथा च प्रतिपादनोपायार्थपरिकल्पितानेकनीलपीतादिभागा निर्विभागमनेकात्मकमेकं चित्रं सामान्यरूपमुच्यते, तथा वस्त्वप्यनेकधर्मस्वभावमेकम्, दृष्टश्चाभिन्नात्मनोऽर्थस्य भिन्नो गुणो भेदकः, परुद्भवान् पटुरासीत् पटुतर एषमोऽन्य एवाभिसंवृत्तः, पटुत्वातिशयो गुणः सामान्यपाटवाद् गुणादन्यः, स वस्तुनो भेदं कल्पयति, भिन्नप्रयोजनार्थिना तथाश्रितत्वात्, अनेकात्मकं चैकत्वमात्मादेः, यतोऽनेकं शुद्धाशुद्धं द्रव्यार्थमाश्रित्य पर्यायनयं चैकात्मनो वृत्तिस्तथात्मकोऽसौ तद्भावभावित्वाद्, घटमृदात्मकत्ववत् पुरुषपाण्याद्यात्मकत्ववद् वा, अतस्ते तस्यारम्भकत्वाद् भागाः पुरुषस्येव पाण्यादयो वस्त्वंशमनुभवन्ति क्रमेण वृत्ताः क्रमयौगपद्याभ्यां वा, चतुर्थे तावत् समुच्चयात्मके न क्रमेण वृत्ताः, पञ्चमषष्ठयोरपचितक्रमयुगपद् वृत्ताः, सप्तमे प्रचितक्रमयौगपद्याभ्यां वृत्ताः संश्चासंश्चावक्तव्यश्चेत्यनेकबुद्धिबुद्धित्वाद् अनेकबुद्धिर्हि बुद्धिर्भवति द्रव्यपर्यायेषु सत्सु त्र्यात्मिका, यतोऽनेकां सद्रूपामसद्रूपामवक्तव्यरूपां च बुद्धिं भिन्नामिव क्रमवतीमिवाश्रित्याभिन्नैकाक्रमावस्तुरूपा वाक्यार्थबुद्धिर्भवति, तस्माद् भेदक्रमप्रतिभासविज्ञानहेतुत्वाद् भागास्ते भवन्त्यत्राविभक्तस्यैकस्यापि वस्तुनः । एवं चानेकस्वभावेऽर्थे सति वक्तुरिच्छावशात् कदाचित् केनचिद् रूपेण वक्तुमिष्यते, विवक्षायत्ता चैं वचसः सकलादेशता विकलादेशता च द्रष्टव्या, द्रव्यार्थजात्यभेदात् तु सर्वद्रव्यार्थभेदानेवैकं द्रव्यार्थं मन्यते, यदा पर्यायजात्यभेदाश्चैकं पर्यायार्थं सर्वपर्यायभेदान् प्रतिपद्यते तदा स्वविवक्षितस्वजातिभेदत्वात् सकलं वस्त्वेकद्रव्यार्थाभिन्नमेकपर्यायार्थाभेदोपचरितं तद्विशेषैकाभेदोपचरितं वा तन्मात्रमेकमद्वितीयांशं ब्रुवन् सकलादेशः स्यान्नित्य इत्यादिस्त्रिविधोऽपि नित्यत्वानित्यत्वयुगपद्भावैकत्वरूपैकार्थाभिधायी, यदा तु द्रव्यपर्यायसामान्याभ्यां तद्विशेषाभ्यां वा तद्यौगपद्येन वा वस्तुन एकत्वं तदतदात्मकं समुच्चयाश्रयं चतुर्थविकल्पे स्वांशयुगपद्वृत्तं क्रमवृत्तं च पञ्चमषष्ठसप्तमेषूच्यते तथाविवक्षावशात् तदा तु तथाप्रतिपादयन् विकलादेशः, ते हि द्रव्यपर्यायास्तस्य देशाः तदादेशेनादेश एको ह्यनेकदेश आत्माऽभिधीयते, तत्र द्रव्यार्थसामान्येन तावद् वस्तुत्वेन सन्नात्मा, पर्यायसामान्येनावस्तुत्वेनासन्निति, विशेषस्त्वात्मनि स्वद्रव्यत्वात्मत्वचेतनत्वद्रष्टृत्वज्ञातृत्वमनुष्यत्वादिरनेको द्रव्यार्थभेदः,तथा श्रुतप्रतियोगिनः

सकलादेशविकलादेशोत्पत्तिः

१ ' तच्च व० ' इति ग-पाठः । २ ' रूपमस्याभिधानं ' ३ ' वस्त्वनेक ' इति क–पाठः । ४ ' नेकबुद्धित्वात् ' इति क-पाठः । ५ ' च सकला ' इति ङ-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्याया असत्त्वाद्रव्यत्वानात्मत्वाचेतनत्वादयः, तद्द्रव्यक्षेत्रकालभावसम्बन्धजनिताश्च द्रव्यपर्यायवृत्तिभेदाः, तत्र द्रव्यार्थादेशात् स्वद्रव्यतया द्रव्यत्वम्, पृथिव्यादित्वेनाद्रव्यत्वं तद्विशेषैश्च घटादिभिः, क्षेत्रतोऽसङ्ख्याताकाशदेशव्यापितया, न सर्वव्यापितया, कालतः स्वजात्यनुच्छेदादभिन्नकालता, पर्यायादेशाद् घटादिविज्ञानदर्शनभेदाः क्रोधाद्युत्कर्षापकर्षभेदाश्च, तथाऽनन्तकालवृत्तस्ववर्तनाभेदात् कालभेदः, भावतो ज्ञत्वं क्रोधादिमत्त्वं च, एवं बहवो द्रव्यार्थपर्यायार्थयोर्वृत्तिभेदाः सर्वेऽपि तस्यांशाः, तैर्द्रव्यपर्यायरूपैर्वक्तुमिष्यमाणो नानारूप आत्मोच्यते । भावना तु स्यादस्ति च नास्ति च, द्रव्यार्थभेदेन चैतन्यसामान्येनास्ति, चैतन्यविशेषविवक्षायां वाऽस्त्येकोपयोगत्वात्, पर्यायतस्तु अचैतन्येन नास्ति, घटोपयोगकाले वा पटाद्युपयोगेनासन्, चैतन्येन तद्विशेषेण वा वर्तमान एव तदभावेन तद्विशेषाभावेन वर्तते इत्युभयाधीनस्तस्यात्मा, अन्यथाऽऽत्माभाव एव स्यात् । एवं सर्वसिद्धान्तेषु पदार्थाः परस्परविरुद्धार्थत्वात् तदतद्रूपसमुच्चयात्मकाश्चतुर्थविकल्पोदाहरणीयाः ॥

चतुर्थो विकल्पः

पञ्चमविकल्पस्तु स्यादस्ति चावक्तव्यश्चात्मेति, तत्रानेकद्रव्यपर्यायात्मकस्य सतः कञ्चिद् द्रव्यार्थविशेषमाश्रित्यास्तीत्यात्मनो व्यपदेशः, तस्यैवान्यात्मद्रव्यसामान्यं तद्विशेषं द्वयं वाऽङ्गीकृत्य युगपद्विवक्षायामवक्तव्यता, स्फुटतरमेतद् विभाव्यते, स्यादस्त्यात्मा द्रव्यत्वेन द्रव्यविशेषेण वा जीवत्वेन मनुष्यत्वादिना वा द्रव्यपर्यायसामान्यमुरीकृत्य, वस्तुत्वावस्तुत्वसत्त्वासत्त्वादिना विशेषेण वा मनुष्यत्वामनुष्यत्वादिना युगपदभेदविवक्षायामवाच्यः, यतः सर्वेऽपि तस्यैकस्यात्मनस्तद्वैव विकल्पाः सम्भवन्तीति ॥

पञ्चमो विकल्पः

षष्ठविकल्पोऽपि त्रिभिरात्मभिर्व्यंशः स्यान्नास्ति चावक्तव्यश्चात्मेति, नान्तरेणात्मभेदं वस्तुगतं नास्तित्वमवक्तव्यरूपानुविद्धं शक्यं कल्पयितुं वस्तुनः, तथापि सद्भावात् तत्र नास्तित्वं पर्यायाश्रयम्, स च पर्यायो युगपद्वृत्तः क्रमप्रवृत्तो वा, सहावस्थाव्यविरोधादात्मनो धर्म एककाल एव, यथा चेतनोपयोगवेदनाहर्षसम्यक्त्वहास्यरतिपुरुषवेदायुर्गतिजात्यादिसत्त्वद्रव्यत्वामूर्तत्वकर्तृत्वभोक्तृत्वान्यत्वानादित्वासङ्ख्यातप्रदेशत्वनित्यत्वादिः,क्रमवर्ती तु क्रोधादिदेवत्वादिबालत्वादिज्ञानितादिः स्वस्थानेऽनेकभेदवृत्तः, तत्रैकोऽवस्थितो द्रव्यार्थो जीवनामा नैवास्ति कश्चिच्चेतनाव्यतिरिक्तः क्रोधादिक्रमवृत्तधर्मरूपनैरन्तर्यमात्रव्यतिरिक्तो वा, अत एव तु धर्मास्तथासन्निविष्टाः सत्त्वव्यपदेशव्यवहारभाजो भवन्तीति, अतो नास्ति पर्यायार्थादेवंविधो द्रव्यार्थस्य कश्चिदंशो नास्तीति तेन रूपेणाभावात्, न पुनः सर्वथैव नास्तित्वम्, विशिष्टस्याभावस्य विवक्षितत्वात्, पर्यायांशः सर्वार्थज्ञातृत्वात्सत्सर्वव्यापारविनियोगात् सर्ववस्तुत्वेन सन्निति द्रव्यार्थांशः, आभ्यां सह विवक्षायामवाच्य इति द्वितीयोऽंशः ॥

षष्ठो विकल्पः

१ 'वाऽन्य आत्म०' इति ग-पाठः । २ 'वत्वादिज्ञातादिः देवत्वादिस्वस्थाने' इति क-ख-पाठः । ३ 'त्वासर्व०' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधुना सप्तमविकल्पश्चतुर्भिरंशैरुच्यंशः । कश्चिद् द्रव्यार्थविशेषमाश्रित्यास्तित्वं पर्यायविशेषं च कश्चिदङ्गीकृत्य नास्तित्वं समुच्चितरूपं भवति, द्वयोरपि प्राधान्येन विवक्षितत्वात्, य(त)था द्रव्यसामान्येन पर्यायसामान्येन च युगपदवक्तव्यः, स्यादस्ति च नास्ति चावक्तव्यश्चात्मेति । भावना तु द्रव्यार्थात् सति द्रव्यत्वे देहेन्द्रियादिव्यतिरिक्तात्मत्वेन विशेषेण नास्तित्वमतोऽस्ति च नास्ति च स एवात्मा, द्रव्यपर्यायसामान्यसदसत्त्वाभ्यां युगपदवाच्य इति । एवमर्थानुरोधाद् विवक्षावशाच्च सप्तधैव वचनप्रवृत्तिः, नान्यथाऽपि, प्रवृत्तिनिमित्ताभावात्, एष च मार्गो द्रव्यार्थपर्यायार्थाश्रयः, तौ च सङ्ग्रहाद्यात्मकौ, सङ्ग्रहादयश्चार्थशब्दनयरूपेण प्रधाविताः, तत्र सङ्ग्रहव्यवहारर्जुसूत्रैरर्थनयैर्यौ द्रव्यार्थपर्यायार्थौ तदाश्रयैषा सप्तभङ्गी । तत्र अनपेक्षितोपदेशकशब्दव्यापारमिन्द्रियानिन्द्रियनिमित्तमर्थरूपोत्पादितं मतिज्ञानम्, अर्थनया वक्तृपरिच्छेदविषयाः, ते त्वर्थपृष्टैनैवार्थं गमयन्ति । शब्दनयास्तु साम्प्रतिकसमभिरूढैवंभूतनयाः श्रोतृविषयाः श्रुतज्ञानात्मकाः शब्दरूपरूपितविज्ञानत्वाच्छब्दप्रमाणकाः, यच्छब्द आह यथा च तथैवार्थ इति शब्दपृष्टेनार्थपरिच्छेदं कुर्वन्ति, अत एवैतेष्वभिधानस्वरूपशुद्धिपरा चिन्ता, चक्षुर्विमलीकरणाञ्जनवत् । तत्रार्थनयाः सत्त्वासत्त्ववर्तमानसत्त्वमात्रैषिणः प्रत्येकात्मकाः संयुक्ताश्च सप्तविधवचननिर्वचनप्रत्यलाः । विविक्तसत्त्वमात्रपरिग्रहात् सत्त्वसङ्ग्रहः, अन्यासत्त्वमेव सत्त्वमिति व्यवहारः, वर्तमानप्रधानत्वाद् वर्तमानैव सत्त्वमृजुसूत्रः । तत्र स्यादस्तीति सङ्ग्रहः १ स्यान्नास्तीति व्यवहारः २ सङ्ग्रहव्यवहारयोगात् स्यादवक्तव्यः ३ सङ्ग्रहव्यवहारविभागसंयोगादेव स्यादस्ति च नास्ति च ४ स्यादस्त्यवक्तव्यश्चेत्यत्र सङ्ग्रहः सङ्ग्रहव्यवहारौ चाविभक्तौ ५ स्यान्नास्त्यवक्तव्यश्चेत्यत्र व्यवहारः सङ्ग्रहव्यवहारौ चाविभक्तौ ६ स्यादस्ति नास्त्यवक्तव्यश्चेत्यत्र विभक्तौ सङ्ग्रहव्यवहारावविभक्तौ वा७,इत्येवमर्थपर्यायैः सप्तधा वचनव्यवहारः। व्यञ्जनपर्यायाः शब्दनयास्ते त्वभेदभेदद्वारेण वचनमिच्छन्ति, शब्दनयस्तावत् समानलिङ्गानां समानवचनानां च शब्दानामिन्द्रशक्रपुरन्दरादीनां वाच्यं भावार्थमेवाभिन्नमभ्युपैति, न जातुचिद् भिन्नलिङ्गं भिन्नवचनं वा शब्दं स्त्री दारास्तथाऽऽपो जलमिति, समभिरूढस्तु प्रत्यर्थं शब्दनिवेशादिन्द्रशक्रादीनां पर्यायशब्दत्वं न प्रतिजानीते, अत्यन्तभिन्नप्रवृत्तिनिमित्तत्वाद् भिन्नार्थत्वमेवानुमन्यते, घटशक्रादिशब्दानामिवेति, एवंभूतः पुनर्यथासद्भावं वस्तु वचसो गोचरमापृच्छतीच्छति, चेष्टाविष्ट एवार्थो घटशब्दवाच्यश्चित्रालेखनोपयोगपरिणतश्च चित्रकारः, चेष्टारहितस्तिष्ठन् घटो न घटशब्दवाच्यः, तच्छब्दार्थरहितत्वात्, कुटशब्दवाच्यार्थवत्, नापि शुञ्जानः शयानो वा चित्रकाराभिधानाभिधेयश्चित्रज्ञानोपयोगपरिणतिशून्यत्वाद् गोपालादिवत्, एवमभेदभेदार्थवाचिनोऽने-

सप्तमो विकल्पः

नयत्रयापेक्षया सप्तभङ्गी

शब्दनयाः

---

१ ' अन्यासत्त्वमिति' इति क-पाठः । २ ' चैत्रालेख्यतोपयोग' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कैकशब्दवाच्यार्थावलम्बिनश्च शब्दप्रधाना अर्थोपसर्जनाः शब्दनयाः प्रदीपवदर्थस्य प्रतिभासकाः व्यञ्जनपर्यायसंज्ञकाः। तदेवमर्थव्यञ्जनपर्यायार्पणानर्पणद्वारैकानेकात्मकैकार्थनिरूपणवदभिधानप्रत्ययविषयाऽपि भावनाऽभिधेया। तत्र पुद्गलद्रव्यपरिणतिविशेषः शब्दोऽभिधानः, पुद्गलद्रव्यं चातीतवर्तमानागामिभूरिपर्यायपरिणाम्यर्पितभजनापेक्षया सदसन्नित्यानित्याद्यनेकधर्मात्मकम्, प्रत्ययोऽपि हि ग्रहणलक्षणात्मद्रव्यांशापेक्षया सङ्ख्यापरिमाणाकाराद्यनेकरूपपर्यायापेक्षया च सदसन्नित्यानित्यादिस्वभाव इत्येवं सदसन्नित्यानित्यादिस्वभावं जगत् पञ्चास्तिकायात्मकमर्पितानर्पितलक्षणसकलशास्त्रगर्भत्रिसूत्रीविन्यासस्याद्वादप्रक्रियासङ्गतेः सिद्धम्।३१॥

भा०—अत्राह—उक्तं भवता (अ० ५, सू० २६)—सङ्घातभेदेभ्यः स्कन्धा उत्पद्यन्ते इति। तत् किं संयोगमात्रादेव सङ्घातो भवति, आहोस्विदस्ति कश्चिद् विशेष इति ?। अत्रोच्यते—

टी०—अत्राह—उक्तं भवतेत्यादिः सम्बन्धग्रन्थः। प्रतिपादितार्थस्मारणप्रज्ञेनाज्ञः प्रकृतार्थशेषसम्बन्धमभिधापयति, कारणायत्तजन्मा कार्यप्रसवः, सङ्घातात् स्कन्धाः समुत्पद्यन्ते, इतिशब्दो यस्मादर्थः, तच्छब्दस्तस्मादर्थः, यस्मात् सङ्घातात् स्कन्धानामुत्पत्तिः प्रतिधीयते तस्मात् सन्देहः, किं संयोगमात्रादेव द्व्यणुकादिलक्षणः स्कन्धो भवति, आहोस्विदस्त्यत्र कश्चित् संयोगविशेष इति, मात्रग्रहणं सेनावनादिवत् केवलसंसक्तिप्रतिपादनार्थम्, संयोगमात्रं न तु संयोगविशेषाः, इतिशब्दः आशङ्क्येयत्ताप्रतिपत्तये, आचार्येणापि चित्तपरिवर्ती संयोगविशेषस्तत्प्रतिपादनायात्रोच्यते इत्याह, अत्रेति प्रश्नविषयाभिसम्बन्धः यत्पृष्टस्तन्निश्चीयते विधीयत इति, मनीषितसंयोगविशेषाभिव्यक्त्यर्थमाह—

पुद्गलबन्धहेतुः

भा०—सति संयोगे बद्धस्य सङ्घातो भवतीति। अत्राह—अथ कथं बन्धो भवतीति ?। अत्राह—

टी०—सतीत्यादि। सति परस्परसङ्घट्टलक्षणे संयोगे बद्धस्यैव—एकत्वपरिणतिभाजः सङ्घातात् स्कन्धोत्पत्तिः, एवकारार्थमितिकरणम्, पुद्गलानां पर्यायानन्त्येऽपि स्वजात्यनतिक्रमेण परस्परविलक्षणपरिणामाहितसामर्थ्यात् सति संयोगविशेषे केषाञ्चिदेव बन्धो न सर्वेषामिति निश्चितमेतत्, संयोगविशेषात् स्कन्धोत्पादः, न पुनर्व्यज्ञायि स्वरूपेण संयोगविशेषः, तत्परिज्ञानाय प्रश्नेनोपक्रमं पुनः परस्य प्रकटयति—अत्राहेति। सति सङ्घाते बन्धस्य सतः स्कन्धपरिणाम इति बन्धमेव पृच्छति—अथ बन्धः कथं भवतीति। अथेत्यानन्तर्यार्थः, बद्धस्य स्कन्धपरिणामो भवतीत्युक्तेऽनन्तरं च य एव जिज्ञास्यते बन्धः—एकत्वपरिणामः स कथं—केन प्रकारेणाण्वोरणूनां वा जायते[3] इति, किं परस्परानुप्रवेशेनाहोस्वित् सार्वात्म्येन प्रवे-

---

१ 'परिणत्यर्पितभजनापेक्षया' इति क-ख-पाठः। २ 'त्रित्यादि' इति क-ख-पाठः। ३ 'जायन्त' इति ग-पाठो विचारणीयः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शाभावेऽपीति ? अत्रोच्यते—परस्परानुप्रवेशस्तावन्नैवेष्यतेऽण्वोरणूनां वा शुषिराभावात्, प्राक् चैतन्निर्णीतं प्रपञ्चतः, स्थापितं चेदं—परिणतिविशेषादणूनां सर्वात्मना बन्धो भवति, अयस्पिण्डतेजसोरिवान्योन्यप्रदेशाभावेऽपि गुणविशेषात् सार्वात्म्येनेष्यते बन्धः । कीदृशः पुनर्गुणविशेषात् स तादृशो बन्धः स्यादित्याह—

सूत्रम्—स्निग्धरूक्षत्वाद् बन्धः ॥ ५–३२ ॥

भा०—स्निग्धरूक्षयोः पुद्गलयोः स्पृष्टयोर्बन्धो भवति ॥ ३२ ॥

अत्राह–किमेष एकान्त इति ? । अत्रोच्यते—

टी०—स्निग्धरूक्षयोरित्यादि भाष्यम् । स्नेहो हि गुणः स्पर्शाख्यः, तत्परिणामः स्निग्धः, तथा रूक्षोऽपि, एकः स्निग्धोऽपरो रूक्षः, तयोर्भावः स्निग्धरूक्षत्वं तत्परिणामापत्तिः तस्मात् स्निग्धरूक्षत्वादिति हेतौ पञ्चमी, अण्वोरणूनां वा बन्धो भवति, स्निग्धरूक्षयोरिति भाष्यकृता विभज्य द्विवचनप्रयोगोपन्यासोऽकारि सर्वाल्पस्कन्धज्ञापनाय, नातः परमल्पावयवः स्कन्धोऽस्ति, स्निग्धरूक्षव्यवहारः क्षेत्रकालविषयोऽपि भाक्तः समस्तीति तद्व्युदासाय पुद्गलयोरित्याह, पूरणाद् गलनाच्च पुद्गलाः, पूरकत्वेन स्कन्धान् निर्वर्तयन्ति, गलनेन स्कन्धभेदं विदधति, स्पृष्टयोरिति संयुक्तयोर्नासंयुक्तयोरिति, अनेन संयोगमात्रं गृहीतं संयोगपूर्वकसकलबन्धज्ञापनार्थम्, तत्र बन्धात् प्रतिघातो जायतेऽण्वोरणूनां वा, प्रतिघातश्चैकदेशावगाहेऽन्योन्यं प्रतिहननम्, ततो रौक्ष्यस्नेहविशेषाद् बन्धः-अण्वन्तरेणाणोः श्लेषः, मृद्रजोभिस्तृणादिबन्धवत्, सन्ति ह्यणव एकगुणस्निग्धादिक्रमेण सङ्ख्येयासङ्ख्येयानन्तानन्तगुणस्निग्धाः, तथैकगुणरूक्षादिक्रमेण हीनमध्यमोत्कृष्टसङ्ख्येयासङ्ख्येयानन्तानन्तगुणरूक्षाः, तोयाजागोमहिष्युष्ट्रीक्षीरघृतस्नेहानुमानप्रकर्षाप्रकर्षवत्, चिक्कणत्वलक्षणः परिणामः स्नेहः, तद्विपरीतो रूक्षः, ततश्च संश्लेषकारणपरिणतिमत्त्वात् सर्वात्मसंयोगबन्धप्रसिद्धिः, प्रत्यक्षश्चैवंविधद्रव्याणां बन्धविशेषो नातीव युक्तिमपेक्षते, युक्तिरपि—संहतमहद्द्रव्यं घटादि प्रत्यक्षमणुबन्धस्यानुमापकम्, नाणुसत्संहतिविशेषमन्तरेण महत् संहतं युज्यते, एवमेव चापकर्षणधारणनोदनादिव्यवहारसिद्धिर्न त्वन्यथा, तथानुपग्रहणात् प्रतीघातः परमाणोः, लोकान्ते ह्युपग्राहकधर्मद्रव्याभावात् प्रतिहन्यतेऽणुरगतिः सन्, तथाऽणोः प्रतीघातो बन्धनयोग्यं परिणाममन्तरेणाप्यते, नापतता (?) स्पर्शित्वान्मूर्तिमत्त्वाच्च, सप्रतिघातस्य च बन्धो दृष्टः श्लेषरूपरागादेः, अतः सुष्ठूच्यते—**स्निग्धरूक्षत्वात् पुद्गलयोः संयुक्तयोर्बन्धो भवतीति । इतिकरण उपप्रदर्शनार्थः, एवं गृह्णाणेति ॥ ३२ ॥**

अत्राहेत्यादिसम्बन्धप्रतिपत्तिः । किमेष एकान्त इति ? । किमिति प्रश्नार्थः, एष

---

१ ' नोक्तः ' इति क-पाठः । २ ' क्षादि...नन्तगुणरू ' इति पाठः ग-पुस्तके नास्ति, तत्र तु मुद्रणदोष इति स्पष्टं प्रतिभाति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यन्तरयोगार्थोऽभिसम्बन्धः, स्निग्धगुणानां रूक्षगुणानां च बन्धो भवतीति, इतिशब्दोऽवधारणार्थः। किमेष नियम एव सर्वस्य स्निग्धगुणस्य रूक्षगुणेन बन्ध इति, एवं पृष्टे अत्रोच्यते इत्याह। सति विधावविशेषेण प्रवृत्तेर्निकृष्टमध्यमोत्कृष्टस्निग्धरूक्षाणामनभिप्रेतार्थप्रसङ्गविनिवृत्त्यर्थमिदमभिदध्महे—

सूत्रम्-न जघन्यगुणानाम् ॥ ५-३३ ॥

टी०—अतिप्रसक्तस्य विधेरयमपवादारम्भः ॥

भा०—जघन्यगुणस्निग्धानां जघन्यगुणरूक्षाणां च परस्परेण बन्धो न भवति ॥ ३३ ॥

टी०—जघन्यगुणस्निग्धानामित्यादि भाष्यम्। प्रकृतत्वाद् बन्धः प्रतिषिध्यते नञ्शब्देन, केषां बन्धो न भवति? जघन्यगुणस्निग्धानां जघन्यगुणरूक्षाणां च। जघने भवो जघन्यः, (जघन्य इवान्यो जघन्यः) निकृष्ट इत्यर्थः, जघन्यश्चासौ गुणश्च जघन्यगुणः (जघन्यगुणः) स्निग्धो येषां ते जघन्यगुणस्निग्धाः पुद्गलास्तेषां जघन्यगुणरूक्षाणां च परस्परेण बन्धः प्रतिषिध्यते, परस्परेणेति सजातीयविजातीयविशेषप्रतिपादनम्। स्वस्थाने स्निग्धस्य स्निग्धेन नेष्यते बन्धः, रूक्षस्यापि रूक्षेण नैवास्ति बन्धः, तथा परस्थानेऽप्येकगुणस्निग्धस्यैकगुणरूक्षेण नैवास्ति बन्धः, सत्यप्येषां संयोगे स्निग्धरूक्षगुणत्वे च न परस्परमेकत्वपरिणतिलक्षणो बन्धः समस्ति, किं पुनः कारणमत्रैषां बन्धो न भवतीति? तादृग्विधपरिणतिशक्तेरभावात्, परिणामशक्तयश्च द्रव्याणां विचित्राः क्षेत्रकालाद्यनुरोधिन्यः प्रयोगविस्रसापेक्षाः प्रभवन्ति, न जातुचित् पर्यनुयोगवशेन पर्यनुयोक्तुरिच्छामनुरुध्यते, जघन्यश्च स्नेहगुणः स्तोकत्वादेव जघन्यगुणरूक्षं पुद्गलं न प्रत्यलः परिणामयितुम्, तथा रूक्षगुणोऽप्यल्पत्वाज्जघन्यगुणस्निग्धं नात्मसात्कर्तुं समर्थः, सङ्ख्यावाची चायं गुणशब्दः, यथैक एवास्य गुणः पुरुषस्येति, आधिक्यार्थे वा द्विगुणत्रिगुणमिति यथा, अस्ति च स्नेहादिगुणानां प्रकर्षापकर्षभेदः, तद् यथा—जलादजाक्षीरं स्निग्धम्, अजाक्षीराद् गोपयः, गोपयसो महिषीपयः, ततः करभीपय इत्युत्तरोत्तरस्नेहाधिकत्वम्, एषामेव पूर्वं पूर्वं रूक्षम्, तत्रैकगुणस्निग्धस्यैकगुणस्निग्धेनैव द्व्यादिना सर्वेण सदृशेन सङ्ख्येयासङ्ख्येयानन्तानन्तगुणस्निग्धेन वा नास्ति बन्धः, तथैव चैकगुणरूक्षस्यैकगुणरूक्षादिभिः सदृशैर्यावदनन्तगुणरूक्षैर्न भवति बन्धः, सूत्रव्यापारस्तु जघन्यगुणस्निग्धानां जघन्यगुणरूक्षाणां च पुद्गलानां नास्ति बन्धः परस्परम्, शेषं वक्ष्यमाणसूत्रव्याख्येयमुक्तं प्रसङ्गतः, इत्येवमेतौ जघन्यगुणस्निग्धरूक्षौ विहायान्येषां मध्यमोत्कृष्टस्निग्धानां रूक्षैः सह

---

१ अत्र चिह्नान्तस्थो भागः क-ख-योर्नास्ति। २ 'रूक्षादिभिः' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्निग्धैश्च रूक्षाणां परस्परेण बन्धो भवति इति, अर्थापत्तिलभ्योऽयमर्थः सामर्थ्यादवगम्यते, स च यादृशो यथा च भवति तं तादृशं तथा वक्ष्यामः, इहैतावदुपयुज्यत इति ॥ ३३ ॥

भा०—अत्राह—उक्तं भवता—जघन्यगुणवर्जानां (स्निग्धानां) रूक्षेण रूक्षाणां च स्निग्धेन सह बन्धो भवतीति। अथ तुल्यगुणयोः किमत्यन्तप्रतिषेध इति ?। अत्रोच्यते—न जघन्यगुणानामित्यधिकृत्येदमुच्यते—

टी०—अत्राहेत्यादिना ग्रन्थेन सम्बन्धं विधत्ते। प्रतिपादितं भवताऽनन्तरं जघन्यगुणस्निग्धरूक्षयोर्नास्ति बन्धः, तन्निषेधादन्येषां **जघन्यगुणवर्जानां** बन्धप्रसङ्गे सदृशानां प्रतिषेधे यत्नो विधेय इत्यर्थापत्तिप्रापितं चेदं द्विगुणस्निग्धस्यैकगुणरूक्षेण सह एकगुणस्निग्धस्य द्विगुणरूक्षेण **सह बन्धो भवतीति**। एतदुक्तं भवति—निकृष्टस्निग्धरूक्षयोर्बन्धप्रतिषेधान्मध्यमोत्कृष्टस्निग्धरूक्षगुणानां परस्परेण बन्धः प्रतिज्ञातोऽर्थतः पृथगधिकरणानाम्। **अथ तुल्यगुणयोः किमत्यन्तप्रतिषेध** इति प्रश्नयति, प्रस्तुतानन्तरवचनोऽयमथशब्दः, तुल्यगुणयोः स्निग्धाधिकरणयोरेकैकगुणयोः किमेकान्तेनैव प्रतिषेध इति प्रश्ने कृते **अत्रोच्यत** इत्याह। अत्यन्तप्रतिषेध एव, काधिकृत इति चेदित्याह, **न जघन्यगुणानामित्यधिकृत्येदमुच्यते**, यथैव स्निग्धरूक्षाणां जघन्यविषयाणां बन्धाभावस्तथैव गुणसाम्ये सदृशानां बन्धाभाव इति सम्बन्धनीयम्। अथवा स्निग्धरूक्षयोर्भिन्नाधिकरणयोर्बन्धप्रतिषेधः कृतोऽथ तुल्यगुणयोः किं प्रतिपत्तव्यमिति सामर्थ्यादध्याहारं कृत्वा व्याख्येयम्, तुल्यगुणयोः स्निग्धाधिकरणयो रूक्षाधिकरणयोर्वा किं बन्धनिषेधः प्रतिपत्तव्यः, आहोस्विद् बन्धविधिरिति ?। आचार्य आह—अत्यन्तप्रतिषेध इति, एकान्तेनैव प्रतिषेधः, स पुनर्न जघन्यगुणानामित्यत्र सूत्रेऽधिकृतस्तमाश्रित्योच्यते—

सूत्रम्—गुणसाम्ये सदृशानाम् ॥ ५-३४ ॥

टी०—अथवा स्निग्धरूक्षगुणः ॥

भा०—गुणसाम्ये सति सदृशानां बन्धो न भवति। तद् यथा—तुल्यगुणस्निग्धस्य तुल्यगुणस्निग्धेन, तुल्यगुणरूक्षस्य तुल्यगुणरूक्षेणेति ॥

टी०—गुणसाम्ये सतीत्यादि भाष्यम्। गुणाः—स्निग्धरूक्षास्तेषां समता साम्यं तस्मिन् गुणसाम्ये, सतीत्यनेन विशिष्टार्था सप्तमीं सूचयति, "यस्य च भावेन भावलक्षणम्" (पा०अ०२, पा०३,सू०३७)इति निमित्तसप्तम्येषा, सति गुणसाम्ये तुल्यसङ्ख्यत्वे **सदृशानां बन्धो न भवति**, गुणानां साम्येन ये सदृशाः, न क्रियासाम्येन, ते सति गुणसाम्ये सदृशास्तेषां बन्धो नास्ति, पूर्वापवादविशेषसमर्थनार्थमेवेदं—न जघन्यगुणानाम् (सू० ३३) इत्यभिधाय तद्विशेषमपवदते, तं चापोद्यमानमुदाहरणेन स्पष्टयति। तद् यथेत्युदाहरणोपन्यासः, **तुल्यगुणस्निग्धस्य तुल्यगुणस्निग्धेन तुल्यगुणरूक्षस्य तुल्यगुणरूक्षेणेति** सामान्योपन्यासः समस्तैकगुणस्निग्ध-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रूक्षादिसमगुणविकल्पसङ्ग्रहार्थः। तुल्यगुणः स्निग्धो यस्य स तुल्यगुणस्निग्धः, तुल्यः स्नेहगुणो यस्येत्यर्थः, तस्यानेन सदृशेनैव तुल्यगुणस्निग्धेन बन्धो नास्ति, परस्परं परिणतिशक्तेरभावात्, तुल्यबलगुणमल्लद्वयान्योन्यानभिघातवद्, एकगुणस्निग्धो हि नैकगुणस्निग्धेन बध्यते, तथाऽनन्तपर्यवसानाद् द्विगुणादिस्निग्धाः द्विगुणादिस्निग्धैः समगुणैरनन्तपर्यवसानैः सह न बध्यन्ते, एवमेकगुणरूक्षोऽप्येकगुणरूक्षेण सह न बध्यते, तुल्यदुर्बलगुणमल्लद्वयान्योन्यानभिघातवदेव, तथा द्विगुणादिरूक्षा न द्विगुणादिरूक्षैरनन्तावसानैः सह बन्धमनुभवन्तीति ॥

भा०—अत्राह—सदृशग्रहणं किमपेक्षत इति ?। अत्रोच्यते—गुणवैषम्ये सदृशानां बन्धो भवतीति ॥ ३४ ॥

टी०—अत्राह—सदृशग्रहणं किमपेक्षत इति। एवं मन्यते प्रष्टा, गुणसाम्ये सति बन्धो न भवति, येषां च समा गुणाः प्रकर्षापकर्षवृत्ताः प्रतिविशिष्टसङ्ख्यावच्छिन्नास्ते नियमेन गुणैः सदृशाः, इत्येतावताऽभिलषितेऽर्थे सिद्धे सदृशग्रहणमतिरिच्यमानमपरार्थापेक्षि भवति, तं चापरमर्थमजानानः प्रश्नयति—किमपेक्षते सदृशग्रहणमिति, आचार्योऽपि विशिष्टार्थप्रतिपत्तये सदृशग्रहणं चेतसि निधायाह—**अत्रोच्यत इति। गुणवैषम्ये सदृशानां बन्धो भवतीति,** स्नेहगुणवैषम्ये रूक्षगुणवैषम्ये च बन्धः समस्ति, केषामत आह—**सदृशानामिति।** एनमर्थं सदृशग्रहणमपेक्षते, सादृश्यं च स्नेहगुणमात्रनिबन्धनं रौक्ष्यगुणमात्रनिबन्धनं च सङ्ख्यानमाश्रित्य ग्राह्यम्, अतः सदृशानामपि स्नेहगुणसामान्येन[3] रौक्ष्यगुणसामान्येन च प्रकर्षापकर्षवृत्ततद्गुणवैषम्ये सति भवत्येव बन्धः, तद्यथा—एकगुणस्निग्धस्त्रिगुणस्निग्धेन, द्विगुणस्निग्धश्चतुर्गुणस्निग्धेन, त्रिगुणस्निग्धः पञ्चगुणस्निग्धेन, चतुर्गुणस्निग्धः षड्गुणस्निग्धेनेत्येवं यावदनन्तगुणस्निग्धो विषमगुण इति। अन्ये त्वभिदधति सूरयः—एकगुणस्निग्धस्य द्विगुणस्निग्धेनैकगुणरूक्षस्य द्विगुणरूक्षेणेति भावनीयम्, एतच्च सम्प्रदायेनागमोपनिबन्धदर्शनेन च प्रायो विसंवदति इत्यनादरः ॥ ३४ ॥

भा०—अत्राह—किमविशेषेण गुणवैषम्ये सदृशानां बन्धो भवतीति ?। अत्रोच्यते—

टी०—अत्राहेत्यादिः सम्बन्धप्रतिपादनपरो ग्रन्थः, **किमविशेषेण गुणवैषम्ये सदृशानां बन्धो भवतीति,** यद्यविशेषेण[4] तत एकगुणस्निग्धस्य द्विगुणस्निग्धेनापि बन्धप्रसङ्गोऽनिष्टं चैतदा(दित्या ?)रेकमाणे प्रष्टरि सूरिराह—**अत्रोच्यत इति,** न सर्वेषामेव, **सदृशानां, किं तर्हि ?**

१-२ ' न्याभिघात० ' इति ग-पाठः। ३ 'सामान्यगुणेन' इति ग-पाठः। ४ 'तर्ह्यवि' इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रम्—द्व्यधिकादिगुणानां तु ॥ ५-३५ ॥

भा०—द्व्यधिकादिगुणानां तु सदृशानां बन्धो भवति ।

टी०—द्व्यधिकादिगुणानां तु सदृशानां बन्धो भवतीत्यादि भाष्यम् । द्वाभ्यां गुणविशेषाभ्यामन्यस्मादधिको यः परमाणुः स आदिर्येषां ते द्व्यधिकादिगुणाः । गुणशब्दोऽत्र गुणिवचनः । गुणवन्तो गुणाः परमाणव इत्यर्थः । तेषां द्व्यधिकादिगुणानामणूनां सदृशानां बन्धो भवति, सदृशानामिति स्नेहसामान्यं रूक्षसामान्यं चाश्रित्य सादृश्यं व्याख्येयम् ।

भा०—तद्यथा—स्निग्धस्य द्विगुणाधिकस्निग्धेन , द्विगुणाद्यधिकस्निग्धस्य एकगुणस्निग्धेन, रूक्षस्यापि द्विगुणाद्यधिकरूक्षेण, द्विगुणाद्यधिकरूक्षस्य एकगुणरूक्षेण, एकादिगुणाधिकयोस्तु सदृशयोर्बन्धो न भवति। अत्र तुशब्दो व्यावृत्तिविशेषणार्थः, प्रतिषेध व्यावर्तयति बन्धं च विशेषयति ॥ ३५ ॥

टी०—तद्यथा—स्निग्धस्येत्यादिनोदाहरति । [एकगुण]स्निग्धस्येत्यनुक्तेऽपि सङ्ख्या गम्यते गुणश्च सामर्थ्यात्, द्विगुणाद्यधिकस्निग्धेनाणुना, द्वाभ्यां स्नेहगुणविशेषाभ्यामेकगुणस्निग्धादधिको यस्तेन सहास्ति बन्धः, यथैकगुणस्निग्ध एकस्तदन्यस्त्रिगुणस्निग्धः, अत्रैकगुणस्निग्धस्यैकः समानो गुणस्त्रिगुणस्निग्धे (स्कन्धे) अणौ वा शेषेण गुणद्वयेनाधिकः, द्विगुणाद्यधिकस्निग्धेनेत्यादिग्रहणादेकगुणस्निग्धस्य चतुर्गुणपञ्चगुणस्निग्धेनापि बन्धसिद्धिः, तथा द्विगुणाद्यधिकस्निग्धस्यैकगुणस्निग्धेन सह बन्धसम्भवः॥ननु च प्रथमविकल्पान्नास्ति कश्चिद् विशेषोऽस्य स्फुटः, सत्यं, न कश्चिद् भेदः, तथापि तु बन्धो द्व्यादिवृत्तिः, तत्र बध्यमानयोर्बध्यमानानां वा षष्ठ्यन्तत्वे तृतीयान्तत्वे वा बन्धाविशेष इति प्रतिपत्त्यर्थमुभयथोच्चारणं चकार भाष्यकारः॥ रूक्षस्यापीत्यादिभाष्यमुक्तप्रकारेणैव गमनीयम् , एवं द्व्यधिकादिगुणानां स्नेहवतां रौक्ष्यवतां च यथोक्तलक्षणो बन्धो भवतीत्युच्यते, प्रतिषेधव्यावृत्तिप्रदर्शनार्थं भवति तुशब्दोपादानम् । द्व्यधिकादिगुणानां बन्धाभ्यनुज्ञाने चार्थापत्तिलभ्यफलप्रदर्शनार्थमिदमाह—एकादिगुणाधिकयोस्तु सदृशयोर्बन्धो न भवति, प्रतिविशिष्टपरिणतिशक्तेरभावात् , एकगुणस्निग्धस्य हि द्विगुणस्निग्धोऽणुरेकगुणाधिकः, द्विगुणस्निग्धस्य त्रिगुणस्निग्ध एकगुणाधिकः, त्रिगुणस्निग्धस्य चतुर्गुणस्निग्ध एकाधिक इत्यादि यावदनन्तगुण एकाधिक इति, एवं रूक्षस्यापि वाच्यम्, एकादिगुणाधिकयोरित्यत्रादिग्रहणाद् द्विगुणस्य त्रिगुणेन सह नास्ति बन्धः, तत्रापि द्विगुणश्चैकगुणाधिकश्चेति द्विवचनम्, एवं शेषविकल्पयोजनमपि कार्यम्, तुशब्दः कैमर्थक्यात् सूत्र इत्याशङ्क्ते भाष्यकृदाह—अत्र तुशब्दो व्यावृत्तिविशेषणार्थः ॥ तुशब्दस्यानेकार्थवृत्तित्वे सत्यप्यत्र सूत्रे व्यावृत्तिर्विशेषणं चोभयमर्थः परिगृह्यते, व्यावृत्तिश्च विशेषणं च व्यावृत्तिविशेषणे अर्थस्ते यस्य स तथोक्तः, तत्र व्यावृत्तिः—निवृत्तिः, विशेष्यतेऽनेनेति विशेषणं, तदर्थो यस्यासौ व्यावृत्तिविशेषणार्थः, कस्य पुनर्व्यावृत्तिः किं वा विशेष्यमाणमित्याह—प्रतिषेधं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यावर्तयति बन्धं च विशेषयतीति । न जघन्यगुणानामिति प्रकृतप्रतिषेधस्तं व्यावर्तयति, यथाऽधिकृतं च बन्धं विशिनष्टि, गुणवैषम्ये सति सदृशानां गुणद्वयाधिकानां बन्धो भवतीत्येवंविशेषणार्थः, ततश्च व्यावृत्ते प्रतिषेधे बन्धे च विशेषिते द्व्यधिकादिगुणानां बन्धः सिद्धो निरपवाद इति ॥ आगमगाथासंवादी चायं सूत्रचतुष्टयार्थः—

"निद्धस्स निद्धेण दुआधिएण, लुक्खस्स लुक्खेण दुआधिएण ।
निद्धस्स लुक्खेण उवेति बंधो, जहण्णवज्जो विसमे समे वा ॥१॥"—प्रज्ञा० गा० २००

गुणवैषम्ये सदृशानां द्व्यधिकादिगुणानां तु बन्धो भवतीत्यस्य वाचकं गाथाशकलमाद्यं, स्निग्धस्य स्निग्धेन सह रूक्षस्यापि रूक्षेण सहेति, ततश्च "गुणसाम्ये सदृशानां" (सू० ३४) भवति बन्ध इत्येतत् सूत्रं लब्धम् । अथ स्निग्धरूक्षयोः परस्परेण कथमित्याह—पाश्चात्यमर्धम् । एतेन च "स्निग्धरूक्षत्वाद् बन्धः" (सू० ३२), "न जघन्यगुणानाम्" (सू० ३३) इति सूत्रद्वयपरिग्रहः । स्निग्धगुणरूक्षयोश्च जघन्यगुणवर्जः परस्परेण विषमगुणयोः समगुणयोश्च बन्धो भवतीति ॥३५॥

भा०—अत्राह—परमाणुषु स्कन्धेषु च ये स्पर्शादयो गुणास्ते किं व्यवस्थितास्तेषु आहोस्विदव्यवस्थिता इति ? । अत्रोच्यते—अव्यवस्थिताः । कुतः? परिणामात् । अत्राह—द्वयोरपि बध्यमानयोर्गुणवत्त्वे सति कथं परिणामो भवतीति ? ॥ उच्यते—

टी०—अत्राह—परमाणुष्वित्यादिना ग्रन्थेन सूत्रं सम्बध्नाति । अत्रेत्यौत्सर्गिके बन्धलक्षणे सापवादे प्रतिपादिते पृच्छत्यजानानः, परिणामविशेषो हि बन्धः, स च स्निग्धे रूक्षलक्षणपरिणामान्तरापेक्षः, अतः परमाणुषु ये स्पर्शादिगुणपरिणामाः स्कन्धेषु वा शब्दादयस्ते किं नित्याः—सर्वदा व्यवस्थितास्तेषु परमाण्वादिष्वाहोस्विदव्यवस्थिता—भूत्वा पुनर्न भवन्तीति ? । अयमभिप्रायः प्रश्नयितुः—परमाणवः संहन्यमाना द्विप्रदेशादिकस्कन्धाकृत्या परिणमन्ते परिमण्डलादिपञ्चप्रकारसंस्थानरूपेण वेति, तत्र यदि व्यवस्थिताः परमाणुषु परिणामाः स्पर्शादयः स्कन्धेषु वा स्पर्शादिशब्दादयस्ततस्तेषां व्यवस्थितत्वात् सर्वदा नोत्पादो न विनाशः, तौ चान्तरेण स्निग्धरूक्षगुणयोरण्वोः परिणामाभावे तदवस्थयोः कुतो द्व्यणुकादिस्कन्धपरिणामः? स्कन्धेषु वा स्पर्शादिशब्दादिपरिणामस्यैकस्यैव नित्यतयेष्टत्वात् शेषस्पर्शादिशब्दादिपरिणामाभावः । अथाव्यवस्थिताः, सर्वमिष्यमाणमुपपन्नम्, पूर्वकपरिणामत्यागेनोत्तरपरिणामान्तराभ्युपगमे स्पर्शादयोऽन्ये चान्ये च स्पर्शादिशब्दादयश्च क्षेत्रकालद्रव्यभावपरिणामविशेषाः स्युरित्यवगम्येत यथापरिणामं वस्त्विति, तन्न जाने कथमेतदिति, सति चाप्यव्यवस्थितत्वे किं समगुणः समगुणतयैव परिणमयत्युत विषमगुणतयाऽपीति सन्दिहानं प्रतीदमत्रोच्यते—अव्यव-

१ ' स्निग्धस्य स्निग्धेन द्व्याधिकेन, रूक्षस्य रूक्षेण द्व्याधिकेन ।
स्निग्धस्य रूक्षेणोपैति बन्धो, जघन्यवर्जो विषमः समो वा ॥

२ ' पातोत्थः' इति क-पाठः । ३ ' विषमतया' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थिताः परमाणुस्कन्धेषु स्पर्शादयः, स्पर्शादिशब्दादयश्चेति, अनवस्थितत्वे प्रतिज्ञाते पुनः प्रश्नयति–कुतः पुनरनवस्थितत्वम् ? एवं मन्यते–किं प्रतिज्ञामात्रेणानवस्थितत्वमुत काचिद् युक्तिरप्यस्तीति ? एवमाशङ्किते युक्तिमाह—**परिणामादिति**। "तद्भावलक्षणः परिणामो" वक्ष्यते (सू० ४१), स एव हि परमाणुः स्कन्धो वा द्रव्यत्वादिजातिस्वभावमजहत् स्पर्शान्तरादिगुणं शब्दान्तरादिगुणं प्रतिपद्यते, स्पर्शादिसामान्यमजहतः परमाण्वादयः स्पर्शादिविशेषानासादयन्ति, अतोऽवस्थितानवस्थितत्वमेषां स्पर्शादीनाम्, परिणन्तारो हि स्वशक्तिपाटवभाजो मरिचलवणहिङ्ग्वादयः परिणम्यं वस्तु कथिततक्रादिस्वाद्वाद्याकारेणात्मसात्कुर्वन्तो दृष्टाः, केचित् तु दधिगुडादयः परिणमनशक्तिस्वाभाव्यात् परस्परपरिणतिहेतवः, पूर्वेषामेकतः परिणतिशक्तिः पाटवातिशयात्, एवं परिणामादनवस्थिताः स्पर्शादिशब्दादयः, परिणामानवस्थितत्वे प्रतिपादिते लब्धावकाशः पुनः **अत्राह–द्वयोरपि बध्यमानयोर्गुणवत्त्वे सति कथं परिणामो भवतीति ?**। एवं मन्यते–भवतु परिणतिविशेषादनवस्थितं गुणवत्त्वम्, अण्वोस्तु बध्यमानयोर्गुणवत्त्वे सति तुल्यगुणयोर्विषमगुणयोर्वा सङ्ख्यया द्विगुणस्निग्धस्य द्विगुणरूक्षस्य वेत्यादेस्तथैकगुणस्निग्धस्य त्रिगुणस्निग्धस्य चेत्यादेरेकगुणरूक्षस्य त्रिगुणरूक्षादेः कथं–केन प्रकारेण परिणामो भवति ?। अयमभिप्रायः—किं द्विगुणस्निग्धो द्विगुणरूक्षं स्नेहात्मतया परिणमयत्युत द्विगुणरूक्षो द्विगुणस्निग्धं रूक्षात्मतया परिणमयतीति ? एवं शेषविकल्पा द्रष्टव्याः। तथा किमेकगुणस्निग्धस्त्रिगुणस्निग्धमात्मसात्करोतीत्येवं त्रिगुणस्निग्धः एकगुणस्निग्धमित्यादिसन्देहविच्छेदायात्रोच्यते—

सूत्रम्—बन्धे समाधिकौ पारिणामिकौ ॥ ५–३६ ॥

टी०—बन्धनं बन्धः–संयोगः, समः–तुल्यः, स च गुणतः परिगृह्यते, एवं च यस्यासौ समस्तस्येतरोऽपि समो भवति, अधिकगुणोऽपि यदपेक्षयाऽधिक्यं लभते स हीनः, सूत्रे च साक्षात् **समाधिकौ पारिणामिकावेव** गृहीतौ, न तु परिणाम्यः समो हीनगुणो वेत्यतो बन्धशब्दोपादानादिष्टलाभः, सम्बन्धो हि द्व्यादिवृत्तिरित्युक्तम्, एवं च द्वितीयः समो हीनश्च सामर्थ्याद् बन्धपरिप्रापित इति, एतदेव भाष्येण दर्शयति—

भा०—बन्धे सति समगुणस्य समगुणपरिणामको भवति। अधिकगुणो हीनस्येति ॥ ३६ ॥

टी०—**सति बन्धे**-सङ्घट्टलक्षणे विस्रसाद्वारेण तुल्यगुणो द्विगुणस्निग्धस्तुल्यगुणस्तद्विगुणरूक्षस्य परिणामकः–स्वमतेन स्नेहगुणेन रूक्षगुणमात्मसात्करोति, एवं रूक्षगुणः

---

१ ' जहन्तः' इति ग-पाठः। २ ' शक्तिपाटवा' इति क-पाठः। ३ ' णामकौ' इति क-ख-पाठः।
४ 'समगुणः परि०' इति प्रतिभाति। ५ 'गुणस्य द्विगुण०' इति प्रतिभाति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कदाचित् परिणामकः, स्वगतेन रूक्षगुणेन स्नेहगुणमात्मसात्करोति परिणामयतीति, गुणसाम्ये तु सदृशानां बन्धप्रतिषेधः, इमौ तु विसदृशावेको द्विगुणस्निग्धोऽन्यो द्विगुणरूक्षः, स्नेहरूक्षयोश्च भिन्नजातीयत्वान्नास्ति सादृश्यम्, तथाऽधिकगुणः-त्रिगुणस्निग्धो हीनगुणस्य-एकगुणस्निग्धस्य परिणमयिता, अनेन ह्येकगुणस्निग्धस्त्रिगुणस्निग्धतामापद्यते, कस्तूरिकांशानुविद्धविलेपनवत्, एतावच्च बन्धजातं समगुणयोर्विषमगुणयोर्वा परिणम्यत्वं च, इतरमात्मसात्कुर्वन् परिणमत इति परिणामकः, परिणम्यगुणसङ्ख्यामाक्षिप्य वा स्वगुणसङ्ख्यामजहत् परिणमत इति परिणामकः, अथवा परिणमनं परिणामस्तं करोति-परिणामयति परिणामकः, आत्मरूपेण परस्यापि परिणामं करोतीत्येवं प्रकृत्यन्तणिजन्तत्वयोर्न कश्चिद् विरोध इति ॥ ३६ ॥

भा०—अत्राह-उक्तं भवता (अ० ५, सू० २)—द्रव्याणि जीवाश्चेति । तत् किमुद्देशत एव द्रव्याणां प्रसिद्धिराहोस्विल्लक्षणतोऽपीति ? । अत्रोच्यते-लक्षणतोऽपि प्रसिद्धिः, तदुच्यते—

टी०—अत्राह—उक्तं भवतेत्यादिना सूत्रसम्बन्धमाचष्टे । अत्र शास्त्रे भवताऽभिहितं पञ्चमाध्याये वो-द्रव्याणि जीवाश्च(अ०५,सू०२)इति, धर्माधर्माकाशपुद्गला द्रव्याणि जीवाश्चेत्येवं पञ्च द्रव्याणि प्रथममुद्दिष्टानि-सामान्येनोक्तानीति, न तु द्रव्यलक्षणमपदिष्टम्, एवंलक्षणकं द्रव्यमिति, यस्माद् द्रव्यशब्देनोक्ता धर्मादयः तस्मात् किमुद्देशत एव-सामान्याभिधानमात्रादेव द्रव्याणां-धर्मादीनां स्वरूपप्रसिद्धिः-स्वरूपपरिज्ञानमाहोस्विदस्तिकिञ्चिद् वैशेषिकम्-असाधारणलक्षणमिति ?। एवं मन्यते-प्रतिव्यक्ति प्रतिनियमात् लक्षणस्य यथाऽवस्थितलक्ष्यपरिच्छेदित्वादुद्देशतस्तावन्नेष्यते प्रसिद्धिः, किं तर्हि ? लक्षणत इष्यते, ततश्च यतो लक्षणतः प्रसिद्धिर्धर्मादिद्रव्ये तदपदेष्टव्यम्, यथाऽऽत्मनोऽसाधारणं साकारानाकारोपयोगलक्षणम्, सामान्यविशेषसंज्ञाव्यवहार्याश्च सर्वे प्रावचनाः पदार्था इति ॥ ननु चोत्पादव्ययध्रौव्ययुक्तं सदिति सामान्यलक्षणमुक्तं(सू०२९), सत्यमेतत्, अमुना तु प्रश्नप्रसरेण विशेषलक्षणमभिधापयति प्रश्नयिता-किं द्रव्यं के वा धर्मा इति, द्रव्यस्य धर्माणां च विशेषावगतिजिज्ञासार्थं प्रश्नः, आचार्योऽपि वैशेषिकं लक्षणं मनसि सन्निवेश्यात्रोच्यत इत्याह, किमुच्यते ?-लक्षणतोऽपि प्रसिद्धिः, अपिशब्दादुद्देशतोऽपि असाधारणं लक्षणं, तस्माल्लक्षणाद् यथा द्रव्यपदार्थे प्रसिद्धिः-विशिष्टविज्ञानोत्पादो विज्ञातुर्भवति तथा तल्लक्षणमुच्यते ॥

सूत्रम्—गुणपर्यायवद् द्रव्यम् ॥ ५-३७ ॥

भा०—गुणान् लक्षणतो वक्ष्यामः(सू०४०)। भावान्तरं संज्ञान्तरं च पर्यायः। तदुभयं यत्र विद्यते तद् द्रव्यम् । गुणपर्याया अस्य सन्त्यस्मिन् वा सन्तीति गुणपर्यायवत् ॥ ३७ ॥

---

१ ' च ' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—गुणान् लक्षणतो वक्ष्याम इत्यादि भाष्यम् । सङ्ख्येयासङ्ख्येयानन्तसङ्ख्यया सङ्ख्यायमानत्वाद् गुणाः—शक्तिविशेषाः, त एव क्रमेण सह च भवन्तः सर्वतोमुखत्वाद् भेदाः—पर्यायास्तान् गुणान् पिण्डघटकपालादीन् रूपादींश्च, लक्षणतः असाधारणशक्तिविशेषात्, अभिधास्यामः (सू० ४०)—" द्रव्याश्रया निर्गुणा गुणाः " इत्यत्र, द्रव्यस्य हि गुणपर्यायाः परिणतिविशेषाः सम्भवन्ति, न तु गुणपर्यायाणां केचिदन्ये गुणपर्यायाः सन्तीत्येवं भावयिष्यामः । व्यवहारनयसमाश्रयणेन तु गुणाः पर्याया इति वा भेदेन व्यवहारः प्रवचने, युगपदवस्थायिनो गुणा रूपादयः, अयुगपदवस्थायिनः पर्यायाः, वस्तुतः पर्याया गुणा इत्यैकात्म्यम् । यत आह—

" दो[1] पज्जवे दुगुणिए लभति उ एगाओ दव्वाओ " (आवश्यकनिर्युक्तौ गा०६४) । तथा—
" तं[2] तह जाणाति जिणो, अपज्जवे जाणणा नत्थि" (आव० नि० गा० १९४)। तथा—
" दव्वप्पभवा[3] य गुणा न गुणप्पभवाइं दव्वाइं " (आव० नि० गा० १९३) ।

एवमेकमेवेदमिति मन्यमान आह—**भावान्तरं संज्ञान्तरं च पर्यायः**, भावादन्यो भावो भावान्तरम्, समभिरूढनयाभिप्रायेणेन्दनशकनपूर्दारणादयोऽर्थविशेषा रूपादयश्च भावान्तरा भावभेदाः संज्ञान्तराणां प्रवृत्तौ निमित्तभूताः, संज्ञान्तरं चेन्द्रशक्रपुरन्दररूपादि, एवमर्थभेदाः संज्ञाभेदाश्च गुणपर्याया निश्चीयन्त इति, तदेतदुभयं व्यवहारनिश्चयात्मकं गुणशब्दाभिधेयं पर्यायशब्दाभिधेयं च **यत्र**—यस्मिन् स्थित्यंशे **विद्यते**—सामान्यलक्षणेऽस्ति **तद्भावलक्षणपरिणतितयाऽवस्थितलक्षणं द्रव्यमिति**, अनेन चैतत् प्रतिपाद्यते—द्रव्यं परिणामि, गुणपर्यायाः परिणामाः प्रसवव्ययलक्षणा इति । एतदेव स्पष्टयति—**गुणपर्याया** इत्यादिना । उक्ताः प्रथमं गुणपर्यायाः, अस्यास्मिन् वा विद्यन्त इति मत्वर्थमुपलक्षयति, अस्यैते रूपादयः पिण्डादयश्च तद्भावलक्षणपरिणामाः सन्ति, न जातुचिन्निष्परिणामं द्रव्यमुपतिष्ठते, विकारलक्षणा चेयं षष्ठी, यवानां धाना इति यथा, यवास्तु द्रव्यत्वसत्त्वमूर्तादिपरित्यजन्त एव धानाकारेण विक्रियन्ते, न च विकारोऽत्यन्तमेव प्रकृतेर्भेदेन वर्तते, तदन्वयवद् दशासु सुवर्णाङ्गुलीयकादिवत्, नाप्येकान्तेन भेदः, संज्ञाप्रयोजनादिप्रतिनियमात्, तथा कदाचित् परिणामिपरिणामयोराधाराधेयविवेक्षायां व्यावहारिक्यां भेदप्रधानायामस्मिन् परिणामिनि स्थित्यंशे रूपादिपिण्डादयः परिणामाः सन्ति भेदान्तरकल्पनया, तथाऽऽत्मनि चैतन्यम्, आत्मा तु ज्ञानाद्याकारेण परिणममानोऽसत्यपि भेदे

---

१ ' द्वौ पर्यवौ द्विगुणितौ लभते तु एकस्मिन् द्रव्ये । २ तत् तथा जानाति जिनः अपर्यवे ज्ञानं नास्ति ।
३ द्रव्यप्रभवाश्च गुणा, न गुणप्रभवाणि द्रव्याणि ।
४ ' विवक्षया ' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेदेन व्यवह्रियते चैतन्यमात्मनीति । एवं सैव पुद्गलद्रव्यजातिः स्वरूपमजहती समासादित-तत्तद्गुणविशेषरूपादिपिण्डादिव्यपदेशे हेतुरित्यतः कथञ्चिद् भेदाभेदस्वरूपं गुणपर्यायवद् द्रव्यमुच्यते, तथा धर्माधर्माकाशजीवद्रव्याण्यपि गुणपर्यायवन्ति भावयितव्यानि प्रागभिहित-क्रमेण, द्रव्यं हि भव्यं योग्यं सहक्रमभुवां[1] गुणपर्यायाणाम्, अत्र चागुरुलघुप्रभृतयः सहभुवो गुणाः, पर्यायाः क्रमभुवः, पुनर्गतिस्थित्यवगाहज्ञानदर्शननारकादयो गुणपर्यायाः पूर्वमेव भाविता इति ॥ ३७ ॥

एवं गुणपर्यायपरिणामि द्रव्यलक्षणमिति प्रपञ्चे निर्णीते पर आशङ्कते—धर्माधर्मादीनि द्रव्याणि पञ्च स्वपरिणामलक्षणगुणपर्यायात्मकानि व्यावर्णितविविधोपकाराणि प्रदर्शितानि, तत्र कालस्यापि पूर्वमुपकारो वर्णित एव वर्तनादिगुणपर्यायलक्षणः, स च कालो द्रव्य-मित्येवं न पूर्वं नाधुना व्याख्यातः, न चोपकारकमन्तरेणोपकारः समस्ति शक्यं वक्तुम्, वर्तनादिरुपकारः सोपकारकः स्थित्यादिवदुपकारत्वात्, तत् किमयं स्मृतिप्रमोषो युष्माकं येन विविक्तोपकाराधारः कालो द्रव्यं नोक्तः ? आहोस्विद् धर्मादिद्रव्यपञ्चकसाध्य एवायं वर्तनादिव्यापार इति विरचितप्रश्ने श्रोतरि सिद्धसाध्यतोद्विभावयिषाद्वारेण सूरिराह—

कालस्य द्रव्यत्वम्

सूत्रम्—कालश्चेत्येके ॥ ५-३८ ॥

टी०—विशिष्टमर्यादावच्छिन्नोर्ध्वाधोऽर्धतृतीयद्वीपाभ्यन्तरवर्तिजीवादिद्रव्यैः परिण-मद्भिः स्वत एव कल्पते गम्यते प्रथ्यतेऽपेक्ष्यते कारणतयाऽसाविति कालोऽपेक्षाकारणम्, बलाकाप्रसवे गर्जितध्वनिवत्, पापविरतौ वा प्रबोधवत्, चशब्दो द्रव्याकर्षणार्थः, कालश्च द्रव्यं षष्ठं भवति, इतिशब्द एवंशब्दार्थे, एवमिति युक्त्यभिधानेन प्रकारान्तरेण च न निर्यु-क्तिकं द्रव्यत्वमाचक्षते कालस्य, एके इत्यसहायार्थं एकशब्दः, एकस्य नयस्य भेदलक्षणस्य प्रतिपत्तारः तदुपयोगानन्यत्वादेकेऽनपेक्षितद्रव्यास्तिकनयदर्शनाः कालश्च द्रव्यान्तरं भवती-त्याचक्षते । एतदेव भाष्येण सोपपत्तिकं स्फुटयति—

भा०—एके त्वाचार्या व्याचक्षते—कालोऽपि द्रव्यमिति ॥ ३८ ॥

टी०—एके त्वाचार्या इत्यादिना । एके नयवाक्यान्तरप्रधाना विशेषेणाचक्षते—व्यक्ती-कुर्वन्ति युक्त्या, परापरप्रत्ययाभिधाने तावदत्यन्तप्रसिद्धत्वान्निर्निमित्ते नाभ्युपगन्तुं शक्ये, यच्चानयोर्निमित्तं स कालः, तद्यथा—युवस्थविरयोः, सिद्धे परत्वापरत्वे देशकृते परापरदेशयो-गात् । अथ दृष्टोऽपरदेशयुक्ते त्वपरस्मिन्नपि स्थविरे परप्रत्ययः पराभिधानं च, तथैव च परदेशसंयोगात् परस्मिन्नपि यून्यपरप्रत्ययोऽपराभिधानं च, तावेतौ व्यतिकरस्वभावावभि-

---

१ 'सहजक्रम' इति क-पाठः । २ 'दृष्टोऽर्वागूपर०' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धानप्रत्ययौ यन्निमित्तौ तत्कारणमस्ति कालद्रव्यं, कालापेक्षे परत्वापरत्वे तन्निमित्ते च प्रत्ययाभिधाने प्रादुर्भवतः परमपरमिति, तथा युगपदयुगपदिति यन्निमित्ते प्रत्ययाभिधाने स कालः, निमित्तविशेषे हि प्रत्ययविशेषः सिद्धयत्यभिधानविशेषश्च, शुक्लकृष्णादिवत् । दृष्टश्चायं दिग्देशकारणकार्यकर्तृव्यतिरेकेण प्रत्ययो युगपदयुगपदिति, स चायं नानिमित्तो भवितुमर्हति, यच्च निमित्तं स कालः । इदमुक्तं भवति—तुल्यकार्येषु कर्तृषु साधारणकर्तृकेषु च कार्येषु पृथक् पृथग् व्यवस्थितेषु कृतं क्रियते कर्तव्यमित्येतस्मिन् निरूढे कर्तृकर्तव्यभेदे च सति युगपदयुगपच्च कृतं क्रियते कर्तव्यमित्येतमवधिं कृत्वाऽभिधीयते, यतः सोऽर्थोऽन्यः कालसंज्ञः, कृतादीनां यौगपद्यायौगपद्येऽन्यनिमित्तासम्भवात्, न चानिमित्तमेतदभिधानम्, तथा समानकार्यावस्थानलक्षणेषु कर्मसु कर्तरि च व्यवस्थिते यत एतद् भवति चिरं क्षिप्रमिति सोऽन्योऽर्थः कालः, न चाकस्मादयं प्रत्ययः, तस्मात् यत्सद्भावे भवत्येष प्रत्ययो यदभावे च न भवति स कालः । तुशब्दो विशेषपरिग्रहार्थः, स च विशेषो भेदप्रधानो नयः, तद्बलेन कालोऽपीति, अपिशब्दश्चशब्दार्थः, कालश्च द्रव्यान्तरमागमे निरूपितमिति कथयन्ति—"कति णं भंते ! दव्वा पण्णत्ता ? गोयमा ! छ दव्वा पण्णत्ता, तं जहा—धम्मत्थिकाए, अधम्मत्थिकाए, आगासत्थिकाए, पुग्गलत्थिकाए, जीवत्थिकाए, अद्धासमए" ॥ विनिवृत्तौ वा तुशब्दः, कस्य व्यावर्तकः ? धर्मास्तिकायादिपञ्चकाव्यतिरिक्तकालपरिणतिवादिनो द्रव्यनयस्येति, एवं कालोऽस्ति, स चापेक्षाकारणम्, तथा ह्यःश्वोऽद्यादीनि कालवचनानि स्वरूपविज्ञानव्यतिरिक्तमुख्यबाह्यार्थनिबन्धनानि असमासपदत्वाच्छुद्धैकपदत्वाद् रूपशब्दवत्, तथा ह्यआदीनि कालवचनानि यथार्थानि यथाभ्युपगममाप्तैस्तथाऽभिधीयमानत्वात्, प्रमाणावगम्यः प्रमेयोऽर्थ इत्येवंविधवचनवत् । एवं च सति तद्भावपरिणामलक्षणसूत्रसमुपनीतैकवाक्यभावस्योत्पादव्ययध्रौव्ययुक्तं सद्(सू०२९) गुणपर्यायवद् द्रव्यम्(सू० ३७)इत्येतल्लक्षणसूत्रद्वयस्याशेषपदार्थव्यापित्वेन कालस्यापि सत्त्वद्रव्यत्वपरिणामित्वधर्मसद्भावः सिद्धः ॥ ननु च कालो नामाविभागी परमनिरुद्धः समय एवैकः समुच्छिन्नपूर्वापरकोटिः, अत एव चास्तिकाय इति नेष्टः, प्रदेशरहितत्वात्, तस्य च प्रागभावप्रध्वंसाभावावस्थे असत्यावेव वर्त्स्यद्वृत्तशब्दाभिधेये, ततश्चोत्पादव्ययध्रौव्ययोगिता कुतः ? कुतो वा गुणपर्यायवद्रव्यता कालस्येति ?। अत्रोच्यते—जिनवचनमनेकनयशतविभङ्गवृत्तिव्यनुस्यूतसकलवस्तुभूमिव्यापि प्रधानोपसर्जनीकृतेतरेतररूपद्रव्यपर्यायोभयनयावकाले उत्पादादिमत्ता लम्बि न क्वचिदेकान्तेन प्रतिष्ठते, ग्रथितमेवैतत्, यतः योऽपि ह्यसावविभागः परमनिरुद्धः समय एको निष्प्रदेशः सोऽपि द्रव्यपर्यायावबद्धवृत्तिरेवेति, द्रव्यार्थरूपेण प्रतिपर्यायमुत्पादव्ययधर्माऽपि स्वरूपानन्यभूतक्रमाक्रमभाव्यना-

कालद्रव्यस्य पार्थक्यम्

---

१ कति भदन्त ! द्रव्याणि प्रज्ञप्तानि ? गातम ! षड् द्रव्याणि प्रज्ञप्तानि, तद्यथा—धर्मास्तिकायः, जीवास्तिकायः, आकाशास्तिकायः, पुद्गलास्तिकायः, जीवास्तिकायः, अद्धासमयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्यपर्यवसानानन्तसङ्ख्यपरिणामपर्यायप्रवाहव्यापिनमेकमेवात्मानमातनोति, अतीतानागतवर्तमानावस्थास्वपि कालः काल इत्यविशेषश्रुतेः सर्वदा ध्रौव्यांशावलम्बनात् सामान्यपरमार्थ एव, अतः सन्नेव न कदाचिदप्यसन्, स एव ह्यःप्रभृतिपर्यायैरुत्पादव्ययस्वभावैः प्रतिपर्यायमाघ्रातस्वरूपत्वादाविर्भावतिरोभावावनुभवन् विनाशीति, तद्यथा—श्वोभावेन विनश्याद्यत्वेन प्रादुर्भवति, अद्यत्वेनापि विनश्य ह्यस्त्वेनोत्पद्यते, कालत्वेन तु श्वोऽद्यह्यःपर्यायेषु सम्भवित्वादन्वयरूपत्वाद् ध्रुव एव, ततो य एवोत्पद्यते स एव विनश्यति द्रव्यार्थतः स एवावतिष्ठते अनन्यत्वात् सर्वदाऽपि, तथा य एव विनश्यति स एवोत्पद्यतेऽवतिष्ठते चेत्युत्पादव्ययध्रौव्याण्येकाधिकरणानीति, न हि श्वोऽद्यादय उत्पादविनाशाः कालध्रौव्यमन्तरेण, निर्बीजत्वान्निराधारत्वात् खपुष्पवत्, नापि कालध्रौव्यं ह्यःप्रभृत्युत्पादविनाशावन्तरेण, अपरिणामित्वाद् व्योमोत्पलादिवदेव । तस्मादेवं निरूपिते वृत्तो वर्त्स्यति च द्रव्यार्थत्वेन कालः सद्भिः स्वपर्यायैरामृष्टो विवक्षित उपनीतोऽस्तीति भावितमेव ॥ पर्यायार्थतया त्वत्यन्तविविक्तरूपत्वात् पर्यायाणां प्रत्युत्पन्नमात्रविषयत्वादतीतानागतयोरभावादेव न वृत्तो नापि वर्त्स्यन्निति, तेन प्रकारेणासत्त्वम् । अतः स्यात् सत्त्वं स्यान्नास्तित्वमिति व्यवस्थानात् सन् गुणपर्यायवांश्च कालः, एष च निर्वर्तकहेतोः कर्मणः कालोऽपेक्षाकारणं मनुष्यलोके प्रत्यक्षलिङ्गः, तानि च लिङ्गानि प्रतिनियमवर्तीनि वर्षोष्णशीतवाताशनिहिमतडिदभ्रगर्जितोल्काङ्कुरकिसलयपत्रफलहरितप्रसूनोदयप्रवासतारानुचक्रक्रमादीनि, तथा प्रयोगोऽपि—प्रतिनियतव्यवस्थाभाविनो वर्षादिवनस्पत्यादिपरिणामा यथास्वं परिणामिकारणव्यतिरिक्तापेक्षाकारणद्रव्यान्तरवृत्तिसापेक्षप्रादुर्भावाः, असन्ततैकरूपपरिणामत्वे सति प्रतिनियतव्यवस्थयोत्पद्यमानत्वात्, तदानीमात्मलाभत्वात्, तद्भावमापाद्यमानत्वाद्, बहिःप्रकाशापेक्षिरूपान्तरविनिश्चयाभिमुखीभूतचक्षुरिन्द्रियविज्ञानवत्, स्वसमये वा धर्माधर्मद्रव्योपकारजनितजीवपुद्गलगतिस्थितिवत्, अर्धतृतीयद्वीपव्यापित्वेऽपि समयस्य भोगभूमिषु नास्ति किञ्चित् काललिङ्गं, व्यवस्थितपरिणामत्वात्, यतः सम्भवतामर्थानां स्वयं स्वभावेन कालोऽपेक्षाहेतुरुक्तः, न निर्वर्तक इति। एवं तर्ह्यसम्भवि-

भाववृत्तौ कालस्यापेक्षिता

लिङ्गोऽपि भोगभूमिषु यथाऽस्ति कालस्तथाऽर्धतृतीयद्वीपक्षेत्राद् बहिरपि किमिति नाभ्युपगम्यते ? अपि च—वर्तनं तत्रास्ति परत्वापरत्वादिलिङ्गं च, प्रत्यक्षदृश्यमानकाललिङ्गत्वाद् भरतादिक्षेत्रवत् स्यात् तत्र काल इति, अत्रोच्यते—सत्यामपि तत्र भावानां वृत्तावविशेषेण तस्याः काललिङ्गत्वाभाव इत्यसिद्धता हेतोः। नहि सर्वा वृत्तिः कालापेक्षा। यत्र तु कालस्तत्रासौ वर्तनाद्याकारेण परिणमत इति नियमः। कदाचिद् वा शङ्केत परः—बाह्यद्वीपेषु वृत्तिर्भावानां कालापेक्षा वृत्तिशब्दवाच्यत्वात् प्रयोगनिरपेक्षेहत्यचूतकुसुमवृत्तिवदिति, एतदप्ययुक्तम्, अलोको हि सम्प्रति विद्यमानत्वाद् वर्तते, न च तत्र कालोऽस्तीत्यनैकान्तिकत्वात्, समयवृत्त्या वाऽनेकान्तः,

१ 'नन्तरसंख्य' इति क-पाठः । २ 'वर्त्स्यति नैतेन' इति क-पाठः । ३ 'परव्यक्त इति प्रत्यन्तरे' इति ग-टी-पाठः । ४ 'शब्दावाच्यत्वात्' इति क-पाठः । ५ 'वाऽनैकान्तः' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मान्मानुषलोक एव कालः, स च परिणामी, न पुनरेक एव विच्छिन्नमुक्तावलीमणिवदविद्यमानपूर्वापरकोटिर्वर्तमानः समयोऽभ्युपेयते, निरन्वयसमयोत्पादविनाशप्रसक्तेः, एकनयावलम्बित्वं चैवं स्यात्, अतोऽनर्पितद्रव्यनयमतानुसारिभिः सन्ततिपक्षप्रतिज्ञानाद् विद्यमानतैव पूर्वोत्तरसमययोः, वर्तमानसमय एवोत्तरसमयरूपेणोत्पद्यते तथापरिणामात्, नापूर्वमुत्पद्यते खपुष्पादि, नापि निरन्वयमेव किञ्चिद् विनश्यति कार्यत्वात् तत्सन्तानपतितत्वादुपान्त्यसन्ताननिरूपत्वात्, न पुनः सर्वथैवोद्भवविनाशौ निराधारावेव, ध्रौव्यं तयोराधारस्तस्मिन् सति तयोर्भावादिति । यच्च परत्वापरत्वादि काललिङ्गमभ्यधायि प्राक् तदपि नयान्तराभिप्रायादेव, अन्यथा तु स्थितिविशेषापेक्षे हि परत्वापरत्वे, षष्टिवर्षाद् वर्षशतिकः परः, अपरः षष्टिवर्ष इति, स च स्थानविशेषः षष्टिवर्षाणां शतं वर्षाणामिति स्थितेरेव, सा च सत्त्वापेक्षा, अस्तित्वादेव भावानाम्, अस्तित्वं चानपेक्षमित्युक्तम्, तस्मात् कालापेक्षे परत्वापरत्वे न भवतः, यौगपद्यमपि कर्तृषु व्यवस्थितं तेषामेव कर्तृणां कांश्चित् क्रियाविशेषानपेक्षते, न कालम्, न च ते क्रियाविशेषास्ताभ्यः क्रियाभ्योऽत्यन्तमेव नाना भवितुमर्हन्ति, यदा तु काकतालीयेनैकः कर्ता तथाविधक्रियामापद्यतेऽन्योऽपि कर्ता तथैव तत्क्रियापरिणतस्तदा युगपदिति व्यपदेशः, एवमयुगपदित्यपि भावनीयम् ॥ तथा चिरक्षिप्रयोरेष एव प्रपञ्चः, ते च गतिविशेषापेक्षे, गतिश्च परमाण्वादिद्रव्यप्रतिबद्धेति ॥ अथ कस्मादादावेकनयालम्बनेन सूत्रार्थमुपक्रम्य पुनर्नयद्वयेनोपसंहरति भवानित्याक्षिप्तेऽभिधीयते—विविक्तार्थसूत्रार्थदर्शनार्थत्वात्, आर्षं हि षष्ठं कालद्रव्यमितरद् द्रव्यविविक्तं दर्शयत्येकनयप्रवृत्तेः । न च जैने प्रवचने कश्चिदेको नयः समस्तं[3] वस्तुस्वरूपं प्रतिपादयितुं प्रत्यलः, यतस्तत्प्रतिद्वन्द्विनयानुसारि सूत्रमपरमागमेऽस्ति—"[4]किमिदं भंते ! कालोत्ति पवुच्चति ? गोयमा ! जीवा चेव अजीवा चेव"[5] । इदं हि सूत्रमस्तिकायपञ्चकाव्यतिरिक्तकालप्रतिपादनाय तीर्थकृतोपादेशि, जीवाजीवद्रव्यपर्यायः काल इति सूत्रार्थः, कलनं कालः—प्रतिविशिष्टपर्यायोत्पादसङ्ख्यानम्, कल्यते वाऽनेन वस्त्विति कालः, स च वर्तनादिरूपो द्रव्यस्यैव पर्यायः, तत्र स्वयं सद्भावेन वर्तमानमर्थं या प्रचोदयति वर्तस्व वर्तस्व मा न वर्तिष्ठाः हेतुमण्णिचि "ण्यासश्रन्थो युच्" (पा० अ० ३, पा० ३, सू० १०७) इति स्त्रीलिङ्गे भावे वर्तना क्रिया, सा च वर्तितुर्भावादनर्थान्तरं कालस्तत्परिणामत्वात्, द्रव्यमेव काल इति कर्मधारयवृत्तिर्द्रव्यार्थाभेदविवक्षायाम्, नहि वर्तनादिक्रियाभ्यो भिन्नं द्रव्यमस्ति, एकस्यापि समयस्य प्रतिद्रव्यमभेदेन वृत्तत्वादान-

कालस्य पर्यायता

परापरत्वादेः स्थितिविशेषापेक्षिता

---

१ ' यतो वर्तमान ' इति क-ख-पाठः । २ ' प्रसृतेः ' इति क-पाठः । ३ 'समस्तवस्तु' इति क-पाठः ।

४ किमिदं भदन्त ! काल इति प्रोच्यते ? गौतम ! जीवाश्चैव अजीवाश्चैव ।

५ "समयाइ वा आवलियाइ वा जीवाति या अजीवाति या पवुच्चइ" इति पाठस्तु स्थानाङ्गे (सू० ९५) ।

६ ' द्रव्यस्यैव पर्यायः' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्त्यम्, द्रव्यं च द्विविधं जीवाजीवात्मकत्वात्, तस्माज्जीवाजीवाः समयावलिकादिभेदवाच्याः, तत्परिणतिरूपत्वात्, द्रव्यास्तिकस्य हि द्रव्यं द्रव्यार्थतामात्रमेकमभिन्नं सर्वव्यापि, तथाऽत्यन्तमपास्तव्यतिरेकम्, अन्वयमात्रसङ्ग्राहिणः कालसामान्यमेकमेवोपचरितविशेषम्, अतश्चेतनाचेतनद्रव्यविषया वर्तना सादिसपर्यवसितादिभेदेन चतुर्विकल्पा सा द्रव्यस्य कालः सुरसिद्धभव्याभव्यस्कन्धानागतातीतव्योमादिनिदर्शनसाध्यः, अद्धाकालस्यापि सूर्यादिक्रियाविशिष्टत्वान्न द्रव्यव्यतिरेकित्वम्, यतो यदाकाशखण्डमुष्णांशुना स्वयमंशुभिश्च संयुक्तं तस्याऽहरिति नाम, यदन्यत् सा रात्रिरिति, तस्याहोरात्रस्य परमसूक्ष्मोऽत्यन्तविच्छेदः कश्चिदविभागी भागः समय उच्यते। एतत्प्रचयविशेषाश्चावलिकादयः। सोऽयमद्धाकालः समयादिः समयक्षेत्रप्रतिबद्धो द्रव्यकालान्न व्यतिरिच्यते, एवमेष नयः प्रथमोपन्यस्तनयप्रत्यनीकतया प्रवृत्तः सकलवस्तुसद्भावप्रतिपादनायाक्षम एवेत्युभयनयसामग्रीप्रतिपाद्यवस्तुस्वभावो निरवद्यः, सूत्रकारस्याप्येष एवाभिप्रायः सूत्रेणैकीयमतमुपन्यस्यतः, इत्येके इत्थमाचक्षतेऽन्ये त्वन्यथेति ॥ सम्यग्ज्ञानं पुनः सामग्र्यामेव सम्पद्यते, न प्रकारान्तरेणापीति, एवं प्रसिद्धेन कालद्रव्येणानेकरूपो व्यवहारः प्रतीयते वृत्तवर्तमानवर्त्स्यद्विषय इति ॥ ३८ ॥

इह (सू० ३८) द्रव्यलक्षणाधिकारेऽभिहितम्—कालश्चेत्येके इति द्रव्यत्वप्रतिपिपादयिषया, कालस्यास्य च द्रव्यत्वे सत्युपकारेण भवितव्यमित्युपकारो वर्तनादिलक्षणः प्रथममेव प्रतिपादितः, तथा धर्मादिद्रव्याणामसङ्ख्येयाः प्रदेशाः, तथा धर्माधर्मयोरित्यादिना सूत्रकलापेन प्रदेशपरिमाणमभिहितम्, अस्य तु कालद्रव्यस्य नोक्तं प्रदेशपरिमाणम्, तत्र तद्विवक्षयात्विदमुच्यते—**सोऽनन्तसमयः**। अथवा एकान्तेन कालद्रव्यमेकमपरिणामीच्छन्ति केचित्, तत्प्रतिक्षेपार्थमिदमाह—

कालस्य समयाः

सूत्रम्—सोऽनन्तसमयः ॥५-३९॥

टी०—स इत्यनन्तरसूत्रप्रतिपादितो द्रव्यविशेषः कालाख्योऽनन्तसमयः परिणामी प्रतिपत्तव्यः, तत्राविभागी यः कालः परमनिरुद्धश्च समयः स कालावयव इत्यर्थः, स च न मुख्यः, किं तर्हि ? पारमार्थिकः, अनन्तशब्दः सङ्ख्यावाची, अनन्ताः समयाः—पर्याया भेदा यस्यासावनन्तसमयः। उक्तं (सू० ३७)—गुणपर्यायवद् द्रव्यलक्षणं, सर्वं च द्रव्यमनन्तपर्यायमिष्यते, ते च पर्यायाः स्वपरभेदभाजः, यथैकस्याणोः शुक्लसुरभितिक्तादयस्तदन्यद्रव्यवर्तिनश्च संस्थानवर्णादयः, तथैकस्य कालद्रव्यस्यानन्तप्रदेशस्यान्येऽपि सत्त्वज्ञेयत्वद्रव्यत्वकालत्वादयोऽर्थपर्याया वचनपर्यायाश्चानन्ता एव, वर्तनादिलक्षणस्यातीतसाम्प्रतानागतशब्दवाच्याः परिणामविशेषा इति, एनमेवार्थं भाष्येण स्पष्टयति—

भा०—स चैष कालोऽनन्तसमयः। तत्रैक एव वर्तमानसमयः, अतीतानागतयोस्त्वानन्त्यम् ॥ ३९ ॥

---

१ 'सर्व एष' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—स चैष काल इत्यादि । स इति प्रक्रान्तपरामर्शादेष इत्यनेन सूत्रेणानुसन्धीयते कालः, चशब्दो हेतौ, यस्मादनन्तसमयस्ततः परिणामीति, अनाद्यनन्तभाविन्यां समयपरम्परायां सङ्ख्यानं प्रत्यनिर्दिष्टलक्षणायां विशिष्टसङ्ख्यानिरूपणायेदमाह—अनन्तसमय इति । सप्रदेशः कालो द्रव्यत्वादात्माकाशादिवत्, ततश्च परिणाम्यपि प्रदेशवत्त्वात् तद्वदेवेति, तत्रेति तस्मिन् कालद्रव्ये वर्तमाने, एक एव प्रदेशः समयलक्षणः तिर्यगर्धतृतीयद्वीपसमुद्रद्वयव्यापी ऊर्ध्वमधश्चाष्टादशयोजनशतप्रमाणः कालच्छेदेनानवयवः क्षेत्रच्छेदेनादेशोऽपि कल्पितावयवो भावभेदेन वा सावयवः, शेषद्रव्योपकार्योपकारकत्वेन स्वगतेन चागुरुलघुलक्षणेन परिणामेनेति, न चायमस्माकमेकान्ताग्रहोऽनवयव एवेति, किन्तु विभज्याविभज्यार्थस्य व्याकरणादर्पितानर्पितसिद्धेः कालतो द्रव्यतश्चार्पितोऽनवयवः, तस्योत्पत्त्यनन्तरविनश्वरत्वात्, एकस्य समयस्य कालकृता देशा न सन्त्येव, यथा कालकृतदेशैरनवयव एवं द्रव्यकृतदेशैरपीति, क्षेत्रतो भावतश्च सावयव एव, उत्पद्यमानसमयपरिणामिकारणमतीतसमयकार्यं वर्तमानावस्थामनुभूय वृत्तपर्यायमनुभविष्यति, प्राप्तवर्तमानत्वाच्च वर्त्स्यत्यपीत्येकैकसमयस्य द्रव्यता, अतः प्रदेशावयवबहुत्वात् कायव्यपदेश्योऽपि, कालद्रव्यप्रदेशावयवैर्नास्ति कायता, व्यवहारस्तु रूढ्याऽस्तिकायैः पञ्चभिरेव प्रवचने, न चैतावतैवास्यास्तिकायताऽपह्नोतुं शक्या, आगमे तु क्वचित् प्रदेशे नित्यतया व्यवहारः, क्वचिदनित्यतया । न चैकान्तेन नित्यत्वमनित्यत्वं वा युक्तमित्यलं प्रसङ्गेन । प्रकृतमुच्यते—वर्तमान एकः समय इति निरूप्यैवमतीतानागतयोर्निरूपणायेदमाह—समयराश्योः कियती सङ्ख्येति ॥ अतीतानागतयोस्त्वानन्त्यम् ॥ अतीताः सपर्यवसाना वर्तमानावधिकाः सन्तत्याऽनाद्या इत्यतोऽनन्ताः, तथाऽनागताः साद्या वर्तमानावधिकाः पर्यवसानशून्याः सन्तत्यैव, अनन्तस्य भाव आनन्त्यं—सङ्ख्याख्यो गुणः, स च न सङ्ख्येयसङ्ख्या नासङ्ख्येयसङ्ख्येति, किं तर्हि ? अनन्तसङ्ख्यैव, तुशब्दः समुच्चये । अतीतोऽनागतश्च समयराशिरनन्त इति, सो[1] चातीताद्धा अनागताद्धा च शेषकायेभ्योऽल्पबहुत्वचिन्तायां पृथगेवोक्ता, न पञ्चास्तिकायधर्मत्वेनेति, अभव्येभ्योऽनन्तगुणाः सिद्धाः, सिद्धेभ्योऽतीतसमयराशिरसङ्ख्येयगुणः, अस्माद् भव्यास्त्वनन्तगुणाः, भव्येभ्योऽनन्तगुणाः वर्त्स्यत्समयाः, इत्येतदल्पबहुत्वमस्तिकायपञ्च(त्व एव) कालद्रव्यस्य घटत इति ॥ ३९ ॥

कालेऽवयवविचारः

भा०—अत्राह—उक्तं(अ० ५, सू० ३७) भवता—गुणपर्यायवद् द्रव्यमिति । तत्र के गुणा इति ? । अत्रोच्यते—

टी०—अत्राह—उक्तं भवतेत्यादिना सम्बन्धमावेदयति । द्रव्याधिकारसम्बन्धेन कालद्रव्यं सपर्यायमभिधाय गुणपर्यायस्वरूपं निरूपयितुकामो भाष्यकारः परमेव प्रश्नं कारयति ।

---

१ 'मतीतः समय' इति क-पाठः । २ 'र्वेभ्य' इति क-पाठः । ३ 'स चा' इति क-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपादितं भवता—गुणपर्यायपरिणामि द्रव्यम्, तत्र के गुणा यैस्तद्द्रव्यं गुणवदिति दिश्यते ? गुणग्रहणाच्च पर्याया गृहीता एवेत्यतो न भेदेन प्रश्नः, प्राक् च प्रतिपादितमेव गुणाः पर्याया इति चैकमित्युक्ते आचार्य आह—अत्रोच्यत इति । गुणस्वरूपमभिधीयते, यादृशा द्रव्यगुणास्तादृशाः प्रतिपाद्यन्त इति सञ्चिरते गुरुः ॥

सूत्रम्—द्रव्याश्रया निर्गुणा गुणाः ॥ ५–४० ॥

टी०—स्थित्यंशो द्रव्यं स आश्रयो येषां परिणामि कारणं परिणामविशेषाणां गुणानां ते द्रव्याश्रयाः, परिणामिपरिणामलक्षण आश्रयाश्रयिभावो नाधाराधेयलक्षणः, कुण्डबदरादिवत् । न च समवायलक्षणः संबन्धो युज्यते द्रव्यगुणानामनुपपत्तेः । अस्तु तावद् द्रव्यगुणानां समवायलक्षणः संबन्धः । समवायस्य गुणानां च यः सम्बन्धः स किं समवायोऽथ सम्बन्धान्तरम् ? । यदि समवायः, तस्य तेषां च किमभिधानः सम्बन्ध इति । समवायश्चेत्, अनवस्था, सम्बन्धान्तरमिति चेत्, आगमविरोधः स्पष्टतरमुच्यते, समवायाख्यः सम्बन्धः समवायिनोर्यदि वर्तते, ततः संयोगवृत्त्या समवायवृत्त्या वा वर्तेत ? संयोगवृत्त्या तावन्न वर्तते, कुतः ? अद्रव्यत्वाद्, द्रव्यविषयो हि संयोग इष्यते, न पुनर्द्रव्यगुणविषयः । अथ समवायवृत्त्या वर्तते तत्र समवायस्ततो यद्यन्यसमवायवृत्त्या सोऽपि वर्तते ततोऽनवस्थोद्ग्राहणीया ॥ एवमुक्ते वार्तिककारेणोक्तं—समवायो न कचिद् वर्तत इति ब्रूमः, अनाश्रित एवासौ स्वतन्त्रः सम्बन्धो भवतीत्येतदप्ययुक्तम् । यदि द्रव्यगुणयोर्नाश्रितः कयाचिद् वृत्त्या न तर्हि द्रव्यं गुणैः सम्बद्धं तेन समवायाख्येन सम्बन्धेनानाश्रितत्वाद् द्रव्यगुणयोर्घटपटादिवत्, घटपटयोर्हि परस्परेण नास्ति समवायलक्षणः सम्बन्धः, तस्माद् द्रव्यं परिणमते, गुणपर्यायाः परिणामविशेषाः, ते च गुणा निर्गुणाः । नहि शुक्लघटकपालादीनां गुणपर्यायाणामन्ये गुणपर्यायाः सन्ति, द्रव्यस्य परिणामिनः शुक्लादिपरिणामो घटकपालसंस्थानादिश्च परिणामः, न पुनस्तस्यैव शुक्लादेरन्ये शुक्लादयः कुम्भादिसंस्थानस्य वाऽन्ये संस्थानादयस्तत्परिणामा विद्यन्ते, इत्यतो निर्गुणाः । एनमेवार्थं भाष्येण स्फुटयति—

भा०—द्रव्यमेषामाश्रय इति द्रव्याश्रयाः, नैषा गुणाः सन्तीति निर्गुणाः ४०॥

टी०—द्रव्यमेषामाश्रय इत्यादि भाष्यम् । द्रव्यं भव्यं योग्यं युगपदयुगपद्भाविन्याः गुणपर्यायपरिणतेः स्थितिः सामान्यमेषामुत्पादव्ययलक्षणानां ज्ञानादिशुक्लादिघटकशकलादीनामाश्रयः, परिणाम्यर्थो द्रव्यं, तद्धि ज्ञानशुक्लादिघटकादितया परिणमते, भूयस्तेनाकारेण विनिवर्तते, द्रव्यतया व्यवतिष्ठते, तदेषामुपन्न इति द्रव्याश्रयाः । इतिशब्द एवशब्दार्थे । एवशब्दस्त्ववधारयति, परिणामिपरिणामलक्षण एवाश्रयाश्रयिभावो न प्रकारान्तरेण, परिणामिपरिणामयोश्च द्रव्यपर्यायनयद्वयापेक्षयैकत्वान्यत्वभजनाविधिरुद्ग्राह्य इति । तं भजनाविधिमुपन्यस्य-

१ ' णामोऽतस्तस्यैव ' इति क-ख-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ति—नैषां गुणाः सन्तीति निर्गुणाः। एषां ज्ञानादिशुक्लादीनां गुणानां नान्ये गुणाः केचन सन्तीति निर्गुणाः, द्रव्याद् व्यतिरेके सत्येतदुपपद्यते, गुणगुणिनोर्भेद इत्यर्थः। तत् तु नास्त्येकान्तेन। इतिशब्दोऽत्राव्यतिरेकनयवाक्योपन्यासार्थः। नैषां गुणाः सन्तीति भेदनयप्रधानं वचनम्। न च भेदपरमार्थ एव जैनः कृतान्तः, सकलस्य वस्तुनो भेदाभेदरूपत्वात्। यदा तु द्रव्यमेव तथा परिणतं ज्ञानाद्यात्मना शुक्लाद्यात्मना वा तदा द्रव्यस्य तादात्म्याद् गुणानां स्वरूपं भिन्नं नास्त्येवेति, एवं च शुद्धद्रव्यास्तिकादेशादनन्यत्वमेव नैर्गुण्यं, पर्यायविवक्षायां तु स्याद् गुणप्रधानत्वात् पर्यायनयस्येति, कदाचिदाशङ्केत परः—सतां गुणानां निर्गुणत्वं चिन्त्यतेऽत्यन्तशुद्धद्रव्यास्तिकपक्षे गुणा एव न सन्ति कुतोऽनन्यत्वमिति?। उच्यते—न सन्तीत्येतदयुक्तम्, सन्ति गुणाः, किन्तु द्रव्याद्व्यतिरिच्यमानस्वरूपाः, तद् यदि द्रव्यं शुक्लाकारेण परिणतं भवति, तदा कृष्णाकारपरिणामो नास्तीति स्फुटं निर्गुणत्वमिति ॥ ४० ॥

भा०—अत्राह—उक्तं (सू० ३६) भवता—बन्धे समाधिकौ पारिणामिकाविति। तत्र कः परिणाम इति?। अत्रोच्यते—

टी०—अत्राह—उक्तं भवतेत्यादिना सम्बन्धमाचष्टे। भवतेदमुक्तं (सू० ३६)—बन्धे समाधिकौ पारिणामिकाविति, समः समगुणस्य परिणामं विधत्ते, हीनगुणस्याधिकगुणः परिणाममापादयतीति, तथा नामादिसूत्र(१-५)भाष्य इदमभिहितम्—भावतो द्रव्याणि धर्मादीनि सगुणपर्यायाणि प्राप्तिलक्षणानि वक्ष्यन्ते, प्राप्तिश्च परिणामः, स च सकलद्रव्यविषय एव पिपृच्छिषतः, तत्र सूत्रे भाष्ये वा कः परिणामशब्दवाच्योऽर्थो यमङ्गीकृत्येदमुक्तम्—समगुणोऽधिकगुणो वा परिणाममापादयतीति, एवं मन्यते किमर्थान्तरभूतं परिणामं जनयन्त्याहोस्वित् त एव स्वरूपमजहतो द्रव्यविशेषा वैशिष्ट्यं प्रतिपद्यमानास्तथा भवन्तीति सन्देहभाजा पृष्टे भाष्यकृदाह—अत्रोच्यत इति। किमुच्यते? यत् पृष्टम्। किञ्च पृष्टम्? परिणामसद्भावः पञ्चविधस्य षड्विधस्य वा द्रव्यस्य धर्मादेः।

सूत्रम्—तद्भावः परिणामः ॥ ५—४१ ॥

टी०—तस्य भावस्तद्भावः, तस्येति द्रव्यषट्कस्याभिसम्बन्धः, तदेव हि धर्मादिद्रव्यं तेन तेनाकारेण भवति, गतिस्थित्यवगाहशरीरादिज्ञानादिवृत्तसमयादिना, भूतिर्भवनमात्मलाभो भावः परिणामः। तस्येति कर्तृलक्षणा षष्ठी, भवतेरकर्मकत्वात्। तान्येव हि द्रव्याणि तथा भवन्ति, न कूटस्थान्यवतिष्ठन्ते, न सर्वथोत्पद्यन्ते, नापि सर्वथोच्छिद्यन्ते, तस्मात् सामान्यरूपः परिणामोऽनुवृत्तिरूपत्वात्, अनुवर्तते हि सर्वत्र गत्यादिषु धर्मादिद्रव्यं स्वरूपमजहत्, तथाविधधर्मद्रव्यादीनां समानभावः सामान्यम्, कर्तृषष्ठ्या द्रव्यादय एव समाना भवन्तीति सामान्यमेव, तद्भावलक्षणः परिणामः, इत्येतदेव भाष्येण प्रकाशयति परिणामस्वरूपम्।

१ 'तथदा' इति क-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा०—धर्मादीनां द्रव्याणां यथोक्तानां च गुणानां स्वभावः स्वतत्त्वं परिणामः ॥ ४१ ॥ स द्विविधः

टी०—धर्मादीनां द्रव्याणामित्यादि भाष्यम्। धर्मो गत्युपग्रहकृल्लोकाकाशव्यापी, स आदिर्येषां तानि धर्मादीनि द्रव्याणि, आदिशब्दादधर्माकाशपुद्गलजीवकालाख्यानि, तेषां स्वो निजो भावो भूतिरात्मलाभोऽवस्थान्तरप्राप्तिः परिणामः। परिशब्दो व्याप्तौ, दोषेण परीतो यथा—दोषेण व्याप्तः, नमिः प्रह्वत्वमभिधत्ते प्रह्वत्वमृजुत्वमवस्थान्तरप्राप्तिलक्षणं धर्मादिस्वतत्त्वं, तेन चोत्पादो विनाशश्च व्याप्तः, समस्तस्थित्यंशसामान्येनाव्याप्तो नोत्पादो नो विनाशोऽस्तीति परिणामशब्दार्थः, समन्ताद् भावे वा परिः, परिखनतिवत्, सर्वत्रार्थाभिधानप्रत्ययेषु नमनमन्वयांशानुवेधः, वीप्सार्थो वा परिशब्दः, यथा वृक्षं परिसिञ्चति, वृक्षं वृक्षं सिञ्चतीत्यर्थः। एवं द्रव्यं द्रव्यं परिनमनं परिणामः, स्वमात्मनो व्यतिरेक्यपि दृष्टं गोमहिष्यजाविकादि तद्व्यवच्छेदार्थमाह—**स्वतत्त्वमिति**। तस्य भावस्तत्त्वं धर्मादेरवस्थान्तरापत्तिः, स्वं च तत् तत्त्वं चेति स्वतत्त्वं—धर्मस्यैव निजमवस्थान्तरम्, न त्वधर्मादेरवस्थान्तरं, धर्मद्रव्यस्य परिणामः, एवमधर्मादिद्रव्याणामपि स्वस्वावस्थापत्तिः परिणामो द्रष्टव्यः, धर्मो हि गन्तुर्गत्युपग्रहाकारेण परिणमते स्वरूपापरित्यागेन, स्थित्युपग्रहाकारेण स्थातुरधर्मः, व्योमाऽप्यवगाहुरवगाहदायित्वेनोपजायते, पुद्गलाः शरीरशब्दादिरूपेण, आत्मा ज्ञानदर्शनोपयोगवृत्त्या नारकादिभावेन च, कालोऽपि वर्तनादिप्रपञ्चेन परिणमते, तथा यथोक्तानां गुणानामिति, येन प्रकारेणोक्ताः शुक्लादिघटकपालादय एकजातीयत्वेन, न भिन्नजातीयतया, गुणाः पृथक् पर्यायाश्च पृथगिति, अत एवेह पर्यायग्रहणं न कृतम्, गुणपर्याययोरेकत्वात्, तेऽपि हि शुक्लादयः कृष्णादित्वेन परिणमन्ते वर्णादिसामान्यमनुञ्चन्तः, कुम्भपर्यायोऽपि कपालावस्थाप्रापी मृत्स्वभावमपरित्यजन्, कपालादयोऽपि शकलशर्करापांशुत्रुटिपरमाणुरूपेणेति, परमाणवोऽपि रूपाद्यात्मना द्व्यणुकादिस्कन्धात्मना वेत्येवं द्रव्याणि सर्वदा सूक्ष्मस्थूलभेदोत्पादव्ययरूपेण परिणमन्ते, गुणानां च परिणामाभ्युपगमे गुणवत्त्वमर्थादेवाभ्युपेतं भवतीत्यनेकान्तवादसद्भावप्ररूपणार्थमिदमेवावोचद् भाष्यकारः, अथवा क्षणिकान् पदार्थान् ये प्रतिजानते त एवमाहुः—उत्पत्तिसमनन्तरमेव ध्वंसन्ते पदार्थाः, न हेतुमपेक्षन्ते ध्वंसमानाः, स्वात्मलाभक्षणानन्तरं क्षयः विनाशः क्षण उच्यते, निरुक्तविधानात्, तद्योगात् क्षणिकमिति। आह च—

" क्षणोवाचेह नैरुक्तै—रुत्पन्नानन्तरं क्षयः।
निर्हेतुः सोऽनपेक्षत्वात्, तद्योगात् क्षणिकं मतम् ॥ "

यथा पयःप्रतीपादयः प्रतिक्षणमन्ये चान्ये चोत्पद्यन्ते निरवशेषपूर्वनाशसमकालम्, एवमन्येऽपि महीध्रादय इत्यस्य प्रतिक्षेपायेदमाह—**तद्भावः परिणामः**। परिणामादन्यथात्वं

---

१ ' समत्वात् ' इति क-पाठः। २ ' द्रव्यं नमनं ' इति ग-पाठः। ३ ' त्वेन गुणाः ' इति क-पाठः। ४ ' क्षयः क्षण ' इति ग-पाठः। ५ ' रुत्पत्त्यनन्तरं इति ग-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दीपक्षीरादिषु न, स्वजात्यनुच्छेदात्, कश्चित् पर्यायोऽपैत्यपरः प्रादुरस्ति पुद्गलचैतन्यजात्यनुच्छेदेन तस्य, तस्य तथाभावः परिणामः, सोऽन्यत्वदुर्बुद्धेः[1] कारणम्, उत्फणविफणकुण्डलप्रसारितानेकावस्थसर्पवदेकमन्वयि तत् परिणमते, न तु पूर्वोच्छेदेन सर्वथाऽन्यस्योत्पाद इति पूर्वोक्तेन विधिना प्रपञ्च्यम्, वृत्त्यक्षराण्यपि क्षणभङ्गनिरासद्वारेण समर्थनीयानीति । अथवा कैश्चित् परिणामलक्षणमुक्तम्–"अवस्थितस्य द्रव्यस्य धर्मान्तरनिवृत्तिर्धर्मान्तरप्रादुर्भावश्च परिणाम" इति, तदपाकरणायावाचि—तद्भावः परिणामः, तत्रावस्थितं यदि कूटस्थं विवक्षितम्, ततस्तस्य ये धर्मा उत्पादविनाशलक्षणास्तदाकारेण तन्नोत्पद्यतेऽस्थितत्वादेव, तादृगप्यस्तीति श्रद्धया प्रतिपत्तव्यम्, धर्मा एवोत्पद्यन्ते विनश्यन्ति वा व्यतिरेकिणः, अथानन्ये द्रव्याद् धर्मास्ततो धर्मोत्पादे धर्मविनाशे चानन्यत्वादेव द्रव्येणापि तथैव भवितव्यमिति नास्त्यवस्थितत्वम्, अतस्तद्भावलक्षण एव परिणामोऽभ्युपेयः, तदेव हि द्रव्यं तथा भवति, गुणो वा स्वभावः स्वतत्त्वं परिणामः परिणामिनो द्रव्यस्येति निरवद्यं परिणामलक्षणमिति ॥ ४१ ॥

स द्विविध इत्यादिना सम्बन्धं कथयति, स एष परिणामोऽनन्तरसूत्रोक्तो याथात्म्योपलब्धिनिमित्तत्वाद् द्वे विधे यस्यासौ द्विविधः । के पुनस्ते इत्याह—

सूत्रम्—अनादिरादिमांश्च ॥ ५–४२ ॥

टी०—अविद्यमान आदिरस्यासावनादिः—अविद्यमानप्रथमारम्भः परिणामः, यस्मात् पूर्वं नास्ति परमस्त्यादिः स तद्वान् यः स आदिमान्—प्रथमारम्भप्रवृत्तिः, चशब्दः परिणामेयत्तोपसंहारार्थः समुच्चयार्थो वा । क्व पुनरयं परिणामोऽनादिः क्व चासावादिमानिति विभागेन निरूपयति—

भा०—तत्रानादिररूपिषु धर्माधर्माकाशजीवेष्विति ॥ ४२ ॥

टी०—तत्रानादिरित्यादि । तत्र—तयोरनाद्यादिमतोः परिणामयोः, अनादिररूपिषु परिणामो धर्माधर्माकाशजीवेषु, क्रियापदाध्याहाराद् भवति । इतिशब्दोऽभ्युच्चयार्थः । कालद्रव्ये चानादिपरिणामः, तत्र धर्मद्रव्यपरिणामोऽनादिरसङ्ख्येयप्रदेशत्वं लोकाकाशव्यापित्वममूर्तत्वं गन्तृगत्यपेक्षाकारणत्वेनागुरुलघुत्वमित्यादिः, अधर्मद्रव्यस्य तु स्थातृस्थित्यपेक्षाकारणत्वं विशेषः, शेषं समानम्, आत्मनोऽप्येते वाऽपेक्षाकारणरहिताः, अन्ये च जीवत्वभव्यत्वाभव्यत्वादयः परिणामाः, स्वस्यानन्तप्रदेशत्वममूर्तत्वमगुरुलघुपर्यायत्वमवगाहकावगाहदातृत्वमित्यादिः, कालस्य वर्तमानादिः परिणाम इत्येवममूर्तद्रव्येषु, रूपशब्दो मूर्तिवचनो मूर्तिश्च रूपरसगन्धस्पर्शा इति ॥ ४२ ॥

अथ रूपिषु मूर्तिषु परमाण्वादिषु किमनादिः परिणाम आहोस्विदादिमानित्यत आह—

---

१ 'न्यत्वबुद्धेः' इति गं-पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रम्—रूपिष्वादिमान् ॥ ५-४३ ॥

टी०—रूपाव्यभिचारिणः स्पर्शादय इति नोपात्ताः, स्पर्शश्च रूपाद्यव्यभिचारी क्वचित् किञ्चित् कदाचिदुद्भूतशक्तिर्भवति, क्वचिन्न्यग्भूतशक्तिः, लवणशकलादिवत्; अतः सर्वे वाय्वादयश्चतुर्गुणाः, स्पर्शवत्त्वात्, तत्रानेकः परिणामः पुद्गलेषु द्व्यणुकादिस्कन्धलक्षणः, शब्दादिः शुक्लपीतादिश्च, तत्र यदा द्वावणू विस्रसातो द्व्यणुकस्कन्धमारभेते, तदा द्व्यणुकस्कन्धपरिणाम आदिमान्, एवं शेषा अपि प्रयोगविस्रसाजनिता यथावद् द्रष्टव्या इति, एतदेव भाष्येण स्पष्टयति—

भा०—रूपिषु तु द्रव्येषु आदिमान् परिणामोऽनेकविधः स्पर्शपरिणामादिरिति ॥ ४३ ॥

टी०—रूपिष्वित्यादि। रूपमेषामेषु वाऽस्तीति रूपिणः, '(प्राणिस्थादातो) लजन्यतरस्यां' (पा० अ० ५,पा० २,सू० ९६) ग्रहणं तत्र समुच्चयार्थं व्याख्यातम्, रूपिण्यप्सरा इति यथा। तेषु रूपिषु रूपस्पर्शरसगन्धवत्सु द्रव्येषु द्युतिलक्षणेषूत्पादव्ययवत्स्वादिमान् परिणामोऽनेकप्रकारः, स्पर्शरसगन्धवर्णादिः। स्पर्शोऽष्टधा शीतादिः शीततरशीततमादिश्च, रसः पञ्चविधस्तिक्तादिस्तिक्ततरादिश्च, गन्धो द्विधा सुरभिरसुरभिः सुरभितरादिश्च, वर्णः शुक्लादिभेदात् पञ्चविधः शुक्लादिः शुक्लतरादिश्च, आदिशब्दाद् द्व्यणुकादिसङ्घातभेदलक्षणः शब्दादिश्चेत्येवमनेकाकारः परिणामः पुद्गलद्रव्यविषयः, जन्मादिविनाशान्तविशेषसंस्पृष्टः स्वरूपसामान्यविशेषधर्माधिकारी तद्भावलक्षणः परिणामः आदिमान् भवति, तुशब्दो विशेषणार्थः, द्रव्यत्वमूर्तत्वसत्त्वादयोऽनाद्या अपि पुद्गलद्रव्ये परिणामाः सन्तीत्यमुमर्थं विशिनष्टि, समुच्चयार्थो वा तुशब्दः आदिमांश्च, चशब्दादनादिश्च। एवं तर्ह्यरूपिष्वपि द्रव्येष्वादिमानपि परिणामोऽस्तु, अस्त्येव योगोपयोगलक्षणो जीवेषु वक्ष्यमाणः, धर्मादिष्वपि भवतु तद्वदेवेति, को वा निवारयति सन्तं पदार्थम्? यथा स्वयं गन्तुर्जिगमिषापरिणतस्याधुना धर्मद्रव्यमुपग्राहकं भवति, उपग्राहकत्वं च धर्मपर्यायः स च प्राङ् नासीत्, तस्य गन्तुर्गतिपरिणतेरभावात्, अधुना चोपजायमानः सादिरेव, देवदत्तगन्तृगत्युपरमेऽन्तवान्, एवं जन्मविनाशवत्त्वात् सादित्वम्, न चोपग्राहकत्वमुपग्राह्यमन्तरेणास्ति, एवमधर्मद्रव्यं स्थितिपरिणामभाजः स्थित्युपग्रहरूपेण परिणमते, व्योमाप्यवगाहरवगाहदानपर्यायेण, कालश्च वृत्तवर्तमानादिपरिणत्या भवत्यादिमान्, एवमेष परिणामो द्रव्यार्थिकव्यापाराद् धर्मादिस्वभावी न धर्मादिव्यतिरिक्तः, क्वचिद् वैस्रसिकः क्वचित् प्रायोगिकः क्वचिदुभयथोत्पादव्ययध्रौव्यलक्षणत्वात् सतः, न चोपचारस्तत्त्वचिन्तायामङ्गभावं प्रतिपद्यते, इत्येवमनुमोदामहे तत्रादिमन्तं परिणामम्। ये तु मन्यन्ते रूपिष्वेवादिमान् परिणामो भवति, नामूर्तेषु धर्मादिषु, तेषामरूपिद्रव्यपर्यायाश्रयव्यवहा-

१ 'स्वान्नानेकः' इति क-ख-पाठः। २ 'रमेण परिणतवानेवं' इति क-ख-पाठः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रलोपादुत्पादादिलक्षणायोगात् परिणामाभावः, अपरिणामित्वाच्चानिर्धार्यमात्रस्वभावाः स्युर्धर्मादयः, स्वत उत्पादव्ययपरिणामशून्यत्वात्, तस्मात् सर्वत्र केचिदनाद्याः केचिदादिमन्तः परिणामा इति न्यायः, सूत्रकारेण तु भजनाप्रदर्शनार्थमेवं सूत्रन्यासः कृत इति ॥ ४३ ॥

यदुक्तमनन्तरमनाद्यादिमत्परिणामा रूपिष्वरूपिषु च धर्मादिषु सर्वत्र भवन्तीति तत्प्रदर्शनार्थममूर्तैकद्रव्यमुद्दिश्यादिमत्परिणामनिर्देदिक्षया सूत्रं पपाठ—

सूत्रम्—योगोपयोगौ जीवेषु ॥ ५-४४ ॥

टी०—अनन्तरसूत्रादादिमानित्येतदनुवर्तते, तच्च योगोपयोगयोर्विशेषणतया प्रयुज्यते, द्विवचनान्तमादिमन्ताविति, योजनं योगः—पुद्गलसम्बन्धादात्मनो वीर्यविशेषः, युज्यते वा स इति योगः, केन? आत्मना, शक्तिविशेषः प्राप्यत इतियावत्, कायवाङ्मनोरूपेणोत्पादः, उपयोजनमुपयोगः—चैतन्यस्वभावस्यात्मनो ज्ञानदर्शनाभ्यां स्वविषयोपलभ्यादिव्यापारः प्रणिधानादिलक्षणः, उपयुज्यतेऽनेन वेति समाधिविशेषस्तद्द्वारकोऽर्थपरिच्छेदोऽप्युपयोगस्तेनाकारेणात्मनो व्याप्तिः। कृतद्वन्द्वनिर्देशाद् **योगोपयोगौ जीवेषु**—आत्मस्वेकद्वित्रिचतुःपञ्चेन्द्रियेषूपपद्यमानोत्पत्तिकालावधित्वादादिमन्तौ, सिद्धेषु तु सकलयोगोच्छेदादुपयोग एव क्रमवृत्तिरादिमानेक इति। एनमेवार्थं भाष्येण स्फुटयति—

भा०—जीवेष्वरूपिष्वपि सत्सु योगोपयोगौ परिणामावादिमन्तौ भवतः ॥

टी०—जीवेष्वरूपिष्वपि सत्सु इत्यादि भाष्यम्। द्रव्यभावप्राणैः अजीविषुर्जीवन्ति जीविष्यन्ति चेति जीवाः। जीवेष्विति निमित्तार्था सप्तमी। जीवनिमित्तौ **योगपरिणामावादिमन्तौ भवतः**, तथापरिणामित्वादात्मनः, अथवा परिणाम्यपि कथञ्चिद् भेदविवक्षायां स्वपरिणामानामाधारतां प्रतिपद्यत एवेति, तेष्वात्मसु[1] मूर्तिवियुतेष्वपि भवत्सु। अपिशब्दोऽपेक्षायाम्। यथाऽयमपि विद्वान्, एवमण्वादिष्वादिमान् परिणामो जीवेष्वपीति समानम्, बहुव्रीहिणोक्तेऽपि मत्वर्थीयः क्वचिदभ्यनुज्ञातः[2], पाणिनीयेऽपि "इङ्धार्योः शत्रकृच्छ्रिणि" (अ० ३, पा० २, सू० १३०,) इति अरूपशब्दो वाऽतीत(जाति)वचनस्ततश्च सिध्यति च मत्वर्थीयः। 'कृष्णसर्पे त्ववल्मीके' इति यथा, तत्रान्योन्यानुगतिलक्षणसम्बन्धादात्मनः कर्म वाङ्मनोयोग्या पुद्गलानां च कायाद्यवष्टम्भोद्भूता शक्तिर्योगः।

भा०—स च पञ्चदशभेदः।

टी०—सामान्येन गमनादिकथनचिन्तनक्रियालक्षणः औदारिकवैक्रियाहारकमिश्रयोगास्त्रयः, तैजसकार्मणे त्वेकः, वाग्योगः सत्यमृषाऽसत्या (मृषा) उभयभेदाच्चतुर्धा, एवं मनोयोगोऽपि चतुर्धा, उपयोगः साकारानाकारलक्षणो जीवस्वभावः।

भा०—स च द्वादशविधः।

---

१ 'मन्तौ' इति क-पाठः। २ 'तेऽप्यात्मसु' इति जैनानन्दपुस्तकालयप्रतिपाठः। ३ 'ज्ञानु पाणिनिना यथा-इन्द्रा०' इति पाठान्तरम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

टी०—मतिश्रुतावधिमनःपर्यायकेवलमतिश्रुतावध्यज्ञानत्रयभेदः पूर्वः (प्राच्यः), पाश्चात्यश्चक्षुरचक्षुरवधिकेवलभेदः । एतौ योगोपयोगौ परिणामावित्यनेनात्मनः सद्भावापत्तिं दर्शयति । आत्मा कायादिपुद्गलशतसम्बन्धात् तां तां गमनादिकथनचिन्तनक्रियां प्रतिपद्यते तद्रूपीभवति, क्षीरोदकवत् मृद्घटवच्च तादात्म्यं प्रतिपद्यत इतियावत् । स चोपजायमानकालावधिकत्वादादिमान्, सन्तत्या त्वनादिः, उपयोगोऽपीन्द्रियनिमित्तस्तन्निरपेक्षश्चात्मनो ज्ञस्वभावत्वाच्चैतन्यरूपत्वात् परिणामः सामान्यविशेषरूपः, सन्तत्याऽनादिः, प्रत्येकविवक्षायामादिमान्, अनयापि चोपयोगलक्षणमात्मनः सार्वकालिकत्वात्, योगोपयोगग्रहणाच्चान्येषामात्मन्यनादित्वं प्रायः परिणामानाम् । अथ मत्याद्युपयोगद्वादशकस्य किं स्वरूपमित्यारेकिते इदमाह—

भा०—तत्रोपयोगः पूर्वोक्तः ॥

टी०—तत्र-तयोर्योगोपयोगयोः उपयोगः पूर्वमेव द्वितीयेऽध्याये व्याख्यातः—स्वरूपेणोक्तः । " उपयोगो जीवलक्षणम् ", " स द्विविधोऽष्टचतुर्भेदः " (अ० २, सू० ८, ९) इत्यत्र । अथ योगः किंस्वरूप इत्याशङ्क्याह—

भा०—योगस्तु परस्ताद् वक्ष्यते ॥

टी०—परस्तादिति उपरिष्टात् षष्ठाध्यायादिसूत्रे " कायवाङ्मनःकर्म योग " इत्यत्राभिधास्यते यतः तस्मादत्र न व्याख्यायते । तुशब्दो हेत्वर्थः । तदेव च स्थानं योगस्वरूपव्यावर्णनस्य, उभयत्र व्याख्या गौरवमापादयति, तस्मात् तत्रैव व्याख्यास्याम इति, एवं सर्वद्रव्याणि परिणामवन्ति स्वरूपेण व्याख्यातानीति ॥ ४४ ॥

इति श्रीतत्त्वार्थाधिगमे अर्हत्प्रवचने भाष्यानुसारिण्यां तत्त्वार्थटीकायां
पञ्चमोऽध्यायः ॥ ५ ॥

॥ प्रथमो विभागः समाप्तः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रक्रमेणान्तराधिकारसूचा

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
		प्रथमोऽध्यायः १	
१	सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः		२५
,,	,,	सम्यक्शब्दफलम्	२६
,,	,,	सूत्रोपन्यासफलम्	२७
,,	,,	मार्ग इति एकवचने फलम्	२८
,,	,,	बहूनां कारणता	,,
,,	,,	सम्यग्दर्शनात् सम्यग्ज्ञानस्य भिन्नता	२९
,,	,,	सप्रत्ययसम्यक्शब्दार्थः	३०
,,	,,	इन्द्रियानिन्द्रियप्रातिस्वरूपम्	३१
२	तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्		३२
,,	,,	तत्त्वार्थस्यार्थः	,,
,,	,,	षष्ठीसप्तम्योः कथंचिदभेदः	३३
,,	,,	प्रशमादिव्याख्या	३४
३	तन्निसर्गादधिगमाद् वा		,,
,,	,,	निसर्गाधिगमवर्णनम्	३५
,,	,,	परिणामभेदः	३६
,,	,,	उपयोगरूपो जीवः	,,
,,	,,	निसर्गप्रातिरीतिः	३७
,,	,,	जगत्कर्तृत्ववादनिरासः	,,
,,	,,	स्थितिबन्धादिस्वरूपम्	३८
,,	,,	निसर्गाध्यवसायप्रातिः	३९
४	जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम्		४१
,,	,,	जीवादितत्त्वसप्तकस्य स्वरूपम्	,,
,,	,,	तत्त्वमित्येकवचने हेतुः	४२
,,	,,	आस्रवादीनां तत्त्वानां जीवाजीवयोरन्तर्भावः	,,
५	नामस्थापनाद्रव्यभावतस्तन्न्यासः		४३
,,	,,	जीवपदार्थे नामादिन्यासः	४४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
,,	,,	नामद्रव्यादिविचारः	४९
,,	,,	द्रव्याणां प्रातिलक्षणता	५०
६	प्रमाणनयैरधिगमः		५१
,,	,,	अधिगमसाधनम्	,,
,,	,,	प्रमाणद्वैविध्यम्	५२
,,	,,	प्रमाणनयानां भिन्नता	,,
७	निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः		५३
,,	,,	निर्देशादीनां व्याख्या	,,
,,	,,	सम्यक्त्वस्य निर्देशः	५५
,,	,,	आत्मपरोभयसंगमेन सम्यक्त्वम्	,,
,,	,,	क्षयोपशमादीनां साधनता	५७
,,	,,	आत्मपरोभयेषु सम्यक्त्ववृत्तिः	५८
,,	,,	सम्यग्दर्शनस्य सम्यग्दृष्टेश्च द्विधा स्थितिः	५९
,,	,,	साधनविधानसंख्यानां परस्परेण भेदः	६१
८	सत्सङ्ख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वैश्च		६२
,,	,,	सङ्ख्येयादिसङ्ख्यास्वरूपम् ।	६५
,,	,,	पुद्गलपरावर्तस्यार्थः ।	६७
९	मतिश्रुतावधिमनःपर्यायकेवलानि ज्ञानम्		६९
,,	,,	ज्ञानमित्येकवचने फलम्	,,
,,	,,	मतिज्ञानादीनां व्याख्या	,,
१०	तत् प्रमाणे		७०
,,	,,	प्रमाणसंख्या	,,
,,	,,	प्रमाणस्य शब्दार्थः	७१
११	आद्ये परोक्षम्		७२
,,	,,	परोक्षप्रमाणम्	,,
,,	,,	प्रामाण्यम्	७३
,,	,,	अपायसद्द्रव्ये परोक्षता	,,
,,	,,	श्रुतस्य परोक्षता	,,
१२	प्रत्यक्षमन्यत्		७४
,,	,,	अवध्यादेः प्रत्यक्षता	,,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
,,	,,	अनुमानादीनां प्रामाण्यविचारः	७५
,,	,,	अनुमानादीनां व्याख्या	,,
,,	,,	अनुमानादीनामिन्द्रियार्थसंबन्धहेतुता	७६
,,	,,	अनुमानादीनामप्रामाण्ये हेतुः	,,
१३	मतिः स्मृतिः संज्ञा चिन्ताऽभिनिबोध इत्यनर्थान्तरम्		७७
,,	,,	मतेः पर्यायाः	७८
१४	तदिन्द्रियानिन्द्रियनिमित्तम्		,,
,,	,,	मतेः कारणानि	,,
,,	,,	इन्द्रियानिन्द्रियनिमित्तता मतेः	७९
१५	अवग्रहेहापायधारणाः		८०
,,	,,	अवग्रहाद्या मतेर्भेदाः	,,
,,	,,	अवग्रहस्वरूपम्	,,
,,	,,	ईहायाः स्वरूपम्	८१
,,	,,	अपायस्य स्वरूपम्	८२
,,	,,	धारणायाः स्वरूपम्	,,
१६	बहुबहुविधक्षिप्रानिश्रितासन्दिग्धध्रुवाणां सेतराणाम्		८३
,,	,,	अवग्रहादेर्बह्वादयो भेदाः	,,
,,	,,	अल्पावग्रहः	८४
,,	,,	बह्ववग्रहस्य स्वरूपम्	,,
१७	अर्थस्य		८६
१८	व्यञ्जनस्यावग्रहः		,,
१९	न चक्षुरनिन्द्रियाभ्याम्		८७
,,	,,	नेत्रस्याप्राप्यकारित्वम्	,,
,,	,,	मतिज्ञानस्य भेदविचारः	८८
२०	श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदम्		,,
,,	,,	श्रुतशब्दस्यार्थः	,,
,,	,,	आगमादीनां व्युत्पत्त्यर्थः	८९
,,	,,	श्रुतज्ञानस्य भेदप्ररूपणा	९०
,,	,,	अङ्गबाह्यादीनां सामायिकादीनां व्याख्या	,,
,,	,,	अङ्गप्रविष्टानां आचारादीनां व्याख्या	९१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
,,	,,	मतिश्रुतयोः प्रतिविशेषः	९१
,,	,,	तीर्थकरोपदेशे कारणम्	९२
,,	,,	गणधरविशेषणानां सार्थकता	,,
,,	,,	श्रुतज्ञानस्य महाविषयत्वात् अङ्गादिभेदः	९३
,,	,,	श्रुतस्य शुद्धत अपारिणामिकता च	९५
२१	द्विविधोऽवधिः		,,
,,	,,	अवधेर्भेदौ	,,
२२	तत्र भवप्रत्ययो नारकदेवानाम्		९६
,,	,,	देवनारकयोरवधिः भवहेतुकः	,,
२३	यथोक्तनिमित्तः षड्विकल्पः शेषाणाम्		९७
,,	,,	नरतिरश्चां षड्विधोऽवधिः	,,
,,	,,	अवधेरनानुगामिकादिका भेदाः	९८
२४	ऋजुविपुलमती मनःपर्यायः		१००
,,	,,	मनःपर्यायस्य भेदौ	,,
,,	,,	ऋजुमतिविपुलमत्योः स्वरूपम्	१०१
२५	विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः		१०२
,,	,,	ऋजुविपुलमत्योर्विशेषः	,,
२६	विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्याययोः		,,
,,	,,	अवधिमनःपर्याययोर्विशेषः	,,
,,	,,	केवलानभिधानकारणम्	१०४
२७	मतिश्रुतयोर्निबन्धः सर्वद्रव्येष्वसर्वपर्यायेषु		१०५
,,	,,	मतिश्रुतयोर्निबन्धः	१०५
२८	रूपिष्ववधेः		,,
,,	,,	अवधेर्विषयः	,,
२९	तदनन्तभागे मनःपर्यायस्य		१०६
,,	,,	मनःपर्यायस्य विषयः	,,
३०	सर्वद्रव्यपर्यायेषु केवलस्य		,,
,,	,,	केवलस्य विषयः	,,
,,	,,	केवलस्वरूपम्	१०७
३१	एकादीनि भाज्यानि युगपदेकस्मिन्ना चतुर्भ्यः		१०८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
,,	,,	युगपदेकजीवे ज्ञानसंख्या	१०८
,,	,,	केवले शेषज्ञानासद्भावेऽन्यमतम्	१०९
,,	,,	क्रमयुगपदुपयोगौ	११०
,,	,,	क्षायोपशमिकक्षायिकतया भेदः	१११
३२	मतिश्रुतावधयो विपर्ययश्च		११२
,,	,,	मत्यादीनां विपर्ययः	,,
,,	,,	मिथ्यादृशामज्ञानिता	,,
,,	,,	मिथ्यादृष्टीनां प्रकाराः	११३
३३	सदसतोरविशेषाद् यदृच्छोपलब्धेरुन्मत्तवत्		,,
,,	,,	मिथ्यादृष्टेः अज्ञानित्वे हेतुः	,,
,,	,,	चारित्रानभिधाने हेतुः	११४
३४	नैगमसङ्ग्रहव्यवहारर्जुसूत्रशब्दा नयाः		,,
,,	,,	नयभेदाः	,,
,,	,,	नैगमस्य निर्देशः	११५
,,	,,	सङ्ग्रहस्य स्वरूपम्	,,
,,	,,	व्यवहारस्य व्याख्या	,,
,,	,,	ऋजुसूत्रस्य विचारः	,,
३५	आद्यशब्दौ द्वित्रिभेदौ		११६
,,	,,	आद्यशब्दनयभेदाः	,,
,,	,,	नैगमस्य द्वैविध्यम्	११७
,,	,,	शब्दस्य त्रैविध्यम्	,,
,,	,,	नैगमलक्षणम्	११८
,,	,,	सङ्ग्रहलक्षणम्	,,
,,	,,	व्यवहारलक्षणम्	,,
,,	,,	ऋजुसूत्रलक्षणम्	११९
,,	,,	शब्दलक्षणम्	,,
,,	,,	साम्प्रतलक्षणम्	,,
,,	,,	समभिरूढलक्षणम्	१२०
,,	,,	एवंभूतलक्षणम्	,,
,,	,,	नयस्य शब्दार्थः	,,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
,,	,,	नयानामध्यवसानान्तरता	१२१
,,	,,	घटे नयावतारः	१२२
,,	,,	सर्वस्यैकत्वादि	१२५
,,	,,	प्रमाणज्ञेयवत् तन्त्रान्तरता न	१२६
,,	,,	नयकारिकाः	१२७
,,	,	जीवादौ नयविचारः	१२८
,,	,,	ज्ञानाज्ञानेषु नयविचारः	१३२
,,	,,	अध्यायार्थोपसंहारः	१३३

द्वितीयोऽध्यायः २

,,	,,	अध्यायसम्बन्धः	१३६
१	औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च		१३७
,,	,,	भावेषु औपशमिकाद्या भेदाः	१३८
,,	,,	औपशमिकक्षायोपशमिकयोर्भिन्नता	,,
२	द्विनवाष्टादशैकविंशतित्रिभेदा यथाक्रमम्		१४१
,,	,,	औपशमिकादीनां भेदसंख्या	,,
३	सम्यक्त्वचारित्रे		१४२
,,	,,	औपशमिकस्य द्वौ भेदौ	,,
४	ज्ञानदर्शनदानलाभभोगोपभोगवीर्याणि च		,,
,,	,,	क्षायिकस्य नव भेदाः	,,
५	ज्ञानाज्ञानदर्शनदानादिलब्धयश्चतुस्त्रित्रिपञ्चभेदा यथाक्रमं सम्यक्त्वचारित्रसंयमासंयमाश्च		१४४
,,	,,	क्षायोपशमिकस्याष्टादश भेदाः	,,
६	गतिकषायलिङ्गमिथ्यादर्शनाज्ञानासंयतासिद्धत्वलेश्याश्चतुस्त्र्येकैकैकषड्भेदाः		१४५
,,	,,	२१ भेदा औदयिकस्य	,,
,,	,,	लेश्यास्वरूपम्	१४७
७	जीवभव्याभव्यत्वादीनि च		,,
,,	,,	३ भेदाः पारिणामिकाः	,,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
७	,,	अस्तित्वादयः साधारणाः	१४८
,,	,,	क्रियावत्त्वादयः	१४९
८	उपयोगो लक्षणम्		,,
,,	,,	उपयोगस्य लक्षणता	,,
,,	,,	उपयोगस्य नित्यता	१५०
,,	,,	ज्ञानस्वभावत्वेऽपि अज्ञानादयः	१५१
९	स द्विविधोऽष्टचतुर्भेदः		,,
,,	,,	उपयोगस्य भेदाः	,,
,,	,,	तच्छब्दस्य सार्थकता	१५२
,,	,,	साकारानाकारशब्दार्थः	,,
,,	,,	उपयोगे ज्ञानदर्शनभिन्नताया निरासः	१५३
१०	संसारिणो मुक्ताश्च		१५५
,,	,,	संसारस्य शब्दार्थः	१५६
११	समनस्कामनस्काः		,,
,,	,,	मनसो द्वैविध्यम्	१५७
१२	संसारिणस्त्रसस्थावराः		,,
,,	,,	संसारिजीवभेदप्रदर्शनम्	,,
१३	पृथिव्यम्बुवनस्पतयः स्थावराः		१५८
,,	,,	स्थावराणां त्रयो भेदाः	,,
,,	,,	पृथ्वीकायिकानामनेके भेदाः	१५९
,,	,,	अप्कायिकानां भेदप्रदर्शनम्	१६०
,,	,,	वनस्पतिकायिकानां भेदनिरूपणम्	,,
१४	तेजोवायू द्वीन्द्रियादयश्च त्रसाः		,,
,,	,,	त्रसानां भेदाः	,,
,,	,,	त्रसत्वस्य द्वैविध्यम्	१६१
१५	पञ्चेन्द्रियाणि		,,
,,	,,	इन्द्रियसंख्याप्रतिपादनम्	१६२
,,	,,	इन्द्रियस्य शब्दार्थः	१६३
१६	द्विविधानि		,,
,,	,,	इन्द्रियाणां मुख्यभेदौ	१६४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
१७	निर्वृत्त्युपकरणे द्रव्येन्द्रियम्		१६४
,,	,,	द्रव्येन्द्रियभेदौ	,,
,,	,,	निर्वृत्तीन्द्रियविचारः	,,
,,	,,	इन्द्रियसंस्थानानि	१६५
,,	,,	उपकरणेन्द्रियस्वरूपम्	१६६
१८	लब्ध्युपयोगौ भावेन्द्रियम्		,,
,,	,,	भावेन्द्रियभेदौ	,,
,,	,,	लब्धीन्द्रियस्य कारणत्रयापेक्षत्वं भेदाश्च	,,
,,	,,	लब्धीन्द्रियस्वरूपम्	,,
१९	उपयोगः स्पर्शादिषु		१६७
,,	,,	उपयोगेन्द्रियस्वरूपम्	१६८
,,	,,	निर्वृत्त्यादीनां क्रमः	,,
,,	,,	एकोपयोगिता	१६९
२०	स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि		,,
,,	,,	इन्द्रियनामानि	,,
२१	स्पर्शरसगन्धवर्णशब्दास्तेषामर्थाः		१७०
,,	,,	इन्द्रियाणां विषयाः	,,
,,	,,	एकस्यार्थस्यानेकविषयता	,,
,,	,,	द्रव्यक्षेत्रादीनामनिमित्तता	१७१
,,	,,	प्राप्याप्राप्यविषयता	,,
२२	श्रुतमनिन्द्रियस्य		,,
,,	,,	अनिन्द्रियस्य विषयः	,,
,,	,,	द्रव्यभावश्रुते	१७२
,,	,,	मनसः स्वरूपम्	,,
२३	वाय्वन्तानामेकम्		,,
,,	,,	स्थावराणामिन्द्रियनियमः	१७३
२४	कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानि		,,
,,	,,	द्वीन्द्रियादीनामिन्द्रियवृद्धिः	१७४
,,	,,	नारकादिक्रमे हेतुः	,,
,,	,,	भाष्यपाठभेदः	१७५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
२५	संज्ञिनः समनस्काः		१७५
,,	,,	सम्प्रधारणसंज्ञा	,,
,,	,,	उपलब्धिनानात्वम्	१७६
,,	,,	आहारादिसंज्ञास्वरूपम्	१७७
,,	,,	सम्प्रधारणेन समनस्कतालक्षणम्	,,
२६	विग्रहगतौ कर्मयोगः		१७८
,,	,,	संसरणस्य द्वैविध्यम्	,,
,,	,,	अन्तर्गतिविचारः	,,
,,	,,	योगविभागः	,,
,,	,,	तैजसस्य भिन्नयोगाभावः	१७९
,,	,,	योगस्वामिनः	,,
,,	,,	विग्रहगतौ निरुपभोगता	,,
२७	अनुश्रेणिर्गतिः		१८०
,,	,,	गतेरनुश्रेणितानियमः	,,
,,	,,	अनुश्रेणौ पुद्गलग्रहणे हेतुः	१८१
२८	अविग्रहा जीवस्य		,,
,,	,,	सिध्यमानस्य गतिनियमः	,,
२९	विग्रहवती च संसारिणः प्राक् चतुर्भ्यः		१८२
,,	,,	विग्रहगतिसङ्ख्या	,,
,,	,,	विग्रहे हेतुः	,,
,,	,,	त्रिसमयीं यावद् विग्रहः	१८३
,,	,,	विग्रहगतिशब्दार्थः	,,
,,	,,	त्रिवक्रानुपादाने हेतुः	१८४
,,	,,	पञ्चसमयानुपादाने हेतुः	,,
,,	,,	अविग्रहे हेतुः	,,
,,	,,	विग्रहशब्दस्य पर्यायाः	१८५
,,	,,	वक्रगतौ हेतुः	,,
३०	एकसमयोऽविग्रहः		१८६
,,	,,	विग्रहे समयमानम्	,,
३१	एकं द्वौ वाऽनाहारकः		१८७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
३१	,,	विग्रहेऽनाहारकता	१८७
,,	,,	वाशब्दस्य विचारः	,,
,,	,,	आहारस्य त्रैविध्यम्	,,
,,	,,	जन्मसूत्रे प्रस्तावना	१८८
३२	सम्मूर्च्छनगर्भोपपाता जन्म		१८९
,,	,,	जन्मभेदाः	,,
,,	,,	सम्मूर्च्छनजन्मनो व्याख्या	,,
,,	,,	गर्भजन्मनो विचारः	१९०
,,	,,	उपपातजन्मनः स्वरूपम्	,,
,,	,,	अनन्तरसूत्रसम्बन्धः	,,
३३	सचित्तशीतसंवृताः सेतरा मिश्राश्चैकशस्तद्योनयः		,,
,,	,,	जन्मिनां योनिनवकम्	,,
,,	,,	योनिलक्षणम्	१९१
,,	,,	योनिशब्दस्यार्थः	,,
,,	,,	कस्य का योनिः	,,
,,	,,	योषिद्योनिविचारः	,,
,,	,,	नारकादिषु योनिविभागः	१९२
,,	,,	जीवयोनिसंख्या	,,
३४	जराय्वण्डपोतजानां गर्भः		१९३
,,	,,	गर्भजजन्मवतां भेदाः	,,
३५	नारकदेवानामुपपातः		१९४
,,	,,	उपपातजानां भेदाः	,,
३६	शेषाणां सम्मूर्च्छनम्		,,
,,	,,	संमूर्च्छनजा जीवाः	,,
३७	औदारिकवैक्रियाहारकतैजसकार्मणानि शरीराणि		१९५
,,	,,	सूत्रविचारः	,,
,,	,,	शरीरभेदाः	,,
,,	,,	औदारिकादिशरीराणां व्युत्पत्तिः	,,
३८	परं परं सूक्ष्मम्		१९६
,,	,,	शरीराणां परस्परं महत्त्वाल्पत्वे	,,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
३८	,,	शरीराणां सूक्ष्मतादर्शनम्	१९७
३९	प्रदेशतोऽसङ्ख्येयगुणं प्राक् तैजसात्		,,
,,	,,	प्रदेशापेक्षया शरीरतारतम्यम्	,,
४०	अनन्तगुणे परे		१९८
,,	,,	तैजसकार्मणयोः प्रदेशमानम्	,,
४१	अप्रतिघाते		१९९
,,	,,	तैजसकार्मणयोरप्रतिघातिता	,,
४२	अनादिसम्बन्धे च		२००
,,	,,	तैजसकार्मणयोरनादिः सम्बन्धः	,,
४३	सर्वस्य		,,
,,	,,	सर्वसंसारिणां तैजसकार्मणवत्ता	,,
,,	,,	तैजसस्यानादितायां मतभेदः	२०१
४४	तदादीनि भाज्यानि युगपदेकस्या चतुर्भ्यः		२०२
,,	,,	एकजीवे युगपत् शरीरसंख्या	२०३
,,	,,	युगपत् पञ्चशरीर्या अभावः	२०४
४५	निरुपभोगमन्त्यम्		,,
,,	,,	कार्मणस्य बाह्योपभोगाभावः	,,
,,	,,	औदारिकादीनां प्रयोजनानि	२०६
४६	गर्भसम्मूर्च्छनजमाद्यम्		२०७
,,	,,	औदारिकशरीरस्य स्वामिनः	,,
,,	,,	औदारिकप्रमाणम्	,,
४७	वैक्रियमौपपातिकम्		,,
,,	,,	वैक्रियस्वामिनः	,,
,,	,,	वैक्रियप्रमाणम्	,,
४८	लब्धिप्रत्ययं च		२०८
,,	,,	लब्ध्या वैक्रियसद्भावः	,,
४९	शुभं विशुद्धमव्याघाति चाहारकं चतुर्दशपूर्वधर एव		,,
,,	,,	आहारकस्य स्वरूपम्	,,
,,	,,	आहारकस्य स्वामी	२०९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
४९	,,	चतुर्दशपूर्वधरस्य विचारः	२०९
,,	,,	तैजसे हेतुः	,,
,,	,,	कार्मणस्य स्वरूपम्	२१०
,,	,,	कार्मणतैजसप्रमाणम्	,,
,,	,,	औदारिकस्य विस्तरेणार्थः	२११
,,	,,	वैक्रियस्य विस्तरेण व्याख्या	२१२
,,	,,	आहारकस्य शब्दार्थविस्तारः	२१४
,,	,,	तैजसस्य विचारः	,,
,,	,,	कार्मणविचारः	,,
,,	,,	शरीराणां नानात्वे हेतवः	२१५
,,	,,	लिङ्गसूत्रे प्रस्तावना	२१६
५० नारकसम्मूर्च्छिनो नपुंसकानि			२१७
,, ,,		नपुंसकवेदवन्तो जीवाः	,,
५१ न देवाः			,,
,, ,,		देवानां वेदौ	,,
,, ,,		आयुषोऽपवर्तनादि	२१८
,, ,,		आयुषो द्वैविध्यम्	२१९
,, ,,		अपवर्तनेऽपि क्षयाभावः	२२०
,, ,,		युगलिनोऽप्यायुषोऽपवर्तनम्	२२१
५२ औपपातिकचरमदेहोत्तमपुरुषासङ्ख्येयवर्षायुषोऽनपवर्त्यायुषः			,,
,, ,,		अनपवर्त्यायुषः स्वामिनः	,,
,, ,,		अपवर्तनीयायुषि हेतुः	२२२
,, ,,		आयुषो ह्रासेऽपि कृतनाशादिदोषाभावः	२२४
,, ,,		अपवर्तनेऽप्यक्षयत्वे दृष्टान्तः	२२५
,, ,,		प्रकृतस्य समर्थनम्	२२६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
		तृतीयोऽध्यायः ३	
,,	,,	नारकाधिकारप्रस्तावना	२२८
,,	,,	नारकाधिकारस्थानानि	,,
१	रत्नशर्कराबालुकापङ्कधूमतमोमहातमःप्रभा भूमयो घनाम्बुवाताकाशप्रतिष्ठाः सप्ताधोऽधः पृथुतराः		२२९
,,	,,	नरकपृथ्वीनामाधाराः	,,
,,	,,	घनशब्दफलम्	२३०
,,	,,	खरपङ्कादिप्रतिष्ठात्वम्	,,
,,	,,	प्रतिष्ठाने लोकस्थितिर्हेतुः	२३१
,,	,,	अधःपृथ्वीनां सप्तत्वनियमः	२३२
,,	,,	असङ्ख्यप्रस्तारे निरासः	,,
,,	,,	पृथ्वीनामाकारो नामानि बाहल्यं च	२३३
,,	,,	घनोदध्यादिमानम्	,,
२	तासु नरकाः		२३४
,,	,,	नारकाणां स्थानम्	,,
,,	,,	नारकावासानां संस्थानानि नामानि च	२३५
,,	,,	नरकेषु प्रस्तराणां नरकावासानां च संख्या	२३६
३	तेषु नारका नित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः		२३७
,,	,,	नरकनारकाणां स्वरूपम्	,,
,,	,,	नारकाणां लेश्या	२३८
,,	,,	नारकाणां पुद्गलपरिणामः	,,
,,	,,	नारकाणां शरीरस्वरूपं मानं च	२३९
,,	,,	नारकाणां वेदना	२४०
४	परस्परोदीरितदुःखाः		२४१
,,	,,	क्षेत्रजा वेदना	२४२
,,	,,	परस्परोदीरितं दुःखम्	,,
५	सङ्क्लिष्टासुरोदीरितदुःखाश्च प्राक् चतुर्थ्याः		,,
,,	,,	परमाधार्मिककृता वेदनाः	२४३
६	तेष्वेक-त्रि-सप्त-दश-सप्तदश-द्वाविंशति-त्रयस्त्रिंशत्सागरोपमाः सत्त्वानां परा स्थितिः		२४४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
६	,,	नारकाणां परा स्थितिः	२४४
,,	,,	नारकाणामागतिर्गतिश्च	२४५
,,	,,	नारकेष्वसंभविनः पदार्थाः	,,
,,	,,	लोकानुभावजाः पदार्थाः	२४६
,,	,,	लोकस्य त्रैविध्यम्	,,
,,	,,	तिर्यग्लोकप्रस्तावना	२४८
७ जम्बूद्वीपलवणादयः शुभनामानो द्वीपसमुद्राः			,,
,,	,,	द्वीपसमुद्रव्यवस्था	,,
,,	,,	द्वीपसमुद्रनामानि	२४९
८ द्विर्द्विर्विष्कम्भाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः			,,
,,	,,	द्वीपसमुद्रसंस्थानम्	,,
९ तन्मध्ये मेरुनाभिर्वृत्तो योजनशतसहस्रविष्कम्भो जम्बूद्वीपः			२५०
,,	,,	जम्बूद्वीपस्वरूपम्	,,
,,	,,	मेरुस्वरूपम्	२५१
१० तत्र भरत-हैमवत-हरि-विदेह-रम्यक-हैरण्यवतैरावतवर्षाः क्षेत्राणि			२५३
,,	,,	भरतादिक्षेत्रस्वरूपम्	,,
,,	,,	नैश्चयिकदिगपेक्षया व्यवस्था	२५४
११ तद्विभाजिनः पूर्वापरायता हिमवन्-महाहिमवन्-निषध-नील-रुक्मि-शिखरिणो वंशधरपर्वताः			२५५
,,	,,	हिमवदादिवर्षधरस्वरूपम्	,,
,,	,,	हिमवदादीनां मानम्	२५६
,,	,,	भरतस्य ज्यामानादि	,,
,,	,,	वैताढ्यो देवकुरवश्च	,,
,,	,,	उत्तरकुरुविदेहादयः	२५७
,,	,,	क्षुद्रमन्दरस्वरूपम्	,,
,,	,,	परिध्यानयनादिकरणम्	२५८
१२ द्विर्धातकीखण्डे			२६१
,, ,,		धातकीखण्डे क्षेत्राद्यतिदेशः इषुकारौ च	,,
१३ पुष्करार्धे			२६२
,, ,,		मानुषोत्तरः पर्वतः	,,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
१३	पुष्करार्धे	मानुषोत्तराभिधाने कारणम्	२६३
,,	,,	नरलोके द्वीपसमुद्रादिसंख्या	२६४
१४	प्राङ् मानुषोत्तरान्मनुष्याः		२६५
,,	,,	मनुष्याणां स्थानम्	,,
१५	आर्या म्लेच्छाश्च		,,
,,	,,	मनुष्यभेदाः क्षेत्रार्यादिकाश्च	,,
,,	,,	अन्तरद्वीपकाः	२६६
१६	भरतैरावतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्यः		२६७
,,	,,	कर्माकर्मभूमिस्वरूपम्	२६८
१७	नृस्थिती परापरे त्रिपल्योपमान्तर्मुहूर्ते		२६९
,,	,,	नरायुषो मानम्	,,
१८	तिर्यग्योनीनां च		,,
,,	,,	तिर्यगायुर्मानम्	,,
,,	,,	पृथ्वीकायादीनामायुर्मानम्	२७०

चतुर्थोऽध्यायः ४

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
		अध्यायोपोद्घातः	२७१
१	देवाश्चतुर्निकायाः		,,
,,	,,	देवानां भेदप्रतिपादनम्	,,
,,	,,	देवशब्दस्य व्युत्पत्त्यर्थः	२७२
,,	,,	चतुर्विधदेवानां जन्मनिवासभूमयः	२७३
,,	,,	देवानां पञ्चविधत्वम्	,,
२	तृतीयः पीतलेश्यः		२७४
३	दशाष्टपञ्चद्वादशविकल्पाः कल्पोपपन्नपर्यन्ताः		,,
,,	,,	भवनपत्यादिदेवानां भेदविचारः	२७५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
४	इन्द्रसामानिकत्रायस्त्रिंशपारिषद्यात्मरक्षलोकपालानीकप्रकीर्णकाभियोग्यकिल्बिषिकाश्चैकशः		२७५
,,	,,	प्रतिकल्पमिन्द्राद्या भेदाः	,,
५	त्रायस्त्रिंशलोकपालवर्जा व्यन्तरज्योतिष्काः		२७६
६	पूर्वयोर्द्वीन्द्राः		,,
,,	,,	भवनपत्यादिदेवानामिन्द्राः	२७७
,,	,,	वैमानिकानां कल्पाः	,,
७	पीतान्तलेश्याः		,,
,,	,,	देवानां त्रैविध्यम्	२७८
८	कायप्रवीचारा आ ऐशानात्		,,
,,	,,	प्रवीचाराविचारः	,,
९	शेषाः स्पर्श-रूप-शब्द-मनःप्रवीचारा द्वयोर्द्वयोः		,,
,,	,,	देवीभोगाधिकारः	२७९
१०	परे अप्रवीचाराः		२८०
,,	,,	कल्पातीतानामप्रवीचारत्वम्	,,
११	भवनवासिनोऽसुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः		२८१
,,	,,	भवनवासिनां विधानानि	,,
,,	,,	असुरकुमारादीनां वर्णनम्	२८२
,,	,,	भवनसङ्ख्या	२८३
१२	व्यन्तराः किन्नर-किंपुरुष-महोरग-गान्धर्व-यक्ष-राक्षस-भूत-पिशाचाः		,,
,,	,,	व्यन्तरभेदाः	,,
,,	,,	व्यन्तरशब्दार्थः	,,
,,	,,	किंपुरुषादिभेदाः	,,
,,	,,	किन्नरादीनां वर्णनम्	२८४
१३	ज्योतिष्काः सूर्याश्चन्द्रमसो ग्रहनक्षत्रप्रकीर्णतारकाश्च		२८५
,,	,,	ज्योतिष्कभेदाः	,,
,,	,,	ज्योतिष्काणां विमानप्रस्तारः	,,
१४	मेरुप्रदक्षिणा नित्यगतयो नृलोके		२८६
,,	,,	ज्योतिष्काणां गतिः	,,
,,	,,	सूर्यादीनां संख्या	२८७
,,	,,	सूर्यादीनां विष्कम्भः	२८८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
१४	मेरुप्रदक्षिणा नित्यगतयो नृलोके	ज्योतिष्कविमानवाहकाः	२८९
१५	तत्कृतः कालविभागः		,,
,,	,,	कालस्य द्रव्यताविचारः	२९०
,,	,,	लौकिकसमकालविभागः	२९१
,,	,,	प्रत्युत्पन्नादीनां भेदान्तरम्	,,
,,	,,	समयस्य स्वरूपम्	,,
,,	,,	आवलिकादिविचारः	२९२
,,	,,	चन्द्रमासादीनां तन्नामसंवत्सराणां च स्वरूपम्	२९३
,,	,,	पूर्वाङ्गादिस्वरूपम्	,,
,,	,,	पल्योपमादिविचारः	२९४
,,	,,	पल्योपमस्यावान्तरभेदाः, तेषां प्रयोजनानि च	,,
,,	,,	क्षेत्रापेक्षया कालविचारः	२९५
,,	,,	कालचक्रे शरीरोच्छ्रायादिविचारः	,,
१६	बहिरवस्थिताः		२९६
,,	,,	नृलोकबहिर्ज्योतिष्कविचारः	,,
१७	वैमानिकाः		,,
१८	कल्पोपपन्नाः कल्पातीताश्च		२९७
,,	,,	वैमानिकानां द्वैविध्यम्	,,
१९	उपर्युपरि		,,
२०	सौधर्मै-शान-सनत्कुमार-माहेन्द्र-ब्रह्मलोक-लान्तक-महाशुक्र-सहस्रारेष्वानतप्राणतयोरारणाच्युतयो-र्नवसु ग्रैवेयकेषु विजय-वैजयन्त-जयन्ता-ऽपराजितेषु सर्वार्थसिद्धे च		,,
,,	,,	सौधर्मकल्पादीनां वर्णनम्	२९८
,,	,,	अनुत्तराणां पञ्चविधत्वम्	२९९
२१	स्थितिप्रभावसुखद्युतिलेश्याविशुद्धीन्द्रियावधिविषयतोऽधिकाः		,,
,,	,,	स्थितिप्रभावादिभिरुत्तरोत्तरदेवानामाधिक्यम्	३००
,,	,,	इन्द्रियावधिविषयाधिकतोत्तरोत्तरदेवानाम्	,,
२२	गतिशरीरपरिग्रहाभिमानतो हीनाः		३०१
,,	,,	गत्यादिभिरुत्तरोत्तरदेवानां हीनत्वम्	,,
,,	,,	वैमानिकदेवानां शरीरोच्छ्रायः	३०२
,,	,,	सौधर्मादीनां प्रस्ताराः	,,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
२२	गतिशरीरपरिग्रहाभिमानतो हीनः	सौधर्मादिष्वावलिकाप्रविष्टानां पुष्पावकीर्णानां च विमानानां सङ्ख्या	३०३
,,	,,	देवानामुच्छ्वासाहारौ	३०४
,,	,,	देवानां वेदनोपपातानुभावविचारः	,,
२३	पीतपद्मशुक्ललेश्या द्वित्रिशेषेषु		३०५
,,	,,	वैमानिकानां लेश्याः	,,
२४	प्राग् ग्रैवेयकेभ्यः कल्पाः		,,
,,	,,	देवानां दृष्टिः	३०६
२५	ब्रह्मलोकालया लोकान्तिकाः		,,
२६	सारस्वतादित्यवह्न्यरुणगर्दतोयतुषिताव्याबाधमरुतोऽरिष्टाश्च		३०७
,,	,,	लोकान्तिकानां व्यवस्था	,,
२७	विजयादिषु द्विचरमाः		,,
,,	,,	अनुत्तरदेवानां भवोच्छेदः	३०८
,,	,,	तिर्यक्प्रस्तावः	,,
२८	औपपातिकमनुष्येभ्यः शेषास्तिर्यग्योनयः		,,
,,	,,	तिरश्चां निर्देशः	,,
२९	स्थितिः		३०९
३०	भवनेषु दक्षिणार्धाधिपतीनां पल्योपममध्यर्धम्		,,
,,	,,	भवनवासिनां स्थितिः	,,
३१	शेषाणां पादोने		,,
३२	असुरेन्द्रयोः सागरोपममधिकं च		३१०
३३	सौधर्मादिषु यथाक्रमम्		,,
,,	,,	वैमानिकस्थितिप्रस्तावः	,,
३४	सागरोपमे		,,
३५	अधिके च		,,
३६	सप्त सनत्कुमारे		,,
३७	विशेषत्रिसप्तदशैकादशत्रयोदशपञ्चदशभिरधिकानि च		३११
,,	,,	माहेन्द्रादीनां परा स्थितिः	,,
३८	आरणाच्युतादूर्ध्वमेकैकेन नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धे च		,,
३९	अपरा पल्योपममधिकं च		३१२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
४०	सागरोपमे		३१२
४१	अधिके च		,,
४२	परतः परतः पूर्वा पूर्वाऽनन्तरा		,,
४३	नारकाणां च द्वितीयादिषु		३१३
,,	,,	नारकाणां स्थितिः	,,
४४	दश वर्षसहस्राणि प्रथमायाम्		,,
४५	भवनेषु च		,,
४६	व्यन्तराणां च		,,
४७	परा पल्योपमम्		३१४
४८	ज्योतिष्काणामधिकम्		,,
४९	ग्रहाणामेकम्		,,
५०	नक्षत्राणामर्धम्		,,
५१	तारकाणां चतुर्भागः		,,
५२	जघन्या त्वष्टभागः		,,
५३	चतुर्भागः शेषाणाम्		,,

पञ्चमोऽध्यायः ५

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
		सूत्रोपन्यासः	३१५
१	अजीवकाया धर्माधर्माकाशपुद्गलाः		,,
,,	,,	प्रतिषेधस्य द्वैविध्यम्	,,
,,	,,	धर्मादीनां विचारः	३१६
,,	,,	अजीवकायभेदाः	,,
२	द्रव्याणि जीवाश्च		३१९
,,	,,	द्रव्यशब्दार्थः	,,
३	नित्यावस्थितान्यरूपाणि च		,,
,,	,,	सूत्रपाठविचारः	३२१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
३	नित्यावस्थितान्यरूपाणि च	रूपविचारः	३२३
४	रूपिणः पुद्गलाः		३२४
,,	,,	नित्यताया द्वैविध्यम्, अनित्यतायाश्च	,,
,,	,,	पुद्गललक्षणम्	३२५
५	आकाशादेकद्रव्याणि		३२६
,,	,,	धर्मादीनां सङ्ख्या	,,
६	निष्क्रियाणि च		,,
,,	,,	धर्मादिषु क्रियाविचारः	,,
७	असङ्ख्येयाः प्रदेशा धर्माधर्मयोः		३२९
,,	,,	धर्माधर्मयोः प्रदेशस ख्या	,,
८	जीवस्य च		,,
,,	,,	जीवस्य प्रदेशसङ्ख्या	,,
९	आकाशस्यानन्ताः		३३०
,,	,,	अलोकेऽवगाहदातृतायां विचारः	,,
,,	,,	आकाशस्य प्रदेशसङ्ख्या	,,
१०	सङ्ख्येयासङ्ख्येयाश्च पुद्गलानाम्		३३१
,,	,,	पुद्गलानां प्रदेशसङ्ख्या	,,
११	नाणोः		,,
,,	,,	परमाणोः स्वरूपम्	३३२
१२	लोकाकाशेऽवगाहः		,,
,,	,,	अवगाहविचारः	,,
१३	धर्माधर्मयोः कृत्स्ने		,,
१४	एकप्रदेशादिषु भाज्यः पुद्गलानाम्		३३३
,,	,,	पुद्गलानामवगाहः	,,
१५	असङ्ख्येयभागादिषु जीवानाम्		३३४
,,	,,	जीवानामवगाहः	,,
१६	प्रदेशसंहारविसर्गाभ्यां प्रदीपवत्		,,
,,	,,	आत्मप्रदेशानां सङ्कोचविकासौ	,,
१७	गतिस्थित्युपग्रहौ धर्माधर्मयोरुपकारः		३३७
१८	आकाशस्यावगाहः		३३९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
१८	आकाशस्यावगाहः	आकाशस्योपकारः	३३९
,,	,,	अवगाहगुणत्वम्	,,
,,	,,	आकाशलिङ्गसम्बन्धिमतान्तरम्	३४०
,,	,,	पुद्गलानामुपकारः	३४१
१९	शरीरवाङ्मनःप्राणापानाः पुद्गलानाम्		,,
,,	,,	वाङ्मनआदीनां पौद्गलिकत्वम्	,,
२०	सुखदुःखजीवितमरणोपग्रहाश्च		३४३
,,	,,	पुद्गलेषु सर्वोपकारिता	३४६
२१	परस्परोपग्रहो जीवानाम्		,,
,,	,,	जीवोपकारः	,,
२२	वर्तना परिणामः क्रिया परत्वापरत्वे च कालस्य		३४८
,,	,,	कालस्योपकारः	,,
,,	,,	कालस्य नृलोकवृत्तिता	,,
,,	,,	वर्तनास्वरूपम्	३४९
,,	,,	परिणामस्वरूपम्	३५०
,,	,,	हेमन्तवर्णनम्	,,
,,	,,	शिशिरवर्णनम्	३५१
,,	,,	वसन्तवर्णनम्	,,
,,	,,	ग्रीष्मवर्णनम्	,,
,,	,,	वर्षावर्णनम्	,,
,,	,,	शरद्वर्णनम्	३५२
,,	,,	वेलानियमः	,,
,,	,,	गतिविचारः	३५३
,,	,,	प्रयोगगत्यादिविचारः	,,
,,	,,	परत्वापरत्वविचारः	,,
,,	,,	पुद्गलशब्दार्थः	३५४
२३	स्पर्शरसगन्धवर्णवन्तः पुद्गलाः		३५५
,,	,,	पुद्गललक्षणम्	,,
,,	,,	स्पर्शादीनां प्रकाराः	३५६
,,	,,	कठिनप्रमुखस्पर्शादीनां लक्षणानि	,,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
२४	शब्द-बन्ध-सौक्ष्म्य-स्थौल्य-संस्थान-भेद-तम-च्छाया-ऽऽतपोद्योतवन्तश्च		३५६
,,	,,	पुद्गलानां शब्दादिधर्माः	,,
,,	,,	शब्दस्य स्फोटाद् भिन्नत्वम्	३५७
,,	,,	शब्दस्य पुद्गलत्वे हेतवः	३५८
,,	,,	शब्दस्य गुणत्वे वैशेषिकविचारः	,,
,,	,,	शब्दस्य गुणत्वनिरासः	,,
,,	,,	नित्यानित्यत्वयोर्विरोधाभावः	३५९
,,	,,	अन्यमतपूर्वकं शब्दस्वरूपम्	३६०
,,	,,	शब्दस्य भेदप्रभेदाः	,,
,,	,,	बन्धस्य त्रैविध्यम्	,,
,,	,,	सौक्ष्म्यस्य द्वैविध्यम्	३६१
,,	,,	स्थौल्यस्य द्वैविध्यम्	,,
,,	,,	वृत्तादिसंस्थानानां तद्भेदपूर्विका व्याख्या	३६२
,,	,,	भेदानां पञ्चविधत्वम्	३६३
,,	,,	तमश्छायादीनां मूर्तद्रव्यविकारता	,,
,,	,,	तमसः पुद्गलत्वम्	,,
,,	,,	प्रतिबिम्बस्य पर्यालोचना	३६४
२५	अणवः स्कन्धाश्च		३६५
,,	,,	पुद्गलानां द्वैविध्यम्	,,
,,	,,	कार्यकारणलक्षणम्	३६६
२६	सङ्घातभेदेभ्य उत्पद्यन्ते		,,
,,	,,	सङ्घातोद्भवे त्रिकारणता	,,
,,	,,	परमाणूनां प्रतिघातस्य त्रैविध्यम्	३६८
,,	,,	संयोगबन्धयोर्विशेषता	,,
२७	भेदादणुः		३७१
२८	भेदसङ्घाताभ्यां चाक्षुषाः		३७२
,,	,,	सल्लक्षणसूत्रावतरणम्	३७३
२९	उत्पादव्ययध्रौव्ययुक्तं सत्		३७४
,,	,,	अभावस्याप्रतिषेधात्मकता	,,
,,	,,	केषाञ्चिद् द्रव्याणामनुपलब्धेर्हेतवः	३७५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
२९	,,	द्रव्यपर्यायास्तिकौ	,,
,,	,,	द्रव्यस्यापलापः	,,
,,	,,	द्रव्यस्यान्यत्वम्	३७६
,,	,,	द्रव्यपर्यायवादः	३७७
,,	,,	द्रव्यव्यतिरिक्तता	,,
,,	,,	सामान्यसिद्धिः	३७८
,,	,,	सामान्यविशेषरूपता	,,
,,	,,	कार्यकारणानेकान्तत्वम्	३८०
,,	,,	अवयविनोऽनन्यत्वम्	,,
,,	,,	दीर्घह्रस्वत्वसिद्धिः	३८१
,,	,,	उत्पादादिपदानामर्थः	,,
,,	,,	उत्पादादेर्भेदाः	३८३
,,	,,	ध्रौव्यसिद्धिः	३८५
,,	,,	विनाशे भेदाः	,,
,,	,,	निर्हेतुकनाशपक्षः	३८६
,,	,,	सहेतुकता नाशस्य	३८७
,,	,,	उत्पादादीनामेककालत्वादि	३८९
,,	,,	उत्पादादेर्नित्यानित्यत्वे	३९०
३०	तद्भावाव्ययं नित्यम्		३९१
,,	,,	द्रव्यस्य नित्यता	,,
,,	,,	नित्यसूत्रफलम्	३९२
,,	,,	द्रव्यपर्यायाभ्यां नित्यानित्यत्वे	,,
३१	अर्पितानर्पितसिद्धेः		३९३
,,	,,	अर्पितानर्पितस्वरूपम्	,,
,,	,,	विवक्षामुख्यता	,,
,,	,,	नित्यानित्यत्वयोः सहावस्थानविरोधाभावः	३९५
,,	,,	एकत्रानवस्थानादिविरोधखण्डनम्	३९६
,,	,,	धर्मकीर्तिमतखण्डनम्	३९७
,,	,,	द्रव्याणां पर्यायाणां द्वैविध्यम्	३९८
,,	,,	द्रव्यास्तिकस्वरूपम्	४००

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
३१	अर्पितानर्पितसिद्धेः	मातृकापदास्तिकम्	४००
,,	,,	पर्यायवादिमतम्	४०१
,,	,,	ऋजुसूत्रादिभिः पर्यायपक्षः	४०२
,,	,,	द्रव्यमतनिरूपणम्	४०४
,,	,,	द्रव्यास्तिके नैगमः	४०५
,,	,,	द्रव्यास्तिके संग्रहः	,,
,,	,,	द्रव्यास्तिके व्यवहारः	,,
,,	,,	पर्यायास्तिके उत्पन्ना०ऋजुसूत्रः	४०६
,,	,,	सदादिभङ्गाः	४०७
,,	,,	एवकारस्यार्थत्रैविध्यम्	४०९
,,	,,	व्यवच्छेदेऽपि स्याद्वादः	,,
,,	,,	स्वद्रव्यादिना सत्त्वम्	४१०
,,	,,	अस्तिनास्तिरूपता	,,
,,	,,	अवक्तव्यत्वम्	४११
,,	,,	कालादयो वृत्तिहेतवः	,,
,,	,,	युगपदवाच्यता	४१२
,,	,,	प्रथमो विकल्पः	४१३
,,	,,	धर्मधर्मिस्याद्वादः	,,
,,	,,	सद्भावासद्भावापेक्षया द्रव्यस्यैकत्वादिविचारः	४१४
,,	,,	द्वितीयो विकल्पः	,,
,,	,,	तृतीयो विकल्पः	४१५
,,	,,	पर्यायादेशविकल्पाः	,,
,,	,,	सकलादेशविकलादेशोत्पत्तिः	४१६
,,	,,	चतुर्थो विकल्पः	४१७
,,	,,	पञ्चमो विकल्पः	,,
,,	,,	षष्ठो विकल्पः	,,
,,	,,	सप्तमो विकल्पः	४१८
,,	,,	नयत्रयापेक्षया सप्तभ गी	,,
,,	,,	शब्दनयाः	,,
,,	,,	पुद्गलबन्धहेतुः	४१९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्राङ्कः	सूत्रपाठः	अधिकारः	पृष्ठाङ्कः
३२	स्निग्धरूक्षत्वाद् बन्धः		४२०
३३	न जघन्यगुणानाम्		४२१
३४	गुणसाम्ये सदृशानाम्		४२२
३५	द्व्यधिकादिगुणानां तु		४२४
३६	बन्धे समाधिकौ पारिणामिकौ		४२६
३७	गुणपर्यायवद् द्रव्यम्		४२७
३८	कालश्चेत्येके		४२९
,,	,,	कालस्य द्रव्यत्वम्	४२९
,,	,,	कालद्रव्यस्य पार्थक्यम्	४३०
,,	,,	काले उत्पादादिमत्ता	,,
,,	,,	भाववृत्तौ कालस्यापेक्षिता	४३१
,,	,,	परापरत्वादेः स्थितिविशेषापेक्षिता	४३२
,,	,,	कालस्य पर्यायता	,,
३९	सोऽनन्तसमयः		४३३
,,	,,	कालस्य समयाः	,,
,,	,,	कालेऽवयवविचारः	४३४
४०	द्रव्याश्रया निर्गुणा गुणाः		४३५
४१	तद्भावः परिणामः		४३६
४२	अनादिरादिमांश्च		४३८
४३	रूपिष्वादिमान्		४३९
४४	योगोपयोगौ जीवेषु		४४०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमः श्रीप्रभुधर्मसूरये ।

शुद्धिपत्रकम् ।

(पाठान्तरादिसमेतम्)

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
११	१४	Punnyāsa	Pannyāsa
११	१४	Add now before Āgamoddhāraka	
१३	१९	मां प्रति	मह्यं
१४	५	निर्धारिता	निर्धारिताः
१८	१०	श्रीउमास्वाति०	**श्रीउमास्वाति०**
२२	१०	उत्तराध्ययनवृत्तौ	उत्तराध्ययनसूत्र
२२	१२	०मन्त्रस्तथाषधैः	०मन्त्रस्तथौषधैः
२२	१८	**०गमसत्र०**	**०गमसूत्र०**

१	९	०सूरिकृताटीका	०सूरिकृता टीका
२	२	स्वच्छतामन्यां	स्वच्छतामनन्यां
,,	४	०गमिकम०	०गमिकामा०
,,	५	शुद्धमध्ययनादिकाले	शुद्धमध्ययनादि काले
,,	१०	कर्तृकरणे कृता	कर्तृकरणे कृते सति कर्तृकरणे कृता
,,	१२	च चारित्राद्	चरित्रद्
,,	१४	इति कृत्वा ज्ञानशुद्धः—	इतिकृत्वा ज्ञानशुद्धं
,,	१८	ज्ञानमन्यथा	ज्ञानं भवत्यन्यथा
,,	२२	पञ्चतया	पञ्चतयी
,,	२९	एकतमवत्	एकतमत्
,,	३०	तच्च सप्रयोजनं	तच्च समासप्रयोजनं
३	६	चास्य	वाऽस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
३	११	चास्य	वाऽस्य
,,	२१	०भोगकर्मा०	०भोग्यकर्मा०
४	१२	जन्मनि	जन्म जन्मनि
,,	१७	एवोत्तरोपपत्ति०	एवोत्तरोत्तरोपपत्ति०
५	४	०प्यष्ट०	०प्यभीष्ट०
,,	१४	वा	वा,
,,	१५	०मेव	०मेव,
६	८	स्वामी विकल्पमाह	स्वामिविकल्पमाह
,,	३	चामुत्र,	चामु--त्र
,,	२६	पूर्वेभ्यो न्यूनेषु	पूर्वोभ्योऽन्यूनेषु
७	१६	कन्दफला०	कन्दमूलफला०
८	२६	पूजामर्हन्ते०	पूजा--मर्हन्ते०
९	१७	० भ्यर्च्या	०भ्यर्च्य
११	६	०मार्गाप्रदर्शनात्	०मार्गप्रदर्शनात्
,,	१३	श्रुताविधिभिः	श्रुतावधिभिः
,,	२१	उक्तसलिल०	उक्तं सलिल०
१२	१९	०मभिध्याय अभि०	०मभिध्यायन्नभि०
१३	१६	सिद्धेभ्यः	सिद्धेभ्यः,
,,	१७	प्रयुक्तं	प्रत्युक्तं
,,	२२	सूत्रीनिर्देशाद्	सूत्रनिर्देशाद्
१४	२	षड्विधमपि	०
,,	२७	०षमित०	०षामित०
१५	११	०भवनीयः इदं	०भवनीयमिदं
,,	२०	सम्बध्यते	सम्बध्यते,
,,	२१	गतमभि०	गतमपि
,,	२६	विशेषितमिति०	विशेषितमेवेति
१६	१	प्रवचने, इत्येतद्	प्रवचने–" इत्येतद्
,,	२	चेति	च " इति
,,	७	वचोरूपं	वचो रूपं
,,	१५	प्रत्यासं—	प्रत्यासं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१६	१५	कर्तुम्	कर्तुम् ?
,,	२९	०दुच्चिप्सेच्च	०दुच्चिक्षिप्सेच्च
१७	२०	०वृद्धिसंभवोऽवसीयते	०वृद्धिःसंभाव्यमानाऽवसीयते
,,	२१	श्रूयन्ते	श्रयते
१९	१७	उपेन्द्रवज्रा	वंशस्थविलम्
२१	२३	तत्प्रसङ्गप्रतिषेधो	तत्प्रसङ्ग इति प्रतिषेधो
२२	६	०मादि०	०माधमादि
,,	८	०शुद्धेः	०शुद्धे
,,	९	प्रवचने शुद्धि०	प्रवचनशुद्धि०
,,	२८	तीर्थकृत्त्वस्वाभा०	तीर्थकृत्तत्स्वाभा०
२४	१०	उ० प	उ० ५
३१	६	इन्द्रस्याजीवस्य	इन्द्रस्य जीवस्य
३३	१	लक्षति	लक्षयति
,,	४	निश्चितपरिज्ञानं	निश्चितं परिज्ञानं
,,	७	विशेष्यकल्पना	विशेषणविशेष्यकल्पना
३४	१	०प्रतिभागेन	०प्रविभागेन
,,	४	आत्मतातत्त्वं	आत्मना तत्त्वं
,,	७	चानुभवति	चानुभवन्ति
३६	१४	फणपरिणामेन	फणापरिणामेन
३८	१०	गतिशरीरा०	गतिजातिशरीरा०
४२	२७	०पार्ण्यादय	०पार्णादय०
४५	१	जीवाकारः प्रतिकृतिसद्भावे	जीवाकारा प्रतिकृतिः सद्भावे
,,	३१	खला	खलु
४६	६	दुहितृकादिसूत्र-	दुहितृकादि सूत्र-
४८	३	सम्भवन्ति	सम्भवति
५५	१७	पुद्गलादिरूपस्वप्रदेश०	पुद्गलादिरूपः स्वप्रदेश०
५६	२४	विवक्षैव	तस्या विवक्षैव
६२	१३	उपरिशाट०	परिशाट०
६३	,,	०विषाणादिकः	०विषाणादिके
६५	१	सम्यग्दशर्नम्	सम्यग्दर्शनम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
६६	२	अष्टौ चतुर्दशभागा देशोनाः	०
७०	,,	तत् श्रुत०	तत् सर्वं श्रुत०
,,	८	प्रति विशिष्ट०	प्रतिविशिष्ट०
७२	२१	स्पष्टो मतेः	स्पष्टो भवति मतेः
७४	६	निषेधात्	निषिद्धात्
,,	३४	निश्चयतः	निश्चयता
,,	१४	प्रत्यक्षं, प्रत्यक्षं चाद्ये	प्रत्यक्षं चाद्ये
,,	१९	ब्रते	ब्रूते
७६	१२	इन्द्रियनिमित्तत्वात्	इन्द्रियानिन्द्रियनिमित्तत्वात्
,,	२४–२५	देशा–दिति	देश इति
८८	२६	भवासाधन०	भावसाधन०
८९	२६–२७	०भिधाया–भिधानं	०भिधाय विधानं
९१	७	ख्यायन्ते	ख्याप्यन्ते
,,	८	सर्वकृतान्ताः	सर्वतीर्थकृतान्ताः
,,	२४	कर्करस्पर्श	कर्कशस्पर्श
९५	५	भदप्रयोजनं	भेदप्रयोजनं
,,	८	व्यवहि विप्र०	व्यवहितविप्र०
९९	१८	ततोऽरत्निमात्रे	ततो रत्निमात्रे
१०२	२३	प्रतिपतत्या	प्रतिपतति आ
१०६	१७	मनः–अनिन्द्रियं प्रतिविशिष्ट०	मनोऽनिन्द्रियप्रविष्ट०
११०	२१	कस्मिन्	एकस्मिन्
११५	१०	सङ्ग्रहः	सङ्ग्रहस्तस्मात् सर्वम्
,,	११	भवना०	भावना०
११६	५	घटादितैव	घटादिनैव
,,	२२	०र्थप्र०	०र्थनया अर्थप्र०
१२०	९	नित्यतो	इत्यतो
१२४	२९	०कुमारसिद्धिः	०कुमारप्रसिद्धिः
१२६	११	मतिज्ञानी मनुष्य०	मतिज्ञानी मनुष्यजीवस्य मनुष्य०
,,	१४	दृष्ट्या	दृष्ट्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१२६	१९	ज्ञानादीनां	ज्ञानानां
,,	२६	प्रमाणार्थवत् तन्त्रा	प्रमाणज्ञेयवत् तन्त्रा---
१२७	५	प्रकान्तनय०	प्रकान्तं नय०
,,	,,	चादर्शितं	च दर्शितं
१२८	३	स—समु०	स समु०
,,	९	०मानत्वाद्	०मानत्वात,
,,	१७	षणोपेतं,	षणोपेतं
,,	१८	एवम्भूत इव	एवम्भूत एव
१२८	१९	नान्यदिति	नान्यदेति
,,	२०	०ताविति चेत्	०ताविति चेत्
१२९	३०	गम्येते	गण्येते
१३१	९	जीवा जीवा	जीवौ जीवा
,,	१०	आद्यार्थः	आद्यार्थे
१३३	४	विपर्ययान	विपर्ययान्
१३४	२०	कश्चित् प्राणी	०
,,	२८	अथैवमेव लौकिका०	अथैवमेव किं लौकिका०
१३७	२४	रोदति	रोदिति
,,	३०	किंसतत्त्वः	किंसत्त्वः
१३८	१२	०नुदयलक्षणः	०नुदयक्षयलक्षणः
१४०	१९	मध्य--	मध्यगा--
१४२	२२	नियम्य	नियम्यं
१४३	५	०भेदात् मुक्त०	०भेदोन्मुक्त०
१४५	५	प्रतिपदविवरणे	प्रतिपदं विवरणे
१४८	१९	०निवृत्तौ	०निर्वृत्तौ
१४९	२९	युञ्जनं योगः	युजेर्योजनं योगः
१५०	२८	०र्हतानुमीयते	०र्हताऽनुमीयते
१५१	५	०लब्धार्थविषय०	०लब्धार्थे विषय०
१५१	१४	०संशयासर्वार्थ०	०संशयसर्वार्थ०
१५२	२१	०नाकार	०नाकार--
१५४	२२	विलक्षवचन०	विलक्ष्यवचन०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१५८	१३	उच्यते	उच्यन्ते
१५९	१२	०धोऽधः पाताल०	०धोऽधः पाताल०
१६०	५	छेद्यत्वादिदृष्ट०	०छेद्यत्वादि दृष्ट०
,,	१४	०शेषस्तथैव	०शेषस्तथैव,
,,	१९	०समतासमाहारा०	०समता समाहारा०
,,	२१	०मनित्थं रथं	०मनित्थंस्थं
,,	२५	तेजो०	तेजों वायू
,,	३१	अमनोज्ञतरामेव	अमनोमतरामेव
,,	३२	-पाठः ॥	पाठः ।
१६१	१२	देशान्तरा	देशान्तर–
,,	१३	०लक्षणेति,	०लक्षणेति
,,	१९	वा	वा,
१६२	२३	०तयाङ्गीकृता	०तयाऽङ्गीकृता
,,	३२	०भूते तिप्राणा	०भूते प्राणा०
,,	२	०भावैरतः	०भावैः, अतः
१६३	२	व	वा
,,	१५	स्तवनादीनामपि	सूचनादीनामपि
,,	१९	जुष्टानि	जुष्टानि–
,,	२८	'सूचनादीनां' इति ग-पाठः	'स्तवनादीनामपि' इति क-ख-पाठः
१६४	२	द्विः पञ्चकाभिधानात्	द्विपञ्चकाभिधानात्,
,,	८	०दोषोऽतः	दोषः, अतः
,,	११	०तया	०तया,
,,	१२	भवन्ति	भवन्ति,
,,	२१	०धार्यते, स्वरूपभेदाभ्यां	०धार्यते स्वरूपभेदाभ्यां,
,,	२२	०करणं	०करणं,
,,	२७	निर्माणनामकर्मा०	निर्माणनाम नामकर्मा०
१६५	३	द्वाराण्यव०	द्वाराणि, अव०
,,	१७	०विधाकाराः	०विधाकारा
,,	२०	विशेष अङ्गोपाङ्गनामनिर्माण०	विशेषः अङ्गोपाङ्गनाम निर्माण०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१६५	२१	संस्कृता	संस्कृता–
,,	२५	अङ्गोपाङ्गे	अङ्गोपाङ्गं
१६६	२	०निरपेक्षा	०निरपेक्षा,
,,	८	०यान्तरं निर्वृत्तौ सत्यपि	०यान्तरं, निर्वृत्तौ सत्यपि
,,	९	०णाति तस्मान्निर्वृत्तः	०णाति, तस्मान्निर्वृत्ते
,,	११	०मपि	०मपि,
,,	१२	कथयति	कथयति,
,,	१३	यदनुपहत्यात	यदनुपहत्या
,,	२९	तस्यायमर्थः	तस्यायमर्थः–
१६७	१२	कथं कृत्वोक्तं	कथंकृत्वोक्तं
,,	१७	जनितात्मनो	जनिताऽऽत्मनो
,,	२७	खुल	खलु
१६८	७	०श्रुत्य०	०श्रत्य०
,,	८	उपयोगपरि०	उपयोगः परि०
,,	१२	प्रसङ्गोत्यन्तास-	प्रसङ्गः ? अत्यन्तास-
,,	१३	०द्वारेण–	०द्वारेण
,,	१६	संवेदनानुभवनलक्षणा	संवेदनाऽनुभवनलक्षणा,
,,	२४	निवृत्त्यादीनां	निर्वृत्त्यादीनां
,,	२६	दर्शयति——	दर्शयति,
,,	२७	निर्वर्तन्ते	निर्वर्त्यन्ते
,,	२९	न च	नैव
,,	३०	०च्यते	०च्यते—
१७१	३१	श्रतज्ञानं	श्रुतज्ञानं
,,	३२	०विधविशे–	विधविशेषणाद् भावश्रुत-विशे-
१७२	६	वा	भावश्रुतपूर्वकत्वाद् वा
,,	१४	एतद्विहितावितानुभय०	एताद्धि हिताहितानुभय०
,,	२२	समस्तत	समस्त्यत
१७३	८	निचायि	निरचायि
१७४	१८	भाषितेनापि	भाष्यं ततोऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुद्धिपत्रकम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१७०	३	ध्वनिः,	ध्वनिः
१७७	१३	हरामीति मोहनीयोदयात्,	हरामीति, मोहनीयोदयात्
,,	२२	चाग्नेर्लक्षण०	चाग्नेर्न लक्षण०
१७७	२६	मतिस्मृतिसंज्ञाचिन्ताभिनि०	मतिः स्मृतिः संज्ञा चिन्ता ऽभिनि०
१७८	९	०रभावाद्	०रभावाद्,
,,	१३	०न्यस्यानु	०न्यस्यां तु
,,	१६	कर्मयोगः	कर्मयोगः,
१७९	८	०रब्धो	०रब्धौ
,,	१९	विग्रहगतेः	विग्रहगतौ
,,	२०	कार्मणमस्ति	कार्मणमिश्रः
१८०	९	व्यक्ति०	व्यक्त०
,,	१५	इत्याह—	इत्याह ।
१८१	२६	योगैर्जीवाः	योगे जीवाः
१८३	४	०क्काइए	०काइए
,,	७	०क्काइयत्ताए	०काइयत्ताए
,,	१४	तेणट्टेणं	तेणट्ठेणं
१८४	४	द्विसामायिक०	द्विसामयिक०
,,	८	०क्काइए	०काइए
१८४	१०	०क्काइयत्ताए	०काइयत्ताए
,,	१०	सेणं	से णं
,,	२६	त्रिसमया वा	त्रिसमया वा,
,,	२८	नास्तीति	नास्तीति,
१९१	४	०मित्यादि	०मित्यादि भाष्यम्
,,	८	प्रतिक्रष्टः	प्रतिकृष्टः
१९३	१८	न तु च	ननु च
,,	१९	० दुर्लभः	०दुर्लभः,
,,	२१	पोतजाः	पोतजाः—
,,	२३	०धीयते—	०धीयते
१९४	५	दधते	दधते—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१९४	६	नारकेष्विति	नारकेष्विति,
,,	२१	०धारणमवच्छेदो	०धारणम्–अवच्छेदो
,,	२६	०द्वान्तर०	०द्वाऽन्तर०
१९५	४	स्यात्	स्यात्,
,,	१२	०रूपतानेक०	०रूपताऽनेक०
,,	२४	स्याद्,	स्याद् ?
१९६	१	कर्मणस्तु	कार्मणस्तु
,,	१	च, यथापूर्वं	च, यथा—पूर्वं
,,	९	०मेकपरमाणु०	०मे(कै)कपरमाणु०
,,	११	समुल्लङ्घ्या	समुल्लङ्घ्य
,,	२६	तेषां	**तेषां**
१९७	५	०मर्थः	०मर्थः—
,,	१४	तथा	तथाऽऽ—
,,	१९	०दृश्यत्वात्	०दृश्यत्वात्,
,,	२५	०विशेषात्	०विशेषात्,
१९८	५	दृश्यन्ते	दृश्यते
,,	७	प्रदेशस्कन्धः	प्रदेशः स्कन्धः
,,	२८	प्रदशमानम्	प्रदेशमानम्
,,	३२	०दर्शयति—	०दर्शयति,
१९९	७	चार्थे	चार्षे
,,	८	मनोग्रहयोग्यकार्मणस्य	मनोग्रहणयोग्यः कार्मणस्य
,,	२१	०द्रव्याभावात्	०द्रव्यद्वयाभावात्
२००	१८	ताभ्या०	**ताभ्या०**
,,	१९	०मनादि०	**०मनादि०**
२०१	४	०कर्माधाय चेतसि, अवोचत् सूरिः	०कमाधाय चेतसि, अवोचत् सूरिः—
,,	६	०भवतः । सर्वस्यामवस्थायां	भवतः सर्वस्यामवस्थायां,
,,	२२	०प्रवणमानसं	प्रवणमानसः
२०३	२९	विकल्पो हेया तु	विकल्पो भवस्थताया हेयो नु हेयरूपतया तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२०६	२४	तत्पूर्विकैवा०	तत्पूर्विके चा०
२०७	१२	जन्मनि	०
२०८	,,	चतुर्दशपूर्वधर एव	चतुर्दशपूर्वधरस्यैव
२०८	१९	परिभूतपाप्मा	परिपूतमाप्मा
२१२	११	०ग्राह्यादयो	ग्राह्यतादयो
२१३	२३	अपर्यादाय	पर्यादाय
२१४	३०	स्पृष्टानि, पुरुषो भदन्त !	स्पृष्टानि, अथ भदन्त ! तेषां शरीराणामन्तरा किमेकजीवस्पृष्टा अनेकजीवस्पृष्टाः ? गौतम ! एकजीवस्पृष्टा, नानेकजीव स्पृष्टाः। पुरुषो भदन्त !
२१५	१४	मनुष्यसंयुतः	मनुष्यसंयतः
२२३	३	**देवकु–**	**सदेवकु–**
२२३	५	सत्ता०	सत्तसत्ता०
२२४	१५	यस्य	तस्य
२२६	३	नाम	समुद्घातो नाम
,,	२९	०वर्तनः	०वर्तनैः
२३१	५	गाहवतां	गाहवतां न पुनः
२३२	३	सू०, ५४	सू० ५४
,,	५	शर्कराद्याः	शर्कराप्रभाद्याः
२३२	१७	०भासुरा	०भास्वरा
,,	२५	पूर्वायां	पूर्वस्यां
२३३	१९	वसुधावर्तिनो	वसुधाऽधोवर्तिनो
२३४	१७	परितनाऽ–	परितनोऽ–
२३७	१५	**क्रमेणाधो०**	**क्रमेणाधोऽधो**
२३८	३	स्पष्टयति—लोचन०	स्पष्टयति—न कदाचिदक्षिनिमेषमात्रमपि न भवन्ति अर्थात् लोचन०
२४१	१९	०	परस्परोदीरितानीति भाष्यम्।
२४६	२६	त्रैविध्यं	त्रैविध्यम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२४६	३०	तदेतार्थेन	तदेतेनार्थेन
२४७	२२	षड्विध	षड्विधं
२४८	११	त्रितये	तृतीयो
,,	२९	वालाग्रभूता	वालाग्रभृता
२५१	२८	च	०
२५२	१६	चैतावत्या चा (सत्यावा)	चैतावती सत्या वा
२६२	१४	०रात्तममष्टौ	०रात्तनमष्टौ
,,	२४	आरात्तम०	आरात्तन०
२६३	१६	समुद्रेषूत्पत्स्यते	समुद्रेषूत्पद्यते
२६४	२२	०विशेत्	०विशेत
,,	३१	केन	०
२६९	७	नरायुषोमानम्	नरायुषो मानम्
२७२	६	५८४	४२१
२७३	९	०क्रीडागद्युतितिस्वभावाः	०क्रीडागतिद्युतिस्वभावा
,,	१२	विभिन्नः	विभिन्नं
,,	२७	अक्षरानिपातैः	अप्सरोनिपातैः
,,	२९-३०	षण्मासं व्यतिवर्तेत कियदेकं विमानं व्यतिवर्तेत कियदेकं न व्यतिवर्तेत	षण्मासान् व्यतिव्रजेत् अस्त्येककं यं विमानं व्यतिव्रजेत् अस्त्येककं यं न व्यतिव्रजेत्
२७४	२	दारुच्छेदप्रज्ञा०	दारुच्छेदे प्रज्ञा०
,,	१९	प्रतीयताम्	प्रतीयन्ताम्
,,	३१	भेद-	भेदा
२७५	१	अन्ते	अन्तं
,,	३	द्विर्विकल्पाः—	द्विविकल्पाः—
,,	११	अनुधा	अधुना
,,	२३	एकैक०	एक०
,,	२८	प्रत्यासन्नै(त्ते ?)श्चेति	प्रत्यासन्नश्चेति
२७७	२६	कार्य—	कार्ष—
२७९	२२	पञ्चविंशति०	पञ्चत्रिंशत्०
२८०	१	०ह्रसद्भि--	०ह्रसद्भि--

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२८०	१८	रहितम्	रहितत्वाच्च
२८१	१७	तत्कुमार०	तस्य कुमार०
२८२	२३	रन्तप्रभायां	रत्नप्रभायाः
,,	२५	रन्तप्रभायां	रत्नप्रभायां
२८५	२७	दशोत्तरयोजनशतबहुल	दशोत्तरं योजनशतं बहल
२८९	२१	त्रिपञ्चाशत् ०	पञ्चाशत्० (पाठान्तरम्)
२९०	२	सङ्ग्रहव्यव०	सङ्ग्रहाभिधानं व्यव०
,,	१०	ततः	अतः
,,	३०	पद्यते	पद्यन्ते
२९१	६	एष च	एष वा
२९२	२३	०विशिष्टोच्छ्वासपरि०	विशिष्टोच्छ्वासनिः-श्वासपरि०
२९३	१३	मानेन	मासेन
,,	२०	चतुरशी तिगुणिताः	चतुरशीतिगुणिताः
२९४	२१	एतान्येव	तान्येव
२९५	१४	नाद्यन्तं	नाद्यनन्तं
२९७	२	तेऽतः	ते च
,,	४	तत्रस्थं	तत्र स्थापित इति
२९८	३	**सौधर्मादिष्वित्यादि**	**सौधर्मादिषु कल्पविमानेषु वैमानिका देवा भवन्तीत्यादि**
,,	७	सर्वरत्नमयो	सर्वरत्नप्रायो
,,	११	माहेन्द्र समु०	माहेन्द्रः समु०
,,	१६	लघीयस्त्वावस्थिते०	लघीयस्त्वात् स्थिते०
३००	१६	भवत्युपरीति	भवत्युपर्युपरीति
३०१	२६	न्यूनतरा	न्यूना न्यूनतरा
३०५	१७	कनकवच्छुचयः	कनकवच्छवयः
३०७	१	रणाग्नि०	रणाद्यग्नि०
३०८	५	०मनुगच्छन्ति	०मधिगच्छन्ति
३०९	७	०प्रभूतीनां	०प्रभृतीनां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
३०९	१६	भवनासिनां	भवनवासिनां
३१२	२५	योजनीया	योजनीयं
३१५	१७	०र्मूलल क्षण०	०र्मूललक्षण०
३१६	३	प्रसक्त-	प्रसक्ते-
३१७	६	लाकारमास्कन्दन्तु)दु:)	लाद्याकारमास्कन्दन्तु (दु:)
,,	१३	संसर्गादीनि	संसर्गादीनि हि
३२०	४	०भूतात्मरूप०	०भूतात्मस्वरूप०
३२१	१६	सम्भवतो	सम्भवन्तो
,,	२४	०पत्तिन	०पत्तिर्न
३२२	६	०नाऽऽश्रियते	०नाऽनुश्रियते
,,	११	एतानि—अन्तराविष्कृतानि	एतानीति अन्तराधिष्कृतानि
३२५	६	०	पुद्गला एव रूपिणो भवन्तीत्यादि
३२६	२	आकाशादेक०	आऽऽकाशादेक०
३२८	१	धर्मादय:	धर्मादय: पुन:
३२९	१३	ति	इति
,,	२२	०प्रदेशे प्रस्ताव०	०प्रदेशप्रस्ताव०
३३०	६	प्रदेशाश्चर्मादिवत्	प्रदेशा धर्मादिवत्
३३२	१८	०पेक्ष्य	०पेक्ष्यं
३३६	१२	औदारिक०	औदारिकादि०
,,	१६-१७	देहे त्रैभाग:	देह-त्रिभाग:
,,	२२	पद्मनाल०	पद्मादिनाल०
३३७	१२	ब्रमो	ब्रमो
३३८	२१	०लक्षणस्य	लक्षणस्याव्याप्तता
३३९	१२	अनन्तरो०	अथानन्तरो०
३४०	६	ख—	स्व—
३४०	२५	मन्तातरं	मतान्तरं
३४१	१	ज्ञानाधि(नवि ?)कारेण	ज्ञानाकारेण
,,	३	मूर्तादि०	मूर्त्यादि०
,,	१७	पञ्चविधानीत्यादि भाष्यम्	पञ्चविधानि शरीराण्यौदारिकादीनिति भाष्यम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
३४२	११	०	**तत्र शरीराणी**त्यादि भा०
,,	२०	निसृजति	निसृजन्ति
३४६	१७	०पुद्गलजीव०	०पुद्गला जीव०
३४७	८	०रुपग्रह–	०रूपगृह्य–
,,	१४	लक्षणशब्दोपरि टिप्पणम्—बहिरन्तर्भेदाविवक्षया सामान्येन।	
३४८	१०	पानन्यभूत०	पानन्यभूत०
,,	२६	परिणामकारणं	परिणामिकारणं
३४९	१९	०मितेन	०मितेर्न
३५१	७	शिरीष०	शिरीषां
,,	८	०राच्छुरन्तः	०राच्छुरीतः
,,	२१	०पाटलप्रसवाः	पाटलाप्रसवाः
३५२	२८	प्रतिवाद्य०	प्रतिपाद्य०
३५४	२०	**चारणां**	**चाराणां**
३५५	१४	०भाजस्त इति	०भाज इति
३५७	२८	भोगार्थान्तर०	भागोऽर्थान्तर०
३५८	१२	०लाभत्वात्	०लाभात्
३५९	११	शब्दरूपा०	शब्दपरिणामरूपा०
,,	१४	०स्थितैरपि	स्थैरपि
,,	२६	फले वृन्त०	फलवृन्त०
,,	२९	स्यादध्रवत्वादिति	स्यादध्रुवत्वादिति
३६०	१४	वस्रसिको	वैस्रसिको
,,	२७	विवक्षितम्	न विवाक्षितम्
३६३	४	०भूर्यपत्रादिषु	०भूर्जपत्रादिषु
,,	४	अनुतट०	अनुचट०
३६४	२०	तद्वन्त्	तद्वन्त
३६५	२१	कारणकार्ययोर्नाशो०	कारणात् कार्यनाशो०
३६६	२५	सूत्रेऽत्र	सूत्रेण
३६७	२३	अणुस्तिष्ठत्य०	अणुस्तिष्ठन्त्य०
,,	२३	०हति-	०हानि-
३६९	११	बहुलोकसिद्धं	बहुलोकप्रसिद्धं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
३६९	१८	कन्दली०	कदली
,,	२२	पर्यायन-	पर्यायत-
३७०	२५	०गित्यण्। सौदामिनीति विद्युदेक०	०गित्यण् सौदामिनीति विद्युत्, एक०
३७१	४	कारणत्रविध्याविशेषे सति ॥	कारणत्रैविध्याविशेषे सति—
३७२	६	०	**भेदसङ्घाताभ्यामित्यादि** भाष्यम्
,,	८	दृश्या	दृशा
,,	२१	०विरोधिद्वयं	०विरोधि द्वयं
३७३	९	परिणामश्च	परिणामं च
,,	९	परितः	परिणतः
,,	१४	द्रव्याणां यथा०	द्रव्याणां च यथा०
,,	२०	ग्राह्य	ग्राह्यं
,,	२५	माभिप्रायः,	०मभिप्रायः—
,,	२९	प्रतिजानीते,	प्रतिजानीते
३७४	१५	०वस्थाप्रध्वंसो	०वस्था प्रध्वंसो
,,	१७	घटसंस्थानादि०	पटसंस्थानादि०
,,	२२	मात्रत्वाद्, वा	मात्रत्वाद् वा,
,,	२३	०पत्यवत्वे	०पत्यवत्त्वे
,,	२४	निवार्यते,	निवार्यते ?
,,	२६	०लभ्यन्ते प्रत्यक्षादिना	०लभ्यन्ते—प्रत्यक्षादिना
,,	२८	०भयाग्राहि०	०भयग्राहि
३७६	७	गवादि—	गवाश्वादि—
३७४	२९	पूर्वःपूर्वो विधिः परःपरो०	पूर्वः पूर्वो विधिः परः परो०
३७५	९	स्थितमिदं	स्थितमिदम्—
,,	१७	०स्वभावाऽन्य०	०स्वभावोऽन्य०
३७७	१४	यत्त	यत् तु
,,	१८	सहते	प्रसहते
३७८	१२	०ष्टान्यान्यार्थ०	ष्टोऽन्योऽन्यार्थ०
,,	१४	०स्थास्यते	०स्थाप्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुद्धिपत्रकम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
३७९	१२	सत्	सत्,
,,	१८	-यत-	-ऽऽयत-
,,	२७	०नेकं रूप०	०नेकरूप०
३८१	२३	भावा०	भवा०
३८४	४	धर्मादीनामपि	धर्मादिष्वपि
,,	१५	मूर्ति-	मूर्त्त-
,,	२०	योगो विज्ञातृ०	योगोऽपि ज्ञातृ०
३८५	३	०र्जुत्ववद्	०र्जुत्ववद्,
,,	१३	०सत्सर्व	सत् सर्व०
,,	१८	परिणामे नोत्पादः	परिणामेनोत्पादः
,,	२२	परिणतस्यापि	परिणतस्य
३८६	४	त्पद	त्पाद
,,	८	०क्षणानन्तर०	०क्षणोत्तर
,,	११	निभाल्यते	निभाल्यते,
,,	२६	स्वकरणै०	स्वकारणै०
,,	४	भवत्य०	न भवत्य०
३८७	१८	०वस्थापत्तिश्च	०वस्थोत्पत्तिश्च
३८८	७	वाचोयुक्त्या,	वाचोयुक्त्या—
,,	१८	पूर्वो-	अपूर्वो-
,,	२६	०स्वभावतयां	स्वभावतायां
३८९	१	स्वहेतुरेव	स्वहेतोरेव
,,	६	०मूर्तत्वापरि०	०मूर्तत्वादिपरि०
,,	८	उत्पादादीनामेककालत्वादि	इति विषयोल्लेखः
,,	१६	०भयाकारः	०भयाकारः,
,,	२७	विनाशः	विनाशः,
३९०	२४	इति	इति,
,,	३१	स्यात्	स्युः
३९१	१५	भिद्यते	भिद्यते,
३९२	३	तद्भावः	तद्भावः,
,,	१०	वाव्यये	वाव्ययं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
३९३	१६	न तूत्पादलक्षणः पर्यायो विनाशलक्षणो वा	क्रमपरिणत्या न भूत्यादिलक्षणः (पाठान्तरम्)
,,	२१	व्याहतम् अनेकधर्माधर्मी,	व्याहतम्, अनेकधर्माधर्मी
३९४	१	प्राकाश्यं	प्राकाश्यं वस्तु
,,	२३	०मयात्मकम्	०नयात्मकम्
३९५	४	बलवत्वाद्	बलवत्त्वाद्
,,	१६	किञ्चित्	कञ्चित्
,,	२५	एतदप्यसत्	कालान्तरे तत्रोष्णस्पर्शाभ्युपगमात् अथैव विशेष्यते पदैकत्र शीतो देशे तदेव तत्रोष्णो नास्तीत्येतदप्यसत्
३९६	२	०ग्रहणे	०ग्रहणेन
३९७	६	विरोधो नित्यानित्यवत्	विरोधः, नित्यानित्यवत,
,,	७	अन्योन्यं परस्परं	अन्योन्यं--परस्परं
,,	२३	इत्यद्भत०	इत्यद्भुत०
३९८	१७	तमस्तया च	तमस्तया प्रकाशतया च
३९९	२	प्रतिषेधसमग्रादेशविकलादेशौः,	प्रतिषेधविप्रतिषेधसमग्रादेशविकलादेशौः
,,		यतः सदेक०	यतः सदसदेक०
,,	१४	०र्पित व्यवहारः	र्पितव्यवहारः
३९९	२०	दर्पितधर्म०	०दर्पितानर्पितधर्म०
,,	२३	०स्तद्योग्य	०स्तद्योग्य-
,,	२४	व्यवहारार्पणाभ्यां	व्यवहारार्पणानर्पणाभ्यां
४००	११	द्रव्यं	द्रव्यं भव्यं
,,	१६	स्वतन्त्रौ	स्वतन्त्रः
,,	२५	०भ्यस्तद्द्रव्या०	०भ्यस्तद् द्रव्या०
४०१	५	०प्रतिक्षेपेण	०प्रतिपक्षेण
,,	११	प्रादुर्भावः	प्रादुर्भावात्
४०२	३	पर्यायनयश्चोत्पा	पर्यायनयस्योत्पा-
४०२	२३	अत्र वाक्ये	अत्र हि वाक्ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुद्धिपत्रकम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
४०४	६	(सूक्ष्म) सूक्ष्म-	सूक्ष्मसूक्ष्म-
,,	१५	०प्रयोजनान्येक०	०प्रयोजनान्येतान्येक०
,,	१९	परिणतेः	परिणतैः
		०त्यादि	०त्यादि भाष्यम्
४०८	१९	हितानामे(?)	हि नामे
४०९	१३	प्रागेतन (?)	प्रगेतन
,,	१८	सामान्ययोग०	सामान्यायोग०
,,	१८	प्रागेतन-	प्रगेतन-
,,	२९	इह	इह-
४१२	३	घटादिरूपकार्यः	घटादिरुपकार्यः
,,	६	नाप्येकशब्दः	नाप्येकः शब्दः
४१२	१०	एकशब्द	एकः शब्दः
,,	१९	विशेष्यत्वात्,	विशेष्यत्वात् ।
,,	२३	०न्नास्तिविशेषण०	०न्नास्ति विशेषण०
,,	२४	तावत् परिणाम०	तावत्परिणाम०
४१४	१७	युगपद्भूरि०	युगपद् भूरि०
,,	२१	वक्तरिति	वक्तुरिति
४१४	२३	**पर्यायेषु वा,**	**पर्यायेषु वा**
४१६	३	०स्यापिशब्दे०	०स्यापि शब्दे
,,	५	नरसिंह नर०	नरसिंहे नर०
,,	३०	श्रतप्रतियोगिनः	श्रुतप्रतियोगिनः
४१९	४	०परिणाम्यर्पितभजना०	०परिणाम्यर्पितानर्पितभजना०
,,	१३	प्रतिधीयते	प्रतिज्ञायते
४२०	३	०प्रदेशाभावेऽपि	प्रवेशाभावेऽपि
,,	१२	०रूक्षव्यवहारः	०रुक्षसंव्यवहारः
४२५	२	यथाऽधिकृतं	तथाऽधिकृतं
४२७	५	परिणम्यत्वं च	परिणम्यत्वं परिणामकत्वं च
४२९	२	तत्तद्गुणविशेषरूपादिपिण्डादिव्य-	तत्तद्ग्रहणविशेषरूपादि-
		पदेशे हेतुरित्यतः	पिण्डादिव्यवहारदेशितुरित्यतः
			(पाठान्तरम्)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
४३१	२८	०निरपेक्षेहत्य०	०निरपेक्षेहेत्य
४३३	१८	तेन	तेनव
४३४	२५	पञ्च (त्व एव)	पञ्चकादव्यतिरिक्तस्य
४३६	१	गुणानां	गुणपर्यायाणां
४४०	१७	**योगप-**	**योगोपयोगप-**
,,	२०	जीवेष्वपीति	जीवेष्वरूपिष्वपीति
,,	२३	कथं	काय
,,	२४	वाङ्मनोयोग्या पुद्गलानां	वाङमनोयोग्य औदारिक-वैक्रियाहारकयोगाश्चयः पुद्गलानां
,,	२६	सत्यमृषामृषाऽसत्या (मृषा)	सत्यमृषाऽसत्यामृषा
४४५	२९	तज्ञानस्य	श्रुतज्ञानस्य
४४६	५	तज्ञानस्य	श्रुतज्ञानस्य
४४७	५	मतिश्रता०	मतिश्रुता०
४४८	२२	०तुल्येकैकैक०	तुल्येकैकैकैक०
४४९	३०	मुख्यभेदै	मुख्यभेदौ
४६०	२	हीनः	हीनाः
४६२	६	आकाशादेक०	आऽऽकाशादेक०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International

For Private & Personal Use Only

www.jainelibrary.org

श्रेष्ठि-देवचन्द्र-लालभाई-जैनपुस्तकोद्धारे

अद्यावधि मुद्रितग्रन्थानां सूचिः ।

अंकः	ग्रन्थनाम	मूलकर्ता	टीकाकर्ता	रचनाकालः मूलं टीका	मुद्रण-स्थानं कालश्च	पण्यं	श्लोकसंख्या मू. टीका	पत्राणि प्रतयः	विशेषः	विषयः
१	वीतरागस्तोत्रम्	श्रीहेमचन्द्रसूरिः	प्रभानन्दसूरिः (अभय० जिनव-लभ. अभय. देव-प्रभशिष्यः)				मू. *२०० टी. २१००	प. ८९ प्र. ५००		वीतरागस्य स्तुतिः
,,	पञ्जिका		श्रीसोमसुन्दर-शिष्यः विशाल-राजः	१५१२	नि. सा. प्रे. मुंबई १९११	॥)	टी. ६२५		प्रथमादर्शः हर्षचन्द्रीयः	
२	श्रमणप्रतिक्रमणं	गणधरः			गुजराती-प्रेस मुंबई १९११	-॥)		प. १५ प्र. ५००		साधुव्रतातिचार-प्रतिक्रमणम्
३	स्याद्वादभाषा (प्रमाणनयत-त्त्वप्रकाशिका)	शुभविजयगणिः (हीरसूरिशिष्यः)	शुभविजयगणिः		गुजराती-प्रेस मुंबई १९११	-॥)		प. १४ प्र. ५००	श्रीविजयसेनसूरि-निर्देशात्	तत्त्वप्रमाणनयविचारः
४	पाक्षिकसूत्र-वृत्तिः	गणधरः	वीरगणिश्रीचन्द्र-यशोदेवः	११८०	नि. सा. प्रे. मुंबई १९११	।=)	मू. *३०० टी. २७००	प. ७८ प्र. ५००	अणहिलपाटनं	साधुमहाव्रतानि श्रुत-कीर्तनं च

* इयं सङ्ख्या अनुमानतः

अंकः	ग्रन्थनाम	मूलकर्ता	टीकाकर्ता	रचनाकालः मूलं टीका	मुद्रण-स्थानं कालश्च	पण्यं	श्लोकसंख्या मू. टीका	पत्राणि प्रतयः	विशेषः	विषयः
५	अध्यात्ममत-परीक्षा (पृथग् मूलम्)	हीरसूरि० विजयसेन-विजयदेव० विजयसिंह-काले	(कल्याण० लाभ० जीत० नयविजयशिष्यः) श्रीयशोविजयमहोपाध्यायः		नि. सा. प्रे. मुंबई १९११	।=)	गाथा १८४	प. ११४ प्र. ५००		दिगम्बरमतखण्डनम्
६	षोडशकम् (पृथग् मूलम्)	श्रीहरिभद्र-सूरिः	यशोभद्रः श्रीयशो-विजयमहोपाध्यायश्च		नि. सा. प्रे. मुंबई १९११	।=)	मू. २५७	प. १०६ प्र. ५००		धर्मपरीक्षादिः
७	कल्पसूत्रवृत्तिः (सुबोधिका)	भद्रबाहु-सूरयः	विनयविजयो-पाध्यायः (हीरसूरि-विजय-सेन-विजय-तिलक-विजया-नन्दकाले)	१६९६	जैनप्रेस सुरत. १९११	॥।)	मू. १२१६	प. ६०० प्र. ५००		जिनचरित्रं, स्थविरावली, सामाचारी च
८	वन्दारुवृत्तिः (श्रावकानुष्ठा-नाविधिः)	गणधरः	श्रीदेवेन्द्रसूरिः (तपा० श्रीजग-च्चन्द्रशिष्यः)		नि. सा. प्रे. मुंबई १९१२	॥)	टी. २७२०	प. ९६ प्र. ५००		श्रावकाणां षडावश्यकानि
९	दानकल्पद्रुमः	देवसुन्दर-	सोमसुन्दरशिष्य-जिनकीर्तिः		नि. सा. प्रे. मुंबई १९१२	।=)		प. ६५ प्र. ५००		धन्नाजीवन-वृत्तान्तः
१०	योगफिलॉसॉफी	श्रावकवर्यवीरचन्द्रः राघवजीपुत्रः			थॉम्सन, एण्ड को., मद्रास. १९१२	।-)		पृ. २६४ प्र. १०००	भंगाभाई कारभारी (संयोजकः)	इङ्गलैन्ड-अमेरिका-चिकागोप्रभृतिस्थलेषु वीरचंद्र राघवजी गांधीमहाशयस्य भाषणम् इ. स. १८९३
११	जल्पकल्पलता	सोमसुन्दर-मुनिसुन्दर-जयचन्द्र-रत्न-शेखरशिष्य रत्नमण्डनः रत्नशेखर-			नि. सा. प्रे. मुंबई	≡)		प. २३ प्र. ५००		देवसूरिशिष्यमाणिक्य-सूरेः शंकराचार्येण

Jain Education International
For Private & Personal Use Only
www.jainelibrary.org

Jain Education International

For Private & Personal Use Only

www.jainelibrary.org

		काले नन्दिरत्नशिष्यः		१९१२					सह कर्तृत्वादि-वादविवादः।
१२	योगदृष्टिसमुच्चयः	हरिभद्रसूरिः	स्वोपज्ञः	अहमदाबाद सिटि-प्रेस १९१२	≦)	टी. २२६	पृ. ९० प्र. ४७५		मैत्र्याद्यष्टदृष्टयः
१३	कर्मफिलॉसॉफी	दशमाङ्कवत्		ब्रह्मवादिन् मद्रास १९१३	।-)			दशमाङ्कवत्	
१४	आनन्दकाव्यमहोदधिः मौक्तिकं १								
,,	शालिभद्ररासः	जिनहंससशिष्यः मतिसारः	१६७८						
,,	कुसुमश्रीरासः	लावण्यविजयशिष्यनीतिविजयशिष्यगंगविजयः	१७७०	जैन प्रेस सुरत १९२३	॥=)		पृ. १६६ प्र. १०००	विजयदेव० प्रभ० रत्न० क्षमा० काले, भातरनगरे	
,,	अशोकचंद्रोहिणी.	आनन्दविमल० धरमसिंह० जय० कीर्ति० विनय० धीरविमलशिष्यनयविमलः	१७७२				प. ४६२ प्र. १०००	विजयप्रभुसम्मत्या ज्ञानविमलाचार्येण सुरतनगरे सैतपुर (सुखसागरेण) लिखितं अबरहानपुरस्य दलपुरे	
,,	प्रेमलालच्छीरासः	विजयानन्द० मुनिविजय० शिष्यः दर्शनविजयः	१६८९						
१५	धर्मपरीक्षा	पद्मसागरगणिः (धर्मसागर-विमलसागरशिष्यः)	१६४५	नि. सा. प्रे. मुंबई. १९१३	।-)	मू. १४८४	प. ५८ प्र. ५००		पुराणादीनां परीक्षा
१६	शास्त्रवार्त्तासमुच्चयः	श्रीहरिभद्रसूरिः श्रीयशोविजयोपाध्यायः		धर्म्माभ्यु० बनारस. १९१४	२)	*मू. ७०० टी.*१२०००	प. ४३१ प्र. ५००		नास्तिकादिदर्शनपरीक्षा

अंकः	ग्रन्थनाम.	मूलकर्त्ता	टीकाकर्त्ता	रचनाकालः मूलं टीका	मुद्रणस्थानं कालश्च	पण्यं	श्लोकसंख्या मूलं टीका	पत्राणि प्रतयः	विशेषः	विषयः
१७	कर्मप्रकृतिः	शिवशर्मसूरिः	मलयगिरिः		नि.सा.प्रे. मुंबई. १९१३	॥।=)	मू. ४७५	प. २२० प्र. ५५०		बन्धनादिकाष्टकरणानि
१८	कल्पसूत्रमूलं कालिकाचार्य-कथा च	श्रीभद्रबाहुसूरयः			नि.सा.प्रे. मुंबई. १९१४	॥)	मू. १२०० ६५ काव्यं	प. ६९५ प्र. १०००		जिनचरित्रादि कालिकाचार्यवृत्तान्तश्च
१९	पञ्च प्रतिक्रमणानि	गणधरादिः			,,	I)				
२०	आनन्दकाव्य-महोदधिः मौक्तिकं २ रामयशोरसायनरासः	विजयऋषिः धर्ममुनिः क्षेमसागरः पद्ममुनिः गुणसागरः केशराजः		१६८३ १०१४	जैन प्रेस सुरत.	॥=)		प. ३७० प्र. १०००		रामचरित्रम्
२१	आनन्दकाव्य-महोदधिः मौ० ३									
,,	भरतरासः	ऋषभदासः सागणपुत्रः		१६७८		॥=)				
,,	जयानन्दकेवली रासः	वाणाकविः विजयानन्दराज्ये		१६८६						
,,	वच्छराजदेवराजरासः	लावण्यसमयः (लक्ष्मीसागरराज्ये)							मुनिसुन्दरसूरेः ८००० श्लोकप्रमाणकचरित्रतः कथपुरम्	
,,	सुरसुन्दरी	नयसुन्दरः		१६४६	अहमदाबाद डायमंड जुबिली. १९१४	॥=)		प. ४३९ प्र. १०००		
,,	नलदमयन्तीरासः	मेघराजः पार्श्वचन्दः, रायचंद्रः	समरचन्द्रः	१६६४						

Jain Education International
For Private & Personal Use Only
www.jainelibrary.org

Jain Education International

For Private & Personal Use Only

www.jainelibrary.org

,,	हरिबलमच्छी-रासः	जिनहर्षः (जिनचन्द्रराज्ये)	१७४६						
२२	उपदेशरत्नाकरः	मुनिसुन्दरसूरिः		वि. सा. प्रे. मुंबई. १९१४	१।)	७७५	प. २३१ प्र. ५००		देव-गुरु-धर्म-श्रावकादिस्वरूपम्
२३	चतुर्विंशतिजिनानन्दस्तुतिः	श्रीविजयसेनकाले आनन्दविजय-शिष्यः मेरुविजयगणिः		निर्मल प्रि. प्रे. अहमदाबाद. १९१४	=)	६१६	प. ३० प्र. ५००		२४ तीर्थंकराणां स्तुतिः
२४	षट्पुरुषचरित्रं	देवसुन्दरशिष्यः क्षेमंकरः		लुहाना प्रे. बडोदा १९१५	=)		प. ४१ प्र. ५००		उत्तमोत्तमादिषट्पुरुषाः
२५	स्थूलभद्रचरित्रं	जयानन्दसूरिः		,, १९१५	=)	६९०	प. ४४ प्र. ७५०		शीलस्य महत्ता
२६	धर्मसंग्रहः पूर्वार्द्धः स्वोपज्ञः	विजयानन्दः शान्तिविजयशिष्यः मानविजयोपाध्यायः		वि. सा. प्रे. मुंबई. १९१५	१)	९४२३	प. २५९ प्र. ५००		सामान्येन विशेषतश्च गृहस्थधर्मः
२७	संग्रहणी (पृथग् मूलं)	अभयदेव० हेम० श्रीचन्द्रशिष्यः श्रीचंद्रः देवभद्रः		,, १९१५	।।।)	गाथा २७३ ३५००	प. १३८ प्र. ५००		देवनारकस्थितिभवावगाहनादिकम्
२८	उपदेशशतकं सम्यक्त्व-परीक्षा च	विबुधविमलः	१७९३	मद्रास ब्रह्मवादी १९१६	=)		प. १४ पृ. १९ प्र. ५००	आनन्दविमल-विजय-दान-हीरसूरि-सेन-सूरि-विजयदेव-विजय-प्रभ-राज्ये ज्ञानविमल-ऋद्धिविमल-कीर्ति-विमलशिष्यविबुधविमलः बौरंगाबादपुरे	सम्यक्त्वपरीक्षा तथा १२ भावनाः

अंकः	ग्रन्थनाम	मूलकर्ता	टीकाकर्ता	रचनाकालः मूलं टीका	मुद्रण-स्थानं कालश्च	पण्यं	श्लोकसंख्या मूलं टीका	पन्नाणं प्रतयः	विशेषः	विषयः
२९	ललितविस्तरा	हरिभद्रसूरिः	पञ्जिका–मुनिचन्द्रः		नि. सा. प्रे. मुंबई. १९१५	॥)	मू. १५४५ पंजि. २१५५	प. ११८ प्र. ५००		नमुत्थुणं चैत्यवन्दनं
३०	आनन्दकाव्य-महोदधिः मौ०३ शत्रुंजयरासः	जिनचन्द्र-सोमगणि-शान्तिहर्ष-शिष्यः जिनहर्षः		१७५५	सुरत ज. प्रे. ,,	॥।)		प. ६८० प्र. १०००		
३१	अनुयोगद्वाराणि (पूर्वार्द्धं)	गणधरः	वीरदेव-अभयदेव-हेमचन्द्रः		नि. सा. प्रे. मुंबई. १९१५	॥=)	मू. २२८५ टी. ५९००	प. २७१ प्र. ५००	हर्षपुरीये, प्रभवाहने,	उपक्रमो निक्षेपश्च
३२	आनन्दकाव्य-महोदधिः मौ० ४ हीरसूरिरासः	ऋषभदासकविः (सांगणपुत्रः) विजयानंद-सूरिराज्ये		१६८५	अहमदाबाद सिटी प्रेस. १९१६	॥=)		पृ. ४०० प्र. १०००	खंभात, खुरम पातिशाह	
३३	उत्तराध्ययनानि (प्रथमो विभागः)	जिन-प्रत्येकबुद्ध-वादिवेताल-ऋषि-गणधर-शान्तिसूरि-प्रमुखाः			नि. सा. प्रे. मुंबई. ,,	।=)	मू. २०७ नि. १२७	प. २२८ प्र. ५००		विनयपरीषहजयादिः
३४	मलयासुन्दरी-चरित्रं	जयतिलकसूरिः			गुजराती प्रेस. मुंबई.	।≡)	मू. २४२४	प. ९७ प्र. ५००		
३५	सम्यक्त्वसप्ततिः (तत्त्वकौमुदी) पृथग् मूलं	हरिभद्रसूरिः (?)		,, १४२२	नि. सा. प्रे. १९१३	१)	टी. ७११	प. २३८ प्र. ५००	अभयदेवजिनवल्लभस्य जिनशेखरपद्मचंद्र-विनयचंद्र-अभयदेव-देवभद्र-प्रभानन्द-श्री-चंद्र (विमलचंद्र) गुण-	श्रद्धादिः

Jain Education International
For Private & Personal Use Only
www.jainelibrary.org

						शेखरशिष्यः संघतिलकः, सोमतिलकाचार्यानुजदेवधंद्रवचनात् जिनप्रभ० दिल्लथां, महम्मदशाह, सोमकलशयशःकलशौ	
३६ उत्तराध्ययनानि (द्वितीयो विभागः)	जिन- गणधर-प्रत्येकबुद्धप्रमुखाः	वादिवेताल-शान्तिसूरिः	नि. सा.प्रे. १॥) मुंबई.	मू. २०८– ९२० नि. १२८– ४५७	प. २१९ –५१२ प्र. ५००		अकामसकाममरणादिः
३७ अनुयोगद्वार-सूत्रं (उत्तरार्द्ध)		हेमचन्द्र सूरिः	नि. सा. प्रे. १) मुंबई १९१६		प्र. १६९ प्र. ५००		
३८ गुणस्थानक्रमारोहः	रत्नशेखरसूरिः	स्वोपज्ञः	लुहाना ≈) प्रे. बडोदा १९१६	मू. १३५	पृ. ७० प्र. ७५०	वज्रसेनसूरि०हेमतिलकसूरिपट्टप्रतिष्ठितः रत्नशेखरसूरिः	१४ गुणस्थानानि
३९ धर्मसंग्रहणी (पूर्वार्द्ध)	हरिभद्रसूरिः	मलयगिरिः	नि.सा.प्रे. १॥) मुंबई १९१६	मू. ५४५	प. २१० प्र. ५००		ज्ञान-दर्शन-चारित्र-धर्मनिरूपणम्
४० धर्मकल्पद्रुमः	मुनिसिंह-शील-रत्न-आनन्दप्रभ-आनन्दरत्नकाले मुनिसागरशिष्यः उदयधर्मः		गुज. प्रे. १) मुंबई १९१७		प. २१७ प्र. ५००		दान-शील-तप-भावनास्वरूपम्
४१ उत्तराध्ययनानि (तृतीयो विभागः)	जिन-गणधर-प्रत्येकबुद्धप्रमुखाः	वादिवेताल-शान्तिसूरिः	नि. सा.प्रे. १॥≈) मुंबई १९१७	नि. ४५८ ५६२ मू. ९२१ १६४० सूत्र. ८८	प. ५१३ से ७१४ प्र. ५००	धारापद्रगच्छः	अष्टप्रवचनमातायज्ञसामाचारीत्यादिः

Jain Education International
For Private & Personal Use Only.
www.jainelibrary.org

अंकः	ग्रन्थनाम	मूलकर्ता	टीकाकर्ता	रचना-काल: मूलं टीका	मुद्रण-स्थानं कालश्च	पण्यं	श्लोकसंख्या मूलं टीका	पत्राणि प्रतयः	विशेषः	विषयः
४२	धर्मसंग्रहणी (उत्तरार्द्ध)	हरिभद्रसूरिः	मलयगिरिः		वि. सा.प्रे. मुंबई १९१८	१।)	५४६ से. १३९६	प. २११ से ४५१ प्र. ५००		ज्ञान-दर्शन-चारित्र-धर्मनिरूपणम्
४३	आनन्दकाव्यम-होदधिः मौक्तिकं ५ रूपचंदरास, नल-दमयंती रास, शत्रुञ्जयरासः		भानुमेरुशिष्यो नयसुंदरः	मू. १६३७	अहमदा- बाद डाय- मंड जुबिली १९१८	॥।)		प. ४४९ प्र. १०००	चैत्रगच्छादिपट्टावलिः	
४४	पिण्डनिर्युक्तिः	श्रीभद्रबाहुः	मलयगिरिः		गु. प्रे. मुंबई १९१८	१॥)	नि. ६७२ भा. ३७ टी. ७०००	प. १७९ प्र. १०००		उद्गमाद्याहारदोषाणां निरूपणम्
४५	धर्म्मसंग्रहः (उत्तरार्द्धः)	विजयानन्द-शान्तिविजयशिष्य-मानविजयोपाध्यायः			वि.सा.प्रे. मुबंइ ,,	१।)	मू. १५९ टी. १४६०२	प. १८९ प्र. ५००		स्थविरकल्पो जिनकल्पाधिकारश्च
४६	उपमितिभवप्रपंचा कथा (पूर्वार्द्ध)	सिद्धर्षिः		मू. ९६२	वि.सा.प्रे. मुंबई	२)		प. ४६८ प्र. ५००		आश्रवकषायविपाकादिः
४७	दशवैकालिकं	शय्यंभवः	हरिभद्रसूरिः वि० भद्रबाहुः		वि.सा.प्रे. मुंबई. १९१८	२॥)	नि. ३७३ गाथा सूत्र. ५१५ गद्य-सूत्र. २१	प. २८६ प्र. १०००		आहारशुद्धिसाधुत्वेत्यादिः
४८	अर्थदीपिका (श्राद्धप्रतिक्रमणसूत्रवृत्तिः)	सोमसुंदर-भुवनसुंदरशिष्यः रत्नशेखरः		मू. १४०६	वि.सा.प्रे. मुंबई. १९१९	२)	टी. ६६४४	प. २०४ प्र. १०००		श्रावकव्रतानामतिचारः
४९	उपमितिभवप्रपंचकथा	देल्लमहत्तरगर्गर्षि-सिद्धर्षि-सिद्धर्षिः			वि.सा.प्रे. मुंबई	२)	संपूर्ण १६०००	प. ४६९ स. ७७६	निर्वृतिकुले भट्टदेशे भिल्लमाले	इन्द्रियकषाय-विपाकादिः

Jain Education International
For Private & Personal Use Only
www.jainelibrary.org

	(उत्तरार्ध)				१९२०		प्र. ५००	
५०	जीवाजीवाभिगमः	स्थविराः	मलयगिरिः		नि.सा.प्रे. मुंबई १९१९	३।) मू. सू. ४५० टी. १४०००	प. ४६७ प्र. १०००	जीवाजीवादिः
५१	सेनप्रश्न० (प्रश्नरत्नाकर.)	हीरसूरि-विजय-सेनराज्ये शुभविजयः			मुं. वैभव प्रेस. १९१९	६)	प. १२४ प्र. १०००	साधुप्रमुखाणां प्रश्नोत्तराणि
५२	जम्बूद्वीपप्रज्ञप्तिः पूर्वार्द्ध (प्रमेयरत्नमंजूषा.)	स्थविराः	विजयदानहीरसूरिराज्ये, सकलचंद्रशिष्यः शान्तिचन्द्रः		नि.सा.प्रे. मुंबई १९२०	४)	प. ३८२ प्र. १०००	जम्बूद्वीप-ज्योतिषाधिकारः
५३	आवश्यकटिप्पनं	अभयदेवशिष्यः हेमचन्द्रः			,, १९२०	१॥।) ४६००	प. ११८ प्र. १०००	श्रीहरिभद्रसूरिकृतावश्यकटीकायाः स्पष्टीकरणम्
५४	जंबूद्वीपप्रज्ञप्तिः (उत्तरार्द्धम्)	स्थविराः			नि. सा. प्रे. मुंबई १९२०	२)	प. ३८३ पट्टावल्याः विस्तार से. ५४६ प्र. १०००	जम्बूवृक्षस्य ज्योतिषस्य चाधिकारः
५५	देवसीराइ				जैनविजय सु. १९२१	≡)	प्र. १०००	
५६	श्रीपालचरित्रं	ज्ञानविमलसूरिः अपरनामा नयविमलः		मू. १७४५	मुंबई वैभवप्रेस १९२१	॥।=) मू. १८००	प. ४४ विजयप्रभः, विजयरत्नः प्र. १००० विनयविमलः, धीरविमलः, नयविमलः, उन्नतनगरे	नवपदाराधनफलम्
५७	सूक्तमुक्तावली	प्राचीना			नि. सा. प्रे मुंबई १९२२	२)	प. १२६ प्र. १०००	धर्मोपदेशादयः १२७ विषयाः
५८	प्रवचनसारोद्धारः पूर्वभागः (तत्त्वज्ञानविकाशिनी)	नेमिचंद्रः (आम्रदेवशिष्यः, विजयसेनयशोदेवयोर्मध्यमः)	देवभद्रशिष्यः सिद्धसेनः		नि. सा. प्रे. मुंबई १९२२	३) मू. २००० टी. १६००० १०३ द्वा.	प. २२४ प्र. १०००	चैत्यवन्दनं, गुरुवन्दनं, प्रत्याख्यानं च २७६

Jain Education International
For Private & Personal Use Only
www.jainelibrary.org

अंकः	ग्रन्थनाम	मूलकर्ता	टीकाकर्ता	रचना-कालः मूलं टीका	मुद्रण-स्थानं कालश्च	पण्यं	श्लोकसंख्या मूलं टीका द्वाराणि	पत्राणि प्रतयः	विशेषः	विषयः
५९	तन्दुलवेयालियं	वीरहस्तदीक्षितः	विजयदानआनन्दविमलशिष्यः विजयविमलः		नि. सा. प्रे. मुंबई	1॥)	सूत्र. १९ गाथा १३९	प. ५७ प्र. १०००		दशदशादिः
,,	चउसरणं	वीरभद्रः			,, ,,		६३ गाथा.	प. ५८-७८ प्र. १०००		अर्हत्सिद्धादीनां वर्णनम्
६०	विंशतिस्थान-कचरितं.	जयचंद्रसूरिशिष्यः जिनहर्षः		मू. १५०२	बहादुर सिंहप्रेस पालीटाना. १९२३	1)	मू. २८००	प. ९५ वीरमपुरं प्र. ७५०		अर्हदादिविंशति-स्थानकाराधनफल-कथाः
६१	कल्पसूत्रसुबोधिका (आवृत्तिः द्वितीया)		सप्तमांकवत्		नि.सा.प्रे. मुंबई १९२३	२)		प. १९६ प्र. १०००		
६२	सुबोधा-सामाचारी	सामा-शीलभद्र-धनेश्वर-श्रीचंद्रः			मुं. वैभव प्रेस मुंबई १९२४	॥)		प. ५० प्र. १००		सम्यक्त्वव्रतारोपणादयः २६ विषयाः
६३	सिरिसिरिवाल-कहा (सटीकं.)	वज्रसेन-हेमतिलकशिष्यः रत्नशेखरः		मू. १४२८	भावनगर आनन्द प्रिं. प्रेस १९२३	1॥)	मू. १३४२ गा.	प. १५१ प्र. १०००		अर्हदादिनवपदाराधना
६४	प्रवचनसारोद्धारः उत्तरभागः पृथग् मूलादि	नेमिचंद्र (आम्रदेवशिष्यः विजयसेनयशोदेवयोर्मध्यमः)	देवभद्रशिष्यः सिद्धसेनः		नि.सा.प्रेस मुंबई १९२६	४)	१०८-१७७ द्वाराणि	प.२२५–५१९ प्र.१०००		चैत्यवन्दन-गुरुवन्दन-प्रत्याख्यानादयः ११६ विषयाः
६५	लोकप्रकाशः प्रथमभागे द्रव्यलोकः	श्रीविनयविजयगणिः			नि.सा.प्रे. मुंबई १९२६	२)		प. १३१ प्र.१०००		पल्योपमजीवाजीवादिनिरूपणम्

Jain Education International
For Private & Personal Use Only
www.jainelibrary.org

Jain Education International

६६ आनंदकाव्य- महोदधिः मौ- क्तिकं ७ " ढोलामारवणी रासः माधवाबल धवलरासः शकु- नचोपाई स्तंभन पार्श्व. स्तवन.चार प्रत्येकबुद्ध- चोपाई.	श्रीकुशललाभ, समयसुन्दरः	जशवंत सिंह प्रेस लिंबडी १९२६		पं. प्र. १०००	
६७ तत्त्वार्थाधिगम- सूत्रम् ५ अध्यायीमयः प्रथमो विभागः	श्रीमदुमा- स्वातिः श्रीदेवगुप्तसूरिः श्रीसिद्धसेनगणिः	कर्नाटक प्रे. मुंबई १९२६	६)	पृ. ४८६+४२ प्र. १२५०	जीवाजीवादि- विवरणम्

मुद्राप्यमाणा ग्रन्थाः

१ पञ्चवस्तुकम्
२ चौसरणपयन्ना
३ कथाकोशः
४ अर्थरत्नावली (अष्टलक्षार्थी)
५ जिनप्रभसूरिकृतकाव्यानि
६ लोकप्रकाशः (क्षेत्रलोकः)
७ नवपदप्रकरणम्
८ नवपदलघुवृत्तः
९ विचाररत्नाकरः
१० तत्त्वार्थाधिगमसूत्रम् (द्वितीयो विभागः)
११ आनन्दकाव्यमहोदधिः मौक्तिकं ८
१२ शास्त्रवार्तासमुच्चयः (स्वोपज्ञटीकासमेतः)
१३ नवस्मरणम् (सटीकम्)
१४ प्रियङ्करनृपकथा

For Private & Personal Use Only
www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org